(A) Words where the dental *na* is used instead of cerebral *na* :— *apramāna* (p. 287), *aprahīna* (p. 238), *abhinishkramana* (p. 274), *āvenika* (p. 80), *Airāvana* (p. 389), *kriyamāna*[1] (p. 69), *gauna* (p. 367), *Nārāyana* (pp. 14, 101), *nirvāna* (p. 364), *paramānu* (p. 65), *prahāna*[2] (p. 238), *prahīna*[3] (p. 28), *lakshana* (p. 417), *lavana* (p. 77), *vakshyamāna* (p. 193), *śonita* (p. 274), *śrāmanera* (p. 130), *śrāmanyaphala* (p. 57), etc.

(B) Words where cerebral *ṇa* is used instead of dental *na* :— *aṇārya* (p. 89), *aṇāsrava* (p. 365), *abhilapaṇa* (p. 20), *kīrtaṇa* (p. 83), *gagaṇa* (p. 13), *ṇiśraya* (p. 12), *ṇishyandaphala* (p. 177), *ṇirodha* (p. 289), *ṇirvāṇa* (p. 136), *pariṇidarshaṇa*, *daurmaṇasya*,[4] *nirvartaṇa* (p. 136), *pariṇirvāṇa* (p. 339), *pariṇirvita* (p. 426), *pāṇa* (pp. 12, 128),

---

[1] Also *kriyamāṇa* (p. 259).

[2] Also *prahāṇa* (pp. 146-7).

[3] Also *prahīṇa* (p. 147).

[4] These two words are always spelt in this way.

pravartaṇa (p. 50), *mahāyāṇa* (p. 358), *yoṇiśo manasikāra* (p. 296), *rachaṇā* (p. 192), *vivarjaṇa* (p. 46), *śrāvakayāṇa* (p. 358), *hīṇa* (p. 384), etc.

Similar irregularities are found in the case of inflexions :—

(1) Nominative case—*trīni* (p. 23), *dravyāni* (p. 405), *nāmāṇi* (p. 120), *balāṇi*[1] (p. 357), *mauneyāṇi* (p. 150), *viśishṭāṇi* (p. 45), *sarvāni* (p. 54), etc.

(2) Instrumental case—*atyayeṇa* (p. 132), *aśaikshena* (p. 23), *upachayeṇa* (p. 374), *kramena* (p. 23), *parivartiṇā* (p. 412), *pratyayeṇa* (p. 412), *mārgena*[2] (p. 57), *saṁgrahena* (p. 8), etc.

(3) Genitive case—*indriyānām* (pp. 6, 34, etc.), *kāryānām* (p. 38), *Kauravānām* (p. 91), *pramukhānām* (p. 86), *mūrtāṇām* (p. 15), *yogiṇām* (p. 20), *shannām* (p. 213), etc.

It can be seen from these examples that there is a tendency to cerebralise the *na* when it is in the proximity of *ra*. This tendency can be fully observed in combinations like *anayor ṇāsti* (p. 344), *adibhir ṇāmabhiḥ* (p. 38), *chatvāro ṇikāyāḥ* (p. 288), *chittayor aṇyatarat* (p. 46), *trayor aṇiyaṃah* (p. 40), *puṇar etc.* (p. 40), *viśuddhir aṇāsravaiḥ* (p. 49), etc., and compounds like *chāṇūra-ṇārāyaṇa* (p. 389), *dushṭa-ṇigraha* (p. 154), *dharma-ṇirvachana* (p. 44), *vaira-ṇiryātana* (p. 154), *svara-ṇirghosha* (p. 189), etc.

It is not possible to decide whether these irregularities are to be attributed to the Dīpakāra or to the scribe of our MS. Judging by the chaste and cultured language of our text and the knowledge of the Sanskrit grammar it exhibits in its discussions on the formation of several terms,[3] it seems unlikely that the Dīpakāra would commit such inconsistent violations of the rules of grammar. These irregularities appear to be the result of a faulty MS. tradition, possibly due to the scribe or scribes following the dialectal peculiarities of their native land.

---

[1] Also *balāni* (p. 358).

[2] Also *mārgeṇa* (pp. 58, 59).

[3] Vide *Adv.* pp. 3, 111, 273-4.

ACKNOWLEDGEMENTS

In editing the *Abhidharma-dīpa* I have received invaluable help from my colleagues both in India and in Britain The work was undertaken at the instance of my revered teacher Pandit Sukhalalji Sanghavi. The late Acharaya Narendra Deva, who evinced a keen interest in Abhidharma studies, directed me towards a comparative study of the *Dīpa* with the *Abhidharma-kośa-bhāshya* of Vasubandhu. This was made possible by the generosity of Professor Prahlad Pradhan who kindly gave me access to his press-copy of the *Abhidharma-kośa-bhāshya*. I am deeply grateful to Professor A. S. Altekar, the General Editor of the Tibetan Sanskrit Works Series for his permission to quote and print passages from the above work in the present edition of *Dīpa*.

The editing and printing of the text was almost complete in 1956, when I left the Hindu University, Banaras, to join the School of Oriental and African Studies, University of London, where I wrote the Introduction under the supervision of Professor J. Brough. In the course of these studies, I have received valuable help from many of my colleagues in the School, notably Professor W. Simon, Dr. D. Snellgrove, Dr. D. Friedman, Mr. J. E. B. Gray, and Dr. R. E. Asher. I have also received helpful suggestion from Professor T. R. V. Murti of the Hindu University, Banaras, Professor J. W. De Jong of Leiden, and Dr. Edward Conze. To all these I offer my sincere thanks.

Finally I should like to express my deep sense of gratitude to my exteemed friend Pandit Dalsukh Malvania of the Hindu University, Banaras, who was associated from the beginning with the editing and without whose help the task would not have been brought to a successful conclusion.

The whole work was submitted as a thesis for the Ph.D. Degree of the University of London. Lack of space has prevented me from publishing the whole Introduction. What appears here may be supplemented by the following articles in the *Bulletin of the School of Oriental and African Studies* : (i) 'On the theory of two Vasubandhus' (Vol. XXI, Part, 1, 1958) ;(ii) 'The Buddha's prolongation of life' (Vol. XXI, Part 3, 1958); (iii) 'The Vaibhāshika theory of Words and Meanings' (Vol. XXII, Part 1, 1959). (IV) The Sautrāntika theory of *bīja* (Vol. XXII, Part 2, 1959), (V) The development of the theory of Viprayukta saṁskāras (Vol. XXII, Part 3, 1959.)

School of Oriental and African Studies **P. S. Jaini**
University of London

SELECT BIBLIOGRAPHY

(*Also see the Abbreviations*)

A. Text

Abhidharma-kośa-kārikās of Vasubandhu. Ed. G. V. Gokhale. *JRAS.* (Bombay), Vol. 22, 1946.

Ālambana-parīkshā of Dignāga with the commentary of Dharmapāla. Restored into Sanskrit from the Tibetan and Chinese by M. Aiāsvāmy Sāstri. The Adyar Library, 1942.

Chatuḥśataka of Āryadeva, Part II. Translated from the Tibetan by V. Bhattacharya. Visvabharati Series 2, Santiniketana, 1931.

Jñānabinduprakaraṇa of Yaśovijaya. Ed. S. Saṅghavi. Singhī Jain Series 16, Calcutta, 1942.

Tattvasaṅgraha of Śāntarakshita with *Pañjikā* of Kamalaśila, Vols. I-II. Gaekwad's Oriental Series, Vols. XXX-XXXI, Baroda, 1926.

Trisvabhāva-nirdeśa of Vasubandhu. Translated from the Tibetan into Sanskrit by S. Mukhopādhyāya. Visvabharati Series 4, Calcutta, 1939.

Divyāvadāna. Ed. B. Cowell and R. E. Neil. Cambridge, 1886.

Paṭisambhidāmagga. PTS., 1905-7.

Pātañjalasūtrāṇi with the scholiam of Vyāsa and the *Tattva-vaiśāradī* of Vāchaspati. Ed. R. S. Bodas. Bombay Sanskrit Series, 1892.

Bodhisattvabhūmi. Ed. U. Woghihara. Tokyo, 1930-36.

Bhagavatīsūtra with the *Vṛitti* of Abhayadeva. Surat, Jamnagar, 1940.

Madhyāntavibhāgaṭīkā of Sthiramati, Part I. Ed. S. Levi and S. Yamaguchi. Nagoya, 1934.

Mahākarmavibhaṅga et *Karmavibhaṅgopadeśa.* Ed. S. Levi. Paris, 1932.

Mahāparinirvāṇasūtra, Vol. I. Ed. E. Waldschmidt. Akademieverlag, Berlin, 1950.

Milindapañho. Ed. R. D. Vadekar. Bombay University Publications, 1940.

Mūlamadhyamaka-kārikās de Nāgarjuna, avec la *Prasannapadā* commentaire de Chandrakīrti. Ed. L. de la Vallee Poussin. Bibliotheca Buddhica IV, St. Petersbourg, 1913.

Yamaka. PTS., 1911 and 1913.

Yamaka Aṭṭhakathā. SHBS., Vol. XL, Part I, 1936.

Laṅkāvatārasūtra. Ed. B. Nanjio. Bibliotheca Otaniensis, Vol. I., Kyoto, 1923.

Lalitavistara. Ed. S. Lefmann. Halle, 1902.

Vākyapadīya of Bhartṛihari (Brahmakāṇḍa with *Bhāvapradīpa* commentary). Ed. S. Sukla. The Kashi Sanskrit Series 24, Banaras, 1937.

Vigrahavyāvartanī of Nāgārjuna. Ed. R. Sānkṛityāyana. Appendix to *JBORS.*, Vol. XXIII, 1937. Also by E. H. Johnson and A. Kunst in *MCB.*, Vol. IX, 1948-51 (pp. 99-152).

Ślokavārttika (Mīmāṁsā) of Kumārila Bhatta with the commentary of Jayamiśra. Ed. C. K. Raja. Madras University Sanskrit Series 17, 1946.

Saddharma-puṇḍarīka-sūtram. Ed. N. Dutt. Bibliotheca Indica, Asiatic Society, Calcutta, 1953.

Sarvadarśana-saṅgraha of Mādhava. Ed. V. S. Abhyankara. Government Oriental Hindu Series, Vol. I, Poona, 1924.

Syādvādamañjarī of Mallisheṇa. Ed. A. B. Dhruva. Bombay Sanskrit and Prakrit Series, No. LXXXII, 1933.

B. Translations

L'Abhidharmakośa de Vasubandhu, Vols. I-VI. Tr. L. de la Vallee Poussin. Paris, 1931.

Book of the Discipline (*Vinaya Piṭakam*), Parts I-V. Tr. I. B. Horner. Sacred Books of the Buddhists, London, 1938-52.

Buddhist Manual of Psychological Ethics (*Dhammasangaṇi*). Tr. C. A. F. Rhys Davids. Oriental Translation Fund New Series, Vol. XII, Royal Asiatic Society, London, 1900.

Compendium of Philosophy (*Abhidhammattha-saṅgaho*). Tr. S. Z. Aung. PTS. 1910.

Dialogues of the Buddha (*Dīgha-nikāya*), Parts I-III. Tr. T. W. Rhys Davids. Sacred Books of the Buddhists, London, 1899-1912.

The Expositor (*Atthasālinī*), Vols. I-II. Tr. Maung Tin. PTS., 1920-21

History of Buddhism by Bu-Ston. Tr. E. Obermiller. Heidelberg, 1931-32.

Mahāyāna-Sūtrālaṁkara of Asanga, Vol. II. Tr. S. Levi. Paris, 1911.

Points of Controversy (*Kathāvatthu*). Tr. S. Z. Aung and C. A. F. Rhys Davids. PTS., 1915.

La Siddhi de Hiüan Tsang, Vols. I-II. Tr. L. de la Vallee Poussin. Paris, 1928-9.

Śikshā-samuccaya of Śāntideva. Tr. C. Bendall and W. H. D. Rouse, Indian Texts Series, London, 1922.

Sūtrālaṁkāra of Aśvaghosha. Tr. E. Huber. Paris, 1908.

Tārānāth's Geschichte des Buddhismus in Indien. Tr. A. Schiefner. St. Petersburg. 1869

Tattvasaṅgraha, Vols. I-II. Tr. G. Zha. Gaekwad's Oriental Series, Vols. LXXX and LXXXIII, Baroda, 1937-9.

Traite de la Demonstration de l'Acte. Tr. E. Lamotte. *MCB.*, Vol. IV, 1936, (pp. 207 ff).

Le Traite de la Grande Vertu de Sagesse de Nāgarjuṇa (*Mahāprajña-pāramitā-śāstra*), Vols. I-II. Tr. E. Lamotte. Bibliotheque de Museon, Vol. XVIII, Louvain, 1944 and 1949.

C. Modern Works

Banerjee, A. C. *Sarvāstivāda Literature.* Calcutta, 1957.

Beal, S. *Buddhist Records of the Western World,* Vol. I. Trübner's Oriental Series, London, 1906.

Frauwallner, E. *On the Date of the Buddhist Master of the Law Vasubandhu.* Serie Orientale Roma, III, 1951. *Die Philosophie des Buddhismus.* Berlin, 1956.

Har Dayal. *The Bodhisattva Doctrine in Buddhist Sanskrit Literature.* London, 1932.

Jaini, P. S. 'On the Theory of Two Vasubandhus'. *BSOAS.*, Vol. XXI, 1, 1958, (pp. 48-53).

Lamotte, E. 'L' Alayavijñāna dans le *Mahāyānasaṁgraha*'. *MCB.*, Vol. III, 1935, (pp. 169-255). 'Le Traite de l'Acte de Vasubandhu *Karmasiddhi-prakaraṇa*'. *MCB.*, Vol. IV, 1936, (pp. 151 ff).

Masuda, J. 'Origin and Doctrines of Early Indian Buddhist Schools'. *Asia Major*, 2, 1925, (pp. 1-78).

McGovern, W. M. *A Manual of Buddhist Philosophy,* Vol. I. London, 1923.

Mookerji, S. *The Buddhist Philosophy of Universal Flux.* University of Calcutta, 1935.

Murti, T. R. V. *The Central Philosophy of Buddhism.* London, 1955.

Narendradeva. *Baddha-dharma-darśana.* Bihar Rāshtṛabhāshā Parishad, Patna, 1956.

Nyanaponika. *Abhidhamma Studies.* Island Hermitage Publication No. 2, Colombo, 1949.

Nyanatiloka. *Guide through the Abhidhamma-Piṭaka.* Colombo, 1938.

Przyluski, J. 'Dārshṭāntika, Sautrāntika and Sarvāstivādin'. *IHQ.*, Vol. XVI. 2, 1940.

Rockhill, W. W. *The Life of the Buddha and the Early History of His Order.* London, 1884.

Sānkṛityāyan, R. 'Second Search of Sanskrit Palm-leaf MSS. in Tibet'. *JBORS.* Vol. XXIII, 1, 1937, (pp. 1-57).

Sojen, Y. *Systems of Buddhist Thought.* Calcutta, 1912.

Stcherbatsky, Th. *The Soul Theory of the Buddhists.* Bulletin de l'Academie des Sciences de Russie, Petrograd, 1920. *The Central Conception of Buddhism.* Prize Publication Fund, Vol. VII, London, 1923. *The Conception of Buddhist Nirvāṇa.* Leningrad, 1927. *Buddhist Logic*, Vols. I-II. Bibliotheca Buddhica, XXV-VI, Leningrad, 1930.

Suzuki, D. T. *Studies in the Laṅkāvatāra-sūtra.* London, 1930.

Takakusu, J. 'On the Abhidharma Literature of the Sarvāstivādins'. *JPTS.*, 1904-5, (pp. 67-145). 'Life of Vasubandhu by Paramārtha'. *T'oung Pao*, Serie II, Vol. V, 1904, (pp. 269-96).

de la Vallee Poussin, L. 'Notes sur l'Alaya-vijnāna'. *MCB,* Vol. III, 1945, (pp. 145-168). 'Sarvāstivāda (Documents d'Abhidharma)'. *MCB.*, Vol. V, 1937, (pp. 1-157).. 'Le Bouddhisme et le Yoga de Patanjali'. *MCB.*, Vol. V, 1937, (pp. 223-242).

Watters, T. *On Yuan chwng's Travels in India.* Oriental Translation Fund New Series, Vol. XIV, London, 1904.

Winternitz, M. *A History of Indian Literature*, Vol. II. University of Calcutta, 1933.

APPENDIX

A table showing correspondence between the kārikās of the *Dīpa* and the *Kośa*. Numbers on the left refer to the kārikas of the *Dīpa*, and on the right refer to the kārikās of the *Kośa*.

Kośasthāna I

1	I	1
5-6	I	20
7-8	I	17-18
9	I	27
10	I	22
11	I	25
12	I	26
14	I	28
16	I	23
17	I	29
18	I	30
19	I	31-32
20	I	33
36	I	34-5
37	I	36
38	I	37
39	I	38
40	I	40
41	I	39
42	I	41
44	I	42
45	I	43
48-9	I	46
50	I	47
51-2	I	7-8
53	I	19
54	I	45
57	I	44
71	I	48

Kośasthāna II

76	II	1
77	II	2
78	II	3-4
79	II	5
80	II	6
86	II	7
89	II	13
90	II	14
91	II	15
92	II	16
99	II	17-8
100	II	19
101-7	II	21
108-9	II	20
110	II	22
111	II	23
112	II	24
113	II	25
114	II	26
115	II	27
122-3	II	28
124	II	30
125	II	31
126	II	34
128	II	35
129	II	36
134	II	41
135	II	42
136	II	43
138-9	II	45
142	II	47ab
149	II	47cd 48

Kośasthāna III

150	III	101
151	III	102

Kośasthāna IV

154-5	IV	1
158	IV	2
164	IV	33-4
165	IV	35
166	IV	36
167	IV	37
168	IV	38
169	IV	39
170-1	IV	40-1
172	IV	42
173	IV	43
174	IV	45
175	IV	46
176	IV	47
177	IV	48
178	IV	50
179	IV	51
180	IV	52-3
181	IV	54
182-3	IV	55-6
184	IV	57-8
185	IV	59-60
186-7	IV	61-2
188	IV	64-5
189	IV	66
190	IV	67
191	IV	68
192-4	IV	70-1
195	IV	73
196	IV	74
197	IV	75
198-9	IV	76-8
200-2	IV	81-2
203	IV	83-4
204-5	IV	85
206	IV	87
207	IV	88
208	IV	89
209	IV	90
210	IV	91
211	IV	92
212	IV	93
213	IV	94-5
222	IV	94
225	IV	108-9
231	IV	112
242-3	IV	109-110
244	IV	113
245	IV	114
246	IV	115
247	IV	116
248-50	IV	117-8
251	IV	120
252	IV	121
253	IV	125
254	IV	122
255-6	IV	123-4
257	IV	125
258	IV	126

Kośasthāna V

261	V	1
262-3	V	2
264	V	3
265	V	4
266-7	V	5
268	V	6
269-72	V	7-8

273-4	V	9
275-6	V	10-11
278	V	12
281	V	13
282	V	14
283	V	15
284	V	16
285	V	17
286	V	18
287-8	V	39
289	V	19
290-2	V	20-1
294	V	22
296	V	23
297	V	24
299	V	25cd
301-2	V	26
305	V	25ab
320	V	27
325	V	28
328	V	29
329	V	30
330	V	31
356	V	32
357-8	V	32-3
359	V	34
360	V	35
361	V	36
362	V	38
363-4	V	41
365	V	43
369	V	45
371	V	46
372	V	49-50
373	V	47
374	V	48
375	V	49
376	V	51
377	V	55
378	V	60
379	V	56
380-1	V	57
382	V	58
383	V	52

Kośasthāna VI

384	VI	16
393-5	VI	17
421	VI	20
424	VI	26-8
426	VI	37-8
427	VI	39
428	VI	40
429	VI	41
430	VI	42
431-3	VI	43-4
434	VI	45
435	VI	1cd
437	VI	45cd
438	VI	62, 64
439	VI	65
440	VI	66
441	VI	67
442-3	VI	68-9
457-8	VI	71
459	VI	72
462-3	VI	73-4
466-7	VI	75-6
468-9	VI	77
471	VI	78
472	VI	79

Kośasthāna VII

479	VII	7
480	VII	9
482	VII	13
483	VII	16
484	VII	17
485	VII	18
486	VII	19
489	VII	20
490	VII	21
491	VII	22
492	VII	23
493	VII	28-9
504	VII	30
505	VII	31
506-7	VII	32
508	VII	33
509	VII	35
511	VII	36
512-4	VII	37-8
515	VII	39
516	VII	40
517	VII	42
518	VII	43
519-20	VII	44
521-2	VII	45
523	VII	46
524-5	VII	48
526-7	VII	49
528-9	VII	50-51
530-1	VII	52-53

Kośasthāna VIII

534	VIII	1
536	VIII	2
539	VIII	5
541	VIII	6
542-3	VIII	7
544-5	VIII	8
546	VIII	9
548	VIII	11
549	VIII	12
550	VIII	13
551	VIII	2, 3
552-3	VIII	4
554	VIII	22
568	VIII	19, 20cd
578	VIII	20ab, 21ab
580	VIII	23cd
581-2	VIII	24
583-5	VIII	25-7
586-7	VIII	28
588	VIII	29
591	VIII	30
592	VIII	31
593	VIII	32
594-5	VIII	33
596	VIII	34
597	VIII	35

अभिधर्मदीपः

विभाषाप्रभावृत्तिसहितः ।

प्रथमोऽध्यायः ।

प्रथमः पादः ।

[I. B, 1. Fol. 1a](1) ॐ स्वस्ति । नमः सर्वज्ञाय ।

[1] यो दुःखहेतुव्युपशान्तिमार्गं प्रदर्शयामास नरामरेभ्यः ।

अत्र षष्ठीसमासपरिग्रहे सति मार्गसत्यं प्रधानम् । तथा चोक्तम्—"मार्गविदोहं मार्गस्य.........."[१] [इति] विस्तरः । तदुक्तं भवति—यो देवमनुष्येभ्यो मार्गं प्रदर्शितवानिति ।

समाहारलक्षणद्वन्द्वपरिकल्पे [तु चतु] र्णामप्यार्यसत्यानां प्राधान्यम् । तथा चोक्तम्—"इदं दुःखसत्यमिति(2) भिक्षवः पूर्वमननुश्रुतेषु धर्मेषु धर्मचक्षुरुदपादि" इति विस्तरः ।[२] तदुक्तं भवति—यो देवमनुष्येभ्यश्चत्वार्यार्यसत्यानि प्रदर्शितवानिति ।

तत्र दुःखसत्यमेकविधमभिनिर्वृत्तिस्वाभाव्यात् । तथा चोक्तम्—"दुःखा हि भिक्षवो भवाभिनिर्वृत्तिः" इति । जात्याद्यष्टप्रकारं[3] वा फलभूता

---

[१] A blank space of about five letters in the MS.

[२] Cf. इदं दुक्खं अरियसच्चं ति मे भिक्खवे, पुब्बे अननुस्सुतेसु धम्मेसु चक्खुं उदपादि, ञाणं उदपादि, विज्जा उदपादि, आलोको उदपादि । *Vinaya*, I. p. 11.

Cf. also, इति दुःखमिति मे भिक्षवः पूर्वमश्रुतेषु धर्मेषु योनिसो मनसिकाराद्बहुलीकाराज्ज्ञानमुत्पन्नं चक्षुरुत्पन्नं मेधोत्पन्ना प्रज्ञोत्पन्ना आलोकः प्रादुर्भूतः । *Lalita-vistara*, p. 417.

[3] Cf. इदं खो पन भिक्खवे, दुक्खं अरियसच्चं—जाति पि दुक्खा, जरा पि दुक्खा, व्याधि पि दुक्खा, मरणं पि दुक्खं, अप्पियेहि सम्पयोगो दुक्खो, पियेहि विप्पयोगो दुक्खो, यं पि इच्छं न लभति तं पि दुक्खं, सङ्खित्तेन पञ्चुपादानक्खन्धा पि दुक्खा । *Vinaya*, I. p. 10. Cf. also, *Lalita-vistara*, p. 417.

वा पञ्चोपादानस्कन्धाः । अथवा पौर्वान्तिकं पञ्चाङ्गमपरान्तिकं [द्व्यङ्गं] तदुभयमभिसम(3)स्य सप्ताङ्गम् ।[१]

समुदयसत्यमेकविधं तृष्णानिर्देशात् । द्विविधं कर्मक्लेशात्मकत्वात् । पञ्चाङ्गानि वा पौर्वान्तिकापरान्तिकाङ्गसंग्रहात्, हेतुभूता वा पञ्चोपादानस्कन्धाः ।[२]

निरोधसत्यमेकप्रकारमप्रतिसन्धिजन्मनिरोधात् । सत्यद्वयप्रहान(ण)-भेदाद् द्विविधम्, सोपधिनिरुपधिशेषधातुभेदाद्वा । तृ(त्रि)प्रकारं वा प्रहान-(ण)विरागनिरोध(4)धातुभेदात् । चतुष्प्रकारं वा चतुष्फलभेदात्[३] ।

मार्गसत्यमेकप्रकारं सम्यग्दृष्टिनिर्देशात् । द्विप्रकारं वा सास्रवानास्रवभेदात्, दर्शण(न)भावनाभेदाद्वा । त्रिप्रकारं शीलसमाधिप्रज्ञास्कन्धभेदात् चतुष्प्रकारं वा प्रयोगमार्गादिभेदात् ।[४] प्रतिपद्भेदाद्वा ।[५] अष्टप्रकारं सम्यग्दृष्ट्याद्यङ्गभावात् ।[६]

इत्येतानि चत्वार्यार्यसत्यानि परिज्ञेयप्रहात(5)व्यसाक्षात्कर्तव्यभावयितव्यानीति[७] भगवान् प्रदर्शयामास नरामरेभ्यस्तेषां सत्यदर्शण(न)भव्यत्वात्तदर्थमुद्भूतत्वा[त्]। अतस्तानेव मार्गप्रदर्शण(न)कर्मणाभिप्रेता[न्]। अतस्तेषु संप्रधा(दा)नाभिधायिनी चतुर्थी ।

---

[१] The seven *aṅgas* refer to the seven links of the formula of *Pratītya samutpāda*, viz., *rūpa*, *shaḍ-āyatana*, *sparśa*, *vedanā*, *jāti* and *jarā-maraṇa*. Of these the first five are the effects of *avidyā* and the last two of *tṛishṇā*, *upādāna* and *bhava*.

[२] The five *aṅgas* refer to the five links of the formula of *Pratītyasamutpāda*, viz., *avidyā*, *saṁskāra*, *tṛishṇā*, *upādāna* and *bhava*.

[३] This refers to the four kinds of *lokottara-phalas*, i.e., the fruitions of supermundane path, viz., the *srotāpatti-phala*, *sakridāgāmi-phala*, *anāgāmi-phala* and the *arhat-phala*.

[४] This refers to the four kinds of *mārga*, viz., *prayogamārga ānantarya-mārga*, *vimuktimārga* and *viśeshamārga*.

[५] The four *pratipats* are : *sukhā-dandhābhijñā*, *sukhā-kshiprābhijña*, *duḥkhā-dandhābhijñā* and *duḥkhā-kshiprābhijñā*.

[६] This refers to the *Ārya-ashṭāṅgika-mārga*.

[७] Cf. तं खो पनिदं दुक्खं अरियसच्चं परिञ्ञेयं···इदं दुक्खसमुदयं अरियसच्चं पहातब्बं···इदं दुक्खनिरोधं अरियसच्चं सच्छिकातब्बं···इदं दुक्खनिरोधगामिनी पटिपदा अरियसच्चं भावेतब्बं ति मे भिक्खवे···आलोको उदपादि.। *Vinaya*, I. p. 11. See *Lalita-vistara* p. 418.

तं सत्पथज्ञं प्रणिपत्य बुद्धं शास्त्रं करिष्याम्यभिधर्मदीपम्[1] ॥

'तम्' इति यः प्रतिविशिष्टविशेषणपरिच्छिन्नय(6)च्छब्दचोदनयो(या) परिगृहीतः स तच्छब्देन पूर्वप्रकृतापेक्षोपजनितयच्छब्दसंबन्धेन संस्पृश्यते। संश्चासौ पन्थाश्च सत्पथः। अथवा सतां पन्थाः सत्पथः। तं सत्पथं जानीत इति सत्पथज्ञः। 'तं सत्पथज्ञं प्रति(णि)पत्य' इति कायवाङ्मनस्कर्मभिरभ्यर्थ्येत्यर्थः।

'बुद्धम्' इति विशिष्टविशेषणपरिच्छिन्नोऽपि बुद्धानुसारिपुद्गलप्रति(7)पत्त्यर्थं साक्षात्प्रतीतपदार्थकेन नाम्नापदिश्यते बुद्ध इति। अत्र बुद्धशब्दस्य प्रसिद्धिः बुधेरकर्मकत्वविवक्षायां कर्त्तरि क्तो भवति। सर्वे वा ज्ञानार्था गत्यर्था इति कर्मकर्त्तरि क्तविधानम्। अभिधानलक्षणत्वाच्च कृत्तद्धितसमासानामचोद्यम्। दृष्टं चेदं बुद्ध इत्यभिधानं कर्त्तरि लोके प्रयुज्यमानम्। तद्यथा निद्राविगमे पदार्थानुबोधे(8)ऽविद्यानिरासे च विबुद्धः प्रबुद्धो देवदत्त इति। एवं भगवानप्यविद्यानिद्राविगमात्, सर्वार्थावबोधाच्च[2] बुद्धो विबुद्धः प्रबुद्ध इत्युच्यते। यथा वा परिपाकविशेषात् स्वयमेव बुद्धं पद्ममेवं भगवानपि[3] प्रज्ञादिगुणप्रकर्षपरिपाकाद् बुद्धो विबुद्धः प्रबुद्ध इति। सर्वशिष्टप्रयोगाच्च। दृष्टो ह्यत्र शिष्टप्रयोगः। यथोक्तं व्यासेन

"(9)एतद्बुद्धा(ध्वा) भा(भ)वेद् बुद्धः किमन्यद् बुद्धलक्षणम्" इति।

तस्मादशिष्टचोद्येष्वनादरः।

अत्र पुनः(नः) श्लोकस्य पूर्वार्धे परार्थसंपादकं वैशारद्यद्वयं प्रदर्शितम्। तृतीये पादे स्वार्थसम्प[द्]द्योतकं वैशारद्यद्वयमाविष्कृतम्। न ह्यक्षीणास्रवः

---

[1] Cf. यः सर्वथा सर्वहतान्धकारः संसारपङ्काज्जगदुज्जहार।
तस्मै नमस्कृत्य यथार्थशास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम् ॥ *Ak.* I. 1.

[2] सर्वस्मिन् ज्ञेये द्वादशायतनलक्षणे। सर्वं सर्वमिति ब्राह्मण यावदेव द्वादशायतनानीति सूत्रे वचनात्। *Sakv.* p. 4. Cf. *S.* IV. p. 15.

[3] **विनयविभाषाकारास्तु** चतुष्कोटिकं कुर्वन्ति। अस्ति बुद्धो न भगवान्। प्रत्येकबुद्धः स्वयंभूतत्वाद् बुद्ध इति शक्यते वक्तुम्। न तु भगवानपरिपूर्णदानादिसम्भारत्वात्। यो हि माहात्म्यवान् स भगवानुच्यते। अस्ति भगवान्न बुद्धश्चरमभविको बोधिसत्त्वः परिपूर्णदानादिपारमितत्वादनभिसम्बुद्धत्वाच्च। अस्त्युभयथा बुद्धो भगवान्। अस्ति नोभयथा एतानाकारान्स्थापयित्वेति। *Sakv.* p. 3.

शक्तो मार्गमाख्यातुमिति । न चासम्यक्संबुद्धः सर्वधर्मानभिसंबोद्धुमलमिति । कथं पुण(न)रेत [Fols. 2—30 lost][१]

[I. B, 2. Fol. 31 a] (1)दिगात्मानो वैशेषिकपरिकल्पिता असत्त्वादेव नैव नित्याः नानित्याः ।[२] असत्त्वं पूर्वमा[वि]ष्कृतम् ।

सांख्यीयमपि प्रधानं न नित्यम् ।[२] कुतः ? त्रैगुण्यस्य

[2] सत्त्वाद्यनन्यथाभावे व्यक्ताभावः प्रसज्यते ।
तद्विकाराद्विकारित्वं प्रकृतेस्तदभेदतः ॥

यदि सत्त्वादयो [गुणाः] नान्यथा भवन्ति ह्रासवृद्धिभावेन, न तर्हि किञ्चित्तेभ्यो व्यक्त(2)मुत्पद्यते । अथान्यथा भवन्ति, अनित्यास्तर्हि प्राप्नुवन्ति । कर्मवशाददोष इति चेत्, अत्र ब्रूमः ।

[3] न कर्म स्वकृतोत्सर्गात्

यदि प्रतिपुरुषं कर्माणि बुद्धिपूर्वाण्यबुद्धिकृतानि वा प्रधाने विद्यन्ते साधारणप्रधानकल्पनावैयर्थ्यं तर्हि प्राप्तमिति । किञ्च,

ज्ञव्यक्तात्मकता मलाः ।
प्राक्पक्षे मुक्त्यभावश्च द्वितीये(3)ऽन्येऽप्युपप्लवाः ॥

यदि तानि कर्माणि पुरुषात्मकानि नत्वे(न्वे)वं सति मोक्षाभावः प्राप्नोति । पुरुषनित्यत्वे कर्माणि(नि)त्य[त्व]प्रसङ्गात् । 'च'शब्दात् पुरुषकर्तृत्वादिदोष(षा)श्च । 'द्वितीयेऽन्येऽप्युपप्लवाः ।' प्रधानात्मकपक्ष एते च दोषाः प्रसजन्त्यन्येऽपि चोपप्लवाः साधारणत्वादकृताभ्यागमानिर्मोक्षप्रसङ्गात् । तस्मात्(4) त्रीण्येव च सर्वज्ञाभिहितान्यसंस्कृतानि नित्यानीति सिद्धम् ।

व्याख्याताः अष्टौ पदार्थाः— संस्कृताः पञ्च, त्रयश्चासंस्कृताः । एतावच्चैतत्सर्वं यदुत संस्कृतं चासंस्कृतं चेति ।[३]

तच्चैतदायतनधातुव्यवस्थानेन व्यवस्थाप्यते ।[४]

---

[१] A major portion of the First chapter(Fol. 2—30) is lost. In these lost folios the *Adv.* has discussed the *saṁskṛita* and *asaṁskṛita-dharmas*, as is evident from a subseqnent statement: व्याख्याता अष्टौ पदार्थाः—संस्कृताः पञ्च, त्रयश्चासंस्कृताः । The *Akb.* I. 2—15 also deals with the same topics.

[२] These refutations are are not found in *Akb.*

[३] See note 1.

[४] Cf. राश्यायद्वारगोत्रार्थाः स्कन्धायतनधातवः । *Ak.* I. 20 ab.

द्वादश खल्वायतनानि । चक्षुरादीनि धर्मायतनान्तानि ।[१]

अष्टादश धातवः । चक्षुर्धा(5)तू रूपधातुश्चक्षुर्विज्ञानधातुर्यावन्मनोधातुर्धर्मधातुर्मनोविज्ञानधातुरिति ।[२]

तत्र तावत् ।

[4] रूपस्कन्धो हि नेत्राद्या दशायतनधातवः ।
धर्मसंज्ञे त्रयस्कन्धाः साऽविज्ञप्तिर्ध्रुवत्रयाः ॥

[5] मनःसंज्ञकमन्योऽपि सप्तविज्ञानधातवः ।

इति ।

कः पुनरायतनधात्वर्थः ? तदुच्यते ।

आयद्द्वारं ह्यायतनं धातु(6)र्गोत्रं निरुच्यते ॥

तदुक्तं भवति—चित्तचैतसिकाख्यमायमेतानि तन्वन्तीत्यायतनानि ।[३] यस्मात्सप्तचित्तधातवश्चत्वारश्चारूपिणः स्कन्धा एभ्यश्चतुष्प्रत्ययात्मकेभ्यः प्रतायन्ते तदुत्पत्तिं वा प्रत्यायन्ते तस्मादायतनानि ।

[४]धात्वर्थस्तु गोत्रार्थः । तदुक्तं भवति—एकस्मिञ्छरीरपर्वतेऽष्टादश

---

[१] द्वादसायतनानि—चक्खायतनं, सोतायतनं, घाणायतनं, जिव्हायतनं, कायायतनं, मनायतनं, रूपायतनं, सद्दायतनं, गन्धायतनं, रसायतनं, फोट्ठब्बायतनं, धम्मायतनं । *Vbh.* p. 70.

[२] अट्ठारस धातुयो—चक्खुधातु, रूपधातु, चक्खुविञ्ञाणधातु, सोतधातु, सद्दधातु, सोतविञ्ञाणधातु, घाणधातु, गन्धधातु, घाणविञ्ञाणधातु, जिह्वाधातु, रसधातु, जिह्वाविञ्ञाणधातु, कायधातु, फोट्ठब्बधातु, कायविञ्ञाणधातु, मनोधातु, धम्मधातु, मनोविञ्ञाणधातु । *Vbh.* p. 87.

[३] Cf. अविसेसतो पन आयतनतो, आयानं तननतो, आयतस्स च नयनतो आयतनं ति दट्ठब्बं । *Vm.* xv. 4.

[४] Cf. गोत्रार्थो धात्वर्थः । यथैकस्मिन् पर्वते बहून्ययस्ताम्ररूप्यसुवर्णादिगोत्राणि धातव उच्यन्ते, एवमेकस्मिन्नाश्रये सन्ताने वा अष्टादश गोत्राणि अष्टादशधातव उच्यन्ते । आकरास्तत्र गोत्राण्युच्यन्ते । त इमे चक्षुरादयः कस्याकराः । स्वस्य जातेः । सभागहेतुत्वात् । असंस्कृतं तर्हि न धातुः स्यात् । चित्तचैत्तानां तर्हि जातिवाचकोऽयं धातुशब्द इत्यपरे । *Akb.* I. 20 ab.

Cf. also, यथा लोके विचित्ता हरितालमनोसिलादयो सेलावयवा धातुयो ति वुच्चन्ति, एवमेता पि धातुयो विय धातुयो । यथा वा सरीरसङ्घातस्स समुदायस्स अवयवभूतेसु

धर्मगोत्रानि(णि)—इति ।(7) ध्रुवं(व)द्वयस्याप्यत्र प्रतिनिधिस्थानीयाः प्राप्तयो गोत्रभूता विद्यन्ते। आकाशं च सर्वभूतभौतिकरूपाधारमिति तदप्यत्रास्तीति। स्वलक्षणधारणाद्वा तद्धातुत्वम् ।[१]

अथ कस्माद्द्वादशायतनान्यष्टादश च धातवः पृथङ्निरुच्यन्ते ? नत्व(न्व)न्यतराणि(नि)र्देशाद्गतार्थमेतदिति। अत्रोच्यते ।

[6] योगरूप्यानुकूल्याद्द्वादशा(8)यतनीं मुनिः ।
बुद्ध्याद्येकत्वधीहान्यै धातूंश्चाष्टादशोक्तवान् ॥[२]

स्कन्धेषु हि दृश्यमानेषु योगिनोरसर्वज्ञेयप्रतिबिम्बकान्युपतिष्ठन्ति। धातुष्वपि सप्तचित्तधातुप्रतिबिम्बकानि सादृश्याद् दुरवधाराणि भवन्ति। धातुस्कन्धव्यवस्था चायतनेषूक्तेष्वभिहितकारणा भवन्ति सुलक्षा चेति धातुदेश(9)ना। तदूर्ध्वं स्कन्धप्रज्ञप्तिः। यथोक्तम्—"चक्षुः प्रतीत्य रूपं चोत्पद्यते चक्षुर्विज्ञानम्। त्रयाणां सन्निपातात् स्पर्शः। सहजा वेदना चेति(त)ना" इति।[3] तस्मादायतनानि धातूनां योनिः, धातवः स्कन्धानामिति।

'बुद्ध्यादे(द्ये)कत्वधीहान्यै धातूंश्चाष्टादशोक्तवान् ।' सप्तविज्ञानधातवो हि देश्यमाना [I. A, 1. Fol. 31 b.](1) बुद्ध्यैकत्वग्राहं निवर्तयन्ति। पिण्डैकात्मग्राहं च निवर्तयन्ति।

वैभाषाः पुनराहुः—"रूपसंमूढानामायतनदेशना। चित्तचे(चै)त्तसंमूढानां स्कन्धदेशना। रूपचित्तसंमूढानां धातुदेशना। तीक्ष्णेन्द्रियानां(णां) वा स्कन्धदेशना। मध्येन्द्रियाना(णा)मायतनदेशना। मृद्विन्द्रियानां(णां) धातुदेशना। एवं संक्षिप्तम(2)प्यविस्तररुचीनाम् ।"[४]

अथवा 'बुद्ध्यैकत्वादिधीहान्यै धातूंश्चाष्टादशोक्तवान् ।' ये खलु बुद्ध्यै-

---

रससोणितादिसु धातुसमञ्ञा, एवमेतेसु पि पञ्चक्खन्धसङ्खातस्स अत्तभावस्स अवयवेसु धातुसमञ्ञा वेदितब्बा। *Vm.* xv. 21.

[१] Cf. अपि च, यथा तित्थियानं अत्ता नाम सभावतो नत्थि, न एवमेता। एता पन, अत्तनो सभावं धारेन्तीति धातुयो। *Ibid.*

[२] Cf. **मोहेन्द्रियरुचित्रैधात्तिस्रः स्कन्धादिदेशनाः ॥** *Ak.* I. 20 cd.

[३] Cf. चक्खुञ्च पटिच्च रूपे च उप्पज्जति चक्खुविञ्ञाणं। तिण्णं संगति फस्सो। फस्सपच्चया वेदना... । *S.* II. p. 72.

[४] See *LVPAk.* I. p. 40.

कस्वमध्यवसिता मनसश्चेतनायां वा रूपचित्तैकत्वं वा तेषा(षां) ममद्(त्व) बुद्धिनिरासार्थमष्टादशधातूनुक्तवानिति ।[१]

कः पुनरयं षड्भ्यो विज्ञानकायेभ्योऽन्यो मनोधातुः ? न खलु कश्चिदन्यः । किं तर्हि ?

[7] षण्णामन्यो(3)न्यतन्त्रत्वात्कारणं यद्धि तन्मनः ।[२]

---

[१] Cf. अपि च, धातू ति निज्जीवमत्तस्सेवेतं अधिवचनं । तथा हि भगवा "छ धातुको अयं भिक्खु, पुरिसो" ति आदिसु जीवसञ्ञासमूहननत्थं धातुदेसनं अकासी ति । *Vm.* xv. 22.

[२] Cf. ननु च षड्विज्ञानकाया विज्ञानस्कन्ध इत्युक्तम् । अथ कोऽयं पुनस्तेभ्योऽन्यो मनोधातुः ? न खलु कश्चिदन्यः । किं तर्हि ? तेषामेव

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः ।

यद्यत्समनन्तरनिरुद्धं विज्ञानं तन्मनोधातुरित्युच्यते । तद्यथा स एव पुत्रोऽन्यस्य पिता भवति तदेव फलमन्यस्य बीजमिति । *Akb.* I. 17 ab.

Cf. also,—मनोधातु पन यथासम्भवतो चक्खुविञ्ञाणधातु आदीनं पुरेचरानुचरा विय दट्ठब्बा । *Vm.* xv. 42.

The *Vibhaṅga* gives a long difinition of these two terms : तत्थ कतमा मनोधातु ? चक्खुविञ्ञाणधातुया उप्पज्जित्वा निरुद्धसमनन्तरा उप्पज्जति चित्तं मनो मानसं हदयं पण्डरं मनो मनायतनं मनिन्द्रियं विञ्ञाणं विञ्ञाणक्खन्धो तज्जा मनोधातु; सोत···घाण···जिह्वा···कायविञ्ञाणधातुया उप्पज्जित्वा···तज्जा मनोधातु; सब्बधम्मेसु वा पन पठमसमन्नाहारो । अयं वुच्चति मनोधातु । *Vbh.* p. 88.—'तज्जा मनोधातू'ति तस्मिं आरम्मणे जाता कुसलाकुसलविपाकतो दुविधा मनोधातुसम्पटिच्छनकिच्चं । 'सब्बधम्मेसु वा पन पठमसमन्नाहारो'ति एतेसु चक्खुविञ्ञाणादीसु सब्बधम्मेसु उप्पज्जमानेसु पठमसमन्नाहारो,···एतेन पञ्चद्वारावज्जनकिच्चा किरियमनोधातु गहिता ति वेदितब्बा । *Vbh A.* pp. 81-2.

तत्थ कतमा मनोविञ्ञाणधातु ? चक्खुविञ्ञाणधातुया उप्पज्जित्वा निरुद्धसमनन्तरा उप्पज्जति मनोधातु, मनोधातुया पि···उप्पज्जति चित्तं मनो मानसं···पे··· तज्जा मनोविञ्ञाणधातु,···मनञ्च पटिच्च धम्मे च उप्पज्जति चित्तं मनो मानसं···पे···विञ्ञाणक्खन्धो तज्जा मनोविञ्ञाणधातु । *Vbh.* p. 89 fol.—'मनोधातुयापि उप्पज्जित्वा···समनन्तरा' ति एत्थ पिकारो सम्पिण्डनत्थो, तस्मा मनोधातुयापि मनोविञ्ञाणधातुयापीति अयमेत्थ अत्थो वेदितब्बो। तेन···सन्तीरणकिच्चा विपाकमनोविञ्ञाणधातु···वोत्थपनकिच्चाकिरियामनोविञ्ञाणधातु···जवनकिच्चा मनोविञ्ञाणधातु, ता सब्बापि गहिता होतीति वेदितब्बा । 'मनञ्च पटिच्चा' ति भवङ्गमनं, 'धम्मे चा' ति चतुभूमिकधम्मारम्मणं, 'उप्पज्जति मनोविञ्ञाणं' ति सहावज्जनकं जवनं निब्बत्तति; इमस्मिं पन ठाने हत्थे गहितपञ्हं नाम गण्हिंसु । **महाधम्मरक्खि-**

स्वविषयालम्बनक्रियापेक्षया विज्ञानान्तरोत्पादनादिशक्त्यपेक्षया चैकस्य विज्ञानस्य त्रिधा निर्देशः क्रियते—'मनश्चित्तं विज्ञानं च' इत्यनागतस्यातीतस्यापि भूतभाविन्या संज्ञया व्यपदेशः। एवं सति "अष्टादशधातवस्त्रैयध्विकाः" इत्यभिधर्मग्रन्थोऽप्यनुलोमितो(4) भवति। सूत्रेऽपि चोक्तम्—"यत्पुनस्तद्भवति चित्तमिति वा मन इति वा" इति विस्तरः।[१] तदेवं व्याचक्षाणेन भवता नित्यं करणं मनो 'नित्यश्चात्मा कर्ता' इति प्रतिषिद्धं भवति।

अथ कस्मात्तदेव चक्षुर्विज्ञानादीनां पञ्चानामप्याश्रयत्वेन नोक्तमिति ?

अत्र ब्रूमः—

रूप्यरूपाश्रयास्तित्वात्पञ्चानां रूप्युदाहृतः ॥[२]

चक्षुरादीनामसाधारणत्वादिति।

अथ यदुक्तम्—'ससंप्रयोगा सहसंग्रहेन(ण)' इति। कौ पुण(न)रिमौ संग्रहसंप्रयोगावित्येतदपदिश्यते।

[8] स्कन्धायतनधातूनां स्वात्मना संग्रहः स्मृतः।[३]

तत्थेरो किर नाम **दीघभाणकाभयत्थेरं** हत्थे गहेत्वा आहः—पटिच्चा ति नाम आगतट्ठाने आवज्जनं न कातब्बं, भवङ्गनिस्सितकमेव कातब्बं' ति। तस्मा इध मनो ति सहावज्जनकं भवङ्गं, मनोविञ्ञाणं ति जवनविञ्ञाणं। *Vbh A.* pp. 81–2.

[१] Cf. विञ्ञाणं, चित्तं, मनो ति अत्थतो एकं। *Vm.* xiv. 82.

[२] Cf....यद्यप्येवं तथापि

षष्ठचाश्रयप्रसिद्धचर्थं धातवोऽष्टादश स्मृताः।

पञ्चानां विज्ञानधातूनां चक्षुर्धात्वायतनादयः पञ्चाश्रयाः। षष्ठस्य मनोविज्ञानधातोराश्रयोऽन्यो नास्ति। अतस्तदाश्रयप्रसिद्धचर्थं मनोधातुरुपादिष्टः। *Akb.* I. 17 cd. आश्रयादिषट्कव्यवस्थानेनाष्टादश धातवो भवन्ति। आश्रयषट्कं चक्षुरादिमनोऽन्तम्। आश्रितषट्कं चक्षुर्विज्ञानादि मनोविज्ञानान्तम्। **योगाचारदर्शनेन** तु षड्विज्ञानव्यतिरिक्तोऽप्यस्ति मनोधातुः। **ताम्रपर्णीया** अपि हृदयवस्तु मनोविज्ञानधातोराश्रयं कल्पयन्ति। *Sakv.* p. 39. For the Yogāchāra view, See *Triṁśikā*, 5. For the view of the Tāmraparṇiya, cf. मनोधातु–मनोविञ्ञाणधातूनं निस्सयलक्खणं हदयवत्थु। *Vm.* xiv. 60.

[३] Cf. **सर्वसंग्रह एकेन स्कन्धेनायतनेन च।**
धातुना च स्वभावेन परभाववियोगतः॥ *Ak.* I. 18.

For a controversy on *saṅgraha*, see *Kv.* VII. 1.—इदानि सङ्गहकथा

क्षणपरमानु(णु)जातिसंख्यानां प्रत्येकं यथायोगं संग्रहो वेदितव्यः । कस्मात् ?

स्वात्मना नित्यमवियोगात्

तस्मा(6)द् द्रव्यात्मसंग्रहः । सच्छब्दनिमित्तं हि सतो भावः सत्ता द्रव्यं प्रकृत्यर्थः । द्रव्यात्मसंग्रहः प्रत्ययार्थ[ः], सत्कृ(त्क्रि)या वोपचारसत्तारूपा । वैशि(शेषि)कसत्ता तु नोभयमर्थान्तरत्वात् । न ह्यर्थान्तरं स्वात्मोपपद्यते । किञ्च, स्वातन्त्र्यात् । निरुक्त्यपभ्रंशाच्च । नहि घटेन सत्तोत्पाद्यते । आवरणाभावात्तनि(न्नि)त्यत्वाभ्यु(7)पगमाच्च । निरुक्त्यपि भ्रश्यते—सत्तायोगात्सन्ती[ति] । स्यान्माल्यादिवत्सत्तावान्वा क्रियावदिति । यस्त्वयं संग्रहवस्त्वादिषु संग्रहः प्रोक्तः स कादाचित्कत्वाद् गौणो मन्तव्यो न मुख्यः ॥

संप्रयोगस्तु

समत्वं चित्तचैतसाम् ॥

पञ्चभिः समालम्बने प्रयुज्यन्त इति । सम्प्रयुक्ताश्चित्तचैतसा एव धर्मा नान्य (8)इति ॥[१]

अथ य एते सूत्रान्तरेषु स्कन्धायतनधातुसंशब्दिता धर्माः श्रूयन्ते ते किमेष्वेव संग्रहं गच्छन्ति, आहोस्विन्नेति ? अत्रोच्यते ।

[9] तदाख्या येऽन्यसूत्रोक्तास्तेषामेष्वेव संग्रहम् ।
ब्रूयाच्छास्त्रनयाभिज्ञो बुद्ध्यापेक्ष्य स्वलक्ष[णम्] ॥[२]

तत्र तावच्छीलस्कन्धादीनां[3] पञ्चानां स्कन्धानां शीलस्कन्धो (9)रूपस्कन्धेन संगृहीतः । शेषाः संस्कारस्कन्धेन । दश कृत्स्नायतनान्यप्यलोभस्वाभाव्याद्दृष्टानां[४] धर्मायतनेन । सपरिवाराणि तु मनोधर्मायतनाभ्यां पञ्चस्कन्धस्व-

---

नाम होति । तत्थ यस्मा दामादीहि बलिवद्दादयो विय केचि धम्मा केहिचि धम्मेहि सङ्गहीता नाम नत्थि, तस्मा "नत्थि केचि धम्मा केहिचि धम्मेहि सङ्गहीता, एवं सन्ते 'एकविधेन रूपसङ्गहो' ति आदि निरत्थकं" ति येसं लद्धि, सेय्यथापि राजगिरिकानञ्च, सिद्धत्थिकानञ्च । *Kv A.* VII. 1. For *saṅgraha*, see *Asm.* p. 32.

[१] See *Asm.* p. 33. For a controversy on *samprayoga*, see *Kv.* VII. 2

[२] Cf. तथान्येऽपि यथायोगं स्कन्धायतनधातवः ।
प्रतिपाद्या यथोक्तेषु सम्प्रधार्य स्वलक्षणम् ॥ *Ak.* I. 27. See *Vm.* XV. 25.

[३] शील-समाधि-प्रज्ञा-विमुक्ति-ज्ञानदर्शनानि ।

[४] पृथिव्यप्तेजोवायुनीलपीतलोहितावदातकृत्स्नायतनानि ।

भावत्वात्। अन्त्ये द्वे[१] कृत्स्नायतने चतुःस्कन्धस्वभावत्वात्, मनोधर्मायतनाभ्याम्।

धातूनामपि षड् धा[I. B, 3. Fol. 32a.](1)तवः । तेभ्यश्चत्वारः स्प्रष्टव्यधातूनाम्, पञ्चमो रूपधातूनां, षष्ठः सप्तभि[श्चित्त]धातुभिः ॥[२]

[10] अन्योन्यसंग्रहो ज्ञेयः स्कन्धादीनां यथायथम् ।

रूपस्कन्धस्य दशस्वायतनधातुषु रूपिषु संग्रहो वेदितव्यः। धर्मायतनधातुप्रदेशेन [त्र]याना(णा)मपि स्कन्धानां यथायोगधर्मायतनधातुभ्याम्। (2)अन्त्यस्य तु मनआयतनस्य सप्तभिश्चित्तधातुभिरिति ॥

अथ कस्मादसंस्कृतं स्कन्धैरसंगृहीतम् ? ब्रूमः ।

नाध्वस्वपतनादिभ्यो नित्यानां स्कन्धसंग्रहः ॥[३]

आदिशब्दान्निष्क्रियत्वस्कन्धलक्षण वयुक्तत्वाच्चेति ॥

[11] धर्मस्कन्धसहस्राणामशीतेरपि संग्रहः ।[४]
ज्ञेयोऽवतरणेष्वेव तैः सन्मार्गावतारणात् ॥

अशी(3)तिः खल्ववतरणसहस्राणि[५] यैर्विणे(ने)याः सन्मार्गमवतार्यन्ते ॥

---

[१] आकाशानन्त्यायतन-विज्ञानानन्त्यायतनकृत्स्ने ।

[२] यत्र पृथिवीधात्वादयः षट् । तेषामाद्यानां चतुर्णां स्प्रष्टव्यधातौ संग्रहः । आकाशधातो रूपधातौ, आलोकतमःस्वभावत्वात् । विज्ञानधातोः सप्तसु चित्तधातुषु संग्रहः। *Sakv.* p. 56.

In Pāli tradition the *āpodhātu* and the *ākāsadhātu* are included in the *dhammadhātu*. पथवीतेजो-वायोधातुयो फोट्ठब्बधातु येव । आपोधातु आकासधातु च धम्मधातु येव । विञ्ञाणधातु चक्खुविञ्ञाणादिसत्तविञ्ञाणधातुसङ्खेपो येव । *Vm.* xv. 30.

[३] Cf. स्कन्धेष्वसंस्कृतं नोक्तमर्थायोगात् क्रमः पुनः । *Ak.* I. 22 ab.

[४] Cf. धर्मस्कन्धसहस्राणि यान्यशीतिं जगौ मुनिः । *Ak.* I. 25 ab.

[५] The Pāli tradition has 84000 *dharma-skandhas:* कथं धम्मक्खन्धतो चतुरासीति धम्मक्खन्धसहस्सानी ति ? सब्बमेव हि'दं बुद्धवचनं

द्वासीतिं बुद्धतो गण्हि द्वे सहस्सानि भिक्खुतो ।
चतुरासीति सहस्सानि ये' मे धम्मा पवत्तिनो ति ।।

एवं परिदीपितधम्मक्खन्धवसेन चतुरासीतिसहस्सप्पभेदं होति । तत्थ एकानुसंधिकं एको धम्मक्खन्धो, विस्सज्जनं एको । अभिधम्मे एकमेकं तिकदुकभाजनं एकमेकं च चित्त-

किं पुनस्तेषामेकैकस्य प्रमान(ण)म् ? ब्रूमः । अत्राचार्याणां भेदंगता बुद्धयः । केचिदाहुः

[12] धर्मस्कन्धप्रमानं(णं) तु मत्यादेरेकशः कथा ।[1]

सत्यध्यानसमाधिसमापत्तिविमोक्षप्रतीत्यसमुत्पादस्कन्धादीनामेकशः कथा धर्मस्कन्धः । (4)रागादिचरितप्रतिपक्षो धर्मस्कन्ध इत्याचार्यकम् ।

तत्सतत्त्वं तु केषाञ्चिद्वाङ्नामापीष्यते परैः ॥

येषां तावद्वाक्स्वभावं बुद्धवचनं[2] तेषामशीतिधर्मस्कन्धसहस्राणि रूपस्कन्धैकदेशेन संगृहीतानि । येषां पुनर्णा(र्ना)मस्वभावं तेषां संस्कारस्कन्धसंगृहीतानि। अयं त्वागमः—"जीवतो भगवतो वाङ्नाम(5)स्वभावं बुद्धवचनं गौणमुख्यन्यायेन । परिणि(नि)र्वृतस्य तु नामस्वभावमेव, न वाक्स्वभावम्, ब्रह्मस्वरत्वान्मुनीन्द्रस्य, लोकवाचां तत्सादृश्यानुपपत्तेः ॥"

कस्मात्पुनरेते षड् धातवः पृथगुच्यन्ते ? यस्मादेते

वारभाजनं एको धम्मक्खन्धो । **विनये** अत्थि वत्थु, अत्थि मातिका, अत्थि पदभाजनियं, अत्थि आपत्ति, अत्थि अनापत्ति, अत्थि अन्तरापत्ति, अत्थि तिकच्छेदो । तत्थ एकमेको कोट्ठासो एकमेको धम्मक्खन्धो ति वेदितब्बो । एवं धम्मक्खन्धतो चतुरासीति धम्मक्खन्धसहस्सानि । *Dhs A.* I. 67. See *LVPAk.* I. p. 46.

[1] Cf. **शास्त्रप्रमाण इत्येके**

एके तावदाहुः । **धर्मस्कन्धसंज्ञकस्यैव अभिधर्मशास्त्रस्य** प्रमाणमिति । तच्च षट्सहस्राणि । **अपरे** पुनराहुः

स्कन्धादीनां कथैकशः ।

स्कन्धायतनधातुप्रतीत्यसमुत्पाद…अरणादीनां कथा प्रत्येकं धर्मस्कन्ध इति ।

चरितप्रतिपक्षस्तु धर्मस्कन्धोऽनुर्वणितः ॥

एवं तु वर्णयन्ति । अशीतिचरितसहस्राणि सत्त्वानाम् । रागद्वेषमोहमानादिचरितभेदात् । तेषां प्रतिपक्षेण भगवताऽशीतिधर्मस्कन्धसहस्राण्युक्तानि । *Akb.* I. 26.

[2] येषां वाक्स्वभावं बुद्धवचनमिति । येषां **सौत्रान्तिकानां** वाग्विज्ञप्तिस्वभावं तेषां तानि रूपस्कन्धसंगृहीतानि । येषां **निकायान्तरीयाणां** चित्तविप्रयुक्तं नामास्ति तेषां संस्कारस्कन्धेन संगृहीतानि । संस्कारस्कन्धसंगृहीतत्वान्नाम्नः । **अभिधार्मिकाणां** तूभयस्वभावमिष्टम् ।…चतुरशीतिर्धर्मस्कन्धसहस्राणीति **निकायान्तरे** सूत्रपाठः । *Sakv.* p. 52. The last line obviously refers to the Pāli traditon quoted above.

[13] सत्त्वप्रज्ञप्त्युपादानमौलं षड्धातवो मताः।
प्रोक्तास्तद्भेदतो यस्मादस्मिन्मारो(स्मिमानो) निवर्तते ॥

(6)एते हि षड्धातवो गर्भावक्रान्तिकाले मौलं सत्त्वद्रव्यप्रज्ञप्त्युपादानम्।[1] कथम् ? यस्मादयं कायाख्यः समुच्छ्रायः पृथिवीधातुना खक्खटलक्षणेन सन्धारितो भूतान्तरवृत्त्युद्रेकोऽस्थिस्नायूनखदन्तरोमादिसंचयः। अप्धातुना द्रवस्नेहलक्षणेन श्लेष्मरुधिरादिमयेनाभिष्यन्दितसंश्लेषित(7)भूतान्तरः। तेजोधातुनोष्णस्वभावेन परिपाचितक्लेददौर्गन्धः। वायुना च प्रेरणात्मकेन संचारित भोजनरसधातुविण्मूत्रश्लेष्मपित्तसंचयः। नभोधातुना च मुखनासिकाकर्णादिच्छिद्रजनितभोजनपाणा(ना)दिप्रवेशनिष्क्रमणक्रियः। विज्ञानधातुना वस्तूपलब्धिलक्षणेन(8) वायुधातुक्रियाध्यासिनोत्पादितसंजनिताङ्गप्रत्यङ्गचेष्टो मौलं सत्त्वद्रव्यमित्युपचर्यते। इन्द्रियानि(णि) चक्षुरादीनि खल्वत्र भूतग्रहणेन गृह्यन्ते, चैतसिका विज्ञानग्रहणेनेति प्राधान्याद् भूतचित्तग्रहणम्।

किमर्थं पुण(न)रेत एव धातुषट्कमुपदिष्टम् ? यस्मादस्य भेदात्(9) 'अस्मिमानो निवर्तते'। कथम् ? षड्धातुप्रभेदादात्मदृष्टिनिरासः। तन्निरासादस्मिमानसमुद्घातः ॥

'सत्कायदृष्टिपुष्टत्वात्'[2]

इत्यत्र पुणः(नः)

[14] क्लिष्टमेव हि विज्ञानं

विज्ञानधातुरभिप्रेतम्। कस्मात् ?

[द्रष्टव्यं] जन्मणि(नि)श्रयात्।[3]

यस्मादेते षड्धातवो जन्मनो निश्रयभूतास्तस्मात् 'क्लिष्टमेव विज्ञानं' [I. A, 3. Fol. 32 b.] अत्र द्रष्टव्यम् ॥

---

[1] Cf. छन्नं भिक्खवे धातूनं उपादाय गब्भस्सावक्कन्ति होति। *Aṅg.* I. p. 176.

[2] This is a part of a *kārikā* of the lost portion of the *Ad.*

[3] Cf. विज्ञानधातुर्विज्ञानं सास्रवं जन्मनिश्रयाः। *Ak.* I. 28 cd; also cf. यो नामरूपमभिनिर्वर्तयति नडकलापयोगेन पञ्चविज्ञानसंप्रयुक्त सास्रवं च मनोविज्ञानम्, अयमुच्यते विज्ञानधातुः। *Śikshā.* p. 221.

कः पुण(न)रयमाकाशधातुरन्यः पुणः(नः) पृथगाकाशात् ?[१] तदुच्यते ।

खधातुः पृथगाकाशाद्रूपायतनसंग्रहात् ।

आकाशं हि धर्मायतनसंगृहीतं नित्यं च । आकाशधातुस्तु चाक्षुषो रूपायतनसंगृहीतः, आलोकतमःस्वभावो वर्णविशेषो वातायनच्छिद्राद्यभिव्यक्तरूपः[२] । तत्पुनः

[15] नभः खलु नभो धातोरासन्नो हेतुरेष तु ।
भूतानां तानि तज्ज्ञस्य रूपस्यैतत्तु चेतसः ॥

उक्तं हि भगवता—"पृथिव्यप्सु निश्रिता । आपो वायौ । वायुराकाशे । आकाशं तु नित्यत्वात्स्वप्रतिष्ठितम्" इति ।[3]

यदि खलु स्वप्रतिष्ठा(ष्ठ)माकाशं[४] कस्मात्तर्ह्युक्तम्—"आकाशमालोके सति प्रज्ञायते ।" ब्रूमः । नैष दोषः । (3)आधेयेनाधारप्रज्ञापनात् । सर्वस्य खलु संस्कृतस्य मूर्तिक्रियाप्रतिलम्भे गगण(न)माधारः । अथवाऽऽकाशधातुरत्राकाशशब्देनोक्तः । स हि ब्राह्मणः प्रष्टा तस्मिन्नाकाशधातावाकाशसंज्ञीत्यत एवोक्तमालोके सति प्रज्ञायते । न चाकाशमालोके सति प्रज्ञायते,

---

[१] Cf. छिद्रमाकाशधात्वाख्यमालोकतमसी किल । *Ak*. I. 28 ab.

'आलोकतमसी किल' इति किलशब्दः परमतद्योतनार्थः । स्वमतं तु सप्रतिघद्रव्याभावमात्रमाकाशमित्यभिप्रायो लक्ष्यते । *Sakv*. p. 57.

[२] Cf. रूपपरिच्छेदलक्खणा आकासधातु···असम्फुट्ठभावच्छिद्दविवरपच्चुपट्ठाना वा परिच्छिन्नरूपपदट्ठाना, याय परिच्छिन्नेसु रूपेसु, इदमितो उद्धमधो तिरियं ति च होति । *Vm*. XIV. 63. See also, *Dhs A*. IV. 76 and *Asm*. p. 13.

[३] This passage is referred to and criticised in the *Brahmasūtra-Śāṅkara-Bhāshya*, II. 2, 24.

Cf. अयं आनन्द महापठवी उदके पतिट्ठिता, उदकं वाते पतिट्ठितं, वातो आकासट्ठो होति । *Dīgha*. XVI. 3. 13.

Cf. also, तदेवं खरपृथिवी पङ्कप्रतिष्ठा, पङ्को घनोदधिवलयप्रतिष्ठः, घनोदधिवलयं घनवातप्रतिष्ठम्, घनवातवलयं तनुवातवलयप्रतिष्ठम्, ततो महातमोभूतमाकाशम् । सर्वं चैतत् पृथिव्यादितनुवातवलयान्तमाकाशप्रतिष्ठम् । आकाशं त्वात्मप्रतिष्ठम् । *Tattvārtha-Bhāshya*, III. 1.

[४] Cf. सेय्यथापि राहुल, आकासो न कत्थचि पतिट्ठितो, एवमेव खो त्वं राहुल आकाससमं भावनं भावेहि···। *M. sutta 62*.

अनिदर्शण(न)त्वात्[1]। एष अकाशधातुर्भू(4)तानामासन्नो निश्रयः। तानि तु तज्जस्योपादायरूपस्य। तदपि विज्ञानस्य। विज्ञानमधिचैतसिकानां विप्रयुक्तानां च धर्माणाम्। अत आकाशं त्रैलोक्यप्रतिष्ठा[2]। तदभावे त्रैलोक्यमप्रतिष्ठितमनाधारं, ण(न) प्रज्ञायेत। तस्मादाकाशं जगदुत्पत्ति-प्रलयनिमित्तं ना(न) नारायन(ण) इति सि(5)द्धम्। गतमेतत् ॥

इदानीं वक्तव्यम्। षण्णामध्यात्मिकानां धातूनां कोऽनुक्रमः ? ब्रूमः।

[16] प्रत्यक्षवृत्तिर्यत्तत्प्रागप्राप्तग्राह्यतोऽपि यत्।
ततोऽपि यद्द्वीयोऽर्थं पटिष्ठमितरादपि ॥[3]

प्रत्यक्षवृत्तीनि खलु चक्षुरादीनि पञ्च प्रागुक्तानि। तेभ्योऽप्यप्राप्तग्राहिणी द्वे प्रागुक्ते। तयोरपि यद्य(द्द)वीयोऽर्थं तत्प्रागु(6)क्तम्। प्राप्तग्राहिनां(णां तु 'पटिष्ठमितरादपि' यत्पट्टुतरं तत्प्रागुक्तमिति ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ प्रथमो(मा)ध्यायस्य द्वितीयः पादः[4] ॥

---

[1] For a controversy on the *anidarśanatva* of *Ākā'śa*, see *Kv*. vi. 7.—इदानि आकासो सनिदस्सनोति कथा नाम होति। तत्थ येसं तालच्छिद्दादीसु ञाणप्पवत्ति निस्साय सब्बोपि अजटाकासो सनिदस्सनोति लद्धि, सेय्यथापि **अन्धकानं**। *Kv A*. vi. 7.

[2] Cf. कतिविहा णं भन्ते ! लोकट्ठिती पण्णत्ता ? गोयमा ! अट्ठविहा लोगट्ठिई पण्णत्ता, तंजहा—आगासपतिट्ठिए वाए, वातपतिट्ठिए उदही, उदधिपतिट्ठिया पुढवी, पुढवीपतिट्ठिता तसथावरा पाणा, अजीवा जीवपतिट्ठिया, जीवा कम्मपइट्ठिया, अजीवा जीवसंगहीता, जीवा कम्मसंगहीता। *Bhagavatī-sūtra*, i. 6, 54.

[3] Cf. **प्राक् पञ्च वर्तमानार्थ्याद् भौतिकार्थ्याच्चतुष्टयम्।**
दूराशुतरवृत्त्याऽन्यद् यथास्थानं क्रमोऽथ वा।। *Ak*. i. 23.

Cf. also, *Vm*. xv. 24 and *Asm*. p. 14.

[4] V. supra, p. 4. n. i. These lost folios (2—30) must have contained the remaining portions of the first *pāda* and the beginning portions of the second *pāda*.

प्रथमाध्याये

तृतीयपादः ।

इदमिदानीं वक्तव्यम् । य एतेऽष्टादशधातवः, एषां कति सनिदर्शणाः(नाः) कत्यनिदर्शणाः(नाः) ? कति सप्रतिघाः कत्य(7)प्रतिघाः ? कति व्याकृताः कत्यव्याकृता इति ? अत इदं प्रतायते ॥

[17] सनिदर्शण(न) आद्यार्थः

आद्यस्य चक्षुर्धातोर्योऽर्थो रूपधात्वाख्यः स सनिदर्शणः(नः) । सह निदर्शणे(ने)न निर्दिष्ट इति कृत्वा । निदर्शनं वास्य संबन्धि विद्यत इति सनिदर्शणः(नः) ॥

मूर्त्ताः सप्रतिघा दश ।[१]

सप्त(8)चित्तधातून्धर्मधातुं च हित्वा दशान्ये मूर्त्ता धातवः 'सप्रतिघा दश' ।

[२]प्रतिघो नाम प्रतिघातः । स च त्रिविधः । आवरणविषयालम्बनप्रतिघातः । तत्रावरणप्रतिघातः स्वदेशे परस्योत्पत्तिप्रतिबन्धः । स तु मूर्त्ताणा(ना)मेव संस्थानवतां परमाणूनां दिग्देशनिर्देश्यानां धर्माणाम् । यथा हस्तो(9) हस्तेन प्रतिहन्यते उपलो वोपले[न] । विषयप्रतिघातश्चक्षुरादीनां विषयिणां रूपादिषु स्वेषु विषयेषु प्रतिघातः । यस्य यस्मिन् वृत्तिः सन्निपातलक्षणा कारित्राख्या च स तस्मिन् प्रतिहन्यते ततोऽन्यत्रावृत्तेः । आलम्बनप्रतिघातश्चित्तचैत्तानां स्वेष्वालम्बनेषु प्रतिघातः[२] ॥

[I. B, 4. Fol. 33 a.] (1)कः पुनर्विषयालम्बनयोर्विशेषः ?[३] यस्मिन्यस्य कारित्रं स तस्य विषयः । यच्चित्तचैत्तैर्गृह्यते तदालम्बनम् । तदिहावरणप्रतिघातेन दशानां सप्रतिघत्वमन्योन्यावरणात् ।

---

[१] Cf. सनिदर्शन एकोऽत्र रूपं सप्रतिघा दश । *Ak*. I. 29 ab.

Cf. also, *Dhs*. 1421 and *Asm*. p. 17.

[२] This whole passage is almost identical with *Akb*. I. 29 ad. The latter quotes a passage from *Prajñapti* after defining the *vishaya-pratighāta*.

[३] This whole passage, from कः पुर्नविषयालम्बनयोर्विशेषः to इति भदन्तकुमारलातः, is almost identical with *Akb*. I. 29 ab.

'ये धर्मा विषयप्रतिघातेन सप्रतिघा आवरणप्रतिघातेनापि ते' इति ? चतुष्कोटिकः[१] । प्रथमा कोटिः—सप्तचित्तधातवो(2) धर्मधातुप्रदेशश्च यः संप्रयुक्तः । द्वितीया—पञ्च विषयाः । तीया—पञ्चेन्द्रियाणि । चतुर्थी—धर्मधातुप्रदेशः संप्रयुक्तकवर्जः ।

'ये विषयप्रतिघातेन सप्रतिघा आलम्बनप्रतिघातेनापि ते' इति पश्चात्पादकः—[२] ये तावदालम्बनप्रतिघातेन विषयप्रतिघातेनापि ते स्युः। विषयप्रति(3)घातेन, नालम्बनप्रतिघातेन पञ्चेन्द्रियाणि ।

"यत्रोत्पित्सोर्मनसः प्रतिघातः शक्यते परैः कर्त्तुम् ।
तत्सप्रतिघं ज्ञेयं विपर्ययादप्रतिघमिष्टम् ॥"

इति भदन्तकुमारलातः ।

उक्ताः सप्रतिघाः[३] ॥

कुशलादयोऽभिधीयन्ते ।

अन्यत्र रूपशब्दाभ्यां त एवाव्याकृता मताः ॥[४]

त एव दशाव्याकृता रूपशब्द(4)धातुवर्जाः । तौ हि त्रिप्रकारौ कुशलाकुशलाव्याकृतौ ॥[५]

[18] शेषास्त्रिधा

---

[१] तत्र विषयालम्बनप्रतिघाताभ्यां चित्तचैत्तानामपि सप्रतिघत्वप्रसङ्गाच्चतुष्कोटिकः प्रश्नः । *Sakv.* p. 59.

[२] पश्चात्पादक इति । यदि प्रश्नस्य पश्चाद्भागं गृहीत्वा विसर्जनायोत्तिष्ठते स पश्चात्पादकः । *Ibid.*

[३] See. *Dhs.* 1089 and *Asm.* p. 18.

[४] Cf. **रूपिणोऽव्याकृता अष्टौ त एवारूप्यशब्दकाः ।** *Ak.* I. 29 cd.

[५] According to the Pāli tradition *rūpa* is *avyākṛita*, i.e., kārmically un-moral. There is a controversy about this :— न वत्तब्बं 'रूपं कुसलं पि अकुसलं पीति ?' आमन्ता । *Kv.* VIII. 9.

—इदानि रूपं कम्मं ति कथा नाम होति । तत्थ येसं कायवचीविञ्ञत्तिसंखातं रूपमेव कायकम्मं वचीकम्मं नाम, तञ्च कुसलसमुट्ठानं कुसलं, अकुसलसमुट्ठानं अकुसलं ति लद्धि, सेय्यथापि **महीसासकानञ्चेव सम्मितीयानञ्च** । *Kv A.* VIII. 9.

Cf. also, *Dhs.* 431 and *Aam.* p. 55.

सप्तचित्तधातवो हि त्रिप्रकाराः । धर्मधातुश्च । संप्रयुक्तस्त्रिप्रकारः, विप्रयुक्तोऽसंस्कृतश्च ।[1] यथाशास्त्रं कश्चित् त्रिप्रकारः कश्चिदेकप्रकारः संभवतो द्रष्टव्यः ।

कः पुनः कुशलार्थः ? शिक्षितार्थः कुशलार्थः प्रवीणवत् । विपाक(5)-हेतावौपमिको द्रष्टव्यः । एवमकुशलोऽपि । अव्याकृतस्तूभयपक्षाव्याकरणाद्व्याकृत इत्यभिप्रायः ॥

कति कामधातुप्रतिसंयुक्ताः कति यावदप्रतिसंयुक्ता इति । तदिदमारभ्यते ।

इह सर्वेऽपि

कामधातौ सर्वेऽप्यष्टादश विद्यन्ते ।

रूपधातौ चतुर्दश ।

रसगन्धौ सविज्ञानौ धातू हित्वा[2]

(6)गन्धरसधातू तद्विज्ञानधातू च हित्वा । आरूप्ये

त्रयोन्तिमाः ॥[3]

---

[1] धर्मधातुरलोभादिस्वभावसंप्रयुक्तसमुत्थः प्रतिसंख्यानिरोधश्च कुशलः । लोभादिस्वभावसंप्रयुक्तसमुत्थोऽकुशलः । अन्योऽव्याकृतः । *Akb*. I. 30 a.—'धर्मधातु'रिति विस्तरः। अलोभादिस्वभावो योऽयमुक्तः, अलोभादिसंप्रयुक्तो वेदनादिः, अलोभादिसमुत्थो विप्रयुक्तः प्राप्तिजात्यादिः, अविज्ञप्तिश्च । प्रतिसंख्यानिरोधश्चापर इति चतुर्विधः कुशलो धर्मधातुः । *Sakv*. p. 60. See *Asm*. p. 22 and *Aam*. p. 55.

[2] Cf. त्रिधाऽन्ये कामधात्वाप्ताः सर्वे रूपे चतुर्दश ।
विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः ।। *Ak*. I. 30.

The *Akb*. I. 30 contains a long discussion on a controversy about the non-existence of the *ghrāṇa*-and *jihvendriya* in the *Rūpa-loka*. The views of the Vaibhāshika and Bhadanta Śrīlāta are given. This controversy is also to be found in the *Kv*. VIII. 7.—तत्थ येसं "रूपी मनोमयो सब्बङ्गपच्चङ्गी अहीनेन्द्रियो" ति सुत्तं निस्साय ब्रह्मकायिकानं घानादिनिमित्तानिपि आयतनानेवाति कप्पेत्वा सळायतनिको तेसं अत्तभावोति लद्धि, सेय्यथापि अन्धकानञ्चेव सम्मितीयानञ्च । *Kv A*. VIII. 7. See *Aam*. p. 56.

[3] Cf. आरूप्याप्ता मनोधर्ममनोविज्ञानधातवः । *Ak*. I. 31 ab.

अग्रपश्चान्तिम[ः] स्मृतः । अन्ताश्चेत्युपसंख्यानम् । पश्चिमां मनोधातुमनोविज्ञानधातुधर्मधातव एवमारूप्यधातौ सन्ति ॥

कति सास्रवाः कत्यनास्रवाः

[19] सास्रवाणा(ना)स्रवा अन्त्यास्त्रयः

अनन्तरोक्तास्तत्र सास्रवाः दुःखस(7)मुदयसत्यसंगृहीताः । अनास्रवास्तु मार्गसत्यासंस्कृतसंगृहीताः ।

शेषास्तु सास्रवाः ।[१]

पञ्चदशधातवः सास्रवाः, आस्रवसंप्रयोगित्वव्यवकीर्णत्वाङ्गभावेभ्यः ।

कोशकारस्त्वाह—“अनुशयानुशयनात्सास्रवाः ।”[२] तदेतदब्रह्लम्(ह्म) । न[३] । निरुक्तानुशयार्थापरिज्ञानात् । निरुक्तापरिज्ञानं (8)तावत् । अनुशयानुशयनात् सानुशयाः ।[४]

न सास्रवा न यावदोघाः । आस्रवा हि आभवाग्राद्यावदवीचिमुपादाय चित्तसन्ततिं स्रावयन्ति स्वयं च स्रवन्तीत्यास्रवाः[५] । अनुशयास्त्वनुशेरते । क्लेशाः क्लिश्नन्ति । ग्रन्था ग्रथ्नन्ति । संयोजनानि संयोजयन्ति । ओघाः अपहरन्ति । इति स्वक्रियाद्वारे(9)णैतेषु वर्गेष्वेता नैरुक्त्यसंज्ञा निविशन्त इत्येषा व्याख्यानीतिर्ज्यायसी ।

---

[१] Cf. सास्रवानास्रवा एते त्रयः शेषास्तु सास्रवाः । *Ak*. I. 31 cd; cf. also, *Dhs*. 1103, *Asm*. p. 18. and *Aam*. p. 56.

[२] Cf. सास्रवा आस्रवास्तेषु यस्मात्समनुशेरते । *Ak*. I. 4 cd.

[३] This न is not required.

[४] Cf. अनुसया ति थामगतट्ठेन···कामरागादयो सत्त । ते हि थामगतत्ता पुनप्पुनं कामरागादीनं उप्पत्तिहेतुभावेन अनुसेन्ती येवा ति अनुसया । *Vm*. XXII. 60.

[५] Cf. आसवन्ती ति आसवा । चक्खुतो पि···पे··· मनतो पि सन्दन्ति पवत्तन्ती ति वुत्तं होति । धम्मतो याव गोत्रभुं, ओकासतो याव भवग्गं सवन्तीति वा आसवा । ···चिरपारिवासियट्ठेन मदिरादयो आसवा विया ति पि आसवा । *Dhs A*. II. 43.

Cf. also, शुभाशुभयोः कर्मणोरास्रवणादास्रवः, सरसः सलिलावाहिनिर्वाहिस्रोतोवत् । *Tattvārtha-Bhāshya*, VI. 2. See *Asm*. p. 18.

अनुशयार्थोऽपि यदि पुष्ट्यर्थस्तेन[1] मार्गणि(नि)र्वाणालम्बनेषु मिथ्यादृष्ट्यादिषु पोषोत्कर्षदर्शणा(ना)त्, निर्वाणमार्गयोरपि रूपादिवत् सास्रवत्वप्रसङ्ग इति । गतमेतत् ॥

कति सवितर्का[ः] कति सविचारा इति वि[I. A, 4. Fol. 33 b]स्तरः ।

सालम्बप्रथमाः पञ्च सोपचारास्त्रयस्त्रिधा ॥[2]

सालम्बनानां धातूनां ये प्रथमाः पञ्च ते सवितर्काः सविचाराः । 'त्रयस्त्रिधा' । ये त्वन्त्यास्त्रयस्ते त्रेधा । सवितर्काः सविचाराः । विचारमात्राश्चावितर्काः । अविचाराश्च । कामधातौ प्रथमे च ध्याने वितर्को णै(नै)षु त्रिषु प्रकारेषु प्रविशति । स खल्ववितर्को विचारमात्रश्च(2) ॥

अत्राह—यदि पञ्चविज्ञानकायाः सवितर्काः सविचाराः कथं तर्हि विकल्पा इत्युच्यन्ते ? ब्रूमः

[20] निर्विकल्पगुणस्वार्थाः

गुणः स्वार्थो येषां ते भवन्ति 'गुणस्वार्थाः'। एते हि

अस्मारादनिरूपणात् ।[3]

अविकल्पा इत्युच्यन्ते । एतौ हि प्रधानौ विकल्पौ[4] त्रैयध्विकधम-

---

[1] 'आस्रवास्तेषु यस्मातसमनुशेरते' इति । तस्मात्सास्रवा इति···। अनुशेरत इति पुष्टिं लभन्त इत्यर्थः । प्रतिष्ठां लभन्त इत्यर्थो वा । पुष्टिलाभे प्रतिष्ठालाभे वा ते रागादयः संतायन्ते । अपरे व्याचक्षते । यथानुशेते ममायमाहार इति पथ्योऽनुगुणीभवतीत्यर्थः, तथा रागादयोऽपि तेषु धर्मेष्वनुशेरतेऽनुगुणी भवन्तीत्यर्थः । रागाद्यभिष्यन्दित कर्मनिर्वर्तिता हि सास्रवा धर्माः ।···प्रत्ययानुगुण्येनानुशेरते पुष्टिं लभन्त इत्यनुशयाः । अनुशेरतेऽनुगुणा वर्तन्ते प्रत्यया एष्विति वानुशयाः । अनुशयनं चैषामालम्बनतः संप्रयोगतो वा द्रष्टव्यम् । *Sakv*. p. 13.

[2] Cf. सवितर्कविचारा हि पञ्चविज्ञानधातवः ।
अन्त्यास्त्रयस्त्रिप्रकाराः शेषा उभयवर्जिताः ॥ *Ak*. I. 32.
See *Dhs*. 996-998, *Aam*. p. 58 and *Asm*. p. 15.

[3] Cf. निरूपणानुस्मरणविकल्पेनाविकल्पकाः । *Ak*. I. 33 ab.

[4] त्रिविधः किल विकल्पः—स्वभाव-अभिनिरूपण-अनुस्मरणविकल्पः । तदेषां स्वभावविकल्पोऽस्ति नेतरौ । तस्मादविकल्पका इत्युच्यन्ते । *Akb*. I. 33 ab.

'त्रिविधः किल विकल्पः' इति । किलशब्दः **परमतद्योतनार्थः** । स्वाभिप्रायस्तु चेतनाविशेष एव वितर्क इति । न स्वभावविकल्पोऽन्यो धर्मोऽस्तीति । *Sakv*. p. 64.

विषयौ। योगिणां(नां) कृताकृतकर्मान्तप्रत्यवे(3)क्षणा चित्तरक्षणे स्मृतिः प्रधानी भवति। धर्मस्वसामान्यलक्षणहेतुफलसंबन्धादिषु प्रविचयाख्यः प्रज्ञास्वभावः प्राधान्यमनुभवति। अत्र तु

मनोभौमी स्मृतिः पूर्वो द्वितोयो धीर्णि(र्नि)रूपिका[१] ॥

'मनोभौमी'ति वर्तते। पञ्चानां विज्ञानकायानां जातिबधिरपुरुषरूपदर्शनवद्वृत्तिः। तत्रापि च स्मृतिः समा(4)हिता चासमाहिता च अनुस्मृतिविकल्पः, आलम्बनाभिलपण(न)तुल्यत्वात्। प्रज्ञा त्वसमाहितैवाऽभिनिरूपणा विकल्पः, समाहितायाः प्रकारविशेषणि(नि)रूपणाभावात्, पूर्वनिरूपितोपलक्षणमात्रवृत्तित्वाच्च ॥

[२]अथैषां षण्णां विज्ञानकायानां कतरद्विज्ञानं कियद्भिः सविकल्पकम्? तदिदमाविष्क्रिय(5)ते।

[21] विज्ञानपञ्चकं कामेष्वेकेन सविकल्पकम्।

स्वभावविकल्पेन।

तस्मादन्यत् त्रिभिः

मनोविज्ञानं कामेषु त्रिभिः सविकल्पकम्।

ध्याने प्रथमे चासमाहितम् ॥

प्रथमे हि ध्याने यदसमाहितं मनोविज्ञानं तत् त्रिभिरेव।

[22] द्वाभ्यामव्यग्रं

यत्पुनः समाहितं [त]द्द्वाभ्यामेवाभिनिरूपणविकल्पमपास्य(6)।

एकेन चक्षुःश्रोत्रत्वगाश्रय[म्]।

यत्पुनश्चक्षुःश्रोत्रत्वगाश्रयं विज्ञानं प्रथमे ध्याने तदेकेनैव।

द्वाभ्यां तदुपरिव्यग्रं

द्वितीयादिषु ध्यानेषु द्वाभ्यां व्यग्रमिति वर्तते।

---

[१] Cf. तौ प्रज्ञा मानसी व्यग्रा स्मृतिः सर्वैव मानसी ॥ *Ak.* I. 33 cd.

[२] The topics discussed here under the *kārikās* 21—34 are not found in *Akb.*

एकेनैव समाहितम् ॥

अनुस्मृतिविकल्पेनैव । एवं यावद्भवाग्रम् ॥

इदमिदानीं वक्तव्यम् । कुत्र कस्य षट्प्रकारं विज्ञानं कुशला(7)दिविकल्पकं भवति ? तदिदमभिधर्मगह्वरं प्रस्तूयते ।

[23] उच्छिन्नशुभबीजस्य दर्शणं(नं) सविकल्पकम् ।
कुशलं नास्ति विज्ञानमन्यत्र प्रतिसन्धितः ॥

इह तावदुच्छिन्नकुशलमूलस्य पञ्च रूपीन्द्रियाश्रयबलोत्पन्नं दर्शकं विज्ञानं कुशलं न विद्यते, अन्यत्र कुशलमूलप्रतिसन्धानात् ।

[24] कामेभ्यो वीतरागस्य(8) बालस्याहानिधर्मिणः ।
द्विधाप्यकुशलं नास्ति

दर्शकं च मनोविज्ञानं च यद्यपरिहान(ण)धर्मा भवति ।

क्लिष्टं चार्यस्य नोत्तमम् ॥

न चार्यस्योर्ध्वभूम्यालम्बनं क्लिष्टं विज्ञानं विकल्पकमस्ति ॥

किञ्च,

[25] नाक्लिष्टाव्याकृतं किञ्चिदूर्ध्वभूमिविकल्पकम् ।

न चानिवृताव्याकृतं किञ्चिदूर्ध्वभूमिविकल्पकमस्ति ।

(9)क्लिष्टं विकल्पकं चापि नास्त्यधोभूमिगोचरम् ॥

न च क्लिष्टं विज्ञानमधरभूम्यालम्बनं विकल्पकमस्ति ।

[26] त्रिधेह द्वयमार्यस्य

इह कुशलाकुशलाव्याकृतं दर्शकं च मनोविज्ञानं च विकल्पकमस्ति ।

रागिणः सशुभस्य च ।

अवीतरागस्याप्यनुच्छिन्नकुशलमूलस्य पृथग्जनस्य त्रिविधं [I. B, 5. Fol. 34 a.](1) द्वयमस्ति ।

न शुभं नापि च क्लिष्टं द्वितीयादिषु दर्शकम् ॥

विज्ञानमस्तीति ॥

इदमिदानीं वक्तव्यम्। कथमसत्यात्मनि शाश्वते तद्गुणे च संस्कारे स्मृतिहेतावसति प्रतिक्षणविनश्वरेषु च विज्ञानेषु च परस्पराकृतसंकेतेषु पूर्वानुभूतोऽर्थः स्मर्यते? [तद]पादश्यते। यद्यपि दत्तोत्तर एष वादः,[१] तथापीदं(2) शास्त्रानुगतमारभ्यते।

[27] प्रयोगादङ्गसान्निध्यात्सभागत्वाच्च सन्ततेः।
प्राग्विज्ञानानुभूतेऽर्थे चेतस्युत्पद्यते स्मृतिः ॥

प्रणिधानानुभवज्ञानपाटवसातत्यकारित्वाभ्यामसहकारित्वाभ्यामसहकारिकारणसान्निध्ये सन्तत्यानुकूलेभ्यः पूर्वविज्ञानानुभूते रूपादौ वस्तुनि स्मृतिरुत्पद्यते।

आत्मम(3)नःसंयोगात्संस्कारापेक्षा तदुत्पत्तिरिति चेत्। न। आत्ममनःसंयोगः संस्काराणां शशविषाणवदसिद्धत्वान्नित्यस्यास्यात्मनः संस्काराणामनुपपत्तेः। संस्कारसंयोगश्च सकलात्मव्यापित्व(त्वे) प्रदेशवृत्त्यभ्युपगमदोषाच्च। तस्मात् सुष्ठूक्तं प्रयोगादङ्गसान्निध्यादिभ्यः स्मृतिरुत्पद्यते परमार्थसंवृतिविष(4)या ॥

[28] एतद्विपर्ययात् मान्द्यात्क्लेशरोगाभिभूतितः।
ज्ञातपूर्वेषु भावेषु विस्मृतिः संप्रजायते ॥

इदमिदानीं विचार्यते। दुःखदर्शन(ण)हेयादिना पञ्च प्रकारेण विज्ञानेन यदनुभूतं तत्कतमेन स्मर्यते? तदिदं प्रस्तूयते।

[29] दृष्टं द्वित्रिचतुःपञ्च प्रकारेणापि चेतसा।
स्मर्यते यत्तदन्यैश्च नान्योऽन्यं(5) व्योघट्टकत्तये ॥

सर्वानि(णि) खलु दुःखदर्शणा(ना दिहेयानि पञ्चप्रकाराणि परस्परानुभूतं स्मरति(न्ति)। अयं त्व[त्र]नियमः—'नान्योऽन्यं व्योघट्टकक्षये।' निरोधमार्गदर्शण(न)प्रहातव्यानुभूतं तु नान्योऽन्यं स्मृतिप्रतिनियतालम्बनत्वात्। शेषास्तु त्रयः प्रकाराः सम्भिन्नालम्बनत्वान्न प्रतिषिध्यन्ते ॥

[30] विज्ञानानां तु पञ्चानां(6) यदेकेनानुभूयते।
तत्स्मर्यतेऽपि चान्येन

---

[१] It appears that this topic was discussed in *Adv.* in its lost portion (V. supra, p. 4, n. 1).

मनोविज्ञानेनेत्यर्थः ।

तेन खल्वितरैरपि ॥

मनोविज्ञानेनापि यदनुभूतं तत् षड्भिरपि स्मर्यते ॥

अथ द्वादशानां चित्तानां कोऽर्थः केनानुभूतः कतिभिः स्मर्यते ? द्वादशचित्तानि[१] । कामावचराणि कुशलादीनि चत्वारि । रूपावचराणि त्रीण्य(ण्य)(7)न्यत्राकुशलात् । एवमारूप्यावचराण्येतान्येव त्रीणि । शैक्षमशैक्षं च । स्मृतिरपि तत्संप्रयुक्ता द्वादशविधैव ।

तत्र किं केनानुभूतं त[द्] द्वादशभिरपि स्मर्यते ? कामावचरकुशलानुभूतं तद् द्वादशविधया स्मरति । एवमकुशलेन । तन्निवृताव्याकृतानुभूतमष्टविधया स्मरति । कामावचर्या (8)सर्वया । रूपारूप्यावचर्ययाऽन्यत्र निवृताव्याकृतानिवृताव्याकृतायाः शैक्षाशैक्षाभ्यां च । एवमनिवृताव्याकृतेन । रूपावचरकुशलानुभूतं सर्वाभिः स्मरति । तन्निवृताव्याकृतानुभूतं दशभिरन्यत्र कामावचरणि(नि वृताव्याकृतानिवृताव्याकृताभ्याम् । तदनिवृताव्याकृतानुभूतं दशभिरण्य(न्य)(9)त्रारूप्यावचरणि(नि)वृताव्याकृतानिवृताव्याकृताभ्याम् । आरूप्यावचरः कुशलानुभूतं दशभिरण्य(न्य)त्र कामावचरणि(नि)वृताव्याकृतानिवृताव्याकृताभ्याम् । तन्निवृताव्याकृतानुभूतं नवभिरण्य(न्य)त्र कामावचरं निवृताव्याकृतानिवृताव्याकृताभ्याम् । रूपावचराच्चानिवृताव्याकृतात् । एवमनिवृताव्या[I. A, 5. Fol. 34 b.](1)कृतेन । शैक्षानुभूतमेकादशभिरन्यत्रकामावचरणि(नि)वृताव्याकृतादेवमशैक्षेने(णे)ति । संक्षेपार्थस्त्वयं श्लोकैः प्रदर्श्यते ।

[31] द्व्यव्याकृतानुभूतं यच्चित्तं द्वादशकादिह ।
व्यारूप्यरूपणि(नि)वृतेः स्मर्यतेऽष्टाभिरेव तत् ॥

कामधातौ निवृताव्याकृताऽनिवृताव्याकृताभ्यां यदनुभूतं तदष्टाभिः स्मर्यते । रूपारू(2)प्यावचरे द्वे निवृते हित्वा । शैक्षमशैक्षं चैवमनिवृताव्याकृतेन ।

[32] रूपारूप्याप्तनिवृतशुभाभ्यां तु क्रमेन(ण) यत् ।
कामाप्ताव्याकृते हित्वा स्मर्यते दशकेन तत् ॥

कामावचरणि(नि)वृताव्याकृते हित्वा ।

---

[१] See *Adv. kārikā* 120 and *Sakv.* p. 134.

[33] रूपे त्वनिवृताख्येन दृष्टमव्याकृतेन यत् ।
आरूप्याव्याकृते हित्वा तदन्यैः स्मर्यते पुनः ॥

यत्खलु रूप(3)धातौ अनिवृताव्याकृतेनानुभूतं तदारूप्याव्याकृते हित्वा तदन्यैर्दशभिः स्मर्यते ॥

[34] आरूप्याव्याकृतज्ञातं यश्चेतो नवकेन तत् ।
कामाप्ताव्याकृते हित्वा रूपाप्तानिवृतं तथा ॥

गतमेतदौपोद्घातिकं प्रकरणम् । प्रकृतमेवाभिधीयताम् ॥

य एतेऽष्टादशधातव एषां कति सालम्बनाः कत्यना(4)लम्बनाः कत्युपात्ताः कत्यनुपात्ताः कति संचिताः कत्यसंचिताः ? तदिदमारभ्यते ।

[35] चित्ताख्याः सप्त सालम्बा धर्माख्यः संप्रयुक्तकः ।

सालम्बना इति वर्तते । शेषास्त्वनालम्बना विषयाग्रहणात् ॥

अमूर्ता ध्वनिना सार्धमनुपात्ताः

य एते सप्तचित्तधातवो धर्मधात्वर्धेन सहोक्तास्ते शब्देन (5)सहानुपात्ताः । अतोऽन्ये

नव द्विधा ॥[१]

ये सन्तानाधिरोहिनः(णः) प्रत्युत्पन्नाश्चक्षुरादयस्तदविनिर्भागिणश्च रूपादयः । शेषास्त्वनुपात्ताः । निश्चेतनत्वादनात्मभावपर्यापन्न[त्वा]च्च । शेषा ये बाह्याः कायेन्द्रियसंतानव्यतिरेकवर्तिनस्तेऽनुपात्ता इति सिद्धम् ॥

कति भूतानि कति भौतिकाः ? तत्राप्युच्यते ।

[36] (6)स्पृश्यं द्विधा

अत्र भूतानि चत्वारि भौतिकं च गुरुत्वादिसप्तप्रकारम् ।[२]

---

[१] Cf. सप्त सालम्बनाश्चित्तधातवोऽर्द्धं च धर्मतः ।
नवानुपात्तास्ते चाष्टौ शब्दश्चान्ये नव द्विधा ॥

...सालम्बनं यच्चैतसिकस्वभावम् । ...उपात्तमिति कोऽर्थः ? यच्चित्तचैत्तैरधिष्ठानभावेनोपगृहीतमनुग्रहोपघाताभ्यामन्योन्यानुविधानात् । यल्लोके सचेतनमित्युच्यते । *Akb.* I. 34. See, *Dhs.* 1185-1186 and *Aam.* p. 58.

[२] श्लक्ष्ण-कर्कश-गुरुत्व-लघुत्व-शीत-बुभुक्षा-पिपासा ।

सधर्मांशाः सह ता नव भौतिकाः ।[१]

सह धर्मधात्वंशेनाविज्ञप्त्याख्येन 'स[ह] ता नव भौतिकाः' ॥

एवं कति मूर्ताः ?

दश सावयवा मूर्ताः

शेषास्त्वमूर्ताश्चक्षुर्विज्ञानधात्वादयः ।

त एव दश संचिताः ॥[२]

परमानु(णु)संघाता(7) इत्यर्थः । त एवाष्टौ चक्षुर्विज्ञानधात्वादयो [हित्वा शेषा दश] संचिताः ॥

कति च्छेत्तारः कति च्छेद्याः, कति दग्धारः कति दाह्याः, कति तोलयितारः कति तोल्याः ? तदिदमत्रोच्यते ।

[37] रूपगन्धरसस्पर्शाश्च्छेतृच्छेद्यात्मका मताः ।
दाहकास्तोलकाश्चैते दाह्यास्तोल्यास्त एव वा ॥[३]

'वा' शब्दो मतविकल्पार्थः । केषा(8)ञ्चित्तेजोधातुरेव दग्धा गुरुत्वमेवा(व) तोल्यम् ॥[४]

कति विपाकजाः कत्यौपचयिकाः ?

[38] पञ्च रूपीन्द्रियात्मानो विपाकोपचयात्मकाः ।

---

[१] Cf. स्प्रष्टव्यं द्विविधं शेषा रूपिणो नव भौतिकाः । धर्मधात्वेकदेशश्च । पञ्चेन्द्रियधातवश्च चत्वारो विषयाः । एते नव धातवो भौतिका एव । *Akb.* I. 35 abc.

The *Akb.* I. 35 c contains a discussion on the *bhūta-bhautikavāda*: भूतमात्रं दशायतनानीति भदन्तबुद्धदेवः । तच्च नैवम्···। This view of Buddhadeva is referred to in the *Adv. kārikā* 116.

[२] Cf. सञ्चिता दश रूपिणः । *Ak.* I. 35d.

[३] Cf. छिनत्ति छिद्यते चैव बाह्यं धातुचतुष्टयम् ।
दह्यते तुलयत्येवं विवादो दग्धृतुलययोः ॥ *Ak.* I. 36.

[४] केचिदाहुः । तदेव धातुचतुष्टयं दाहकं च तुल्यम् । केचिदाहुस्तेजोधातुरेव दग्धा गुरुत्वमेव च तुल्यमिति । *Akb.* I. 36.

विपाककारणहेत्वधीनजन्मत्वात्। नैष्यन्दिकानि चक्षुरादीनि पञ्च न विद्यन्ते। मृतस्य विपाकजव्यतिरिक्तर्तान्नैष्यन्दाभावात्। तत्र विपाकहेतो(9)र्जाता विपाकजाः, मध्यपदलोपं कृत्वा गोरथवत्।[1]

अमूर्त्ता नौपचयिकाः

सप्तचित्तधातवो धर्मधातुश्चामूर्त्ता नैष्यन्दिकविपाकजास्तु विद्यन्ते सभागविपाकहेतुबलोत्पत्तेः।

त्रिधा शेषाः

रूपधात्वाद्याश्चत्वारस्त्रिप्रकारा ये कायेन्द्रियसहवर्तिण(न)स्ते त्रिधा। ये बाह्याः [I. B, 6. Fol. 35 a.] (1)ते द्विधा।

ध्वनिर्द्विधा ॥[1]

शब्दस्तु विपाकजो नास्तीत्यागमः। युक्तिरपीच्छातस्तत्प्रवृत्तेः ॥[2]

इदानीमिदमुच्यते। यश्चक्षुर्धातुना समन्वागतः समन्वागमं प्रतिलभते चक्षुर्विज्ञानधातुनापि सः? यो वा चक्षुर्विज्ञानधातुना चक्षुर्धातुनापि सः? आह। नात्रैकांशः। यस्मात्

[39] चक्षुस्तदुपलब्धिश्च पृथग्वा सह वाऽप्नुयात्।(2)[3]

---

[1] Cf. **विपाकजौपचयिकाः पञ्चाध्यात्मं विपाकजः।**
न शब्दोऽप्रतिघा अष्टौ नैष्यन्दिकविपाकजाः ॥

…फलकालप्राप्तं वा कर्म विपाक इत्युच्यते। …तस्माज्जाता विपाकजाः। फलं तु विपक्तिरेवेति विपाकः। …आहारसंस्कारस्वप्नसमाधिविशेषैरुपचिता औपचयिकाः। *Akb.* I. 37.

[2] इच्छातः प्रवृत्तेरिति। शब्दो मे स्यादितीच्छया शब्दः प्रवर्तते। अनिच्छया न प्रवर्तते। विपाकजश्च धर्मोऽनिच्छतोऽपि प्रवर्तते। तस्मान्न विपाकजः शब्दः। *Sakv.* p. 70.

For a controversy on this, see *Kv.* XIII. 3.—इदानि **सद्दो विपाकोति कथा** नाम होति। तत्थ 'सो तस्स कम्मस्स कतत्ता उपचितत्ता उस्सन्नत्ता विपुलत्ता ब्रह्मस्सरो होती' ति आदीनि अयोनिसो गहेत्वा सद्दो विपाको ति येसं लद्धि, सेय्यथापि **महासङ्घिकानं**। तेसं, कम्मसमुट्ठाना अरूपधम्माव विपाकोति नामं लभन्ति, रूपधम्मेसु पनायं वोहारो नत्थीति दस्सेतुं पुच्छा **सकवादिस्स**…। *KvA.* XIII. 3.

It is interesting to note that the *Prajñapti* too contains a similar passage: यर्त्तहि **प्रज्ञप्तिशास्त्रे** उक्तम्—'पारुष्यविरतेः सुभावितत्वाद्ब्रह्मस्वरता महापुरुषलक्षणं निर्वर्तते' इति?…*Akb.* I. 37 a.

[3] Cf. **चक्षुर्विज्ञानधात्वोः स्यात् पृथग्लाभः सहापि च।** *Ak.* I. 38 cd.

[१] चक्षुर्धातुं तावल्लभते न चक्षुर्विज्ञानधातुम्। कामधातौ क्रमेण(ण) चक्षुरिन्द्रियं प्रतिलभमानः, आरूप्यधातुच्युतश्च द्वितीयादिषु ध्यानेषूपपद्यमानः। स्याच्चक्षुर्विज्ञानधातुना न चक्षुर्धातुना। द्वितीयादिषु ध्यानेषूपपन्नश्चक्षुर्विज्ञानमसंमुखीकुर्वाणः। ततश्च्युतश्चाधस्तादुपपद्यमानः(3)। उभाभ्यामपि—आरूप्यधातुच्युतः कामधातौ ब्रह्मलोके चोपपद्यमानः। नोभाभ्याम्—एतानाकारान् स्थापयित्वा।

यश्च[क्षु]र्धातुना समन्वागतः चक्षुर्विज्ञानधातुनापि सः? चतुष्कोटिकः।[२] प्रथमा—द्वितीयादिषु ध्यानेषूपपन्नश्चक्षुर्विज्ञानमसंमुखीकुर्वाणः। द्वितीया—कामधातावलब्धि(ब्ध)विही(4)नं (न) चक्षुः। तृतीया—कामधातौ लब्धाविहीनश्च(न च)क्षुः प्रथमध्यानोपपन्नो द्वितीयादिध्यानोपपन्नश्च पश्यन्। चतुर्थी—एतानाकारान् स्थापयित्वा॥[१]

गतमेतत्। प्रकृतमिदानीमनुवर्त्यताम्। कत्याध्यात्मिकाः कति बाह्याः?[3]

द्वादशाध्यात्मिका ज्ञेयाः[४]

पञ्चेन्द्रियात्मिकः सप्तचित्तधातु(त)वश्च, अहंकारसन्नि(5)श्रयत्वात्। "आत्मना हि सुदान्तेन स्वर्गं प्राप्नोति पण्डितः।" इति।[५]

बाह्याष्षड्विषयात्मकाः॥

कति दर्शण(न)हेयाः कति भावनाहेयाः कत्यहेयाः?[६] तदारभ्यते।

[40] त्रयोऽन्त्यास्त्रिविधाः

मनोधातुर्मणो(नो)विज्ञानधातुर्धर्मधातवस्त्रिप्रकाराः। अष्टाशीत्यनुशयसहचरिष्णवस्तत्प्राप्तयश्च दर्शण(न)(6 हेयाः।

---

[१] This whole *Adv*. (from चक्षुर्धातुं तावल्लभते to चतुर्थी—एतानाकारान् स्थापयित्वा) is almost identical with *Akb*. I. 38 cd.

[२] प्रथमे चतुःकोटिके प्रतिलम्भोऽधिकृतो द्वितीये तु प्राप्तिमात्रम्। *Sakv*. p. 73.

[3] See *Dhs*. 1207, 1208 and *Aam*. p. 58.

[४] Cf. द्वादशाध्यात्मिका हित्वा रूपादीन्

आत्मन्यसति कथमध्यात्मिकं बाह्यं वा। अहंकारसन्निश्रयत्वाच्चित्तमात्मेत्युपचर्यते। "आत्मना हि सुदान्तेन···" अत आत्मभूतस्य चित्तस्याश्रयभावेन प्रत्यासन्नत्वात्। *Akb*. I. 39 ab.

[५] Cf. अत्तनाव सुदन्तेन नाथं लभति दुल्लभं। *Dhammapada*, XII. 4.

[६] See *Dhs*. 1002—1008 and *Asm*. p. 26.

शेषा भावनापथसंक्षयाः ।

ये सास्रवाः । ये त्वनास्रवास्तेऽप्रहेया निर्दोषत्वात् ॥

न रूपमस्ति दृग्घेयं नाक्लिष्टं नाविकल्पकम् ॥[१]

पृथग्जनत्वमिति चेत् ।[२] **न । तस्यानिवृताव्याकृतत्वात्, समुच्छिन्नकुशलमूलवीतरागाणामपि तत्समन्वागमात् । आपायिकं च कायवाक्कर्मरूपस्व⁽⁷⁾भावं तदप्यार्यमार्गविरोधित्वाद्विहीनं न तु प्रहीनं(णं) तस्मादुभयं न दर्शण(न)हेयं सत्येष्वविप्रतिपत्तेः । दुःखधर्मज्ञानक्षान्तौ पृथग्जनत्वप्रसंगाच्च ।**

पञ्चविज्ञानकाया [अ]विकल्पकास्तेऽपि न दर्शण(न)हेयाः ॥

कति सभागाः कति तत्सभागाः ?

[41] सभाग एव धर्माख्यः शेषास्तूभयथा स्मृताः ।[३]

⁽⁸⁾धर्मधातुवर्ज्या अन्ये धातवो द्विधाः । सभागास्तत्सभागाश्च ॥

कः पुनः सभागार्थः को वा तत्सभागार्थः ?

सभागस्तत्सभागत्वे स्वक्रियाभाक्त्व तुल्यते ॥[३]

---

[१] Cf. **दश भावनया हेयाः पञ्च चान्त्यास्त्रयस्त्रिधा ।**
न दृष्टिहेयमक्लिष्टं न रूपं नाप्यषष्ठजम् ॥ *Ak.* I. 40.

[२] ननु चान्यदपि दर्शनप्रहातव्यमस्ति पृथग्जनत्वमापायिकं च कायवाक्कर्म । आर्यमार्ग विरोधित्वान्न तद् दर्शनप्रहातव्यम् । *Akb.* I. 40a.

ननु चान्यदपीति विस्तरः । पृथग्जनत्वमनिवृताव्याकृतसंस्कारस्वभावत्वाद् भावनाहेयमध्यगतम् । अपायसंवर्तनीयं च कायवाक्कर्म रूपस्वभावत्वाद् भावनाहेयमुक्तमिति । अतश्चोदयन्ति **वात्सीपुत्रीयाः** । आर्यमार्गविरोधित्वादिति । पृथग्जनत्वमार्यमार्गोत्पादे न भवति । नियते चापायिके कर्मणि सत्यार्यमार्गो नोत्पद्यते । आर्यमार्गोत्पादे च सत्यापायिकं कर्म नोत्पद्यते । तस्मात् सत्कायदृष्टयादिवत्तदुभयं दर्शनहेयमिति वर्णयन्ति । तत्प्रतिषेधार्थमुक्तमप्येतत् ।……समुच्छिन्नकुशलमूलाः कुशलैर्धर्मैरसमन्वागता इष्टाः । पृथग्जनत्वेन तु समन्वागताः । यस्मात् ते पृथग्जना इष्यन्ते । तस्मान्न कुशलं पृथग्जनत्वम् । क्लिष्टमपि तन्न भवति । वीतरागाणामपि तेन समन्वागमात् । *Sakv.* pp. 77-8.

[३] Cf. **सभागस्तत्सभागोऽपि शेषो यो न स्वकर्मकृत् ।**

यो हि विषयो यस्य विज्ञानस्य नियतो यदि तत्र तद्विज्ञानमुत्पन्नं भवत्युत्पत्तिधर्मि वा एवं स विषयः सभाग इत्युच्यते । न च सोऽस्ति कश्चिद्धर्मधातुर्यत्र नानन्तं मनोविज्ञानमुत्पन्नमुत्पत्स्यते वा ।……तस्माद्धर्मधतुर्नित्यं सभागः । *Akb.* I. 39 cd.

यः स्वक्रियां भजते स सभाग इत्युच्यते । यः स्वक्रियाविरहितः स तत्सादृश्यमात्रभजमानत्वात् तत्सभाग इत्याख्यायते ।[1]

(9)अत्र सभागस्त्रिविधः । अध्वस्तु स्वक्रियाभेदेन वाच्यः । एवं तत्सभागः क्रियाविरहितो वाच्यः । अनुत्पत्तिधर्मकं चतुर्थमिति काश्मीराः ॥[2]

कति दृष्टिः कति न दृष्टिः ?

[42] चक्षुः सधर्मधात्वंशं नवधा दृष्टिरुच्यते ।[3]

चक्षुस्तावल्लोकेऽपि दृष्टिरिति प्रतीतम् । धर्मधातोरपि प्रदेशो [I. A, 6. Fol. 35 b.] दृष्टिस्वभावोऽष्टविधः[4] क्लिष्टाक्लिष्टप्रज्ञात्मकः । शेषस्तु न दृष्टिः ।

पाञ्चविज्ञानकी प्रज्ञा न दृष्टिरणि(नि)तीरणात् ॥[5]

नितीरिका हि दृष्टयो विचारणाश्रयात् । सा त्वविकल्पिका जडस्वभावा । अत्यल्पमिदमुच्यते । मनोविज्ञानभौम्यनिरासादसंप्रयुक्ता(2) न दृष्टिरू(रि)त्युपसंख्यातव्यम् ॥

कथं पुण(न)रेताः प्रज्ञाः पश्यन्ति ? तदिदमाविष्क्रियते ।

[43] समेघामेघरात्र्यह्नोर्दृश्यं चक्षुर्यथेक्षते ।
क्लिष्टाक्लिष्टदृशौ तद्वच्छैक्षाशैक्षे च पश्यतः ॥[6]

---

[1] Cf. सभाग इति कोऽर्थः । इन्द्रियविषयविज्ञानानामन्योन्यभजनं कारित्रभजनं वा भागः । स एषामस्तीति सभागः । स्पर्शसमानकार्यत्वाद्वा । ये पुनरसभागास्ते तेषां सभागानां जातिसामान्येन सभागत्वात् तत्सभागाः । *Akb*. I. 39 cd.

[2] Cf. तत्सभागं चक्षुः **काश्मीराणां** चतुर्विधम् । यद् दृष्ट्वा रूपाणि निरुद्धं निरुध्यते निरोत्स्यते वा यच्चानुत्पत्तिधर्मि । **पाश्चात्यानां** पुनः पञ्चविधम् । तदेवानुत्पत्तिधर्मि द्विधा कृत्वा विज्ञानसमायुक्तं चासमायुक्तं च । *Ibid*. See *Asm*. p. 29.

[3] Cf. **चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिरष्टधा ।** *Ak*. I. 41 ab.

[4] पञ्च सत्कायदृष्टयादिका दृष्टयः, लौकिकी सम्यग्दृष्टिः शैक्षी दृष्टिरशैक्षीदृष्टिरित्ययमष्टप्रकारो धर्मधातुर्दृष्टिः । *Akb*. I. 41 ab.

[5] Cf. **पञ्चविज्ञानसहजा धीर्न दृष्टिरतीरणात् ॥** *Ak*. I. 41 cd.

[6] Cf. लौकिकी पुनः सम्यग्दृष्टिर्मनोविज्ञानसंप्रयुक्ता कुशलसास्रवा प्रज्ञा । शैक्षस्यानास्रवा दृष्टिः शैक्षी, अशक्षस्य अशैक्षी । समेघामेघरात्रिदिवरूपदर्शनवत् क्लिष्टाक्लिष्टलौकिकीशैक्ष्यशैक्षीभिर्दृष्टिभिर्धर्मदर्शनम् । *Akb*. I. 41 cd.

यथा समेघाया(यां) तिमिरपटलावगुण्ठितचन्द्रनक्षत्रचक्रा(क्र)प्रायां रजन्यां रूपाणि दृश्यन्ते तथा क्लिष्टाः (3)पञ्चदृष्टयो ज्ञेयं पश्यन्ति। यथा तु विगतरजांसि निशाकरकिरणांशुकावगुण्ठितायां त्रियामायां रूपाणि दृश्यन्ते, तथा लौकिकी सम्यग्दृष्टिः पश्यति। यथा तु मेघपटलावगुण्ठिते दिवाकरकिरणानुद्भासिते दिवसे रूपाणि दृश्यन्ते तद्वच्छैक्षी दृष्टिः पश्यति। यथा तु द्रवकनकरसावसेक(4)पिञ्जरदिनकरकिरणप्रोत्सारिततिमिरसंचये दिवसे ञ्च(च)क्षुष्मतो देवदत्तस्य रूपं चक्षुरीक्षते, तथा बुद्धानामर्हतां प्रज्ञाचक्षुरविद्याक्लेशोपक्लेशमलदूषिकातिमिरपटलवर्जितं ज्ञेयं पश्यतीति।

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः(5) ।

प्रथमाध्याये

चतुर्थपादः।

आह। यदुक्तम्—चक्षुर्दर्श(न)मष्टप्रकारा च प्रज्ञा दृष्टिरिति। अथ विज्ञानं पश्यत्यथ न पश्यति ? यदि पश्यति दशधर्मा दृष्टिस्वभावा भवन्ति। अथ न पश्यति दार्ष्टान्तिकपक्षस्तर्ह्युज्झितो भवति। देवा एनं ग्रहीष्यन्ति ग्रहीतव्यं चेन्मंस्यन्ते।

यत्तूक्तं दशधर्मा दृष्टिस्वभावाः (6)प्राप्नुवन्तीत्यत्र विज्ञानस्य मुख्यदर्शनकल्पना(ना)प्रतिषेधमुपरिष्टात् करिष्यामः। इदं तु वक्तव्यम्। चक्षुश्चक्षुर्विज्ञानप्रज्ञासामग्रीणां कः पश्यति ? कुतः संशय इति चेत्। सर्वत्र दोषदर्शणा(ना)त्। यदि तावच्चक्षुः पश्यति यावत्कायः स्पृशति ततो युगपत् सर्वविषयोपभोगप्रसंगः(7)। अथ चक्षुर्विज्ञानं पश्यति कस्तर्हि विजानाति ? व्यवहितमपि किं न पश्यति, अप्रतिघत्वात् ? अथ प्रज्ञा पश्यति श्रोत्रविज्ञानादिष्वपि प्रज्ञा विद्यत इति तत्रापि दर्शण(न) प्रसंगः। अथ चक्षुरादिसामग्री पश्यति सापि खलु चक्षुरादिसामग्र्यङ्गव्यतिरिक्ता स्वभावक्रिया[ऽ]भावान्न विद्यते।

(8)चक्षुरादिसामग्र्यङ्गाणा(ना)मपि प्रत्येकं दर्शण(न)शक्तिक्रिया(ऽ)भावो[ऽ]न्धशं(श)तवदित्यसत्त्वम्। सर्वसामग्रीणा(णां) सर्वकार्यकरणापत्तित्वा[त्], विशेषाभावात्।

हेतुप्रत्ययसामग्रीं प्रतीत्य क्रियामात्रं विज्ञानमुत्पद्यत इति चेत्। न। जनिकर्त्तृभावे जन्मक्रियास्वातन्त्र्यानुपपत्तेः, नश्यादिवत्। हेतुप्रत्य(9)यानां परतन्त्राणां स्वात्मन्यवस्थितानां निरात्मकानां निरात्मककरणशक्त्ययोगात्।

किञ्च, विज्ञेयाभावे विज्ञानानुपपत्तेः, दाह्यदहनवत्।

किञ्च, विज्ञानक्रियाश्रु(श्रि)ताभावे तदभावाच्चित्रकुड्यवत्। जन्मनाशयोर्द्धर्मिधर्मत्व विरुद्धानामन्यतरोपपत्तिर्विणा(ना)शस्य वा सजातिहेतुत्वप्र[I. B. 7 Fol. 36 a.](1)संगः। यज्जात्यनुवृत्तिस्तद्बीजमिति चेत्। न। कुशलाकुशलादिचित्तनिरोधे [वीज]त्वानुपपत्तेः, सामग्रीपक्षोत्सर्गात्सांख्यमताभ्युपगमदोषाच्च। तेषामपि प्रधानाख्याद्बीजादेकस्मान्निरपेक्षात्सर्वं संभवति। निमित्तान्तरापेक्षा शक्तशक्तेरिति चेत्। न। अक्षणिकत्वदो[षात्]। सर्वसामग्र्यङ्गबीजाभ्युपगमे कार्यस्वभावादिवैचि(2)त्र्यप्रसंगः। तस्मान्निर्दोषः पक्षो वक्तव्यः। सोऽयं प्रक्रम्यते।

[44] चक्षुः पश्यति विज्ञानं विजानाति स्वगोचरम् ।
आलोचनोपलब्धित्वाद्विशेषः सुमहांस्तयोः ॥[१]

चक्षुर्द्रव्यं हि द्रष्टृस्वभावम् । तस्य हेतुप्रत्ययसामग्रीपरिग्रहप्रबोधितशक्तेः रूपदर्शनक्रियामात्रमुत्पद्यते । द्रव्यक्रिययोश्चान्यत्वं सिद्धसाध्यमानरूपत्वा(3)न्निरपेक्षसापेक्षव्यपदेशित्वाच्च द्रष्टव्यम् । तत्र चक्षुर्मूर्तिक्रियावद्विज्ञानाधिष्ठितं दर्शण(न)क्रियामारभते । न विज्ञानशून्यम् । यथैव चक्षुर्विज्ञानमालोचनाधिष्ठितत्रियं विजानाति, न केवलम्, परस्परानुग्रहबलाद्ध्यनयोः प्रदीपादिप्रत्ययान्तरपरिगृहीतयोर्युगपदेकस्मिन् विषये वृत्तिलाभो भवति ।

य(4)स्त्वेतदतिपत्ये(त्यै)वं कल्पयति—'कारणभूताभ्यां प्रागुत्पन्नाभ्यां चक्षूरूपाभ्यां कार्यभूतं विज्ञानं सहैकस्मिन् काले नावतिष्ठते' इति[२] तस्य सक्षाद्विषयानुभवनाभावादनुमानागमाभावप्रसंगः । अनुभवज्ञाने चासति मनोविज्ञानस्मृतिगोचराभावादनुत्पत्तिप्रसंगः । नियतविषयस्मरणाभावाच्च । तस्माद्विज्ञानं नि(5)यताश्रयालम्बनलब्धप्रतिष्ठं सहकारिकारणसामग्रीसन्निपातोपजनितक्रियं साक्षाद्विषयमुपलभते । चक्षुरप्यालोचयति प्रदीपस्तत्कालमेवावभासयति । य एते विज्ञानचक्षूरूपादयः स्वहेतुसामग्रीप्रबोधितशक्तयः [ते] विषयप्रतिविज्ञप्त्यालोचनावभासनाख्यां युगपत् सौधीं सौधीं वृत्तिप्रति(6)पद्यन्त इति युक्तिमती नीतिः ।

तस्मात्सत्स्वप्यन्येषु प्रत्ययेषु दर्शण(न)क्रियायाश्चक्षुषः प्राधान्यात्, तदेवाञ्जसा पश्यतीत्युच्यते । यथा वा देवदत्तः स्थालीजलज्वलनतण्डुलादिषु सत्स्वपि पाके प्रवर्तमाने स्वस्यामधिश्रयनो(येणो)दकासेचनतण्डुलावपनदर्वीपरिघट्टनाचामनिस्रावणक्रियायां लब्ध(7)सामर्थ्यः साधनसन्नियोगे च परप्राप्तैश्वर्यो देवदत्तः प्राधान्यात्पचतीत्युच्यते । यदा पुण(न)स्तण्डुलानां

---

[१] चक्षुः पश्यति रूपाणि सभागं न तदाश्रितम् ।
विज्ञानं दृश्यते रूपं न किलान्तरितं यतः ॥ *Ak*. I 42.

The *Akb*. I. 42 contains a long discussion on this controversy. LVP. gives the following four views : Dharmatrāta dit que la connaissance visuelle *(chakshurvijñāna)* voit les visibles. Ghoshaka dit que la *prajñā* associée a la connaissance visuelle voit les visibles. Le Dārshṭāntika dit que le 'complexe' *(sāmagrī)* voit les visibles. Le Vatsīputrīya dit qu'un seut œil voit les visibles... *LVPAk*. I. p. 82.

[२] This is a view of the Dārshṭāntika, cf. **दार्ष्टान्तिकस्य** हि सर्वमप्रत्यक्षम् । पञ्चानां विज्ञानकायानामतीतविषयत्वाद्यदा खलु चक्षू रूपे विद्येते तदा विज्ञानमसत् । यदा विज्ञानं सत् चक्षूरूपे तदासती, विज्ञानक्षणस्थित्यभावे स्वार्थोपलब्ध्यनुपपत्तेश्च । V. infra, *Adv. kārikā* 77 cd.

विक्लेदो विवक्षितः पाको वा तदा जलानलयोः प्राधान्याद्व्यपदेशो भवत्यम्बु क्लेदयत्यग्निः पचतीति। तस्मात्सामग्र्यां सत्यां दर्श(8)णे(ने) प्रवर्तमाने प्राधान्याच्चक्षुः पश्यतीत्युच्यते। कथं प्राधान्यमिति चेत् ? तत्प्रकर्षे दर्शण(न)-प्रकर्षात् । तुल्ये हि प्रथमध्यानचक्षुर्विज्ञाने द्वितीयादिषु चक्षुष्प्रकर्षाद्दर्शन-प्रकर्षो दृश्यत इति। तस्माद्युक्तमुक्तम्—"चक्षुः पश्यति नयनः(नम्) पश्यति मनसि तु भक्त्या प्रज्ञावृत्तिरुपचर्यते मनसा पश्यति" इति ।[1]

तत्र (9)यदुक्तं कोशकारेण—"किमिदमाकाशं खाद्यते। सामग्र्यां हि सत्यां दृष्टमित्युपचारः प्रवर्तते। तत्र कः पश्यति ?" इति ।[2] तदत्र तेन भदन्तेन सामग्र्यङ्गक्रिया[मपह ?]······क्रियते । अभिधर्मसंमोहाङ्कस्थाने-नात्माप्यङ्कितो भवत्ययोगशून्यताप्रपाताभिमुख्यत्वं प्रदर्शितमिति ॥[3]

[I. A. 7. Fol. 36b.](1) किं पुण(न)रेकेनापि चक्षुषा पश्यति, आहोस्विद् द्वाभ्यामेवेति ? नात्र नियमः। यस्मात्

---

[1] एष तु **काश्मीरवैभाषिकाणां** सिद्धान्तः। चक्षुः पश्यति श्रोत्रं शृणोति, घ्राणं जिघ्रति जिह्वा आस्वादयति, कायः स्पृशति, मनो विजानातीति। *Akb.* I. 42.

For this controversy, see *Kv.* XVIII. 9.—**इदानि चक्खुना रूपं पस्सतीति** कथा होति। तत्थ "चक्खुना रूपं दिस्वा"ति वचनं निस्साय पसादचक्खुमेव रूपं पस्सतीति येसं लद्धि, सेय्यथापि **महासंघिकानं। "इध भिक्खवे भिक्खु चक्खुना रूपं पस्सती"**ति ससम्भारकथा-नयेन वुत्तं। यथा हि उसुना विज्झन्तोऽपि धनुना विज्झतीति वुच्चति। एवं चक्खुविञ्ञाणेन पस्सन्तोपि चक्खुना पस्सतीति वुत्तो। तस्मा असाधकमेतं। *KvA.* XVIII. 9. Cf. **चक्खुना रूपं दिस्वा** ति कारणवसेन चक्खू ति लद्धवोहारेन रूपदस्सनमत्तेन चक्खुविञ्ञाणेन रूपं दिस्वा। **पोराणा** पनाहु—**"चक्खु रूपं न पस्सति अचित्तकत्ता, चित्तं न पस्सति अचक्खुकत्ता, द्वारारम्मणसंघट्टे पन चक्खुप्पसादवत्थुकेन चित्तेन पस्सति।"** ईदिसी पनेसा, धनुना विज्झती ति आदिसु विय ससम्भारकथा नाम होति। तस्मा चक्खुविञ्ञाणेन रूपं दिस्वा ति अयमेवेत्थ अत्थो ति। *Vm.* I. 53.

For other references, see *LVPAk.* I. p. 82.

[2] Cf. अत्र **सौत्रान्तिका** आहुः। किमिदमाकाशं खाद्यते। चक्षुर्हि प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानम्। तत्र कः पश्यति को वा दृश्यते। निर्व्यापारं हीदं धर्ममात्रं हेतुफलमात्रं च। तत्र व्यवहारार्थं च्छन्दत उपचाराः क्रियन्ते। चक्षुः पश्यति विज्ञानं विजानातीति। नात्राभिनिवेष्टव्यम्। उक्तं हि भगवता "जनपदनिरुक्तिं नाभिनिवेशेत, संज्ञां च लोकस्य नाभिधावेदिति।" *Akb.* I. 42

It is interesting to note that the *Adv.* here identifies the Kośakāra with the Sautrāntika. For an elucidation of this view of Sautrāntika, see Th. Stcherbatsky: *The Central Conception of Buddhism*, p. 62.

[3] This statement is very significant. It proves the authenticity of a tradition that the Kośakāra was a Vaibhāshika before he became a Mahāyānist.

[45] एकस्य चक्षुषः कार्यं विज्ञानमथवा द्वयोः ।[१]

इति द्विचन्द्रदर्शणा(ना)देर्विज्ञानस्य…………॥[२]

[प्राप्तग्राही]नि(णि) आहोस्विदप्राप्तग्राहीणीति ? तदुच्यते ।

अप्राप्यार्थं मनश्चक्षुः श्रोत्रं च त्रीण्यतोऽन्यथा[3] ॥

घ्राणरसनकायेन्द्रि(2)यानि(णि) प्राप्तग्राहीणीत्यर्थः ॥

अत्र काणादः पश्यति । नाप्राप्तग्राहीनी(णी)न्द्रियाणि । चक्षुषो हि रश्मिर्गत्वा पश्यति । श्रोत्रं च सर्वगतं प्राप्यैव सर्वं शृणोति । तं प्रतीदमुच्यते ।

[46] अप्राप्तग्राहिणः सिद्धा दूरासन्नसमग्रहात् ।

यावता हि कालेन देवदत्तः स्वपाणितललेखां पश्यति तावतैव चन्द्रलेखाम् । न चायं(3) गतिमतां धर्मः । गतिमन्तो हि देवदत्तादयो दूरं चिराद्गच्छन्त्यासन्नं क्षिप्रमिति । न । प्रदीपवत् तत्सिद्धेः ।

प्रदीपादिप्रभावश्चेत्

यथा खलु यावता कालेन प्रदीपो नेदिष्ठं रूपमभिव्यनक्ति तावता दविष्ठं तद्वदिति । तत्र प्रत्यवस्थानम्—

न समं तत्समुद्भवात् ॥

---

[१] Cf. उभाभ्यामपि चक्षुर्भ्यां पश्यति व्यक्तदर्शनात् ।
उभाभ्यामपि चक्षुर्भ्यां पश्यतीत्याभिधार्मिकाः । *Akb.* I. 43 ab.

[२] Here the Ms. is broken. This line seems to refer to the view of Vasubandhu. See *LVPAk.* I. p. 86. Yaśomitra gives following comment :—'उभाभ्यामपि' इत्यपिशब्दादेकेनापि नात्र नियमः । 'द्वयोर्विवृतयोः परिशुद्धतरं दर्शनम्' इति—उक्तं भवति नैकतरान्यथीभावादिति । 'उन्मीलितार्धनिमीलितयोरक्ष्णोरेकस्यान्यथीभावाद्' द्वयोरेकतरत्वाद्यद्यन्यथीभवति, यदि यदुन्मीलितं तदर्धनिमीलितं क्रियेत सर्वनिमीलितं वा तदा द्विचन्द्रदर्शनं न भवति । अतोऽवगम्यते द्वयोरपि चक्षुषोरत्र विज्ञानोत्पत्तौ व्यापारोऽस्तीति । *Sakv.* p. 83.

[३] Cf. चक्षुःश्रोत्रमनोऽप्राप्तविषयं त्रयमन्यथा ।
प्राप्तविषयमित्यर्थः । घ्राणं कथं प्राप्तविषयम् । निरुच्छ्वासस्य गन्धाग्रहणात् । *Akb.* I. 43 cd.

For details on this topic, see *LVPAk* I. pp. 88—9.

The *Akb.* I. 43 d. contains a discussion : किं पुनः परमाणवः स्पृशन्त्यन्योऽन्यमाहोस्विन्न ? This discussion is not found in the *Adv.*

यदि प्रदीपो गच्छेत्, तत्राप्येष दोषः प्रसज्ये(4)त । प्रभादिमध्यान्तेषु च तापविशेषदर्शणा(ना)त् तदेकत्वासिद्धिः । यस्य पुण(नः) प्रतीत्य युगपत् सर्वप्रदीपप्रभो(भामु)पादाय रूपपरमाणूनामुत्पत्तिस्तस्यैष दोषो नास्ति ॥

[47] सर्वग्रहप्रसंगश्चेन्नायस्कान्तादिदर्शणा(ना)त् ।

यद्यप्राप्तग्राहि चक्षुः ब्रह्मलोके ब्रह्माणं कस्मान्न पश्यति ? तत्रेदमुच्यते । नायस्कान्तवत्तत्सिद्धेः । यथा (5)तुल्येऽप्यप्राप्ताकर्षणे न प्राचीनोऽयस्कान्तो मणिरुदीचीनमयः समाकर्षति तद्वदिति ॥

अत्र पुण(न)र्विन्ध्यवासी पश्यति सर्वगतत्वमिन्द्रिया(णा)म् । तं प्रतीदमुच्यते ।[१]

सर्वगत्वाददोषश्चेन्नायोगात्तिलतैलवत् ॥

को ह्यनुन्मत्तो ब्रूयात्तिलेषु तैलं सर्वगतमस्तीति ? तद्वच्चक्षुःश्रोत्राद्यधिष्ठानेभ्यो बहिरिन्द्रि(6)याणि कः कल्पयेदमूढचेताः ?

इदं वक्तव्यम् । [२]यत्र काये स्थितश्चक्षुषा रूपाणि पश्यति किं तानि कायचक्षूरूपविज्ञानानि एकभौमानि, आहोस्विदन्यभौमिकान्यपि ? सर्वेषामनियमः । तत्र कामधातूपपन्नस्य तावत् स्वेन चक्षुषा स्वानि रूपाणि पश्यतः सर्वं स्वभौमम् । तस्यैवास्य ध्यानचक्षुषा स्वरूपाणि(7) पश्यतः कायरूपे स्वभूमिके द्वयं प्रथमाद्ध्यानात् । प्रथमध्यानभूमीनि पश्यतो रूपाण्यपि तत्रत्यानि । द्वितीयध्यानचक्षुषा समीक्षमाणस्य कायरूपे स्वभूमिके, चक्षुर्द्वितीयाद् ध्यानात्, विज्ञानं प्रथमात् । प्रथमध्यानभूमीनि पश्यतो विज्ञानरूपे प्रथमाद्ध्यानात्, कायः कामावचरः, चक्षुर्द्वितीयाद् (8)ध्यानात् । द्वितीयध्यानभूमीनि पश्यतश्चक्षूरूपे द्वितीयध्यानभूमिके कायः कामावचरो विज्ञानं प्रथमध्यानात् । एवं तृतीयचतुर्थध्यानभूमिकेन चक्षुषा तद्भूमिकाधरभूमिकानि रूपाणि पश्यतो विज्ञातव्यम् । प्रथमध्यानोपपन्नस्य स्वेन चक्षुषा स्वाणि(नि) रूपाणि पश्यतः सर्वं स्वभूमिकम् । अधराणि (9)रूपाणि पश्यतस्त्रयं स्वभूमिकं रूपाणि कामावचराणि । द्वितीयध्यानचक्षुषा स्वानि रूपाणि पश्यतस्त्रयं स्वभूमिकं चक्षुर्द्वितीयात् । कामावचराणि पश्यतः कायविज्ञाने स्वभूमिके, कामावचराणि रूपाणि, चक्षुर्द्वितीयात् । द्वितीयध्यानभूमीनि पश्यतश्चक्षूरूपे तद्भूमिके शेषं स्वभूमिकम् । [I. B, 8. Fol. 37a.] (1)एवं तृतीयादिध्यानचक्षुषा योज्यम् । द्वितीयादिध्यानोपपन्नस्य स्वपरचक्षुर्भ्यां स्वपरभूमिकानि रूपाणि पश्यतो यथासंभवं द्रष्टव्यम् ॥[२]

---

[१] This refutation is not found in the *Akb.*

[२-२] This whole passage (from यत्र काये स्थितः to यथासंभवं द्रष्टव्यम् ।) is almost identical with *Akb.* I. 45 cd. Cf. *Asm.* p. 14.

नियतस्त्वयम्—

[48] न ह्यूर्ध्वं चक्षुषः कायो न रूपं नाद्विजं मनः ।
विज्ञानस्य तु नेत्रार्थस्तौ च कायस्य सर्वतः ॥[1]

पञ्चभौमानि कायचक्षूरूपाणि द्वयोः सवितर्कसविचारयोर्भूम्योश्चक्षु(2)विज्ञानम् । तत्र यद्भूमिकः कायस्तद्भूमिकमूर्ध्वभूमिकं वा चक्षुर्भवति न त्वधोभौमिकम् । यद्भूमिकं चक्षुस्तद्भूमिकमधरभूमिकं वास्य रूपं गोचरी भवति नोर्ध्वभूमिकम् । एवं चक्षुर्विज्ञानं नाधरिमे चक्षुषि संमुखीभवति । अस्य तु चक्षुर्विज्ञानस्य रूपं सर्वतो विषयीभवति । कायस्याप्युभे रूपविज्ञाने स(3)र्वतो भवत इति ॥

एवं

[49] नोपरिष्टाच्छ्रुतेः कायो न शब्दो न स्वकं मनः ।
विज्ञानस्य तु निह्रादस्तौ च कायस्य सर्वतः ॥

घ्राणादीनां पुनः

[50] त्रयानां(णां) त्रीण्यपि स्वाणि(नि)

कायगन्धादिविषयविज्ञानानि स्वभूमिकान्येव । उत्सर्गस्यायमपवादः क्रियते ।

तनोर्विज्ञानमप्यधः ।[2]

कायस्पृष्टव्ये स्वभूमिके (4)एव । कायविज्ञानं तु केषाञ्चिदधरभूमिकम् । यथा द्वितीयादिध्यानोपपन्नानामिति ।

मनस्त्वनियतं[3]

समापत्त्युपपत्तिकालेषु कायस्य सर्वतो भावात् । त्रैकालिकाध्वनिर्मुक्तसर्वधर्मविषयित्वात् ॥

किमर्थं पुण(न)रयमल्पार्थः सुमहाग्रन्थसन्दर्भविधिरारभ्यत इति ?

---

[1] Cf. न कायस्याधरं चक्षुरूर्ध्वं रूपं न चक्षुषः ।
विज्ञानं चास्य रूपं तु कायस्योभे च सर्वतः ॥ *Ak.* I. 46.

[2] Cf. तथा श्रोत्रं त्रयाणां तु सर्वमेव स्वभूमिकम् ।
कायविज्ञानमधरस्वभूम्यनियतं मनः ॥ *Ak.* I. 47.

कोशकृदाचष्टे—नह्यत्र किञ्चित्फल(5)मुत्प्रेक्ष्यत इति।[1] तं प्रतीदं फलमादर्श्यते। तत्र खलु

योगिवैश्वरूप्यं प्रदर्शितम् ॥

एतद्वैश्वरूप्यं योगिणां(नां) यदन्यतः कायोऽन्यतश्चक्षुरन्यतः रूपमन्यतो विज्ञानं गृहीत्वा पश्यन्ति। विभूनि च शरीराणि निर्माय मनोजवया रि(ऋ)द्ध्या गत्वा बुद्धा भगवन्तो यथेच्छं लोकधात्वा(त्व)न्तरेषु विनेयानां बुद्धकार्यं (6)कुर्वंति। दिव्याभ्यां चक्षुःश्रोत्राभ्यां रूपाणि दृष्ट्वा शब्दांश्च श्रुत्वा यथेच्छं युगपदनेकानि पाश्वगतिकानि शरीराणि निर्मायानेकगतिधात्वा(त्व)न्तरेषु विनेयकार्यं कुर्वन्तीति।

गतमेतत् प्रासङ्गिकं प्रकरणम् ॥

इदमधुना वाच्यम्। स्कन्धोपादानस्कन्धयोः कः प्रतिविशेषः?[2] तदुच्यते। स्कन्धास्त्रिभिः सत्यैः संगृहीताः(7)। यस्मात्

[51] सास्रवानास्रवाः स्कन्धा[3] ये तूपादानसंज्ञिताः।
सास्रवा एव ते ज्ञेयास्तत्साचिव्यक्रियादिभिः ॥

कारणैरिति वाक्याध्याहारः। तस्मादुपादानस्कन्धाः सत्यद्वयसंगृहीताः। निरोधसत्यं तु स्कन्धलक्षणानुपपत्तेः स्कन्धलक्षणव्यतिरिक्तमिति द्रष्टव्यम् ॥[4]

[52] अध्वाद्याः स्कन्धपर्यायाः

अध्वान(8)स्कन्धाः संस्कृताः कथावस्त्वित्येवमादयः।

धर्माद्या वस्तुनः सतः।

---

[1] Cf. **अनियतं मनः**

कदाचित् कायमनोविज्ञानधर्मैः समानभूमिकं मनो भवति। कदाचिदूर्ध्वभूमिकम्। पञ्चभूमिकेऽपि हि काये सर्वभूमिकानि मनआदीनि भवन्ति समापत्त्युपपत्तिकाले यथायोगमिति विस्तरेण **समापत्तिनिर्देशे कोशस्थान** एतदाख्यायिष्यते। अतिबहुग्रन्थभारपरिहारार्थन्तु नेदानीं पुनराख्यायते। **अल्पं च प्रयोजनं महांश्च श्रम इति**…। *Akb.* I. 47 d.

[2] See *Asm.* p. 3. and *Vm.* XIV 214.

[3] Cf. **सास्रवानास्रवा धर्माः** *Ak.* I. 4a.

[4] Cf. **पञ्चूपादानक्खन्धा ति तथा तेभूमका मता।**
भेदाभावेन निब्बानं खन्धसङ्गहनिस्सटं ॥ *A. Saṅgaho.* VII. 42.

सत् वस्तु धर्मो द्रव्यमायतनं धातुरित्येवमादयः ।
ये तु सास्रवसंज्ञास्ते प्रोक्ता दुःखादिनामभिः ॥[१]

दुःखं लोको भवः समुदय इत्येवमादिभिर्णा(र्ना)मभिः शब्द्यन्ते ॥

अथ कस्माच्चक्षुःश्रोत्रघ्राणानां द्वित्वे सत्येकधातुता ? (9)तदारभ्यते—

[53] स्वात्म्यगोचरकार्याना(णा)मेकत्वादेकधातुता ।
चक्षुरादिद्विभावेऽपि[२]

त्रयाना(णा)मपि खल्वेतेषामेकस्वभावत्वादेकगोचरत्वादेककार्यत्वाच्च द्वित्वेऽपि स[[3]त्येकाधिपत्यं चैकधातुता च] निर्वर्त(र्त)ते ।

द्व्युत्पत्तिः कर्मत्र(त्रि)त्ववशात्[४] ॥

ये तु कथयन्ति "शोभार्थं तु द्वयोद्भवः"[५] इति तेषां श्लीपद- [I. A, 8. Fol. 37 b.] (1)गन्त्र(न्ड)प्रभृतीनां अ[ति]शोभार्थमुत्पत्तिरित्यापन्नम् ॥[६]

---

[१] Cf. ते पुनः संस्कृता धर्मा रूपादिस्कन्धपञ्चकम् ।
त एवाऽध्वा कथावस्तु सनिःसाराः सवस्तुकाः ॥
ये सास्रवा उपादानस्कन्धास्ते सरणा अपि ।
दुःखं समुदयो लोको दृष्टिस्थानं भवश्च ते ॥ *Ak.* I. 7—8

[२] Cf. जातिगोचरविज्ञानसामान्यादेकधातुता ।
द्वित्वेऽपि चक्षुरादीनां *Ak.* I. 19 abc.

[3] Here the Ms. is broken. Only the *avagraha* on त्य is visible. For the restoration—*ādhipatyam* etc, see below, note 6.

[४] This should be त्रित्व-वशात् ।

[५] Cf. **शोभार्थं तु द्वयोद्भवः ।**

एकधातुत्वेऽपि तु चक्षुरादीनां द्वयोः संभव आश्रयस्य शोभार्थम् । अन्यथा ह्येकचक्षुः-श्रोत्राधिष्ठानैकनासिकाबिलसंभवात् महद्वैरूप्यं स्यादिति । *Akb.* I. 19 d.

[६] Yaśomitra gives various viewpoints on this controversy: **आचार्यसंघभद्रस्त्वस्य** सूत्रस्यार्थं विवव्रे । शोभार्थमित्याधिपत्त्यार्थमित्यर्थः । आधिपत्यसंपन्नो हि लोके शोभत इत्यपदिश्यते । येषां चेन्द्रियाणाममून्यधिष्ठानानि तेषां परिशुद्धदर्शनश्रवण-घ्राणाद्याधिपत्यं स्यात् । न हि यथा द्वाभ्यां चक्षुर्भ्यां परिशुद्धं दर्शनं भवति तथैकेन । एवमितरयोरपि । एवं चैषामिन्द्रियत्वं हीयेत तदर्थमेतदुक्तं स्यादिति । स्फुटोपलब्ध्यर्थ-मित्यर्थः । इहापि शक्यमेवं वक्तुम् । एकमेव परिस्फुटोपलब्ध्याश्रयभूतं विस्तीर्णं कर्मणो-त्पद्यताम् । किमाश्रयविच्छेदेनेति । **विभाषायां तु लिखितमेतत् पक्षद्वयम् । शोभार्थं**

इदमिदानीं वाच्यम् । चक्षुरादिकारणसामग्रीसन्निधाने सति चक्षुर्विज्ञानोत्पत्तौ कस्माच्चक्षुःश्रोत्रादिविज्ञानमित्युच्यते ? तत्र [विसर्जनं क्रियते]—

[54] [असाधारण]वैशिष्ट्यादैश्वर्यादान्तरङ्ग्यतः ।
सत्यप्यणे(ने)कहेतुत्वे विज्ञानं तैर्विशेष्यते ॥[१]

चक्षुरादीन्द्रियविशेषाद्विज्ञान(2)विशेषो दृष्टः । चक्षुरादीनां च चतुर्भिः कारणैरीशित्वं दृष्टम्[२] । असाधारणकारणत्वेन चान्तरङ्ग्य इति ॥

अत्राह । अथ कस्मात् सर्वपदार्थां[नां] द्रव्यस्वभावे(वत्वे) निर्वाणमेव परमार्थतो द्रव्यमित्युच्यते[३] यतो धर्मधातुरेव तद्योगाद्द्रव्यवानित्याख्यायते ।[४] कस्माच्च सर्वसंस्कृतानां क्षणिकत्वे सति त्रय (3)एवान्त्या धातवः क्षणिका इत्युच्यन्ते ? तदुभयं प्रदर्श्यते ।

[55] नित्यत्वात्कुशलत्वाच्च[५] निर्वाणं द्रव्यमञ्जसा ।
सारद्रव्येन तेनैको धर्माख्यो द्रव्यवान्मतः ॥

द्वयोद्भव इत्येको व्यक्त्यर्थमित्यपर इत्यलं प्रसङ्गेन । ननु च कर्मवशादिन्द्रियद्वयोत्पत्तिः, किमन्यदेवोच्यते शोभार्थं व्यक्त्यर्थं चेति । कर्मवशादेवात्रेन्द्रियद्वयोद्भव उक्तः । कथमिति । एवं विभक्तावयवाश्रयेणानादिकालाभ्यस्तः शोभाभिमानः सत्त्वानां प्रवर्तते । अतस्तदभिलाषपूर्वकेण स्फुटोपलब्ध्यभिलापपूर्वकेण च कर्मणा तदिन्द्रियद्वयमभिनिर्वर्त्यमानं शोभार्थं व्यक्त्यर्थं चोद्भवतीत्युच्यते । *Sakv*. p. 42.

[१] Cf. **तद्विकारविकारित्वादाश्रयश्चक्षुरादयः ।**
अतोऽसाधारणत्वाच्च विज्ञानं तैर्निरुच्यते ॥ *Ak*. I. 45.

[२] See *Adv. kārikā* 77.

[३] See *Asm*. p. 16.

[४] Cf. **त्रिधाऽन्ये द्रव्यवानेकः क्षणिकाः पश्चिमास्त्रयः ।** *Ak*. I. 38 ab.
असंस्कृतं हि सारत्वाद् द्रव्यम् । *Akb*. I. 38 ab.

[५] For a controversy on the use of the word *kuśala* for *Nirvāṇa*, see *Kv*. XIX.6—**इदानि कुसलकथा नाम होति ।** तत्थ अनवज्जम्पि कुसलं इट्ठविपाकम्पि । अनवज्जं नाम किलेसविप्पयुत्तं । अयं नयो ठपेत्वा अकुसलं सब्बधम्मे भजति । इट्ठविपाकं नाम आयतिं उप्पत्तिपवत्तेसु इट्ठफलनिप्फादकं पुञ्ञं । अयं नयो कुसलत्तिके आदिपदमेव भजति । येसं पन इमं विभागं अग्गहेत्वा अनवज्जभावमत्तेनेव निब्बानं कुसलं ति लद्धि, सेय्यथापि **अन्धकानं**……। *KvA*. XIX. 6.

Cf. also, **स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः ।**
सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः ।
…कुशलो विशुद्धालम्बनत्वात्, क्षेमत्वात् , अनास्रवधर्ममयत्वाच्च । *Triṁśikā*, 29.

[56] प्रथमं निर्मलं चित्तमसाभाग्यात्क्षणः स्मृतः ।
तेनाद्भुतक्षणेनैते क्षणिकाः पश्चिमास्त्रयः ॥[१]

किं पुण(न)रेते चक्षुरादयस्तुल्यं विषयं गृह्णन्ति, आहोस्विन्न्यूनम(4)धिकं वा? तदाविष्क्रियते—

[57] घ्राणं जिह्वा च कायश्च तुल्यार्थग्राह्यदस्त्रयम् ।

द्वयोश्चक्षुःश्रोत्रयोरणि(नि)यम इत्याख्यातं भवति ॥

किंपुण(न)रेषां चक्षुर्विज्ञानादीनां सहज एवाश्रयः, आहोस्विदतीतोऽपि? तदुच्यते ।

पश्चिमस्याश्रयोऽतीतः

मनोविज्ञानस्य क्रियावतो नित्यमाश्रयोऽतीतः ।

पञ्चानां तैः सहापि च ॥

(5)पञ्चानां विज्ञानकायानां तैः सहापि चातीतश्चेति 'च'शब्दात् ।

एवं चतुष्कोटिक आरभ्यते। ये धर्मा विज्ञाननिश्रयाः समनन्तरा अपि ते? प्रश्नश्चतुष्कोटिकः। निश्रय एव चक्षुरादयः। समनन्तरा एव वेदनादयः। उभयं समनन्तरावि(नि)रुद्धं विज्ञानम्। नोभयमेतानाकारान् स्थापयित्वा ॥

इद(6)मिदानीमभिधर्मसर्वस्वं कोशकारकस्मृतिगोचरातीतं[३] वक्तव्यम् । अथैषामष्टादशानां धातूनां कतमं निश्रयं निश्ट(श्रि)त्यानास्रवेण मार्गेण कतमो धातुर्णि(र्नि)रुध्यते?

---

[१] Cf. क्षणिकाः पश्चिमास्त्रयः ।

मनोधातुर्धर्मधातुर्मनोविज्ञानधातुश्च पाठक्रमेण पश्चिमाः । ते प्रथमानास्रवे दुःखे धर्मज्ञानक्षान्तिकाले क्षणमेकमनैःष्यन्दिका भवन्त्यतः क्षणिका इत्युच्यन्ते । अन्यसंभूतसंस्कृतो नास्ति कश्चिदनैष्यन्दिकः । तत्र दुःखे धर्मज्ञानक्षान्तिसंप्रयुक्तं चित्तं मनोधातुर्मनोविज्ञानधातुश्च । शेषास्तत्सहभुवो धर्मधातुः । *Akb.* I. 38 ab.

The Pāli tradition has also used the word *kshaṇa* to describe a similar unique moment : एको व भिक्खवे खणो च समयो च ब्रह्मचरियवासाय। *Aṅg.* IV. p. 227.

[२] Cf. त्रिभिर्घ्राणादिभिस्तुल्यविषयग्रहणं मतम् ।
चरमस्याश्रयोऽतीतः पञ्चानां सहजश्च तैः ॥ *Ak.* I. 44.

[३] These topics (from *Ad. kārikās* 58—70) are not discussed in the *Akb.*

[58] निश्रित्य खल्वनागम्यं निश्रयांश्चतुरोऽथ वा ।
अनास्रवेन(ण) मार्गेण चक्षुर्धातुर्निरुध्यते ॥

नवसु भूमिषु खल्वनास्रवो मा(7)र्गः । चक्षुर्धातुस्तु पञ्चभूमिकः । तत्र प्रज्ञाविमुक्तस्यालब्धध्यानस्यार्यस्य(स्या)नागम्यं निश्रित्य चक्षुर्धातुर्निरुध्यते । निरोधमार्गज्ञानात्मकस्य त्रिधातुप्रतिपक्षत्वाद्ध्यानलाभिनः पुण(न)श्चतुरो णि(नि)श्रयान्निश्रित्य ध्यानान्तरिकायाः प्रथमेन ग्रहणात् ॥

[59] अनागम्यं तु निश्रित्य गन्धधातुर्णि(र्नि)रुध्यते ।

ध्या(8)नालाभिनस्तन्निरोधात् ।

मनोधातुरणा(ना)गम्यं यदि वा सप्तनिश्रयात् ॥

चत्वारि ध्यानानि त्रींश्चारूप्यान्, तस्य त्रैधातुकत्वात् ॥

[60] अनागम्यं तथैवाद्यं चक्षुर्विज्ञानसंज्ञकः ।

निरुध्यत इति वर्तते । तस्य कामप्रथमध्यानसमापन्नत्वात् ।

धर्मधातोर्विचित्रत्वाद्यथायोगं विनिर्दिशेत् ॥

धर्म(9)धातुः खलु कश्चित्कामावचर एव यथा प्रतिघादयः । कश्चित्कामे प्रथमध्यानयोर्यथा वितर्कविचारादयः । कश्चित्कामे प्रथमद्वितीयध्यानयोर्यथा प्रीतिः । कश्चित्कामे तृतीयध्यानयोर्यथा सुखेन्द्रियम् । कश्चित्त्रैधातुको यथा जीवितेन्द्रियादयः । अत उच्यते 'यथायोगं विनिर्दि-
[II. B, I. Fol. 38a] (1)शेत् । एवमन्यानपि धातूननेनैव यथोक्तेन न्यायेन 'यथायोगं विनिर्दिशेत्'इति ॥

इदमिदानीमन्यद्वक्तव्यम् । यदा पृथग्जनश्चक्षुर्धातुं रूपाप्तं परिजानाति तदा कतमाद्धातोर्वैराग्यमाप्नोति ? कति च कुत्रत्याननुशयान् जहाति ? का[नि च] संयोजनानि पर्यादाय जहाति ? तदाविष्क्रियते—

[61] चक्षुर्धातुं हि (2)रूपाप्तं परिजानन् पृथग्जनः ।
कृत्स्नाद्रूपमयाद्धातोर्वैराग्यमधिगच्छति ॥

[62] तस्मादनुशयान्धातोरेकत्रिंशज्जहाति च ।
पर्यादत्ते न किञ्चित्तु संयोजनमसौ तदा ॥

अनुशयानां हि धातुपरिच्छेदो न संयोजनानाम् ॥

[63] रूपवैराग्यमाप्नोति जहात्यनुशयत्रयम् ।

सत्कायदृष्टिशीलव्रतपरामर्शविचिकित्साख्यं(3) रूपधातुपर्यापन्नम् ।

तदा संयोजनं त्वार्यः पर्यादत्ते न किञ्चन ॥

अनुशयत्रयं कतरदार्यो जहाति भवरागमानाविद्याख्यम्? भावनाप्रहातव्यं संयोजनं तु न धातुपरिच्छिन्नमिति न किञ्चित्तदा जहाति ॥

[64] चक्षुर्विज्ञानधातुं तु परिजानंस्तमेव च ।
परिजानात्यवश्यं च ब्रह्मलोकाद्विरज्यते ॥

[65] न तु सं(4)योजनं किञ्चित्पर्यादत्ते तदा ह्यसौ ।
गन्धधातुं रसाख्यं च परिजानन् पृथग्जनः ॥

[66] कामवैराग्यमाप्नोति ध्रुवं ह्यनुशयानपि ।
तदा जहाति षट्त्रिंशद्वर्तिसंयोजनत्रयम् ॥

कामावचराच्छट्त्रिंशदनुशयाञ्जहाति । त्रीणि च संयोजनानि प्रतिघसंयोजनमीर्ष्यामात्सर्यसंयोजने च । गन्धरसधातू (5)परिजानन् पृथग्जनः ॥

[67] आर्यस्तु कामवैराग्यं करोत्यनुशयानपि ।
चतुरः परिजानाति

प्रतिघकामरागमानाविद्याख्यान(न्) भावनाहेयान् ॥

पर्यादत्तेऽपि च त्रयम् ॥

प्रतिघेर्ष्यामात्सर्यसंयोजनाख्यम् ॥

[68] परिजानन्मनोधातुमारूप्येभ्यो विरज्यते ।

आर्य इति वर्तते ।

जहात्यनुशयांस्त्रींश्च

(6)रागमानाविद्याख्यान् ।

पर्यादत्ते त्रयं तथा ॥

एतदेव ॥

[69] परिजानन्खलु प्रीतिं तामेव प्रजहात्यसौ ।
आभास्वराच्च वैराग्यं याति हन्ति तु नास्रवान् ॥

तस्यास्तदुपर्यभावात् ।

[70] परिजानन्सुखं योगी प्रजहाति तदेव च ।
शुभकृत्स्नाच्च वैराग्यं याति क्लेशान्न हन्ति तु ॥

सुखेन्द्रियस्य तृतीयाध्याना(7)दुपर्यभावादकृत्स्नधातून्न क्लेशाञ्जहाति ॥

गतमेतत्प्रयोजनागतं प्रकरणम् । प्रकृतमेवोच्यताम् । अथैषां धातूनां के कति विज्ञानविज्ञेयाः ? तदारभ्यते—

[71] द्विविज्ञेयाः गुणाः पञ्च

पञ्चरूपादिगुणाख्या धातवश्चक्षुरादिविज्ञानमनोविज्ञानविज्ञेयाः । शेषा मनोविज्ञानविज्ञेयाः ॥

कति हे(8)तुः कति न हेतुः ? तदाख्यायते—

हेतुः सर्वे क्षराक्षराः ।[१]

सर्वधर्मा हि कारणहेतुस्वभावाः । क्षरास्तु यथायोगं चिन्त्याः ॥

कतीन्द्रियात्मकाः ? कति नेन्द्रियस्वभावाः ? तदाविष्क्रियते—

अन्यत्र धर्मधात्वर्था(र्धा)च्छड्बाह्या नेन्द्रियात्मकाः ॥[२]

अर्थादायातमाध्यात्मिकाः सर्वे धातवः । बाह्याः (9)पञ्चरूपशब्दगन्धरसस्पर्शधर्मधातोश्चार्धं नेन्द्रियस्वभावं जीवितेन्द्रियश्रद्धादिसुखादिपञ्चकवर्जमिति ।

अभिधर्मदीपे विभाषा[प्रभायां वृत्तौ प्रथमोऽध्यायः ।]

---

[१] Cf. पञ्च बाह्या द्विविज्ञेया नित्या धर्मा असंस्कृताः । *Ak*. I. 48 ab.

[२] Cf. धर्मार्धमिन्द्रियं ये च द्वादशाध्यात्मिकाः स्मृताः ॥ *Ak*. I. 48 cd.

द्वितीयोऽध्यायः ।

प्रथमः पादः ।

[72] द्वाविंशतिप्रकारस्य कृत्स्नस्येन्द्रियपर्वणः ।
संक्षेपेणाभिधास्यन्ते धर्मा णि(नि)र्वचनादयः ॥

चक्षु[II. A, 1. Fol. 38b.](1)रादीन्याज्ञातवतादि(आज्ञातावी)न्द्रियपर्यन्तानि खल्विन्द्रियानि(णि) एतावानिन्द्रियग्रामो न भूयान्नाल्पीयान् ।

उक्तं हि भगवता—“द्वाविंशतिरिन्द्रियानि(णि) कतमानि द्वाविंशतिः ? चक्षुरिन्द्रियं श्रोत्रेन्द्रियं [यावदाज्ञातावी]न्द्रियम्” इति [१]

तस्येन्द्रियराशेर्निर्वचनानुक्रमधातुभूम्यादिप्रकारभेदाः संक्षेपेणाभिधायिष्यन्त इति ॥

किं पुण(2)(न)र्द्रव्यतो द्वाविंशतिरिन्द्रियाण्यथ नामतः ? तदिदमाख्यायते ।

[73] नाम्ना द्वाविंशतिस्तानि द्रव्यतो दश सप्त च ।
यस्मान्नान्यद्द्रव्यं कार्यात्सुखादिनवकत्रयम् ॥

कायेन्द्रियप्रदेश एव हि कश्चित्स्त्रीपुरुषेन्द्रियाख्यं लभते, विशिष्टक्लिष्टविज्ञानसंनिश्रयभूतत्वात् । श्रद्धादीनां च नवानां समुदायेषु त्रिष्व(3)नाज्ञातमाज्ञास्यामीन्द्रियादित्रयाख्याः ॥

अन्ये पुणः(नः) पश्यन्ति—

---

[१] The 22 *indriyas* are :—चक्षुरिन्द्रियं श्रोत्रेन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं कायेन्द्रियं मनइन्द्रियम्, स्त्रीन्द्रियं पुरुषेन्द्रियम्, जीवितेन्द्रियम्, सुखेन्द्रियं दुःखेन्द्रियं सौमनस्येन्द्रियं दौर्मनस्येन्द्रियं उपेक्षेन्द्रियम्, श्रद्धेन्द्रियं वीर्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियम्, अनाज्ञातमाज्ञास्यामीन्द्रियमाज्ञेन्द्रियमाज्ञातावीन्द्रियम् । See *Vbh.* p. 124' and *Aam.* p. 74.

While discussing the *indriyas*, the *Vbh A.* makes a very interesting comment :—....इन्द्रियविभङ्गे द्वावीसतीति, गणनपरिच्छेदो; ...इध सुत्तन्तभाजनियं नाम न गहितं । कस्मा ? सुत्तन्ते इमाय पटिपाटिया द्वावीसतिया इन्द्रियानं अनागतत्ता । सुत्तन्तस्मिं हि कत्थचि द्वे इन्द्रियानि कथितानि, कत्थचि तीणि, कत्थचि पञ्च, एवं पन निरन्तरं द्वावीसति आगतानि नाम नत्थि । *Vbh A.* p. 125.

[74] नामसल्लक्षणाभावात्तन्नाम्नः सार्थकत्वतः ।
त्रयानां(णां) वर्णवृत्तित्वेऽप्यर्थमभ्येष्यते परैः ॥

यत्खलु संवृतिसत्यस्य लक्षणं तत्तेषां नास्ति क्रियापौरुष्यद्वारेण तच्छब्दप्रवृत्तेः, लौकिकाग्रधर्मवत् । सार्थकत्वात्तन्नाम्नोऽर्थवत्तत्खल्वेतन्नाम्नेति ॥

(4)स्त्रीपुरुषेन्द्रियद्वयस्यापि—

[75] विशिष्टबुद्धिहेतुत्वादाधिपत्यविशेषतः ।
कायेन्द्रियाद्विशिष्टत्वं द्वयोर्णे(र्ने)त्रेन्द्रियादिवत् ॥

यथैव हि चक्षुरादीनि कायेन्द्रियविशिष्टाणि(नि) विशिष्टबुद्धिजनकत्वादाधिपत्यविशेषाच्च, तद्वदनयोरपीति ॥

कः पुनरिन्द्रियार्थस्तदारभ्यते —

[76] ऐश्वर्यार्थो विपश्चिद्भिरिन्द्रिया(5)र्थोऽभिधीयते ।[१]

केषु पुण(न)रर्थेषु केषामीशित्वम् ? वयं तावत्पश्यामः—

स्वार्थव्यक्तिषु पञ्चानां

चक्षुरादीनां पञ्चानां स्वार्थप्रकाशनक्रियायामाधिपत्यं समविषममार्गालोचनादित्यर्थः ।

चतुर्णां त्वर्थयोर्द्वयोः ॥[२]

जीवितमनस्त्रीपुरुषेन्द्रियानां(णां) प्रत्येकमर्थद्वये । तत्र तावज्जीवितेन्द्रियस्य नि(6)कायसभागसंबन्धसन्धारणयोः ।[3] मनइन्द्रियस्यापि संक्लेशव्यवदानयोः । यथोक्तम्—"चित्तसंक्लेशात् सत्त्वाः संक्लिश्यन्ते चित्तव्यवदा-

---

[१] Cf. विषयग्रहणाधिपतितोऽपि कुशलप्रबन्धाधिपतितोऽपि शुभाशुभकर्मफलभोगाधिपतितोऽपि लौकिकवैराग्याधिपतितोऽपि शुभाशुभकर्मफलभोगाधिपतितोऽपि लोकोत्तरवैराग्याधिपतितोऽपि इन्द्रियं द्रष्टव्यम् । *Asm.* p. 30. Cf. also, इन्द्रियार्थः कतमः । बलवत्त्वं पटुत्वं चेति इन्द्रियार्थः । *Aam.* p. 75.

[२] Cf. चतुर्ष्वर्थेषु पञ्चानामाधिपत्यं द्वयोः किल ।
चतुर्णां पञ्चकाष्टानां संक्लेशव्यवदानयोः ॥ *Ak.* II. 1

[3] Cf. निकायसभागस्थितौ जीवितेन्द्रियस्याधिपत्यम् । न तु वैभाषिकवत् निकायसभागसम्बन्धे, तत्र मनस एवाधिपत्यात् । *Sakv.* p. 97.

नहेतोर्विशुद्ध्यन्ते" इति ।[१] पुण(न)र्भवसंबन्धवशिभावानुवर्तनयोर्वा । पुनर्भवसंबन्धे तावद्यथोक्तम्—"गन्धर्वस्य तस्मि(स्मिन्) समये द्वयोश्चित्तयोरण्य(न्य)तरत्संमुखीभूतं भवत्यनुनयस(7)हगतं वा प्रतिघसहगतं वा ।"[२] तथा "विज्ञानं चेदानन्द मातुः कुक्षिं नावक्रामेत्" इति ।[३] वशिभावानुवर्तने यथोक्तम्—"चित्तेनायं लोको नीयते" इति विस्तरः ।[४]

स्त्रीपुरुषेन्द्रिययोरपि सत्त्वोत्पत्तिविकल्पनयोराधिपत्यम् । सत्त्वोत्पत्तौ तावत्, प्रायस्तदधीनत्वात्तदुत्पत्तेः । सत्त्वविकल्पेऽपि तद्व(8)शात् । प्राथमकल्पिकानां च सत्त्वानां चेष्टा स्त्रीपुरुषस्वराचारादिविकल्पभेदात् ।

[77] स्वगोचरोपलब्ध्यादावीषि(शि)त्वमपरे विदुः ।

पौराणाः पुनराचार्याः कथयन्ति—[५]"चक्षुरादीनां पञ्चानां प्रत्येकं चतुर्ष्वर्थेष्वाधिपत्यम् । चक्षुःश्रोत्रयोस्तावदात्मभावशोभायामन्धबधिरयोरकान्तरूपत्वात् । (9)आत्मभावपरिकर्षणे, दृष्ट्वा श्रुत्वा च विषयविवर्जणा(ना)त् । चक्षुःश्रोत्रविज्ञानयोः ससंप्रयोगयोरुत्पत्तौ । रूपदर्शण(न)शब्दश्रवणयोश्चासाधारणकारणत्वे ।[६] घ्राणजिह्वाकायानां त्वात्मभावशोभायां

---

[१] Cf. चित्तसंकिलेसा भिक्खवे सत्ता संकिलिस्सन्ति, चित्तवोदाना विसुज्झन्ति । *S*. III. p. 51.

[२] Cf. एवं पठ्यते **प्रज्ञप्तौ** "गन्धर्वस्य···प्रतिघसहगतं वा ।" *Akb*. III. 15. ab.
This is not found in the Pāli *Piṭakas*. But the idea of a *gandharva* is known to the Pāli tradition : यतो च खो भिक्खवे मातापितरो च सन्निपतिता होन्ति, माता च उतुनी होति, **गन्धब्बो** च पच्चुपट्ठितो होति; एवं तिण्णं सन्निपाता गब्भस्स अवक्कन्ति होति । *M. sutta* 38.

[३] Cf. विञ्ञाणं च हि **आनन्द** मातुकुच्छिंस्मि न ओक्कमिस्सथ, अपि नु खो नामरूपं मातुकुच्छिंस्मि समुच्छिस्सथाति । *Dīgha*. XV. 21.

[४] Cf. चित्तेन खो भिक्खु लोको निय्यति······। *Aṅg*. p. II. 177.
also, cf. चित्तेन निय्यति लोको चित्तेन परिकस्सति ।
चित्तस्स एकधम्मस्स सब्बेव वसमंन्वगू ॥ *S*. III. p. 151.
See *Sikshā*. p. 121.

[५] This whole passage (from चक्षुरादीनां पञ्चानां to कबडीकाराहारपरिभोगात्) is identical with *Akb*. II. 1 ab. But the latter does not say this to be a view of Paurāṇāchāryas.

[६] रूपदर्शन-शब्दश्रवणयोश्चेति । चक्षुः पश्यति श्रोत्रं शृणोतीत्यादि **वैभाषिकाणां सिद्धान्तः** । तेनालम्बनविशेषलक्षणयोर्दर्शनश्रवणयोरसाधारणकारणत्वे चक्षुःश्रोत्रयोराधिपत्यम् । *Sakv*. p. 93.

पूर्ववत् । आत्मभावपरिकर्षणे, तैः कवडीकाराहारपरिभोगात् ।[१] अन्य- [II. B. 2. Fol. 39 a] (1)त् प्राग्वत् ।

चतुर्णां पुणः(नः) स्त्रीपुरुषजीवितमनइन्द्रियाणां द्वयोरर्थयोः। स्त्रीपुरुषेन्द्रिययोस्तावत्- सत्त्वभेदसत्त्वविकल्पयोः । सत्त्वभेदः स्त्रीपुरुष इति । विकल्पभेदोऽपि संस्थानवचनगमनादि प्राग्वत् । संक्लेशव्यवदानयोर्वा ।[२] तद्वियुतविकला(ल्पा)नां संवरासंवरादीनि न भवन्ति ।[३] तद्वतां तु संवरफलप्राप्तिः ।

(2)जीवितेन्द्रियमनइन्द्रिययोरप्यर्थद्वये पूर्ववत् ॥

स्वार्थविज्ञान एवान्य आहुः पण्डितमानिनः ॥

कोशकारादयः पुनराहुः—"स्वार्थोपलब्धावेव चक्षुरादीनां पञ्चानामाधिपत्य[म्] ।"[४] तदेतद्वैभाषिकीयमेव किञ्चिद्गृहीतम् । नात्र किञ्चित् कोशकारकस्य स्वकर्ष[स्वक दर्श]ण(न)म् । वैभाषैरेव स्वार्थोपलब्धिरुक्तेति ॥

दा(3)र्ष्टान्तिकस्य[५] हि सर्वमप्रत्यक्षम् । पञ्चानां विज्ञानकायानामतीत-

---

[१] Cf. संक्लेशव्यवदानयोरित्यपरे । तथा हि तद्विप्रयुक्तविकल्पानां षण्ढपण्डकोभयव्यञ्जनानमसंवरानन्तर्यकुशलमूलसमुच्छेदा न भवन्ति संवरफलप्राप्तिवैराग्याणि चेति । *Akb.* II. 1 a.

[२] Cf. यथा षण्डपण्डकानाम् । तेषामुपासकसंवरो न प्रतिषिध्यते । केवलं तेषामुपासकत्वं प्रतिषिध्यते । भिक्षुभिक्षुणीनामुभयप्रव्रजितानां संघस्य पक्षस्य संसेवोपासनाऽयोग्यत्वात् । *Asm.* p. 57.

[3] **स्वार्थोपलब्ध्याधिपत्यात् सर्वस्य च षडिन्द्रियम् ।**

चक्षुरादीनां पञ्चानां स्वस्य स्वस्यार्थस्योपलब्धावाधिपत्यम् । मनसः पुनः सर्वार्थोपलब्धावाधिपत्यम् । अत एतानि षट् प्रत्येकमिन्द्रियम् । ननु चार्थानामप्यत्राधिपत्यम् । नाधिपत्यम् । अधिकं हि प्रभुत्वमाधिपत्यम् । चक्षुषश्चक्षूरूपोपलब्धावधिकमैश्वर्यम् । सर्वरूपोपलब्धौ सामान्यकारणत्वात्तत् पटुमन्दताद्यनुविधानाच्चोपलब्धेः । न रूपस्य । तद्विपर्ययात् । एवं यावत् मनसो धर्मेषु योज्यम् । *Akb.* II. 2 ab.

LVP. gives the following note :—Les *Kārikās* II. 2-4, ou Vasubandhu expose la doctorine des Sautrāntika, sont omises dans la *Samayapradīpikā*. *LVPAk*. II. p. 103, n. 2.

[४] **दार्ष्टान्तिकाः सौत्रान्तिकविशेष इत्यः ।** *Sakv.* p. 400. See Jean Przyluski :—"*Dārshṭāntika, Sautrāntika and Sarvāstivādin*" in the *I. H.Q.* 1940. Vol. XVI, no. 2

विषयत्वाद्यदा खलु चक्षूरूपे विद्येते तदा विज्ञानमसत्। यदा विज्ञानं सत्, चक्षूरूपे तदासती, विज्ञानक्षणस्थित्यभावे स्वार्थोपलब्ध्यनुपपत्तेश्च ॥[१]

[78] क्लेशोत्पत्तौ सुखादीनां श्रद्धादीनां गुणाप्तिषु ।[२]

सुखादीनामपि पञ्चानामिन्द्रिया(4)णां रागादिक्लेशोत्पत्तावाधिपत्यम् ।[३] यथोक्तम्—"वेदनाप्रत्यया तृष्णा" इति। "सुखायां वेदनायां रागोऽनुशेते" इति विस्तरः[४]। श्रद्धादीनां पुण(न)रष्टानां सर्वगुणोत्पत्तौ प्रभुत्वमिति।

वैभाषाः पुण(न)राहुः "संक्लेशवेदनाभिः"[५]। तथा ह्युक्तम्—"सुखायां वेदनायां रागोऽनुशेते" इति विस्तरः।[६]

व्यवदाने श्रद्धादीनां पञ्चानां (5)तैः क्लेशान् विष्कम्भ्य मार्गोत्पादनात्। यथोक्तम्—"श्रद्धेषीकासंपन्नो बलधैर्यस्मृतिदौवारिकसंपन्नः समाहितचित्तो विमुच्यते प्रज्ञाशस्त्रेणार्यश्रावकः सर्वाणि संयोजनानि संछिनत्ति" इत्यादि।

---

[१] Cf. अपरे पुनराहुः । नैव चक्षुः श्रोत्राभ्यामात्मभावपरिकर्षणं विज्ञाय विषमपरिहारात् । विज्ञाने तु तयोराधिपत्यम् । नापि विज्ञानादन्यद्रूपदर्शनं शब्दश्रवणं वाऽस्ति । यतस्तयोरसाधारणकारणत्वे पृथगाधिपत्यं युज्येत । तस्मान्नैवमेषामिन्द्रियत्वम् । कथं तर्हि ?

स्वार्थोपलब्ध्याधिपत्यात् सर्वस्य च षडिन्द्रियम् । *Akb*. II. 2 ab.

'अपरे पुनराहुः' इति **सौत्रान्तिकाः** ।···विज्ञानेन विषमपरिहारः क्रियते न चक्षुः श्रोत्रेणेत्यभिप्रायः ।···न रूपदर्शनं ग्रहणव्यतिरिक्तं विचार्यमाणं लभ्यते । ग्रहणं च विज्ञानमेवेति नान्यद्भवति । *Sakv*. p. 96.

Also cf. **अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते ।**
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥ *Sarvadarśanasangraha*, II. 42.

[२] Cf. **निकायस्थितिसंक्लेशव्यदानाधिपत्यतः ।**
जीवितं वेदनाः पञ्च श्रद्धाद्याश्चेन्द्रियं मताः ॥ *Ak*. II. 3.

[३] Cf. पञ्च वेदनेन्द्रियाणि क्लेशोत्पादे बलवन्ति पटूनि च । *Aam*. p. 75.

[४] The *Akb*. gives one more view : व्यवदानेऽपि सुखादीनामाधीत्य**परे**। यस्मात् "सुखितस्य चित्तं समाधीयते । दुःखोपनिपच्छ्रद्धाषण्णैष्क्रम्याश्रिताः सौमनस्यादयः" इति **वैभाषिकाः** । *Akb*. II. 1 ab.—'व्यवदानेऽपि···अपरे' इति ।···**आभिधार्मिकाः** केचिदेवमाहुः । *Sakv*. p. 95.

[५] 'संक्लेशे वेदनानाम्' इति । अत्र **वैभाषिकैः** सार्धमैकमत्यम् । *Sakv*. p. 97.

[६] Cf. यो सुखाय वेदनाय रागोऽनुसयो सो अनुसेति । *S*. IV. p. 208; तत्थ या रत्तस्स वेदना अयं सुखा वेदना । *Netti*. p. 65. Also, cf. सुखानुशायी रागः । दुःखानुशायी द्वेषः । *Yogasūtra*, II. 7—8.

अनाज्ञातमाज्ञास्यामीन्द्रियादीनां तु त्रयाना(णा)मुत्तरोत्तराङ्गभावे णि(नि)र्वाणे चाधिपत्यमिति[१] ॥

कः पुण(न)रेषामिन्द्रि(6)याणामनुक्रमः ?[२] ब्रूमः—

फलसंक्लेशसंभारविशुद्धित्वादनुक्रमः ॥

प्राक्कर्म फलं तावदष्टौ विपाकजत्वात्तस्मात्तानि पूर्वमुक्तानि । तस्मिन् विपाके सति संक्लेशसुखादिभिः । पञ्चभिर्मार्गसंभारश्रद्धादिभिः । विशुद्धिरणा(ना)स्रवैस्त्रिभिः ॥

कस्मात् पुनर्द्वाविंशतिरेव यथा परिकीर्तितान्युक्तानि न (7)भूयांसि नाल्पीयांसीति ? तदपदिश्यते—

[79] सत्त्वाख्या सत्त्ववैचित्र्य(त्र्यं) धृति(तिः) क्लेशोद्भवश्च यैः ।
मार्गोपायः फलप्राप्तिस्तेषामिन्द्रियता मता ॥[२]

सत्त्वाख्या खलु प्रवर्तते चक्षुरादिषु मनःपर्यन्तेषु षट्सु । एतद्धि मौलसत्त्वद्रव्यम् ।[3] सत्त्ववैचित्र्यं द्वाभ्यां स्त्रीपुरुषेन्द्रियाभ्याम् । धृतिर्जीवितेन्द्रियेन(ण) । क्लेशोद्भवः (8)पञ्चभिर्वेदनाभिः । मार्गोपायः श्रद्धादिभिः । फलप्राप्तिस्त्रिभिरन्त्यैः । इत्येतस्मादेषामिन्द्रियता मता ॥[४]

---

[१] Cf. आज्ञास्याम्याख्यमाज्ञाख्यमाज्ञातावीन्द्रियं तथा ।
उत्तरोत्तरसम्प्राप्तिनिर्वाणाद्याधिपत्यतः ॥

आदिशब्दोऽन्यपर्यायद्योतनार्थः । कतमोऽन्यः पर्यायः । दर्शनहेयक्लेशप्रहाणं प्रत्याज्ञास्यामीन्द्रियस्याधिपत्यम् । भावनाहेयक्लेशप्रहाणं प्रत्याज्ञेन्द्रियस्य । दृष्टधर्मसुखविहारं प्रत्याज्ञातावीन्द्रियस्य । *Akb*. II. 4.

See *Vm*. XVI. 10, *Dhs*. 296, 505, 553, *Aam*. p. 75, and *Asm*. p. 75.

[२] Cf. *Vm*. XVI. 8.

Cf. चित्ताश्रयस्तद्विकल्पः स्थितिः संक्लेश एव च ।
संभारो व्यवदानं च यावता तावदिन्द्रियम् ॥ *Ak*. II. 5.

[३] एतच्च 'षडायतनं मौलं सत्त्वद्रव्यम्' इति । तदितरेषां तदाश्रितत्वात् । तथा हि षडिन्द्रियाधिपत्यसम्भूतमिन्द्रियाधिष्ठानम् । षड् वा विषया विज्ञानकायाश्च । तदेतपि सत्त्वद्रव्यमिष्यते न तु मौलम् । न ह्यधिष्ठानाद्याधिपत्यसंभूतं षड् आयतनमिति । *Sakv*. p. 98. Also cf. तत्थ अज्झत्तधम्मे परिञ्ञाय अरियभूमिपटिलाभो होती ति अत्तभावपरियापन्नानि चक्खुन्द्रियादीनि पठमं देसितानि । *Vm*. XVI. 8.

[४] See *Vbh A*. p. 126.

[80] स्पर्शाश्रयोद्भवाधारसंभोगत्वाच्चतुर्दश ।
स्वर्गापवर्गहेतुत्वात् तदन्यद्धेन्द्रियाष्टकम् ॥[१]

तत्र स्पर्शाश्रयश्चक्षुरादीनि षडिन्द्रियानि(णि) । प्रादुर्भावः स्त्रीपुरुषेन्द्रियाभ्याम् । आधारो जीविते(9)न्द्रियेण । संभोगो वेदनाभिः पञ्चभिः । अतस्तावच्चतुर्दशोक्ताणि(नि) । स्वर्गोपपत्तिनिमित्तानि श्रद्धादीनि पञ्च । अपवर्गकारणानि [त्रीण्यनाज्ञातमाज्ञास्यामीन्द्रियादीनि । अत एतावन्त्येव ॥]

यद्याधिपत्यार्थ इन्द्रियार्थः कस्माच्छन्दस्पर्शमनस्कारसंज्ञाचेतनामहाभौमानां [II. A, 2. Fol. 39 b.] (1)सत्याधिपत्ये नेन्द्रियत्वम् ?[२] उक्तं हि भगवता—"छन्दमूलकाः सर्वधर्माः[३] स्पर्शजातीयाः मनस्कारप्रभवाः ।" संज्ञाचेतनयोश्च संक्लेशव्यवदानयोराधिपत्यमुक्तमेव कुशल[चेतनायाश्च । एवं] क्लेशानामपि संसारहेतुप्रवर्तणे(ने) आ[धिपत्यम्] । निर्वाणस्य च धर्माग्र्यत्वे कस्मान्नेन्द्रियत्वम् ? तदिदमुच्यते—

[81] छन्दं वी(2)र्याङ्गभूतत्वात् स्पर्शो वित्त्यनुबृंहणात् ।
संज्ञा प्रज्ञाभिभूतत्वान्नेन्द्रियं मुनिरभ्यधात् ॥

छन्दो हि कर्त्तुकामता सा च वीर्याङ्गभूता । वीर्यं तु साक्षात् क्रिययाऽभिसंबध्यते । तदेवेन्द्रियमुक्तम् । स्पर्शोऽपि "स्पर्शप्रत्यया वेदना" इति तदुत्पत्तौ परिक्षीणशक्तिः । संज्ञापि प्रायोऽपि(प्रायो) लोकव्यवहारपतिता । सा प्रज्ञया परमार्थैकर(3)सयाऽभिभूतेति नेन्द्रियमुक्ता ॥

[82] श्रद्धादीनां विदां चैव दोषः शुद्धौ मलोदये ।
प्रधानत्वान्मनस्कारो नेन्द्रियं समुदाहृतम् ॥

---

[१] Cf. प्रवृत्तेराश्रयोत्पत्तिस्थितिप्रत्युपभोगतः ।
चतुर्दश तथाऽन्यानि निवृत्तेरिन्द्रियाणि वा ॥

मतविकल्पार्थो वा शब्दः । अपरे पुनराहुः । प्रवृत्तेराश्रयः षडिन्द्रियाणि···तेनैव प्रकारेण निवृत्तेरन्यानि । श्रद्धादीनि हि निवृत्तेराश्रयाः । आज्ञास्यामीन्द्रियं प्रभवः, स्थितिराज्ञेन्द्रियम्, उपभोग आज्ञातावीन्द्रियेण । *Akb.* II. 6.

[२] This topic (*Ad.* *kārikās* 81—85) is not discussed in *Akb*. But, it deals in brief with other *dharmas* : आधिपत्त्यादिन्द्रियत्वेऽविद्यादीनामुपसंख्यानं कर्त्तव्यम् । अविद्यादीनामपि हि संस्कारादिष्वाधिपत्यमत एतेषामपीन्द्रियत्वमुपसंख्यातव्यम् । वागादीनां च वाक्पाणिपादपायूपस्थानामपि चेन्द्रियत्वमुपसंख्यातव्यम् । ···न खलूपसंख्यातव्यम् । *Akb.* II. 4.

[३] Cf. इमे खो भन्ते पञ्चुपादानक्खन्धा किम्मूलका ति ? इमे खो भिक्खु पञ्चुपादानक्खन्धा छन्दमूलका ति । *S.* III. p. 100.

योनिशो मनसिकारः खलु श्रद्धादीनां सङ्गीभवति । अयोनिशो मनसिकारोऽपि वेदनादीनां रागादिसंप्रयुक्तानामिति सोऽपि नेन्द्रियम् ॥

[83] संभावनानुकूलत्वादधिमोक्षोऽपि नेन्द्रियम् ।

अधिमोक्षोऽपि (4)श्रद्धोपकारीति नेन्द्रियम् ॥

कालान्तरफलोत्पादसंदेहाभ्यां न चेतना ॥

चेतनायाः खल्वपि कालान्तरेण फलमिति तस्या नासतिफले शक्तिराविर्भवति । लोकोऽपि तस्याः फलसत्त्वाविनाशं दृष्ट्वा विप्रतिपन्नः । कश्चिद् ब्रूते निर्हेतुकं फलमिति कश्चिदीश्वरकृतं कश्चिददृष्टादिहेतुकमिति ।[१] चेतनायाः फलमनभिव्यक्त(5)मिति । ईशित्वं भगवता जानानेनाप्यतस्तस्यास्त्रैलोक्यकारणत्वेऽपि सति चेतना नेन्द्रियेषु व्यवस्थापिता ॥

कुशलमहाभौमेभ्योऽपि[२]

[84] नाप्रमादोऽप्यसौ वीर्यात्, न ह्रीः प्रागल्भनिग्रहात् ।
नोपेक्षा नापि चालोभो वीर्यश्रद्धाभिभूतितः ॥

अप्रमादस्तावद्वीर्यस्य भाण्डागारिकस्थानीयः । वीर्यं कुशलान् धर्माननुपार्जय(6)ति सतान् रक्षति । ह्रीरपि वैशारद्यसपत्नभूता नववधूरिवाप्रगल्भा । तस्याः कुत आधिपत्यम् ? उपेक्षापि श्रद्धाभिभूता । अलोभश्च वीर्यविरोधीति नेन्द्रियम् ॥

[85] न प्रस्रब्धिर्विदौत्कट्याद्विनिन्द्यत्वाच्च नास्रवाः ।

प्रस्रब्धिः खलु वेदनायाः वृत्तिप्राधान्येनाभिभूता । सापि नेन्द्रियम् । अकुशलानामपि धर्माणां विनिन्द्य(7)त्वात्तु नास्रवाश्चण्डालराजवत् ॥

विप्रयुक्तानामपि[3]

जात्यादयो न पारार्थ्यात्

परतन्त्रा हि जात्यादयो धर्माः परिचारकवत् तेषां कुतः प्रभुत्वम् ?

---

[१] Cf. सन्ति भिक्खवे एके समणब्राह्मणा एवंवादिनो·· यं किञ्चायं पुरिसपुग्गलो पटिसंवेदेति···सब्बं तं पुब्बेकतहेतू ति । सन्ति···एके···सब्बं तं इस्सरनिम्माणहेतू ति । ···एके···सब्बं तं अहेतु-अप्पच्चया ति । *Aṅg.* I. p. 173.

[२] V. infra, *Adv. kārikā* 112.

[3] V. infra, *Adv. kārikā* 127.

निष्क्रियत्वान्न निर्वृतिः ॥

निर्वाणमपि निष्क्रियमसत्फलं सत्क्रियाश्च धर्माः फलवन्त आधिपत्ययुक्ता इति भगवता(8) निर्वाणं नेन्द्रियं व्यवस्थापितमिति। नात्र किञ्चिदुपसंख्येयं णा(ना)प्यपनेयमिति ॥

लक्षणमिदानीमिन्द्रियाणां वक्तव्यम्। तत्र चक्षुरादीनामुक्तम्। जीवितश्रद्धादीनां संप्रयुक्तविप्रयुक्तेषूच्यमानेषु वक्ष्यते। दुःखादीनां त्वधुनोच्यते।

[86] कायस्य बाधनं दुःखं दौर्मनस्यं तु चेतसः।

बाधन[मिति वर्तते]।

सुखं च सुमनस्ता च सातं शारीरमानसम् ॥[1]

सातमिति प्रह्लादनापर्यायः।

[87 ab.] वैशिष्ट्यान्मानसं सातं सुखं क्वचिदुदाहृतम्।

तृतीये ध्याने मानसं सातं सुखमित्युदाहृतं भगवता पञ्चेन्द्रियसुखातिशयत्वात्।[2] सौमनस्यं तु प्रीतिस्वभावं[3] सा च तृतीयध्याने नास्तीति सुखं च तत्रोक्तमिति। [Fol. 40 lost.] [4]……

……[II. B, 3. Fol. 41 a] (1)भौमम् तदपदिश्यते—

[88] षट्सु भूमिषु विज्ञेयं नीरजस्काद्यमिन्द्रियम्।

---

[1] Cf. दुःखेन्द्रियमसाता या कायिकी वेदना सुखम्।
साता ध्याने तृतीये तु चैतसी सा सुखेन्द्रियम्॥ *Ak.* II, 7.

[2] Cf. तृतीये तु ध्याने सैव साता वेदना चैतसी सुखेन्द्रियम्। नहि तत्र कायिकी वेदनाऽस्ति। पञ्चविज्ञानकायाभावात् *Akb.* II. 7.

[3] Cf. अन्यत्र सा सौमनस्यं
…तृतीये तु ध्याने प्रीतिविरागत्वात् सुखेन्द्रियमेव सा न सौमनस्येन्द्रियम्। प्रीतिर्हि सौमनस्यम्। *Akb.* II. 8 a.

[4] In this lost folio, the *Adv.* might have discussed the following topics, which are dealt with in *Akb.* II. 8—11.

(१) कतीन्द्रियाणि विपाकः कति न विपाकः ?
(२) कतीन्द्रियाणि सविपाकानि, कत्यविपाकानि ?
and (३) कति कुशलानि, कत्यकुशलानि, कत्यव्याकृतानि ?

अनाज्ञातमाज्ञास्यामीन्द्रियं षट्सु भूमिषु, चतुर्षु ध्यानेष्वनागमे(म्ये) ध्यानान्तरिकायां च ।

तदन्ये निर्मले त्वद्दे द्रष्टव्ये नवभूमिके ॥

आज्ञेन्द्रियमाज्ञातवत(अज्ञाताविं)इन्द्रियं च नवसु भूमिषु—आस्वेव षट्सु त्रिषु चाद्यास्वारूप्यभूमिषु ॥

अथ का(2)नि द्वाविंशतिरिन्द्रियानि(णि) कानि किं प्रहातव्यानि? तदुदाह्रियते[1]—

[89] दौर्मण(न)स्यं द्विहातव्यं

दर्शनभावनाप्रहातव्यम् ।

मनोवित्तित्रयं त्रिधा ।[2]

मनइन्द्रियं सुखसौमनस्योपेक्षाश्च दर्शण(न)भावनाहेयाश्चाहेयाश्च ।

नवाभ्यासप्रहेयानि(णि)

चक्षुरादीनि जीवितावसानान्यष्टौ दुःखेन्द्रियं च ।

द्विधा(3) [पञ्च][3]

श्रद्धादीनि भावनाहेयान्यहेयानि च । सास्रवानास्रवात् ।

न तु त्रयम् ॥

त्रीण्यनास्रवाण्यप्रहेयान्येव निर्दोषत्वात् ॥

यदि तर्हि श्रद्धादीनि सास्रवानास्रवत्वात्प्रहेयानि चाप्रहेयानि च द्विधा भवन्ति, त्रयमेवानास्रवम् ।[4] इदं तर्हि सूत्रं कथं नीयते? यदुक्तं भगवता—

---

[1] See *Aam.* p. 76.

[2] Cf. मनोवित्तित्रयं त्रेधा द्विहेया दुर्मनस्कता ।
नव भावनया पञ्च त्वहेयान्यपि न त्रयम् ॥ *Akb.* II. 13.

[3] Cf. द्विधा नव ।

मनःसुखसौमनस्योपेक्षाः श्रद्धादीनि च पञ्च एतानि नवेन्द्रियाणि सास्रवानास्रवाण्यपि । अनास्रवाण्येव श्रद्धादीनीत्येके । उक्तं हि भगवता "यस्येमानि···वदामि" इति । *Akb.* II. 9d. See *Aam.* p. 76.

[4] For this controversy, see *Kv.* XIX. 8.

"तस्यैतानि (यस्येमानि) पञ्चेन्द्रियाणि(णि) सर्वेण स(4)र्वं न सन्ति तमहं बाह्यं पृथग्जनपक्षावस्थितं वदामि" इति ?[१]

[२]अनास्रवाधिकारादज्ञापकमेतत्। अनास्रवाणि खल्वधिकृत्यैतदुक्तम्। यस्मादार्यपुद्गलव्यवस्थानं कृत्वा "यस्येमानि" इति भगवानवोचत्। पृथग्जनो वा द्विविधः ।[3] आभ्यन्तरश्चासमुच्छिन्नकुशलमूलः, बाह्यश्च समुच्छिन्नकुशलमूलः। तमधिकृ(5)त्योक्तम्—"बाह्यं पृथग्जनपक्षावस्थितं वदामि" इ[ति]। "सर्वेण सर्वाणि(णि)" इति वचनाद्वा 'यस्य लौकिकान्यपि न सन्ति' इत्याकूतम्। बाह्यमित्यशाक्यपुत्रीयं पृथग्जनपक्षावस्थितमित्यार्यधर्मविपक्षावस्थितम्। अन्यथा ह्येवमवक्ष्यत्—'यस्येमानि पञ्चेन्द्रिया(णि) न सन्ति तमहं पृथग्जनपक्षावस्थितं वदामि' इति। उक्तं हि—"स(6)न्त्रसन्ति सत्त्वा लोके जाता लोके वृद्धास्तीक्ष्णेन्द्रिया अपि मध्येन्द्रिया अपि मृद्विन्द्रिया अपि" इत्यप्रवर्तित एव धर्मचक्रे[४]। पुनश्चोक्तम्—"यावच्चाहमेषां पञ्चानामिन्द्रियानां(णां) समुदयं चास्तङ्गमं चास्वादं चादीनवं च निःसरणं च यथाभूतं

---

[१] See *LVPAk.* II. p. 119, n. 1.

Cf. "पञ्चिमानि भिक्खवे इन्द्रियानि। कतमानि पञ्च ? श्रद्धेन्द्रियं···पञ्ञिन्द्रियं इमानि खो भिक्खवे पञ्चिन्द्रियानि। इमेसं खो भिक्खवे पञ्चन्नं इन्द्रियानं समत्ता परिपूरत्ता **अरहा** होति, ततो मुदुतरेहि अरहत्तसच्छिकिरियाय पटिपन्नो होति; ततो मुदुतरेहि **अनागामी** होति, ततो मुदुतरेहि अनागामिफलसच्छिकिरियाय पटिपन्नो होति; ततो मुदुतरेहि **सकदागामी** होति, ततो मुदुतरेहि सकदागामीफलसच्छिकिरियाय पटिपन्नो होति; ततो मुदुतरेहि **सोतापन्नो** होति, ततो मुदुतरेहि सोतापत्तिफलसच्छिकिरियाय पटिपन्नो होति। **यस्स खो भिक्खवे इमानि पञ्चिन्द्रियानि सब्बेन सब्बं सब्बथा सब्बं नत्थि, तमहं 'बाहिरो पुथुज्जनपक्खे ठितो' ति वदामीति।** *S.* v. p. 194.
Also cf. *Sakv.* p. 103.

[२] This whole passage, from अनास्रवाधिकारादाज्ञापकमेतत् to न चायमनास्रवाणां धर्माणां परीक्षाप्रकारः, is almost identical with *Akb.* II. 9d.

[3] Cf. **दुवे पुथुज्जना वुत्ता बुद्धेनादिच्चबन्धुना।**
अन्धो पुथुज्जनो एको कल्याणेको पुथुज्जनो॥ *Dīgha A.* I. p. 59.

[४] Cf. अद्दस खो भगवा बुद्धचक्खुना लोकं वोलोकेन्तो सत्ते अप्परजक्खे महारजक्खे तिक्खिन्द्रिये मुदिन्द्रिये स्वाकारे सुविञ्ञापये अप्पेकच्चे परलोकवज्जभयदस्साविनो विहरन्ते। *Vinaya.* I. p. 6.

It is interesting to note that the Sthavirvādin quotes precisely the same *āgama*, while dealing with a controversy : **नत्थि लोकियानि पञ्च इन्द्रियानीति ?** *Kv.* XIX. 8.—**इदानि इन्द्रियकथा नाम होति।** तत्थ 'लोकिया सद्धा सद्धा एव नाम न सद्धिन्द्रियं। तथा लोकियं विरियं सति समाधि पञ्ञा पञ्ञा एव नाम, न पञ्ञिन्द्रियं' ति येसं लद्धि, सेय्यथापि **हेतुवादानञ्चेव महिंसासकानञ्च।** *KvA.* XIX. 8.

नाप्यज्ञासिषं न तावदहमस्मात्सदेवकाल्लोकात्” इति विस्तरः[१] । न(7) चायमनास्रवानां(णां) धर्माणां परीक्षाप्रकारः ।

वयं त्वत्रेममागमं ब्रूमः[२]—“त्रीणीमानि श्राद्धस्य श्रा(श्र)द्धालिङ्गाणि(नि)” इति विस्तरः । कथं कृत्वा ज्ञापकम् ? श्रद्धायां ह्यसत्यामार्याणां दर्शण(न)कामता न भवेत् । सद्धर्मश्रोतुकामता च, विगतमात्सर्येण चेतसा अगारमध्यवस्तुकामता [च] । यस्य च पृथग्जन(8)स्यैतानीन्द्रियाणि न सन्ति स सर्व[था बाह्यपृथग्जनो] भवति कुशलधर्मोपणि(नि)षद्धेतुवैकल्यात् । तस्मात्सास्रवाणा(ना)स्रवाणीति सिद्धम् ॥[३]

उक्तः प्रकारभेदः । लाभ इदानीं वक्तव्यः । कतीन्द्रियानि(णि) कस्मिन् धातौ विपाकः प्रथमतो लभ्यन्ते ? तदिदमारभ्यते ।

[90] पूर्वं क्रमोद्भवैः कामे विपाको [(9)लभ्य]ते द्वयम् ।[४]

कामधातौ क्र[मोद्भवैः—अण्डजजरायुजसंस्वेदजैः पूर्वं] इन्द्रियद्वयं लभ्यते । कायेन्द्रियं जीवितेन्द्रियं च । एतद्धि द्वयं तस्मिन् शुक्रशोणितबिन्दौ प्रथमं विपाकजं भवति । क्लिष्टत्वात्तु न मनउपेक्षेन्द्रिये विपाकः ।[५]

अन्यैः षट् सप्त वाऽष्टौ वा

---

[१] Cf. पञ्चिमानि भिक्खवे, इन्द्रियानि, कतमानि पञ्च ? सद्धिन्द्रियं··पञ्ञिन्द्रियं । यतो खो भिक्खवे, भिक्खु इमेसं **पञ्चन्नं इन्द्रियानं समुदयञ्च अत्थंगमञ्च अस्सादञ्च आदीनवञ्च निस्सरणञ्च यथाभूतं विदित्वा अनुपादा विमुत्तो होति**, अयं वुच्चति भिक्खवे, भिक्खु ‘अरहा खीणासवो··सम्मदञ्ञाविमुत्तो’ ति । *S*. v. p. 205

[२] The Kośakāra closes this controversy with the remark—न चायमनास्रवाणां धर्माणां परीक्षाप्रकारः । *Akb*. II. 9d.

[3] Immediately after dealing with this topic, the *Akb*. II. 10. deals with ‘कतीन्द्रियाणि विपाकः कति न विपाकः ? This is lost in our text. V.supra, p. 52. n.4.

[४] Cf. **कामेष्वादौ विपाको द्वे लभ्येते नोपपादुकैः ।** *Ak*. II. 14 ad.

[५] For a controversy on the Development of Sense-organs, see *Kv*. XIV. 2.—इदानि **सळायतनुप्पत्तिकथा** नाम होति । तत्थ उपपत्तेसियेन पटिसन्धिचित्तेन सहेव ओपपातिकानं सळायतनं उप्पज्जति । गब्भसेय्यकानं अज्झत्तिकायतनेसु मनायतनकायायतनानेव पटिसन्धिक्खणे उप्पज्जन्ति, सेसानि चत्तारि सत्तसत्ततिरत्तिह्मि । तानि च खो येन कम्मुना पटिसन्धि गहिता, तस्सेव अञ्ञस्स वा कतत्ता ति अयं **सकसमये** वादो । येसं पन एककम्मसम्भवत्ता संपन्नसाखाविटपानं रुक्खादीनं अङ्कुरो विय बीजमत्तं सळायतनं मातुकुच्छिस्मि पटिसन्धिक्खणे येव उप्पज्जतीति लद्धि, सेय्यथापि **पुब्बसेलियानं** । *KvA*. XIV. 2.

औपपादुकैः पुनः षट्। चक्षु[II. A. 3. Fol. 41b.]⁽¹⁾रादीनि पञ्च जीवितेन्द्रियं च। [यद्यव्यञ्जना भवन्ति यथा प्राथम]कल्पिकाः। सप्त पुण(न)र्यद्येकव्यञ्जना यथा देवादिषु। अष्टौ वा यद्युभयव्यञ्जना भवन्ति यथाऽपायेषु। एवं तावत् कामधातौ।

षड् रूपे

रूपधातौ पुनः षडिन्द्रियाणि वि[पाक]ः प्रथमतो लभ्यन्ते। चक्षुरादीनि पञ्च जीवितेन्द्रियं च।

अन्त्ये ⁽²⁾तु जीवितम् ॥[१]

[आरूप्ये जीवितेन्द्रियं] विपाको लभ्यते। उक्तो लाभः॥

त्यागो वक्तव्यः। सोऽयमाविष्क्रियते—

[91] म्रियमाणो(र्नि)रोध्यन्ते त्रीण्यन्ते

जीवितम्, मनः, उपेक्षा चेति।

अष्टौ तु मध्यमे[२]।

रूपधातौ म्रियमाणैरष्टौ निरुध्यन्ते। तानि च त्रीणि, चक्षुरादीनि च पञ्च।

दशाष्टौ नव चत्वारि[3] कामे पञ्च शुभानि वा[3] ॥

[४]उभयव्यञ्जनैर्दश निरोध्यन्ते। तानि चाष्टौ स्त्रीपुरुषेन्द्रिये च। एकव्यञ्जनैर्ण(र्न)व। अव्यञ्जनैरष्टौ। सकृन्मरणे खल्वेष न्यायः। क्रमेन(ण) तु म्रियमानै(णै)श्चत्वारि णि(नि)रोध्यन्ते कायजीवितमनउपेक्षेन्द्रियानि(णि)। न ह्येषां पृथङ्निरोधः। एष च विधिः क्लिष्टाव्याकृतचित्तस्य मरणे द्रष्टव्यः। ⁽⁴⁾कुशले तु चित्ते सर्वत्र श्रद्धादीनि पञ्चाधिकानि। एवमारूप्येष्वष्टौ, रूपेषु त्रयोदश। इत्येवं विस्तरेण गणयितव्यानि॥[४]

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः ॥

---

[१] Cf. तैः षड् वा सप्त वाऽष्टौ वा षड्रूपेष्वेकमुत्तरे। *Ak*. II. 14.

[२] Cf. निरोधयत्युपरमान्नारूप्ये जीवितं मनः।
उपेक्षा चैव रूपेऽष्टौ कामे दश नवाष्ट वा॥ *Ak*. II. 15.

[3] Cf. क्रममृत्यौ तु चत्वारि शुभे सर्वत्र पञ्च च। *Ak*. II. 16 ab. See *Aam*. p. 76.

[४] This passage is idential with *Akb*. II. 16. ab.

द्वितीयाध्याये

द्वितीयपादः ।

इन्द्रियप्रस्तावे[१] सर्वं इन्द्रियधर्मा विचार्यन्त इत्यतः पृच्छति । अथैषां कुशलानामिन्द्रि(5)यानां(णां) कतरेणेन्द्रियेन(ण) कतरच्छ्रामन्य(ण्य)फलं प्राप्यत इति ? तदिदं प्रस्तूयते--

[92] आद्यन्तलाभो नवभिः सप्ताष्टाभिश्च मध्ययोः ।[२]

या खल्वेषा चतुष्फलमयी माला तस्याः प्रथमं स्रोतआपत्तिफलमन्त्यमर्हत्त्वं मध्ये सकृदागाम्यनागामिफले । तत्राद्यान्तयोः फलयोर्ण(र्न)वभिरिन्द्रियैर्लाभः ।[3] स्रोत(6)आपत्तिफलस्य तावत्—श्रद्धादिभिः पञ्चभिराज्ञास्यामीन्द्रियाज्ञेन्द्रियाभ्यामेकमनयोरानन्तर्यमार्गाद्, द्वितीयं विमुक्तिमार्गाद्वेदितव्यम् ।[४] प्रथमेन क्लेशप्राप्तिच्छेदो द्वितीयेन विसंयोगप्राप्त्याकर्षणम् । मनउपेक्षेन्द्रियाभ्यां चेति । अर्हत्त्वस्य पुनः श्रद्धादिभिराज्ञास्यामीन्द्रियवर्ज्जैः, मनइन्द्रियेन(ण) सुखसौमन(7)स्योपेक्षेन्द्रियानां(णां) चान्यतमेन ।

[५]'सप्ताष्टाभिश्च मध्ययोः ।' सकृदागाम्यनागामिफलयोः पुनः सप्तभिरष्टाभिर्ण(र्न)वभिश्चेति 'च'शब्दात् । तत्र सकृदागामिफलं तावद्यद्यानुपूर्विको[६] लभते, स च लौकिकेन[७] मार्गेन(ण) तस्य सप्तभिर्लाभः । पञ्चभिः

---

[१] इन्द्रियप्रकरणे in *Akb*. II. 16 cd. See *LVPAK* II. p. 134. n. 1.

[२] Cf. नवाप्तिरन्त्यफलयोः सप्ताष्टनवभिर्द्वयोः । *Ak*. II. 16 cd.

[3] Cf. नवभिरिन्द्रियैः प्राप्तिरन्त्यफलयोः । के पुनरन्त्ये । स्रोतआपत्तिफलमर्हत्त्वं च । के मध्ये । सकृदागामिफलमनागामिफलं च । तत्र स्रोतआपत्तिफलस्य श्रद्धादिभिराज्ञातावीन्द्रियवर्ज्यैर्मनउपेक्षेन्द्रियाभ्यां चेति नवभिः । आज्ञास्यामीन्द्रियमानन्तर्यमार्गे वेदितव्यमाज्ञेन्द्रियं च विमुक्तिमार्गे । उभाभ्यां हि तस्य प्राप्तिर्विसंयोगप्राप्तेरावाहकसन्निश्रयत्वाद्यथाक्रमम् । *Akb*. II. 16 c.

[४] आनन्तर्यमार्गेणाज्ञास्यामीन्द्रियस्वभावेन विमुक्तिमार्गेण चाज्ञेन्द्रियस्वभावेन तस्य प्राप्तिः । *Sakv*. p. 113.

[५] The following *Adv*. upto तस्य नवभिराज्ञेन्द्रियं नवमं भवति, is almost identical with *Akb*. II. 16 d.

[६] तत्रानुपूर्विको यः स्रोतापत्तिफलं प्राप्य क्रमात् सकृदागामिफलं प्राप्नोति । *Sakv*. p. 114.

[७] लौकिको मार्गः शान्ताद्युदाराद्याकारः । *Ibid.*

श्रद्धादिभिः, मनउपेक्षेन्द्रियाभ्यां च। अथ लोकोत्तरेण मार्गेण (8)तस्याष्टाभिः, आज्ञेन्द्रियमष्टमं भवति। अथ [१][भूयो]वीतरागः प्राप्नोति, तस्य नवभिर्यैरेव स्रोतआपत्तिफलस्य। अनागामिफलं यद्यानुपूर्विकः प्राप्नोति, स च लौकिकेन मार्गेण, तस्य सप्तभिर्यथा सकृदागामिफलस्य।

अथ लोकोत्तरेण, तस्याष्टाभिस्तथैव। अथ वीतरागः[२] प्राप्नोति, तस्य नवभिर्यथा (9)स्रोतआपत्तिफलस्य। तस्य तु निश्रयविशेषात्[३] सुखसौमनस्योपेक्षेन्द्रियाणामन्यतमद्भवति। यदाप्ययमानुपूर्विको नवमे विमुक्तिमार्गे ध्यानं[४] प्रविशति लौकिकेन मार्गेण, तदाप्यष्टाभिरिन्द्रियैरणा(ना)गामिफलं लभते। तस्य नवमे विमुक्तिमार्गे सौमनस्यमष्टमं भवति, आनन्तर्यमार्गे तूपेक्षे- [II. B, 4. Fol. 42 a.](1)न्द्रियमेव। नित्यमुभाभ्यां[५] हि तस्य प्राप्तिः। अथ लोकोत्तरेण प्रविशति, तस्य नवभिराज्ञेन्द्रियं नवमं भवति ॥[६]

यत्तर्ह्यभिधर्मे पठ्यते—"अर्हत्फलस्यैकादशभिः" इति।[७] तत्कथमुच्यते 'नवभिस्तस्य प्राप्तिः' इति ?[८] नैव दोषः। यस्मात्—

---

[१] भूयोवीतरागः in *Akb.*—भूयोवीतराग इति। यो लौकिकेन मार्गेण पृथग्जनावस्थायां षट्प्रकारोपलिखितोऽभूत्, सो भूयोवीतराग इत्युच्यते।…**अयं हि स्रोतआपत्तिफलमप्राप्यैव षोडशे क्षणे सकृदागामी भवति।** *Sakv.* p. 115.

[२] **अथ वीतराग** इति। कामधातुमात्रवीतरागो लौकिकेन मार्गेण नवमे प्रकारे प्रहीणे प्रथमादपि वा ध्यानाद्यावदाकिञ्चन्यादपि वा वीतरागो योऽनागामिफलं प्राप्नोति।…स्रोतआपत्तिफलस्य हि दर्शनमार्गेण प्राप्तिः…, **अस्य च दर्शनमार्गेणैव प्राप्तिरिति तुल्यत्वम्।** *Sakv.* p. 115.

For a controversy on this point, see *Kv.* I. 5.—**जहति पुथुज्जनो कामरागव्यापादं ति ?**—इदानि **जहति कथा** नाम होति। तत्थ येसं झानलाभी पुथुज्जनो सह सच्चाभिसमया अनागामी नाम होति, तस्स पुथुज्जनकाले येव कामरागव्यापादा पहीना ति लद्धि, सेय्यथापि एतरहि **सम्मितीयानं।** तेसं तं लद्धिं भिन्दितुं जहति पुथुज्जनो ति पुच्छा **सकवादिस्स।** *KvA.* I. 5.

[३] **निश्रयविशेषादिति।** यदि तृतीयं ध्यानं निश्रित्य नियाममवक्रामति। सुखेन्द्रियं तत्र भवति। अथ प्रथमद्वितीये ध्याने निश्रित्य, सौमनस्येन्द्रियं तत्र भवति। अथानागम्यध्यानान्तरचतुर्थध्यानानामन्यतमं निश्रित्य उपेक्षेन्द्रियं भवतीति। *Sakv.* p. 115.

[४] तीक्ष्णेन्द्रियत्वाद् ध्यानं in *Akb.*

[५] आनन्तर्यविमुक्तिमार्गाभ्याम्। *Sakv.* p. 115.

[६] V. supra, p. 57. n. 5.

[७] *Jñāna-prasthāna*, 15, 1. See *Sakv.* p. 116.

[८] Cf. यत्तर्ह्यभिधर्म उक्तम् "**कतिभिरिन्द्रियैरर्हत्त्वं प्राप्नोतीत्याह एकादशभिः**" इति, तत्कथं नवभिरित्युच्यते ? नवभिरेव तत् प्राप्नोति। *Akb.* II. 16 cd.

एकादशभिराप्तिस्तु फलस्यान्त्य[स्य] हानितः ॥[१]

परिहाय परिहायाऽयं समयविमुक्तोऽर्हन्निश्रयविशे(2)षात्पुनर्लभते । कदाचित् तृतीयं ध्यानं निश्रित्य । कदाचिद् द्वितीयं प्रथमं वा । कदाचिच्चतुर्थमनागम्यं वा । इत्यतस्तिसृणां वेदनानां संभवादेकादशभिरुक्तम् ॥[२]

अथैषां त्रयानां(णां) कामरूपारूप्यधातूनां कतरधातुभूम्यालम्बनेन मार्गेण कतरस्य धातोः परिज्ञानं भवतीति ?[3] तदाविर्भाव्यते ।

[93 ab.[४]] स्वस्य धातोः परिज्ञानं स्व(3)विपक्षदृशा पथा ।

स्वविपक्षदृशा च मार्गणे(मार्गेणा)नास्रवेण परिज्ञानं भवति । तत्र स्वधातुदृशा तावद् दुःखसमुदयालम्बनेन, स्वविपक्षदृशा निरोधमार्गालम्बनेन त्रैधातुकपरिज्ञानं भवति । सास्रवेण त्वानन्तर्यमार्गेण संगृहीतेन सन्निकृष्टाऽधोभूमिविषयेणोर्ध्वसन्निकृष्टभूम्यालम्बनेन च विमुक्तिमा(4)र्गसंगृहीतेनाधोभूमिपरिज्ञानं भवति । आन[न्त]र्यमार्गाणामधोभूमिविषयत्वाद्विमुक्त्याख्यानामूर्ध्वभूम्यालम्बनत्वाच्च । अनास्रवानां(णां) तूभयेषामेकभूमिगोचरत्वादिति ॥

अथ कतिभि(भी)रिन्द्रियैः कामधातुपरिज्ञानं कतिभि(भी) रूपारूप्यधातुपरिज्ञानमिति ? तदिदं प्रतायते—

[94] कामधातुपरिज्ञानं प्रायः सप्तभिरि(5)ष्यते ।
समलैर्निर्मलैस्त्वथैरष्टाभिरभिधीयते ॥

कामधातोस्तावत्—सास्रवैः सप्तभिः परिज्ञानं भवति प्रहाणमित्यर्थः । पञ्चभिः श्रद्धादिभिः मनउपेक्षेन्द्रियाभ्यां च । प्रायो ग्रहणात्सौमनस्येन्द्रियेना(णा)पि कस्यचित्समापत्त्यभिप्रायस्य योगिनो मौलभूमिप्रवेशात् । अनास्रवैस्त्विन्द्रियैरष्टाभिः । एभिरेव सप्तभि(6)राज्ञेन्द्रियेण च । प्रायो वचनात्सौमनस्येन्द्रियेन(ण) च नवमेन ॥

[95] रूपधातुपरिज्ञानमिष्टं दशभिरिन्द्रियैः ।

---

[१] Cf. एकादशभिरर्हत्त्वमुक्तं त्वेकस्य संभवात् । *Ak.* II. 17 ab.

[२] Cf. अस्ति संभवो यदेकः पुद्गलः परिहाय परिहाय सुखसौमनस्योपेक्षाभिरर्हत्त्वं प्राप्नुयादत एकादशभिरित्युक्तम् । न तु खलु संभवोऽस्ति सुखादीनामेकस्मिन् काले । कथमनागामिनोऽप्येष प्रसंगो भवति ? न ह्यसौ परिहीणः कदाचित्सुखेन्द्रियेण प्राप्नोति न च वीतरागपूर्वी परिहीयते । तद्वैराग्यस्य द्विमार्गप्रापणात् । *Akb.* II. 17 ab.

[३] This topic is not discussed in *Akb.*

[४] The cd of the *kārikā* 93 is missing.

पञ्चभिः श्रद्धादिभिः, मन इन्द्रियेन(ण), तिसृभिर्वेदनाभिः, निश्चयविशेषादाज्ञेन्द्रियेन(ण) च ॥

अन्त्यधातुपरिज्ञानमेकादशभिरुच्यते ॥

यथोक्तैर्दशभिराज्ञातवदिन्द्रियेन(ण) च। उभाभ्यां तस्य परिज्ञानमेकं (7)वज्रोपमसमाधिसहचरम्, द्वितीयं क्षयज्ञानसहगतमिति ॥

इदमिदानीं वक्तव्यम्—कः कतिभिरिन्द्रियैः समन्वागत इति ?[१] तत्र तावदयं नियमः—

[96] सर्वसत्त्वास्त्रिधातुस्था उपेक्षायुर्मणो(नो)ऽन्विताः ।

एभिस्त्रिभिः सर्वसत्त्वाः समन्वागताः ।

स्वक्स्त्रीत्वव्यञ्जनैः कामे

कामावचराः सत्त्वाः कायपुरुषस्त्री(8)न्द्रियैरेभिः पूर्वोक्तैश्च ।

रूपिणश्चक्षुरादिभिः ॥

रूपिणः खलु सत्त्वाश्चक्षुरादिभिस्त्रिभिश्चोपेक्षायुर्मनोभिः ॥

[97] कामिनः खलु दुःखेन तद्रागी दुर्मण(न)स्तया ।

अवीतरागः कामधातौ दुःखदौर्मण(न)स्याभ्यां समन्वागतः ।

ऊर्ध्वजस्तु सुखेनार्यः शुभाह्वाधरजौ तथा ॥

ऊर्ध्वजो रूपारूप्यधातुज आर्यः सुखेन सम(9)न्वागतः। अनास्रवेण शुभकृ[त्स्नपरीत्तशुभाप्रमाणशुभाः] क्लिष्टाक्लिष्टेन ॥

[98] प्रतीत्या(प्रीत्या)भाह्वाधरोद्भूतौ

आभास्वरेषूपपन्नस्तदधरजश्च प्रीत्या समन्वागतः ।

शुभैः स शुभमूलकः ।

श्रद्धादिभिः पञ्चभिः कुशलैरणु(नु)च्छिन्नकुशलमूलः सर्वत्र समन्वागतः।

शैक्षाभ्यां मोक्षमार्गस्थौ

---

[१] This topic is not discussed in *Akb.*

द्वा [II A, 4. Fol. 42 b.]भ्यां(1) शैक्षाभ्यां [इन्द्रियाभ्यां दर्शनभावनामार्गस्थौ] ॥

[अशैक्षोऽर्हन्] स्वमार्गगः ॥

अथ नियमेन कः कतिभिरिन्द्रियैः समन्वागत इति ? तदिदमुपदर्श्यते—

[99] उपेक्षायुर्मणो(नो)युक्तोऽवश्यं त्रयसमन्वितः ।[१]

[ए]भिरेव त्रिभिः। न ह्येषामन्योन्येन विना समन्वागतः। शेषैरणि(नि)यमः ।[२]

[3](2)तत्र तावच्चक्षुरादिभिः सप्तभि[४]रारूप्योपपन्नो न समन्वागतः। कामधातौ च येनाप्रतिलब्धविहीनानि ।[५] सुखेन्द्रियेण चतुर्थध्यानाद्युपपन्नाः[६] पृथग्जनाः, सौमनस्येन त्रि(तृ)तीयाद्युपपन्नाः[७] पृथग्जनाः, दुःखेन्द्रियेन(ण) रूपारूप्योपपन्नाः, दौर्मण(न)स्येन कामवीतरागः, श्रद्धादिभिर्निःशुभः[८], अनास्रवैस्त्रिभिः पृथ(3)ग्जना[९] न समन्वागताः ।[3]

चतुर्भिः कायसुखवान्

यः कायेन्द्रियेण सोऽवश्यं चतुर्भिस्तैश्च त्रिभिः कायेन्द्रियेन(ण) च। योऽपि सुखेन्द्रियेण स चतुर्भिः—तैश्च त्रिभिरुपेक्षादिभिः सुखेन्द्रियेन(ण) च।

चक्षुष्मानपि पञ्चभिः[१०] ॥

---

[१] Cf. उपेक्षाजीवितमनोयुक्तोऽवश्यं त्रयान्वितः ॥ *Ak*. II. 17. cd.

[२] Cf.…शेषैस्त्वनियमः। स्यात्समन्वागतः स्यादसमन्वागतः। तत्र तावत्…*Akb*. II. 17cd.

[3]—[3]This whole passage substantially agrees with *Akb*. II. 18ab.

[४] चक्षुःश्रोत्रघ्राणजिह्वेन्द्रियैरारूप्योपपन्नो न समन्वागतः। *Akb*. II. 18ab.

[५] after this *Akb*. has : कायेन्द्रियेणारूप्योपपन्नो न समन्वागतः। स्त्रीन्द्रियेण रूपारूप्योपपन्नः। कामधातौ येनाप्रतिलब्धविहीनम्। एवं पुरुषेन्द्रियेण। *Ibid*.

[६] चतुर्थध्यानारूप्योपपन्नः। *Ibid*.

[७] तृतीयचतुर्थध्यानारूप्योपपन्नः। *Ibid*.

[८] श्रद्धादिभिः समुच्छिन्नकुशलमूलः। *Ibid*.

[९] आज्ञास्यामीन्द्रियेण पृथग्जनफलस्था न समन्वागताः। आज्ञेन्द्रियेण पृथग्जनदर्शनाशैक्षमार्गस्थाः। आज्ञातावीन्द्रियेण पृथग्जनशैक्ष्या असमन्वागताः। *Ibid*.

[१०] Cf. चतुर्भिः सुखकायाभ्यां पञ्चभिश्चक्षुरादिमान्। *Ak*. II. 18 ab.

'अपि'शब्दाच्छ्रोत्रघ्राणजिह्वेन्द्रियैर्वेदितव्यम्। यश्चक्षुरिन्द्रियेण सोऽवश्यं पञ्चभिः—उपेक्षाजीवि(4)तमनःरूपेन्द्रियैश्चक्षुषा च ॥

[100] स्त्रीन्द्रियाद्यन्वितोऽष्टाभिः[१]

तैश्च सप्तभिः स्त्रीन्द्रियेन(ण) च। 'आदि'ग्रहणात् पुरुषेन्द्रियदौर्मण(न)स्यश्रद्धादीनां ग्रहणं वेदितव्यम्। तद्वानपि प्रत्येकमष्टाभिः—तैश्च सप्तभिः पुरुषेन्द्रिये(ण) चाष्टमेन। एभिश्च कायजीवितमनोभिश्चतसृभिर्वेदनाभिः, दौर्मण(न)स्येन्द्रियेण च। श्रद्धा(5)दि[भि]स्तैश्च पञ्चभिरुपेक्षाजीवितमनोभिश्च।

दुःखी युक्तस्तु सप्तभिः ।

यो दुःखेन स सप्तभिः—कायजीवितमनोभिश्चतसृभिर्वेदनेन्द्रियैर्दौर्मण(न)स्यं हित्वा, तद्वीतरागस्य नास्तीति ।

एकादशभिरन्त्याभ्यां[३]

द्वाभ्यामन्त्याभ्यां युक्तोऽवश्यमेकादशभिः, प्रत्येकं सुखसौमनस्योपेक्षाजीवितमनःश्रद्धादिभि(6)राज्ञेन्द्रियेण च। एवमाज्ञातवदिन्द्रियेण तेन तैश्चेति।

सप्त षड्भिस्तदाद्यवान् ।।[४]

प्रथमेन त्वनास्रवेण यः समन्वागतः सोऽवश्यं त्रयोदशभिर्मनोजीवितकायेन्द्रियैश्चतसृभिर्वेदनाभिः श्रद्धादिभिस्तेन चेति ॥

अथ सर्वबहुभिः कियद्भिः समन्वागताः[५] ? तदुच्यते—

[101] त्रिद्वीपनरकोत्पन्ना मिथ्यात्वनियता अ(7)पि ।
[बहुभिः] ह्येकान्नविंशत्या स्वल्पैरष्टाभिरन्विताः ।।

[102] अन्तराभविकप्रेततिर्यक्श्रद्धानुसारिण[:] ।
त्र्यधिकैर्दशभिर्युक्ता दशभिर्वा नवाधिकैः ।।

---

[१] Cf. स्त्रीन्द्रियादिमान् । *Ak*. II. 18 d.

[२] Cf. सौमनस्यी च दुःखी तु सप्तभिः । *Ak*. II. 18 cd.

[३] Cf. अष्टाभिरेकादशभिस्त्वाज्ञातेन्द्रियान्वितः । *Ak*. II. 19 ab.

[४] Cf. आज्ञास्यामीन्द्रियोपेतस्त्रयोदशभिरन्वितः । *Ak*. II. 19 cd.

[५] Cf. यः सर्वबहुभिरिन्द्रियैः समन्वागतः स कियद्भिः ?
बहुभिर्युक्त एकान्नविंशत्याऽमलवर्जितैः ।
द्विलिङ्ग आर्यराग्येकलिङ्गद्वयमलवर्जितैः ।। *Ak*. II. 21.
The *Adv*. deals with this topic in detail.

स्वल्पैस्त्रयोदशभी रूपभिः पञ्चभिः श्रद्धादिभिश्च जीवितमनउपेक्षाभिश्च। णा(ना)रकस्य तूच्छिन्नशुभबीजस्य चक्षुरादीनि पञ्चैकं च व्यञ्जनं वेदनाश्च पञ्च जीवि(8)तं मनश्च। तिरश्चां नास्त्युच्छेदः। य इहोच्छिनत्ति सोऽवश्यमवीचिं गच्छति। तेन तत्र नरके श्रद्धाद्या न सन्ति। पञ्च चक्षुरादीनि पञ्च च वेदना, एकं व्यञ्जनं जीवितं मनश्चेति त्रयोदश भवन्ति। स्युर्बहुभिश्चान्तराभविकाद्याः पृथग्जनास्त्रीण्यमलानि हित्वैकान्नविंशतिभिः, आर्यास्तु श्रद्धानुसारिणो द्वे (9)अमले हित्वैकं च व्यञ्जनमित्येकान्नविंशतिभिरेव समन्वागताः ॥

[103] सम्यक्त्वनियता ये तु ये च श्रद्धाधिमुक्तिकाः ।
त एकादशभिर्युक्ता दशभिर्वा नवाधिकैः ॥

तत्र सम्यक्त्वनियता आर्या इत्यर्थः। ते पञ्चभिः श्रद्धादिभिर्मनोजीविताभ्यां च तिसृभिर्वेदनाभिरेकेण चानास्रवेन(ण)। सर्वप्रभूतैः पुनरेकान्न[II. B, 5. Fol. 43 a.](1)विंशतिभिरेकलिङ्गद्वयमलवर्जितैः ॥

[104] प्रज्ञाविमुक्तनामार्हत् कायसाक्ष्युभयाह्वयाः ।
अर्ह्वैकादशकोपेता यदि वाऽष्टादशान्विताः ॥

सर्वाल्पैरेकादशभिः श्रद्धादिभिः सुखसौमनस्योपेक्षाजीवितमनोभिरेकेन चानास्रवेण। बहुभिस्त्वष्टाद[श]भिः, द्वे अनास्रवे दौर्मण(न)स्यमेकं च व्यञ्जनं हित्वा ॥

[105] कामदेवा मृ(2)ताः स्वल्पैर्दशभिः सप्तकाधिकैः ।

अनास्रवत्रयं हित्वा दौर्मण(न)स्यं च। तत्रत्यः पृथग्जनो यदि वैराग्यं गच्छति स देवर्षिर्भवति। एकं च व्यञ्जनं हित्वा परिशिष्टैः सप्तदशभिः समन्वागतः।

त एवैकोनविंशत्या युक्ता बहुभिरिन्द्रियैः ॥

द्वे अनास्रवे हित्वैकं च व्यञ्जनम्। अत्रापि हि सत्यानि दृश्यन्ते ॥

[106] [द्विध्यान](3)जास्तु सर्वाल्पैर्दशभिः पञ्चकाधिकैः ।

प्रथमद्वितीयध्यानोपपन्नानां पृथग्जनानां दुःखदौर्मण(न)स्ये हित्वा द्वे च व्यञ्जने त्रीणि चामलानि, पञ्चदशभिः समन्वागमः।

दशभिः सचतुष्कैस्तु शुभकृत्स्नाः समन्विताः ॥

शुभकृत्स्नेषु पृथग्जनस्य सौमनस्यं च हित्वा चतुर्दशभिः समन्वागमः।

[107] बृहत्फला हि (4)अत्यल्पैस्त्रयोदशभिरन्विताः ।

बृहत्फलेषु पृथग्जनस्य सुखं च हित्वा दुःखादीनि च पूर्वोक्तानि त्रयोदश भवन्ति ।

युक्ताः षोडष(श)भिस्त्वेते सर्वभूरिभिरिन्द्रियैः ॥

यद्यार्या भवन्ति तेषां सुखसौमनस्याभ्यामनास्रवाभ्यां समन्वागम इति षोडश भवन्ति ॥

[108] अष्टाभिर्दशभिः सेकैरारूप्याः स्वल्पभूमिभिः[१] ।

स्वल्पैरष्टाभिः(5) । पृथग्जनस्याष्टा[ः] स्वल्पानि भवन्ति । पञ्च श्रा(श्र)द्धाद्धी(दी)नि, जीवितं मनउपेक्षा च । बहुभिरेकादशभिरार्यस्य समन्वागमः । पञ्चभिःश्रद्धादिभिः, द्वाभ्यां मुखसौमनस्याभ्यामनास्रवाभ्याम्, जीवितमनउपेक्षेन्द्रियैश्चतुर्भिरणा(ना)स्रवेण चैकेन ।

सदेवकौरवाः सत्त्वास्त्रयोदशभिरन्विताः ॥

पञ्चभिः श्रद्धादिभिः (6)पञ्चभिः सुखादिभिः, कायमनोजीवितैश्च त्रिभिः ॥

[109] अष्टाभिर्निःशुभो युक्तो दशभिर्वा त्रयाधिकैः ।[२]

उच्छिन्नशुभमूलो निःशुभः[३] सर्वाल्पैरष्टाभिः समन्वागतः । सुखादिभिः पञ्चभिः कायजीवितमनोभिश्च । सर्वप्रभूतैस्तु त्रयोदशभिर्यथोक्तैरष्टाभिश्चक्षुरादिभिश्चतुर्भिरेकेन च व्यञ्जनेन ।

द्विलिङ्गाः (7)पश्चिमैः स्वल्पैर्विंशत्याप्येकया परम् ॥

उभयव्यञ्जनस्त्रयोदशभिः स्वल्पैः सुखादिभिः कायजीवितमनोभिः श्रद्धादिभिश्च पञ्चभिः । चक्षुरादीनामलब्धविहीनत्वादनियमः । सर्वबहुभिस्त्वेकोनविंशतिभिस्त्रीण्यमलान्यपास्य । समाप्तोऽयं मत्स्यकग्रन्थसमुद्रः ॥

---

[१] Cf. युक्तो बालस्तथारूप्ये उपेक्षायुर्मनः शुभैः । *Ak.* II. 20 cd.

[२] Cf. अथ यः सर्वाल्पैः समन्वागतः स कियद्भिरिन्द्रियैः ?
सर्वाल्पैर्निःशुभोऽष्टाभिर्विन्मनः कायजीवितैः । *Ak.* II. 20 ab.

[३] समुच्छिन्नकुशलमूलो निःशुभः ।··· *Akb.* II. 20 ab.

[१]व्याख्यात इन्द्रियानां(णां) धातुगतिप्रभेदप्र(8)दर्शनागतानां विस्तरेण प्रभेदः । अधुना तु मीमांस्यते । किमेते संस्कृता धर्मा यथा भिन्नस्वभावाः, एवं भिन्नोत्पादा अथ नियतसहोत्पादा अपि केचिद्विद्यन्त इति ? विद्यन्त इत्याह ।

तत्र संक्षेपेण पञ्चेमा धर्मजातयः—रूपं चित्तं चैतसिकाश्चित्तविप्रयुक्ता असंस्कृतं च ।

तत्रासंस्कृतं नोदेति न च व्येति ।[१]

रूपि(9)णां तु धर्माणामयं नियमः —

[110] सप्तद्रव्याविनिर्भागी परमाणुर्बहिर्गतः ।
कामेष्वेकाधिकः काये द्व्यधिकश्चक्षुरादिषु ॥[२]

सर्वसूक्ष्मः खलु रूपसंस्कारोपादानसंचयभेदपर्यन्तः परमाणुरिति प्रज्ञाप्यते । स तु सप्तद्रव्याविनिर्भागी चतुर्भिर्भूतैस्त्रिभिश्चोपादायरूपैस्त्रिभिस्त्रिभिर्वा भूतैश्चतुर्भिश्चो[II. A, 5. Fol. 43b]पादावरूपैरविनिर्भागवर्त्यसावष्टम इति ।

कोशकारस्त्वाह—"सर्वसूक्ष्मो रूपसंघातः परमानुः(णुः)" इति ।[3] तेन संघातव्यतिरिक्तं रूपमन्यद्वक्तव्यम् । यदि नास्ति संघातोऽपि नास्ति । अतः सिद्धं 'सर्वसूक्ष्मं रूपपरमानुः(णुः)'[४] इति ॥

---

[१]—[१] This *Adv.* (from व्याख्यातः to न च व्येति) is identical with *Akb.* II. 21.

[२] Cf. कामेऽष्टद्रव्यकोऽशब्दः परमाणुरनिन्द्रियः ।
कायेन्द्रियो नवद्रव्यो दशद्रव्योऽपरेन्द्रियः ॥ *Ak.* II. 22.

[३] Cf. सर्वसूक्ष्मो रूपसंघातः परमाणुरित्युच्यते । यतो नान्यतरो विज्ञायेत । स कामधातावशब्दको अनिन्द्रियश्चाष्टद्रव्यक उत्पद्यते नान्यतमेन हीनः । अष्टौ द्रव्याणि । चत्वारि महाभूतानि चत्वारि चोपदायरूपाणि रूपगन्धरसस्प्रष्टव्यानि । सेन्द्रियस्तु परमाणुरशब्दको नवद्रव्यक उत्पद्यते दशद्रव्यको वा । *Akb.* II. 22ab.

—सर्वसूक्ष्मो रूपसंघातः परमाणुरिति । संघातपरमाणुर्न द्रव्यपरमाणुः । यत्र हि पूर्वापरभागो नास्ति तत्सर्वरूपापचितं द्रव्यं द्रव्यपरमाणुरितीष्यते । तस्माद्विषिनष्टि संघातः परमाणुरिति । *Sakv.* p. 123.

[४] Compare this view with the view of Saṁghabhadra :—D'après Saṁghabhadra (XXIII. 3, Fol. 52a): Parmi les *rūpas* 'susceptibles de résistance *(sapratigha)*, la partie la plus subtile, qui n'est pas susceptible d'être scindée

कायेन्द्रियसहगस्त्वष्टाभिश्चक्षुरादिसहिता(तो) नवभिः ॥

[111] एवं रूपेऽपि विज्ञेयो हित्वा गन्धरसद्वयम् ।

रू पधातौ बहिर्गतः पञ्चद्रव्याविनिर्भागी गन्धरसौ हित्वा । कायसहगतस्तु षड्भिश्चक्षुरादिषु सप्तभिरविनिर्भागिभिः । यदा पुनस्ससशब्दकः स संघातो[१] जायते, तदा सर्वत्र यथोक्तेषु शब्दोऽधिको गणयितव्यः ।

अत्र पुनर्महाभूतानि सर्वोपादायरूपाश्रयभावप्राधान्याच्चतस्रो द्रव्यजातयो विवक्ष्यन्ते । उपादाय(3)रूपधातुचतुष्टयं तु घटादिद्रव्यप्रज्ञप्तिनिमित्तत्वादायतनगणनया गण्यत इति विवक्षितापरिज्ञानान्नास्ति चोद्यावकाशः ॥[२]

à nouveau, s'appelle *paramāṇu*. C'est-à-dire : le *paramāṇu* n'est pas susceptible d'être devisé en plusieurs par un autre *rūpa*, par la pensée. C'est ce qu'on dit être le plus petit *rūpa*; comme il n'a pas de parties, on lui donne nom de 'plus petit'. De même un *kshaṇa* est mommé le plus petit temps et ne peut être devisé en demi-*kshaṇas*. (iii. 86). *LVPAk*. II. p. 144, n. 3.

Also cf. यत्पुनरुच्यते रूपसमुदाय इति तत्र निःशरीरः परमाणर्वेदितव्यः । बुद्ध्या पर्यन्तप्रभेदतस्तु परमाणुव्यवस्थानं पिण्डसंज्ञाविभावनतामुपादाय रूपे द्रव्यापरिनिष्पत्तिप्रवेशतां चोपादाय । *Asm*. pp. 41—2.

On the Buddhist theory of Atoms and Molecules, See W. M. Mc Govern : *A Manual of Buddhist Philosophy*, vol. I. pp.125—128; S. Z. Aung : *Compendium of Philosophy*, pp. 268—273. and Th. Stcherbatsky : *The Central Conception of Buddhism*, pp. 11—14.

[१] The Kośakāra deals here with one more topic :—'कथमिहाविनिर्भागे भूतानां कश्चिदेव संघातः कठिन उत्पद्यते कश्चिदेव द्रव उष्णो वा समुदीरणो वा । *Akb*. II. 22d.

[२] Cf. **किं पुनरत्र द्रव्यमेव द्रव्यं गृह्यते आहोस्विदायतनम् ।** किञ्चातः यदि द्रव्यमेव द्रव्यं गृह्यते, अत्यल्पमिदमुच्यते 'अष्टद्रव्यको नवदशद्रव्यक' इति । अवश्यं हि तद्द्रव्यसंस्थानेनापि भवितव्यम् । तस्यापि परमाणुसंचितत्वात् । ···अथाप्यायतनद्रव्यं गृह्यते, अतिबह्विदमुच्यते—अष्टद्रव्यक इति । चतुर्द्रव्यको हि वक्तव्यो यावता भूतान्यपि स्प्रष्टव्यायतनम् । **किञ्चिदत्र द्रव्यमेव द्रव्यं गृह्यते यदाश्रयभूतं किञ्चिदत्रायतनं द्रव्यं गृह्यते यदाश्रितभूतम् ।** अत्र पुनर्जातिंद्रव्यं गृह्यते । भूतचतुष्कान्तराणां स्वजात्यनतिक्रमात् । कः पुनर्यत्स एवं विकल्पेन वक्तुम् । च्छन्दतोऽपि वाचां प्रवृत्तिरर्थस्तु परीक्ष्यः । *Akb*. II. 22cd.

···मुख्यवृत्त्या यद् द्रव्यं यस्य स्वलक्षणमस्ति तद् द्रव्यं गृह्यते । 'आहोस्विदायतनम्' द्रव्यमित्यधिकृतम् । आयतनं पि हि द्रव्यमिति शक्यते वक्तुं सामान्यविशेषलक्षणसद्भावात् ।

अरूपिणां पुनः

चित्तं चैतसिकैः सार्धं

अविनिर्भागेन(ए) जायत इति वर्त्तते ।

संस्कृतं तु स्वलक्षणैः ॥[१]

सर्वं हि संस्कृतं स्वलक्षणैः[२] सह जात्यादिभिरुत्पद्यत इति वेदितव्यम् ॥

(3)अभिधर्मदीपे विभाषाप्रभायां वृत्तौ द्वितीयस्य[अध्यायस्य] द्वितीयः पादः ॥

···यद्भूतचतुष्कमाश्रय एकस्योपादायरूपस्य···न तदेवान्यस्योपादायरूपस्य गन्धस्य रसस्य वाऽश्रयः । किं तर्हि ? 'अन्यदेव भूतचतुष्कं तस्याश्रयः' इति वैभाषिकसिद्धान्तः । *Sakv.* p. 125. For the term *dravya*, see *Asm.* p. 16.

[१] Cf. चित्तचैत्ताः सहावश्यं सर्वं संस्कृतलक्षणैः । Ab. II. 23 ab.

[२] See *Asm.* p. 19.

द्वितीयाध्याये

तृतीयपादः ।

यदुक्तं चैतसिकास्तु सहोत्पद्यन्त इति तदभिधीयताम्। के पुनस्ते चैतसिका धर्माः ?[१]

ते पञ्चप्रभेदाः—महाभौमाः, कुशलमहाभौमाः, क्लेशमहाभौमाः, अकुशलमहाभौमाः, परीत्तक्लेशमहाभौमिकाश्च ।[२] महती चित्त(5)भूमिरेषामिति त इमे महाभौमाः । भूमिर्गतिरित्यर्थः । एवं सर्वत्र विग्रहः कार्यः ।

तत्र तावन्महाभौमा निर्दिश्यन्ते ।

[112] दशधर्मा महाभौमा वित्संज्ञाचेतनास्मृतिः ।
छन्दः स्पर्शोऽधिमोक्तश्च धीः समाधिर्मनस्कृतिः ॥[३]

एते दशधर्माः सर्वास्यां चित्तभूमौ त्रैधातुक्यामनास्रवायां च समग्रा भव(6)न्ति ।[४]

---

[१] For the Sarvāstivandins' list of the *Chaitasika-dharmas*, see Th. Stcherbatsky : *The Central Conception of Buddhism*, pp. 100—105 and *LVPAk*. II. p. 150, n. 2. For the Sthaviravādins' list, see S. Z. Aung: *Compendium of Philosophy*, pp. 14 fol. and Nyānaponika : *Abhidhamma Studies*, pp. 10-14. For the Yogāchāras' list, see N. A. Sastri : *Ālambanaparīkshā*, pp. 113-5 (Appendix) and *Asm*. pp. 5-11. The *Vigrahavyāvartanī* (pp. 4-5) gives a list of 119 *Kuśala-dharmas*. For a detailed account of this topic, see W. M. Mc Govern : *A Manual of Buddhist Philosophy*, vol. I. pp. 137-162.

[२] Cf. प्राप्त्या वा पञ्चधा चैत्ता महाभूम्यादिभेदतः । *Ak*. II. 23 cd.

[३] Cf. वेदना चेतना संज्ञा च्छन्दः स्पर्शो मतिः स्मृतिः ।
मनस्कारोऽधिमोक्षश्च समाधिः सर्वचेतसि ॥ *Ak*. II. 24.

[४] Cf. इमे किल दश धर्माः सर्वत्र चित्तक्षणे समग्रा भवन्ति । *Akb*. II. 24. But Vasubandhu holds a different view : 'इमे किल' इति । किलशब्दः **परमतद्योतने । स्वमतं** तु च्छन्दादयः सर्वचेतसि न भवन्ति । तथा ह्यनेनैवाचार्येण **पञ्चस्कन्धके** लिखितम्···। *Sakv*. p. 127· See *LVPAk*. II. pp. 150, n. 2.

According to the Sthaviravādins only seven *chaitasikas* are *sarva-chittā-sādhāraṇa* : फस्सो वेदना सञ्ञा चेतना एकग्गता जीवितेन्द्रियं मनसिकारो चेति सत्तिमे सब्बचित्तसाधारणा नाम । *A. Saṅgaho*. II. 2:

The Yogāchāra list has only five :—

सदा स्पर्शमनस्कारवित्संज्ञाचेतनान्वितम् । *Triṁśikā*, 3 cd.

तत्र वेदना सुखादिस्त्रिविधोऽनुभवः। त्रिविधं संवेदितमिति पर्यायः। इष्टानिष्टोभयविपरीतविषयेन्द्रियविज्ञानसन्निपातजा धर्मयोनिः कायचित्तावस्था विशेषः प्रह्लाद्युपतापी तदुभयविपरीतश्च तृष्णाहेतुर्वेदि(द)नेत्युच्यते।[१]

निमित्तनामार्थैक्यज्ञा संज्ञा[२] वितर्कयोनिः।

चित्ताभिसंस्कारश्चेतना।[३]

(7)चित्तव्यापाररूपा स्मृतिः।[४] चित्तस्यार्थाभिलपना कृतकर्तव्यक्रियमान(ण)कर्मान्ताविप्रमोषलक्षणाः(णा)।

चच्छ(छ)न्दः[५] कर्तुकामता वीर्याङ्गभूतः।

विषयेन्द्रियविज्ञानसन्निपातजा चित्तस्य विषयस्पृष्टिः, चैतसिकधर्मो[६] जीवनलक्षणः स्पर्शः।

---

[१] Cf. वेदना अनुभवस्वभावा। सा पुनर्विषयस्याह्लादकपरितापकतदुभयाकारविविक्तस्वरूपसाक्षात्करणभेदात् त्रिधा भवति···। **एवं त्वन्ये मन्यन्ते।** शुभाशुभानां कर्मणां फलविपाकं प्रत्यनुभवन्त्यनेनेत्यनुभवः। *Tvb.* 3 cd.

[२] Cf. नीलादिभेदं आरम्मणं सञ्जानाती ति सञ्ञा। सा सञ्जाननलक्खणा पच्चाभिञ्ञाणरसा।·····**अपरो नयो**—सब्बसंगाहिकवसेन हि सञ्जाननलक्खणा सञ्ञा। *Dhs A.* III. 188-9. Also cf. संज्ञा विषयनिमित्तोद्ग्रहणम्। विषय आलम्बनम्। निमित्तं तद्विशेषो नीलपीताद्यालम्बनव्यवस्थाकरणम्। तस्योद्ग्रहणं निरूपणं नीलमेतन्न पीतमिति। *Tvb.* 3 cd. For the different functions of *saṁjñā*, *vijñāna* and *prajñā*, see *Vm.* xiv. 3—6.

[३] Cf. **चेतना** चित्ताभिसंस्कारो मनसश्चेष्टा। यस्यां सत्यामालम्बनं प्रति चेतसः प्रस्यन्द इव भवति अयस्कान्तवशादयःप्रस्यन्दवत्। *Tvb.* 3 cd. Also cf. चेतयतीति चेतना, सद्धि अत्तना संपयुत्तधम्मे आरम्मणे अभिसन्दहती ति अत्थो। *DhsA.* III. 190. For *chetanā* and its relation to the *Saṁskāra-skandha*, see A *Manual of Buddhist Philosophy*, *Vol.* I. pp. 86-89.

[४] Cf. **स्मृतिः** सस्तुते वस्तुन्यसंप्रमोषश्चेतसोऽभिलपनता। *Tvb.* 3 cd. चित्तसंस्कारे चैतसिकधर्मसंतानस्य सततमविच्छिन्नं चिन्तनं नाम स्मृतिः। *Aam.* p. 123. For the omission of *smriti* in the Sthavira-vādins' list of *sabba-chitta-sādhāraṇa*, see *Abhidhamma Studies*, p. 39.

[५] Cf. **छन्दो** ति कत्तुकम्यतायेतं अधिवचनं। *Dhs A.* III. 254.
छन्दोऽभिप्रेते वस्तुन्यभिलाषः। *Tvb.* 3 cd.

[६] Cf. फुसती ति फस्सो। स्वायं फुसनलक्खणो, संघट्टनरसो, संनिपातपच्चुपट्ठानो, आपाथगतविसयपदट्ठानो। अयं हि **अरूपधम्मो समानो पि** आरम्मणे फुसनाकारेनेव पवत्तती ति फुसनलक्खणो। *Dhs A.* III. 179. Also cf. स्पर्शस्त्रिकसंनिपाते इन्द्रियविकारपरिच्छेदः

चित्तस्य विषयेऽधिमुक्तिरवि(ध)मोक्षो[१] रुचिद्वितीयनामा[२] चित्तस्य(8) विषयाप्रतिसंकोचलक्षणः ।

धीः प्रज्ञा धर्मसंग्रहाद्युपलक्षणस्वभावा[३] ।

चित्तस्यैकाग्रता समाधिश्चित्तस्थितिलक्षणः ।

चित्तस्याभोगो मनस्कारः पूर्वानुभूतादिसमन्वाहारस्वरूपः ।[४]

सूक्ष्मः खलु चित्तचैत्तानां विशेषो दुरवधारो रूपिनी(णी)नामेव तावदोषधीनां बहुरसानामिन्द्रियग्रा(9)ह्योऽपि रसविशेषो दुरवधारः, किमङ्ग पुनर-

---

वेदनासंनिश्रयकर्मकः । इन्द्रियविषयविज्ञानानि त्रीण्येव त्रिकं तस्य कार्यकारणभावेन समवस्थानं त्रिकसंनिपातः । तस्मिन् **सति तत्समकालमेवेन्द्रियस्य** सुखदुःखादि**वेदनानूकूलो यो विकारस्तेन सदृशो विषयस्य सुखादिवेदनीयाकारपरिच्छेदो यः स स्पर्शः ।** इन्द्रियं पुनर्येन विशेषेण सुखदुःखादिहेतुत्वं प्रतिपद्यते स तस्य विकारः । स्पर्शः पुनरिन्द्रियविकारसादृश्येनेन्द्रियं स्पृशतीन्द्रियेण वा स्पृश्यत इति स्पर्शं उच्यते । *Tvb.* 3 cd.

[१] Cf. अधिमोक्षः कतमः । निश्चिते वस्तुनि यथानिश्चयं धारणा । असंहार्यताकर्मकः । *Asm.* p. 6.

अधिमोक्षो निश्चिते वस्तुनि तथैवावधारणम् । निश्चितग्रहणमनिश्चितप्रतिषेधार्थम् । युक्तित आप्तोपदेशतो वा यद्वस्तु असंदिग्धं तन्निश्चितं येनैवाकारेण तन्निश्चितमनित्यदुःखाद्याकारेण तेनैवाकारेण तस्य वस्तुनश्चेतस्यभिनिवेशमेवमेतन्नान्यथेत्यवधारणमित्यधिमोक्षः । *Tvb.* 10 c. अधिमुक्तिर्निश्चयावधारणम् । *Aaa.* p. 353.

[२] Cf. 'अधिमुक्तिस्तदालम्बनस्य' गुणतो'ऽवधारणम् (णात्)' । **रुचिरित्यन्ये ।** यथानिश्चयं धारणेति **योगाचारचित्ताः ।** *Sakv.* p. 128. For various interpretations of this term, see *LVPAk* II. p. 154.

Also cf. अधिमुच्चनं अधिमोक्खो । सो सन्निट्ठानलक्खणो, असंसप्पनरसो, निच्छयपच्चुपट्ठानो···आरम्मणे निच्चलभावेन इन्दखीलो विय दट्ठब्बो । *Dhs A.* III. 254.

[३] Cf. तेन तेन वा अनिच्चादिना पकारेन धम्मे जानाती ति पञ्ञा···चतुसच्चधम्मे विचिनातीति धम्मविचयो···। *Dhs A.* III. 287.

[४] Cf. किरिया कारो, मनस्मिंकारो 'मनसिकारो' । पुरिममनतो विसदिसं मनं करोति ति पि मनसिकारो । **स्वायं आरम्मणपटिपादको वीथिपटिपादको जवनपटिपादको ति तिप्पकारो ।**··· *Dhs. A.* III. 254.

Also cf. मनस्कारश्चेतस आभोगः । आभुजनमाभोगः । आलम्बने येन चित्तमभिमुखीक्रियते । स पुनरालम्बने चित्तधारणकर्मा । चित्तधारणं पुनस्तत्र आलम्बने पुनः पुनश्चित्तस्यावर्जनम् । **एतच्च कर्म चित्तसन्ततेरालम्बननियमेन विशिष्टं मनस्कारमधिकृत्योक्तं न तु यः प्रतिचित्तक्षणं तस्य हि प्रतिक्षणमेव व्यापारो न क्षणान्तरे ।** *Tvb.* 3 cd. Also cf. मनस्कारः कतमः ? चेतस आभोगः । आलम्बनचित्तधारणकर्मकः । *Asm.* p. 6.

मूर्ताणां(नां) चित्तचैतसिकानां धर्माणामेककलापवर्ति(णां)नां बुद्धिगम्यः ?[१] स तु हेतुफलस्वभावैर्मतिमद्भिरभ्यूह्य इति ॥[२]

कुशलमहाभौमे भवाः कुशलमहाभौमाः । ते पुणः(नः)

[113] श्रद्धोपेक्षाऽप्रमादश्च प्रस्रब्धिह्रीरपत्रपा ।
मूलवीर्यमहिंसा च शुभ-
[II. B, 6. Fol. 44a](1) भूका दशस्मृताः ॥[३]

तत्र श्रद्धा चेतसः प्रसादो[४] गुणिगुणार्थित्वाभिसंप्रत्ययाकारः, चित्तकालुष्यापनायी । तद्यथोदकप्रसादको मणिः सरसि प्रक्षिप्तः सर्वं कालुष्यमपनीयाच्छतामुत्पादयति तद्वचि(च्चि)त्तसरसि जातः श्रद्धामणिरिति ।[५]

अ[प्र]मादः कुशलधर्मभावना तदवहिततेत्यर्थः ।[६]

---

[१] Cf. सम्मासम्बुद्धेन पन इमेसं अरूपीनं चित्तचेतसिकानं धम्मानं एकारम्मणे पवत्तमानानं पाटियेक्कं विनिब्भोगं कत्वा पञ्ञत्तिं उद्धरमानेन अतिदुक्करं कतं । तेनाह आयस्मा **नागसेनत्थेरो**—'दुक्करं महाराज भगवता कतं···यं इमेसं अरूपीनं···ववत्थानं अक्खातं अयं फस्सो···इदं चित्तं' ति । (*Milinda*. p. 87.) *Dhs A*. III. 277.

[२] Cf. सूक्ष्मो हि चित्तचैत्तानां विशेषः । स एव दुःपरिच्छेदः प्रवाहेष्वपि तावत् किं पुनः क्षणेसु । रूपिणीनामपि तावदोषधीनां वहुरसानां कासांचिन्द्रियग्राह्या रसविशेषा दुरवधारा भवन्ति किं पुनर्ये धर्मा अरूपिणो बुद्धिग्राह्याः । *Akb*. II. 24.

[३] Cf. **श्रद्धाऽप्रमादः प्रश्रब्धिरुपेक्षा ह्रीरपत्रपा ।**
मूलद्वयमहिंसा च वीर्यञ्च कुशले सदा ॥ *Ak*. II. 25.
Also cf. **श्रद्धाथ ह्रीरपत्रपा ॥**
अलोभादित्रयं वीर्यं प्रश्रब्धिः साप्रमादिका ।
अहिंसा कुशलाः । *Triṁśikā*, 10d, 11abc.

[४] Cf. तत्र श्रद्धा चेतसः प्रसादः । सत्यरत्नकर्मफलाभिसंप्रत्यय **इत्यपरे** । *Akb*. II.25. तत्र श्रद्धा कर्मफलसत्यरत्नेष्वभिसंप्रत्ययः प्रसादश्चेतसोऽभिलाषः । *Tvb*. 11 abc. श्रद्धा कतमा । अस्तित्वगुणवत्त्वशक्तत्वेष्वभिसंप्रत्ययः प्रसादोऽभिलाषा । *Asm*. p. 6.

[५] Cf. सद्धा···सा पनेसा सम्पसादनलक्खणा च सद्धा पक्खन्दनलक्खणा च । यथा हि···उदकप्पसादको मणि···कद्दमं सन्निसीदापेति···एवमेव सद्धा उप्पज्जमाना नीवरणे विक्खंभेति, किलेसे सन्निसीदापेति, चित्तं पसादेति । *Dhs A*. III. 213.

[६] Cf. अप्रमादः कुशलानां धर्माणां भावना । **का पुनस्तेभ्योऽन्या भावना ?** या तेष्ववहितता । चेतस आरक्षेति **निकायान्तरीयाः** सूत्रे पठन्ति । *Akb*. II. 25. अप्रमादः कतमः । सवीर्यकानलोभाद्वेषामोहान्निश्रित्य या कुशलानां धर्माणां भावना सास्रवेभ्यश्च धर्मेभ्यश्चित्तस्यारक्षा । *Asm* p. 6. कतमोऽप्रमादः । चित्तस्य कुशलधर्मप्रतिसंयोगः । *Aam* p. 68. अप्रमादः प्रमादप्रतिपक्षः । **अलोभाद्यावद्वीर्यमप्रमादः ।** यैरलोभादीन्निश्रित्याकुशलान्धर्मान्प्रजहाति तत्प्रतिपक्षांश्च कुशलान्धर्मान् भावयति तेऽलोभादयोऽप्रमादः । *Tvb*. 11. abc.

प्रस्रब्धिश्चि(2)त्तकर्मण्यता । कायप्रस्रब्धिरप्यस्ति ।[१] सा तु तदानुकूल्याद्बोध्यङ्गशब्दं लभते । तद्यथा प्रीतिः । प्रीतिस्थानीयाश्च धर्माः प्रीतिबोध्यङ्गमुक्तं भगवता । सम्यग्दृष्टिसंकल्पव्यायामाश्च प्रज्ञानुकूल्यात् प्रज्ञास्कन्ध इत्युक्ताः । तद्वत्कायकर्मण्यता चित्तकर्मण्यता बोध्यङ्गावाहकत्वात्तच्छब्देनोक्ता ।

उपेक्षा चित्तसम(3)ता चित्तानाभोगः[२] संस्कारणि(नि)मित्ताभोगमध्युपेक्षानिमित्तप्रवन(ण)ता ।[३]

---

[१] Cf. प्रश्रब्धिर्दौष्ठुल्यप्रतिपक्षः कायचित्तकर्मण्यता । दौष्ठुल्यं कायचित्तयोरकर्मण्यता सांक्लेशिकधर्मबीजानि च । तदपगमे प्रश्रब्धिसद्भावात् । तत्र कायकर्मण्यता कायस्य स्वकार्येषु लघुसमुत्थानता यतो भवति । चित्तकर्मण्यता सम्यङ्मनसिकारसंप्रयुक्तस्याह्लादलाघवनिमित्तं यच्चैतसिकं धर्मान्तरं यद्योगाच्चित्तमालम्बने प्रवर्ततेऽतस्तच्चित्तकर्मण्यतेत्युच्यते । **कायस्य पुनः स्प्रष्टव्यविशेष एव प्रीत्या हृतः कायप्रश्रब्धिर्वेदितव्या । प्रीतमनसः काया प्रश्रभ्यत इति सूत्रे वचनात् ।** इय तद्दर्शनाश्रयपरावृत्तितोऽशेषक्लेशावरणनिष्कर्षणकर्मिका । साप्रमादिका···। का पुनरसौ । उपेक्षा । *Tvb.* 11. abc. प्रश्रब्धिः कतमा । कायचित्तदौष्ठुल्यानां प्रतिप्रश्रब्धेः कायचित्तकर्मण्यता । *Asm.* p. 6.

Also cf. **ननु च सूत्रे कायप्रश्रब्धिरप्युक्ता** । न खलु नोक्ता । सा तु यथा कायिकी वेदना तथा वेदितव्या । कथं सा बोध्यङ्गेषु योक्ष्यते । तत्र तर्हि कायकर्मण्यतैव कायिकी प्रश्रब्धिर्वेदितव्या । कथं सा बोध्यङ्गमित्युच्यते । बोध्यङ्गानुकूल्यात् । *Akb.* II. 25.

The Sthaviravādins, however, take the word *kāya* to mean the *nāmaskandhas*:—कायपस्सम्भनं कायपस्सद्धि, चित्तपस्सम्भनं चित्तपस्सद्धि । **कायो ति चेत्थ वेदनादयो तयो खन्धा ।** उभो पि पनेता एकतो कत्वा···कायचित्तानं अवूपसमकरउद्धच्चादिकिलेसपटिपक्खभूता ति दट्ठब्बा । *Vm.* XIV. 144. For the *sambodhi-aṅga*, cf. **पीतिमनस्स कायोपि पसम्भति** । अयं वुच्चति पस्सद्धिसम्बोज्झङ्गो । *Vbh.* p. 227.

[२] Cf. उपेक्षा चित्तसमता चित्तानाभोगता । **कथमिदानीमेतद्योक्ष्यते । तत्रैव चित्ते आभोगात्मको मनस्कारो अनाभोगात्मिका चोपेक्षा' इति ।** ननु चोक्तं—'दुर्जान एषां विशेषः' इति । अस्ति हि नाम दुर्जानमपि ज्ञायते । 'इदं तु खल्वतिदुर्जानं यद्विरोधेऽप्यविरोध' इति । अन्यत्राभोगोऽन्यत्रानाभोग इति कोऽत्र विरोधः । न तर्हीदानीमेकालम्बनाः सर्वे सम्प्रयुक्ताः प्राप्नुवन्ति । एवंजातीयकमत्रान्यदप्यायास्यतीति [V. infra, *Adv. kārikā* 123.] यस्तस्य नयः सोऽस्यापि वेदितव्यः । *Akb.* II. 25.

Also cf. उपेक्षा चित्तसमता चित्तप्रशठता चित्तानाभोगता । एभिस्त्रिभिः पदैरुपेक्षाया आदिमध्यावस्थानावस्था द्योतिता । *Tvb.* 11. abc.

For ten kinds of *upekshā*, see *Dhs A.* III. 348—354.

[3] Cf. **तत्रमज्झत्तता**—सा चित्तचेतसिकानं समवाहितलक्खणा, ऊनाधिकनिवारणरसा, पक्खपातुपच्छेदनरसा वा; मज्झत्तभावपच्चुपट्ठाना । चित्तचेतसिकानं अज्झुपेक्खनवसेन समप्पवत्तानं आजानेय्यानं अज्झुपेक्खनसारथि विय दट्ठब्बा । *Dhs A.* III. 254.

ह्रीः स्वात्मापेक्षा । अकार्यकरणे लज्जा ।[१]

अपत्राप्यन्तु परापेक्षाः(क्षा) ।[१]

द्वे तु कुशलमूले अलोभाद्वेषौ । अमोहस्तु प्रज्ञास्वभावत्वान्महाभौमेषूक्त इति न गण्यते ।[२]

वीर्यं कुशलाकुशलधर्मोत्पादनिरोधाभ्युत्साहः, संसारनिमग्नस्य चे(4)तसोऽभ्युन्नतिरित्यर्थः ।[३]

अविहिंसा सत्त्वाविहेठना ।

उक्ताः कुशलमहाभौमाः ॥

[114] स्त्यानं प्रमत्तिराश्रद्ध्यमालस्यं मूढिरुद्धति[ः] ।[४]
क्लिष्टे षट्

तत्र

---

[१] Cf. कायदुच्चरितादीहि हिरियती ति हिरि; लज्जायेतं अधिवचनं । तेहि येव ओत्तप्पती ति ओत्तप्पं; पापतो उब्बेगस्सेतं अधिवचनं । तेसं नानाकरणदीपनत्थं···अयं वित्थारकथा वुत्ता—अज्झत्तसमुट्ठाना हिरि नाम; बहिद्धासमुट्ठानं ओत्तप्पं नाम। अत्ताधिपति हिरि; लोकाधिपति ओत्तप्पं नाम । लज्जासभावसण्ठिता हिरि नाम; भयसभावसण्ठितं ओत्तप्पं नाम । सप्पटिस्सवलक्खणा हिरि नाम; वज्जभीरुकभयदस्साविलक्खणं ओत्तप्पं नाम । *Dhs A.* III. 234.

Also cf. ह्रीरात्मनं धर्मं वाधिपतिं कृत्वावद्येन लज्जा ।···अपत्राप्यं लोकमधिपतिं कृत्वावद्येन लज्जा । *Tvb.* 11. abc.

[२] See *Dhs A.* III. 241—245.

[३] Cf. वीर्यं कौशीद्यप्रतिपक्षः । कुशले चेतसोऽभ्युत्साहः । न तु क्लिष्टे । क्लिष्टे तूत्साहः कुत्सितत्वात्कौशीद्यमेव । *Tvb.* 11. abc.

Also cf. उपत्थम्भनलक्खणं च विरियं पग्गहनलक्खणं च ।···**अपरो नयो**—उस्साहनलक्खणं विरियं सहजातधम्मानं उपत्थम्भनरसं । *Dhs A.* III. 217—9

[४] Cf. **मोहः प्रमादः कौशीद्यमाश्रद्ध्यं स्त्यानमुद्धवः ।**
क्लिष्टे सदैव । *Ak.* II. 26 abc.

Also cf. **क्लेशा रागप्रतिघमूढयः ॥**
मानदृग्विचिकित्साश्च । *Triṁśikā.* 11. d, 12a.

स्त्यानं कायचित्ताकर्मण्यता ।[१]

प्रमादः कुशलानां धर्माणामभावना । भावनाविपक्षभू(5)तो धर्मः ।

आश्रद्ध्यं चित्ताप्रसादः, चित्तकालुष्यमित्यर्थः । गुणेषु गुणवत्सु चासंप्रत्ययोऽनर्थित्वं च ।

कौसीद्यं चित्तस्यानभ्युत्साहः ।

मूढिरविद्यानुकाराऽसंप्रख्यानरूपा ।

औद्धत्यं चित्तस्याव्युपशमः ।

उक्ताः षट् क्लेशमहाभौमाः ।

---

[१] Cf. स्त्यानं कतमत् । या कायगुरुता चित्ताकर्मण्यता । 'कायिकं स्त्यानं चैतसिकं स्त्यानमिति' उक्तमभिधर्मे । [*Jñānaprasthāna*, 2, 9.]कथं चैतसिको धर्मः कायिक इत्युच्यते । यथा कायिकी वेदना । *Akb*. II. 26.

The Sthaviravādin's definition of *styāna (thīna)* is : तत्थ कतमं थीनं ? या चित्तस्स अकल्यता अकम्मञ्ञता, ओलीयना सल्लीयना,···थीयितत्तं चित्तस्स, इदं वुच्चति थीनं । *Dhs*. 1156. The *thīna* is always accompanied by *middha*. It is defined as: तत्थ कतमं मिद्धं ? या कायस्स अकल्यता अकम्मञ्ञता······मिद्धं सोप्पं पचलायिका, सोप्पं सुपिना सुपितत्तं, इदं वुच्चति मिद्धं । *Dhs*. 1156. The *Dhs A*. discusses in detail the controversy whether *middha* is *rūpa*. The word *kāya* here means *nāma-kāya* and not the *rūpa-kāya* : न वत्तब्बं एतं रूपं मिद्धं ति । नामकायो हि एत्थ कायो नाम । *DhsA*. II. 80-94. See P. V. Bapat : "*Middha and Middhavādins*" in *A Volume of Eastern and Indian Studies*, pp. 4—18.

The Yogāchāra-definitions of these two terms are : स्त्यानं चित्तस्याकर्मण्यता स्तैमित्यम् ।······यद्योगाच्चित्तं जडीभवति स्तिमितं भवति नालम्बनं प्रतिपत्तुं समुत्सहते ।··· मोहांशे प्रज्ञप्तत्वाच्च मोहांशिकमेव, न पृथग्विद्यते । मिद्धमस्वतन्त्रवृत्तिचेतसोऽभिसंक्षेपः ।··· कायचित्तधारणासमर्था वा वृत्तिश्चेतसोऽस्वतंत्रता सा **यतो** भवति तन्मिद्धम् । अभिसंक्षेपश्चेतसश्चक्षुरादीन्द्रियद्वारेणाप्रवृत्तिः । एतच्च मोहांशे प्रज्ञापनान्मोहांशिकं कृत्यातिपत्तिसंनिश्रयदानकर्मकम् । *Tvb*. 14.

Also cf. स्त्यानं कतमत् ? मोहांशिका चित्ताकर्मण्यता । सर्वक्लेशोपक्लेशसहाय्यकर्मकम् । *Asm*. p. 9.

मिद्धं कतमत् ? मिद्धनिमित्तमागम्य मोहांशिकश्चेतसोऽभिसंक्षेपः कुशलः अकुशलः अव्याकृतः काले वा अकाले वा युक्तो वा अयुक्तो वा । कृत्याविपत्तिसन्निश्रयदानकर्मकम् । *Asm*. p.10. दध्याद्युपयोगनिमित्तमागम्य मोहांशिकश्चेतसोऽभिसंक्षयो मिद्धम् । *Aaa*. p. 248.

अभिधर्मे तु दश पठ्यन्ते—"आश्रद्ध्यम्, कौसीद्यम्, मुषितस्मृतिता, चेतसो वि(6)क्षेपः,[१] अविद्या, असंप्रजन्यम्, अयोनिशो मनसिकारः, मिथ्याधिमोक्षः, औद्धत्यम्, प्रमादश्च" इति ।[२]

तत्र मुषितस्मृतिविक्षेपासंप्रजन्यायोनिशोमनसिकारमिथ्याधिमोक्षाः पञ्चमहाभौमेषु पठिताः । क्लिष्टाक्लिष्टानामुभयेषां स्मृत्यादिस्वाभाव्यादितीह न पृथग्गण्यन्ते । तस्मात् षडेव क्लेशमहाभौमाः ।

अ(7)शुभे तु द्वे आह्रीक्यमनपत्रपा ॥[३]

अकुशले तु चेतसि आह्रीक्यमनपत्राप्यं च द्वौ धर्मावकुशलमहाभौमिकौ भवतः ।[४] तत्राह्रीक्यं ह्रीविपक्षभूतो धर्मः । अनपत्राप्यमत्राप्यस्येति । अकार्यं कुर्वाणस्यालज्जा स्वात्मनो[ऽ]ह्रीः । परेभ्यो[ऽ]लज्जा अनपत्राप्यमित्यपरे ॥[५]

परीत्तक्लेशमहाभौमा निर्दिश्य(8)न्ते ।

[115] मायाशाठ्यमदक्रोधविहिंसेर्ष्याप्रदष्टयः[६] ।

---

[१] Cf. विक्षेपः कतमः । रागद्वेषमोहांशिकश्चेतसो विसारः । स पुनः स्वभावविक्षेपः बहिर्धाविक्षेपः अध्यात्मविक्षेपः दौष्ठुल्यविक्षेपः मनसिकारविक्षेपश्च । *Asm.* p. 9.

[२] Cf. ननु **चाभिधर्मे** दश क्लेशमहाभूमिकाः पठ्यन्ते । "आश्रद्ध्यं · प्रमादश्चेति ।" प्राप्तिज्ञो देवानांप्रियो न त्विष्टिज्ञः । का पुनरत्रेष्टिः । मुषितस्मृतिविक्षेपासंप्रजन्यायोनिशोमनसिकारमिथ्याधिमोक्षा महाभूमिकत्वात् न क्लेशमहाभूमिका एवावधार्यन्ते ।···अत एवोच्यते 'ये महाभूमिकाः क्लेशमहाभूमिका अपि ते' इति । चतुष्कोटिकः ।···स्त्यानं पुनरिष्यते सर्वक्लेशसंप्रयोगीति क्लेशमहाभूमिकेषु तस्यापाठे कस्यापराधः । **एवं त्वाहुः ।** पठितव्यं भवेत्समाध्यनुगुणत्वात्तु न पठितम् । क्षिप्रतरं किल स्त्यानचरितः समाधिमुत्पादयेन्नोद्धत्यचरित इति ।···न ह्येते जातु सहचरिष्णुतां जहीतः । अतः षडेव क्लेशमहाभौमिकाः सिद्ध्यन्ति । *Akb.* II. 26.

—'स्त्यानं पुनरिष्यते' इति विस्तरः । 'तस्यापाठे कस्यापराध' इति । किमस्य स्त्यानस्यापाठे ममापराधः । किमाभिधार्मिकस्येति । **अभिधर्मकारस्यायमपराधो न ममेत्य**·भिप्रायः । स्त्यानस्य सर्वक्लेशसंप्रयोगित्वेनाभिमतत्वात् । 'एवं त्वाहुः' इति । तत्र शास्त्रे स्त्यानस्यापाठे कारणमाहु**राभिधार्मिकाः** ।···कथं हि नाम क्लिष्टो धर्मः शुक्लस्य समाधेरनुगुणो भविष्यति ।···*Sakv* p. 131.

See *LVPAk.* II. pp. 151 and 161 and *Asm.* p. 9.

[३] Cf. **अकुशले त्वाह्रीक्यमनपत्रपा ।** *Ak.* II. 26 d.

[४] The Pāli Abhidharma has four :—अकुसलेसु पन मोहो, अहिरिकं, अनोत्तप्पं उद्धच्चञ्चेति चेतसिका **अकुसलसाधारणा** नाम । *A. Saṅgaho.* II.13.

[५] V. supra, p. 73. n. 1.

[६] This should be प्रदाश and म्रक्ष.

म्रक्षोपणा(ना)हमात्सर्याण्यल्पक्लेशभुवो दश ॥[१]

एते हि क्लेशा भावनाहेयेनाविद्यामात्रेण मनोभूमिकेनैव संप्रयुज्यन्ते ।[२] एषां तु लक्षणमुपक्लेशचिन्तायां[3] पञ्चमेऽध्यायेऽभिधायिष्यते ॥

कथं पुण(न)रिदं विज्ञायते चित्तादर्थान्तरभूताश्चैतसि(?)काः ?[४] चित्तमेव हि तद्वेदनादिनामभिर्व्यपदिश्यत इत्येवं चेष्यमाने बुद्धसूत्रमनुलोमितं भवति । यदुक्तं भगवता—"षड्धातुरयं भिक्षवः पुरुषपुद्गलः"[५] इत्यत्र विज्ञानधातुरेवोक्तः ।[६] तस्मान्नार्थान्तरभूताश्चैतसिका इति भदन्तबुद्धदेवः ।[७] तं प्रतीदमभिधीयते—

---

[१] Cf. क्रोधोपनाहशाठ्येर्ष्याप्रमादम्रक्षमत्सराः ।
मायामदविहिंसाश्च परीत्तक्लेशभूमिकाः ॥ *Ak.* II. 27.

Also cf. क्रोधोपनहने पुनः ।
म्रक्षः प्रदाश ईर्ष्याथ मात्सर्यं सह मायया ॥
शाठ्यं मदो विहिंसाऽह्रीरत्रपा स्त्यानमुद्धवः ।
आश्रद्धयमथ कौशीद्यं प्रमादो मुषिता स्मृतिः ॥
विक्षेपोऽसंप्रजन्यं च कौकृत्यं मिद्धमेव च ।
वितर्कश्च विचारश्चेत्युपक्लेशा द्वये द्विधा ॥ *Trimiśikā*, 12 cd--14.

[२] अविद्यैव केवलेत्यर्थः । नान्येन रागादिना क्लेशेन । भावनाहेयेनेति न दर्शनहेयेन । मनोभूमिकेनैवेति न पञ्चविज्ञानकायिकेन । यस्मादिमे क्रोधादय उपक्लेशा मनोभूमिका एव भवन्ति । *Sakv*. p. 132. For details, see *LVPAk* II. p. 164, n. 4.

[३] V. infra, *Ad. kārikā* 371.

[४] V. supra, p. 25, n. 1.

This topic is discussed in *Akb*. I. 35c.

This controversy is also founds in the *Kv*. VII. 3.—इदानि चेतसिककथा नाम होति । तत्थ यस्मा फस्सिकादयो नाम नत्थि, तस्मा चेतसिकेनापि न भवितब्बं, इति नत्थि चेतसिको धम्मोति येसं लद्धि, सेय्यथापि राजगिरिकसिद्धत्थिकानं । *Kv A*. VII. 3.

[५] Cf. छधातुरो अयं भिक्खु, पुरिसो । *M. sutta* 140.

[६] The Kośakāra points out that this is wrong :—'षड्धातुरयं भिक्षो पुरुष' इति गर्भावक्रांतौ मौलसत्त्वसंदर्शनार्थम् । *Akb*. I. 35c. This interpretation of the Kośakāra agrees with the Pāli passage :—छ इमा भिक्खवे धातुयो–पठवीधातु आपोधातु तेजोधातु वायोधातु आकासधातु विञ्ञाणधातु । ···छन्नं भिक्खवे धातूनं उपादाय गब्भसावक्कन्ति होति । *Aṅg*. I. p. 176.

[७] LVP. gives the following note :—Le commentaire du *Vijñaptimātraśāstra* dit que les Sautrāntikas ont deux systèmes. Les uns, les Dārshṭāntikas, soutiennent que la pensée seule existe, que les mentaux n'existent pas,

[116] पृथिव्यादि यथा द्रव्यं [II. A, 6. Fol. 44b.]⁽¹⁾
नीलादिगुणयोगतः ।
तैस्तैर्विशेष्यते शब्दैश्चैत्तयोगान्मनस्तथा ॥

यथा हि पृथिवी धातुरब्धातुर्वा रूपरसगन्धाद्युपादायरूपैर्विशेष्यते । नीला ग्र(ग्रा)वाणः, नीलमुदकं मधुरा द्राक्षा मधुराः खर्जूरा मधुरतरो गुड इत्येवं सुखितं चित्तं दुःखितं चित्तं समाहितं चित्तं सोत्साहं कुसीदं मूढं रक्तं द्विष्टमित्येव(2)मादिभिः शब्दैश्चैतसिकैर्धर्मैर्योगाद्विशेष्यते ।[१] साध्यसमत्वादयुक्तमिति चेत् । न । उक्तोत्तरत्वात् । विहितमत्र—भूतभू(भौ)तिकान्यत्वचिन्तायामुत्तरमिति[२] । तस्माद्विशेषप्रत्ययानामनाकस्मिकत्वात्सिद्धमन्यत्वं चैतसिकानामिति ॥

इतश्च चित्तचैतसिकान्यत्वम्—

[117] भूतभौतिकनानात्वं स्वरूपेहाकृतं यथा ।
तथैव चित्त(3)चैत्तानां पृथक्त्वमुपधार्यताम् ॥

यथा खलु भूतानां भौतिकस्य च रूपस्य स्वभावभेदात्, क्रियाभेदाचान्यत्वम्; तथा चित्तस्य चैत्तानां च स्वभावक्रियाभेदादन्यत्वं द्रष्टव्यम् ॥

[118] यथा संबन्धिसंबन्धाद्विकारोऽम्भसि लक्ष्यते ।
तथा संसर्गिसंसर्गाच्चेतोविकृतिरीक्ष्यताम् ॥

यथा खलु वह्निहरीतकीगुडलवणादिद्रव्यसंबन्धा(4)द्विकारोऽम्बुनि दृश्यते, उष्णमम्लं कषायं मधुरं लवन(ण)मिति । तद्वच्चैतसिकसंबन्धाच्चित्तमपि सुखितं दुःखितं प्रसन्नमभ्युन्नतं सालोकं सान्धकारमिति ।

---

d'accord avec Buddhadeva. ····les autres admettent l'existence des mentaux et se divisent en plusieurs opinions···en outre certains Sautrāntikas admettent tous les mentaux des Sarvāstivādins. *LVPAk.* II. p. 150 n. 2.

[१] The *Kv.* quotes a similar *āgama* in this context:

ननु वुत्तं भगवता—इध केवट्ट भिक्खु परसत्तानं परपुग्गलानं चित्तं पि आदिसति, चेतसिकं पि आदिसति, वितक्कितं पि आदिसति विचारितं पि आदिसति, 'एवं पि ते मनो इत्थं पि ते मनो, इति पि ते चित्तं ति," अत्थे' व सुत्तन्तो ति ? (*Dīgha*. I· p. 213.)

आमन्ता ।

तेन हि अत्थि चेतसिको धम्मो ति । *Kv.* VII. 5.

[२] V. supra, p. 25, n. 1. This topic belongs to some lost portions of the *Adv.* first *Adhyāya*. V. supra, p. 4. n. 1.

सूत्रेऽपि चान्यत्वमुक्तम्—“संज्ञा च वेदना च चैतसिक एष धर्मः” इति ॥[१]

इदमिदानीं वक्तव्यम्। युगपदुत्पन्नानां चित्तचैतसिकानां धर्माणां कथं चैतसि(5)का धर्मा इत्युच्यन्ते ? को वा धर्मार्थः ? तदपदिष्यते—

[119] गुणो विशेषणं धर्मो मात्रावृत्तिस्तथाश्रयी।
इत्येवमादयः शब्दाः प्रधानापेक्षवृत्तयः ॥

प्रधानं हि द्रव्यं विशेष्यभूतमपेक्ष्यः(क्ष्य) गुणधर्मविशेषेण मात्रावृत्तयः शब्दाः प्रवर्तन्ते। किं पुण(न)रत्र प्रधानम् ?

[120] चित्तं प्रधानमेतेषां

कुत इति चेत्।

वस्तु(6)मात्रग्रहादिभिः।

वस्तूपलब्धिमात्रं हि चित्तं तेनोपलब्धे वस्तुनि संज्ञास्मरणे लक्षणानुस्मरणाभिनिरूपणादयो विशेषाः संज्ञाप्रज्ञास्मृत्यादिभिर्गृह्यन्ते।[२] 'आदि'-ग्रहणादत्रात्माभिनिवेशाद्राजस्थानीयत्वाच्च। किञ्च,

बीजं चैतत्प्रवृत्तीनां शुद्धिसंकरयोरपि ॥

उक्तं हि भगवता—“चित्तसंक्लेशा(7)त्सत्त्वा संक्लिश्यन्ते। चित्तव्यवदानहेतोर्विशुध्यन्ते” इति।[3] तस्मात्प्रधानं चित्तम्। यथोक्तम्—

“दूरङ्गममेकचरमशरीरं गुहाशयम्।
ये चित्त(त्तं) दमयिष्यन्ति ते मोक्ष्यन्ते मारबन्धनात् ॥”[४]

---

[१] Cf. न च युक्तं चित्तमेव चैत्ता इत्यभ्युपेतुम्। “संज्ञा च वेदना च चैतसिक एष धर्मश्चित्तान्वयाच्चित्तनिश्रित” इति सूत्रे वचनात्सरागश्चित्तादिवचनाच्च। *Akb.* I. 35c.

Also Cf. सञ्ञा च वेदना च चेतसिका एते धम्मा, चित्तपटिबद्धा, तस्मा सञ्ञा च वेदना च चित्तसंखारोति। *M. sutta* 44.

[२] Cf. चेतसि भवं तदायत्तवुत्तितायाति चेतसिकं; न हि तं चित्तेन विना आरम्मणगहणसमत्थं। असति चित्ते सब्बेन सब्बं अनुप्पज्जनतो; चित्तं पन केनचि चेतसिकेन विनापि आरम्मणे पवत्तती ति तं चेतसिकमेव चित्तायत्तवुत्तिकं नाम। तेनाह भगवा “मनोपुब्बंगमा धम्मा” ति। *A. Vibhāvinī.* p. 40.

[३] Cf. चित्तसंकिलेसा भिक्खवे सत्ता संकिलिस्सन्ति, चित्तवोदाना विसुज्झन्ति। *S.* III. p. 151.

[४] Cf. दूरङ्गमं एकचरं असरीरं गुहासयं।
ये चित्तं सञ्ञमेस्सन्ति मोक्खन्ति मारबन्धना ॥ *Dhammapada*, III. 4.

[1]तत्र दूरङ्गमं शास्तुः सर्वलोकधातुस्थविनेयकार्यकरणात्। एकचरं युगपद् द्वितीयचित्ताभावात्। अशरीरं मूर्त्यभावात्, क्रि(7)यामात्रानुमेयस्वभावत्वाच्च। गुहाशयं शरीरबलेन। तद्वृत्तिव्यक्तेरिति।[1] तस्य धर्माः संप्रयोगिणश्चैतसिका इति।

व्याख्याताः पञ्चप्रकाराश्चैत्ताः। अन्येऽपि चानियताः पठ्यन्ते—वितर्कविचारकौकृत्यमिद्धादयः।[2]

तत्रेदं वक्तव्यम्। कस्मिंश्चित्ते कति चैत्ता भवन्ति ?

कामावचरं तावत् पञ्चप्रकारं चित्तम्। कुशल(9)म्, अकुशलं द्विविधमावेणिकमन्यत्क्लेशसंप्रयुक्तं च। अव्याकृतं द्विविधं निवृतानिवृताव्याकृताख्यम् ॥[3]

[1-1] Cf. तत्थ **दूरङ्गमं** ति चित्तस्स मक्कटसुत्तमत्तकम्पि पुरत्थिमादिदिसाभागेन गमनं नाम नत्थि, दूरे सन्तम्पि पन आरम्मणं सम्पटिच्छतीति दूरङ्गमं नाम जातं। सत्तट्ठचित्तानि पन एकतो कण्णिकाबद्धानि एकक्खणे उप्पज्जितुं समत्थानि नाम नत्थि। उप्पत्तिकाले एकमेव चित्तं उप्पज्जिति तस्मा **एकचरं** नाम जातं। चित्तस्स सरीरसण्ठानं वा नीलादिप्पकारो वण्णभेदो वा नत्थीति **असरीरं** नाम जातं। गुहा नाम चतुमहाभूतगुहा, इदं च हदयरूपं निस्साय वत्ततीति **गुहासयं** नाम जातं।··· *Dhammapada A.* p. 304.

[2] मिद्धादय इति। आदिशब्देनारतिविजृम्भिकातन्द्रीभक्तेऽसमतादय उपक्लेशाः क्लेशाश्च रागादयोऽप्यनियतत्वेन गृह्यन्ते। न ह्येते रागादयः पञ्चानां प्रकाराणां अन्यतमस्मिन्नियता भवन्ति।···**आचार्यवसुमित्रः** संग्रहश्लोकमाह—

वितर्कचारकौकृत्यमिद्धप्रतिघसक्तयः।
मानश्च विचिकित्सा चेत्यष्टावनियताः स्मृताः ॥

इति। तदिदमष्टानियमवचनं न बुध्यामहे। दृष्टयोऽपि कस्मान्नानियता इष्यन्ते। न हि सप्रतिघे सविचिकित्से वा चित्ते मिथ्यादृष्टिः प्रवर्तते।···तस्माद्यद्वा तद्वेदमुक्तमिति पश्यामः। *Sakv.* p. 132. See *Tvb.* 14.

[3] अव्याकृतभावो द्विविधः। सनिवृतः अनिवृतश्च। संयोजनावृतः अनिवृतः। अनावृतोऽनिवृतः।

कतमे सनिवृताव्याकृता धर्माः। कामधातौ सत्कायदृष्टिः अन्तग्राहदृष्टिः तत्संप्रयुक्ता अविद्यासहभुवो धर्माः। रूपारूप्यधात्वोः सर्वसंयोजनानि रूपधातुकायवाक्कर्माणि। इति सनिवृताव्याकृता धर्माः।

कतमे अनिवृताव्याकृता धर्माः। आसनं शयनं स्थानं चंक्रमणं विपाकधर्माः नैर्माणिकचित्तं आकाशं अज्ञानं प्रत्ययोच्छेदः। इत्यनिवृताव्याकृता धर्माः। *Aam.* pp. 47—8

Also cf. क्लेशाच्छादितं कुशलाकुशलत्वेनाव्याकृतं यत् तन्निवृताव्याकृतम्। अनाच्छादितं त्वनिवृताव्याकृतं विपाकजैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावम्। *Sakv.* p. 134.

तत्र तावत्कामावचरं चित्तमवश्यं सवितर्कसविचारम्। अतस्तत्

[121] अभ्युद्गच्छति कामाप्तं धर्मैर्द्वादशभिः सह ।
अक्लिष्टाव्याकृतं चित्तं रश्मिवानिव रश्मिभिः ॥[१]

कामावचरमनिवृताव्याकृतं चित्तं द[II. B, 7. Fol. 45 a]शभिर्महाभौमैर्वितर्कविचाराभ्यां च सहावश्यमुदेति ॥[१]

[122] तथाष्टादशभिश्चित्तैर्निवृतं जायते मनः ।[२]

सत्कायान्तग्राहदृष्टिसम्प्रयुक्तं चित्तं कामधातौ निवृताव्याकृतम्[3] । तत्राष्टादश चैतसिका भवन्ति । दशमहाभौमाः[षट् क्लेशमहाभौमाः] वितर्कविचारौ च । दृष्टिर्नाधिका पूर्व[वत्] ।

द्वाविंशत्या सहावश्यं शुभं भवति मानसम् ॥[3]

दशमहाभौ(2)माः दशकुशलमहाभौमाः वितर्कविचारौ च ॥

[123] चेतसोस्सह विंशत्या चित्तमुत्पद्यतेऽशुभम् ।[४]

यदकुशलं चित्तमावेनि(णि)कं तत्र विंशतिश्चैत्ताः—दशमहाभौमाः षड्ले(क्ले)शमहाभौमा द्वावकुशलमहाभौमौ वितर्को विचारश्च। आवेणिकं नाम चित्तं यत्राविद्यैव केवला नान्यः क्लेशोऽस्ति रागादिः ।

दृ(3)ङ्मोहमात्रयुक्तं यत्

क्लेशा अपि द्विविधाः । अकुशला निवृताव्याकृताश्च । अकुशलेभ्यो विशेषार्थमाह निवृताव्याकृतैरिति । न हि निवृतेन विज्ञानेनाकुशलानां संप्रयोगः संभवति । निवृताः क्लिष्टत्वात् । अव्याकृताः कुशलाकुशलत्वेनाव्याकरणात् । *Tvb.* 6 ab.

[१] Cf. अन्यत्र द्वादशाव्याकृते मताः ।

निवृतादन्यदव्याकृतमनिवृताव्याकृतम् । तत्र द्वादश चैत्ता इष्टाः । …बहिर्देशिका अव्याकृतमपि कौकृत्यमिच्छन्ति । तेषां तत्संप्रयुक्ते चेतसि त्रयोदश भवन्ति । *Akb.* II. 30 ab.

[२] Cf. निवृतेऽष्टादश । *Ak.* II. 30 a.

[3] Cf. सवितर्कविचारत्वात् कुशले कामचेतसि ।
द्वाविंशतिश्चैतसिकाः कौकृत्यमधिकं क्वचित् ॥ *Ak.* II. 28.

The *Akb.* II. 28 d. deals in detail with the nature of *kaukṛitya*.

[४] Cf. आवेणिके त्वकुशले दृष्टियुक्ते च विंशतिः ।
क्लेशैश्चतुर्भिः क्रोधाद्यैः कौकृत्येनैकविंशतिः ॥ *Ak.* II. 26.

दृष्टियुक्तेऽप्यकुशले विंशतिर्य एवावेनि(णि)के । ननु च दृष्टिरधिका ? नाधिका, प्रज्ञाविशेष एव हि कश्चिद् दृष्टिरित्युच्यते । स च महाभौमेषु पठितः ।[१]

कः पुण(न)रयं वितर्कः को वा विचारः ? वितर्को णा(ना)म चित्तौदार्यलक्षणः संकल्पद्वितीयनामा विषयनिमित्तप्रकारविकल्पी संज्ञाप(4)वनोद्धतवृत्तिः, औदारिकपञ्चविज्ञानकायप्रवृत्तिहेतुः । विचारस्तु चित्तसौक्ष्म्यलक्षणो मनोविज्ञानप्रवृत्त्यनुकूलं(लः) । इत्येतौ द्वौ धर्मौ[२] कामावचरे चेतसि सर्वस्मिन्नियमेनोत्पद्येते ।

तदिदमतिसाहसं वर्तते यद्विरुद्धयोरपि द्वयोर्धर्मयोरेकत्र चित्ते समवधानं प्रतिज्ञायते[3] । न ह्येतल्लोके दृष्टं यद्विरुद्ध(5)योरेकत्र सहावस्थानमिति कोशकारः ।[४]

---

[१] After this *Akb.* II. 32 discusses *ahrī-anapatrāpya* and *prema-gaurava*.

[२] Cf. वितक्केतीति वितक्को···ऊहनं ति वुत्तं होति । स्वायं आरम्मणे चित्तस्स अभिनिरोपनलक्खणो । नागसेनत्थेरो पनाह—आकोटनलक्खणो वितक्को । "यथा महाराज भेरी आकोटना एवं वितक्को दट्ठब्बो । यथा पच्छा अनुरवना···एवं विचारो दट्ठब्बो"ति ।··· आरम्मणे तेन चित्तं विचरती ति विचारो···अनुसञ्चरणं ति वुत्तं होति । *Dhs A.* III. 198-9.

Also. cf. वितर्कश्चित्तस्यालम्बने स्थूल आभोगः । सूक्ष्मो विचारः । *Yoga-sūtra-bhāshya*, I. 17.

[3] V. supra, p. 72. n. 2.

[४] Cf. **वितर्कचारावौदार्यसूक्ष्मते**

चित्तौदारिकता वितर्कः । चित्तसूक्ष्मता विचारः । कथं पुनरनयोरेकत्र चित्ते योगः ?···नैव हि वितर्कविचारावेकत्र चित्ते भवत इत्य**परे** । कथमिदानीं प्रथमं ध्यानं पञ्चाङ्गमुक्तम् । भूमितस्तत् पञ्चाङ्गमुक्तं न क्षणतः । *Akb.* II. 33 a.

'नैव हि वितर्कविचारावेकत्र चित्ते भवत इत्यपरः' इत्या**चार्यमतम्** । **अस्मिन्मते** यथोक्तदोषप्रसङ्गो न भवति । कस्त्वनयोः पर्यायवर्तिनोर्विशेषः ? अत्र **पूर्वाचार्या** आहुः—"वितर्कः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पोऽनभ्यूहाभ्यूहावस्थयोर्यथाक्रमं सा च चित्तस्यौदारिकता । विचारः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्पोऽनभ्यूहाभ्यूहावस्थयोर्यथाक्रमम् । सा च चित्तसूक्ष्मता" इति ।

अस्मिन् पक्षे वितर्कविचारावेकस्वभावौ समुदायरूपौ पर्यायवर्तिनौ पर्येषणप्रत्यवेक्षणाकारमात्रेण भिन्नाविष्येते ।···'भूमितस्तत्पञ्चाङ्गमुक्तं न क्षणतः' इति । प्रथमध्यानभूमिः कदाचिद्वितर्केण व्यवकीर्णा, कदाचिद्विचारेण । तदेवं सन्तानमधिकृत्य पञ्चाङ्गमुक्तम्, न क्षणमधिकृत्येत्यदोषः । *Sakv.* p. 138.

The view of the *Pūrvāchāryas* as quoted by Yaśomitra, is found in *Asm.* Cf. वितर्कः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पः । सा च चित्तस्यौ-

[1]तत्र केचिदाहुः—सर्पिर्यथाऽप्सु निष्ठ्यूतं नातिश्यायते नातिविलीयते, एवं वितर्कविचारयोगाच्चित्तं नातिसूक्ष्मं भवति नात्युदारमित्युभयोरपि तत्र व्यापारः। एवं तर्हि णि(नि)मित्तभूतौ वितर्कविचारावौदार्यसूक्ष्मतयोः प्राप्नुतो यथाऽऽपश्चातपश्च सर्पिषः (6)श्यानत्वविलीनत्वयोर्ण(र्न) पुण(न)स्तत्स्वभावौ।[2]

[3]अन्ये पुण(न)राहुः—वाक्संस्कारा वितर्कविचाराः सूत्रेऽभिहिताः।

दारिकता। विचारः कतमः। चेतनां वा निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्पः। सा च चित्तस्य सूक्ष्मता। *Asm.* p. 10. For an examination of this passage, see E. Frauwallner : *On the Date of the Buddhist Master of the Law Vasubandhu*, pp.21-2, Orientale-Roma, 1951.

Also cf. वितर्कः पर्येषको मनोजल्पः प्रज्ञाचेतनाविशेषः। पर्येषकः किमेतदिति निरूपणाकारप्रवृत्तः। मनसो जल्पो मनोजल्पः। जल्प इव जल्पः। जल्पोऽर्थकथनम्। चेतनाप्रज्ञाविशेष इति। चेतनायाश्चित्तपरिस्पन्दात्मकत्वात्। प्रज्ञायाश्च गुणदोषविवेकाकारत्वात्तद्वशेन चित्तप्रवृत्तेः। कदाचिच्चित्तचेतनयोर्वितर्कप्रज्ञप्तिः। कदाचित्प्रज्ञाचेतसोर्यथाक्रममनभ्यूहावस्थयोः। अथ वा चेतनाप्रज्ञयोरेव वितर्कविज्ञप्तिस्तद्वशेन चित्तस्य तथाप्रवृत्तत्वात्। स एव चित्तस्यौदारिकता। औदारिकतेति स्थूलता वस्तुमात्रपर्येषणाकारत्वात्। एष च नयो विचारेऽपि द्रष्टव्यः। विचारोऽपि हि चेतनाप्रज्ञाविशेषात्मकः प्रत्यवेक्षको मनोजल्प एव। इदं तदिति पूर्वाधिगतनिरूपणात्। अत एव च चित्तसूक्ष्मतेत्युच्यते। एतौ च स्पर्शास्पर्शविहारसंनिश्रयदानकर्मकौ। अनयोश्चौदारिकसूक्ष्मतया व्यवस्थापनात्पृथक्करणम्। *Tvb.* 14.

[1] Cf. **केचिदाहुः**। यथाप्सु निष्ठ्यूतं सर्पिः सूर्यरश्मिभिरुपरिष्टात् स्पृष्टं नातिश्यायते नातिविलीयते। एवं वितर्कविचारयोगाच्चित्तं नातिसूक्ष्मं भवति नात्यौदारिकमित्युभयोरपि तत्रास्ति व्यापारः। एवं तर्हि निमित्तभूतौ वितर्कविचारावौदारिकसूक्ष्मतयोः प्राप्नुतो यथा पयश्चातपश्च सर्पिषः श्यानत्वविलीनत्वयोर्न पुनस्तत्स्वभावौ। आपेक्षिकी चौदारिकसूक्ष्मता भूमिप्रकारभेदादित्याभवाग्राद्वितर्कविचारौ स्याताम्। न चौदारिकसूक्ष्मतया जातिभेदो युक्तः। *Akb.* II. 33 a.

[2] LVP. says that this is an opinion of the *Vibhāshā*. See *LVPAk.* II. p. 173, n. 2.

[3] This whole passage (upto मृद्वधिमात्रत्वात्) is identical with the *Akb.* II. 33 a. After यदि जातिभेदः स्यात्, the *Akb.* has वेदनासंज्ञावत्।

'अन्ये पुनराहुः' इति **सौत्रान्तिकाः**। 'वाक्संस्काराः' इति वाक्समुत्थापका इत्यर्थः।··· एतस्यां कल्पनायां समुदायरूपा वितर्कविचाराः पर्यायभाविनश्च भवन्ति, चित्तचैत्तकलापस्य वाक्समुत्थापकत्वात्। कथं पुनरनयोरेकत्र चित्ते योग इत्युक्तम्। अतो **वैभाषिक** आह। 'यदि चैकत्र चित्तेऽन्यो धर्म औदारिक' इति विस्तरः।···न मद्वधिमात्रतया जातिभेदो व्यक्तो भवतीत्यर्थः। *Sakv.* p. 139.

"वितर्क्य विचार्य वाचं भाषते नावितर्क्याविचार्य" इति ।[१] तत्र य औदार्यास्ते वितर्काः । ये सूक्ष्मास्ते विचाराः । यदि चैकत्र चित्तेऽन्यो धर्म औदारिकोऽन्यः सूक्ष्मः कोऽत्र विरोध इति ?[२] न विरोधो यदि जातिभे(7)दः स्यात् । एकस्यान्तु जातौ मृद्वधिमात्रता युगपन्न संभवति । जातिभेदोऽप्यस्ति स तर्हि वक्तव्यः । दुर्वचो ह्यसौ । अतो मृद्वधिमात्रतया व्यज्यते । नैवं व्यक्तो भवति । प्रत्येकं जातीनां मृद्वधिमात्रत्वात् ।

तदिदमन्धविलासिनीकटाक्षगुणोत्कीर्तण(न)कल्पं चोद्यमारभ्यते । यदनवबुध्य तल्लक्षणं चोद्यवि(8)धिः मिथ्या प्रतार्य(य)ते । तयोर्हि यथोक्तलक्षणयोरेकस्मिश्चेतसि सद्भावमात्रं प्रतिज्ञायते न तु युगपद् वृत्त्युद्रेकतालाभः ।[3] यथा विद्याविद्ययोः संशयनिर्णययोश्चेति तूष्णीमास्व । मा विद्वद्भिरवजीहसः स्वमात्मानम् ॥

सा पुनर्दृष्टिस्त्रिप्रकारा, मिथ्यादृष्ट्याद्या वेदितव्याः ।

क्रोधाद्यैस्त्वधिकं वदेत् ॥

---

[१] Cf. पुब्बे खो, आवुसो विसाख, वितक्केत्वा विचारेत्वा वाचं भिन्दति, तस्मा वितक्कविचारा वचीसंखारो । *M. sutta* 44.

[२] The Sthaviravādin takes this standpoint as is evident from the following :—सन्ते पि च नेसं कत्थचि अवियोगे ओळारिकट्ठेन च पुब्बंगमट्ठेन च घण्टाभिघातो विय अभिनिरोपनट्ठेन चेतसो पठमाभिनिपातो वितक्को । सुखुमट्ठेन अनुमज्जनसभावट्ठेन घण्टानुरवो विय अनुप्पबन्धो विचारो । विप्फारवा चेत्थ वितक्को, पठमुप्पत्तिकाले परिप्फन्दभूतो चित्तस्स । आकासे उप्पतितुकामस्स पक्खिनो पक्खविक्खेपो विय ।···सन्तवुत्ति विचारो नातिपरिप्फन्दनभावो चित्तस्स, आकासे उप्पतितस्स पक्खिनो पक्खप्पसारणं विय······तथा मण्डलं करोन्तस्स मज्झे सन्निरुज्झित्वा ठितकण्टको विय अभिनिरोपनो वितक्को, बहिपरिब्भमनकण्टको विय अनुमज्जनो विचारो । *DhsA*. I. 200 and 201.

[३] This view agrees quite well with the view of Saṁghabhadra as quoted and criticised by Yaśomitra : अत्र **संघभद्र आचार्य** आह—**'एकत्र च चित्ते औदारिकसूक्ष्मते भवतः। न च विरोधः प्रभावकालान्यत्वात् । यदा हि चित्तचैत्तकलापे वितर्क उद्भूतवृत्तिर्भवति तदा चित्तमौदारिकं भवति । यदा विचारस्तदा सूक्ष्मम् ।** रागमोहचरितव्यपदेशवत् । रागमोहयौगपद्येऽपि हि तयोरन्यतरोद्भूतवृत्तियोगाद् रागचरितो मोहचरित इति वा व्यपदिश्यते । तद्वदिहापि द्रष्टव्यम्' इति ।

अत्र वयं ब्रूमः । भवति कस्मिंश्चित्कलापे कस्यचिद्धर्मस्योद्भूतवृत्तित्वम् । किंत्वनयोर्न लक्षणं विवेचितमिति न किञ्चिदेतत् । ननु च चित्तौदारिकतासुक्ष्मतालक्षणौ वितर्कविचारावुक्तौ । सत्यमुक्तौ । प्रत्येकं तु जातीनामौदारिकसूक्ष्मते इति तावौदारिकसूक्ष्मतालक्षणौ भवितुमर्हतो यथोक्तमिति नैतदस्मानाराधयति । *Sakv.* p. 140.

(१)क्रोधाद्यैस्तूपक्लेशैरधिकं भवति। स च क्रोधादिरुपक्लेशोऽधिकः। क्लेशैश्च संप्रयुक्तं रागप्रतिघमानविचिकित्साभिश्च युक्तं चित्तं तेन च क्लेशाधिकं भवतीत्येकविंशतिर्भवन्ति ॥

[124] सर्वत्र संभवान्मिद्धं[१] यत्र स्यात्तत्र निर्दिशेत् ।
तद्वदेव च कौकृत्यमधिकं गणयेत्क्वचित् ॥[२]

यत्र मिद्धं तत्र त[II. A, 7. Fol. 45b.]देवाधिकं गणयेत् । यत्रापि तदेवाधिकमिति य एष कामधातौ चैत्तानां नियम उ[क्तस्त]तः ॥

[125] साशुभं मिद्धकौकृत्यं रूपधातौ न विद्यते ।
ध्यानान्तरे वितर्कश्च विचारश्चापि नोपरि ॥[3]

[४] न किञ्चिदकुशलं मिद्धं कौकृत्यं च प्रथमध्यानादौ विद्यते। तेन तत्र प्रतिघशाठ्यमदमायावर्ज्याश्च क्रोधादयः, आह्रीक्या(2)नपत्राप्ये च न सन्ति। य एव प्रथमे ध्याने सन्ति त एव 'ध्यानान्तरे', 'वितर्कश्च' न विद्यते। पूर्वोक्ताश्च न सन्तीति 'च'शब्दात्। 'विचारश्चापि नोपरि।' ध्यानान्तरात्तूपरि विचारश्चापि नास्ति पूर्वोक्ताश्च। 'च'शब्दात् माया शाठ्यं च नास्तीति गम्यते।

ब्रह्मनो(णो) हि यावच्छाठ्यं पठ्यते, पर्षत्संबन्धात्। स हि स्वस्यां पर्षदि अश्वजिता भिक्षुणा प्रश्नं पृष्टः "कुत्र तानि चत्वारि महाभूतान्यपरिशेषं निरुध्यन्ते" इत्यप्रजानन् क्षेपमकार्षीत्—"अहमस्मि ब्रह्मा महाब्रह्मा ईश्वरः कर्त्ता निर्माता स्रष्टा सृजः पितृभूतो भावानाम्" इति।[५] गतमिदम् ॥[६]

---

[१] On *middha*, v. supra, p. 74, n. 1.

[२] मिद्धं सर्वाविरोधित्वाद्यत्र स्यादधिकं हि तत्। *Ak*. II. 30cd.

[3] कौकृत्यमिद्धाकुशलान्याद्ये ध्याने न सन्त्यतः।
ध्यानान्तरे वितर्कश्च विचारश्चाप्यतः परम् ॥ *Ak*. II. 31.

[४] The *Adv. kārikā* 125 is almost identical with *Akb*. II. 31.

[५] Cf. कत्थ नु खो आवुसो इमे चत्तारो महाभूता अपरिसेसा निरुज्झन्ति सेय्यथीदं पठवीधातु—पे—वायोधातू ति?" एवं वुत्ते केवट्ट, सो महाब्रह्मा तं भिक्खुं एतदवोच "अहमस्मि भिक्खु ब्रह्मा महाब्रह्मा अभिभू अनभिभूतो अञ्ञदत्थुदसो वसवत्ती इस्सरो कत्ता निम्माता सेट्ठो सञ्जिता वसी पिता भूतभव्यानं"ति।" *Dīgha*. XI. 81.

[६] After this the *Akb*. (II. 32 and 33) deals with the following topics, which are not discussd in *Adv*:—

(१) आह्रीक्यस्यानपत्राप्यस्य किं नानाकरणम्।
(२) मानमदयोः किं नानाकरणम्।

इदं वक्तव्यम् । संप्रयुक्ताः संस्काराः कस्मादुच्यन्ते ? तदारभ्यते ।

[126] संप्रयुक्तः संस्कारः समता यस्य पञ्चधा ।
विप्रयुक्तश्च बोद्धव्यः(6)समता यस्य नास्त्यसौ ॥[१]

पञ्चभिः समताभिः संप्रयुक्ताः संप्रयुक्ताः । ताः पुनराश्रयालम्बनाकारकालद्रव्यसमताख्याः । "यथैव ह्येकं चित्तमेवं चैत्ता अप्येकैकाः" इति विस्तरः ।[२] यस्य पुण(न)रेताः समता न विद्यन्ते स विप्रयुक्त इति ॥

चोदकः—कश्चिद्रूपं तर्हि विप्रयुक्तं[3] प्राप्नोति, असंस्कृतं चेति ?(5) संप्रत्युच्यते ।

[127] विशिष्टाणा(ना)मसद्भावात्प्रसंगो नास्ति रूपिणाम् ।
संस्कारग्रहणाच्चैव खादीनां ण(न) प्रसज्यते ॥

विशिष्टेन खलु निरोगेण(नियोगेन) रूपिषु संज्ञा सन्निविशन्त इति तेष्वप्रसंगः । संस्कारग्रहणाच्च खादिषु विप्रयुक्तसंज्ञा न प्रवर्तत इति सिद्धम् ॥

के पुनस्ते विप्रयुक्ताः संस्काराः ? कियन्तो वेति ? नहि व(6)यमेतेषां स्वभावमुपलभामहे । नापि कृत्यम् । नचैते धर्मा लोके प्रसिद्धा नापि बुद्धवचने । न वेदादिषु शास्त्रेष्विति । तदत्रोपव्याह्नीयते—

[128] प्राप्त्यादयस्तु संस्कारा विप्रयुक्तास्त्रयोदश ।[४]
आप्तोक्तिस्वक्रियालिङ्गा लिङ्गमेषां गदिष्यते ॥

---

[१] Cf. चित्तं मनोऽथ विज्ञानमेकार्थं चित्तचैतसाः ।
साश्रयालम्बनाकाराः संप्रयुक्ताश्च पञ्चधा ॥ *Ak.* II. 34.

[२] Cf.……पञ्चभिः समताप्रकारैराश्रयालम्बनाकारकालद्रव्यसमताभिः । केयं समता । यथैव ह्येकं चित्तमेवं चैत्ता अप्येकैका इति । *Akb.* II. 34 d.

[3] चित्तविप्रयुक्ता इति चित्तग्रहणं चित्तसमानजातीयप्रदर्शनार्थम् । चित्तमिव चित्तेन च विप्रयुक्ता इत्यर्थः । किं च तेषां चित्तेन समानजातीयत्वम् । यदरूपिणोऽमी भवन्ति । रूपित्वादेव हि विप्रयुक्तत्वेऽपि रूपं न विप्रयुक्तत्वे नाम लभते । यद्वामीषां नामरूपमिति नामत्वम् । तत्तेषां चित्तेन समानजातीयत्वम् । चैत्ता अपि चित्तेन तुल्यजातीयाः । ते तु चित्तेन सहालम्बने संप्रयुक्ताः । तद्विशेषणार्थं विप्रयुक्तग्रहणम् । असंस्कृतमपि तत्समानजातीयमनालम्बनत्वेनेति तत्परिहारार्थं संस्कारग्रहणम् । *Sakv.* p. 142.

[४] The thirteen *Viprayukta-saṁskāras* are : प्राप्तिः, अप्राप्तिः,सभागता, आसंज्ञिकम्, निरोधसमापत्तिः, जीवितेन्द्रियम्, जातिः, जरा, स्थितिः, अनित्यता, नामकायः, पदकायः, व्यञ्जनकायः ।

यत्तावत् स्वभावक्रियाभावादिति । तदत्रोभयमभिधायिष्य(6)ते । यदपि बुद्धवचने न पठ्यन्त इति । तत्राप्याप्तवचनं सार्वज्ञं व्याहरिष्यते । यत्तु लोके न वेदादिषु पठ्यन्त इति तच्चोद्यम् । ये खलु सर्वज्ञविषया धर्माः प्रतिसंविल्लाभिनां बुद्धिवृत्तिविषयमायान्त्यार्यमैत्रेयस्थविरवसुमित्राचार्याश्वघोषप्रमुखा(नां)णां च बोधिसत्त्वानां बुद्धिप्रसादविधायिन(7)स्तेजाल्पानां स्तनन्धयबुद्धीनामभिधर्मपरोक्षमतिवृत्तीनां च कथं सान्धकारेषु मनस्सु गोचरतामायान्तीति ॥

तत्र तावत्

[129 ab.] प्राप्तिः समन्वितिर्लब्धि[१]र्धर्मवत्ता व्यवस्थितिः ।

Cf. **विप्रयुक्तास्तु संस्काराः प्राप्त्यप्राप्ती सभागता ।**
आसंज्ञिकसमापत्ती जीवितं लक्षणान्यपि ॥
नामकायादयश्चेति । *Ak.* II. 35 and 36 a.

Also cf. कतमे चित्तविप्रयुक्ताः संस्काराः । प्राप्तिः जातिः स्थितिः जरा अनित्यता असंज्ञिसमापत्तिः आसंज्ञिकायतनं विविधा देशप्राप्तिः वस्तुप्राप्तिः नामकायः पदकायः व्यञ्जनकायः पृथग्जनत्वम् इत्येवं विविधा धर्माश्चित्तविप्रयुक्ताः संस्काराः । *Aam.* p. 61.

चित्तविप्रयुक्ताः संस्काराः कतमे । प्राप्तिरसंज्ञिसमापत्तिर्निरोधसमापत्तिरासंज्ञिकं जीवितेन्द्रियं निकायसभागता जातिर्जरास्थितिरनित्यता नामकायाः पदकायाः व्यञ्जनकायाः पृथग्जनत्वं प्रवृत्तिः प्रतिनियमो योगः जवोऽनुक्रमः कालो देशः संख्या सामग्री च । *Asm.* p. 10.

For the different lists of the *Chitta-viprayukta-dharmas*, see

(1) W. M. Mc Govern : *A Mannual of Buddhist Philosophy*, vol. I. pp. 161-162,
(2) Th. Stcherbatsky : *The Central Conception of Buddhism*, pp. 105-106,
(3) *LVPAk.* II. p. 178.
and (4) N. Aiyaswāmi Śastri : *Ālambanaparīkshā*, (Appendix) p. 114.

[१] Cf. **प्राप्तिर्लाभः समन्वयः ।**
प्राप्त्यप्राप्ती स्वसन्तानपतितानां निरोधयोः ॥

……प्राप्तिर्नामास्ति किञ्चिद्भावान्तरमिति कुत एतत् ? आह **सूत्रात् । सूत्रे** ह्युक्तं—"स एषां दशानामशैक्षाणां धर्माणामुत्पादात् प्रतिलम्भात् समन्वागमादार्यो भवति पञ्चाङ्गविप्रहीणः" इति विस्तरः ।…तस्माद्बीजमेवात्रानपोद्धृतमनुपहतपरिपृष्ठं च वशित्वकाले समन्वागमाख्यां लभते नान्यत् द्रव्यम् ।…**एवमयं समन्वागमः सर्वथा प्रज्ञप्तिधर्मो न तु द्रव्यधर्मः ।** तस्य च प्रतिषेधोऽसमन्वागम इति । **द्रव्यमेव तु वैभाषिकाः** उभयं वर्णयन्ति । किं कारणम् ? एष हि नः सिद्धान्त इति । *Akb.* II. 36 bcd.

Also Cf. प्राप्तिः कतमा । कुशलाकुशलानां धर्माणामाचयापचये प्राप्तिः प्रतिलम्भः **समन्वागम** इति प्रज्ञप्तिः । *Asm.* p.10.

प्राप्तिर्णा(र्ना)म समन्वागमो लाभ इति पर्यायः[१]। सर्वथा भावाञ्छब्दैरेव शब्दानाचष्टे। यथैव खलु प्राप्तिरित्येतच्छ(6)ब्दगडुमात्रं श्रूयते तथैव समन्वागमो लाभ इत्येतदपि पदद्वयं वाग्वस्तुमात्रमिति न पर्यायनाम्ना लक्षणमुद्योतितं भवति[२]। तस्माद्व्यभिचारि तत्प्रसाद(ध)कं लिङ्गमुच्यताम्। इमे ब्रूमः। श्रोत(त्र)मवधत्स्व मनश्चैकाग्रतायां सन्नियुक्त्वा। 'धर्मवत्ता व्यवस्थितिः।'[३] धर्माः खलु त्रिधाः कुश[लाः]···[Fol. 46 lost][४]······

······[II B, 8. Fol. 47 a.](1) **रूपेऽपि कुशलया विज्ञप्त्या वर्तमानया यावद्विज्ञापयति, अतीतया च समन्वागतः।**

[130 cd.] श्रुतचिन्तामयानां च समापत्तिद्वयस्य च।

श्रुतचिन्तामयानामपि। सहजा पश्चाद्भवति। द्वयोश्चाश्चि(चि)त्तसमापत्त्योस्सह पश्चाद्भवतीति।

[131] नि[ः]क्लेशसंस्कृतापूर्व(र्वं) शुभानां तु रजस्वताम्।
आदिलाभे सह प्राक्च तदूर्ध्वं वा त्रि(2)धेष्यते॥

अनास्रवानां(णां) च स्कन्धानां, अनुचितानां च कुशलसास्रवानां(णां) न पूर्वजा। एषामेव यथोक्तानां 'तदूर्ध्वं तु तृ(त्रि)धेष्यते।' यदा तेन संमुखीभूता तदा द्विधैवेति वर्तते॥

---

[१] Though the Pāli tradition does not recognise the *Prāpti* as an element, the use of such terms as *samannāgama* and *lābha* indicate the knowledge of such force as *Prāpti*. Vide *Kv*.IX. 12.

The *KvA.* refers to the two *paññattis*, viz., *samannāgata-paññatti* and *paṭilābha-paññatti* :—इदानि अतीतानागतेहि समन्नागतकथा नाम होति। तत्थ समन्नागतपञ्ञत्ति पटिलाभ-पञ्ञत्तीति द्वे पञ्ञत्तियो वेदितब्बा। तासु पच्चुप्पन्नधम्मसमङ्गी समन्नागतोति वुच्चति।···पटिविज्झित्वा अपरिहीनताय पन लाभीति। *KvA.* IX. 12.

[२] Cf. कथमयं लक्षणनिर्देशः। न हि भेदविवक्षायामपि पर्यायवचनेन लक्षणनिर्देशः कल्पते। प्राप्तिः कतमा। यः प्रतिलम्भो यः समन्वागम इति। पर्यायवचनमपि कदाचित् लक्षणाय कल्पते। अनलो जातवेदा अग्निरिति। *Sakv*. p. 143.

[३] This definition of *Prāpti* agrees quite well with Saṁghabhadra's definition as quoted by Yaśomitra:—इदमस्येति ज्ञानचिह्नं प्रतिलब्धधर्माविप्रणाशकारणं च प्राप्तिरित्याचार्यसंघभद्रः। *Sakv*. p. 148.

[४] This lost folio must have contained a very valuable discussion on *prāpti-aprāpti* and also an examination of the arguments forwarded by the Kośakāra. V. infra, *Adv. kārikā* 199.

[132] क्लिष्टाणां कुशलानां च तदन्येषां त्रिधा मता ।

क्लिष्टाणां च स्कन्धानां त्रैयध्विकी प्राप्तिः । 'कुशलानां च तदन्येषां' तेभ्योऽनास्रवे(3)भ्यस्तेभ्यश्चानुचितेभ्यः कुशलसास्रवेभ्योऽन्येषां कुशलसास्रवानां(णां) त्रैयध्विकयेव ।

निवृताव्याकृता ज्ञाननिर्माणमनसां तथा ॥

त्रैयध्विकीति वर्तते ॥

[133] निर्वाणस्यादितो लाभे नित्यस्यान्यस्य सर्वदा ।

निर्वाणस्य तत्प्रथमतो लाभे द्वैयध्विकयेव । अनागतवर्तमानालब्धस्यातीताऽपि । 'नित्यस्यान्यस्य सर्वदा ।'

अजा(4)तवर्तमाना च

अप्रतिसंख्यानिरोधस्यानागतवर्तमानैव नित्यम् ।

कदाचित्तु त्रिधेष्यते ॥

येन लब्धस्तस्य त्रैयध्विकीत्युक्तमेतत् ।

व्याख्याते प्राप्त्यप्राप्ती ॥[१]

---

[१] Cf. सा किलैषा प्राप्तिः

त्रैयध्विकानां त्रिविधा शुभादीनां शुभादिका ।
स्वधातुका तदाप्तानामनाप्तानां चतुर्विधा ॥
त्रिधा न शैक्षाऽशैक्षाणामहेयानां द्विधा मता ।
अव्याकृताप्तिः सहजाऽभिज्ञानैर्माणिकादृते ॥
निवृतस्य च रूपस्य कामे रूपस्य नाग्रजा ।

किमप्राप्तेरपि प्राप्तिवत्प्रकारभेदः ? न ।

अक्लिष्टाव्याकृताऽप्राप्तिः सातीताजातयोस्त्रिधा ॥
कामाद्याप्तामलानां च मार्गस्याप्राप्तिरिष्यते ।
पृथग्जनत्वं तत्प्राप्तिर्भूसंचाराद्विहीयते ॥ *Ak*. II. 37-40.

The Kośakāra discusses one more point :—किं पुनरप्राप्तिप्राप्त्योरपि प्राप्त्यप्राप्ती भवतः ? उभयोरप्युभयं भवतीत्याहु :। ननु चैवमनवस्थाप्रसंगः ? नानवस्थाप्रसंगः । परस्परसमन्वागमात् ।···एवमुत्तरोत्तरवृद्धिप्रसंगेनैताः प्राप्तयो विसर्प्यन्त्यः सर्वेषामतीतानागतानां क्लेशोपक्लेशक्षणानामुपपत्तिलाभिकानां च कुशलक्षणानां···अनन्ता एकस्य प्राणिनः क्षणे क्षणे उपजायन्ते । इत्यनन्तद्रव्याः प्रतिसन्तानमात्मभावक्षणाः सत्त्वानां भवन्ति ।

सभागता वक्तव्या । केयं सभागता नाम ? नहीह प्रवचने तीर्थ्यपरिकल्पितसामान्यविशेषपदार्थगन्धोऽप्यस्ति । तत्केयं तदभ्यासगतेति ? तदिदं (5)प्रतार्य(य)ते ।

[134] एकार्थरुचिहेतुर्यः सत्त्वानां स सभागता ।[१]

[२]सभागता नाम द्रव्यम् । सत्त्वानामेकार्थरुचिः सादृश्यहेतुभूतम् । निकायसभाग इत्यस्य शास्त्रसंज्ञा ।[३] सा पुनरभिन्ना भिन्ना च ।[४] अभिन्ना सर्वसत्वानां सत्त्वसभागता । सा प्रतिसत्त्वं सर्वेष्वात्मस्नेहाहाररतिसाम्यात् । भिन्ना पुनस्तेषामेव स(6)त्त्वानां धातुभूमिगतियोनिजातिस्त्रीपुरुषोपासकभिक्षुशैक्षाशैक्षादीनामेकार्थरुचित्वभेदप्रतिनियमहेतुः । तस्यां खल्वसत्यां सर्वार्याणा(ना)र्यलोकव्यवहारसंकरदोषः प्रसज्येत । तस्यां तु सत्यामेष दोषो न भवतीत्यस्ति सभागता नाम धर्मः, 'एकार्थरुचिहेतुः' इति ।[५]

अत्युत्सवो बतायं प्राप्तीनां वर्तते । केवलं तु अप्रतिघातिन्यो यतोऽवकाशमाकाशे लभन्ते । इतरथा ह्याकाशेऽप्यवकाशो न स्यात् द्वितीयस्य प्राणिनः । *Akb.* II. 40 d.

For the *Viprayuktatva* of *Prāpti*, see an allied controversy :—

"न वत्तब्बं पत्ति असङ्खता ति" ?

आमन्ता ।

पत्ति रूपं वेदना सञ्ञा सङ्खारा विञ्ञाणं ति ?

न हेवं वत्तब्बे ।

तेन हि पत्ति असङ्खता ति । *Kv.* XIX. 4.

इदानि पत्तिकथा नाम होति । तत्थ यं यं पटिलब्भति तस्स तस्स पटिलाभो पत्ति नाम । सा च असङ्खता ति येसं लद्धि, सेय्यथा पि **पुब्बसेलियानञ्ञे व ।···न हि पत्ति नाम कोचि धम्मो अत्थि···***KvA.* XIX. 4.

[१] Cf. **सभागता सत्त्वसाम्यम् ।** *Ak.* II. 41 a.

[२] Cf. **सभागता नाम द्रव्यम् ।** सत्त्वानां सादृश्यं निकायसभाग इत्यस्याः शास्त्रे संज्ञा । सा पुनरभिन्ना भिन्ना च । अभिन्ना सर्वसत्त्वानां सत्त्वसभागता । प्रतिसत्त्वं सर्वेषु भावात् । भिन्ना पुनस्तेषामेव सत्त्वानां धातु···अशैक्ष्यादिभेदेन प्रतिनियता धर्मसभागता । पुनः स्कन्धायतनधातुतः यदि सत्त्वसभागता द्रव्यमविशिष्टं न स्यात्, अन्योन्यविशेषभिन्नेषु सत्त्वेषु 'सत्त्वसत्त्व' इत्यभेदेन बुद्धिर्न स्यात् **प्रज्ञप्तिश्च** । एवं स्कन्धादिबुद्धि**प्रज्ञप्तयो**ऽपि योज्याः । *Akb.* II. 41 a.

[३] 'निकायसभाग इत्यस्याः शास्त्रे संज्ञा' इति **ज्ञानप्रस्थानादिके शास्त्रे** निकायसभाग इत्यनया संज्ञयायं चित्तविप्रयुक्तो निर्दिश्यते । *Sakv.* p. 157.

[४] 'सा पुनरभिन्ना भिन्ना च' इति ।···नहि सा यथा **वैशेषिकाणा**मेका नित्या चेति । *Sakv.* p. 157.

[५] Compare with Saṁghabhadra's definition as given by Yaśomitra: शरीरेन्द्रियसंस्थानचेष्टाहारादिसाभाग्यकारणम्, अन्योन्याभिरभिसम्बन्धनिमित्तं च सभागतेत्या**चार्यसंघभद्रः** । *Sakv.* p. 159.

[१]स्याच्च्यवेतोपप(7)द्येत न च स्व[स]भागतां[२] वजह्यात्, न [च] प्रतिलभेतेति ? चतुष्कोटिकः । प्रथमा कोटिः—यतश्च्यवते तत्रैवोप[प]द्यमानः । द्वितीया—नियाममवक्रामत्, स हि पृथग्जनसभागतां विजहात्यार्यसभागतां प्रतिलभते । तृतीया—गतिसंचारात् । चतुर्थी—एतानाकारान् स्थापयित्वा ।[१]

अथ पृथग्जण(न)त्वस्यास्याश्च(8) कः प्रतिविशेषः ? पृथग्जनसभागता खलूक्तरूपा । पृथग्जनत्वं[३] तु सर्वानर्थकरभूतमिति सुमहांस्तद्विशेषः ।[४] आप्तवचनेनापि तदन्यत्वसिद्धिः । उक्तं हि भगवता—"सचेदित्थत्वमागच्छति मनुष्यानां(णां) सभागतां प्रतिलभते" इति ।[५] न चैवं पृथग्जनत्वं प्रतिलभ्यते वा त्यज्यते वा ।

(9)सिद्धा सभागता । कोशकारः पुनस्तां वैशेषिकपरिकल्पितजातिपदार्थेण(न) समीकुर्वन् व्यक्तं पायसवायसयोर्वर्णसाधर्म्यं पश्यतीति ॥[६]

[१–१] This passage is identical with *Akb.* II. 41 a.

[२] सत्त्वसभागतां in *Akb. ibid.*—'सत्त्वसभागताम्' इति । सत्त्वानां सभागता सत्त्वसभागता मनुष्यत्वादिलक्षणा । सत्त्वग्रहणं हि धर्मविशेषणार्थम् । सत्त्वसभागता ह्यत्र **चतुष्कोटिके** विवक्षिता न धर्मसभागतेति । *Sakv.* p. 157.

[३] Cf. **पृथग्जनत्वम्**

"पृथग्जनत्वं कतमत् । आर्यधर्माणामलाभः" इति **शास्त्रपाठः** । अलाभश्च नामाप्राप्तिः ।···दुःखे धर्मज्ञानक्षान्तितत्सहभुवामलाभ **इत्यपरे** ।···**एवं तु साधु यथा सौत्रान्तिकानाम्**—"अनुत्पन्नार्यसन्ततिः पृथग्जनत्वम्" इति । *Akb.* II. 40 c.

Also cf. पृथग्जनत्वं कतमत् । आर्यधर्माणामप्रतिलाभे पृथग्जनत्वमिति **प्रज्ञप्तिः** । *Asm.* p. 11.

[४] This seems to be a rejoinder to the Kośakāra : **यदि पृथग्जनसभागता नाम द्रव्यमस्ति किं पुनः पृथग्जनत्वेन** । नहि मनुष्यसभागताया अन्यन्मनुष्यत्वं कल्प्यते । नैव च लोकः सभागतां पश्यत्यरूपिणीत्वात्, न चैनां प्रज्ञया परिच्छिनत्ति । प्रतिपद्यते च सत्त्वानां जात्यभेदमिति सत्या अपि तस्याः कथं तत्र व्यापारः । अपि चासत्त्वसभागतापि किं नेष्यते ।··· *Akb.* II. 41 a.

[५] V. infra, *Adv. kārikā* 204 cd. For other references, see *LVPAk.* II. p. 198. n. 1.

[६] Cf. **वैशेषिका**श्चैवं द्योतिता भवन्ति । तेषामपि ह्येष सिद्धान्तः । सामान्यपदार्थो नामास्ति यतः समानप्रत्ययोत्पत्तिरतुल्यप्रकारेष्वपीति । अयं तु तेषां विशेषः । स एकोऽप्यनेकस्मिन् वर्तते । यदि द्योतिता यदि न द्योतिता । अस्त्येषा तु सभागता **सूत्रे** वचनादिति **वैभाषिकाः** । उक्तं हि **भगवता** "स चेदित्थत्वमागच्छति मनुष्याणां सभागताम्" इति । **उक्तमेतन्न तूक्तं द्रव्यान्तरमिति । का तर्हि सा । त एव हि तथाभूताः संस्कारा येषु मनुष्यादिप्रज्ञप्तिः शाल्यादिषु सभागतावत्** । तत्त्वेतन्न वर्णयन्ति । *Akb.* II. 41 a.

अथ किमिदमासंज्ञिकं नाम ? तदपदिश्यते ।

आसंज्ञिकं विपाको यच्चित्तोपच्छेद्यसंज्ञिषु ॥[१]

[२]असंज्ञिसत्त्वेषु देवेषूपपन्नानां यच्चित्तोपच्छे[II. A, 8. Fol. 47 b.](1)दि धर्मान्तरं विप्रयुक्तं विपाकजमुत्पद्यते तदासंज्ञिकं नाम। येन तत्रोपपन्नानां चित्तमनागत्वे(ते)ऽध्वनि कालान्तरं सन्निरुध्यते, नोतपत्तुं लभते। तत्पुनरेकान्तेन विपाकजस्वभावम्। कस्य विपाकः ? असंज्ञिसमापत्तेः पूरकस्य कर्मणः। केषु पु[नस्तत्] ? देवनिकायेषु भवति। तदाह—"असंज्ञिषु। असंज्ञिसत्त्वा(2) नाम देवा बृहत्फलदेवनिकायसंगृहीता ध्यानान्तरिकावत्।"3 किं पुनस्ते नैव कदाचित् संज्ञिनो भवन्ति ? भवन्त्युत्पत्तिकाले च्युतिकाले च। "प्रकृष्टमपि कालं [स्थित्वा सह]संज्ञोत्पादात्तेषां सत्त्वानां तस्मात् स्थानाच्च्युतिर्भवति" इति सूत्रपाठः।[४] ते च ततो दीर्घस्वप्नव्युत्थिता इव च्युत्वा कामधातावुपपद्यन्ते, नान्यत्र। तदुप(3)पन्नानामवश्यं कामावचराऽपरपर्यायवेदनीयकर्मसद्भावात्। यथोत्तरकौरवानां(णां) देवोपपत्तिवेदनीयं कर्मेति ॥[२]

This view of Kośakāra is identical with the Yogāchāra view :—**निकाय-सभागः कतमः ?** तेषां तेषां सत्त्वानां तस्मिंस्तस्मिन् सत्त्वनिकाये आत्मभावसदृशतायां निकायसभाग इति **प्रज्ञप्तिः।** *Asm.* p. 11.

[१] Cf. **आसंज्ञिकमसंज्ञिषु ।**
निरोधश्चित्तचैत्तानां विपाकस्ते बृहत्फलाः ॥ *Ak.* 41. bcd. See *Tvb.* 16.

[२] Cf. असंज्ञिसत्त्वेषु देवेषूपपन्नानां यश्चित्तचैत्तानां निरोधस्तदासंज्ञिकं **नाम द्रव्यं** येन चित्तचैत्ता अनागतेऽध्वनि कालान्तरं सन्निरुध्यन्ते नोत्पत्तुं लभन्ते। नदीतोयसन्निरोधवत्। तत्पुनरेकान्तेन विपाकः। कस्य विपाकः। असंज्ञिसमापत्तेः। कतमे ते सत्त्वा येष्वसंज्ञिसत्त्वाः ? **ते बृहत्फलाः ।**

बृहत्फला नाम देवा येषां केचिदसंज्ञिसत्त्वाः प्रदेशे भवन्ति ध्यानान्तरिकावत्। किं पुनस्तेनैव...ditto...नान्यत्र। पूर्वसमापत्तिसंस्कारपरिक्षयात् अपूर्वानुपचयाच्च **क्षिप्ता इव क्षीणवेगा इषवः पृथिवीं पतन्ति।** येन च तत्रोपपत्तव्यं तस्यावश्यं कामावचरं कर्मापरपर्यायवेदनीयं भवति। यथोत्तरकौरवाणां देवोपपत्तिवेदनीयम्। *Akb.* II. 41. cd.

Also cf.…असञ्ञीसु निब्बत्तन्ति। चित्तमस्स चुतिचित्तनिरोधेन इधेव निवत्तति; रूपक्खन्धमत्तामेव तत्थ पातुभवति। ते तत्थ यथा नाम **जियावेगक्खित्तो सरो यत्तको जियावेगो तत्तकमेव आकासे गच्छति, एवमेव** झानवेगक्खित्ता उपज्जित्वा यत्तको झानवेगो तत्तकमेव कालं तिट्ठन्ति। झानवेगे पन परिहीणे तत्थ रूपक्खन्धो अन्तरधायति। इध पटिसन्धिसञ्ञा उप्पज्जति। *Dīgha A.* I. 2. 30.

[३] *Vibhāshā*, 194. 8.

[४] Cf. सन्ति भिक्खवे, असञ्ञसत्ता नाम देवा। सञ्ञुप्पादा च पन ते देवा तम्हा काया चवित्वा इत्थत्तं आगच्छन्ति। *Dīgha*. XXIV. 2. 20. Also cf. *Kv.* III. 11.

का पुनरसावसंज्ञिसमापत्तिरिति ? तदपदिश्यते—

[135] शुभाऽसंज्ञिसमापत्तिर्ध्यानेऽन्त्ये चित्तरोधिनी ।[१]

आसंज्ञिकमव्याकृतम् । विपाकफलत्वात् । इयं तु शुभाः(भा) । सा पुनरियं 'ध्यानेऽन्त्ये' (4)चतुर्थध्यानसंगृहीतेत्यर्थः । 'चित्तरोधिनी', यथैव तत्फलं चित्तसन्निरोधि तथैवेयमपि चित्तसंरोधिनी । चित्तग्रहणाच्च चैत्तानामनुक्तसिद्धिरादित्यास्तगमने किरणास्तगमनवत् ।

किमर्थं पुण(न)रेतां योगिणः(नः) समापद्यन्ते ?

निःसृतीच्छाप्रवृत्तित्वात्

ते हि निस्सरणसंज्ञापूर्वकेण मनस्कारेण तां समा(4)पद्यन्ते मोक्षकाङ्क्षया । सा पुनरियम्—

नार्यस्य

आर्या हि तामपायस्थानमिव मन्यन्ते । पृथग्जनास्तु केचिन्मोक्षस्थानमिति ।

किं पुण(न)रियमुपपत्त्या वा वैराग्येण वा लभ्यते ? नेत्याह । किं तर्हि ?

---

[१] Cf. तथाऽसंज्ञिसमापत्तिर्ध्यानेन्त्ये निःसृतीच्छया ।
शुभोपपद्यवेद्यैव नार्यस्यैकाध्विकाप्तये ॥ *Ak.* II. 42.

Also cf. **असंज्ञिस्समापत्तिः कतमा ?** शुभकृत्स्नवीतरागस्य निःसरणसंज्ञापूर्वकेण मनसिकारेणास्थावराणां चित्तचैतसिकानां धर्माणां निरोधे असंज्ञिसमापत्तिरिति **प्रज्ञप्तिः** । *Asm.* p. 10.

For various controversies on this *Samāpatti*, see *Kv.* xv. 7—10. The *KvA.* gives some very valuable information about this *Samāpatti* and shows the distinction between this and the next one, viz., the *Nirodhasamāpatti* : इदानि **सञ्ञावेदयितकथा** नाम होति । तत्थ **सञ्ञावेदयितनिरोधसमापत्ति नाम न कोचि धम्मो,** चतुन्नं पन खन्धानं निरोधो, इति सा नेव लोकिया, न लोकुत्तरा ।···

इदानि **असञ्ञसत्तूपिकाकथा** नाम होति । तत्थ सञ्ञाविरागवसेन पवत्तभावतो असञ्ञसमापत्ति पि निरोधसमापत्ति पि सञ्ञावेदयितनिरोधसमापत्ति नाम । इति द्वे सञ्ञावेदयितनिरोधसमापत्तियो लोकिया च लोकुत्तरा च । तत्थ लोकिया पुथुज्जनस्सेव असञ्ञसत्तूपिका होति लोकुत्तरा अरियानं । सा च नासञ्ञसत्तूपिका । इमं पन विभागं अकत्वा अविसेसेनेव सञ्ञावेदयितनिरोधसमापत्ति असञ्ञसत्तूपिकाति येसं लद्धि, सेय्यथापि **हेतुवादानं**। *KvA.* xv. 7 and 10.

आप्या प्रयोगतः ॥[१]

यत्नेन तामुत्पादयतीति ॥

[136] निरोधाख्या तु विज्ञेया विजिहीर्षोर्भवाग्रजा ।[१]

निरोधसमापत्ति(6)रपि चित्तचैत्तानां धर्माणां कञ्चित्कालमुत्पत्तिसन्निरोधिनी। सा पुनरियं विहारसंज्ञापूर्वकेन(ण) मनसिकारेण निर्वाणसदृशं सुखमनुभवितुकामैर्योगिभिः संमुखीक्रियते । 'भवाग्रजा' चेयं समापत्तिः ।

शुभाऽर्यस्य प्रयोगाप्या द्विवेद्याऽनियता मता ॥[२]

द्वयोः कालयोर्वेद्या 'द्विवेद्या'। उपपद्यवेद(7)नीया चापरपर्यायवेदनीया च। अनियतवेदनीया चेयम्। यो ह्येतामुत्पाद्य परिणि(नि)र्वाति स नास्या विपाकं प्रतिसंवेदयते। तस्या हि भवाग्रे चतुस्कन्धको विपाको विपच्यते। आर्यश्चैतामुत्पादयितुं शक्नोति नानार्यः। उच्छेदभीरुत्वाच्छाश्वतदृष्टिप्रहाना(णा)दार्यमार्गबलोत्पादनाच्च। आर्यस्या(8)पि चेयं प्रयोगलभ्या न वैराग्यलभ्येति ।[3]

अत्र पुनः कोशकारः प्रतिजानीते—"सचित्तिकेयं समापत्तिः" इति ।[४]

---

[१] Cf. **निरोधाख्या तथैवेयं विहारार्थं भवाग्रजा ।** *Ak*. II. 43 ab.

Also cf. **निरोधसमापत्तिः कतमा ?** आकिञ्चन्यायतनवीतरागस्य भवाग्रादुच्चलितस्य शान्तविहारसंज्ञापूर्वकेण मनसिकारेणास्थावराणां चित्तचैतसिकानां धर्माणां निरोधे **निरोधसमापत्तिरिति प्रज्ञप्तिः ।** *Asm*. p. 10.

[२] Cf. **शुभा द्विवेद्याऽनियता चार्यस्याप्या प्रयोगतः ।** *Ak*. II. 43 cd.

[3] The *Akb*. (II. 43—44) deals with this topic in great detail. In verse 44, it discusses a controversial point, viz., **किं भगवतोऽपि प्रायोगिकी ?** and gives the views of the Bahirdeśika and Kāśmīra Vaibhāshikas on this point. The *Adv*. is silent on this topic. The *Adv*. might have dealt with this topic in folio no. 48, which is lost.

[४] The whole controversy centres around a question : कथमिदानीं बहुकालनिरुद्धाच्चित्तात् पुनरपि चित्तं जायते । *Akb*. II. 44.

The Kośakāra gives following views :—(i) अतीतस्याप्यस्तित्वात् इष्यते **वैभाषिकैः** समनन्तरप्रत्ययत्वम् ।

(ii) **अपरे** पुनराहुः कथं तावदारूप्योपपन्नानां चिरनिरुद्धेऽपि रूपे पुनरपि रूपं जायते । चित्तादेव हि तज्जायते न रूपात् । एवं चित्तमप्यस्मादेव सेन्द्रियात्कायाज्जायते न चित्तात् । अन्योन्यबीजकं ह्येतदुभयं यदुत चित्तं च सेन्द्रियश्च काय इति **पूर्वाचार्याः ।**

(iii) भदन्तवसुमित्रस्त्वाह **परिपृच्छायां**—"यस्याचित्तिका समापत्तिस्तस्यैष दोषो मम तु सचित्तिका समापत्तिरिति" ।

“समापत्तिचित्तमेव हि तच्चित्तान्तरविरुद्धमुत्पद्यते। येन कालान्तरमन्यस्य चित्तस्याप्रवृत्तिमात्रं भवति। तद्विरुद्धाश्रयापादनात् साऽसौ समापत्तिरिति प्रज्ञाप्यते ।”[१]

(iv)**भदन्त घोषक** आह—“तदिदं नोपपद्यते । सति हि विज्ञाने त्रयाणां सन्निपातः स्पर्शः । स्पर्शप्रत्यया च वेदना संज्ञा चेतनेत्युक्तं भगवता । अतः संज्ञावेदनयोरप्यत्र निरोधो न स्यात् । अथापि स्यात् । यथा वेदनाप्रत्यया तृष्णेत्युक्तम् । सत्यामपि तु वेदनायामर्हतो न तृष्णोत्पत्तिरेवं सत्यपि स्पर्शे वेदनादयो न स्युरिति । तस्याविशेषत्वात् । अविद्यासंस्पर्शजं हि वेदितं प्रतीत्योत्पन्ना तृष्णेत्युक्तं न तु वेदनोत्पत्तौ स्पर्शो विशेषित इत्यसमानमेतत् ।···तस्मादचित्तिका निरोधसमापत्तिरिति **वैभाषिकाः ।** *Akb.* II. 44.

This view of Ghoshaka (the Vaibhāshika) is encountered by the Kośakāra :—कथमचित्तिकायाः समापत्तित्वम् । महाभूतसमतापादनात् । समापत्तिचित्तेन च तां समापद्यन्ते समागच्छन्तीति समापत्तिः । *Akb.* II. 44 cd.

‘कथमिदानीं बहुकालनिरुद्धात्’ इति विस्तरः । बहुकालनिरुद्धग्रहणं समनन्तरनिरासार्थम् । समनन्तरनिरुद्धादिदानीं कथं भवति । यदि समनन्तरनिरुद्धमस्तीत्यभ्युपगतम्, बहुकालनिरुद्धमप्यस्तीति किं नाभ्युपगम्यते इति **वैभाषिकाः ।** न समनन्तरनिरुद्धस्यास्तित्वं ब्रूमः, अपि तु वर्तमानं चित्तमात्मनोऽन्यचित्तहेतुभावं व्यवस्थाप्य निरुध्यते, अन्यच्चोत्पद्यते तुलादण्डनामोन्नामवत् । तच्च निरुद्धमपरं च चित्तमुत्पन्नं भवतीत्यनन्तरनिरुद्धाच्चित्ताच्चित्तान्तरमुत्पद्यत इत्युच्यते । वर्तमानसामीप्ये वर्तमानवदिति कृत्वा ।

‘अपरे पुनराहुः’ इति **सौत्रान्तिकाः ।**

···**‘संज्ञावेदनयोरप्यत्र निरोधो न स्यादिति’ भदवन्तवसुमित्रस्यैतं मतम् ।** सचित्तकत्वेऽपि तस्या निरोधसमापत्तेः संज्ञावेदनयोस्तत्र निरोध इति । तस्माद्भदन्त **घोषक** एवं प्रसंगं करोति···। *Sakv.* p. 167.

Yaśomitra gives three viewpoints regarding this controversy :—(i) तत्राचित्तकान्येव निरोधासंज्ञिसमापत्त्यासंज्ञिकानीति **वैभाषिकादयः ।** (ii) अपरिस्फुटमनोविज्ञानसचित्तकानीति **स्थविरवसुमित्रादयः ।** (iii) आलयविज्ञानसचित्तकानीति **योगाचाराः । इति सिद्धान्तभेदः ।** *Ibid.*

[१] Cf. किं पुनरेते समापत्ती द्रव्यतः स्त उताहो प्रज्ञप्तितः । द्रव्यत इत्याह । चित्तोत्पत्तिप्रतिवन्धनात् । **समापत्तिचित्तमेव हि तच्चित्तान्तरविरुद्धमुत्पद्यते येन कालान्तरं चित्तस्याप्रवृत्तिमात्रं भवति । तद्विरुद्धाश्रयापादनात् ।** **याऽसौ समापत्तिरिति प्रज्ञप्यते तच्चाप्रवृत्तिमात्रं** न पूर्वमासीन्न पश्चात् भवति व्युत्थितस्येति संस्कृताऽसौ समापत्तिः प्रज्ञप्यते । अथवा आश्रयस्यैव तथा समापादनं समापत्तिः । एवमासंज्ञिकमपि द्रष्टव्यम् । चित्तमेवासौ तत्र चित्तप्रवृत्तिविरुद्धं लभते तच्चाप्रवृत्तिमात्रमासंज्ञिकं प्रज्ञप्यत इति तदेतन्न वर्णयन्ति । *Akb.* II. 44 cd.

Also cf. समापत्तिद्वयमसंज्ञिसमापत्तिर्निरोधसमापत्तिश्च । तत्र···मनोविज्ञानस्य तत्संप्रयुक्तानां च चैत्तानां यो निरोधः सोऽत्रासंज्ञिसमापत्तिरित्युच्यते । निरुध्यते अनेनेति निरोधः । स पुनः ससंप्रयोगस्य मनोविज्ञानस्य समुदाचारनिरोधः । आश्रयस्यावस्थाविशेषः । स च

तदेतदबौद्धीयम् । कुतः ?

[137] (9)चेतश्चतुष्टयायोगादागमादुपपत्तितः ।
निर्वेदितमनोभावात्सिद्ध्यतीयमचित्तिका ॥

भवाग्रे खलु चत्वारि चित्तानि विद्यन्ते । विपाकजं निवृताव्याकृतं कुशलमुपपत्तिलाभिकं प्रायोगिकं च । तेभ्यश्चतुर्भ्यः कतरच्चित्तं यन्निरोधसमापन्नस्यान्यचित्तनिरोधीत्युच्यते ?

तत्र तावद्विपाकजं तत्रत्यां……[Fol. 48 lost]……[१]

"………[III B, 1. Fol. 49 a.] धर्मे प्रतिपत्त्येवाज्ञामाराधयति । नापि मरणकालसमये । भेदाच्च कायस्यातिक्रम्य देवान् कवडीकारभक्षानन्यतमस्मिन् दिव्ये मनोमये काय उपपद्यते । स तत्रोपपन्नः [अभीक्ष्णं] संज्ञावेदितनिरोधं समापद्यते च व्युत्तिष्ठते च । अस्ति चैतत्स्थानमिति यथाभूतं प्रजानाति" इति[२] ।

समापत्तिचित्तादनन्तरं चित्तान्तरोत्पत्तिविरुद्ध आश्रयः प्राप्यत इति समापत्तिरित्युच्यते । निरोधसमापत्तिः…ससंप्रयोगस्य मनोविज्ञानस्य क्लिष्टस्य च मनसो यो निरोधः । इयमप्यसंज्ञिसमापत्तिवदाश्रयस्यावस्थाविशेषे प्रज्ञप्यते ।…एवमासंज्ञिकादिषु मनोविज्ञाने निरुद्धे तदपगमे पुनः कुत उत्पद्यते । यत्तस्य कालक्रिया न भवति । तत्पुनरालयविज्ञानादेवोत्पद्यते । तद्धि सर्वविज्ञानबीजकमिति । *Tvb.* 16.

On this controversy, LVP. says : "Le Dārshṭāntika et le Vibhajyavādin soutiennent qu'une pensée subtile n'est pas interrompue dans le recueillement d'arrêt. 'Ils disent : 'Il n'y a pas d' êtres qui soient en même temps son pansée et sans *rūpa;* il n'y a pas, non plus de recueille qui soit sans pensée. Si le recueilli était sans pensée, l' organe vital serait coupé; on l'appellerait, non pas : installé dans le recueillement mais bien : mort." *LVPAk.* II. p. 212, n. 2.

[१] In this lost folio the *Adv.* had discussed this very controversial topic. In the corresponding portion, the *Akb.* (II. 44.) has discussed two topics; (१) अनयोः समापत्त्योर्बहुप्रकारो विशेषः । and (२) किमतोऽपि (निरोधसमापत्तितोऽपि) अस्ति परिहाणिः ?

The *Adv.* also might have discussed the first topic. The beginnig portion of the second topic is lost. It is continued in the next folio.

[२] The problem under discussion centres around a controversy about the possibility of falling *(Parihāṇi)* from the *nirodha-samāpatti :* **निरोधसमापत्तिः प्रथमतो मनुष्येषूत्पाद्यते पश्चाद्रूपधातौ परिहीणपूर्वैः । किमतोऽप्यस्ति परिहाणिः । अस्तीत्याह ।** अन्यथा हि **उदायिसूत्रं** विरुध्येत । इहायुष्मन्तो भिक्षुः……अस्ति चैतत्स्थानमिति यथाभूतं प्रजानाति" इति । अत्र हि दिव्यो मनोमयः कायो रूपावचर उक्तो भगवता । इयं च समापत्तिर्भावाग्रिकी । तत्कथमपरिहीणस्य तल्लाभिनो रूपधातौ स्यादुपपत्तिः । *Akb.* II. 44 d. Yaśomitra gives the following comment :—

[१]अत्र स्थविर उदायी स्थविरशारि[पु]त्रमिद(2)मवोचत्—"मा त्वमायुष्मन्नेवं वोचः।" स हि मन्यते स्म भावाग्रिकीयं समापत्तिर्दिव्यश्च मनोमयः कायश्चतुर्थध्यानभूमिक उक्तो भगवता तत्कथमेतदुपपत्स्यते। तदेतद् भदन्तोदायिना परिहानि(णि)मजानानेनाभिधर्मसंमूढेन प्रत्युक्तः। स भगवता परमाभिधार्मिकेणावसादनार्थमभिहितः—"(3)त्वमपि मोहपुरुष शारिपुत्रेण भिक्षुणा सार्धं गम्भीरेऽभिधर्मे संलपितुं मन्यसे?" [इति][१]

[२]निकायान्तरीयाश्चतुर्थध्यानभूमिकामपि निरोधसमापत्तिमिच्छन्ति। तेषां विना परिहान्या(ण्या) सिद्धत्येतत्सूत्र[म्]। ये(ए)तदेव तु न सिद्ध्यति—चतुर्थध्यानभूमिकाप्यसावस्तीति।[३] कथम्? "नवानुपूर्वसमापत्तयः"[४]

य आर्या निरोधसमापत्तिमुत्पाद्य ततः परिहीणा ध्यानं च लब्ध्वा रूपधातावुपपद्यन्ते, तैः परिहीणपूर्वैः पूर्वाभ्यासवशाद्रूपधातौ निरोधसमापत्तिरुत्पाद्येत।···किमतोऽप्यस्ति परिहाणिरिति? निर्वाणसदृशीयं समापत्तिः, कथमतः परिहाणिरित्यसंभावयन् पृच्छति। **उदायिसूत्रमिति**।···"**इहायुष्मन्तो भिक्षुः शीलसम्पन्नश्च भवति समाधिसम्पन्नश्च प्रज्ञासम्पन्नश्च। सोऽभीक्ष्णं संज्ञावेदितनिरोधं समापद्यते व्युत्तिष्ठते च। अस्ति चैतत्** स्थानमिति यथाभूतं **प्रजानाति। स न हैव दृष्ट एव धर्मे प्रतिपत्त्यैवाज्ञामारागयति। नापि**···(ditto)···**अस्ति चैतत् स्थानमिति यथाभूतं प्रजानाति**" इति। *Sakv*. p. 164.

[१—१] Cf. एवं वुत्ते आयस्मा **उदायी** आयस्मन्तं **सारिपुत्तं** एतदवोचः 'अट्ठानं खो एतं आवुसो **सारिपुत्त,** अनवकासो यं सो भिक्खु अतिक्कम्मेव कबळिकाराहारभक्खानं देवानं सहव्यतं अञ्ञतरं मनोमयं कायं उपपन्नो सञ्ञावेदयितनिरोधं समापज्जेय्यपि वुट्ठहेय्यपि नत्थेतं ठानं ति।'···अथ खो **भगवा** आयस्मन्तं **उदायिं** आमन्तेसि। 'कं पन त्वं **उदायि** मनोमयं कायं पच्चेसी'ति। 'यें ते भन्ते देवा अरूपिनो सञ्ञामया' ति। 'किन्नु खो तुय्हं **उदायि** बालस्स अव्यत्तस्स भणितेन त्वं पि नाम भणितब्बं मञ्ञसी'सि। *Aṅg*. v. p.166.

[२] This whole passage (upto वचनात्) is identical with *Akb*. II. 44 d.

[३] तस्मादस्त्यतः परिहाणिरिति गम्यते। युज्यत एवैतद् **वैभाषिकाणाम्। सौत्रान्तिकानान्तु** कथमेतत्। आर्य एव हि निरोधसमापत्तिलाभी। **न चार्यमार्गादस्ति परिहाणिरिति सौत्रान्तिकसिद्धान्तः।** तस्यार्यस्य कथमुपरिभूमिकादार्यमार्गात् परिहाणिरितीष्यते। तेषामप्येतत् **सूत्रं** न विरुध्यते। कथम्। यो हि कश्चित् भवाग्रलाभी नियाममवक्रामति सोऽनागामी सन्निरोधसमापत्तिमुत्पादयेत्। स भवाग्रान्निरोधसमापत्तेश्च परिहीयेत। न तु मार्गात्। ऊर्ध्वभूमिकस्यार्यमार्गस्य कदाचिदनुत्पादितत्वात्। स परिहीणो भूत्वा ध्यानमुत्पाद्य रूपधातावुपपद्येत। **तस्मादस्त्यतः परिहाणिर्न चार्यमार्गात् परिहाणिरिति न स्वसिद्धान्तविरोधः।** *Sakv*. p. 165.

[४] नवानुपूर्वसमापत्तय इति। चत्वारि ध्यानानि चत्वार आरूप्या निरोधसमापत्तिश्च। *Ibid*. p. 166.

इति सूत्रे वचनात् ।[१] प्राप्तकामवशि(4)त्वात्तु सन्तः पश्चाद्विलंघ्यापि व्युत्क्रान्तसमापत्तिं[२] समापद्यन्त इति ॥

व्याख्याते समापत्ती ।

[138] गतिप्रज्ञप्त्युपादानमायुश्चित्तोष्मणोः स्थितिः ।[३]
आगमाद्युक्तितश्चैव द्रव्यतस्तत्सदिष्यते ॥

आयुर्जीवितमित्यनर्थान्तरम् । उक्तं ह्यभिधर्मे—"जीवितेन्द्रियं कतरत् ? त्रैधातुकमायुः" इति ।[४] तत्पुनः 'गतिप्रज्ञप्त्युपादानं' वि(5)पाकजस्वभावत्वात् । उक्तं हि सूत्रे—"निर्वृत्ते विपाके नारक इति संख्यां गच्छति । एवं यावन्नैवसंज्ञानासंज्ञायतनोपगसंख्यां गच्छति" इति । न चान्यदिन्द्रियं विपाकजं त्रैधातुकव्याप्यस्ति यज्जन्मप्रबन्धाऽविच्छेदेन वर्तमानं गतिप्रज्ञप्त्युपादानं स्यात्, अन्यत्र जीवितेन्द्रियात् ।

तत्पुनरस्तीति कथं गम्यते ? (6)आगमाद्युक्तितश्च । आगमस्तावदयम्—

---

[१] After this the *Akb.* reads : यद्येष नियमः कथं व्युत्क्रान्तसमापत्तयो भवन्ति । प्राथमकल्पिके प्रत्येष नियमः । प्राप्तकामवशित्वात्तु सन्तो विलंघ्यापि समापद्यन्ते । एवमनयोः समापत्त्योर्भूमितोऽपि विशेषः । चतुर्थध्यानतयाग्रभूमिकत्वात् ।

[२] On *vyutkrānta-samāpatti*, see *Ak.* VIII. 19. and *Aaa.* p. 503.

[३] Cf. **आयुर्जीवितमाधार ऊष्मविज्ञानयोर्हि यः ।** *Ak.* II. 45b.

[४] *Jñānaprasthāna*, 14, 19 (Indriyaskandhaka).

Cf. कतमं तस्मिं समये जीवितिन्द्रियं होति ? या तेसं अरूपीनं धम्मानं आयु ठिति यपना यापना इरियना वत्तना पालना जीवितं जीवितिन्द्रियं, इदं तस्मिं समये जीवितिन्द्रियं होति । *Dhs.* I. 19.

The Theravādins hold that the *Jīvitendriya* is twofold : *Rūpa-jīvitendriya* and *Arūpa-jīvitendriya*. A controversy about such division is recorded in the the *Kv.* VIII. 10. The *KvA.* gives some interesting information about the theory of its being a *Viprayukta-dharma:*—इदानि जीवितिन्द्रियकथा नाम होति । तत्थ येसं जीवितिन्द्रियं नाम **चित्तविप्पयुत्तो** अरूपधम्मो, तस्मा रूपजीवितिन्द्रियं नत्थीति लद्धि, सेय्यथापि **पुब्बसेलियानञ्चेव सम्मितीयानञ्च** ।···नत्थि रूपीनं धम्मानं आयूति पञ्हे उपादिन्नरूपानम्पि तिणकट्ठादीनम्पि सन्तानवसेन पवत्तिमेव आयु, ठिति यपना यापना इरियना वत्तना पालनाति इच्छति, तस्मा पटिक्खिपति । ···अत्थि अरूपजीवितिन्द्रियं ति पञ्हे अरूपधम्मानं चित्तविप्पयुत्तं जीवितिन्द्रियसन्तानं नाम अत्थीति इच्छति, तस्मा पटिजानाति···। *KvA.* VIII. 10.

“आयुरूष्माथ विज्ञानं यदा कायं जहत्यमी।
अपविद्धस्तदा शेते यथा काष्ठमचेतनम् ॥”[१]

सर्वं हि जीवितेन्द्रियं कामधाताववश्यं कायेन्द्रियोष्मसहचरिष्णु। तत्त्ववश्यं विज्ञानसहवर्ति नापि चक्षुरादीन्द्रियसहवर्ति। रूपधातौ तु सर्वं कायादिपञ्चेन्द्रियस(7)हवर्ति। न त्ववश्यं चित्तसहचरिष्णु। आरूप्यधातौ तु सर्वं विज्ञानसहवर्ति, अन्यत्र निरोधसमापत्तेः।

जीवितेन्द्रियं[२] गतिप्रज्ञप्त्युपादानमस्तीति द्रव्यम्[३]। अन्यथा हि कुशलनिवृते चेतसि निर्मलो(ले) वाऽधोभौमे तद्गतिप्रज्ञप्त्युपादानविपाकजं किं कल्प्येत यत्सद्भावादसौ ततो न प्रच्युतः स्यात्? न च शक्यं (8)प्रतिज्ञातुमनास्रवाना(णा)[म]धोभूमिविज्ञानबीजं तद्गतिसंज्ञप्त्युपादानं कल्पयितुम्, अनास्रवस्य चित्तस्य समुच्छेदाय प्रवृत्तत्वात्। न चान्यद्विज्ञानं तद्भौमं शक्यं कल्पयितुं मनोविज्ञानधातुव्यतिरिक्तस्यानाकारमालम्बनस्य विज्ञानस्याप्रसिद्धत्वात्। मनोधातुरिति चेत्। न। मनोविज्ञानधातोरेवाव(9)स्थान्तरे तन्नामप्रज्ञप्तेः। युक्तिरपि—चक्षुरादिवत्तदाधिपत्यविशेषात्।

“समाधिबलेन कर्मजं जीवितावेधं निर्वर्त्यायुः संस्काराधिष्ठानजम्, आयुर्न विपाकः” इति कोशकारः।[४] तत्र किमुत्तरमिति? न तत्रावश्यमुत्तरं

---

[१] Quoted in *Akb.* II. 45 ab.

Cf. **आयु उस्मा च विञ्ञाणं यदा कायं जहन्तिमं।
अपविद्धो तदा सेति परभत्तं अचेतनं॥** *S.* III. p. 143.

Also cf. यदा खो आवुसो इमं कायं तयो धम्मा जहन्ति आयु उस्मा च विञ्ञाणं, अथायं कायो उज्झितो अवक्खित्तो सेति यथा कट्ठं अचेतनं ति। *M. sutta* 43.

[२] त्रैधातुकजीवनलक्षणमिति जीवितेन्द्रियम्। *Aam.* p. 74.

[३] This is a rejoinder to the Kośakāra's view :—एवं ह्युक्तम**भिधर्मे** “जीवितेन्द्रियं कतमत्। त्रैधातुकमायुरिति।” एतच्चैव न ज्ञायते आयुर्नाम क एष धर्म इति।… य ऊष्मणो विज्ञानस्य चाधारभूतो धर्मः स्थितिहेतुस्तदायुः।…**नहि नास्तीति ब्रूमो न तु द्रव्यान्तरम्**। किं तर्हि। त्रैधातुकेन कर्मणा निकायसभागस्य स्थितिकालावेधः। यावद्धि कर्मणा निकायसभागस्यावेधः कृतो भवत्येतावन्तं कालमवस्थातव्यमिति तावत् सोऽवतिष्ठते तदायुरित्युच्यते। सस्यानां पाककालावेधवत् क्षिप्तेषु स्थितिकालावेधवच्च।…**एवन्तु वर्णयन्ति द्रव्यान्तरमेवायुरस्तीति**। *Akb.* II. 45 ab.

Cf. **जीवितेन्द्रियं कतमत्**। निकायसभागे पूर्वकर्माविद्धे स्थितिकालनियमे आयुरिति **प्रज्ञप्तिः**। *Asm.* p. 11.

[४] While discussing a topic “कतीन्द्रियाणि विपाकः कति न विपाकः?”, the Kośakāra deals with a sub-topic :—अथ यदर्हन् भिक्षुरायुः संस्कारान् स्थापयति तज्जीवितेन्द्रियं कस्य विपाकः? and gives the following views :—*

वक्तव्यं यस्मान्नैतत्सूत्रेऽवतरति, विनये न संदृश्यते, धर्मतां च विलोम[III. A,

---

*(१) **शास्त्र** उक्तं "कथमायुः संस्कारान् स्थापयति ? अर्हन् भिक्षुः ऋद्धिमांश्चेतोवशित्वं प्राप्तः संघाय वा पुद्गलाय वा…जीवितपरिष्कारं वा दत्वा तत् प्रणिधाय प्रान्तकोटिकं चतुर्थध्यानं समापद्यते । स च तस्मात् व्युत्थाय चित्तमुत्पादयति…यन्मे भोगविपाकं तदायुर्विपाकं भवत्विति । तस्य यत् भोगविपाकं तदायुर्विपाकं भवति ।

(२) येषां पुनरयमभिप्रायो विपाकोच्छेषं विपच्यत इति । **त** आहुः "पूर्वजातिकृतस्य कर्मणो विपाकोच्छेषम् । स भावनाबलेनाकृष्य प्रतिसंवेदयते" इति ।

(३) **भदन्त घोषक**स्त्वाह । तस्मिन्नेव आश्रये रूपावचराणि महाभूतानि ध्यानबलेन सम्मुखीकरोत्यायुषोऽनुकूलानि वैरोधिकानि च । एवमायुःसंस्कारान् स्थापयत्येवमुत्सृजतीति ।

Then the Kośakāra gives his own view :—एवन्तु भवितव्यम् । **समाधिप्रभाव एव स तेषां तादृशो ये पूर्वकर्मजं च स्थितिकालावेधमिन्द्रियमहाभूतानां व्यावर्तयन्त्यपूर्वं च समाधिजमावेधमाक्षिपन्ति । तस्मान्न तज्जीवितेन्द्रियं विपाकं ततोऽन्यत्तु विपाकः ।** *Akb.* II. 10 a.

This controversy seems to arise from the legend of Buddha's declaration to Ānanda : 'यस्स कस्सचि **आनन्द** चत्तारो इद्धिपादा भाविता बहुलीकता यानिकता वत्थुकता अनुट्ठिता परिचिता सुसमारद्धा, सो आकङ्खमानो कप्पं वा तिट्ठेय्य कप्पावसेसं वा । **तथागतस्स** खो **आनन्द,** चत्तारो इद्धिपादा…सुसमारद्धा । आकङ्खमानो **आनन्द तथागतो** कप्पं वा तिट्ठेय्य कप्पावसेसं वा'ति । *Dīgha.* xvi. 3, 3.

This controversy is recorded in the *Kathāvatthu.* There also a similar question is raised—whether this extended *āyu* is *iddhimayika* or *vipāka* ?

इद्धिबलेन समन्नागतो कप्पं तिट्ठेय्याति ?

आमन्ता ।

इद्धिमयिको सो आयु, इद्धिमयिका सा गति, इद्धिमयिको सो अत्तभावपटिलाभो ति ?

न हेवं वत्तब्बे…। *Kv.* xi. 5.

इदानि **इद्धिबलकथा** नाम होति । तत्थ इद्धिपादभावनानिसंसस्स अत्थं अयोनिसो गहेत्वा इद्धिबलेन समन्नागतो कप्पं तिट्ठेय्याति येसं लद्धि, सेय्यथापि **महासंघिकानं ।** ते संधाय…पुच्छा सकवादिस्स ।…अथ नं **सकवादी** सचे ते इद्धिबलेन समन्नागतो 'यो चिरं जीवेय्य सो वस्ससतं अप्पो वा भिय्यो' ति एवं परिच्छिन्ना आयुकप्पा उद्धं महाकप्पं वा जीवेय्य, **इद्धिमयिकेन'स्स आयुना भवितब्बं ति चोदेतुं 'इद्धिमयिको सो आयू'** ति इदमाह । इतरो जीवितिन्द्रियं नाम इद्धिमयिकं नत्थि, कम्मसमुट्ठानमेवाति वुत्तत्ता पटिक्खिपति । *KvA.* xi. 5.

The Kośakāra explains the difference between the *āyu-saṁskāra* and the *jīvita-saṁskāra* as below :—सूत्र उक्तम्—**'भगवान् जीवितसंस्कारानधिष्ठायायुःसंस्कारानुत्सृष्टवान् ।** तेषां को विशेषः ? न कश्चिदित्येके ।…**पूर्वकर्मफलमायुःसंस्काराः।**

1. Fol. 49 b.](1)यति। तस्माद् बालवचनवदध्युपेक्ष्यमेतत् ।[१]

कथं तावत्सूत्रे नावतरति, विनये न संदृश्यते ? सूत्रे ह्युक्तम्–"अस्थानमनवकाशो यत्प्रहान(ण)हेतोर्वा उपक्रमहेतोर्वा अपक्वं परिपाचयेत्, परिपक्वं वा अन्येन नयेन नयेत्" इति विस्तरः ।[२]

विनयेऽपि "नियतवेदनीयं त्रि[प्रका]रं कर्म सदेवकेनापि लोकेन न शक्यं व्यावर्तयितुम्"[3] इति(2) परिग्रहः ।

प्रत्युत्पन्नकर्मफलं जीवितसंस्काराः इत्यपरे । यैर्वा निकायसभागस्थितिस्त **आयुःसंस्काराः**, यैस्तु कालान्तरं जीवति ते **जीवितसंस्कारा** इति । बहुवचनं बहूनामायुर्जीवितसंस्कारक्षणानामुत्सर्जनाधिष्ठानात् । न ह्येकस्य क्षणस्योत्सर्जनमधिष्ठानं चास्ति । *Akb.* II. 10 a.

[१] Cf. इध भिक्खवे भिक्खु एवं वदेय्य:—···अयं **धम्मो** अयं **विनयो** इदं सत्थुसासनं' ति ।···तानि···साधुकं उग्गहेत्वा **सुत्ते** ओतारेतब्बानि, **विनये** सन्दस्सेतब्बानि । तानि च **सुत्ते** ओतारियमानानि **विनये** सन्दस्सियमानानि न चे'व **सुत्तं** ओतरन्ति, न **विनये** सन्दिस्सन्ति ·· इति हे'तं भिक्खवे छड्डेय्याथ । *Dīgha*. XVI. 4, 7.

The Cy. on this passage contains various interpretations of the terms *Sutta* and *Vinaya*. Buddhaghosha sums up this : तस्मा **सुत्ते** ति **तेपिटकबुद्धवचने** ओतारेतब्बानि, **विनये** ति एतस्मिं रागादिविनयकारणे संसन्देतब्बानीति अयमेत्थ अत्थो ।··· **सुत्त**पटिपाटिया कत्थचि अनागन्त्वा · **वेदल्लपिटकानं** अञ्ञातरतो आगतो···'इति हेतं भिक्खवे छड्डेय्याथा'ति । *Dīgha A*. XVI. 4, 7.

[२] Compare with this the Ājīvika view : तत्थ नत्थि इमिनाहं सीलेन वा··· अपरिपक्कं वा कम्मं परिपाचेस्सामि, परिपक्कं वा कम्मं फुस्स फुस्स व्यन्तिकरिस्सामीति । *Dīgha*. II. 20.

The *Kv*. XI. 5. too quotes a similar *āgama* against Mahāsāṅghika :—"चतुन्नं भिक्खवे धम्मानं नत्थि कोचि पाटिभोगो···यानि खो तानि कम्मानि···आयतिं जातिजरामरणिकानि, तेसं विपाको न निब्बत्तीति नत्थि कोचि पाटिभोगो···।" (*Ang*. II. p. 172).

[३] Cf. ननु कृतकर्माविप्रणाशवादी भगवान् । तत्कथमिदमुच्यते ["युगान्तकालानलवन्महान्ति पापानि यन्निर्दहति क्षणेन" इति] ?···निरुपायाभिसन्धिना तदुक्तम् ।···अन्ये **पुनरनियतविपाकापेक्षया सर्वमेतदुच्यते, नियतविपाकस्य तु कर्मणः केनचित् प्रतिषेद्धुमशक्यत्वात्** । *Bodhicharyāvatāra-Pañjikā*, I. 14 ab.

Also cf. नाहं भिक्खवे सञ्चेतनिकानं कम्मानं कतानं उपचितानं अप्पटिसंविदित्वा व्यन्तिभावं वदामि, तञ्च खो दिट्ठे व धम्मे उपपज्जे वा अपरे वा परियाये ति । न त्वेवाहं भिक्खवे सञ्चेतनिकानं कम्मानं कतानं उपचितानं अप्पटिसंविदित्वा दुक्खस्सन्तकिरियं वदामि । *Ang*. V. p. 292. See *Asm*. p.56.

अभिधर्मेऽपि सर्वापरिमितमायुराक्षिप्यते । तस्यापक्षालाः कालस्थानान्तरावस्थानादिषु नियम्यन्ते । इत्येवं तावदागमादपेतं नोत्तरार्हम् ।

तथापि तु युक्तिमदुत्तरमुच्यते । यदि भगवान् समाधिबलेन स्वेच्छया-
[ऽ]पूर्वं सत्त्वं सविज्ञानकं सेन्द्रियमुत्पादयेत्, स्वात्मनो वा जीवितमनाक्षिप्तं (3)
प्राक्कर्मभिर्योगबलेनाक्षिपेत्,[1] ततो बुद्धो भगवान्नारायनी(णी)कृतः स्यात्,
अपूर्वसत्त्वनिर्माणात् । स च कारुणिकत्वान्नैव परिणि(नि)र्वायात्, शासनं-
(न)सम्भेदसंदेहांश्च च्छिन्द्यात् ।[2] तस्माद्वैतुलिकशास्त्र[3]प्रवेशद्वारमारब्धं तेन
भदन्तेनेत्यध्युपेक्ष्यमेतत्[4] ।

---

[1] The *Akb.* II. 10 a (विपाको जीवितम् ।) contains a long discussion on the problem of Buddha's power to extend his life for a *Kalpa.* The belief in this particular power of Buddha is pretty old as is evidenced from the passage of the *Mahāparinibbāna-sutta.* (v. supra, p. 99. n.) But according to the Theravādins, the *kalpa* in this passage meant only an *Āyu-kalpa* and not the *Mahākalpa.* The Commentary on this passage says :—एत्थ च कप्पं ति आयुकप्पं,तस्मि तस्मि काले यं मनुस्सानं आयुप्पमाणं होति तं परिपुण्णं करोन्तो तिट्ठेय्य, कप्पावसेसं ति 'अप्पो वा भिय्यो' ति वुत्तवस्ससततो अतिरेकं वा । **महासीवत्थेरो** पनाह:—बुद्धानं अट्ठाने गज्जितं नाम नत्थि···इदं भद्दकप्पमेव तिट्ठेय्य । कस्मा पन न ठितोति ? उपादिन्नकसरीरं नाम खण्डिच्चादीहि अभिभूयति, बुद्धा च खण्डिच्चादिभावं अप्पत्वा···पियमनापकाले येव परिनिब्बायन्ति ।"··· एवं वुत्तेपि यो पन रुच्चति, **आयुकप्पो ति इदमेव अट्ठकथायं नियामितं** । *Dīgha A.*xvi.3,3.

Also cf. तत्थ कप्पो नाम महाकप्पो, कप्पेकदेसो, आयुकप्पो ति तिविधो ।···एत्थ आयुकप्पो अधिप्पेतो ।···को पनेत्थ इद्धिमतो विसेसो ननु अनिद्धिमापि आयुकप्पं तिट्ठेय्याति ? अयं विसेसो, इद्धिमा हि यावतायुकं जीवितप्पवत्तिया अन्तरायकरे धम्मे इद्धिबलेन पटिबाहित्वा अन्तरा अकालमरणं निवारेतुं सक्कोति । अनिद्धिमतो एतं बलं नत्थि । *KvA.* xi. 5.

[2] Cf. प्रश्नात् प्रश्नान्तरमुपजायते । किमर्थमायु:संस्कारानाधितिष्ठन्ति ? **परहितार्थं शासनस्थित्यर्थं वा** ।···अथ किमर्थं उत्सृजन्ति ? अल्पं च परहितं जीविते पश्यन्ति, रोगाभिभूतं चात्मभावम् ।···

किमर्थं पुनर्भगवता आयु:संस्काराः उत्सृष्टाश्चाधिष्ठिताश्च । मरणवशित्वज्ञापनार्थमुत्सृष्टा जीवितवशित्वज्ञापनार्थमधिष्ठिता: । त्रैमास्यमेव नोर्ध्वम्, **विनेयकार्याभावात्** ।··· **स्कन्धमरणमारयोर्निर्जयार्थमिति वैभाषिकाः** । बोधिमूले क्लेशदेवपुत्रमारौ निर्जिताविति । *Akb.* II. 10 a.

[3] Cf. **वैपुल्यं** कतमत् । **बोधिसत्त्वपिटकसंप्रयुक्तं** भाषितम् । यदुच्यते वैपुल्यं तद् वैदल्यमप्युच्यते वैतुल्यमप्युच्यते ।···किमर्थमुच्यते **वैतुल्यम्** । उपमानधर्माणां तुलनाऽभावतः । *Asm.* p. 79.

[4] V. supra, p. 33. n. 3.

[१]अथ किमायुःक्षयादेव मरणं भवत्याहोस्विदन्यथाऽपि ?[२] प्रज्ञप्त्यामु[3](4)क्तम्—"अस्त्यायुःक्षयान्मरणं न पुण्यक्षयादिभिः ? चतुष्कोटिकः । प्रथमा कोटिः—आयुर्विपाकस्य कर्मणः पर्यादानात् । द्वितीया—भोगविपाकस्य । तृतीया—उभयोः । चतुर्थी—विषमापरिहारेण ।[१]

[४]ज्ञानप्रस्थान [५]उक्तम्—"आयुः सन्तत्युपनिबद्धं वर्तत इति वक्तव्यम् ? सकृदुत्पन्नं तिष्ठतीति वक्तव्यम् ? आह—कामावचराणां सत्त्वानाम(5)संज्ञिसमापत्तिं निरोधसमापत्तिं वा समापन्नानां सन्तत्युपनिबद्धं वर्तत इति वक्तव्यम् । समापन्नानां सन्तत्युपनिबद्धं वर्तत इति वक्तव्यम् । समापन्नानां रूपारूप्यावचराणां च सत्त्वानां सकृदुत्पन्नं तिष्ठतीति वक्तव्यम् ।"

कः पुण(न)रस्य भाषितस्यार्थः ? यस्याश्रयोपघातादुपघातस्तत्सन्तत्याधीनत्वात् प्रथमम् । यस्याश्रयोपघात एव नास्ति तद्यथोत्पन्नाव(6)स्थानाद् द्वितीयम् । सान्तरायं प्रथमं निरन्तरायं द्वितीयमिति काश्मीराः ।[६] तस्मादस्त्यकालमृत्युः[७] ।[४]

[१-१] This whole passage is almost identical with *Akb.* II. 45 ab. After विषमापरिहारेण, the *Akb.* has : आयुरुत्सर्गाच्चेति वक्तव्यम् ? न वक्तव्यम् । आयुः क्षयादेव तन्मरणम् । प्रथमकोटयन्तर्गमात् । क्षीणे त्वायुषि पुण्यक्षयस्य मरणे नास्ति सामर्थ्यम् । तस्मादुभयपक्षे सति मरणमायुः क्षयादित्युक्तम् ।

[२] Cf. तत्थ मरणं ति एकभवपरियापन्नस्स जीवितिन्द्रियस्स उपच्छेदो ।…तं कालमरणं अकालमरणं ति दुविधं होति । तत्थ कालमरणं पुञ्ञक्खयेन वा आयुक्खयेन वा उभयक्खयेन वा होति । अकालमरणं कम्मुपच्छेदककम्मवसेन । *Vm.* VIII. 1-2.

Also cf. आयुःक्षयः कतमः । काले मरणम् । पुण्यक्षयः कतमः । अकाले मरणमपुण्यमरणम् । येन सत्त्वा आस्वादसमापत्त्यां रज्यन्ते । पुण्यक्षयाच्च हेतोः ते जीविताच्च्यवन्ते । कर्मक्षयः कतमः । उपपद्यवेदनीयकर्मणः अपरपर्यायवेदनीयकर्मणश्च उभयोः क्षयान्मरणम् । *Asm.* p. 39.

[3] *Karmaprajñaptiśāstra*, chap. XI.

[४-४] From **ज्ञानप्रस्थान** उक्तम् to तस्मादस्त्यकालमृत्युः is identical with *Akb.* II. 45 ab.

[५] *Jñānaprasthāna*, 15, 12.

[६] 'यस्याश्रयोपघातादुपघातस्तत्सन्तत्युपनिबद्धम्' इति । **बहिर्देशिकमत**मेतत् । आश्रयसन्ततिप्रतिबद्धं तदायुरिति सन्तत्युपनिबद्धमित्युच्यते । **काश्मीरमते**ऽपि स एवार्थः । शब्दमात्रं तु भिद्यते । सान्तरायं निरन्तरायमिति । अथ वा सन्तत्युपनिबद्धमिति स्वसन्तत्युपनिबद्धं सन्तानवर्त्येव तत्केवलं न तु सकृदुत्पन्नं तिष्ठतीति सान्तरायमित्युच्यते । अनेनागमेनास्त्यकालमृत्युरिति दर्शयन्नाह—'सूत्रेऽप्युक्तं चत्वार आत्मभावप्रतिलम्भाः' इति विस्तरः । *Sakv.* p. 170.

[७] See **नत्थि अरहतो अकालमच्चूति कथा** *Kv.* XVII. 2.—तत्थ 'नाहं भिक्खवे

[१]सूत्र उक्तम्—"चत्वार आत्मभावप्रतिलम्भाः । अस्त्यात्मभावप्रतिलम्भो यत्रात्मसंचेतना क्रामति न परसंचेतना" इति चतुष्कोटिकः[२] । आत्मसंचेतनावक्रामति कामधातौ क्रीडाप्रमोषकाणां देवानां मनःप्रदोष(7)काणां च देवानाम् । तेषां हि प्रहर्षमनःप्रदोषाभ्यां तस्मात्स्थानाच्च्युतिर्भवति, नान्यथा ।[३] बुद्धानां चेति वक्तव्यम्, स्वयंमृत्युत्वात् । परसंचेतनैव क्रामति गर्भाण्डागतानाम् । उभयम्—अन्येषां कामावचराणां प्रायेण । नोभयम्—सर्वेषामन्तराभविकानां रूपारूप्यावचराणामेकतीयानां च कामावचराणाम् । तद्य(8)था नारकाणां च दर्शण(न)मार्गमैत्रीनिरोधसमापत्तिसमापन्नानां राजर्षिजिनदूतजिनादिष्टप्रभृतीनां[४] सर्वेषां च चरमभविकानां बोधिसत्त्वानां मातुस्तद्गर्भायाश्चक्रवर्तिण(न)श्च तद्गर्भायाः ।"[१]

व्याख्यातं जीवितेन्द्रियम् ॥

संस्कृतलक्षणानीदानीं व्याख्यायिष्यन्ते । तानि पुणः(नः) कानि कियन्ति (9)वेति ? तदुपव्याख्यायते—

सञ्चेतनिकानं कम्मानं कतानं उपचितानं विपाकं अप्पटिसंवेदित्वा व्यन्तिभावं वदामी'ति सुत्तस्स अत्थं अयोनिसो गहेत्वा अरहतो नाम सब्बकम्मविपाकं पटिसंवेदयित्वाव परिनिब्बायितब्बं । तस्मा नत्थि अरहतो अकालमच्चू ति येसं लद्धि, सेय्यथापि **राजगिरिकानञ्चेव सिद्धत्थिकानञ्च** । *KvA*. xvii. 2.

[१—१] This whole passage (from सूत्र उक्तम् to तद्गर्भायाः) fairly agrees with *Akb*. ii. 45 ab. The *Akb*. examines one more *Sūtra* passage afer this.

[२] Cf. चत्तारो'मे भिक्खवे अत्तभावपटिलाभा ।···अत्थि भिक्खवे अत्ताभावपटिलाभो यस्मिं अत्तसञ्चेतना कमति नो परसञ्चेतना ।···परसञ्चेतना कमति नो अत्तसञ्चेतना ।··· अत्तसञ्चेतना च कमति परसञ्चेतना च ।···नेव अत्तसञ्चेतना कमति नो परसञ्चेतना । *Aṅg*. ii. p. 147.

—अत्तसञ्चेतना कमती ति अत्तना पकप्पितचेतना हेतु चवन्ति···खिड्डापदोसिका देवा अत्तसञ्चेतना हेतु चवन्ति,···मनोपदोसिका नाम देवा परसञ्चेतना हेतु चवन्ति,··· मनुस्सा अत्तसञ्चेतना च परसञ्चेतना च हेतु चवन्ति,···[चतुत्थेन नेवसञ्ञानासञ्ञूपगा देवा दट्ठब्बा ति]···तेन अत्तभावेन दट्ठब्बा; अयं पन पञ्हो हेट्ठा कामावचरे पि रूपावचरे पि लब्भति समग्गेन पन परिच्छिन्दित्वा कथितो···। *Aṅg A*. iii. p. 147.

[३] Cf. **सन्ति भिक्खवे खिड्डापदोसिका नाम देवा** । तेसं अतिवेलं हस्सखिड्डारतिधम्मसमापन्नानं विहरतं सति सम्मुस्सति, सतिया सम्मोसा ते देवा तम्हा काया चवन्ति··· **सन्ति भिक्खवे मनोपदोसिका देवा** ।···ते अतिवेलं अञ्ञमञ्ञं उपनिज्झायन्ति···ते देवा तम्हा काया चवन्ति । *Dīgha*. i. 2. 7. and 10.

[४] **राजर्षय**श्चक्रवर्तिपूर्वाः प्रव्रजिताः । **जिनदूतो** यो बुद्धेन भगवता दूतः कश्चित् संप्रेषितः ।···**जिनादिष्ट** इयन्त कालमनेन जीवितव्यमिति य आदिष्टो भगवता । **धर्मिलादयः** पूर्वयोगविद्भ्य आगमितव्याः । *Sakv*. p. 170.

[139] जातिः स्थितिर्जराणा(ना)शः संस्कृताङ्कचष्टतुयी ।[1]

एतानि खलु चत्वारि संस्कृतलक्षणानि भगवताऽभिधर्मेऽभिहितानि। एतान्येव विनेयप्रयोजनवशात् सूत्रे[2] स्थित्यन्यथात्वमेकीकृत्य त्रीण्युक्तानि[3]। गाथायां त्वेभ्योऽङ्गद्वयं सामर्थ्याद्गम्यमानमन्तर्णीय [III. 3, 4. Fol. 50 a] (1)प्रदर्श्यते। स्थितिर्हि धर्मायोगमिच्छन्ती तद्धर्ममुपगुह्यावतिष्ठते। सा च तथा प्रवर्तमाना लोकस्य चित्तोन्नतिविशेषं जनयति। ततो भगवताऽन्यथा-

---

[1] Cf. लक्षणानि पुनर्जातिजरास्थितिरनित्यता । *Ak.* II. 45 cd.

[2] Cf. तीनिमानि भिक्खवे सङ्खतस्स सङ्खतलक्खणानि, कतमानि तीनि ? उप्पादो पञ्ञायति वयो पञ्ञायति ठितस्स अञ्ञथत्तं पञ्ञायति । इमानि खो भिक्खवे तीनि सङ्खतस्स सङ्खतलक्खणानीति । *Ang.* I. p. 152.

The Commentary on this passage throws some light on the place of *sthiti* and the *prajñapti-dharmatā* of these four *lakshaṇas* :—

···सङ्खतस्साति पच्चयेहि समागन्त्वा कतस्स; सङ्खतलक्खणानी ति सङ्खतं एतन्ति सञ्जाननकारणानि निमित्तानि; उप्पादो ति जाति, वयो ति भेदो, ठितस्स अञ्ञथत्तं नाम जरा; ···उप्पादादयो सङ्खतलक्खणा नाम···लक्खणं न सङ्खतं सङ्खतं न लक्खणं, लक्खणेन पन सङ्खतं परिच्छिन्नं, यथा हत्थि अस्सगोणमहिसादीनं सत्तिसूलादीनि सञ्जाननलक्खणानि न हत्थिआदयो···लक्खणेहि पन ते असुकस्स हत्थि असुकस्स अस्सो···ति वा पञ्ञायन्ति एवं सम्पदमिदं दट्ठब्बं । *Ang. A.*

[3] Cf. ननु 'त्रीणीमानि संस्कृतलक्षणानि' इति **सूत्र** उक्तम् ? चतुर्थमप्यत्र वक्तव्यं स्यात् । किं चात्र नोक्तम् ? आह । स्थितिः । यर्त्तहि 'इदं स्थित्यन्यथात्व'मिति ? जराया एष पर्यायः ।···ये हि धर्माः संस्काराणामध्वसंचाराय प्रवृत्तास्त एव **सूत्रे** लक्षणान्युक्तान्युद्वेजनार्थम् ।···स्थितिस्तु तान् संस्कारानुपगुह्य तिष्ठत्यवियोगमेवेच्छन्ती । अतोऽसौ संस्कृतलक्षणं न व्यवस्थापिता। असंस्कृतस्यापि च स्वलक्षणे स्थितिभावात्। *Akb.* II. 45 cd.

'ननु च त्रीणीमानि' इति विस्तरः । **'किं चात्र नोक्तम्'** इति **चोदकः** । **'स्थितिः' इति वैभाषिकाः** । यत्तर्हीदं स्थित्यन्यथात्वमपीति स्थितिशब्दोऽत्र श्रूयते । कथमिदमुच्यते स्थितिर्नोक्तेति **चोदकाभिप्रायः** । जरेयमुक्ता स्थितेरन्यथात्वं स्थित्यन्यथात्वमिति ।······ कस्मात्पुनर्लक्षणचतुष्टे सति भगवता त्रीण्येवोक्तानि । अत आह । 'ये हि धर्माः' इति विस्तरः । ···आभिप्रायिको हि सूत्रनिर्देशो न लाक्षणिको यथाऽभिधर्मः ।···असंस्कृतस्यापि च स्वलक्षणस्थितिभावात्' इति ।···**स्थितिर्ह्यसंस्कृतावस्थाविशेषलक्षणया स्थित्या सदृशीति तस्यासंस्कृतस्य संस्कृतत्वप्रसंगपरिजिहीर्षया न लक्षणमुक्तमित्यभिप्रायो भगवतो धर्मस्वामिनः।** *Sakv.* pp. 171-2

There were some *Sthaviravādins* who did not recognise the *sthiti* : केचीति **अभयगिरिवासिनो···ते पन चित्तस्स ट्ठितिक्खणं न इच्छन्ति ।** *Amt.* p. 140.

त्वाख्यया जरया सहोक्ता श्रीरिव कालकर्ण्यानुबद्धा संवेगानुकूला भविष्यतीत्येषोऽर्थ[वि]षयो दृश्यते ।[१] तस्माच्चत्वारि । इतश्च—

चत्वारि स्थित्यनास्तित्वे हेतु(2)त्वाद्यप्रसिद्धितः ॥

यदि हि धर्मस्य स्थितिर्ण(र्न) स्यात्, तस्यात्मन्यवस्थितस्य हेत्वाख्यः शक्तिप्रभावविशेषो न स्यात् । अनित्यताग्र[स्त]स्य च नोत्पत्तिशक्तिरित्यतश्च क्रियां न कुर्यात् । क्रियाऽभावात्फलाभावः स्यात् । फलार्थश्चायमारम्भः । तस्मादास्तिकैर्णा(र्ना)स्तिकपक्षं[२] विक्षिप्य स्थितिः प्रतिगृह्यत इति सिद्धम् ॥

चत्वारीति न सि(3)द्ध्यन्ति जराभावात् । भवतु स्थितिः, जरा तु सर्वथा न युज्यते । कथम् ? उक्तं हि—

"तथात्वेन जरासिद्धिरण्य(न्य)थात्वेऽन्य एव सः ।
तस्माने(न्नै)कस्य भावस्य जरा नामोपपद्यते ॥"[3]

---

[१] Cf. अन्ये पुनः कल्पयन्ति स्थितिं जरां चाभिसमस्य स्थित्यन्यथात्वमित्येकं लक्षणमुक्तं **सूत्रे** । किं प्रयोजनम् ? एषा ह्येषु संगास्पदमतः श्रियमेवैनां कालकर्णीसहितां दर्शयामास तस्यामनासंगार्थमिति । *Akb.* II. 45cd. See *Jpś.* pp. 46-7.

[२] This refers to the Sautrāntikas, whose views are given in detail by the Kośakāra :— तदेतमाकाशं पाट्यत इति **सौत्रान्तिकाः । न ह्येते जात्यादयो धर्मा द्रव्यतः संविद्यन्ते यथाऽभिव्यज्यन्ते** ।···**भगवान्**···**संस्कारप्रवाहस्य संस्कृतत्वं प्रतीत्यसमुत्पन्नतां द्योतयितुकाम इदमाह 'त्रीणीमानि संस्कृतस्य संस्कृतलक्षणानि', न तु क्षणस्य** । न हि क्षणस्योत्पादादयः प्रज्ञायन्ते ।···तत्र प्रवाहस्यादिरुत्पादो निवृत्तिर्व्ययः । स एव प्रवाहोऽनुवर्तमानः स्थितिः । तस्य पूर्वापरविशेषः स्थित्यन्यथात्वम् ।···आह चात्र ।

जातिरादिः प्रवाहस्य व्ययच्छेदः स्थितिस्तु सः ।
स्थित्यन्यथात्वं तस्यैव पूर्वापरविशिष्टता ॥

···**तस्मात्प्रवाह एव स्थितिः** ।···प्रतिक्षणं चापि संस्कृतस्यैतानि लक्षणानि युज्यन्ते विनाऽपि द्रव्यान्तरकल्पनया ।···न वै संस्कृतस्य स्थितिरेवोच्यते । लक्षणमपि तु स्थित्यन्यथात्वम् ।···समासतस्त्वत्र सूत्रे संस्कृतस्येदं लक्षणमिति द्योतितं **भगवता—"संस्कृतं नाम यदभूत्वा भवति भूत्वा च पुनर्न भवति यश्चास्य स्थितिसंज्ञकः प्रबन्धः सोऽन्यथा चान्यथा च भवति" इति किमत्र द्रव्यान्तरैर्जात्यादिभिः ?** *Akb.* II. 46 ab.

See *LVPAk.* II. pp. 227 ff., *Asm.* p. 19, and *The Central Conception of Buddhism*, pp. 37-43.

[३] Cf. स्याच्च तावदेकस्य धर्मस्योत्पन्नस्याविनाशः स्थितिः विनाशोऽनित्यता । जरा तु खलु सर्वथात्वेन न तथा । पूर्वापरविशेषात् विपरिणामाच्च । अतस्तदन्यथात्वेऽन्य एव । उक्तं हि 'तथात्वेन जरासिद्धिः···।' *Akb.* II. 46. ab.

तं प्रतीदमुच्यते—

[140] शक्तिहानेर्जरासिद्धिः

उन्मिषितो हि धर्मो जायते ह्यषितः फलमाक्षिपतीति । तस्य यदि जरसा शक्तिर्न विहन्येत स (4)द्वितीयमपि फलमाक्षिपेत् । न च शक्नोत्याक्षेप्तुम् । तस्माद्गम्यते कश्चिज्जराख्यः शत्रुस्तं जर्जरीकृत्योपहतसामर्थ्यमनित्यतापिशाच्याः समर्पयतीति युक्तमुक्तम् 'शक्तिहानेर्जरासिद्धिः' इति । नैतद्युक्तमुक्तं परिणामदोषप्रसङ्गात् । एवं लघ्वाचक्षाणेन भवता सांख्यीयः परिणामोऽभ्युपग(5)तो भवति । नाभ्युपगतः, यस्मात्—

नान्यत्वात् परिणामिता ।

अन्य एव हि नो जराख्यो धर्मो, अन्यश्च धर्मी । सांख्यस्य त्ववस्थितस्य धर्मिणः स्वात्मभूतस्य धर्मान्तरस्योत्सर्गः स्वात्मभूतस्य चोत्पादः परिणाम इति ।

कथं पुणः(नः) क्षणिकस्य धर्मस्य शक्तिहानिर्भवति ? एवम्—यस्मादस्याजहदात्मकस्य—

(6)एककारित्रनाशाभ्यां शक्तिहानिः प्रसिद्ध्यति ॥

येन खलु दार्ढ्येणोपेतो यमेकं फलमाक्षिपते, यदि तेनैव युक्तः स्याद् द्वितीयमप्याक्षिपेत् । न चैनं शक्तिमन्तमनित्यता हिंस्यात् । तस्माद् गम्यतेऽन्यथीभूतोऽयमनित्यताव्याघ्रीमुखं प्रविशति । इत्येकं फलमाक्षिप्य नश्यतीत्युक्तमेतत्—'एककारित्र(7)नाशाभ्यां शक्तिहानिः प्रसिद्ध्यति ।'

न प्रसिद्ध्यति, निर्हेतुकत्वाद्विनाशस्य । ये ह्यर्थात्मानो हेतुमन्तस्ते खल्वनित्या दृष्टाः । कथम् ? अंकुरवत् । न विनाशस्य विनाशोऽस्ति, तस्मादहेतुकः । किञ्च, ये चार्थात्मानः पश्चाद्भवन्ति तेषां पूर्वहेतुरस्ति तद्यथा भस्मनो बीजादिसंयोगः । न च विनाशस्य हे(8)तुरस्ति । तस्मादसौ न पश्चाद्भवतीति ॥

तत्र यदुक्तं जातस्य स्थित्यन्यथात्वमपेक्ष्य विनाशो भवतीति तदयुक्तम् । अत्र प्रत्यवस्थानम्—

[141] सति जन्मनि तद्भावाद् द्रव्यकारित्रनाशतः ।
आगमादुपपत्तेश्च विनाशोऽपि सहेतुकः ॥

सहेतुर्विनाश[१] इति स्थापना ।[२] कुतः ? 'सति जन्मनि तद्भावात् ।' उक्तं(9) हि भगवता—"अस्मिन् सतीदं भवति । यावदविद्याप्रत्यया: संस्काराः ।" सति चोत्पत्तिमति विनाशो भवति । तस्मात्सहेतुकः । यस्य पुनरहेतुकस्तस्य प्रागपि जन्मनः सोऽस्तीति जन्मैव न स्यात्, विरुद्धानामन्यतरोपपत्तेः । तयोरविरोधाद्वा तद्व्यपदेशानुपपत्तिरताद्धर्म्यं च [III. A, 4. Fol. 50 b.] (1)संस्काराणामिति ।[3]

धर्मा(र्म)णा(ना)स्तित्वमात्रं विनाश इति चेत् । न । तदस्तित्वपूर्वकत्वात् । अस्तित्वपूर्वकं हि तन्नास्तित्वमिति तदपि सहेतुकम् । नास्ति किञ्चित्तदिति चेत् । न । अस्तित्वविरोधानुपपत्तेः । किञ्च, भावविरोधित्वे सत्यभावस्य भवतापत्तेः । अवि[रोधि]त्वे भावनित्यत्वप्रसंगादुभयाभावे वाङ्मात्रत्वात् । का चैषा वाचो (2)युक्तिः सति च भवति तद्विशेष्यश्चा-

---

[१] For a discussion on the *Nirhetuka-vināśa-vāda*, see *Pramāṇa-vārtika (Karṇagomi-ṭīkā)*, p. 366, *Tattva-saṅgraha*, pp. 315 ff., *Hetubindu-ṭīkā*, p. 141. For a criticism of the same topic, see *Madhyamaka-vṛitti*, p. 113 and *Nyāyamañjarī*, pp. 61 and 457.

[२] Cf. योऽप्याह **निकायान्तरीयो** "विनाशकारणं प्राप्यानित्यता विनाशयति" इति तस्य हरीतकीं प्राप्य देवता विरोचयतीत्यापन्नं भवति किं पुनस्तां कल्पयित्वा । तत एवास्तु विनाशकारणाद्विनाशः, चित्तचैत्तानां च क्षणिकत्वाभ्युपगमात्तदनित्यताया विनाशकारणानपेक्षत्वात् स्थित्यनित्यते कारित्रमभिन्नकालं कुर्यातामित्येकस्यैकत्र काले स्थितिविनष्टता संप्रसज्येत । तस्मात् प्रवाहं प्रत्येतानि संस्कृतलक्षणानीत्येवमेतत्सूत्रं सुनीतं भवति । *Akb.* II. 46. ab.

योऽप्याह **निकायान्तरीय** इति । **आर्यसम्मतीयः** । स घटादेर्मुद्गरादिकृतो विनाश इति मन्यते । कालान्तरावस्थायि हि तस्य रूपम् । चित्ताचैत्तानां च क्षणिकत्वम् । *Sakv.* p. 179.

This view, attributed to the ārya-Sammatīya, is shared by the Sthaviravādins. See *Kv.* XXII. 8.—इदानि **खणिककथा** नाम होति । तत्थ यस्मा "सब्बसङ्खतधम्मा अनिच्चा, तस्मा एकचित्तक्खणिका एव । समानाय हि अनिच्चताय एको लहुं भिज्जति, एको चिरेनाति, को एत्थ नियमो ?" ति येसं लद्धि, सेय्यथापि **पुब्बसेलीयापरसेलीयानं** । ते सन्धाय पुच्छा **सकवादिस्स**···। *KvA.* XXII. 8. Also cf. उप्पादट्ठितिभङ्गवसेन खणत्तयं एकचित्तक्खणं नाम । तानि पन सत्तरस चित्तक्खणानि रूपधम्मानमायु । *A. Saṅgaho*, IV. 8.

[३] The Kośakāra favours the Sautrāntika view :—नहि विना हेतुप्रत्ययसामग्र्या जातिर्जनिका भवति । हेतुप्रत्ययानामेव तर्हि सामर्थ्यं पश्यामः ।···सिद्धा एव तु द्रव्यभावेन जात्यादय इति **वैभाषिकाः** । न हि दूषकाः सन्तीत्यागमा अपास्यन्ते···। तस्माद्दोषेषु प्रतिविधातव्यं सिद्धान्तश्चानुवर्तितव्यः । *Akb.* II. 46 cd.

तद्विरोधी च। न च किञ्चिदित्येवैषा वाचो युक्तिरसंबद्धाः(द्धा)। निरर्थिका चैषा वाचोयुक्तिः। अतस्ते भावाभावो वाग्वस्तुमात्रम्। प्रतिषेधसामर्थ्यात्प्रतिषेध्यो भावोऽस्तीति चेत्। नास्ति। शशविषाणवच्छब्दो गड्डुमात्रत्वात्प्रतिषेधद्वयार्थानुपपत्तेश्च। किञ्च, कारित्रमात्रनाशाच्च। (3)विरुद्धप्रत्ययसान्निध्ये क्रियामात्रं हि नो[दे]ति, नश्यति। तस्मान्नार्थवान् विनाशशब्दः। कुतश्च? आगमादुपपत्तेश्च।

उक्तं हि भगवता—"उत्पन्नानामकुशलानां धर्माणां निरोधाय" इति।[१] तथोक्तम्—"इहैकतीयः प्राणातिपातिको भवति" इति विस्तरः[२]। तथा—"तिस्रः संवर्तन्योऽनलजलानिलाख्या याभिः क्रमेण यावच्छुभकृत्स्ना विन(4)श्यन्ते" इति।[३] तथा—"जातिप्रत्ययं जरामरणम्" इति।[४]

उपपत्तिरपि। जन्मनोऽप्यहेतुकत्वप्रसंगात्। यदि खल्वसति सद्भावेऽप्यहेतुको विनाशः, जन्माप्यहेतुकं भवत्विति। तत्समर्थहेतुसामग्रीसन्निधाने जन्मदर्शणा(ना)त्, तत्सहेतुकत्वमिति चेत्। न। तद्विनाशे तुल्यत्वात्तस्यापि समर्थहेतुसाम(5)ग्र्यन्तरसन्निधानाभ्युपगमात्।

व्याख्यातानि लक्षणानि॥

नामकायादयो वक्तव्याः। न खलु वक्तव्याः। न हि ते शब्दादन्ये विद्यन्ते, स्वभावक्रियाभावादिति।[५] तदुपदर्शनार्थमिदमारभ्यते।

[142] वाक्छब्दाधीनजन्मानः स्वार्थप्रत्यायनक्रियाः।
संज्ञाद्यपरणा(ना)मानस्त्रयो नामादयः स्मृताः॥[६]

विप्रयुक्ताः ख(6)लु नामादयः संस्कारस्कन्धसंगृहीताः। वाक् तु रूपस्कन्धसंगृहीता वाग्गीर्निरुक्तिरित्यर्थः। ते च तदधीनोत्पत्तयो निरुक्त्य-

---

[१] Cf. चत्तारो सम्मप्पधाना—इध भिक्खु··· उप्पन्नानं अकुसलानं धम्मानं पहानाय छन्दं जनेति वायमति···चित्तं पग्गण्हाति पदहति···। *Vbh.* p. 208.

[२] Cf. इध माणव एकच्चो···पाणातिपाती होति लुद्दो लोहितपाणी होति···। *M. sutta* 135.

[३] Cf. अग्गिनाभस्सरा हेट्ठा आपेन सुभकिण्हतो।
वेहप्फलतो वातेन एवं लोको विनस्सति॥ *A. Vihāvinī.* p. 94.

[४] Cf. जातिपच्चया जरामरणम्। *Vbh.* p. 135.

[५] This is a view of the Sautrāntika: ननु चैते वाक्स्वभावत्वाच्छब्दात्मका इति रूपस्वभावा भवन्ति। कस्माच्चित्तविप्रयुक्ता इत्युच्यन्ते? *Akb.* II. 47 ab.—'ननु चैते' इति **सौत्रान्तिकवचनम्**। *Sakv.* p. 183.

[६] Cf. **नामकायादयः संज्ञावाक्याक्षरसमुक्तयः**। *Ak.* II. 47 ab.

धीनार्थप्रवृत्तयश्च ज्ञानवदर्थस्य प्रतिनिधिस्थानीयाः। निरुक्ति[ः] नाम संज्ञा। नार्थाणा(ना)मेकसंज्ञत्वात् । यथा तु चक्षुर्विज्ञानकायादयः पञ्चरूपाद्यायत्तवृत्तयः, तद्व(7)त्तेऽपि 'वाक्छब्दाधीनजन्मानः'। अतश्चोक्तम्—“वाङ् नाम्नि प्रवर्तते, नामार्थं द्योतयति ।”[१] इति । “वाचा सह कचटतपादयो जायन्ते तया निर्धीयन्ते” इति । प्रतिवर्णानुवर्तिनीनां वाचां सावयवत्वेऽपि सति तदभिधानानुपपत्तिरिति चेत् । न । शब्दभेदसंचयस्य प्रत्ययत्वे तदभिधानसामर्थ्योपप(8)त्तेः ।

किञ्च, क्रियया च तदस्तित्वं निर्धार्यते । का च सेत्युच्यते । स्वार्थप्रत्यायनं क्रिया । स्वं स्वमर्थं प्रत्याययत्यपौरुषेयत्वान्नामार्थसंबन्धस्यैष[ः] तेषां कृतान्तः ।

ते पुनर्नामसंज्ञाद्यपरनामानः ।

तत्र नामपर्यायः संज्ञाकरणं यथा घट इति ।

पदपर्यायो वाक्यम् । यथा घटो दृश्यत इति ।(9) येन क्रियागुणकालविशेषा गम्यन्त इति क्वचित् । “यावद्भिरर्थवद्भिः पदैर्विवक्षितार्थपरिपूरिर्भवति तावतां समूहः पदम्” इत्याभिधर्मिकाः ।[२]

व्यञ्जनपर्यायोऽक्षरं[३] यथा क इत्येतदक्षरं निरवयवममूर्तमप्रतिघं रूपलक्षणविमुक्तं त्रैकालिकार्थप्रत्यायनसमर्थं मनोवद[III. B, 3. Fol. 51 a] (1)प्रतिहतगमनमिति ।[४]

---

[१] नैते वाक्स्वभावाः । घोषो हि वाक्, न च घोषमात्रेणार्थाः प्रतीयन्ते । किं तर्हि । वाङ नाम्नि प्रवर्तते । नामार्थं द्योतयति । *Akb.* II. 47ab.—'नैते वाक्स्वभावाः' इति विस्तरेण **वैभाषिकवचनम्** । *Sakv.* p. 183.

[२] वाक्यं पदं यावतार्थपरिसमाप्तिस्तद्यथा 'अनित्या वत संस्कारा' इत्येवमादि । *Akb.* II. 46.

[३] Cf. संज्ञासमुक्तयो नामकायः । वाक्यसमुक्तयः पदकायः । अक्षरसमुक्तयो व्यञ्जनकायः । *Sakv.* p. 181. See *Jpś.* pp. 15-6.

Also cf. **नामभिरिति** पदसमुदायैर्वाक्यैः । **पदैरिति** सुप्तिङन्तैरक्षरसमुदायैः । **अक्षरैरिति** एवमित्यादिवर्णैः । *Aaa.* p. 279.

For the Pāli definitions of अक्षर, पद, व्यञ्जन and वाक्य, see *Netti-A.* p. 209.

[४] Cf. अस्तु वा व्यञ्जनमात्रस्य द्रव्यान्तरभावपरिकल्पना । तत्समूहा एव नामकायादयो भविष्यन्तीत्यपार्थिका तत्प्रज्ञप्तिः । सन्त्येव तु विप्रयुक्तसंस्कारभावना नामकायादयो द्रव्यत इति **वैभाषिकाः** । न हि सर्वधर्मास्तर्कगम्या भवन्तीति । *Akb.* II. 47 ab.

न, असिद्धत्वात्। न खलु वाक्छब्दादन्ये नामादयः सिद्ध्यन्ति। वाक्छब्द एवार्थेषु संज्ञाकर्तृकृतावधिः स्मृत्या गृहीतावयवसमुदायः श्रोतुरर्थं प्रत्यायतीति किमन्यैर्नामादिभिः परिकल्पितैः ?[१] तत्रेदं प्रत्यवस्थीयते—

[143] अन्ये नामादयः शब्दादप्राप्तार्थप्रकाशनात् ।

शब्दो हि (2)परमानु(णु) संचयः।[२] स प्राप्यार्थं प्रकाशयेत्, प्रदीपवत्। नाजातध्वस्तस्वर्गादिदेशस्थाना(न)र्थं (र्था)न् प्राप्तुं शक्नोति। तस्मात्प्रतिपद्यस्व शब्दोऽर्थं प्रत्याययतीति। [इ]तश्च क्रमयौगपद्यप्रत्यायनासंभवात्। कथम् ? बल्वजवत्। इह हि बह्वानि बल्वजद्रव्याणि प्रत्येकमसमर्थाणि(नि) संभूय रज्वा(ज्ज्वा)त्मनावस्थितानि (3)दार्वाद्याकर्षणक्रियासामर्थ्योपेतानि भवन्ति। न चैवं वाक्यात्मानः शब्दाः बुद्ध्युपगृहीतावयवसमुदायसंक्षेपाः क्रमलब्धजन्मानः प्रत्येकमर्थं(र्थं)प्रत्यायनसमर्थाः, णा(ना)पि संभूय प्रत्याययन्ति, संभूयानवस्थानाद् बल्वजवत् । तस्मात्क्रमयौगपद्यात्प्रत्यायनाऽसंभवान्न शब्दाः कश्चिदर्थं प्र(4)त्याययन्तीति सिद्धम् ।

इतश्च, प्रत्याय्यप्रत्यायकादिसंबन्धानुपपत्तेः। कथम् ? प्रदीपवत्। तद्यथा प्रदीपस्तमसि घटादिप्रत्याय्यप्रत्यायकशक्तियुक्तो घटदर्शणा(ना)र्थिभिरुपादीयते न च कश्चिच्छब्दः कस्मिंश्चिदर्थे केनचित्संबन्धिविशेषेण नियतवृत्तिः, यस्तं गृहीत्वा प्रत्याययेमे(दि)ति ।

तत्र तावत्। [न] (5)प्रदीपस्यै(स्ये)व प्रत्याय्यप्रत्यायकसंबन्धोऽस्ति। अकृतसंकेतस्याप्रत्यायनात्। नापि संयोगाख्यः संबन्धोऽस्ति सदसतोस्तदनुपपत्तेः। गुणत्वाच्चेति कस्मिंश्चित्। न समवायाख्यः। अत एवाकाशगुणत्वाच्चेति[३] कश्चित् । तस्मात्प्रत्याय्यप्रत्यायनादिसंबन्धानुपपत्तेः यदगदिष्म न शब्दोऽर्थं प्रत्याय[य]तीति (6)तत्सम्यगभ्यधामेति ।

---

[१] Cf. योऽपि हि मन्यते 'नामार्थं द्योतयति' इति तेनाप्येतदवश्यमभ्युपगन्तव्यं यदि प्रतीतपदार्थकं भवतीति। तच्चैतच्छब्दमात्रादेव प्रतीतपदार्थकत्वात् सिध्यतीति किमर्थान्तरं नाम कल्पयित्वा। **इदं चापि न ज्ञायते कथं वाङ नाम्नि प्रवर्तत इति।** किं तावदुत्पादयत्याहोस्वित् प्रकाशयति। यद्युत्पादयति। घोषस्वभावत्वाद्वाचः सर्वं घोषमात्रं नामोत्पादयिष्यति, यादृशो वा घोषविशेष इष्यते नाम्न उत्पादकः स एवार्थस्य द्योतको भविष्यति। अथ प्रकाशयति। घोषस्वभावत्वाद्वाचः सर्वं घोषमात्रं नाम प्रकाशयिष्यति, यादृशो वा घोषविशेष इष्यते नाम्नः प्रकाशकः स एवार्थस्य द्योतको भविष्यति। **न खल्वपि शब्दानां सामग्र्यमस्ति** क्षणैकमिलनम्। न चैकस्य भागश उत्पादो युक्त इति कथमुत्पादयन्ती वाङ नामोत्पादयेत्।··· *Akb.* II 47 ab.

[२] For a similar Jaina view, see *Nyāyakumudachandra*, p. 242.

[३] See the Commentary by Vyomashiva on the *Praśastapāda-bhāshya*, p. 322.

सामयिकः शब्दोऽर्थप्रत्यायनलिङ्गमिति चेत् । न । साध्यत्वाद्वितर्कविचाराधीनजन्मनः शब्दस्य क्रमयौगपद्यप्रत्यायनानुपपत्तेश्च । प्रतिवर्णविषया स्मृतिः प्रत्याययतीति चेत् । न । तत्समानदोषत्वात्पूर्वपक्षोत्सर्गत्वाच्च । संस्कार इति चेत् । न । असिद्धत्वादुक्तोत्तरत्वा(7)च(च्च) । यादृच्छिकसंवृतिशब्दमात्राभ्युपगमे वदयमान(ण)दोषप्रसंगाच्चेति ।

किं पुनरेते नामकायादयो नित्या आहोस्विदनित्या इति ?

अनित्यास्ते तु विज्ञेयाः

तु शब्दो[ऽ]नित्यत्ववादविशेषणार्थो हेतुः । क इति चेत् । सोऽयमुच्यते—

सापेक्षार्थविभावनात् ॥

कथम् ? ज्ञानवत् । तद्यथा ज्ञानं च(8)क्षुरादीन् हेतूनपेक्ष्यार्थं विभावयति तद्वन्नामादयोऽपि घोषादीन् हेतूनपेक्ष्यार्थं प्रत्याययन्ति । तस्मात्सापेक्षप्रत्यायनादनित्या इति ॥

यदि तर्हि नामादयोऽर्थं प्रत्याययन्ति, तत्कथमिदं सद्भिरप्युच्यते—'शब्दोऽर्थं प्रत्याययति' इति ? तदत्राभिधीयते—

[144] स्वरूपं वेदयंश्च्छब्दो व्यञ्जना(9)दीनि च ध्रुवम् ।
अर्थप्रत्यायकः प्राज्ञैर्भक्तिकल्पनयोच्यते ॥

आञ्जसा हि वाङ् नाम्नि प्रवर्तते नामाभिलपतीत्यर्थः । नाम त्वर्थं द्योतयतीति प्रतिवर्णानुवर्तिनी वाक् खलु नामाभिलपन्ती स्वञ्च रूपमुद्भावयन्ती सन्तानेन प्रवर्तमाना गुणकल्पनयाऽर्थं प्रत्याययतीत्य [III A, 3 Fol. 51 b.] (1)पदिश्यते । न त्वर्थः शब्दवाच्यो द्योत्यो वा ॥

इतश्च न शब्दोऽर्थं प्रत्याययति । यस्मात्—

[145] परमानु(णु)स्वभावत्वाद् घोषैकत्वं न युज्यते ।

"एदैतौ कण्ठतालव्यौ"[१] इति प्रतिज्ञये(यै)तेन चैकस्थानवचनस्य विश्लिष्टस्थानद्वये वृत्तिरुपपद्यते । परमाणुसंघातस्य तूपपद्यते । परमान(ण)वोऽपि प्रत्येकं [न] प्रत्याययन्ति, दिग्भागास्तित्वनास्तित्वे तदभावाच्चेति । स(2)मुदायोऽपि मध्यस्थैरप्रत्यायनानुमानादनु(णु)द्वयेनापि न प्रत्याययतीत्य-

---

[१] Cf. एऐ तु कण्ठतालव्यौ । *Pāṇinīya-śikshā*, 18.

ध्यवसीयते । न चार्थान्तरं समुदायिभ्यः समुदायोऽस्ति । स कथमर्थं प्रत्यायायिष्यतीति । अतीतवर्णसमुदायस्त्वन्यवर्णापेक्षो मनोबुद्ध्योपगृहीतस्वरूपः संबन्धिन्यर्थे बुद्धिमुत्पादयत्प्रत्याययतीति युक्तरूपो व्यपदेशः ।

अत्र (3)मीमांसा(सक)[१]वैयाकरणौ [२]प्रत्याचक्ष(क्षे)ते । नासिद्धत्वात् । न खलु शब्दस्य परमानु(णु)मयत्वं सिद्धम् । तस्मादनुत्तरमेतत् । तौ प्रत्यभिधीयते ।[३]

तादात्म्यं प्रतिघातित्वात्

प्रतिहन्यते खलु शब्दः प्राकारभित्त्यादिषु तस्मात्प्रतिघाती शब्द इति । न । असिद्धा(द्धम्) । सिद्धसाधनादसिद्धेः । यत्खलु भवता प्रतिघातित्वेनाप्रसिद्धं परमानु(णु)मयत्वं साध्य(4)त इत्यसदेतत् । तत्रैदं प्रत्यवस्थीयते ।

तत्सिद्धिर्वरणादिभिः ॥

आलाङ्गलग्राहेभ्यः सिद्धमेतद्गर्भगृहान्तर्गतेन पिहिते कवाटेऽभिहन्यमानाः पटहाः ध्माप्यमानाश्च शंखा न श्रूयन्ते । हूणनाडी[४]निर्घोषेण च नगरप्राकाराणि पात्यन्ते । तस्मात्सिद्धेन जाल्मज(जे)नासिद्धस्य साधनमिदमाविष्क्रियते नासि(5)द्धेनेति ॥

यदप्युच्यते स्फोटः शब्दो ध्वनिः शब्दगुण[५] इति तत्रापदिश्यते—

[146] स्फोटाख्यो नापरो घोषाच्छब्दो नित्यः प्रसिद्ध्यति ।

तस्माद्ध्वनिः शब्दः स्फोट इत्यनर्थान्तरम् । यथा हस्तः करः पाणिरिति लोकप्रसिद्धमेतत् । तस्मात्—

क्रमवृत्तेर्ण(र्न) शब्देन कश्चिदर्थोऽभिधीयते ॥

---

[१] See *Ślokavārtika*, 5, 106.

[२] Cf. वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ॥
अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥

Vākyapadīya, I. 107 and 112.

[३] This discussion is not found in the *Akb*.

[४] This appears to be a reference to the cannon.

[५] See *Sphoṭasiddhi*, *kārikā* 29. For details on this topic, see *Nyāyakumudachandra*, pp. 747-757.

इति प्रागाविष्कृतमेतत् । तन्मा प्रमोषीः ॥

यदप्युच्यते (6)वैयाकरणैः शब्दो बुद्धिनिर्ग्राह्य[1] एष वैशेषिकैरपि श्रोत्रग्राह्यः,[2] शब्दश्चा(स्या)न्यत्वेऽपि च शब्दत्वादयः श्रोत्रेण गृह्यन्त इति। तयोरिदमुच्यते—[3]

[147] न श्रुत्या श्रूयते शब्दस्तदन्या च गतिः श्रुतेः ।
यो ब्रूयात्स स्वमात्मानं विद्वद्भिरपहासयेत् ॥

इति । तस्मात्प्रतीतपदार्थको लोके ध्वनिः शब्दः । ततश्चान्ये नामादयः सर्वार्थविषया (7)इति स्थापना ।

[148] प्रतिद्योत्यं यथायोगं नियतानियताश्च ते ।[4]

तत्र य आर्यया निरुक्त्या निरुच्यन्ते द्वादशायतनविषयास्ते नियताभिधेयं(यसं)बन्धाः, लौकिक्याश्च केचिन्नियताभिधेया निरुच्यन्ते । उभयेऽप्येते कृतसंकेतस्यार्थं प्रत्याययन्ति । ये तु यथेच्छं पित्रादिभिः क्रियन्ते नामकायादिभिस्ते ह्यनियता यदृच्छिका इत्यु(8)च्यन्ते । तद्यथा डित्थडवित्थादयः ।

प्रथमास्तु बुद्धोत्पाद एव प्रवर्तन्ते नान्यदेति । उक्तं हि भगवता—"तथागतानामुत्पादान्नामपदव्यञ्जनकायानामुत्पादो भवति" इत्येतस्मात्—

नियतोद्भावनाद् बुद्धः सर्वज्ञ इति गम्यते ॥

ये ह्यपौरुषेया धात्वायतनस्कन्धाद्यवद्योतकास्ते प्रथमं बुद्धविषया एव । तदवबोधाच्च (9)भगवान्सर्वज्ञ इत्यभिधीयते । ते पुण(न)रेते—

[149] सत्त्वाख्याः कामरूपाप्ता निष्यन्दाऽव्याकृतास्तथा ।[5]

सत्त्वाख्या ह्येते । यश्च द्योतयति स तैः समन्वागतः । न यो द्योत्यते ।

---

[1] Cf. नादेनाहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवभासते ॥ *Vākyapadīya*, I. 84.

[2] Cf. शब्दोऽम्बरगुणः श्रोत्रग्राह्यः । *Praśastapāda-bhāshya*, p. 645.

[3] This discussion is not found in *Akb*.

[4] For the fourfold *nāma*, see *Vm*. VII. 54 and *Dhs A*. v. 112.

[5] Cf. कामरूपाप्तसत्त्वाख्या निःष्यन्दाव्याकृतास्तथा । *Ak*. II. 47cd.

कामाप्त[ाः] रूपाप्ताश्चैते[1] वाक्छब्दाधीनजन्मत्वात् । नैष्यन्दिका अनिवृताव्याकृताश्चैव ।[2]

यथा चैते नामादयः

तथैव च विपाकश्च साभाग्यं [प्राप्तयो द्विधा] ।[3]

[Fol. 52-90 lost][4]……

[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥[4]]

[द्वितीयोऽध्यायः समाप्तः ॥][4]

---

[1] [आरूप्याप्ता] 'ते त्वनभिलाप्याः' इति । ते त्वारूप्याप्ता नामकायादयोऽकथ्याः । वाचस्तत्राभावात् । कथं ते सन्तीति गम्यन्ते यदा ते नाभिलप्यन्ते ? तस्मात् कामरूपाप्ता एव नारूप्याप्ता इति **वैभाषिकाः** । *Sakv*. p. 186.

[2] **नैष्यन्दिकाः** सभागहेतुजनितत्वात् । **न** विपाकजा इच्छातः प्रवृत्तेः । **नौपचयिका** अरूपिणां चयाभावादिति । **अनिवृताव्याकृताश्च** । न कुशला नाकुशलाः । कस्मात् ? इतरथा ह्यदा समुच्छिन्नकुशलमूलः कुशलान् धर्मान् द्योतयति, तदाऽस्य कुशलधर्मसमन्वागमः स्यात् । एवं कामवीतरागस्याप्यकुशलधर्मद्योतने योज्यम् । तस्मादनिवृताव्याकृता एव । *Ibid.*

[3] Cf. **सभागता सा तु पुनर्विपाकोऽप्याप्तयो द्विधा ।**
लक्षणानि च निष्यन्दाः समापत्त्यसमन्वयाः ॥ *Ak*. II. 48.

[4] A large portion of the II *Adhyāya* of *Adv*. is lost. The III *pāda* of this *Adhyāya* might have come to an end with the discussion on the *Viprayukta-dharmas*. The IV *pāda* might have contained a discussion on such topics as *Hetu*, *Pratyaya* and *Phala*, which are dealt with in detail, in the corresponding *Akb*. II. 49—73. V. infra, *Adv. kārikā* 205.

तृतीयोऽध्यायः ।

चतुर्थपादः ।[1]

[VI B, 8. Fol. 80 a. ……[2]](1)…………।[2] द्वितीयं द्वितीयस्याः । तृतीयं तृतीयस्याः । वायुसंवर्तण्या(न्या)श्चतुर्थध्यानं शीर्षमिति ।[3]

अत्राह—चतुर्थध्याने संवर्तनी कस्मान्न भवति ? तदुच्यते—

[150] सत्त्वाख्योपद्रवाभावान्न चतुर्थेऽस्ति सूत्रतः ।
विमानस्य समत्वस्य प्रध्वंसान्नित्यता कुतः ॥[4]

चतुर्थे खलु ध्याने बाह्याध्यात्मिका अपक्षाला न विद्य[न्ते(2) तस्मान्न संवर्तनी] उत्पाद्यते । प्रथमे हि ध्याने वितर्कविचारावग्निकल्पावपक्षालभूतौ विद्येते । द्वितीये प्रीतिरप्कल्पा चेतोपहारिणी । तृतीये ध्याने आश्वास-

---

[1] A large portion of the III *Adhyāya*, (First three *pādas* and some portion of the fourth *pāda*) corresponding to the III *Kośasthāna* of *Akb.*, is lost. In this *Adhyāya*, the *Adv.* might have discussed the following topics :— (१) कामरूपारूप्यधातवः । (२) पञ्च गतयः । (३) अन्तराभवः । (४) द्वादशाङ्गः प्रतीत्यसमुत्पादः । (५) च्युत्युपपत्ती (६) भाजनलोकः (७) परमाण्वक्षरक्षणाः । (८) कल्पः । and (९) संवर्तन्यः । These topics arc discussed in full detail in the III *Kośasthāna* of *Akb.*

[2] This folio is misplaced in the sheet No. VI. The leaf is broken on the right, and a part of about an inch, which contained the number of the folio, is lost. As its preceding and following folios are also missing (Fol. 52-90), it is not possible to number this one. It is provisionally numbered 80.

[3] Prior to this, the Kośakāra discusses the following topics : (१) अथ कतीमा संवर्तन्यः ? (२) अथ कस्याः संवर्तन्याः कतमच्छीर्षं भवति ? (३) किं पुनः कारणं प्रथमद्वितीयध्यानानि तेजोजलवायुभिर्ध्वस्यन्ते ? (४) अथ चतुर्थध्याने कथं न संवर्तनी ? *Akb.* III. 100. For *saṁvartanī*, see *Vm.* XIII. 30-65.

[4] Cf. **तदपक्ष्यालसाधर्म्यान्न चतुर्थेऽस्त्यनिञ्जनात् ।**
न नित्यं सह सत्त्वेन तद्विमानोदयव्ययात् ॥ *Ak.* III. 101.

Also cf. नव अनुपुब्बनिरोधा । पठमं झानं समापन्नस्स **कामसञ्ञा निरुद्धा** होति । दुतियं झानं समापन्नस्स **वितक्कविचारा निरुद्धा होन्ति** । **ततियं झानं समापन्नस्स पीति निरुद्धा** होति । चतुत्थं झानं समापन्नस्स **अस्सासपस्सासा निरुद्धा** होन्ति…। *Dīgha*, XXXIII 3. 2. See *Aṅg.* v. p. 133.

कामाप्त[ाः] रूपाप्ताश्चैते[1] वाक्छब्दाधीनजन्मत्वात् । नैष्यन्दिका अनिवृताव्याकृताश्चैव ।[2]

यथा चैते नामादयः

तथैव च विपाकश्च साभाग्यं [प्राप्तयो द्विधा] ।[3]

[Fol. 52-90 lost][4]……

[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥[4]]

[द्वितीयोऽध्यायः समाप्तः ॥][4]

---

[1] [आरूप्याप्ता] 'ते त्वनभिलाप्याः' इति । ते त्वारूप्याप्ता नामकायादयोऽकथ्याः । वाचस्तत्राभावात् । कथं ते सन्तीति गम्यन्ते यदा ते नाभिलप्यन्ते ? तस्मात् कामरूपाप्ता एव नारूप्याप्ता इति **वैभाषिकाः** । *Sakv.* p. 186.

[2] **नैष्यन्दिकाः** सभागहेतुजनितत्वात् । **न** विपाकजा इच्छातः प्रवृत्तेः । **नौपचयिका** अरूपिणां चयाभावादिति । **अनिवृताव्याकृताश्च** । न कुशला नाकुशलाः । कस्मात् ? इतरथा ह्यदा समुच्छिन्नकुशलमूलः कुशलान् धर्मान् द्योतयति, तदाऽस्य कुशलधर्मसमन्वागमः स्यात् । एवं कामवीतरागस्याप्यकुशलधर्मद्योतने योज्यम् । तस्मादनिवृताव्याकृता एव । *Ibid.*

[3] Cf. **सभागता सा तु पुनर्विपाकोऽप्याप्तयो द्विधा ।**
लक्षणानि च निष्यन्दाः समापत्त्यसमन्वयाः ॥ *Ak.* II. 48.

[4] A large portion of the II *Adhyāya* of *Adv.* is lost. The III *pāda* of this *Adhyāya* might have come to an end with the discussion on the *Viprayukta-dharmas.* The IV *pāda* might have contained a discussion on such topics as *Hetu, Pratyaya* and *Phala,* which are dealt with in detail, in the corresponding *Akb.* II. 49—73. V. infra, *Adv. kārikā* 205.

तृतीयोऽध्यायः ।

चतुर्थपादः ।[१]

[VI B, 8. Fol. 80 a. ······२](1)·············।[२] द्वितीयं द्वितीयस्याः । तृतीयं तृतीयस्याः । वायुसंवर्तण्या(न्या)श्चतुर्थध्यानं शीर्षमिति ।[३]

अत्राह—चतुर्थध्याने संवर्तनी कस्मान्न भवति ? तदुच्यते—

[150] सत्त्वाख्योपद्रवाभावान्न चतुर्थेऽस्ति सूत्रतः ।
विमानस्य समत्वस्य प्रध्वंसान्नित्यता कुतः ॥[४]

चतुर्थे खलु ध्याने बाह्याध्यात्मिका अपक्षाला न विद्य[न्ते(2) तस्मान्न संवर्तनी] उत्पाद्यते । प्रथमे हि ध्याने वितर्कविचारावग्निकल्पावपक्षालभूतौ विद्येते । द्वितीये प्रीतिरप्कल्पा चेतोपहारिणी । तृतीये ध्याने आश्वास-

---

[१] A large portion of the III *Adhyāya*, (First three *pādas* and some portion of the fourth *pāda*) corresponding to the III *Kośasthāna* of *Akb.*, is lost. In this *Adhyāya*, the *Adv.* might have discussed the following topics :— (१) कामरूपारूप्यधातवः । (२) पञ्च गतयः । (३) अन्तराभवः । (४) द्वादशाङ्गः प्रतीत्यसमुत्पादः । (५) च्युत्युपपत्ती (६) भाजनलोकः (७) परमाण्वक्षरक्षणाः । (८) कल्पः । and (९) संवर्तन्यः । These topics are discussed in full detail in the III *Kośasthāna* of *Akb.*

[२] This folio is misplaced in the sheet No. VI. The leaf is broken on the right, and a part of about an inch, which contained the number of the folio, is lost. As its preceding and following folios are also missing (Fol. 52-90), it is not possible to number this one. It is provisionally numbered 80.

[३] Prior to this, the Kośakāra discusses the following topics : (१) अथ कतीमा संवर्तन्यः ? (२) अथ कस्याः संवर्तन्याः कतमच्छीर्षं भवति ? (३) किं पुनः कारणं प्रथमद्वितीयध्यानानि तेजोजलवायुभिर्ध्वंस्यन्ते ? (४) अथ चतुर्थध्याने कथं न संवर्तनी ? *Akb.* III. 100. For *saṁvartanī*, see *Vm.* XIII. 30-65.

[४] Cf. **तदपक्ष्यालसाधर्म्यान्न चतुर्थेऽस्त्यनिञ्जनात् ।**
न नित्यं सह सत्त्वेन तद्विमानोदयव्ययात् ॥ *Ak.* III. 101.

Also cf. नव अनुपुब्बनिरोधा । पठमं झानं समापन्नस्स **कामसञ्ञा निरुद्धा** होति । दुतियं झानं समापन्नस्स **वितक्कविचारा निरुद्धा** होन्ति । ततियं झानं समापन्नस्स **पीति निरुद्धा** होति । चतुत्थं झानं समापन्नस्स **अस्सासपस्सासा निरुद्धा** होन्ति···। *Dīgha*, XXXIII 3. 2. See *Aṅg.* v. p. 133.

प्रश्वासा वाय्वात्मकाः । इत्यतो यस्यां ध्यानसमापत्तौ यथाभूतोऽपक्षालस्तथाभूतेन बाह्येन विनाशः । चतुर्थे तु [बाह्योऽपक्षालो (3)न प्रवर्तत इति] नास्ति संवर्तनी ।[1] नित्यं तर्हि चतुर्थध्यानं प्राप्तम् । न प्राप्तम् । कस्मात् ? 'विमानस्य समत्वस्य' कर्मक्षयेन 'प्रध्वंसात्' इति ॥

कथं पुनरेताः संवर्तन्यः कया वाऽनुपूर्व्या भवन्ति ? तदुच्यते । निरन्तरं तावत्—

[151] सप्त तेजोभिरेकाऽद्भिर्गतेऽद्भिः सप्तके पुनः ।
तेजसा सप्तकान्त्यैका वायु[संवर्तनी ततः] ॥[2]

(4)[सप्त संवर्तन्यस्तेजोभिः] भवन्ति । अष्टमोऽपाम् । [एवं] सप्तको भवति । तस्मिन् सप्तकेऽतिक्रान्ते पुनस्तेजसा सप्तकः । तस्मिन्नप्यतिक्रान्ते वायुसंवर्तन्यैकया णा(ना)शो भवति । सा तु नित्यं तेजसः सप्तकपृष्ठे वायुसंवर्तनी भवति । त एते पिण्डेन भवन्ति ष[ट्पञ्चाशत्] तेजःसंवर्त[न्यः][3], सप्ताप्संवर्त[न्यः, एका वायुसंवर्तनी] ॥

(5)[किं पुनस्तत्र कारणं य]त्पश्चाद्वायुसंवर्तन्येकैव भवति ? तदुच्यते—

---

[1] शुद्धावासप्रभवादित्यपरे । नहि तैः शक्यमारूप्यान् प्रवेष्टुं नाप्यन्यत्र गन्तुमिति । नित्यं तर्हि ध्यानभाजं प्राप्नोति ?…नहि चतुर्थध्यानमेकभूमिसंबद्धम् । किं तर्हि ? विच्छिन्नस्थानान्तरं तारकावत् । तत्राप्ययं सत्त्व उपपद्यते च्यवते वा । स सार्धं विमानेनेति नास्त्यस्य नित्यत्वम् । *Akb.* III. 101. See *Asm.* p. 39.

[2] Cf. सप्ताग्निनाद्भिरेकैवं गतेऽद्भिः सप्तके पुनः ।
तेजसा सप्तकः पश्चाद्वायुसंवर्तनी ततः ॥ *Ak.* III. 102.

(Here ends the III *Kośasthāna* of *Akb.*)

Also cf. तथा हेस लोको सत्तवारेसु अग्गिना विनस्सति; अट्ठमे वारे उदकेन; पुन सत्तवारेसु अग्गिना; अट्ठमे उदकेनाति एवं अट्ठसु अट्ठकेसु परिपुण्णेसु पच्छिमवारे वातेन विनस्सति; तत्थ पठमज्झानतलं उपादाय अग्गिना, दुतियततियज्झानतलं उपादाय उदकेन, चतुत्थज्झानतलं उपादाय वातेन विनस्सति । वुत्तम्पि चेतं –

"सत्त सत्तग्गिना वारा अट्ठमे अट्ठमोदका ।
चतुसट्ठि यदा पुण्णा एको वायुवरो सिया ॥
अग्गिनाभस्सरा हेट्ठा आपेन सुभकिण्हतो ।
वेहप्फलतो वातेन एवं लोको विनस्सती"ति ॥ *A. Vibhāvinī.* p. 94.

[3] तेजःसंवर्तनीति नरकगतिमुपादाय यावद्ब्रह्मलोके कश्चित्सत्त्वो नावशिष्टो भवति तदा शून्यभाजने सप्त सूर्याः प्रादुर्भूय क्रमेणाप्मण्डलमारभ्य यावत् प्रथमं ध्यानं दहन्ति । *Aaa.* p. 259.

[152] आग्नेयात्सप्तकादेक[ः] पावनीकिमनन्तरम् ।
आयुष्परिग्रहादेवं शुभकृत्स्नायुरेधनम् ॥

एवं च कृत्वा प्रज्ञप्तिभाष्यमनुलोमितं भवति[१]—"चतुःषष्ठिःकल्पाः शुभकृत्स्नां(त्स्ना)[नां] देवनामायुष्प्रमाणम्" इति ॥[२]

अथ कस्मात्[पृथिवीसंवर्तनी न] भवति ?[३] (6)तदत्र कारणमुच्यते—

[153] वातादिदोषसाधर्म्या[त्सत्त्वा]णा(नां) [तद्विनाशकाः] ।
आध्यात्मिकेति सारूप्यान्न भूसंवर्तणी(नी) मता ॥

यथा खलु वातपित्तश्लेष्मभिस्त्रिभिः सत्त्वानां मर्मच्छेदः पृथिवीधातुत्वलक्षणो भवति तद्वदग्नि[जल]वायुभिर्भूरुत्साद्यते । किञ्च, एते [तद्विनाशकाः] ·········तन्नाशाय प्रवृत्तत्वात् । किञ्च, 'आध्यात्मिकेति सारूप्याच्च' ।(7) यथा चाध्यात्मिकयस्त्रिस्रश्चित्तस्य तयोर्भवन्ति वितर्कविचारप्रीत्युच्छ्वासप्रश्वासलक्षणैस्त[था]बाह्या अप्युपद्रवा वह्न्यम्भोवायुप्रकोपलक्षणा भवन्तीति ॥

अभिधर्मदीपे [विभाषाप्रभायां वृत्तौ तृतीयस्याध्यायस्य(8)च]तुर्थः पादः समाप्तः ।।[४]

[तृतीयोऽध्यायः समाप्तः ।।]

---

[१] **एवं च कृत्वेति ।** यस्मादष्टकृत्वस्तेजःसंवर्तनीसप्तका इति षट्पञ्चाशत्तेजःसंवर्तन्यो भवन्ति सप्ताप्संवर्तन्यः, एका वायुसंवर्तनीति चतुःषष्टिसंवर्तन्यो भवन्ति । तस्माद्यदुक्तं **प्रज्ञप्तिभाष्ये**···तत्सूक्तं भवति ।···शुभकृत्स्नानां चतुःषष्टियोजनानां शरीरप्रमाणम् । शरीरप्रमाणेन च तेषामायुःप्रमाणमुक्तम् । **'आयुस्तु कल्पैः स्वाश्रयम्'** इति वचनात् । एकैका संवर्तनी महाकल्प इति कृत्वा । इयता हि कालेन तेषामायुषः परिसमाप्तिरिति । *Svkv*. p. 344.

[२] Cf. तेसु···सुभकिण्हानं चतुसट्ठि कप्पानि आयुप्पमाणं । *A. Saṅgaho*. v. 17. —एवं परिच्छिन्नस्स अन्तराकप्पस्स वसेन चतुसट्ठि अन्तरकप्पप्पमाणो होति । वीसति अन्तरकप्पप्पमाणोति च वदन्ति । *A. Vibhāvinī*. p. 94.

[३] एकत्र ध्याने सत्त्वाः समं संवर्तन्ते एतस्यामिति संवर्तनी । सप्तभिः सूर्यैस्तेजःसंवर्तनी भवति, वर्षोदकेनाप्संवर्तनी, वायुप्रकोपाद्वायुसंवर्तनी । ताभिश्च **भाजनानां** सूक्ष्मोप्यवयवो नावशिष्यते । *Akb*. III. 100 ab. कस्मात् पृथिवी संवर्तनी न भवति ? पृथिव्येह हि **भाजनाख्या** तस्यां तेजोजलवायुभिर्विरोधो न पृथिव्येति । *Akb*. III. 100 a.

[४] V. supra, p. 115, n. 1.

चतुर्थोऽध्यायः ।

प्रथमः पादः ।

अथ यदुक्तं ["सत्त्वकर्मद्विधाख्येन पूरितं वायुमण्डलम्"] इत्येतदुच्यताम्। कानि तानि कियन्ति वा कर्माणीत्यतः कर्माणि प्रस्तूयन्ते।

[154] सत्त्वोपपत्तिहेतूनां [विपत्संप]द्विधायिणा(ना)म् ।
[लोकवैचित्र्यकर्तृणां कर्म हेतुरितीष्यते ॥][1]

(9[दृश्यते] खलु सत्त्वानां हीनमध्योत्कृष्टजातिपरिग्रहायामाश्रयभोगादिसम्पद्विपत्तिश्च। यच्च द्विविधस्य लोकस्य विचित्रता तत्र कर्माणि हेतुः। अतस्तेषां तत्त्वानि वक्ष्यामि। यदप्युक्तं कानि कियन्ति वेति तदुपव्याख्यायते॥

सूत्रे द्वे कर्म[णी] निर्दि[श्योक्तम—"द्वे कर्मणी चेतना कर्म चेतयित्वा] [VI. A. 8. Fol. 80 b.][2](1) च" इति।[3] तानि पुनस्त्रीण्युक्तानि। कथम् ?

[155] कायिकं वाङ्मयं चैव चेतनाख्यं च मानसम् ।[4]
कर्माण्येतानि लोकस्य कारणं नेश्वरादयः ॥

एतानि खलु त्रीणि कर्माणि शुभाशुभानि द्विविधस्यापि सत्त्वभाजनलोकस्य हिताहितनिमित्तान्युत्पत्तौ च सम्पत्तौ च वैचित्र्यस्य च कारणम्।[5] नेश्वरकालपुरुषप्रधानादयः॥

---

[1] Cf. **कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत्।** *Ak*. IV. 1 ab.

[2] V. supra, p. 115, n. 2.

[3] Cf. चेतनाहं भिक्खवे कम्मं वदामि, चेतयित्वा कम्मं करोति। *Aṅg*. III. p. 415.

[4] Cf. **चेतना मानसं कर्म तज्जे वाक्कायकर्मणी।** *Ak*. IV. 1 cd.
Also cf. चेतना कर्म कतमत्। पुण्यकर्म अपुण्यकर्म आनिञ्ज्यकर्म च। चेतयित्वा कर्म कतमत्। कायकर्म वाक्कर्म मनस्कर्म च। *Asm*. p. 53.

[5] For a controversy '**सब्बमिदं कम्मतो ति ?**' See *Kv*. XVII. 3—इदानि **सब्बमिदं कम्मतोति कथा नाम होति।** तत्थ

कम्मुना वत्तति लोको कम्मुना वत्तति पजा ।
कम्मनिबन्धना सत्ता रथस्साणीव यायतो ॥

(*Sutta-nipāta*, 654.) ति सुत्तं निस्साय सब्बमिदं कम्मतोव होतीति येसं लद्धि, सेय्यथापि **राजगिरिकानञ्चेव सिद्धत्थिकानञ्च**।…'कम्मुना वत्तती'ति सुत्तं 'नत्थि कम्मं'ति अकम्मवादितं पटिक्खिपित्वा 'अत्थि कम्मं'ति कम्मवादितं कम्मस्सकतं दीपेति, न सब्बस्सेब कम्मतो निब्बत्ति। *KvA*. XVII. 3. See *Milinda*, *pp*. 137 ff. and *Kv*. VII. 7-8, XII. 3, XVI. 8.

तत्र ताव(2)द्यथा नेश्वरः कारणं तथा पूर्वमुल्लिखितम्[१], इदानीं तु विस्पष्टतरमाविष्क्रियते—

[156] वैश्वरूप्यात्क्रमोत्पादात्तद्वदन्यत्प्रसङ्गतः ।

यदि खल्वेको नित्यश्चेश्वरो लोकस्योत्पत्तिस्थितिप्रलयकारणं स्यात्, तेन खलु कारणानुविधायित्वात्कार्यस्यैतत् त्रयं विरुद्धं युगपत् स्यात् । न चैतद् दृष्टमिष्टं वेत्यसदेतत् । किञ्च, (3)लोकश्चाप्यविचित्रः स्यात् । युगपच्चोत्पद्येत नग्नः कपालपाणिश्च पर्यटेत्तदिच्छानुविधायी च स्यात् । न चैतदेवम् । तस्मान्नेश्वरः कारणम् ।

ग्रामाद्यधिपतिविशेषोत्कर्षावस्थानादीश्वरप्रसिद्धिरिति चेत् । न । ग्रामाधिकृतादिह परतन्त्रत्वानित्यत्वकार्यान्तरशक्तिविघातादिदर्शना(ना)त्, गोमयपिण्डोप(4)मसूत्रोक्तेश्च ।[2]

---

[१] The Kośakāra deals with this topic not here, but in the II *Kośasthāna* of *Ak.*—'नेश्वरादेः क्रमादिभिः' II. 64 d. It is possible that the *Adv.* also migh; have discussed this topic in its last portion of the II *Adhyāya*, which is lost. (V. supra, p. 114, n. 3.)

The *Brahmajāla sutta* gives the following origin of the concept of God: होति खो सो समयो यं कदाचि करहचि···अयं लोको विवट्टति···सुञ्ञं ब्रह्मविमानं पातुभवति । अथ खो अञ्ञतरो सत्तो···आभस्सरकाया चवित्वा सुञ्ञं ब्रह्मविमानं उपपज्जति ।···तत्थ तस्स एककस्स दीघरत्तं निवुसितत्ता अनभिरति परितस्सना उपपज्जति । 'अहो वत अञ्ञेपि सत्ता इत्थत्तं आगच्छेय्युं' ति । अथ अञ्ञतरेपि सत्ता···ब्रह्मविमानं उपपज्जन्ति तस्स सत्तस्स सहब्यतं । तत्र भिक्खवे यो सो सत्तो पठमं उपपन्नो तस्स एवं होतिः—'**अहमस्मि ब्रह्मा महाब्रह्मा अभिभू अनभिभूतो अञ्ञादत्थुदसो वसवत्ती इस्सरो कत्ता निम्माता सेट्ठो सज्जिता वसी पिता भूतभव्यानं, मया इमे निम्मिता ।···ममं च मनो पणिधि इमे च सत्ता इत्थत्तं आगता ।** येपि ते सत्ता पच्छा उपपन्ना तेसम्पि एवं होतिः अयं खो भवं ब्रह्मा···**इमिना मयं निम्मिता ।** *Dīgha*. I. 2. 2-5.

For a discussion on ईश्वरसिद्धि, see *Nyāyasūtra*, IV. 1. 14-43, *Nyāyāvatāraṭīkā*, pp. 457-467, *Nyāyakandali-ṭīkā*, p. 54, *Nyāyamañjarī*, p. 178 and *Nyayāvatāra-vārtika-tātparya-ṭīkā*, p. 598.

For the refutation of ईश्वरकर्तृत्ववाद, see *Ślokavārtika*, (*sambandhā. kshepa*,) v. 44, *Pramāṇavārtika*, II. 10-28, *Bodhicharyāvatāra-Pañjikā*, IX. 119, *Tattvasangraha*, 46-87, *Nyāyāvatārasūtravārtika-vṛitti*, *kārikā* 8 and *Nyāyakumudachandra*, pp. 101-109.

[२] Cf. अथ खो भगवा परित्तं **गोमयपिण्डं** पाणिना गहेत्वा तं एतदवोच···एत्तको पि खो भिक्खु अत्तपटिलाभो नत्थि निच्चो धुवो सस्सतो अविपरिणामधम्मो तथेव ठस्सति । *S*. III. p. 142.

भागवतादितन्निन्दादर्शणा(ना)च्च । भागवताद्या हि महेश्वरं णि(नि)न्द्यन्तो दृश्यन्ते । माहेश्वराश्च विष्णुमिति ।

कारणसापेक्षं तपःसामर्थ्यादुत्पादयतीति चेत् । तत्रापदिश्यते ।

नान्यापेक्षा तपोयोगो पक्षहान्यादिदोषतः ॥

यदि खलु सहकारिकारणापेक्षः तपोबललब्ध्यैश्व(5)र्यश्च लोकं सृजति कुम्भकारवद्घटादीन् । न । चै(ए)वं सति पूर्वपक्षोत्सर्गः कृतो भवति । यदुक्तं नित्यश्चैकश्च स्वतन्त्रः कारणमिति तद्धीनम् । तपोबलसामर्थ्याभ्युपगमे चानित्यत्वं पारतन्त्र्यं चाभ्युपगतं भवति । तदभ्युपगमाच्चानैश्वर्यमिति । एतेन कालपुरुषप्रधानादिकारणपरिग्रहाः[१] (6)प्रत्यूढा वेदितव्याः ॥

यदि खलु कर्म कारणं नेश्वरादयः कथं तर्हि लोकस्तत्कारणपरिग्रहं करोतीति ? अत्र ब्रूमः—

[157] कर्मणां बोध्यते शक्तिर्विधिकालग्रहादिभिः ।
यतोऽतस्तेषु ताच्छब्दयं गौन्या(ण्या) वृत्त्या प्रयुज्यते ॥

यथोक्तम्—

"विधिर्विधानं नियतिः स्वभावः
कालो ग्रहा ईश्वरकर्मदैवम् ।
पुण्यानि भा[(7)ग्या]णि(नि) कृतान्तयोगः
पर्यायनामाणि(नि) पुराकृतस्य ॥"[२]

---

[१] तीणिमानि भिक्खवे तित्थायतनानि यानि पण्डितेहि समनुयुञ्जियमानानि···अकिरियाय सण्ठहन्ति । कतमानि तीणि ? सन्ति भिक्खवे एके समणब्राह्मणा एवं वादिनो···यं किञ्चायं पुरिसपुग्गलो पटिसंवेदेति···सब्बं तं **पुब्बे कतहेतू** ति । सन्ति···एके···सब्बं तं **इस्सरनिम्माणहेतू** ति । सन्ति···एके···सब्बं तं **अहेतु-अप्पच्चया** ति । *Aṅg.* I. p. 173.

[२] Cf. कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुषेति चिन्त्याः ।
संयोग एषां ननु आत्मभावाद्
आत्माप्यनीशः सुखदुःखहेतोः ॥ *Śwetāśwatara Up.* I. 2.
स्वभावमीश्वरं कालं यदृच्छां नियतिं तथा ।
परिणामं च मन्यन्ते प्रकृतिं पृथुदर्शिनः ॥ *Suśruta-saṁhitā*, I. 11.

For the refutation of *kāla*, *swabhāva* and *niyati*, see *Sūtrakṛitāṅga-Śīlāṅka Ṭīkā*, I. 2, 1-10. V. supra, p. 119, n. 1.

किञ्च, यतश्च

> "ग्रहयोगो भुजास्पन्दः स्वप्नः पूर्णघटादयः।
> सूचयन्ति नृणामेते वृत्तिलाभं स्वकर्मणः॥"

इत्यतोऽपि तेषु ताच्छब्द्यं प्रयुज्यत इति॥

कथं पुण(न)रेषां त्रयाणां कर्मणां व्यवस्थानम्? यद्याश्रयतः, सर्वेषां कायाश्रितत्वादेकत्वम्। स्वभाव[(8)तश्चे]त्, वाक्कर्मैवैकं प्राप्तम्। समुत्थानतश्चेत्, मनःकर्मैकं प्राप्तम्। सर्वेषां मनसोत्थापितत्वात्। त्रिभिरपीति वैभाषिकाः॥

ते पुण(न)रेते प्रथमे द्वे कर्मणी प्रत्येकं द्विप्रभेदे। कथम्? तदपदिश्यते—

[158 ab.] पूर्वे विज्ञप्त्यविज्ञप्ती[2]

कायकर्म खलु कायविज्ञप्तिः कायाविज्ञप्तिश्च। वाक्कर्मापि वाग्विज्ञप्तिर्वा(9)गविज्ञप्तिश्च। तृतीयं तु कर्म—

चेतना मानसी क्रिया।

उक्तं हि भगवता—"चेतना कर्म चेतयित्वा।" तत्पुनस्त्रिधोक्तम्—"कायकर्म वाक्कर्म मनस्कर्म च" इति।[3]

किं स्वभावं पुनरिदं कायकर्म किं तावत्कायस्वभावम्? यथा वाक्कर्म

---

[1] यथाक्रमं त्रिभिः कारणैस्त्रयाणामिति **वैभाषिकाः**। *Akb.* IV. 1 ab.

[2] Cf. **ते तु विज्ञप्त्यविज्ञप्ती**। *Ak.* IV. 2 a.

See *Aam.* pp. 47—8.

[3] किं पनेतं कम्मं नामा ति? चेतना चेव, एकच्चे च चेतनासम्पयुत्ता धम्मा।

तत्थ चेतनाय कम्मभावे इमानि सुत्तानि—**चेतनाहं भिक्खवे कम्मं वदामि, चेतयित्वा कम्मं करोति कायेन वाचाय मनसा** [*Aṅg.* III. p. 415]……*Dhs A.* III. 115-6.—**चेतयित्वा कम्मं करोतीति** एत्थ यस्मा पुरिमचेतनाय चेतयित्वा सन्निट्ठानकम्मं करोति। तस्मा चेतनापुब्बकं कम्मं, तं चेतनासभावमेवाति चेतनं अहं कम्मं वदामीति अत्थो। अथवा समानकालत्तेपि कारणक्रिया पुब्बकाला विय वत्तुं युत्ता। फलक्रिया च अपरकाला विय। यस्मा च चेतनाय चेतयित्वा कायवाचाहि चोपनक्रियं, मनसा च अभिज्झादिक्रियं करोति तस्मा तस्सा क्रियाय कारिकं चेतनं अहं कम्मं वदामीति अत्थो। *A. Mūlaṭīkā*, p. 58.

[158.

वाक्स्वभावम्, आहोस्वित्कायादन्यद्यथा मनस्कर्म मनसोन्यदित्येतदा[ह]।
[Folios upto No. 90 lost][१]……………

[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ चतुर्थाध्यायस्य प्रथमः पादः][२]

---

[१] Folios following this, upto No. 90, are lost. V. supra, p. 115, n. 2. In these lost folios, the *Adv.* might have discussed the following topics, which are dealt with in the corresponding *Akb.* IV. 2—30.

(१) कायविज्ञप्तिः (संस्थानं कायविज्ञप्तिः, न गतिः)।
(२) वाग्विज्ञप्तिः।
(३) विज्ञप्त्यविज्ञप्त्याख्यकर्मणी।
(४) कुशलाकुशलाव्याकृतकर्माणि।
(५) त्रिविधाऽविज्ञप्तिः।
(६) त्रिविधः संवरः।
(७) उपवासकः, उपवासस्थः, भिक्षुश्च।
(८) अथैषां संवराणां केन कः समन्वागतः ?
(९) कः कतमया विज्ञप्त्याऽविज्ञप्त्या वा कियन्तं कालं समन्वागतः ?
(१०) कोऽयमसंवरो नाम ?
(११) अथैते संवराः कथं लभ्यन्ते ?
(१२) प्रातिमोक्षसंवरः समादीयमानः कियन्तं कालं समादातव्यः ?
(१३) असंवरस्य कः कालनियमः ?
(१४) अहोरात्रं गृह्यमाणः उपवासः कथं गृहीतव्यः ?
(१५) किमर्थं पुनरष्टांगान्युपादीयन्ते ?
(१६) किं खल्वयमुपवासकस्यैवोपवास आहोस्विदन्यस्यापि ?

[२] A major portion of the I *pāda* of this *Adhyāya* is lost.

चतुर्थाध्याये

द्वितीयपादः ।[1]

……[III. B, 5. Fol. 91 a][1] (1)पराभवन्तीत्यपदिश्यते ।

[159] अन्नमत्यग्निणि(नि)र्दग्धं यथा स्थाली च संस्कृता ।
पापदृष्टेस्तथा शीलं शाठ्येर्ष्यादिक्षतात्मनः ॥

[160] संवृत्सद्दृष्ट्युपेतातो भिक्षुत्वं परमार्थतः ।
एकसम्पत्तु संवृत्या द्वयाभावे द्विधाऽपि न ॥

दृष्टिसम्पद्विशुद्धा खलु श[ील]सम्पत् 'भिक्षुत्वं परमार्थतः' । अन्यतरविकलस्तु संवृत्त्या भिक्षुर्भवति । (2)द्व्यङ्गविकलस्तु नापि संवृत्या नापि परमार्थत इति ।[2]

[3]यदि खलु विना संवरेणाष्टौ निकाया[4] न व्यवस्थाप्यन्ते कथं तर्हि

---

[1] The beginning portion of the II *pāda* is lost in the lost folios. (V. supra, p. 122. n. 1.) [2] V. infra, *Adv. kārikā* 169.

[3] The problem under discussion is *upavāsa-saṁvara*. A question is raised, whether a layman *(upāsaka)* practising the *upavāsa*, can be said to be in possession of the *upavāsa-saṁvara*, even without his declaration of its acceptance in a prescribed ceremonial form? The Kośakāra explains this:—

किं खल्वयमुपवासकस्यैव आहोस्विदन्यस्यापि ? **अन्यस्याप्युपवासोऽस्ति शरणं त्वगतस्य न ।** अनुपवासकोऽपि यस्तमहोरात्रं बुद्धधर्मसंघान् शरणं गत्वोपवासं गृह्णाति तस्योत्पद्यते उपवाससंवरो नान्यथा । *Akb.* IV. 30 ab. This raises a further question whether one becomes *Upavāsaka* merely by the *Tri-saraṇa-gamana*? तत् किं शरणगमनादेवोपवासको भवति ? भवतीति **बहिर्देशिकाः** । न विना संवरेणेति **काश्मीराः** । **उपासकत्वोपगमात्संवृदुक्तिस्तु भिक्षुवत्** । उपासकत्वाभ्युपगमादेवास्योपवासकसंवरो जायते । …**न तु विना संवरेणोपवासकोऽस्ति** । *Ibid.* 30 cd.

Cf. त्रिशरणपरिग्रहात् पञ्चशिक्षापदपरिग्रहाच्चोपासकस्तथोपासिकेति द्विधा भेदः । **त्रिशरणपरिगृहीतमुपासकं म आचार्यो धारयतु । तथा त्रिशरणगतं पञ्च शिक्षापदपरिगृहीतमुपासकं म आचार्यो धारयत्विति विनये द्विधा पाठात् ।** *Aaa.* p. 229.

[4] The eight *nikāyas* refer to the eight kinds of the प्रातिमोक्षसंवर :— भिक्षुसंवर, भिक्षुणीसंवर, शिक्षमाणसंवर, श्रामणेरसंवर, श्रामणेरिकासंवर,, उपासकसंवर,

भगवतोक्तैः—"एकदेशकारी, प्रदेशकारी, यद्भूयस्कारी, परिपूर्णकारी" इत्यत्राप्ययमर्थो दृश्यते ?[१] कश्चित्खल्वकार्यैकदेशविरतिक्षमो भवति। कश्चिद्यावत्समग्रः(ग्र)दौःशी(3)ल्यविरतिक्षमः। इत्यतो भगवानकार्यैकदेशविरत्याऽप्यु-

---

उपासिकासंवर and उपवासस्थसंवर। Of these, the *upavāsastha-saṁvara* consists of eight *aṅgas*: चत्वारि तावच्छीलांगानि यावन्मृषावादविरतिः। एकमप्रमादांगं मद्यपानाद्विरतिः। त्रीणि व्रतांगानि यावदकालभोजनाद्विरतिः। But according to the Vaibhāshikas, it primarily means अकालभोजनविरति।—केचित्तु खल्वकालभोजनात् प्रतिविरतिमेवोपवासं मन्यन्ते। तस्य शेषाण्यष्टांगानीति। नृत्यगीतवादित्रं गन्धमाल्यविलेपनं च द्वयं कृत्वा। एवं तु सति सूत्रपाठो न युज्येत।··· *Akb*. IV. 29 cd.

[१] Cf. **सर्वे चेत्संवृता एकदेशकार्यादयः कथम्।**

यदि सर्व एवोपासका उपासकसंवरस्थाः कथं भगवता एकदेशकारी···परिपूर्णकारी चोपासक उक्तः ?

तत्पालनात् किल प्रोक्ताः।

यो हि यच्छिक्षापदं पालयति स तत्कारीत्युक्तः। सर्वे तु समं संवरस्थाः।

इदमुत्सूत्रं वर्तते। किमत्रोत्सूत्रम्। उपासकत्वाभ्युपगमादेव संवरलाभो···इति।··· यदि तर्हि विना संवरेणोपवासकः स्यात् विकलेन वा भिक्षुश्रामणेरावपि स्याताम्।···विनापि हि संवरेणोपवासकः प्रज्ञप्तितो न तु भिक्षुश्रामणेराविति ते त्वेतन्नेच्छन्ति **काश्मीराः**। *Akb*. IV. 31.

The Kośakāra in *Akb*. IV. 29-31, deals with the definition of an *upāsaka* and the *upavāsa-saṁvara*. For various views on this, see *LVPAk*. IV. pp. 70 ff.

Also cf. कित्तावता नु खो भन्ते उपासको होती ति ?

(१) यतो खो **महानाम** बुद्धं सरणं गतो होति, धम्मं सरणं गतो होति, संघं सरणं गतो होति : एत्तावता खो महानाम उपासको होतीति। *Aṅg*. IV. p. 220.

(२) एसाहं भगवन्तं **गोतमं** सरणं गच्छामि धम्मं च भिक्खु संघञ्च। उपासकं मं भवं गोतमो धारेतु अज्जतग्गे पाणुपेतं सरणं गतं ति। *Aṅg*. I. p. 56.

(३) नवहि अंगेहि समन्नागतो भिक्खवे उपोसथो उपवुत्थो महाफलो होति महानिसंसो···।···इध भिक्खवे अरियसावको इति पटिसञ्चिक्खति 'यावजीवं अरहन्तो पाणातिपातं पहाय...विहरन्ति, अहम्पज्ज इमञ्च रत्तिं इमञ्च दिवसं पाणातिपातं पहाय-पाणातिपाता पटिविरतो···विहरामि।' इमिना पठमेन अंगेन समन्नागतो होति।···अदिन्नादाना पटिविरतो होमि···अब्रह्मचर्यं पहाय···मुसवादा पटिविरतो···सुरामेरयमज्जपमादट्ठाना पटिविरतो···एकभत्तिको रत्तूपरतो······नच्चगीतवादितविसूकदस्सनमालागन्धविलेपनधारणमण्डनविभूसनट्ठाना पटिविरतो···उच्चासयनमहासयनापटिविरतो होति। इध भिक्खवे अरियसावको मेत्तासहगतेन चेतसा···विहरति···इमिना **नवमेन** अंगेन समन्नागतो होति। *Aṅg*. IV. pp. 388 ff.

पासकत्वं शास्ति । न हि सर्वशीलविकलः कश्चिच्छरणगमनेच्छामात्रकेणोपासको भवति षडङ्गौषधैकद्व्यङ्गवैकल्योपयोगवदिति ॥

अथ यदुक्तम्—"बुद्धं धर्मं संघं शरणं गच्छति" इति तत्क एते बुद्धादयः ?[१] तदिदमभिधीयते—

[161] विगतावरणे ज्ञा(4)ने बुद्धोक्तेर्मुख्यकल्पना ।
तदाश्रये फले चापि विज्ञेया गुणकल्पना ॥

द्विविध[ः] खलु बुद्धः संवृत्या परमार्थतश्च । तत्र परमार्थतो यथोक्तं शास्त्रे—"यो बुद्धं शरणं गच्छति किमसौ शरणं गच्छति ? तानेवासौ बुद्धक[ा]रकानशैक्षान्धर्मांञ्छरणं गच्छति ।[२] ते हि बुद्धशब्दप्रवृत्तिनिमित्तचिह्नम् ।" इति । तेभ्योऽपि निराव(5)रणं ज्ञानं प्रधानं सर्वज्ञ[3] इति लोकप्रसिद्ध एष तावत् पारमार्थिको बुद्धः । संवृत्यापि 'तदाश्रये' द्वात्रिंशतालक्षणैरशीत्या चानुव्यञ्जनैर्विराजिते रूपकायेऽपि बुद्धाख्येति[४] । तत्फले च बलवैशारद्यमहाकरुणादिषु[५] बुद्धोक्तिरिति ॥

---

[१] बुद्धसंघकरान्धर्मानशैक्षानुभयांश्च स: ।
निर्वाणं चेति शरणं यो याति शरणत्रयम् ॥ *Ak*. IV. 32.

यो बुद्धं शरणं गच्छति, अशैक्षानसौ बुद्धकारकान् धर्मान् शरणं गच्छति…। यद्यशैक्षा धर्मा एव बुद्धः कथं तथागतस्यान्तिके दुष्टचित्तरुधिरोत्पादनादानन्तर्यं भवति ? आश्रयविपादनात्तेऽपि विपादिता भवन्तीति वैभाषिकाः । शास्त्रं तु नैव वाचकमशैक्षा धर्मा एव बुद्ध इति । किं तर्हि । बुद्धकारका इति । *Akb*. IV. 32.

[२] Cf. तथाहि त्राणार्थः शरणार्थो वर्ण्यते यश्च बुद्धं शरणं गच्छति । सोऽशैक्षान् बुद्धकारकान्धर्मान् शरणं गच्छति । *Aaa*. p. 134.

[३] Cf. तत्र सर्वज्ञता बुद्धत्वम् । बुद्धकरकाः धर्माः सर्वाकारज्ञतालक्षणाः धर्माः । *Aaa*. p. 110. Also cf. यं पन किञ्चि अत्थि ञेय्यं नाम, सब्बस्सेव बुद्धत्ता विमोक्खन्तिकञ्ञाणवसेन बुद्धो । यस्मा वा चत्तारि सच्चानि अत्तना पि बुज्झि, अञ्ञे पि सत्ते बोधेसि तस्मा…बुद्धो । *Vm*. VII. 52. For a discussion on the *sarvajñatva* of Buddha, vide *Vm T*. p. 190, *Pramāṇa-vārtikavṛitti*, I. 30-35. and *Tattvasaṅgraha*, pp. 846 ff. For a refutation of *sarvajñavāda*, see *Ślokavārtika*, 2. 110-143.

[४] The Ḳośakāra does not hold this view :—'रूपकायस्य पूर्वं पश्चाच्चाविशेषात् । *Akb*. IV. 34. 'रूपकायस्य पूर्वं पश्चाच्चाविशेषादिति' किं ? न रूपकायं शरणं गच्छतीति सम्बन्धः । यादृशो बोधिसत्त्वावस्थायां रूपकायस्तादृशः पश्चादपीति । *Sakv*. p. 377.

[५] यो वुद्धं शरणं गच्छतीति सम्बन्धः । सोऽष्टादशावेणिकान् बुद्धधर्मानित्यपरे । *Akb*. IV. 34. See बोधिया बुद्धो ति कथा । *Kv*. IV. 6.

[162] शाश्वतत्वशुभत्वाभ्यां सर्वाण(न)र्थनिवृत्तितः ।
मुख्यकल्पनया तद्बुद्ध(6)र्मो निर्वाणमुच्यते ॥[1]

नित्याविकृतस्वलक्षणे(ण)धारणात्तत्प्राप्तानां चात्यन्तधारणे निर्वाणं पारमार्थिको धर्मः। गुणकल्पनया तु प्रत्येकबुद्धबोधिसत्त्वसन्तानिको मार्गः। त्रीणि च पिटकानि धर्मो निर्वाणप्रापकत्वात् ॥

[163] आर्याः शिष्यगुणाः संघस्तथैव परमार्थतः ।

नवानामशैक्षाणामष्टादशा(7)नां च शैक्षाणां[2] शिष्याणां सन्ताने यो मार्गः स पारमार्थिकः संघ इत्युच्यते। संवृत्या तु पृथग्जनकल्याणकभिक्षुसंघ इत्यपदिश्यते।[3]

एतान्यो याति शरणं स याति शरणत्रयम् ॥

एतान्यथोक्तलक्षणान् बुद्धधर्मसंघान् शरणं गच्छति 'यो याति शरणत्रयम्' इति ॥[4]

---

[1] Cf. धम्मं ति **परियत्तिधम्मेन सद्धिं** नवविधम्पि लोकुत्तरधम्मं। *Vm T.* p. 180.

[2] "**अष्टादश शैक्षाः कतमे ?** स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नकः। स्रोतापन्नः। सकृदागामिफलसाक्षात्क्रियायै प्रतिपन्नकः। सकृदागामी। अनागामिफलसाक्षात्क्रियायै प्रतिपन्नकः। अनागामी। अर्हत्त्वफलसाक्षात्क्रियायै प्रतिपन्नकः। श्रद्धानुसारी। धर्मानुसारी। श्रद्धाधिमुक्तः। दृष्टिप्राप्तः। कुलंकुलः। एकवीचिकः। अन्तरापरिनिर्वायी। उपपद्यपरिनिर्वायी। साभिसंस्कारपरिनिर्वायी। अनभिसंस्कारपरिनिर्वायी। ऊर्द्ध्वस्रोतः। इतीमे गृहपतेऽष्टादश शैक्षाः।

नवाशैक्षाः कतमे ? परिहाणधर्मा। चेतनाधर्मा। अनुरक्षणाधर्मा। स्थिताकम्प्यः। प्रतिवेधनाभव्यः। अकोप्यधर्मा। चेतोविमुक्तः। प्रज्ञाविमुक्तः। उभतोभागविमुक्तः। इतीमे गृहपते नवाशैक्षा इति।" *Sakv.* pp. 566-7.

See *Vm.* VII. 93, *Asm.* p. 87 and *Puggala-paññatti*, chapter I.

[3] Cf. *Kv.* XVII. 6-9.—इदानि **न वत्तब्बं संघो दक्खिणं पटिगण्हातीति कथा** नाम होति। तत्थ परमत्थतो मग्गफलानेव संघो, मग्गफलेहि अञ्ञो संघो नाम नत्थि···इति येसं लद्धि, सेय्यथापि एतरहि **महासुञ्ञवादीसङ्खातानं वेपुल्लकानं**।···न च मग्गफलानेव संघो, मग्गफलपातुभावपरिसुद्धे पन खन्धे उपादाय पञ्ञत्ता अट्ठपुग्गला संघो···। *KvA.* XVII. 6.

[4] Cf. सर्वो बुद्धशरणं गच्छन् किं शरणं गच्छति ?···शरणमसौ गच्छति सर्वाशैक्षनिष्पन्नधर्मान्।···शरणं तथा गच्छति विरागं निरोधं निर्वाणम् इति धर्मशरणगमनम्।···शरणमसौ गच्छति सर्वशैक्षाशैक्षनिष्पन्नसंघधर्मान्। इति संघशरणगमनम्। *Jpś.* p. 37.

किं स्वभावानि पुनः शरणगमनानि ? (8)वाग्विज्ञप्तितत्समुत्थधर्मस्वभावानि ॥

कः पुनः शरणार्थः ? त्राणार्थः शरणार्थः । तदाश्रयेण सर्वदुःखात्यन्तविमोक्षात् । उक्तं हि भगवता—

> [१] "बहवः शरणं यान्ति पर्वतांश्च वनानि च ।
> आरामांश्चैत्यवृक्षांश्च मनुष्या भयतर्जिताः ॥
> न चैतच्छरणं श्रेष्ठं नैतच्छरणमुत्तमम् ।
> नैतच्छरणमागम्य सर्वदुःखात्प्रमु(9)च्यते ॥
> यस्तु बुद्धं च धर्मं च संघं च शरणं गतः ।
> चत्वारि चार्यसत्यानि पश्यति प्रज्ञया यदा ॥
> दुःखं दुःखसमुत्पादं दुःखस्य समतिक्रमम् ।
> आर्यं चाष्टांगिकं मार्गं क्षेमं निर्वाणगामिनम् ॥
> एतद्धि शरणं श्रेष्ठमेतच्छरणमुत्तमम् ।
> एतच्छरणमागम्य सर्वदुःखात्प्रमुच्यते ॥" इति ।[२]

अत एव शरणगमनानि [III. A, 5. Fol. 91 b.] स(1)र्वसंवरसमादानेषु द्वारभूतानि, दृष्टिसंपन्नस्य तेषां प्ररोहात् ।

किं पुनः कारणं काममिथ्याचारादेवोपासकस्य विरतिः शिक्षापदेषु व्यवस्थापिता न सर्वस्मादब्रह्मचर्यात् ? अन्येभ्यश्च प्रकृतिसावद्येभ्यो मृषावाद एव शिक्षापदेषु व्यवस्थाप्यते, न पारुष्यादि ? सर्वेभ्यश्च प्रतिपक्षे(क्षेप)णसावद्येभ्यः (2)मद्यपानादेव विरतिः शिक्षापदं व्यवस्थापितम् ? तदुच्यते—

[164] मिथ्याचारः सतां गर्ह्यात्परत्राकरणाप्तितः ।[२]

---

[१] Quoted in *Akb.* IV. 32.

Cf. बहुं वे सरणं यन्ति पब्बतानि वनानि च ।
आरामरुक्खचेत्यानि मनुस्सा भयतज्जिता ।।
नेतं खो सरणं खेमं नेतं सरणमुत्तमं ।
नेतं सरणमागम्म सब्बदुक्खा पमुच्चति ।।
यो च बुद्धञ्च धम्मञ्च सङ्घञ्च सरणं गतो ।
चत्तारि अरियसच्चानि सम्मप्पञ्ञाय पस्सति ।।
दुक्खं दुक्खसमुप्पादं दुक्खस्स च अतिक्कमं ।
अरियञ्चट्ठङ्गिकं मग्गं दुक्खूपसमगामिनं ।।
एतं खो सरणं खेमं एतं सरणमुत्तमं ।
एतं सरणमागम्म सब्बदुक्खा पमुच्चति ।। *Dhammapada*, XV. 10-14.

[२] Cf. मिथ्याचारातिगर्ह्यत्वात्सौकर्यादक्रियाप्तितः । *Ak.* IV. 33 ab.

पापिष्ठत्वान्मृषावादो मद्यपाणं(नं) स्मृतिक्षयात् ॥[१]

काममिथ्याचारो हि लोकेऽत्यर्थं गर्हितः। परेषां दारोपघातादापायिकत्वाच्च। न तथाऽब्रह्मचर्यम्। सुकरा च गृहस्थस्य काममिथ्याचारवि(3)रतिः, दुष्करा त्वब्रह्मचर्यात्। आर्यश्चाकरणसंवरं काममिथ्याचारादेव जन्मान्तरितोऽपि लभते न त्वब्रह्मचर्यात्।

मृषावादोऽपि भगवता पापिष्ठत्वाद्राहुलमुद्दिश्य परमेनादरेणोक्तः—"यस्य राहुल मृषावादे नास्ति लज्जा नास्ति कौकृत्यं नाहं तस्य किञ्चिदकरणीयं वदामि" इति।[२]

मद्यपानेऽपि स्मृतिलो(4)पो भवति, सर्वशिक्षापदक्षोभो भवतीत्यतः प्रतिक्षेपणसावद्यमपि सन्मद्यपाणं(नं) कुशाग्रेणापि भगवता नाभ्यनुज्ञातम् ॥[३]

इदमिदानीमुच्यताम्। य एते त्रयः प्रातिमोक्षध्यानानास्रवसंवराः[४] किमेषां यत एको लभ्यते ततः शेषा अपीति? ब्रूमः—

[165] सर्वेभ्यो वर्तमानेभ्यो द्विविधेभ्योऽपि कामजः[५]।

After this, the *Akb.* (IV. 33 cd.) discusses: अथ कथं भार्यायुक्तस्य उपासकस्य संवरक्षोभो न भवति? This topic is not discussed in *Adv.*

[१] Cf. **मृषावादप्रसंगाच्च सर्वशिक्षाव्यतिक्रमे।** *Ak.* IV. 34 ab.

[२] Cf. एवमेव खो राहुल यस्स कस्सचि सम्पजानमुसावादे नत्थि लज्जा नाहं तस्स किञ्चि पापं अकरणीयं ति वदामि। *M. sutta* 62.

[३] Cf. **प्रतिक्षेपणसावद्यान्मद्यादेवान्यगुप्तये।** *Ak.* IV. 34 cd.

The Kośakāra discusses one more topic—"कथं पुनर्मद्यपानं प्रतिक्षेपणसावद्यं गम्यते?" There are two views about it—···प्रकृतिसावद्यं मद्यमिति **विनयधराः**।··· **नेत्याभिधार्मिकाः**। *Akb.* IV. 34 cd. See *Aaa.* p. 407.

[४] संवरकर्म कतमत्। प्रातिमोक्षसंवरसंगृहीतं कर्म ध्यानसंवरसंगृहीनं कर्म अनास्रवसंवरसंगृहीतं कर्म च। **प्रातिमोक्षसंवरसंगृहीतं कर्म** कतमत्। भिक्षुसंवरः भिक्षुणीसंवरः शिक्षमाणसंवरः श्रामणेरसंवरः श्रामणेरीसंवरः उपासकसंवरः उपासिकासंवरः उपवाससंवरश्च।

ध्यानसंवरसंगृहीतं कर्म कतमत्। दौःशील्यसमुत्थापकानां क्लेशानां बीजोपघाते सति कामेभ्यो वीतरागस्य या विरतिः। प्रथम···द्वितीय···तृतीयध्यानवीतरागस्य या विरतिः।

अनास्रवसंवरसंगृहीतं, कर्म कतमत्। सत्यदर्शनेन अनास्रवमनस्कारबलेन प्रतिलब्धा अनास्रवा विरतिः। *Asm.* pp. 57-8. See *Aam.* pp. 48-9. *Vm.* I. 18.

[५] Cf. **सर्वोभयेभ्यः कामाप्तो वर्तमानेभ्य आप्यते।** *Ak.* IV. 35 ab.

प्रा(5)तिमोक्षसंवरः खलु सर्वेभ्यो मौलप्रयोगपृष्ठेभ्यो वर्तमानेभ्यः स्कन्धायतनधातुभ्यः सत्त्वाधिष्ठानप्रवृत्तत्वात्, नातीतानागतेभ्यस्तेषामसत्त्वसंख्यातत्वाल्लभ्यते। 'द्विविधेभ्योऽपि' सत्त्वासत्त्वाख्येभ्यः, प्रकृतिप्रतिक्षेपणसावद्येभ्यश्च।

त्रिकालेभ्यस्तु मौलेभ्यो लभ्येते भावनामयौ[१] ॥

[२]एतौ हि मौलेभ्य (6)एव कर्मपथेभ्यो लभ्येते न प्रयोगपृष्ठेभ्यो नापि प्रज्ञप्तिसावद्येभ्यः, सर्वकालेभ्यश्च स्कन्धायतनधातुभ्यो लभ्येतेऽतीतानागतेभ्योऽपि।

चतुष्कोटिका चात्र भवति। "सन्ति ते स्कन्धायतनधातवो येभ्यः प्रातिमोक्षसंवरो लभ्यते न ध्यानानास्रवसंवरौ" इति विस्तरः। प्रथमा कोटि(टिः)—प्रत्युत्पन्नेभ्यः (7)सामन्तकपृष्ठेभ्यः प्रतिक्षेपणसावद्याच्च। द्वितीया—अतीतानागतेभ्यो मौलेभ्यः कर्मपथेभ्यः। तृतीया—प्रत्युत्पन्नेभ्यः मौलेभ्यः कर्मपथेभ्यः। चतुर्थी—अतीतानागतेभ्यः सामन्तकपृष्ठेभ्य इति[२] ॥

किं पुनरिमौ संवरासंवरौ सर्वसत्त्वेभ्य एव लभ्येते? सर्वाङ्गेभ्यः सर्वकारणैश्च? अथास्ति कश्चिद्भेदः? (8)तत्र तावदवश्यं लभ(भ्य)ते—

[166] सर्वेभ्यः सत्त्वजातिभ्यः संवरो वाङ्गकारणैः।[३]
सर्वेभ्यो संवराङ्गेभ्यः सत्त्वेभ्यश्च न कारणैः ॥

सर्वसत्त्वेभ्यः खलु संवरो लभ्यते न केभ्यश्चित्। अङ्गेभ्यस्तु विभाषा कश्चित्सर्वेभ्यो लभ्यते भिक्षुसंवरः। कश्चिच्चतुर्भ्यः। ततोऽन्यः।[४] कर्मपथा हि संवराभ्याङ्गानि। कारणैरपि (9)केनचित्पर्यायेण सर्वैः, केण(न)चिदेकेन।

---

[१] Cf. मौलेभ्यः सर्वकालेभ्यो ध्यानानास्रवसंवरौ। *Ak.* IV. 35 cd.

[२–२] This passage (from एतौ हि मौलेभ्य एव to सामन्तकपृष्ठेभ्य इति) is identical with *Akb.* IV. 35. After this, the *Akb.* has :—न तु संवरलाभकाले वर्तमानाः कर्मपथाः सन्तीति वर्तमानाधिष्ठितेभ्य इति वक्तव्यम्। अनागतानामेव संवरणं युज्यते नातीतवर्तमानानाम्। See *Sakv.* pp. 382-3. Cf. *KvA*. xx. 1.

[3] Cf. **संवरः सर्वसत्त्वेभ्यो विभाषा त्वङ्गकारणैः।** *Ak.* IV. 36 ab.

[४] 'कश्चित्सर्वेभ्यः' इति विस्तरः। 'भिक्षुसंवरः' सर्वेभ्यः कर्मपथेभ्यो लभ्यते। वर्जनीया इत्यर्थः। सर्वकर्मपथा 'कश्चिच्चतुर्भ्यः। ततोऽन्यः।' ततो भिक्षुसंवरादन्यः संवरः श्रामणेरादिसंवरश्चतुर्भ्य एव 'अङ्गेभ्यो लभ्यते'। कायिकेभ्यः प्राणातिपातादिभ्यस्त्रिभ्यो वाचिकाच्च मृषावादात्। *Sakv.* p. 383.

[१]कथं तावत्सर्वैर्यद्यलोभाद्वेषामोहाः कारणानीष्यन्ते ? कथमेकेन यदि मृदुमध्याधिमात्राणि चित्तानि कारणानीष्यन्ते ? पश्चिमेन पर्यायेण नियमोच्यते । अस्थि(स्ति) संवरस्थायी सर्वसत्त्वेषु संवृतो न सर्वाङ्गैर्न सर्वकारणैर्यो मृदुना चित्तेन [III B, 6. Fol. 92 a](1) मध्येनाधिमात्रेण वा उपासकोपवासश्रामने(णे)रसंवरं समादत्ते। अस्ति सर्वसत्त्वेषु संवृतः सर्वाङ्गैश्च, न तु सर्वकारणैर्यो मृदुना चित्तेन मध्येनाधिमात्रेण वा भिक्षुसंवरं समादत्ते। अस्ति सर्वसत्त्वेषु सर्वाङ्गैः सर्वकारणैश्च यस्त्रिविधेन चित्तेन त्रीन्संव(2)रान् समादत्ते। अस्ति सर्वसत्त्वेषु सर्वकारणैश्च न तु सर्वाङ्गैर्य उपासकोपवासश्रामने(णे)रसंवरान्मृदुमध्याधिमात्रैश्चित्तैः समादत्ते। यस्तु न सर्वसत्त्वेषु स्यादीदृशो नास्ति यस्मात्सर्वसत्त्वानुगतकल्याणाशये स्थितः संवरं प्रतिलभते नान्यथा, पापाशयस्यानुपरतत्वात् ।

पञ्चनियमान(न्) कुर्व(3)न् प्रातिमोक्षसंवरं लभते। सत्त्वाङ्गदेष(श)-कालसमयनियमान्(ः)—अमुष्मात्सत्त्वाद्विरमामीति सत्त्वनियमः। अमुष्मादङ्गादित्यङ्गनियमः। अमुष्मिन्देश इति देशनियमः। मासाद्यावदिति कालनियमः। अन्यत्र युद्धादिति समयनियमः। सुचरितमात्रं तु तत्स्यादेवं गृह्णतो न संवरः।[१]

(4)कथमशक्येभ्यः संवरलाभः ? सर्वसत्त्वजीवितानुपघाताध्याशयेण(ना)भ्युपगमात् ।[२] उक्तं यथा संवरो लभ्यते ॥

असंवरोऽपि सर्वसत्त्वेभ्यः सर्वकर्मपथेभ्यश्च न तु [सर्व]कारणैः, युगपन्मृद्वादिचित्ताभावात् ।[३]

[४]के पुनरसांवरिकाः ? औरभ्रिकाः कौक्कुटिकाः सौकरिकाः शाकु-

[१–१] This whole passage (from कथं तावत्सर्वैः to एवं गृह्णतो न संवरः।) is almost identical with *Akb.* IV. 36 ab. See *Sakv.* p. 383.

[२] After this, the Kośakāra discusses one more point :—यदि पुनः शक्येभ्य एव संवरो लभते चयापचययुक्तः स्यात् । शक्याशक्यानामितरेतरसंचारात् । एवं च सति विनापि लाभत्यागकारणाभ्यां संवरस्य लाभत्यागौ स्यातामिति **वैभाषिकाः** । नैवं भविष्यति। ···*Akb.* IV. 36 ab. See *Sakv.* p. 384.

[३] Cf. **असंवरस्तु सर्वेभ्यः सर्वांगेभ्यो न कारणैः ।** *Ak.* IV. 36 cd.

[४] This whole passage (upto इत्यसांवरिकाः) is almost identical with *Akb.* IV. 36 cd.Cf. इध भिक्खवे एकच्चो पुग्गलो ओरब्भिको होति सूकरिको साकुन्तिको लुद्दो मच्छघातको चोरो चोरघातको बन्धनागारिको, ये वा पन’ञ्ञ’पि केचि करूरकम्मन्ता । एवं खो भिक्खवे पुग्गलो परन्तपो होति परपरितापनानुयोगमनुयुत्तो । *Aṅg.* II. p. 207.

Also cf. **असंवरं कर्म कतमत् ।** अभिजन्मतो वा तत्कर्मसमादानतो वा तत्कर्माध्याचारनिश्चयः··· । ते पुनरसंवराः कतमे । औरभ्रिकाः कौक्कुटिकाः··· । *Asm.* p. 58.

न्तिका मात्सिका मृगलुब्धकाश्चौ(5)राः वध्यघातका बन्धनपालका नागबन्धा श्वपाका वागुरिकाश्च । राजानो दण्डनेतारो व्यावहारिकाश्च नीतिचलिता असांवरिकाः । असंवरे भा(भ)वाः, असंवरो वा एषां विद्यत इत्यसांवरिकाः ॥[१]

उक्तमिदं येभ्यः [अ]संवरो लभ्यते । कथं तु तल्लाभ इति नोक्तं तदारभ्यते—

[167] क्रियया[ऽ]संवरप्राप्तिः स(5)हाभ्युपगमेन वा ।
अविज्ञप्तिरतोऽन्यस्याः क्षेत्राङ्गादिविशेषतः ॥[२]

[३]द्वाभ्यां कारणाभ्यामसंवरो लभ्यते । क्रिययाऽभ्युपगमेन वा । क्रियया तत्कुलीनतत्कर्माभ्युपगमात् । अतत्कुलीनैर्वयमप्यनया जीविकया जीविष्याम इति । शेषाऽविज्ञप्तिलाभस्तु क्षे(4)त्राङ्गविशेषादिति । क्षेत्रं वा तद्रूपं भवति यथारामादिप्रदानमात्रेणाविज्ञप्तिरुत्पद्यते । यथौपधिकेषु पुण्यक्रियावस्तुषु । आदरेण वा समादत्ते । बुद्धमवन्दित्वा न भोक्ष्य इति । मासार्धमासभक्तानि वा नित्यं करिष्यामीत्येवमादि । आदरेण वा तद्रूपेण क्रियामीहते कुशलामकुशलां वा यतोऽस्या(8)विज्ञप्तिरुत्पद्यते ।

उक्तमेतद्यथा संवरासंवराणां प्रतिलम्भः[3] ॥

त्याग इदानीं वक्तव्यः । तत्र तावत्—

[168] कामाप्तसंवरत्यागः शिक्षाणि(नि)क्षेपणादिभिः ।
पतनीयैरपीत्येके तन्नेत्यन्ये त्वयोगतः ॥[४]

---

[१] After this passage, the Kośakāra discusses the following :—
युक्तस्तावत् संवरस्य सर्वसत्त्वेभ्यो लाभः सर्वसत्त्वहिताध्याशयेन ग्रहणात् । औरभ्रिकादीनां तु मातापितृदारादिष्वविपन्नाशयानां जीवितहेतोरप्यहन्तुकामानां कथमसंवरः सर्वसत्त्वेभ्यो युज्यते ?……सर्वथा नास्ति विकलः प्रादेशिकश्चासंवरिक इति **वैभाषिकाः** । यथाभ्युपगमं विकलोऽपि स्यात् प्रादेशिकोऽप्यसंवरः संवरश्चान्यत्राष्टविधादिति **सौत्रान्तिकाः** । तन्मात्रशीलदौःशील्यप्रतिबन्धात् । *Akb*. IV. 36 cd.

[२] Cf. असंवरस्य क्रियया लाभोऽभ्युपगमेन वा ।
शेषा विज्ञप्तिलाभस्तु क्षेत्रादानादरेहणात् ॥ *Ak*. IV. 37.

[३–३] This whole passage (from द्वाभ्यां कारणाभ्यां to प्रतिलम्भः) is almost identical with *Akb*. IV. 37.

[४] Cf. प्रातिमोक्षदमत्यागः शिक्षानिक्षेपणाच्च्युतेः ।
उभयव्यञ्जनोत्पत्तेर्मूलच्छेदान्निशात्ययात् ॥ *Ak*. IV. 38.

कामाप्तस्याष्टप्रकारसंवरस्य[१] पञ्चभिः कारणैस्त्यागः । शिक्षानिक्षेपणनिकायसभागत्यागोभयव्यञ्जनोत्पा(4)दकुशलसमुच्छेदेभ्यो निशात्ययेण(ना)ष्टमस्य । तान्येतान्यभिसमस्य पञ्च भवन्ति ।

किं पुनः कारणमेभिस्त्यागो भवति ? समा[दा]नविरुद्धविज्ञप्त्युत्पादादाश्रयत्यागादाश्रयकोपनान्निदानच्छेदात्तावदेवाक्षेपाच्च ।

अन्ये पुनराहुः—चतुर्णां पतनीयाण(ना)म[२]न्यतमेन भिक्षुश्रामणेरसंवरत्यागः ।”[३] ‘तन्न’ इति, ‘अयोगतः’ ।

कः पुनर[III. A, 6. Fol. 92 b.](1) योगः ?

[169] अयोगा(गो) नांशुविध्वंसात्पटद्रव्यं विनश्यति ।

न ह्यवयवनाशादवयविविनाशो भवति । अवयविरूपश्च प्रातिमोक्षसंवरः । तस्यावयवक्षोभाच्छिद्रत्वं भवति मालिन्यं च ।[४] यथोक्तं भगवता—“दुःशीलो भवति पापधर्मा ।”[५]

---

[१] This refers to the eight kinds of *Prātimoksha-saṁvara*. Vide supra, p. 128, n. 4.

[२] These are the four *Pārājikā dhammā* of the Sthaviravāda-Vinaya.

[3] Cf. **पतनीयेन चेत्येके** । *Ak*. IV. 39 a.

एभिश्च यथोक्तैः पञ्चभिः कारणैः पतनीयेन चेति । पतन्त्यनेनेति पतनीयम् । तच्चतुर्विधम् । अब्रह्मचर्यम् । यथोक्तप्रमाणमदत्तादानम् । मनुष्यवधः । उत्तरिमनुष्यधर्ममृषावादश्चेति । *Sakv*. p. 386.

[४] Cf. **धनर्णवत्तु काश्मीरैरापन्नस्येष्यते द्वयम्** । *Ak*. IV. 39 cd.

काश्मीरास्तु खलु **वैभाषिका** एवमिच्छन्ति । न मौलीमध्यापत्तिमापन्नस्यास्ति भिक्षुसंवरत्यागः । किं कारणम् । न ह्येकदेशक्षोभात्कृत्स्नसंवरत्यागो युक्त इति । नैव चान्यामप्यापत्तिमापन्नस्यास्ति शीलच्छेदः । किं तर्हि ? द्वयमस्य भवति शीलं दौःशील्यं च । यथा कस्यचिद्धनं स्याद् ऋणं च । आविष्कृतायां तु तस्यामापत्तौ शीलवान् भवति न दुःशीलो यथा ऋणं शोधयित्वा धनवान् भवति न त्वृणवानिति । *Akb*. IV. 39 cd.

धनर्णवत्तु काश्मीरैरापन्नस्येष्यते । आगमाद्युक्तितश्च । तत्रायमागमः । **विनय** उक्तम्—“**दुःशीलश्चेद्भिक्षुर्भिक्षुणीमनुशास्ति, संघावशेषमापद्यते**” इति । आपन्नपाराजिको हि भिक्षुर्दुःशीलोऽभिप्रेतः । नानापन्नपाराजिकः । प्रकृतिस्थः शीलवानिति विपर्ययेण वचनादतोऽवगम्यते—अस्त्यस्य दुःशीलस्यापि सतो भिक्षुभावः । यस्मात्संघावशेषमापद्यत इत्युक्तमिति । **युक्तिरपि** ‘न ह्येकदेशक्षोभात्सकलसंवरत्यागो युक्तः इति । न मौलीमप्यापन्नस्येति । पतनीयानामप्यापन्नस्येत्यर्थः ।···*Sakv*. p. 386.

[५] See *Śikshā*. pp. 67-8.

सूत्रविरोधादयुक्तमिति चे[दत्रोप]दिशन्ति—

सूत्रे ध्वंसोक्तिरन्यार्था यथेर्ष्याशठनादिषु ॥

भगवतात्र (2)"अभिक्षुर्भवति" इति शासनस्थित्यर्थं दुर्वृत्तविनेयावसादनार्थं चोक्तम् । यथा—"ईर्ष्यिको भवति मत्सरी शठो मायावी मिथ्यादृष्टिरित्येवमादिदोषयुक्तः कशम्बकजातीयः[१] पापभिक्षुर्णि(र्नि)र्वासयितव्यः ।"[२] न च चित्ताविदूषणादभिक्षुत्वं भवति विनेयशासनार्थंतत्त्व[विद्]भिरित्युक्तम् ।[३] तद्वदत्रापि द्रष्टव्यमिति ।

तस्मात्पूर्वोक्तलक्षण[४]एव भिक्षुर्ण(र्न) (3)यथाह कोशकारः ।[५]

---

[१] अन्येषामपि स्वदोषोपादानात् **कसम्बकजाताः** । *Aaa.* p. 259.

[२] Cf. **संवासायं विजानाथ पापिच्छो कोधनो इति ।
मक्खी थम्भी पलासी च इस्सुकी मच्छरी सठो ॥
सब्बे समग्गा हुत्वान अभिनिब्बिज्जयाथ नं ।
कारण्डवं निद्धमथ कसम्बुं अपकस्सथ ॥** *Aṅg.* IV. p. 172.

[३] For an allied controversy, see *Dhs A.* III. 123-131.—सो [वितण्डवादी] एवं पुच्छितब्बो—'संपजानमुसावादे पन किं होती' ति ? जानन्तो संपजानमुसावादे दुक्कटं होती' ति वक्खति । ततो वत्तब्बो **'विनयस्स द्वे मूलानि--कायो च वाचा च, सम्मासम्बुद्धेन हि सब्बापत्तियो इमेसु येव द्वीसु द्वारेसु पञ्ञत्ता, मनोद्वारे आपत्तिपञ्ञापनं नाम नत्थि ।** त्वं अतिविय पकतञ्ञू, यो सत्थारा अपञ्ञत्ते ठाने आपत्तिं पञ्ञापेसि, सम्मासम्बुद्धं अब्भाचिक्खसि, जिनचक्कं पहरसी' ति···। *Dhs A.* III. 130.

[४] V. supra, *Ad. kārikā* 160.

[५] Cf. यर्त्तार्हि **भगवतोक्तम्—"भिक्षुर्भवत्यश्रमणो अशाक्यपुत्रीयो ध्वस्यते भिक्षुभावात्"** । कतमस्य भवति श्रामण्यं ध्वस्तं पतितं पराजितमिति । परमार्थभिक्षुत्वं सन्धायैतदुक्तम् । इदमतिसाहसं वर्तते । किमत्रातिसाहसम् । यत् भगवता नीतार्थं पुनरन्यथा नीयते । दौःशील्याय च बहुक्लेशेभ्यः प्रत्यया दीयन्ते । कथमेतन्नीतार्थम् । एष हि **विनये** निर्देशः—**"चतुर्विधो भिक्षुः···अस्मिंस्त्वर्थे ज्ञप्तिचतुर्थकर्मोपसंपन्नो भिक्षुः"** इति । न चासौ पूर्वं परमार्थभिक्षुरासीद्यतः पश्चादभिक्षुर्भवेत् ।

यच्चोक्तमेकदेशक्षोभादिति । अत्र **शास्त्रैव** दत्तोऽनुयोगस्तद्यथा **"तालो मस्तकच्छिन्नोऽभव्योऽङ्कुरितत्वाय, अभव्यो विरूढिं वृद्धिं विपुलतामात्तुम्"** इत्युपमां कुर्वता । कः पुनरुपमार्थः । एवमेकदेशस्यापि मूलभूतस्य च्छेदादभव्यः संवरशेषो विरोढुमिति ।···शास्त्रा यं चाधिकृत्योक्तम्—

**नाशयत कारण्डवकं कशम्बकमपकर्षत ।
अथोत्प्लाविनं वाहयत अभिक्षुं भिक्षुवादिनम् ॥**

[170] सद्धर्मान्तर्द्धितोऽन्ये[1]ऽन्ये नापूर्वाप्रतिलम्भतः ।

अन्ये पुनर्ब्रुवते—सद्धर्मान्तर्धानेऽपि संवरत्यागो भवति । तत्तु नैवम् । यस्मादपूर्वस्तदा नोत्पद्यते । उत्पन्नस्तु यथोक्तैरेव कारणैर्विनश्यति ॥

अथ ध्यानानास्रवसंवरयोस्त्यागः कथम् ? तदिदमपदिश्यते—

भूसंचारेण हान्या च त्यज्यते ध्यानजं शुभम्[2] ॥

स(4)र्वमेव खलु ध्यानाप्तं कुशलं द्वयाभ्यां कारणाभ्यां त्यज्यते । उपपत्तितो वा भूमिसंचारादूर्ध्वं वाऽधो वा । परिहाणितो वा । समापत्तेर्निकायसभागत्यागाच्चेति ॥[3]

[171] तथाऽऽरूप्याप्तमार्यन्तु फलाप्त्यक्षविहानिभिः ।[4]

[5]यथैव रूपाप्तं कुशलं भूमिसंचारहाणि(नि)भ्यां त्यज्यते तथैवारूप्याप्तम् । आर्यं तु कुशलं त्रिभिः कारणैस्त्यज्यते । (4)फलप्राप्तितः पूर्वको मार्गस्त्यज्यते ।[6]

इति तस्य कीदृशो भिक्षुभावः ? यादृशस्तादृशोऽस्तु अस्ति तु भिक्षुभावः ।···यदि हि दौःशील्यादि भिक्षुः स्यात्, शिक्षादत्तको न स्यात् । **न वयं ब्रूमः सहाध्यापत्त्या सर्वः पाराजिक इति । यस्तु पाराजिकः सोऽवश्यमभिक्षुः ।** कश्चित्तु सन्तानविशेषान्न पाराजिक एकचित्तेनाप्यप्रतिच्छादनादिति व्यवस्थापितं धर्मस्वामिना । यदि तर्हि पाराजिको न भिक्षुः किं पुनर्न प्रव्राज्यते ?···**कश्चायमनर्थे निर्बन्धो यद्यसौ तथाभूतोऽपि भिक्षुर्न्नमोऽस्तु तस्मै तादृशाय भिक्षुत्वाय ।** *Akb.* IV. 39 cd.

See *Aaa.* p. 456.

[1] Cf. **सद्धर्मान्तर्द्धितोऽपरे ।**

सद्धर्मस्यान्तर्द्धानादित्यपरे । यस्मादन्तर्हिते सद्धर्मे सर्वशिक्षासीमाकर्मान्ताः प्रतिप्रस्रभ्यन्त इति ।···सद्धर्मान्तर्द्धाने तु विनयकर्माभावादपूर्वसंवरलाभो नास्ति । लब्धस्य तु नास्ति त्यागः । *Akb.* IV. 39a.

[2] Cf. **भूमिसंचारहानिभ्यां ध्यानाप्तं त्यज्यते शुभम्** । *Ak.* IV. 40 ab.

[3] **निकायसभागत्यागाच्च** किञ्चिदिति । निर्वेधभागीयं यत् पृथग्जनावस्थायामुत्पादितं यावत्क्षान्तिरिति । तदसत्यपि भूमिसंचारे निकायसभागत्यागेन त्यज्यते । यदा कामधातौ मृत्वा तत्रैवोपपद्यते । *Sakv.* p. 387.

[4] Cf. **तथाऽऽरूप्याप्तमार्यन्तु फलाप्त्युत्पत्तिहानिभिः ।** *Ak.* IV. 40 cd.

[5] This passage (from यथैव रूपाप्तं to तावत्संवरस्त्यज्यते) is almost identical with *Akb.* IV. 40 cd.

[6] **पूर्वको मार्ग** इति । प्रयोगानन्तर्यविमुक्तिमार्गस्वभावः प्रतिपन्नकमार्गः । *Sakv.* p. 388.

अक्षोत्तापनेन मृद्विन्द्रियमार्गः। परिहाणित उत्तरो मार्गः। फलं फलविशिष्टो वा ।[१] एवं तावत्संवरस्त्यज्यते ।

असंवरो दमप्राप्तिर्जीवितोत्सर्जणा(ना)दिभिः ॥[२]

[3]त्रिभिः कारणैरसंवरच्छेदः । संवरप्राप्तितः । यदि संवरं समापद्यते ध्यानसंवरं वा प्रतिलभते हेतुप्रत्ययबलेन (6)समाधिलाभात्तेनासंवरस्त्याज्यते। प्रतिद्वन्द्वबलीयस्त्वात् । मरणेन चाश्रयत्यागात् । द्विव्यञ्जनोत्पादेन चाश्रयविकोपनात् । शस्त्रजलत्यागेऽप्यकरणाशयतः संवरमन्तरेणासंवरच्छेदो नास्ति । निदानपरिवर्जणे(ने)न प्रवृद्धरोगानिवृत्तिवत् ॥[३]

अथ संवरासंवरविनिर्मुक्ता कथमविज्ञप्तिस्त्यज्यते ? तदुच्यते—

[172] (7)चित्तवेगादिविच्छेदैरविज्ञप्तिस्तु मध्यमा ।[४]

[५]येण(न) खल्वसौ प्रमादक्लेशवेगेणा(ना)विज्ञप्तिराक्षिप्ता तस्य विच्छेदात्सापि विच्छिद्यन्ते(ते), कुम्भकारचक्रगतिवत् । समादानत्यागादपि विच्छिद्यते। क्रियाविच्छेदादपि विच्छिद्यते । चैत्यविहारक्षेत्रादेरप्यर्थस्य विच्छेदाद्विच्छिद्यते। आयुषोऽपि कुशलमूलानामपि विच्छेदाद्वि(8)च्छिद्यते ।[५]

कामाप्तं कुशलं नाम त्रिभिर्मूलच्छिदादिभिः ॥[६]

कामावचरं पुनः कुशलमरूपस्वभावं द्वाभ्यां कारणाभ्यां त्यज्यते । कुशलमूलसमुच्छेदात्, रूपारूप्यधातूपपत्तितश्च ।

[173] प्रतिपक्षोदयात्क्लिष्टं त्रिधात्वाप्तं विहीयते ।[७]

---

[१] **फलं फलविशिष्टो** वेति । उत्तरो मार्गोऽधिकृतः । तद्यथाऽनागामी यद्यनागामीफलात् परिहीयते, तेनानागामीफलमुत्तरो मार्गस्त्यज्यते । यदि त्वनागामी द्वितीयं ध्यानं लभते, तस्माच्च परिहीयते, स तस्य फलविशिष्टो मार्गो द्वितीयध्यानभूमिकस्त्यज्यते । *Ibid.*

[२] Cf. **असंवरः संवराप्तिर्मृत्युद्विव्यञ्जनोदयैः ।** *Ak.* IV. 41 ab.

[३]--[३] This whole passage is almost identical with *Akb.* IV. 41. b. After this, the *Akb.* has :— य आसंवरिक उपवासं गृह्णाति किमसौ तस्मात्संवरात्पुनरसंवरं गच्छत्याहोस्विन्नैव संवरं नासंवरम् ? असंवरमिमित्येके । त्यागाशयस्यानात्यन्तिकत्वात् । प्रदीप्त इवायःपिण्डः पुनः श्यामतां नाप्रयुज्यमानो गच्छतीत्यपरे ।

[४] Cf. **वेगादानक्रियार्थायुर्मूलच्छेदैस्तु मध्यमा ।** *Ak.* IV. 41 cd.

[५]--[५] This passage is almost identical with *Akb.* IV. 41 cd.

[६] Cf. **कामाप्तं कुशलारूपं मूलच्छेदोर्द्ध्वजन्मतः ।** *Ak.* IV. 42 ab.

[७] Cf. **प्रतिपक्षोदयात् क्लिष्टमरूपन्तु विहीयते ।** *Ak.* IV. 42 cd.

क्लिष्टं त्वरूपस्वभावं सर्वमेव प्रतिपक्षोदयाद्विहीयते । यस्योपक्लेशप्रकारस्य यः प्रहाण(9)मार्गः, तेनासौ सपरिवारः परित्यज्यते । नान्यथा ॥

अथ केषां सत्त्वानामसंवरो भवति केषां संवरः ? तदपदिश्यते—

सर्वे कामेषु रूपे द्वाधे(वे)को रूपिषु लाभतः[1] ॥

कामेषु खलु सर्वशण्ढपण्डकादीनि हित्वा [2]कुरूंश्च हित्वा । देवानामपि संवरः ।[3] इत्यतो गतिद्वये संवरासंवरौ विद्येते । नान्यत्रेति ॥

कर्माधिकारादिदानीं सू[III B, 7. Fol. 93 a.](1)त्रोक्तोद्दिष्टानां कर्मा(र्म)णां निर्देशं करिष्यामः । उक्तं हि सूत्रे—"त्रीणि कर्माणि कुशलमकुशलमव्याकृतं च ।" तेषां लक्षणमिदमुच्यते—

[174] यदिष्टफलदं कर्म कुशलं तदुदाहृतम् ।
विपर्ययेणाकुशलमव्याकृतमतोऽन्यथा ॥[4]

यत्खल्विष्टविपाकं णि(नि)र्वाणप्रा[पकं] चे(च) दुःखपरित्राणात्, तत्कालमत्यन्तं वा, तत्कुशलम् । निरुक्तिरपीयम् । नि(2)रवद्यदेवमनुष्यस्त्रीरूपनिर्वर्तणा(ना)च्छिक्षितचित्रकररूपनिर्वर्तण(न)वत् । कुशलमिव कुशलमौपमिकोऽयं शब्दनिवेशः । तद्यथा शिक्षितः पुरुषः कुशानक्षतहस्तो लुनाति स कुशल इति निरुच्यते, तद्वदन्यामपि क्रियामविकृतां संपादयन् कुशल

---

[1] Cf. **नृणामसंवरो हित्वा शण्ढपण्डद्विधाकृतीन् ।**
कुरूंश्च संवरोऽप्येवं देवानां च नृणां त्रयः ॥ *Ak*. IV. 43.

[2] The Kośakāra discusses this point in detail :—शण्ढादीनां संवरो नास्तीति कथं गम्यते ?···क्लेशस्याधिमात्रतया···प्रतिसंख्यानस्याक्षान्तत्वात्···तीव्रस्य च ह्रीव्यपत्राप्यस्याभावात्···प्रतिद्वन्द्वभावात्···समादानसमाध्यभावात्···। *Akb*. IV. 43 b. See *Asm*. p. 57. V. supra, p. 47, n. 2.

[3] **प्रातिमोक्षसंवरो मनुष्याणामेव न देवानाम् ।** असंवेगात् । ध्यानानास्रवसंवरौ तु हेतुकर्मधर्मभावनाद्यथासम्भवम् । *Sakv*. p. 389. For a controversy on this, see **संवरकथा,** *Kv*. III. 10—इदानि **संवरकथा** नाम होति । तत्थ येसं **तावर्तिसे देवे उपादाय ततुत्तरिदेवेसु** यस्मा ते पञ्चवेरानि न समाचरन्ति तस्मा **संवरो अत्थी** ति लद्धि, ते सन्धाय पुच्छा **सकवादिस्स ।···यस्मा संवरो नाम संवरितब्बे असंवरे सति होति,** तस्मा असंवरपुच्छा सकवादिस्स । देवेसु पाणातिपातादीनं अभावेन पटिक्खेपो इतरस्स···*KvA*. III. 10. Also cf. **ब्रह्मचरियकथा,** *Kv*. I. 3.

[4] Cf. अतः परमिदानीं कर्मनिर्देशाधिकारात्सूत्रोद्दिष्टानां कर्मणां निर्देश आरप्स्यते··· ।
क्षेमाक्षेमतरत्कर्म कुशलाकुशलेतरत् । *Ak*. IV. 45 *ab*.

इत्युच्यते ।[१] ‘विपर्ययेणाकुशलम्’ उष्ट्रोलूकादिवत् । ‘अव्याकृतमतोऽन्यथा’ (3)उभयविपाकानिर्वर्तणा(ना)त् ॥[२]

अन्यान्यपि त्रीणि कर्माण्युक्तानि । पुण्यमपुण्यमानेज्यं च । तत्र तावत्

[175] कामाप्तं प्रथमं पुण्यमपुण्यमशुभात्मकम् ।
ऊर्ध्वभूमिकमानेज्यं विपाकं प्रत्यनेजनात् ॥[3]

कामावचरं हि कुशलं कर्म पुण्यमकुशलमपुण्यमित्युच्यते । ऊर्ध्वभूमिकमानेज्यम् ।’[४] तदूर्ध्वं धातुद्वये शुभं कर्मानेज्यमित्युज्यते । कस्मात्पुनरेतदाने(4)ज्यमित्युक्तम् ? ‘विपाकं प्रत्यनेजनात्[५] ।’ [६]कामावचरं हि कर्म विपाकं

---

[१] Cf. कुसलसद्दो ताव आरोग्य-अनवज्ज-छेक-सुखविपाकेसु दिस्सति।···वचनत्थो पनेत्थ—कुच्छिते पापके अकुसले धम्मे सलयन्ति चलयन्ति···ति कुसला । कुच्छितेन वा आकारेन सयन्ती ति कुसा । अकुसलसंखाते कुसे लुनन्ती···ति कुसला । कुच्छितानं वा सानतो तनुकरणतो ओसानकरणतो ञाणं कुसं नाम । तेन कुसेन लातब्बा ति कुसला ।··· यथा वा कुसा उभयभागगतं हत्थप्पदेसं लुनन्ति, एवमिमे पि उप्पन्नानुप्पन्नभावेन··· संकिलेसपक्खं लुनन्ति । *DhsA.* II. 8-10.

[२] Cf. तेसु पन अनवज्जसुखविपाकलक्खणा कुसला, सावज्जदुक्खविपाकलक्खणा अकुसला, अविपाकलक्खणा अब्याकता । *DhsA.* II. 10.

[3] Cf. **पुण्यापुण्यमनिञ्जञ्च सुखवेद्यादि च त्रयम् ॥**
कामधातौ शुभं कर्म पुण्यमानेञ्जमूर्द्धजम् । *Ak.* IV. 45 cd and 46 ab.

[४] **आनेज्यमिति** । एजृ कम्पन इत्यस्य धातोरेतद्रूपमानेज्यमिति । यदा त्वानिंज्यमिति पाठस्तदा इगेः प्रकृत्यन्तरस्यैतद्रूपं द्रष्टव्यम् । *Sakv.* p. 344.

आनिंज्यकर्म कतमत् । रूपारूप्यप्रतिसंयुक्तं कुशलं कर्म । *Asm.* p. 54. कामप्रतिसंयुक्तं कुशलं पुण्यम् । रूपारूप्यप्रतिसंयुक्तमानिंज्यम् । *Aaa.* p. 184.

[५] Cf. किं पुनः कारणं सेञ्जितमेवान्यत्रानिञ्जमुक्तम् ?
तद्भूमिषु यतः कर्म विपाकं प्रति नेञ्जति । *Ak.* IV. 46 cd.

The term *āneñja* primarily refers to the four *Arūpa-dhyānas*. The fourth *Rūpāvachara-dhyāna* is also called *āneñja* : सो···चतुत्थं ज्ञानं उपसम्पज्ज विहरति । सो एवं समाहिते चित्ते···आनेञ्जप्पत्ते···। (*Aṅg* II. p. 211.) But here even the first three *rūpa-dhyānas* are called *āneñja* due to ‘विपाकं प्रत्यनेजनात्’ ।

[६–८] This passage (from कामवाचरं to तिर्यक्प्रेतेषु विपच्यते) is identical with *Akb.* IV. 46 cd. After तिर्यक्प्रेतेषु विपच्यते, the *Akb.* has : रूपारूप्यावचरं तु कर्मान्यभूमिकमन्यस्यां भूमौ विपक्तुं न जातुमुत्सहते । तस्माद्व्यवस्थितविपाकत्वादानेञ्जमित्युच्यते ।

प्रति कल्पते लवणोपमसूत्रण्या(न्या)येन।[१] कथम्? अव्यवस्थानात्।[२] अन्यगतिकमपि ह्यन्यस्यां गतौ विपच्यते। तदन्यदेव नैकायिकं चान्यत्र देवनिकाये। यदेव हि प्रमान)ण)बलवर्णसुखभोगादिसंवर्तनीयं कर्म देवेषु विपच्येत तदेव कदाचिदन्य(5)प्रत्ययवशान्मनुष्यतिर्यक्प्रेतेषु विपच्यते।[४] कर्मजातिचोदनेयं भगवतो विवक्षिता न द्रव्यचोदनेति।

अत्राह। [3]ननु च त्रीणि ध्यानानि सेञ्जितान्युक्तानि[४] भगवता—"यदत्र वितर्कितं विचारितमिदमत्रार्या इञ्जितमित्याहुः"[५] इत्येवमादि? समाध्यपक्षालास्तेषां सन्धायैवमुक्तम्। आनेज्यान्यपि तु तान्युक्तान्यानेज्यसूत्रे,[६] आ(6)नेज्यसंप्रेयगामिनीं प्रतिपदमारभ्य॥[३]

---

[१] Cf. सेय्यथा पि भिक्खवे पुरिसो **लोणफलं** परित्ते उदकमल्लके पक्खिपेय्य। तं किं मञ्ञथ भिक्खवे अपि नु तं परित्तं उदकमल्लके **उदकं अमुना लोणफलेन लोणमस्स अपेय्यं ति?**

एवं भन्ते।…

सेय्यथा पि भिक्खवे पुरिसो लोणफलं **गंगाय नदिया** पक्खिपेय्य।…अपि नु सा गंगा नदी अमुना लोणफलेन लोणा अस्स अपेय्या ति?

नो हेतं भन्ते।…

एवमेव खो भिक्खवे इधेकच्चस्स पुग्गलस्स अप्पमत्तकं पि पापं कतं तमेनं निरयं उपनेति। इध पन भिक्खवे **एकच्चस्स पुग्गलस्स तादिसं येव अप्पमत्तकं पापं कम्मं कतं दिट्ठधम्मवेदनीयं होति नाणु पि खायति बहुदेव।** *Aṅg.* I. p. 250.

[२] Cf. तत्थ यस्मा कामावचरविपाकं अत्तनो कुसलेन सदिसं पि होति, असदिसं पि तस्मा न तं कुसलानुगतिकं कत्वा भाजितं। रूपावचरारूपावचरविपाकं पन यथा हत्थिअस्सपब्बतादीनं छाया हत्थिआदिसदिसा व होन्ति, तथा अत्तनो कुसलसदिसमेव होती ति…। कामावचरं च कम्म यदा कदाचि विपाकं देति, रूपारूपावचरं पन अनन्तरा येव दुतियस्मिं अत्तभावे, विपाकं देति…। *DhsA.* III. 651. See *Vipākuddhāra-kathā*, *DhsA.* III. 587-651.

[3-3] This whole passage (from ननु च to प्रतिपदमारभ्य) is identical with *Akb.* IV. 46 ab.

[४] Cf. **अष्टापक्षालमुक्तत्वादानिञ्जन्तु चतुर्थकम्।** *Ak.* VIII. 11 ab.

V. infra, *Ad. kārikā* 546. See *LVPAk.* IV. p. 107, n. 1.

[५] Cf. इदं खो'हं उदायि इञ्जितस्मिं वदामि, किञ्च तत्थ इञ्जितस्मिं—यदेव तत्थ **वितक्कविचारा अनुरुद्धा** होन्ति **इदं तत्थ इञ्जितस्मिं।…दुतियं झानं**…यदेव तत्थ **पीतिसुखं अनिरुद्धं** होति **इदं तत्थ इञ्जितस्मिं।…ततियं झानं**…यदेव तत्थ **उपेक्खासुखं अनिरुद्धं** होति **इदं तत्थ इञ्जितस्मिं।…चतुत्थं झानं** उपसम्पज्ज विहरति। **इदं खो'हं** उदायि **अनिञ्जितस्मिं वदामि।** *M. sutta* 66.

[६] *Akb.* has आनिञ्जसूत्रे।

पुनरण्या(न्या)नि त्रीणि कर्माण्युक्तानि—"सुखवेदनीयं दुःखवेदनीयं, अदुःखासुखवेदनीयं च ।" तत्र

[176] सुखवेद्यं शुभ(भं) कर्म ध्यानादर्वाक्तुरीयकात् ।
उपेक्षावेद्यमन्यत्र दुःखवेद्यन्तु पापकम् ॥[१]

तत्र शुभं कर्म यावत्तृतीये ध्याने सुखवेद्यमित्युच्यते। एतावती खलु भूमिः (7)सुखाया वेदनायाः । तदेव चतुर्थध्यानात्प्रभृत्युपेक्षावेदनीयमित्युच्यते। अकुशलं तु कर्म दुःखवेदनीयमित्युच्यते ।[२]

किं पुण(न)र्वेदनैव विपाकः ?[३] नेत्याह। प्राधानिकोऽयं निर्देशं(शः)। सचतुस्कन्धसम्भारं हि सुखमभिप्रेतम् । दार्ष्टान्तिकानां तु सुखैव वेदना विपाकः चेतनैव च कर्म। आभिधार्मिकानां तु प(8)ञ्चस्कन्धो विपाकहेतुः पञ्चस्कन्धाश्च विपाक इति ।[४]

कथं पुनरवेदनास्वभावं कर्म सुखवेदनीयमित्युच्यते ? सुखाया वेदनाया हितं सुखवेदनीयम् । सुखोऽस्या वेदनीयो विपाक इति वा ।[५]

किं पुनरदुःखासुखा वेदना चतुर्थध्यानादधो न विद्यते ? न खलु न विद्यते। किं तर्हि ?

[177] अधोऽपि मध्यमं कर्म ध्यानेना(9)न्त्येपि निर्वृतेः।
युगपत्त्रिविपाकेष्टेर्ध्यानान्तरविपाकतः ॥[६]

---

[१] Cf. सुखवेद्यं शुभं ध्यानादातृतीयादतः परम् ।
अदुःखासुखवेद्यं तु दुःखवेद्यमिहाशुभम् ॥ *Ak*. IV. 47.

[२] अकुशलं कर्म दुःखवेदनीयम् । इहग्रहणं कामधातावेव तद्भावज्ञापनार्थम् । *Akb*. IV. 47 d.

[३] Cf. न चैषां वेदनैव फलम् । किं तर्हि ? ससंभारा । *Akb*. IV. 47. ससम्भारैरिति । सम्भ्रियते उत्पाद्यतेऽनेनेति सम्भारः । इन्द्रियविषयलक्षणः । तेन ससम्भारा वेदना फलम् । *Sakv*. p. 390.

[४] See *Akb*. III. 54 cd and *Sakv*. pp. 211—215.

[५] Cf. कथं पुनरवेदनास्वभावं कर्म सुखादिवेदनीयमित्युच्यते ? सुखवेदनायै हितं सुखवेदनीयं सुखोऽस्य वेदनीय इति वा। कश्च वेदनीयः। यो विपाकः। स ह्यसौ विद्यते सुखस्य वा वेदनीयं येन सुखं वेदयते। स्नानीयकषायवत् । *Akb*. IV. 47.

[६] Cf. अधोऽपि मध्यमस्त्येके
अन्ये पुनराहुः। तदेतन्मध्यमदुःखासुखवेदनीयं कर्मोक्तमेतच्चतुर्थध्यानादधोऽप्यस्ति । किं कारणम् ?
ध्यानान्तरविपाकतः ।

अदुःखासुखवेदनीयं खलु कर्म चतुर्थध्यानादधोऽप्यस्ति तृतीये द्वितीये प्रथमे च ध्याने[१]। परिनिर्वृते उपेक्षायां च स्थितः परिनिर्वाति।[२] किञ्च, 'युगपत् त्रिविपाकेष्टेः।' उक्तं हि—"स्यात् त्रयाणां कर्मा(र्म)णामपूर्वाचरमो विपाको विपच्येत। स्यात्सुखवेदनीयस्य रूपं, दुःखवेदनीयस्य चित्तचैतसिका धर्माः, अदुःखासुखवेदनीयस्य चित्तविप्रयुक्ताः" इति।[3] अतोऽप्यस्त्यधस्ताददुःखासुखवेदनीयं कर्म। किञ्च, 'ध्यानान्तराविपाकतः।' नहि ध्यानान्तरे[४] उपे[III A, 7. Fol. 93b.]क्षामन्तरेण विपाकोऽन्या वेदना विपच्यते। तत्र सुखदुःखयोरभावात्॥[५]

[178] पुनश्चतुर्विधं कर्म दृष्टवेद्यादिभेदतः।[६]

ध्यानान्तरकर्मणो ध्यान एव सुखेन्द्रियं विपाक **इत्येके।** नैव तस्य वेदना विपाक **इत्यपरे। तदेतदुच्छास्त्रम्।** शास्त्रे हि पठितं—"स्यात्कर्मणश्चैतसिक्येव वेदना विपाको विपच्येत। स्यात्कुशलस्याावितर्कस्य कर्मण:" इति

अपूर्वाचरमः पाकस्त्रयाणां चेष्यते यतः॥ *Akb.* iv. 48.

See *Sakv.* pp. 390-1.

[१] Cf. **उपेक्खा पन दसविधा होति**—छळंगुपेक्खा ब्रह्मविहारुपेक्खा बोज्झंगुपेक्खा विरियुपेक्खा संखारुपेक्खा वेदनुपेक्खा विपस्सनुपेक्खा तत्रमज्झत्तुपेक्खा झानुपेक्खा पारिसुद्धि-उपेक्खा ति।···इति **इमासु उपेक्खासु 'झानुपेक्खा' इध [ततियज्झाने] अधिप्पेता।···** एत्थाह—ननु चायं अत्थतो तत्रमज्झत्तुपेक्खा व होति? सा च पठमदुतियज्झानेसु पि अत्थि···। सा कस्मा न वुत्ता ति? अपरिब्यत्तकिच्चतो·· वितक्कादीहि अभिभूतत्ता। *Dhs A.* iii. 349-354.

[२] For a controversy related to this, see, *Kv.* xxii. 3.—इदानि **आनेञ्जकथा नाम** होति। तत्थ भगवा चतुत्थज्झाने ठितो परिनिब्बायीति सल्लक्खेत्वा अरहा आनेञ्जे ठितो परिनिब्बायतीति येसं लद्धि, सेय्यथा पि एकच्चानं **उत्तरापथकानं।** *KvA.* xxii. 3.

[३] Quoted in *Akb.* iv. 48 cd. **अपूर्वाचरम** इति। युगपदित्यर्थः। सुखवेदनीयस्य **रूपमिति** चक्षुरादिकम्। दुःखवेदनीयस्य···पञ्चविज्ञानकायिकाः। दौर्मनस्याविपाकत्वात्। ···**चित्तविप्रयुक्ता** इति जीवितेन्द्रियादयः। *Sakv.* p. 391.

[४] For a controversy on *Dhyānāntara*, see *Kv.* xviii. 7.—इदानि **झानन्तरिककथा** नाम होति। तत्थ येसं समये पञ्चकनये पञ्च झानानि विभत्तानि, केवलं तयो समाधी उद्दिट्ठानि, अवितक्कविचारमत्तस्स समाधिनो ओकासं अजानन्तानं पठमस्स च दुतियस्स च झानस्स अन्तरे झानन्तरिका नाम एसा ति लद्धि, सेय्यथा पि **सम्मितीयानञ्च अन्धकानं।** *KvA.* xviii. 7. See *Points of Controversy*, p. 329.

[५] After this, the Kośakāra discusses one more topic—*Pañchadhā vedanīyatā* (*Akb.* iv. 49.), which is not discussed in *Adv.*

[६] Cf. **नियतानियतं तच्च नियतं त्रिविधं पुनः।**

दृष्टधर्मादिवेद्यत्वात् पञ्चधा कर्म चेतना॥ *Ak.* iv. 50.

तदेतत्कर्म समासतो द्विविधं, नियतवेदनीयमनियतवेदनीयं च । तत्र नियतवेदनीयं[१] त्रिविधम् । दृष्टधर्मवेदनीयमुपपद्यवेदनीयमपरपर्यायवेदनीयं च—इत्येतत् त्रिविधं कर्म नियतवेदनी(2)यम् । चतुर्थमनियतवेदनीयम् ।[२]

तत्र दृष्टधर्मवेदनीयं यत्रैव जन्मनि कृतं तत्रैव विपच्यते । उपपद्यवेदनीयं यद् द्वितीये जन्मनि । अपरपर्यायवेदनीयं तस्मात्परेण ।

अतः पुनश्चतुर्विधात्कर्मणः कतमेन जन्माक्षिप्यते ?

जन्मनस्त्रिभिराक्षेपो दृष्टधर्माद्वयादृते ॥[३]

न खलु दृष्टधर्मवेदनीयेन कर्मणा निकायसभाग (8)आक्षिप्यते ॥

अथ कस्मिन्धातौ कस्यां वां गतौ कतिविधं कर्माक्षिप्यते ?

[179] चतुर्णामपि चाक्षेपः सर्वत्र नरकादृते ।
न तत्रेष्टफलाभावाच्छुभं यस्माद्विपच्यते ॥[४]

सर्वेषु खलु त्रिषु धातुषु सर्वासु च पञ्चसु गतिषु चतुर्णामपि कर्मणामाक्षेपः कुशलानामकुशलानां च । नरकान्वर्जयित्वा । नरकेषु हि दृष्ट[धर्म]वेदनीयं कुशलं नाक्षि(4)प्यते । तत्रेष्टविपाकाभावादन्यत् त्रिविधमाक्षिप्यते । किञ्च,

---

···अपरे पुनः पञ्चविधं कर्मेच्छन्ति । अनियतवेदनीयं द्विधा कृत्वा । विपाकेन नियतमनियतं चेति । *Akb.* IV. 50.

[१] For a controversy on the term *niyata*, see *Kv.* XXI.8.—इदानि कम्मकथा नाम होति । तत्थ यस्मा दिट्ठधम्मवेदनीयादीनि दिट्ठधम्मवेदनादीहि नियतानि, तस्मा सब्बे कम्मा नियता ति येसं लद्धि, सेय्यथापि तेसञ्ञेव [अन्धकानञ्च एकच्चानं उत्तरापथकानं] ।···एत्थ दिट्ठधम्मवेदनीयं दिट्ठधम्मवेदनीयमेव । सचे दिट्ठेव धम्मे विपाकं देतुं सक्कोति, देति, नो चे अहोसिकम्मं नाम होति···। *KvA.* XXI. 8.

[२] After this, the Kośakāra gives various views about the *vipāka* of *drishṭadharma-vedanīya* : जन्मान्तरेऽपि अस्ति दृष्टधर्मवेदनीयस्य कर्मणो विपाक आरम्भवशात्तन्नामव्यवस्थानमित्यपरे । मा भूद्यदेवमिष्टं कर्म तस्याल्पिष्टो विपाक इति । तदेवं नेच्छन्ति वैभाषिकाः ।···दार्ष्टान्तिकास्तु चतुष्कोटिकं कुर्वन्ति···तेषां तत्कर्माष्टविधं दृष्टधर्मवेदनीयं नियतमनियतं च । एवं यावदनियतवेदनीयम् । नियतमेव तु दृष्टधर्मादिवेदनीयमनियतं चतुर्थमिति वर्णयन्ति । *Akb.* IV. 50 a.

[३] See *Asm.* p. 58.

[४] Cf. निकायाक्षेपणं त्रिभिः ।
सर्वत्र चतुराक्षेपः शुभस्य नरके त्रिधा ॥ *Ak.* IV. 51 bcd.

[180] नोत्पद्यवेद्यकृत्तत्र यद्विरक्तः पृथग्जनः ।
स्थिरो नापरकृच्चार्यश्चलोऽपि भवमूलयोः ॥[१]

[२] **यतः खलु भूमेर्विरक्तः पृथग्जनः**[3] **स च स्थिरो भवत्यपरिहाणधर्मा स ध(त)त्रोपपद्यवेद्यं कर्म नाक्षिपति ।**[४] **त्रिविधमन्यत्करोति ।**[५] **आर्यपुद्गलस्तु वीतरागो न च परिहा(5)णधर्मा तत्रोपपद्यवेद्यमपरपर्यायवेदनीयं च कर्म न करोति । न ह्यसौ भव्यः पुनरधरिमं भूमिमायातुम् । अनियतं तु कुर्याद् दृष्टधर्मवेदनीयं यत्रोपपन्नः**[६] **कामधातौ भवाग्रे च । परिहाणधर्मापि त्वार्यः कामधातौ वीतरागः, भवाग्राद्वा, तयोरुपपद्यापरपर्यायवेदनीयं कर्मकर्मा-(-नीयं कर्मा)भव्यः कर्तुम् । किं (6)कारणम् ? फलाद्ध्यसौ परिहीणो भवति । न चास्ति फलपरिहीणस्य कालक्रियेति**[७] **।**[२]

अथ किमन्तराभविकः[८] **कर्माक्षिपति नाक्षिपति ?**[९] **आक्षिपतीत्याह ।**

---

[१] Cf. **यद्विरक्तः स्थिरो बालस्तत्र नोत्पद्यवेद्यकृत् ।**
नान्यवेद्यकृदप्यार्यः कामेऽग्रे वाऽस्थिरोऽपि न ॥ *Ak*. IV. 52.

[२–२] This whole passage (from यतः खलु भूमेर्विरक्तः to कालक्रियेति) is almost identical with *Akb*. IV. 52.

[3] वीतरागपृथग्जनः in *Akb*.

[४] न करोति in *Akb*.

[५] स्थिर इति वर्तते in *Akb*.

[६] Only यत्र in *Akb*.

[७] कालक्रियेति पश्चात्प्रवेदयिष्यामः in *Akb*.

[८] **अन्तराभवः** कामधातौ रूपधातौ चोपपद्यमानस्यारूप्यधातोश्च्यवमानस्य । स च **मनोमयो गन्धर्व** इत्यपि । परं सप्ताहं तिष्ठत्यन्तरेण च्यवते । एकदा च व्यावर्त्तते । तत्रस्थश्च कर्मोपचिनोति सभागांश्च सत्त्वान् पश्यति । यत्र चोपपद्यते तदाकृतिरप्रतिहतगतिश्च । ऋद्धिमानिव चाशुगामी उपपत्त्यायतने प्रतिहन्यते । उपपत्त्यायतने तुलावनामोन्नामयोगेन च्यवते प्रतिसन्धिं च बध्नाति । अन्तराभवस्थश्चोपपत्त्यायतने रागमुत्पादयति । यदन्यश्च क्लेशः प्रत्ययो भवति । सहरागेणान्तराभवो निरुध्यते कललं च सविज्ञानकमुत्पद्यते । *Asm*. pp. 42—43.

Cf. एवमेव खो महाराज यो कोचि **गन्धब्बो यतो कुतो चि आगन्त्वा** अण्डजं योनिं उपगन्त्वा · · ओपपातिकं · · सभाववण्णं विजहित्वा ओपपातिको होति । *Milinda*, p. 132. V. supra, p. 46, n. 2. For a controversy on *Antarā-bhava*, see *Kv*. VIII. 2.—**इदानि अन्तराभवकथा नाम होति ।** तत्थ येसं 'अन्तरा परिनिब्बायी' ति सुत्तपदं अयोनिसो गहेत्वा अन्तराभवो नाम अत्थि, यत्थ सत्तो दिब्बचक्खुको विय अदिब्बचक्खुको, इद्धिमा विय अनिद्धिमा मातापितिसमागमञ्चेव उतुसमयञ्च ओलोकयमानो सत्ताहं वा अतिरेकसत्ताहं वा तिट्ठतीति लद्धि, सेय्यथा पि **पुब्बसेलियानञ्चेव सम्मितीयानञ्च ।** *KvA*. VIII. 2.

For a full discussion on this topic, see *Akb*. III. 4-19.

[९] Cf. **द्वाविंशतिविधं कामेष्वाक्षिपत्यन्तराभवः ।**
दृष्टधर्मफलं तच्च निकायो ह्येक एव सः ॥ *Ak*. IV. 53.

तत्र कामावचरोऽन्तराभवः द्वाविंशतिविधं कर्माक्षिपति । पञ्च गर्भावस्थाः कललार्बुदघनपेशीप्रशाखावस्थाः ।[१] पञ्च जातावस्थाः । बाल्यकौमारयुवमध्यमस्थ(7)विरावस्थाः । ता एता नियतानियतभेदेन विंशतिराक्षिप्यन्ते, एकनिकायत्वात्[२] । अत एवान्तराभववेदनीयं कर्म नोक्तम् । उपपद्यवेदनीयेनैव तस्याक्षेपात् ॥

कीदृशं पुनः कर्म नियतं भवत्यनियतं वा ?

[181] यदार्त्ररौद्रचित्तेन कर्माभीक्ष्णं निषेव्यते ।
सत्क्षेत्रे क्रियते यच्च फलं तस्य नियम्यते ॥[3]

यदि कर्म रौद्रेण तीव्र(8)क्लेशानुगतेन चित्तेन कृतं भवति, यच्च घनश्रद्धासलिलाभ्युक्षितेन क्रियते, यच्च मृद्वप्यभीक्ष्णं निषेव्यते, यच्च किञ्चिद्गुणवति क्षेत्रे क्रियते शुभमशुभं वा फलं तस्य कर्मणो नियम्यते ॥

अथ दृष्टधर्मवेदनीयं कर्म कीदृशमित्युच्यते—

[182] क्षेत्राशयविशेषाच्च फलं सद्यो विपच्यते ।
निरोधव्युत्थितादौ च सद्यः(9) कालफलक्रिया ॥[४]

तत्र क्षेत्रविशेषाद्यथा[५] द(?)[६]क्षजातकादिषु । आशयविशेषाद्यथा बकलात(?)[६]स्यो(स्या)क्षणि(नि)मोचनादिषु ।

---

[१] See *Sakv*. p. 319 and *S*. I. p. 206.

[२] Cf. तच्चैतदन्तराभविकं कर्म यन्नियतमेकादशविधमुक्तं दृष्टधर्मवेदनीयं तद्वेदितव्यम् । किं कारणम् ।

निकायो ह्येक एव सः ।

एक एव ह्यसौ निकायसभाग एककर्माक्षिप्तो यश्चान्तराभवो याश्च तदन्वया दशावस्थाः । अत एवान्यदन्तराभववेदनीयं कर्म नोक्तम् । *Akb*. IV. 53 d.

[3] Cf. **तीव्रक्लेशप्रसादेन सातत्येन च यत्कृतम् ।**
गुणक्षेत्रे च नियतं तत्पित्रोर्घातकं च यत् ॥ *Ak*. IV. 54.

Also cf. यदुक्तं सूत्रे नियतवेदनीयं कर्म इति । कतमे **नियमाः** ? कर्मक्रियानियमः विपाकप्रतिसंवेदनानियमः अवस्थानियमश्च । *Asm*. p. 54.

[४] Cf. **दृष्टधर्मफलं कर्म क्षेत्राशयविशेषतः ।**
ये निरोधारणामैत्रीदर्शनार्हत्फलोत्थिताः ।
तेषु कारापकारस्य फलं सद्योऽनुभूयते ॥ *Ak*. IV. 55 ab and 56.

[५] Cf· दृष्टधर्मवेदनीयं कर्म **क्षेत्रविशेषाद्वा** भवति । यथा संघस्त्रीवादसमुदाचाराद्व्यंजनपरिवृत्तिः श्रूयते । **आशयविशेषाद्वा** । यथा शण्ढस्य गवामपुंस्त्वप्रतिमोक्षणात् पुम्भावः । *Akb*. IV. 55 ab.

[६] The reading is doubtful.

कीदृशे पुनस्तत् क्षेत्रे विशिष्टं भवति यत्र दृष्टे धर्मे विपाको विपच्यते ? बुद्धप्रमुखस्तावद्भिक्षुसंघो । 'निरोधव्युत्थितादौ च सद्यः कालफलक्रिया ।' पञ्चसु च पुद्गलेषु कृतं निरोधसमापत्त्य[III. B. 8. Fol. 94 a]रणामैत्रीदर्शनमार्गादर्हत्फलाद्व्युत्थितेषु कारापकारा[1] दृष्टधर्मवेदनीयफला भवन्ति। निरोधसमापत्तेः खलु व्युत्थितः परां शान्तिं लभते । निर्वाणसदृशधर्मानुभवनात् । अरणाव्युत्थितस्याप्यप्रमाणसत्त्वहिताध्याशयप्रवृत्ता सन्ततिर्वर्तते । एवं [मैत्री]व्युत्थितस्य । स्रौतआपन्नस्यापि निर्मलज्ञानलाभात् । अर्हतोऽपि (2)सर्वक्लेशप्रहाणान्निर्मला वर्तन्ते[2] ॥

नियतविपाकस्य च कर्मणः शुभाशुभस्य या भूमिस्तदत्यन्तवैराग्यात्तत्कर्म दृष्टे धर्मे विपच्यत इत्यतः

[183] तद्भूम्यपुनरुत्पत्तेः

दृष्टधर्मवेदनीयं संगृहीतं भवति । कीदृशं पुनरेतत्कर्म ?

विपाकनियतं च यत् ।[3]

तच्चैतत्कर्म विपाकनियतं[4] द्रष्टव्यम् ।

तच्च दृष्टफलं विद्यात्

(3)दृष्टे धर्मे खलु तस्य विपाको विपच्यते । कतरत्पुनरेतत् ?

कर्मादः परिपूरकम् ॥

नाक्षेपकमिति ॥[5]

विपाकः खलु वेदनाप्रधान इत्यत इदं विचार्यते । स्यात्कर्मणश्चैतसिक्येव वेदना विपाको न कायिकी ? स्यात्कायिक्येव न चैतसिकी स्यादित्याह—

---

[1] For this word, see *Śikshā*. p. 87.

[2] This passage (from कीदृशे पुनस्तत्) is almost identical with *Akb.* IV. 56. After this, the *Akb.* has : शेषस्य तु भावनामार्गस्यापरिपूर्णस्वभावफलत्वाच्च तद्व्युत्थितानां न तथा प्रत्यग्राश्रयपरिवृत्तिशुद्धाशयसंततिर्वर्तते इति न ते तथा पुण्यक्षेत्रं भवन्ति । *Akb.* IV. 56. See *Asm.* p. 58.

[3] Cf. तद्भूम्यत्यन्तवैराग्याद्विपाके नियतं हि तत् । *Ak.* IV. 55 cd.

[4] V. supra, p. 143, n. 3.

[5] आक्षेपकं कर्म कतमत् । येन फलविपाकोऽभिनिर्वर्तते । परिपूरकं कर्म कतमत् । येनोपपन्न इष्टानिष्टफलं वेदयते । *Asm.* p. 54.

[184] कुशलस्याविचारस्य चैतसिक्येव वेदना ।
विपाकः कायिकी त्विष्टा (4)दुःखवेद्यस्य कर्मणः ॥[१]

[२]कुशलं खलु विचारं कर्म ध्यानान्तरात्प्रभृति यावद्भवाग्रम् । तस्याविचारस्य कुशलस्य कर्म[ण]श्चैतसिक्येव वेदना विपाकः । कस्मान्न कायिकी? तस्याः अवश्यं सवितर्कविचारत्वात् । कायिक्येव त्वशुभस्य दुःखवेदनीयस्य कायिक्येव वेदना विपाकः । कस्मान्न चैतसिकी? चैतसिकं हि दौर्मण(न)(5)स्यं न विपाकः ।[२]

यस्त(त्त)र्हि कर्मवशात्सत्त्वानां चित्तक्षेपः तत्संप्रयुक्ता वेदना कथं न विपाकः? न हि तत्र चित्तं कर्मणो विपाकः । किं तर्हि? यो महाभूतानां प्रकोपः स विपाकः । ततस्तज्जातं चित्तं विपाकशब्देनोपचर्यते ॥[३]

पुनश्चतुर्विधं कर्मोक्तम्—"अस्ति कर्म कृष्णं कृष्णविपाकम् । अस्ति शुक्लं शुक्लविपाकम् । अस्ति कर्म कृष्ण(6)शुक्लं कृष्णशुक्लविपाकम् । अस्त्यकृष्णमशुक्लमविपाकं कर्म कर्मक्षयाय संवर्तते" इति ।[४] तत्र

---

[१] Cf. कुशलस्यावितर्कस्य कर्मणो वेदना मता ।
विपाकश्चैतसिक्येव कायिक्येवाशुभस्य तु ॥ *Ak.* IV. 57.

[२–२] This whole passage (upto न विपाकः) is almost identical with *Akb.* IV. 57. The latter has *avitarka* instead of *avichāra*. After 'कस्मान्न चैतसिकी ?', the *Akb.* has : तस्य हि दुःखा वेदना विपाकश्चैतसिकी च दुःखा वेदना दौर्मनस्यम् । न च दौर्मनस्यं विपाक इति व्याख्यातमेतत् । This topic *(dāurmanasya)* was perhaps discussed in the lost portions of *Adv.* V. supra, p. 52, n. 4.

[३] Cf. **चित्तक्षेपो मनश्चित्ते स च कर्मविपाकजः ।**
भयोपघातवैषम्यशोकैश्चाकुरुकामिनाम् ॥ *Ak.* IV. 58.

…यदि मनो विक्षिप्यते कर्मविपाकजश्च चित्तक्षेपः । कथं न चैतसिकी वेदना विपाकः प्राप्नोति ? नहि ब्रूमस्तदेव चित्तविपाक इत्यपि तु यो महाभूतानां प्रकोपः स विपाकः । तस्माज्जातमतो विपाकजम् ।…एवं चेदं **चतुष्कोटिकं** युज्यते…। *Akb.* IV. 58. See *Sakv.* p. 396 and *Milinda*, p. 137.

[४] Cf. चेतनाय सम्पयुत्तधम्मानं पन कम्मभावो कम्मचतुक्केन दीपितो । वुत्तं हेतं—**चत्तारिमानि भिक्खवे कम्मानि** मया सयं अभिञ्ञा सच्छिकत्वा पवेदितानि, कतमानि चत्तारि ? अत्थि भिक्खवे कम्मं कण्हं कण्हविपाकं, अत्थि…सुक्कं सुक्कविपाकं, अत्थि भिक्खवे कम्मं कण्हसुक्कं कण्हसुक्कविपाकं, अत्थि भिक्खवे कम्मं अकण्हमसुक्कं अकण्ह–असुक्कविपाकं कम्मं कम्मक्खयाय संवत्तति । [*Aṅg* II. pp. 230-1] *Dhs A.* III. 117.

[185] सपाकमशुभं कृष्णं सपाकं रूपजं सितम् ।
शुभाशुभं द्विधा काये(मे) निर्मलं तत्प्रहाणकृत् ॥[१]

[२]अशुभं खलु कर्म एकान्तेन कृष्णं क्लिष्टत्वात्। कृष्णविपाकं चामनोज्ञविपाकत्वात्। रूपाप्तन्तु शुभमेकान्तेन शुक्लम्, अकुशलेनाव्यव(7)कीर्णत्वात्। शुक्लविपाकं च मनोज्ञविपाकत्वात् ।

आरूप्याप्तं कस्मान्नोच्यते ? यत्र हि द्विविधोऽस्ति विपाकः—अन्तराभविकश्चोपपत्तिभविकश्च; त्रिविधस्य च कायवाङ्मनस्कर्मणस्तत्रैवोक्तमिति ।

[३]"कामाप्तं शुक्लं कृष्णशुक्लमकुशलव्यवकीर्णत्वात्, कृष्णशुक्लविपाकं व्यवकीर्णविपाकत्वात् ।" सन्तानत एतद्व्यवस्थापितं(8) न स्वभावतो न ह्येवंजातीयकमेवं कर्मास्ति विपाको वा यत्कृष्णं च स्याच्छुक्लं च, अन्योन्यविरोधात् ।[४] ननु चैवमकुशलस्यापि कर्मणः कुशलव्यवकीर्णत्वात्कृष्णशुक्लत्वं प्राप्नोति ? नावश्यमकुशलं कुशलेन व्यवकीर्यते । कामधातौ त्वस्य बलवत्वात्कुशलन्तु व्यवकीर्यते दुर्बलत्वादिति ।

अनास्रवं कर्मैषां त्रयाणां कर्मणां(9) क्षयाय प्रहाणाय संवर्तते । तद्ध्यकृष्णमक्लिष्टत्वादशुक्लं विपाकशुक्लताऽभावात्[५] । आभिप्रायिकोऽप्येश(ष) शुक्लशब्दः। उक्तं तु भगवता महत्यां शून्यताया[६]मशैक्षधर्माणा(ना)रभ्य—

---

[१] Cf. कृष्णशुक्लादिभेदेन पुनः कर्म चतुर्विधम् ॥
अशुभं कामरूपाप्तं शुभं चैव यथाक्रमम् ।
कृष्णशुक्लोभयं कर्म तत्क्षयाय निरास्रवम् ॥ *Ak.* IV. 59 cd, 60.

[२] This whole *Adv. kārikā* 185 is almost identical with *Akb.* IV. 60.

[३] *Akb.* has. तदपि तूक्तं **सूत्रान्तरे**—"कामाप्तं शुक्लं···व्यवकीर्णविपाकत्वात् ।"

[४] Cf. कण्हसुक्कविपाकं ति सुखदुक्खविपाकं; मिस्सककम्मं हि कत्वा अकुसलेन तिरच्छानयोनियं मङ्गलहत्थिट्ठानादिसु उप्पन्नो कुसलेन पवत्ते सुखं वेदियति, कुसलेन राजकुलेपि निब्बत्तो अकुसले पवत्ते दुक्खं वेदियति । *AṅgA.* III. p. 212.

Also cf. कृष्णशुक्लं कृष्णशुक्लविपाकं कर्म कतमत् । कामप्रतिसंयुक्तं कर्म यत् कर्म वा आशयतः प्रयोगतो वा शुक्लं यत् कर्म-वा प्रयोगतः कृष्णमाशयतः शुक्लम् । *Asm.* p. 59.

[५] Cf. अकृष्णशुक्लाविपाकं व्यामिश्रं कर्म कतमत् । प्रयोगानन्तर्यमार्गेऽनास्रवं कर्म । *Ibid.* Also cf. कतमं च भिक्खवे कम्मं अकण्हं—असुक्कं अकण्ह—असुक्कविपाकं कम्मं कम्मक्खयाय संवत्तति ? यदिदं सत्त सम्बोज्झंगा—सतिसम्बोज्झंगो–पे–उपेक्खासम्बोज्झंगो । *Aṅg.* II. p. 237.—अकण्हं असुक्कं ति कम्मक्खयकरं चतुमग्गञाणं । *Aṅg A.* III. p. 212. See *Yoga-bhāshya*, IV. 7 and *Aaa.* p. 47.

[६] **महाशून्यतार्थसूत्रे** । *Sakv.* p. 398.

"इमे ते आनन्द, धर्मा एकान्तशुक्ला एकान्तानवद्याः" इति । शास्त्रे[१] च—"शुक्लधर्माः कतमे ? कुशला धर्मा अनिवृताव्याकृताश्च ।" इति । अविपाकं धा[III. A,8. Fol. 94 b.] (1)त्वपतितत्वात्, प्रवृत्तिविरोधाच्च ॥

किं पुनः सर्वमनास्रवं कर्म सर्वस्यास्य त्रिविधस्य कर्मणः क्षयाय संवर्तते ? नेच्यु(त्युच्य)ते । किं तर्हि ?

[186] चतस्रो दृक्पथा दृष्टौ चेतनाभावनापथात् ।
आनन्तर्यपथाः कामे कर्मैतत्कृष्णनाशकृत् ॥

[187] नवमे चेतना या तु सा कृष्णाकृष्णया(घा)तिनी ।
अन्तानन्तर्यमार्गस्था ध्याने ध्याने सितस्य तु ॥[२]

तत्र दर्शण(न)मार्गे (2)तावच्चतसृषु धर्मज्ञानक्षान्तिषु कामवैराग्ये चाष्टास्वानन्तर्यमार्गेषु या चेतना द्वादशप्रकारा सा कृष्णस्य कर्मणः प्रहाणकारी । कामवैराग्यानन्तर्यमार्गेण(णा)वसेया चेतना सा कृष्णशुक्लकर्मक्षयकारी ।[३] ध्याने ध्याने त्वानन्तर्यमार्गे पश्चिमे या चेतना चतुर्विधा सा शुक्लकर्मापहन्त्री ।[४]

[५]किं पुणः(नः) कारणमन्त्येनै(3)वानन्तर्यमार्गेण कुशलस्य कर्मणः प्रहाणं नान्येन ? न हि तस्य स्वभावप्रहाणं प्रहीणस्यापि संमुखीभावात् । किं तर्हि ? तदालम्बनक्लेशप्रहाणात् । अतो यावदेकोऽपि तदालम्बनः क्लेश-

---

[१] *Prakaraṇa*, 6, 9; *Vibhāṣā*, 114, 1. (See *LVPAk*. IV. p. 130, n. 5.)

[२] Cf. धर्मक्षान्तिषु वैराग्ये चानन्तर्यपथाष्टके ।
या चेतना द्वादशधा कर्म कृष्णक्षयाय तत् ॥
नवमे चेतना या सा कृष्णशुक्लक्षयाय च ।
शुक्लस्य ध्यानवैराग्येष्वानन्तर्यमार्गजा ॥ *Ak*. IV. 61-62.

[३] Cf. नवमे कामवैराग्यानन्तर्यमार्गे या चेतना सा कृष्णशुक्लस्य कुशलस्य कर्मणः कृष्णस्य चाकुशलस्य नवमस्य प्रकारस्य प्रहाणाय । *Akb*. IV. 62 ab.

[४] ध्यानाद्ध्यानाद्वैराग्यं कुर्वतो योऽन्त्यो नवम आनन्तर्यमार्गस्तत्र या चेतना इयं चतुर्विधा चेतना शुक्लस्य कर्मस्य प्रहाणाय । *Ibid*. 62 cd.

[५] This whole passage (from किं पुनः कारणम् to तावदस्य प्रहाणं नोपलभ्यते), is identical with *Akb*. IV. 62 cd. The latter has :—प्रहाणं नोपपद्यते ।—'नहि तस्य स्वभावप्रहाणम्' इति प्राप्तिच्छेदप्रहाणम् । प्रहीणस्यापि कुशलस्य संमुखीभावात् । तदालम्बनक्लेशप्रहाणात्' इति । तदालम्बनस्य क्लेशस्य प्रहाणात् तस्य कुशलस्य प्रहाणं भवति । तदालम्बनक्लेशप्रहाणं च नवमस्य तदालम्बनक्लेशप्रकारस्य प्रहीणे सति भवतीति । नवमानन्तर्यमार्गचेतनैव कृष्णशुक्लस्य कर्मणः क्षयाय भवति । तदा हि नवमस्य क्लेशप्रकारस्य

प्रकारोऽस्ति तावदस्य प्रहाणं नोपलभ्यते । [१]तच्चैतदसत् । प्रहीणं हि तत्, न तु विहीनम् । अतः समुदाचरतीति ।[१] गतमेतत् ॥[२]

सूत्र उक्तम्—"त्रीणि दु(4)श्चरितानि । कायदुश्चरितं वाङ्मनोदुश्चरितम् । एवं सुचरितानि"[३] इति । तेषां कः स्वभावः ? तत्र तावत्—

[188] कायाद्यकुशलं कर्म सर्वं दुश्चरितं मतम् ।

सर्वमिति ससामन्तकमौलपृष्ठमित्यर्थः ।

अभिध्यादीन्यपि त्रीणि मनोदुश्चरितत्रयम् ॥[४]

सर्वमेवाकुशलं कायकर्म कायदुश्चरितम् । एवं वाङ्मनोदुश्चरितम् । अकर्मस्वभावा(5)न्यपि त्वभिध्यादीनि मनोदुश्चरितस्वभावानि ।

"अभिध्यादय एव कर्मस्वभावानि" इति स्थितिभागीयाः[५] । तच्च न, कर्मक्लेशैकत्वदोषात् । स्थितिभागीया ण(ना)म शाक्याः स्व(श्व?)लांगूलिकद्वितीयनामानः । ते खल्वभिध्यादीनि मनस्कर्मस्वभावानीच्छन्ति । तेषां

प्राप्तिच्छेदे विसंयोगप्राप्तिरुत्पद्यते । तस्य च कृष्णशुक्लस्य कर्मणोऽन्यस्यापि चानिवृताव्याकृतस्य सास्रवस्य धमस्य विसंयोगप्राप्तिरुत्पद्यत इति **वर्णयन्ति** । एवं चतुर्ध्यानवैराग्येष्वपि वक्तव्यम् । *Sakv*. p. 398.

[१-१] This comment is not found in *Akb*.

[२] After this, the Kośakāra in *Akb*. IV. 63, gives various views about the *krishṇa-karma* and its *vipāka*.

[३] Cf. तीणि दुच्चरितानि । कायदुच्चरितं वचीदुच्चरितं मनोदुच्चरितं । तीणि सुचरितानि । कायसुचरितं वचीसुचरितं मनोसुचरितं । *Dīgha*. XXXIII. 1.10.

[४] Cf. **सर्वं सुचरितत्रयम्** ।

अशुभं कायकर्मादि मतं दुश्चरितत्रयम् ।

अकर्मापि त्वभिध्यादिमनोदुश्चरितं त्रिधा ॥ *Ak*. IV. 64 d, 65.

[५] Cf. अकर्मस्वभावमप्यस्ति त्रिविधं मनोदुश्चरितं चेतनार्थान्तरभूतं, अभिध्या व्यापादो मिथ्यादृष्टिश्च । अभिध्यादय एव मनस्कर्मेति **दार्ष्टान्तिकाः** । **संचेतनीयसूत्रे** वचनात् । *Akb*. IV. 65 cd.

'सञ्चेतनीयसूत्रे वचनात्' इति । "सञ्चेतनीयं कर्म कृत्वोपचित्वा नरकेषूपपद्यते । कथं च भिक्षवः सञ्चेतनीयं कर्म कृतं भवत्युपचितम् । इह भिक्षव एकत्यः संचिन्त्य त्रिविधं कर्म कायेन करोत्युपचिनोति, चतुर्विधं वाचा, त्रिविधं मनसा" इति विस्तरेणोक्त्वाह— "कथं भिक्षवस्त्रिविधं मनसा सञ्चेतनीयं कर्म कृतं भवत्युपचितम् । यथाऽपीहैकत्योऽभिध्यालुर्भवति व्यापन्नचित्तः यावन्मिथ्यादृष्टिः खलु भिक्षव इहैकत्यो भवति विपरीतदर्शीति" विस्तरः । न चान्यद् अभिध्यादिव्यतिरिक्तं तत्र मनस्कर्मोक्तमिति 'अभिध्यादय एव मनस्कर्म' इति **दार्ष्टान्तिकाः सौत्रान्तिकविशेषा** इत्यर्थः । *Sakv*. p. 400. V. supra, p. 47, n. 4.

कर्मक्लेशैकत्वसङ्करः प्राप्नोति [१]। कोशकारः—"कोऽत्र दोषः" ?[२] यदि कश्चित्क्लेशः क(6)र्मापि स्याद्वायसः सारसः स्यात् । कर्मक्लेशानां चात्यन्तस्वभावप्रभावक्रियाफलभेदभिन्नानामेकत्वपरिकल्पैः सांख्यीयादिदर्शण(न)मभ्युपगतं स्यात् ।

'अपि' शब्दात्पुनरत्र सूत्रोक्तास्त्रयो वङ्कास्त्रयो दोषास्त्रयः कषाया आकृष्यन्ते ।[३] तेषां पुनरिदं लक्षणं यथाक्रमेण ।[४] शाठ्यजं कायकर्म कायवङ्क

The term *Sthitibhāgīya* is not used either by the Kośakāra or by Yaśomitra to indicate the Dārshṭāntika. For the *Saṁchetanīya-sūtra*, cf. "कथं च भिक्खवे तिविधा मनोकम्मन्तसन्दोसव्यापत्ति अकुसलसंचेतनिका दुक्खुद्रया दुक्खविपाका होति ? इध भिक्खवे एकच्चो अभिज्झालु होति···व्यापन्नचित्तो···मिच्छादिट्ठिको···होति । *Aṅg.* v. p. 293.

For *abhidhyā*, etc, cf. तत्थ 'धम्मतो' ति एतेसु [दस अकुसलकम्मपथेसु] हि पटिपाटिया सत्त चेतना धम्मा होन्ति, अभिज्झादयो तयो चेतनासम्पयुत्ता । *Dhs A.* III. 158.

[१] This view of *Dārshṭāntika* about *kleśa* and *karma* amounts to a theory that the *saṁvara* and *asaṁvara* are also *karma*. For a controversy on this, see *Kv.* XII. 1—इदानि संवरो कम्मं ति कथा होति । तत्थ 'चक्खुना रूपं दिस्वा निमित्तग्गाही होति, न गिमित्तग्गाही होती' ति सुत्तं निस्साय 'संवरोपि असंवरोपि कम्मं'ति येसं लद्धि, सेय्यथा पि **महासङ्घिकानं**। ते सन्धाय पुच्छा सकवादिस्स । *KvA.* XII. 1.

[२] Cf. एवं तु सति कर्मक्लेशयोरैक्यं स्यात् । किं स्याद्यदि कश्चित् क्लेशोऽपि कर्म स्यात् ? **सूत्रं** विरुद्धं स्यात् । **सूत्रे** तु चेतनायास्तन्मुखेन प्रवृत्तैस्तां दर्शयतीति **वैभाषिकाः**। *Akb.* IV. 65.

'एवं तु सति कर्मक्लेशयोरैक्यं स्यात्' इति । अभिध्या व्यापादमिथ्यादृष्टयः क्लेशाः, त एव कर्मेति । तदैक्यं स्यात् । नैतदस्ति । कश्चित्क्लेशोऽपि कर्म स्यादिति । चेतना कर्म चेतयित्वा कर्म चेति वचनात् । **यद्येवं सञ्चेतनीयसूत्रं कथं नीयत** इत्याह :—'सूत्रे तु' इति विस्तरः । सूत्रे तु चेतनायास्तन्मुखेनाभिध्यादिमुखेन प्रवृत्तेस्तैरभिध्यादिभिस्तां चेतनां दर्शयति । "अभिध्यालुः खलु भिक्षवो भवति" इति विस्तरेण । अन्यथा चेतनामहं भिक्षवः कर्मं वदामि चेतयित्वा चेत्येतद्विरुध्यते । **कर्मक्लेशयोश्चैक्ये अभिधर्मविरोधः स्यात् ।** 'परानुग्रहोपघाताभिसन्ध्यभाव' इति विस्तरः । 'परेषामनुग्रहोपघातयोरभिसन्ध्यभावे कथं सम्यग्दृष्टिमिथ्यादृष्ट्योर्यथाक्रमं कुशलाकुशलत्वम्' इति । अतो ब्रवीति तन्मूलत्वादिति । ···अतस्तयोः कुशालाकुशलत्वम् । *Sakv.* p. 400.

For the terms *karma* and *kleśa*, see *Yogasūtra-bhāshya*, I. 24, II. 12 and IV. 30.

[३] Cf. एतरहि खो पनाहं भिक्खवे···कुसलो कायवङ्कानं कायदोसानं कायकसावानं, कुसलो वचीवङ्कानं वचीदोसानं वचीकसावानं, कुसलो मनोवङ्कानं मनोदोसानं मनोकसावानं । *Aṅg.* I p. 112.

[४] Cf. **वङ्कदोषकषायोक्तिः शाठ्यद्वेषजरागजे** । *Ak.* IV. 59 ab.

इत्युच्यते। कुटिलान्व(7)यत्वात्। एवं शाठ्यजं वाङ्मनस्कर्म वाङ्मनोवङ्क इत्युच्यते। द्वेषजाः पुनस्त एव त्रयो दोषा इत्याख्यायन्ते, चित्तप्रदोषान्वयत्वात्। रागजं पुनः कायकर्म कायकषाय[१] इत्युक्तं रञ्जनात्मकत्वात्[२]। एवं वाङ्मनःकषायौ द्रष्टव्यौ। तानि पुनः कुशलानि कायवाङ्मण(न)स्कर्माणि त्रीणि सुचरितानि बोद्धव्यानि। एतान्येव(8) त्रीणि शौचेयाण्यु(न्यु)क्तानि।

अशैक्षसन्ताने त्रीणि मौनेयान्युच्यन्ते[३]। तत्र कायसुचरितं कायमौनेयं वाक्सुचरितं वाङ्मौनेयं मन एव तु मिथ्यासंकल्पोपरमान्मुनिरित्याख्यायते।[४] तदुपरमाद्धि कायवाग्जल्पोपरमो भवति। मुनेरिदं मौनेयमिति निरुक्तिः।[५]

---

[१] Cf. रागकसावो दोसकसावो मोहकसावो। इमे तयो कसावा। अपरेपि···। कायकसावो वचीकसावो मनोकसावो। इमे तयो कसावा। *Vbh.* p. 368. कसावा ति, कसटा निरोजा; रागादीसु च कायदुच्चरितादीसु च एकम्पि पणीतं ओजवन्तं नत्थि। तस्मा रागो कसावो ति आदि वुत्तं। *VbhA.* p. 499.

Also cf. सकषायाकषाययोः साम्परायिकेर्यापथयोः। *Tattvārtha-sūtra*, vi. 4.

कषणादात्मनां घातात्कषायः कुगतिप्रदः।
क्रोधादिः सह तेनात्मा सकषायः प्रवर्तनात्॥
कषायरहितस्तु स्यादकषायः प्रशांतितः।
कषायस्य क्षयाद्वेति प्रतिपत्तव्यमागमात्॥

Tattvārtha-śloka-vārtika, vi. 2-3.

[२] Compare with this the Jaina theory of *leśyā*. See *Tattvārthādhigama-sūtra*, ii. 6.

[३] Cf. **अशैक्षं कायवाक्कर्म मनश्चैव यथाक्रमम्।**
मौनत्रयं त्रिधा शौचं सर्वं सुचरितत्रयम्॥ *Ak.* iv. 64.

[४] Cf. अशैक्षे कायवाक्कर्मणी कायवाङ्मौनेये। अशैक्षं तु मन एव मनोमौनेयं न मनस्कर्मेति। किं कारणम्। चित्तं हि परमार्थमुनिः। तत् किल कायवाक्कर्माभ्यामनुमीयत इति। अपि खलु कायवाक्कर्मणी विरतिस्वभावेन न मनस्कर्म। चित्ताविज्ञप्त्यभावात्। विरमार्थेन च मौनम्। अतो मन एव विरतमौनमित्युच्यते। *Akb.* iv. 64. 'तत् किल काय-वाक्कर्माभ्यां' अशैक्षाभ्यां 'अनुमीयते' अशैक्षमिति। कथं तथागतोऽनुमातव्यः। प्रशान्तेन कायकर्मणा प्रशान्तेन वाक्कर्मणेति **सूत्रे** वचनात्। 'किल' शब्देन **वैभाषिकमतं** द्योतयित्वाऽऽ**चार्यः** स्वमतमाह—'अपि खलु' इति विस्तरः। 'चित्तविज्ञप्त्यभावात्' इति। यस्मात् 'चित्तस्याविज्ञप्तिः' नास्त्यतो 'न मनस्कर्म विरतिस्वभावम्। विरमार्थेन च मौनम्' इति। 'विरमो' विरतिः। सर्वाकुशलविरमार्थेन मौनमित्यभिप्रायः। 'अतो मन एव' सर्वाकुशलेभ्यो 'विरतं मौनमित्युच्यते'। *Sakv.* p. 399.

[५] Cf. त्रीणिमानि भिक्खवे मोनेय्यानि। कतमानि तीणि? कायमोनेय्यं वचीमोनेय्यं मनोमोनेय्यं। ··कतमं च भिक्खवे मनोमोनेय्यं? इध भिक्खवे भिक्खु आसवानं

कस्मात्पुनरर्हत एव मौनेयाणि(नि)? तस्य पर(9)मार्थमुनित्वात्[१]। स खलु सर्वक्लेशजल्पोपरमान्मुनिरित्युच्यते।

एषा पुनर्मौणे(ने)यशौचेयदेशना मिथ्यामौनशौचाभियुक्तानधिकृत्य-देशितेति तदेतत्सह मौनेयशौचेयैर्निर्दिष्यते॥

[189] शुभं तत्साऽनभिध्यादि प्रोक्तं सुचरितत्रयम्।
द्वयंमौलमदः कर्म मार्गा दश शुभाशुभाः॥[२]

द्वयं पुनरेतत्सुचरितदुश्चरिताख्यं यन्मौ[Iv. B, 1. Fol. 95 a.](1)लं ते दश शुभाश्चाशुभाश्च कर्मपथा भवन्ति[3] प्रयोगपृष्ठवर्ज्याः।

तत्र कायसुचरितस्य प्रदेशः पृयोगपृष्ठाख्यो मद्यादिविरतिदानेज्यादिकः। वाक्सुचरितस्य पृ(प्रि)यवचनादिकः। मनःसुचरितस्य शुभा चेतना।

कायदुश्चरितस्यापि परेषां जीवितभोगदाराऽ[पहार]प्रयोगपृष्ठाख्यः। वाग्दुश्चरितस्याप्यपृ(प्रि)यवचनाद्याख्यः। (2)मनोदुश्चरितस्याप्यकुशलं मनस्कर्म……[४]स्तेषां नात्यौदारिकत्वात्।

यस्तु प्राणातिपातादत्तादानकाममिथ्याचारविरत्याख्यौ(ख्यो) मौलः स कुशलः कर्मपथः, तस्यौदारिकत्वेन महानुशंसतमफलत्वात्। यस्तु परेषां जीवितभोगपरदारापहारकायपरिस्पन्दः स मौलः स चाकुशलः कर्मपथः। एवं यथा(3)संभवमन्येषां द्रष्टव्यमिति॥

अभिधर्मदीपे विभाषाप्रभायां [वृत्तौ] चतुर्थस्याध्यायस्य द्वितीयः पादः॥

खया अनासवं चेतोविमुत्तिं पञ्ञाविमुत्तिं दिट्ठेव धम्मे सयं अभिञ्ञा सच्छिकत्वा पवेदेति। इदं वुच्चति भिक्खवे मनोमोनेय्यं। *Aṅg.* I. p. 273.

····चित्तसंखारनिरोधो सञ्ञावेदयितनिरोधसमापत्ति मनोमोनेय्यन्ति वेदितब्बा। *Aṅg. A.* II. p. 372.

[१] Cf. कायवाङ्मनोमौनेययोगाच्च शाक्यमुनिः। *Aaa.* p. 160. सर्वकल्पनाविरहात्समारोपापवादान्तद्वयमौनात्, अशैक्षकायवाङ्मनःकर्मलक्षणमौनत्रययोगाद्वा मुनिर्बुद्धो भगवान्। *B. Pañjikā*, IX. 1.

[२] Cf. विपर्ययात्सुचरितं तदौदारिकसंग्रहात्।
दश कर्मपथा उक्ता यथायोगं शुभाशुभाः॥ *Ak.* IV. 66.

[3] **दस अकुसलकम्मपथा।** पाणातिपातो, अदिन्नादानं, कामेसु मिच्छाचारो, मुसावादो, पिसुणा वाचा, फरुसा वाचा, सम्फप्पलापो, अभिज्जा, व्यापादो, मिच्छादिट्ठि।

दस कुसलकम्मपथा। पाणातिपाता वेरमणी—पे०—सम्फप्पलापा वेरमणी, अनभिज्झा, अव्यापादो, सम्मादिट्ठि। *Dīgha.* XXXIII. 3.3. See *DhsA.* III. 142--172.

[४] A blank space of about five letters in the Ms.

चतुर्थाध्याये

तृतीयपादः ।

इदमिदानीं वक्तव्यम् । य एते दशकर्मपथा एषां कति विज्ञप्तिस्वभावाः कत्यविज्ञप्तिस्वभावाः कत्युभयस्वभावाः ?

तत्राकुशलानां तावत्—

[190] कारिताः षडविज्ञप्तिर्द्व्यात्मैकस्तेऽपि षट् कृताः ।[1]

तत्र प्राणा(4)तिपातादत्तादानमृषावादपैशून्यपारुष्यसंभिन्नप्रलापाः । एते नावश्यं विज्ञप्तिस्वभावाः ।[2] परेण कारयतो मौलीविज्ञप्त्यभावात् ।[3] काममिथ्याचारस्तु नित्यं द्व्यात्मकः, तस्य परेणाशक्यत्वात् । तेऽपि 'षट् कृताः' यदा स्वयमेव प्राणातिपातादीन् षट् कर्मपथान् करोति तदा द्व्यात्मानो भवन्ति । विज्ञप्त्यविज्ञप्तिस्वभावत्वात् ।

कुशलानां पुनः

शुभाः सप्त द्विधा ज्ञेया एकवै(धै)ते समाहिताः ॥[4]

सप्त खलु रूपिणः कुशलाः कर्मपथाः द्विधा भवन्ति । विज्ञप्त्यधीनत्वात् समाहित[5]शीलस्य । ध्यानानास्रवसंवरसंगृहीतास्त्वविज्ञप्तिस्वभावा एव । समाहित(5)स्य विज्ञप्त्यभावात् ।

[191] या सामन्तेष्वविज्ञप्तिः पृष्ठेषु तु विपर्ययः ।[6]

---

[1] Cf. अशुभाः षडविज्ञप्तिः द्विधैकस्तेऽपि कुर्वतः । *Ak.* IV. 67 ab.

[2] Cf. अकुशलाः षट् कर्मपथा अवश्यमविज्ञप्तिस्वभावाः । *Akb.* IV. 67 ab.

[3] 'मौलविज्ञप्त्यभावात्' इति । यस्मान् मौली कर्मपथसंगृहीता विज्ञप्तिर्नास्ति । आज्ञापनविज्ञप्तिस्त्वस्ति प्रयोगमार्गसंगृहीतेति **वैभाषिकसिद्धान्तः** । *Sakv.* p. 401.

[4] Cf. **द्विविधाः सप्त कुशला अविज्ञप्तिः समाधिजा ॥** *Ak.* IV. 67 cd.

[5] *Samādāna* in *Akb.* 'विज्ञप्त्यधीनत्वात् समादानशीलस्य' इति । शीलं हि द्विविधम् । समादानशीलं प्रातिमोक्षसंवरो धर्मताशीलं च ध्यानानास्रवसंवरौ । समादानशीलं विज्ञप्त्यधीनम् ।···धर्मताशीलं तु न विज्ञप्त्यधीनम् । *Sakv.* p. 401.

[6] Cf. **सामन्तकास्तु विज्ञप्तिरविज्ञप्तिर्भवेन्न वा ।**
विपर्ययेण पृष्ठानि । *Ak.* IV. 68 abc.
Adv. kārikā 191 ab. substantially agrees with *Akb.* IV. 68 abc.

सामन्तकः खलु यदा तीव्रेण पर्यवस्थानेन[१] प्रयोगमारभते, प्रसादेन वा घनरसेन तदा द्विस्वभावा । यदा मृदुना तदा विज्ञप्तिरेव । विपर्ययेण तु पृष्ठेष्ववश्यमविज्ञप्तिः । यदि पुनः कर्मपथं कृत्वा पुनस्तत्रैवानुचेष्टते स्याद्विज्ञप्तिरपी(6)ति । तीव्रेण तु प्रहारेण जीविताद्व्यपरोपयति । तत्र या विज्ञप्तिस्तत्क्षणिका चाविज्ञप्तिः स मौलः कर्मपथः । द्वाभ्यां हि कारणाभ्यां प्राणातिपातावद्येन स्पृश्यते । प्रयोगतः फलपरिपूरितश्च ।[२] तत ऊर्ध्वमविज्ञप्तिक्षणः(णाः) पृष्ठीभवन्ति । यावद्धतं पशुं कृष्णाति शोधयति विक्रीणाति पचति खादति कीर्तयति । यदि तावद(7)स्य विज्ञप्तिक्षणा अपि पृष्ठं भवन्ति । एवमन्येष्वपि[३] यथासंभवं योज्यम् ।

अभिध्यादीनां नास्ति प्रयोगो न पृष्ठं संमुखीभावमात्रादेव कर्मपथाः[४] ।[५]

सूत्रे भगवतोक्तम्—"प्राणातिपातो भिक्षवस्त्रिविधः । लोभजो द्वेषज मोहजः, यावन्मिथ्यादृष्टिः" इति[६] । तत्रैषां कर्मपथानां केषाञ्चिल्लोभेन निष्ठा, केषाञ्चिद् द्वेषेण, केषाञ्चि(8)न्मोहेन[७] । सर्वेषामपि

प्रयोगस्तु त्रिमूलोत्थः[८]

---

[१] पर्यवस्थानेनेति आह्रीक्यादिना । *Sakv*. p. 401.

[२] प्रयोगस्य मौलः कर्मपथः फलपरिपूरिः । यो हि प्रयुज्यते मौलं कर्मपथं न जनयति तस्य प्रयोगफलमस्ति न तु फलपरिपूरिः । *Ibid*.

[३] 'एवमन्येष्वपि' इति । यथा तावदिह कश्चित् परस्वं हर्तुकामो मञ्चादुत्तिष्ठति शस्त्रं गृह्णाति, परगृहं गच्छति । सुप्तो न वेत्याकर्णयति । परस्वं स्पृशति । यावन्न स्थानात्प्रच्यावयति । तावत्**प्रयोगः** । यस्मिंस्तु क्षणे स्थानात्प्रच्यावयति तत्र या विज्ञप्तिस्तत्क्षणिका चाविज्ञप्तिरयं **मौलः कर्मपथः** । द्वाभ्यां हि कारणाभ्यां अदत्तादानावद्येन स्पृश्यते प्रयोगतः फलपरिपूरितश्च । ततः परमविज्ञप्तिक्षणाः **पृष्ठं** भवन्ति । यावत्तत्परस्वं विभजते···गोपयति । अनुकीर्तयति वा तावदस्य विज्ञप्तिक्षणा अपि पृष्ठं भवन्तीति । *Ibid*. p. 402.

[४] For a full discussion on *karma*, *karmadvāra* and *karmapatha*, see *Dhs A*. III. 92-172.

[५] After this, the Kośakāra discusses one more point in detail : किं तावत् मरणभवस्थे तस्मिन् प्राणिनि ये विज्ञप्त्यविज्ञप्ती ते कर्मपथ आहोस्विन्मृते ? This is not discussed in *Adv*. See *Sakv*. p. 402 and *LVPAk*. IV. pp. 142-4.

[६] Quoted in *Akb*. IV. 68c.

[७] Cf. 'मूलतो' ति पाणातिपातो दोसमोहवसेन द्विमूलको होति । अदिन्नादानं दोसमोहवसेन वा लोभमोहवसेन वा । मिच्छाचारो लोभमोहवसेनेव । मुसावादो दोसमोहवसेन वा लोभमोहवसेन । अभिज्झा मोहवसेन एकमूला; तथा व्यापादो । मिच्छादिट्ठि लोभमोहवसेन द्विमूला ति । *Dhs A*. III. 162. See *Asm*. p. 55.

[८] Cf. **प्रयोगस्तु त्रिमूलजः ।** *Ak*. IV. 68 d.

[1]प्रयोगस्तेषामकुशलमूलत्रयाज्जातः। तत्र लोभजः प्राणातिपातस्तच्छरीरावयवार्थं मृगलुब्धानामौरभ्रिकमात्सिकशाकुन्तकादीनां च। द्वेषजो यथा वैरणि(नि)र्यातनार्थम्। मोहजो याज्ञिकाणां(नां) धर्मबुद्ध्या राज्ञां च धर्मपाठकप्रामान्या(ण्या)द्धिंसताम्। पारसीकादीनां च घ(9)र्मबुद्ध्या मातरं पितरमभिघ्नताम्।[2]

लोभजमदत्तादानं यस्तेनार्थी[3] तद्धरति। द्वेषजं वैरनिर्यातनार्थम्। मोहजं यथा राज्ञां धर्मपाठकप्रामाण्याद् दुष्टाणि(नि)ग्रहार्थम्। यथा च दुष्टब्राह्मणा आहुः—"सर्वमिदं प्रजापतिना ब्राह्मणेभ्यो दत्तं ब्राह्मणानां दौर्बल्याद् वृषलाः परिभुञ्जन्ते। तस्मादपहरन् ब्राह्मणः स्वमादत्ते स्वमेव तु को[IV. A, 1. Fol. 95 b.]ष्ठं वस्ते स्वं ददाति" इति।[4]

लोभजः काममिथ्याचारः परदारादिषु तत्संरागादब्रह्मचर्यम्। द्वेषजो वैरणि(नि)र्यातनार्थम्। मोहजो यथा पारसीकानां मात्रादिगमनम्। गोसवे च यज्ञे "उपहा उदकं चूषयति, तृणानि च्छिनत्ति, उपैति मातरमुपस्वसारमुपस[गोत्रा]दि(मि)ति।"[5]

मृषावादादयो लोभजा द्वेषजाश्च यथा पूर्वमुक्तम्। मोहजो मृ(2)षावादो यथाह—

"न नर्मयुक्तमनृतं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले।

---

[1] This whole *Adv.* (*kārikā* 191 c.) substantially agrees with *Akb.* IV. 68 d.

[2] Cf. पारसीकानां च। ते ह्येवमाहुः—"मातापितरौ जीर्णौ वा ग्लानौ वा हन्तव्यौ" इति। *Akb.* IV. 68 d. See *LVPAk.* IV. p. 145, n. 2.

[3] यो येनार्थी स तद्धरति in *Akb. Ibid.*

[4] Cf. दुष्टनिग्रहार्थं यथा ब्राह्मणा आहुः—"सर्वमिदं ब्रह्मणा···तस्मादपहरन् ब्राह्मणः स्वमादत्ते स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च" इति। न चैषामपरस्वसंज्ञा भवति। *Akb. Ibid.* See *Syādvādamañjarī*, *kārikā* 7.

Also cf. स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च।
आनृशंस्याद्ब्राह्मणस्य भुञ्जन्ते हीतरे जनाः॥ *Manusmṛiti*, I. 101.

[5] For a discussion on the authenticity of this quotation, which is also quoted in *Akb.* IV. 68d, see *LVPAk.* IV. p. 147, n. 2.

Cf. अथैष गोसवः। स्वर्गकामो हैतेन यजेत।···तस्य व्रतम्। उप मातरम् इयाद् उप स्वसारम् उप सगोत्राम्। उपावहायोदकम् आचामेद्, उपावहाय तृणान्य् आच्छिन्द्यात्। यत्र यत्रैनं विष्ठा विन्देत्, तत् तद् वितिष्ठेत। अनड्हो ह लोकं जयति। तेन हैतेन जनको वैदेह इयाक्षांचक्रे। *Jaiminīya Brāhmaṇa*, II. 113. (pp. 207-8. Nagpur edition, 1954.)

प्राणात्यये त्स(स)र्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"[१] इति ।

पैशून्यादयस्तु मिथ्यादृष्टिप्रवर्तिता मोहजा यश्च वेदाद्यसच्छास्त्रप्रलापः ।

[अभिद्याद्यास्त्रिमूलजाः][२] ॥

अभिध्यादयस्तु लोभादनन्तरसंभूतत्वात् त्रिमूलजाः ।

उक्ताः [अ]कुशलाः कर्मपथाः ।

[192] [कुशलाः प्रयोगपृष्ठाश्च कुशलत्रयमूलजाः] ।[३]

कुशलानां तु प्रयोगः पृष्ठं[४] च त्रि(3)मूलोत्थम् । तेषां कुशलचित्तसमुत्थितत्वात्, तत्र च तद्भावात् ।

केन पुनरेषां कर्मपथानां समाप्तिर्भवति ? तदिदमपदिश्यते—

द्वेषेण वधपारुष्यव्यापत्तीनां समापनम् ॥[५]

प्राणातिपातपारुष्यव्यापादानां खलु द्वेषेण निष्ठा भवति । परित्यागपरुषचित्तसंमुखीभावात् ॥

[193] स्तेयस्यान्याङ्गनायातेरभिध्यायाश्च लोभतः ।[६]

---

[१] Also quoted in *Akb.* IV. 68d.

Mallishena in his *Syādvāda-mañjarī, (kārikā 7)* quotes this verse in a similar context.

Cf. उद्वाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि ॥

Vasishṭasmṛiti, XVI. 31.

[२] This line (191 d) is missing in the Ms.

Cf. तदनन्तरसंभूतेरभिध्याद्यास्त्रिमूलजाः । *Ak.* IV. 69 ab.

[३] This line (192 ab) is missing in the Ms.

Cf. कुशलाः सप्रयोगान्ता अलोभद्वेषमूलजाः । *Ak.* IV. 69 cd.

तद्यथा श्रामणेर उपसंपाद्यमानो···उपाध्यायं याचते यावदेकं कर्मवाचनं क्रियते द्वितीयं च । अयं प्रयोगः । तृतीयकर्मवाचने या विज्ञप्तिस्तत् क्षणिका चाविज्ञप्तिरयं **मौलः कर्मपथः** । तत ऊर्द्ध्वं यावन्निश्रया आरोच्यन्ते तदधिष्ठानं च विज्ञापयति अविज्ञप्तिश्च यावदनुवर्तते इदं **पृष्ठम्** । *Akb.* IV. 69 cd.

[५] Cf. वधव्यापादपारुष्यनिष्ठा द्वेषेण लोभतः । *Ak.* IV. 70 ab.

[६] Cf. परस्त्रीगमनाभिध्याऽदत्तादानसमापनम् । *Ak.* IV, 70 cd.

अदत्तादान(4)परस्त्रीगमनाभिध्यानां लोभेन निष्ठा ।

मिथ्यादृशस्तु मोहेन

मिथ्यादृष्टेः खलु मोहेन समाप्तिर्भवति । अधिमात्रमूढाभिहितां निष्ठापयति ।

तदन्येषां त्रिभिर्मतम् ॥[1]

के पुनरन्ये ? मृषावादपैशुन्यसंभिन्नप्रलापाः । तेषां त्रिभिरपि निष्ठा लोभेन द्वेषेण मोहेण(न) वा ॥

अथैषां चतुर्णां काण्डानां किमधिष्ठाणां(नम्) ? तदुच्यते—

[194] चतुर्णामप्य(5)धिष्ठानं ज्ञेयमेषां यथाक्रमम् ।
प्राणिनश्चाथ भोगाश्च नामरूपं च नाम च ॥[2]

तत्र सत्त्वाधिष्ठाना वधादयः । भोगाधिष्ठाणाः(नाः) परस्त्रीगमनादयः । नामरूपाधिष्ठाना मिथ्यादृष्टिः । नामकायाधिष्ठाण(ना) मृषावादादयः ॥

कथं पुनः प्राणातिपातं स्वयं कुर्वतः कर्मपथो भवति कथं यावन्मिथ्यादृष्टिरिति ? लक्षणं कर्मपथानां व(6)क्तव्यम् । तदारभ्यते—

[195] प्राणातिपातो धीपूर्वमभ्रान्त्या परमारणम् ।[3]

यदि खलु हनिष्यामि हन्म्येनमिति संचिन्त्याभ्रान्तचित्तः[4] परं जीवि-

---

[1] Cf. मिथ्यादृष्टेस्तु मोहेन शेषाणां त्रिभिरिष्यते । *Ak*. IV. 71 ab.

[2] Cf. सत्त्वभोगावधिष्ठानं नामरूपं च नाम च । *Ak*. IV. 71 cd.

See *DhsA*. III. 160.

[3] After this, the Kośakāra discusses one more point : य: परं मरणान् नियमय्य समं तेन पूर्वं वा म्रियते, किमस्य मौल: कर्मपथो भवत्युताहो न । *Akb*. IV. 72. This is not discussed in *Adv*.

[4] Cf. प्राणातिपातः संचिन्त्य परस्याभ्रान्तिमारणम् । *Ak*. IV. 73 ab.

Also cf. प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा । *Tattvārtha-sūtra*,. VI. 8.

[5] For a controversy on 'Intentional and unintentional crimes,' see *Kv*. XX. I.—इदानि असञ्चिच्चकथा नाम होति । तत्थ आनन्तरियवत्थूनि नाम गरूनि भरियानि, तस्मा असञ्चिच्चापि तेसु वत्थूसु विकोपितेसु आनन्तरिको होतीति येसं लद्धि, सेय्यथा पि एकच्चानं उत्तरापथकानं । *KvA*. XX. I.

ताद्व्यपरोपयति, एवं प्राणातिपातो भवति। प्राणो वा वायुः[1] कायचित्ताश्रितो वर्तते। तमतिपातयतीति प्राणातिपातः।

न, अनुपपत्तेः। विनाशानुषक्ता खलु संस्काराः प्रतिक्षणविनश्वराश्चा(7)भ्युपगम्यन्ते। तेषामित्थंभूतानां स्थितिशक्तिक्रियाऽभावे सत्यनागतानां च तुल्यातुल्यजातीयानां निरात्मकत्वाविशेषे केन हन्त्रा किमापद्यते ?

अत्र सौत्रान्तिकाः[2] परिहारमाहुः—"न। प्रदीपणि(नि)र्वापण(न)घण्टशब्दनिरोधवत्तत्सिद्धेः।"

न, समानत्वात्। अयं त्वत्र परिहारः—हन्तुर्हेतुसामर्थ्योपघातकरणे सत्यनागतसं(8)स्कारशक्तिक्रियाधानविधानविघ्नकरणात् प्राणातिपातोपपत्तिः। कस्य पुनस्तज्जीवितं यस्तेन वियोज्यते, ते वा प्राणा इति ?[3] प्रसिद्धस्य

---

[1] Cf. तत्थ पाणस्स अतिपातो पाणातिपातो नाम……। पाणो ति चेत्थ वोहारतो सत्तो, परमत्थतो जीवितिन्द्रियं। *Dhs A.* III. 143.

[2] The Kośakāra does not say that this is a view of Sautrāntika :—कथं क्षणिकेषु स्कन्धेषु प्राणातिपातो भवति ? प्राणो नाम वायुः कायचित्तसन्निश्रितो वर्तते। तमभिपातयति। यथा प्रदीपं घण्टास्वनं च। जीवितेन्द्रियं वा प्राणस्तन्निरोधयति। *Akb* IV. 73 ab. V. supra, p. 33. n. 2.

—कथं चित्तसन्निश्रितो वायुः प्रवर्तते ? चित्तप्रतिबद्धवृत्तित्वात्। तथा हि निरोधासंज्ञीसमापत्तिसमापन्नस्य मृतस्य च न प्रवर्तते। शास्त्रेऽप्युक्तम्…। तं प्राणं विनाशयतीत्यर्थः। उत्पन्नस्य स्वरसनिरोधादनागतस्योत्पत्तिं प्रतिबध्नन् निरोधयतीत्युच्यते। यथा प्रदीपं निरोधयति, घण्टास्वनं वा, क्षणिकमपि सन्तम्। कथं च स निरोधयति ? **अनागतस्योत्पत्तिप्रतिबन्धात्**। *Sakv.* p. 405.

This explanation is criticised by Siddhasena :—यच्चाशङ्क्योक्तम्—स्वरसभङ्गुरेषु भावेषु क्षणिकेषु परकीयप्रयत्ननिरपेक्षेषु वायुप्राणस्योत्क्रान्तिः स्वयमेव भवति न परप्रयत्नेन विनाश्यते, वायुप्राणातिपातहेतुकत्वान्नाशस्य। किं तर्हि **प्रयत्नः** करोति। **अनागतस्य क्षणस्योत्पत्तिं प्रतिबध्नातीति**। एतदप्यत्यन्तमयुक्तम्—अनागतस्त्वलब्धात्मलाभः क्षणो न तावदुत्पद्यते स चाभावस्तस्य कुतः प्रतिबन्धः ?, असत्त्वरूपत्वात् खरशृङ्गस्येव। अतो नाभावः कर्तुं शक्यः। प्रतिबन्धाप्रतिबन्धौ च भावविषयौ। *Tattvārtha-ṭīkā*, VII. 8.

[3] स्मर्तव्यं च प्राणातिपातलक्षणं स्वं सौगतेन—प्राणी यदि भवति प्राणिविज्ञानं चोत्पद्यते हन्तुः। न चाऽभावः प्राणी न च प्राणिसंज्ञा तत्र हेतुरिति।…यच्चोक्तं—कायस्यैव सेन्द्रियस्य तज्जीवितेन्द्रियं व्यपदिश्यते न त्वन्यस्यात्मनोऽभावाद् इति। तदप्यसमीचीनम्। यत एकस्थितवस्तुनिबन्धनाः सर्वेऽप्यनुभवस्मरणप्रत्यक्षानुमानार्थाभिधानप्रत्ययव्यवहाराः। स चैकः स्थितश्चात्मा। सति तस्मिन् पुरुषार्थप्रवृत्तिप्रतिपत्तिरिति।…सञ्चिन्त्य परस्याभ्रान्तिमारणमिति भिन्नाः सञ्चेतनादिलक्षणाः मारणावसानास्तत्र कस्य प्राणातिपातः—किं संचेतयितुः, अथ यस्य परविज्ञानमुभयस्याभ्रान्तिः, अथ येन मारिता इति। *Ibid.*

पुद्गलस्य[१] योऽसावेवं नामैवं गोत्र इति विस्तरः ।[२]

अबुद्धिपूर्वादपि प्रा णवधात्कर्तुरधर्मो भवति यथाऽग्निस्पर्शाद्दाह इति नग्नाटाः । तेषां परदारदर्शण(न)स्पर्शनेऽप्येष प्रसंगः ।(4) तुष्टरुष्टनग्नाटवाह्लीकनिर्ग्रन्थशिरोलुञ्चने च ।[३]

The Vijñānavādin gives the following explanation :—

यदि विज्ञप्तिमात्रमेवेदं न कस्यचित् कायोऽस्ति न वाक् । कथमनुक्रम्यमाणानामौरभ्रिकादिभिरुरभ्रादीनां मरणं भवति । अतत्कृते वा तन्मरणे कथमौरभ्रिकादीनां प्राणातिपातावद्येन योगो भवति ?

मरणं परविज्ञप्तिविशेषाद्विक्रिया यथा ।
स्मृतिलोपादिकान्येषां पिशाचादिमनोवशात् ॥

यथा हि पिशाचादिमनोवशादन्येषां स्मृतिलोपस्वप्नदर्शनभूतग्रहावेशविकारा भवन्ति । ···तथा परविज्ञप्तिविशेषाधिपत्यात्**परेषां जीवितेन्द्रियविरोधिनो** काचिद्विक्रियोत्पद्यते यया सभागसंततिविच्छेदाख्यं मरणं भवतीति वेदितव्यम् । *Viṁśatikā-Vṛitti*, 19.

See *Aaa*. pp. 440 ff. and *B.Pañjikā*, IX. 10-14.

[१] Cf. कस्य तज्जीवितं यस्तदभावान्मृतो भवति ? कस्येति षष्ठीं **पुद्गलवादे** विचारयिष्यामः । *Akb*. IV. 73 ab.

It appears that the *Adv*. had not a Ninth *Adhyāya* dealing with the *Pudgalavāda*, corresponding to the IX *Kośasthāna* of *Akb*.

[२] Cf. कतमो च भिक्खवे भारहारो ? पुग्गलो तिस्स वचनीयं । योयं आयस्मा एवं नामो एवं गोत्तो । *S*. III. p. 25.

[३] Cf. अबुद्धिपूर्वादपि प्राणिवधात् कर्त्तुरधर्मो यथाऽग्निसंयोगाद्दाह इति **निर्ग्रन्थाः** । तेषां परदारदर्शनेऽप्येष प्रसंगः । निर्ग्रन्थशिरोलुञ्चने च कष्टतपोदेशने च शास्तुस्तद्विसूचिकामरणे च दातुर्वैद्यानां चातुरपीडने मारणे च मातृगर्भस्थयोश्चान्योऽन्यं दुःखनिमित्तत्वात् । वध्यस्यापि च तत् क्रियासंबन्धादग्निस्वाश्रयदाहवत् । कारयतश्चाप्रसंगस्तदसंबन्धात् । परेणाग्निं स्पर्शयतस्तेनादाहवत् । अचेतनानां च काष्टादीनां गृहपतिप्राणिवधात् पापप्रसंगो न वा दृष्टान्तमात्रात्सिद्धिरिति । *Akb*. IV. 73 ab.

This criticism of the Jaina (Nirgrantha) has been answerd by Siddhasena (a Jaina āchārya of the 9 th century A. D.) in his *Tattvārtha-ṭīkā*:—**अत्रोच्यते जैनैः—प्राणातिपातावद्येन प्रमत्त एव युज्यते** । प्रमत्तश्च नियमेन रागद्वेषमोहवृत्तिः ।···रागद्वेषमोहाश्चात्मनः परिणामविशेषाः प्राणातिपातावद्यहेतवः सर्वैर्मोक्षवादिभिरविगानेनाभ्युपेयन्ते । सिद्धान्तविहितविधिना च परित्यागाकरणं शरीरादेर्ममत्वीकृतस्याविरतिः अनिवृत्तिरात्मनः परिणतिविशेषः । सापि प्राणातिपातावद्यहेतुतया निर्दिष्टा भगवता **भगवत्यादिषु** ।···

प्रमत्तयोगाच्च प्राणातिपाताद्यवद्यमिति व्यवस्थिते यदुच्यते परेण—असंचित्य वा भ्रान्त्या वा मारणं नावद्यहेतुकमिति । अत्र प्रतिविधीयते—असंचिन्त्य कुर्वतो यद्यवद्या-

बुद्धिपूर्वात्प्रानि(णि)वधाद्धर्मोऽपि भवतीति याज्ञिकाः। [१]कथम् ? विषभक्षणवत् । तद्यथा किञ्चिद्विषभक्षणं मन्त्रपूर्वं हिताय भवति । किञ्चिदहिताय यदमन्त्रपूर्वं तद्वदिति । न । गलाम्रेडनशस्त्रनिपातमन्तरेण मन्त्रमात्रकेन पशुवधसामर्थ्यादर्शणा(ना)त् । पिष्टमयच्छागा[IV B, 2 Fol. 96 a](1)हुतिमात्रेण पशुवधादियज्ञधर्मोत्पत्त्यसामर्थ्याच्च । किञ्च, विषस्य मारणजीवतशक्तिद्वयसामर्थ्यदर्शणा(ना)त् । तत्र मन्त्रपूर्वकं किञ्चिज्जीवयति किञ्चिद्दुर्गतारिष्टेषु न जीवयति । अमन्त्रपूर्वकमपि किञ्चिज्जीवयति किञ्चिन्न जीवयति । [भुक्त]विषस्यापेक्षि[क]त्वात् । किञ्च, शबरादिमन्त्राणां[२] विषमारणाशक्त्यु(2)पघातेऽपि पापप्रणाशनशक्त्यदर्शणा(ना)त् । किञ्च, हिंसाहिंसयोर्धर्माधर्मस्वालक्षण्यापरित्यागभूतत्वात्[3] । जुहोत्यादिक्रियाव्यङ्ग्यो

संभवस्ततो मिथ्यादृप्टेरभावः सुगतशिष्याणाम् । यस्मान्न कश्चिन्मिथ्या प्रतिपद्यते प्रेक्षापूर्वकारी मिथ्येति संचिन्त्य ।···संसारमोचकगलकर्तकयाज्ञिकप्रभृतीनां च प्राणिवधकारिणां धर्म इत्येवं संचेतयतामधर्मोऽयमिति एवं वा संचेतयतां नावद्यं स्यात्, अन्याभिसंधित्वात् ।···संविद्रते च स्फुटमेवं **सौगताः**—प्रमादारम्भयोरवश्यंभावी प्राणवध इति । तथा वुद्धस्य ये शोणितमाकर्षयन्ति वपुषः सुगतोऽयमित्येवं विज्ञाय तेषामवीचिनरकगतिकारणमानन्तर्यकमबुद्धेरबुद्धित्वादेव न स्यात् । इष्यते चानन्तर्यकम् । [V. supra, p. 156, n. 5.] अथ बुद्धोऽयमित्येवंविधबुद्धेरभावेऽपि संशयितस्याश्रद्दधतश्चासंचेतयतो भवेदानन्तर्यकम्···। **तदेवमसंचेतितवधो भ्रान्तिवधश्च प्राणातिपाताद्यवद्यहेतुतया ग्राह्यौ । अन्यथा बहुत्रुटचति बुद्धभाषितमिति** ।···

तस्मादेनःपदमेतद् **वसुबन्धोरामिषगृद्धस्य** गृध्रस्येवाप्रेक्षाकारिणः । अयं पुनरप्रसंग एव मूढेनोपन्यस्तः—**शिरोलुञ्चनाद्युपदेशे शास्तुः क्रुद्धस्येवाधर्मप्रसंग इति यतस्तत्राज्ञानादिप्रमादासंभवोऽत्यन्तमेव शास्तरि । ध्वस्तरागद्वेषमोहेनापि भगवता मुमुक्षूणां कर्मनिजरोपायत्वेन तपो देशितम् । कुतोऽवद्यप्राप्तिरप्रमत्तस्येति** ।···

ज्वलनोप्येतावता दृष्टान्तीकृतोऽप्रतिबद्धदहनस्वभावः स्पृश्यमानो बुद्धिपूर्वकमन्यथा वा दहत्येव । एवं प्राणातिपातोपि हि प्रमत्तेन प्रयत्नरहितेन क्रियमाणः कर्तारमवश्यंतयाऽवद्येन योजयत्येवेति दृष्टान्तार्थः । अबुद्धिपूर्वकता च प्रमत्तता ।···*Tattvārtha-ṭīkā*, VII. 8. For full details, see *Jñānabīnduprakaraṇa*, pp. 76-97.

[१] The Kośakāra does not deal with the view of the Yājñika in such details.

[२] V. infra, *Adv. kārikā* 563.

[३] Mallisheṇa too forwards similar arguments against the Yājñikas :—
अधुना **मीमांसकभेदाभिमतं वेदविहितहिंसाया** धर्महेतुत्वमुपपत्तिपुरस्सरं निरस्यन्नाह—

न धर्महेतुर्विहितापि हिंसा नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सा सब्रह्मचारिस्फुरितं परेषाम् ॥

धर्मः [१]इति चेत् । न । तद्रूपासिद्धत्वात्, अभिव्यक्त्यनुपपत्तेश्च । क्रियामात्रमपूर्वमिति चेत् ।[२] न । क्रियाया नित्यत्वानुपपत्तेर्निरुक्त्यनुपपत्तेश्च ॥

अत्यक्ताऽन्यधनादानमदत्तादानमुच्यते ॥[३]

(3)अभ्रान्त्येति वर्तते । यदि बलचौर्यबुद्ध्या परद्रव्यं स्वीकरोति ॥

[196] परस्त्रीगमनं काममिथ्याचारो विकल्पवान् ।[४]

अगम्यगमनं खल्वपि काममिथ्याचारः । स च बहुप्रकारविकल्पो भवति । अगम्यां गच्छति मातरं वा दुहितरं वा परपरिगृहीतं(तां) वा स्वामप्यनङ्गे गच्छत्यदेशे च । नियमस्थां वा । अभ्रान्त्येत्युक्तम् ।

(4)अर्थज्ञयाऽन्यथावादो द्रोहबुद्ध्या मृषावचः ॥[५]

वक्तृं(क्तृ)श्रोतृबुद्ध्यपेक्षया खलु मृषावादो भवति । यदि वक्ताऽर्थानामभिज्ञो भवति स तं विगोप्य द्रोहबुद्ध्याऽन्यथा ब्रूते । श्रोता च तथैवावगच्छति । तदास्य मृषावादः कर्मपथो भवति ॥[६]

···**जैमिनीया** इत्थमाचक्षते । या हिंसा गार्ध्याद् व्यसनितया वा क्रियते सैवाधर्मानुबन्धहेतुः प्रमादसंपादितत्वात् शौनिकलुब्धकादीनामिव । वेदविहिता तु हिंसा प्रत्युत धर्महेतुः देवतातिथिपितृणां प्रीतिसंपादकत्वात् तथाविधपूजोपचारवत् ।···अत्र प्रकट एव स्ववचनविरोधः । तथाहि । हिंसा चेद्धर्महेतुः कथम् धर्महेतुश्चेद्धिंसा कथम् ?···

अथ अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः इति वचनाद्वैदिकमन्त्राणामचिन्त्यप्रभावत्वात् तत्संस्कृतपशुवधे संभवत्येव स्वर्गप्राप्तिरिति चेत् । न । इह लोके विवाहगर्भाधानजातकर्मादिषु तन्मन्त्राणां व्यभिचारोपलम्भाददृष्टे स्वर्गादावपि तद्व्यभिचारोऽनुमीयते ।··· *Syādvādamañjarī*, *kārikā* 11.

[१] See *Śābara-bhāshya*, I, 1. 1.

[२] See *Ibid*, II. 1. 5.

Also see : कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या परा साऽपूर्वमिष्यते ॥

Tantravārtika, II. 15.

For details, see *Nyāyāvatāra-vārtika-vṛitti*, pp. 179-181.

[३] Cf. **अदत्तादानमन्यस्वस्वीक्रिया बलचौर्यतः ।**
···स्तूपादपहरतो बुद्धाददत्तादानम् । *Akb*. IV. 73 cd.

[४] Cf. **अगम्यगमनं काममिथ्याचारश्चतुर्विधः ।** *Ak*. IV. 74 ab

[५] Cf. **अन्यथासंज्ञिनो वाक्यमर्थाभिज्ञे मृषावचः ।** *Ak* IV. 74 cd.

[६] *Akb*. IV. 74 cd. discusses one more topic : कदाचिच्च बहवो वर्णा वाक्यं भवन्तीति कतमः तत्र कर्मपथः ?

ये खल्विमे माहकीमातृसूत्रा[१]दिष्वष्टावनार्या व्यवहाराः प्रोक्ताः, अष्टौ चार्याः—"अदृष्टे(5) दृष्टवादिताऽनार्यो व्यवहारः। अश्रुते, अमते, अविज्ञाते, श्रुतमतविज्ञातवादिताऽनार्यो व्यवहारः। दृष्टश्रुतमतविज्ञाते चादृष्टादिवादिताऽनार्यो व्यवहारः। विपर्ययेण त्वष्टावेवार्या व्यवहाराः।"[२] तेषां पुनरिदं लक्षणं व्याख्यायते—

[197] दृष्टया श्रुत्यादिभिश्चाद्वैर्मण(न)सा यच्च गृह्यते।
दृष्टं श्रुतं मतं ज्ञातमित्युक्तं तद्यथाक्र(6)मम्॥[3]

---

[१] The Kośakāra quotes the *Māhakīmatṛisūtra* :—"तत् किं मन्यसे **माहकीमातः** यानि त्वया चक्षुषा रूपाणि श्रोत्रेण शब्दा···मनसा धर्मा···। अत्र च ते **माहकीमातः दृष्टे दृष्टमात्रं भविष्यति श्रुते मते विज्ञाते···विज्ञातमात्रम्'** इत्युक्तम्। *Akb.* IV. 75.

There is a similar passage in the *Saṁyutta-nikāya*, but addressed to Mālukyaputta and not to Māhakīmāta :—एत्थ च ते **मालुक्यपुत्त** दिट्ठसुतमुतविञ्ञातेसु धम्मेसु दिट्ठे दिट्ठमत्तं भविस्सति। सुते सुतमत्तं···मुते मुतमत्तं···विञ्ञाते विञ्ञातमत्तं भविस्सति। *S.* IV. p. 73. See *LVPAk.* IV. p. 160, n. 2.

[२] Cf. अट्ठ'मे भिक्खवे **अनरियवोहरा**। कतमे अट्ठ? अदिट्ठे दिट्ठवादिता, अस्सुते सुतवादिता, अमुते मुतवादिता, अविञ्ञाते विञ्ञातवादिता, दिट्ठे अदिट्ठवादिता, सुते असुतवादिता, मते अमतवादिता, विञ्ञाते अविञ्ञातवादिता।···अट्ठि'मे भिक्खवे **अरियवोहारा**···। अदिट्ठे अदिट्ठवादिता···विञ्ञाते विञ्ञातवादिता। *Aṅg.* II. p. 246.

[3] Cf. **चक्षुःश्रोत्रमनश्चित्तैरनुभूतं त्रिभिश्च यत्।**
तद्दृष्टश्रुतविज्ञातं मतं चोक्तं यथाक्रमम्॥ *Ak.* IV. 75.

···यत् घ्राणजिह्वाकायविज्ञानैस्तन्मतम्। किं कारणम्। गन्धरसस्प्रष्टव्यान्यव्याकृतत्वान्मृतकल्पानि। अत एतेषु मताख्येति **वैभाषिकाः**। किमत्र ज्ञापकम्। **सूत्रं युक्तिश्च। सूत्रं** तावत्—"तत् किं मन्यसे **माहकीमातः**···[see above, n. 1.]' विज्ञातमात्रम्" इत्युक्तम्। अतस्त्रिषु विषयेषु दृष्टश्रुतविज्ञातशब्दापदेशाद् गन्धादिषु मताख्या गम्यते। अत एवं चानिष्यमाणे दृष्टादिभावबाह्यत्वात् गन्धादिषु व्यवहारो न स्यादित्येषा **युक्तिः**। सूत्रं तावत ज्ञापकमन्यार्थत्वात्। **न ह्यत्र सूत्रे भगवान् व्यवहाराणां लक्षणं शास्ति स्म। किं तर्हि।** यत्र च ते षड्विधे विषये चतुर्षु व्यवहारेषु दृष्टयादिव्यवहारमात्रं भविष्यति न प्रियाप्रियनिमित्ताध्यारोप इत्ययमत्र सूत्रार्थो दृश्यते। किं पुनर्दृष्टं किं च यावद्विज्ञातम्। **केचित्तावदाहुः**—"यत्पञ्चभिरिन्द्रियैः प्रत्यक्षं तद् दृष्टम्। यत् परत आगमितं तच्छ्रुतम्। यत् स्वयं युक्त्यनुमानतो रुचितं तन्मतम्। यन्मनःप्रत्यक्षभावेनाधिष्ठितं प्रत्यात्मवेद्यं तद्विज्ञातम्" इति। एते च पञ्च विषयाः प्रत्येकं दृष्टा इति वा कृत्वा व्यवह्रियन्ते। श्रुता मता विज्ञाता इति वा। षष्ठोऽन्यत्र दृष्टादिति। अतो नास्ति गन्धादिषु व्यवहाराभावप्रसङ्गः। तस्माद्युक्तिरप्येषा युक्तिर्न भवति। **पूर्वाचार्या** एवमाहुः—"दृष्टं यत् प्रत्यक्षीकृतं चक्षुषा।

यत्खलु चक्षुषाऽलोचितं चक्षुर्विज्ञानमनोविज्ञानाभ्यां चानुभूतं तद्दृष्टमित्युच्यते। यच्छ्रोत्रेण श्रोत्रमनोविज्ञानाभ्यां चानुभूतं तच्छ्रुतम्। यत् त्रिभिर्घ्राणजिह्वाकायैस्तद्विज्ञानमनोविज्ञानैश्चानुभूतं तन्मतमित्युच्यते।[१] तेषां प्राप्यविषयग्राहित्वात्, कबडिंकाराहारविषयत्वाच्च। तत्रेष्टपर्यायवाची मतशब्दः। य(7)त्पुनर्मनोविज्ञानेनानुभूतं तद्विज्ञातं तदध्यवसाये निश्चयपरिसमाप्तेः।[२]

गतमेतत्। प्रकृतमेवानुवर्तताम्॥

[३]यः कायेनान्यथात्वं प्रापयेत्, स्यान्मृषावादः? स्यात्। तदपदिश्यते—स्यान्न कायेन्न(न) पराक्रमेत प्राणातिपातावद्येन च स्पृश्येत। स्याद्वाचा पराक्रमेत स्यान्न वाचा पराक्रमेत मृषावादावद्येन च स्पृश्येत। (8)स्यात्कायेन पराक्रमेत, स्यान्न कायेन वाचा पराक्रमेत, उभयावद्येन च स्पृश्येत। स्यादृषीणां मनःप्रदोषेण प्रोषधनिदर्शणं(नं)[४] चात्र इति।[३]

श्रुतं यच्छ्रोत्रेण परतश्चास्वरितम्। मतं यत्स्वयं चिन्तितम्। विज्ञातं यत् प्रत्यात्मप्रतिसंवेदितमधिगतं चोत्पन्नम्। *Akb*. IV. 75.

Yaśomitra attributes the Pūrvāchārya-view to Yogāchāras. See *Sakv*. p. 407.

[१] Compare this with the view of Āchārya Saṁghabhadra: स्वेन्द्रियैः प्राप्ता मता इत्याचार्यसङ्घभद्रः। *Sakv*. p. 406.

[२] Cf. यं पीदं **दिट्ठं सुतं मुतं विञ्ञातं** पत्तं परियेसितं···*M. sutta* 22.—दिट्ठं रूपायतनं; सुतं सद्दायतनं, मुतं गन्धायतनं रसायतनं फोट्ठब्बायतनं; तं हि पत्वा गहेतब्बतो मुतं ति वुत्तं। अवसेसानि सत्तायतनानि विञ्ञातं नाम। *MA*. I. p. 110.

Cf. also, **दिट्ठे सुते सीलवते मुते वा।** *Sutta-nipāta*, 790.

यं वा अभिमङ्गलसम्मतं गन्धं वा घायति, रसं वा सायति, फोट्ठब्बं वा फुसति इदं वुच्चति मुतमङ्गलं ति। *Sutta-nipāta A*. 790.

Also cf. **सा** दृष्टश्रुतमतविज्ञातेति चक्षुर्विज्ञानेन दर्शनाद् दृष्टा। श्रोत्रविज्ञानेन श्रवणाच्छ्रुता। **घ्राणजिह्वाकायविज्ञानैरनुभूतत्वान्मता।** मनोविज्ञानेनोपलम्भाद्विज्ञाता। *Aaa*. p. 270.

Cf. आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्। *Bṛihadāraṇyakopanishat*, II. 4. 5,

See P. V. Bapat : *Arthapada-sūtra*, Introduction. pp. 4-6.

[३-३] This whole passage (from यः कायेनान्यथात्वं to प्रोषधनिदर्शनं चात्र इति) is identical with *Akb*. IV. 75.

[४] ···वागवद्येन योगो भवति। भिक्षुप्रोषधे हि 'कच्चि'त्थ परिशुद्धा' इति विनयधरेणानुश्राविते यदि कश्चिद्भिक्षुः सतीमापत्तिं नाविष्कुर्यात्। तूष्णींभावेनैवाधिवासयेत् स मृषावादी भवेदिति। *Sakv*. p. 408.

कथं पुनर्विज्ञप्त्या विना तत्राविज्ञप्तिः कामावचरी कर्मपथो योक्ष्यते ।[1] सति हि चित्तपरिस्पन्दे महाभूततज्जकायपरिस्पन्दोऽवश्यं भावीति कर्तव्योऽत्र यत्नः[2] ।

उक्तो मृषा(9)वादः ॥

[198] पैशुन्यं भेदकृद्वाक्यं[3]

यत्खलु क्लिष्टचित्तस्य परभेदाय वचनमभ्रान्त्या तत्पैशुन्यमित्युच्यते ।[4]

पारुष्यं तु यदप्रियम् ।[5]

अभ्रान्त्या क्लिष्टचित्तस्य यद्वचनं तत्पारुष्यमिति ।

This problem is discussed in detail in *DhsA.* :—**वितण्डवादी** पनाह—'अकुसलं वचीकम्मं मनोद्वारे पि समुट्ठाती' ति । सो 'तयो संगहे आरूळ्हसुत्तं आहराही' ति वुत्तो इदं **उपोसथक्खन्धकतो सुत्तं** आहरि—"यो पन भिक्खु यावततियं अनुस्सावियमाने सरमानो सन्ति आपत्ति नाविकरेय्य संपजानमुसावादस्स होती" [*Vinaya*, I. p. 193.] ति इदं **सुत्तं** आहरित्वा आह···। सो वत्तब्बो···**विनयस्स** द्वे मूलानि—कायो च वाचा च,··· मनोद्वारे आपत्तिपञ्ञापनं नाम नत्थि ।···अयं हेत्थ अत्थो—य्वायं 'संपजानमुसावादी होती' ति वुत्तो···सो···दुक्कटापत्ति होति । सा च खो न मुसावादलक्खणेन, भगवतो पन वचनेन वचीद्वारे अकिरिय-समुट्ठाना आपत्ति होती ति वेदितब्बा । *Dhs A.* III. 129-131. V. Supra, p. 133, n. 3.

[1] Cf. यद्युभयथाऽपि न पराक्रमेत न चाविज्ञप्तिकास्त्यविज्ञप्तिः कामावचरी कथं तयोः कर्मपथः सिद्धयति ? कर्तव्योऽत्र यत्नः । *Akb.* IV. 75.

—कथं तयोः कर्मपथः सिद्धयतीति । कथं तयोः ऋषिभिक्ष्वोः कायवाग्भ्यामपराक्रममाणयोः प्राणातिपातो मृषावादश्च यथाक्रमं कर्मपथः सिद्धयतीति । कर्तव्योऽत्र यत्नः । **वैभाषिकैः** कर्तव्यः समाधिरित्यर्थः । *Sakv.* p. 408.

[2] Compare this view with the following :—**अत्राचार्यसङ्घभद्रः समाधिमाह ।** ऋषयोऽर्थंत अज्ञापयितारो भवन्ति तेषां हि सत्त्वपरित्यागप्रवृत्तं पापाशयमवेत्यामनुष्यास्तदभिप्रसन्नाः कायेन पराक्रमन्ते । येन तेषां ऋषीणां कर्मपथ उत्पद्यते । कथम् । परविज्ञप्त्येति । अवश्यं तथाविधस्य कायवाग्विकारा भवन्ति । अपि च शपन्ति ते तथा । तत्र चावश्यं कायवाक्चेष्टया भवितव्यम् । *Ibid.*

[3] Cf. **पैशुन्यं क्लिष्टचित्तस्य वचनं परभेदने ।** *Ak.* IV. 76 ab.

[4] तत्थ संकिलिट्ठचित्तस्स परेसं वा भेदाय अत्तनो पियकम्यताय वा कायवचीपयोगसमुट्ठापिका चेतना पिसुणा वाचा नाम । *Dhs A.* III. 150.

[5] Cf. **पारुष्यमप्रियम् ।** *Ak.* IV. 76 c.

क्लिष्टं संभिन्नलापित्वमन्ये गीतकथादिवत् ॥[१]

क्लिष्टं खलु सर्वं वचनं संभिन्नप्रलापित्वम्। यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने[IV. A, 2. Fol. 96 b.](1)त्वतलौ। कश्चासौ गुणः? संभिन्नप्रलाप एव। स यस्यास्ति स संभिन्नप्रलापी। तद्भावः संभिन्नप्रलापित्वम्।

अन्ये पुनर्ब्रुवते। यदेतन्मृषावादादित्रिविधं वचनं ततो यदन्यत्क्लिष्टं लपनगीतनाट्यतीर्थशास्त्रादि तत्सर्वं संभिन्नप्रलापः ॥[२]

[199] परस्वासत्स्पृहाऽभिध्या व्यापा[दः] सत्त्वगोचरः।
विद्वेषानाऽन्तदृष्टिस्तु मिथ्यादृष्टि[रहेतुका] ॥[३]

(2)अभिध्या तावद् द्विषतः स्पृहा। अहो बत यत्परेषां तन्मम स्यादित्येषा विषयप्रार्थणा(ना) विषमलोभाख्या अभिध्येत्युच्यते।[४]

व्यापादः खल्वपि सत्त्वपरित्यागबुद्ध्या प्रतिघः।[५]

मिथ्यादृष्टिरपि हेतुं वा फलं वा क्रियां वा सद्वा वस्तु नाशयतः[६] या दृष्टिर्मतिरित्येवमादि सा मिथ्यादृष्टिरित्युच्यते।[७]

---

[१] Cf. सर्वं क्लिष्टं भिन्नप्रलापिता।
अतोऽन्यत् क्लिष्टमित्यन्ये लपनागीतनाट्यवत्। *Ak.* IV 76 d, 77 ab.

[२] Cf. अनत्थविञ्ञापिका कायवचीपयोगसमुट्ठापिका अकुसलचेतना 'सम्फप्पलापो'। ……तस्स द्वे सम्भारा—भारतयुद्ध-सीताहरणादि-निरत्थककथापुरेक्खारता, तथारूपिकथाकथनं च। *Dhs A.* III. 153.

[३] Cf. अभिध्या तु परस्वविषयस्पृहा ॥
व्यापादः सत्त्वविद्वेषः नास्ति दृष्टिः शुभाशुभे।
मिथ्यादृष्टिः। *Ak.* IV. 77 cd, 78 abc.

[४] सर्वैव कामावचरी तृष्णाऽभिध्येत्यपरे। *Akb.* IV. 77. cd. See *Dhs A.* III. 154.

[५] See *Dhs. A.* III. 155.

[६] तत्र नास्ति दत्तं यावन्नास्ति दुश्चरितमिति कर्माद्यपवादिका। तथा नास्ति माता, नास्ति पितेति कर्मापवादिकैव। नास्ति सुचरितदुश्चरितानां कर्मणां फलविपाकः, नास्त्ययं लोकः, नास्ति परलोकः, तथा नास्ति सत्त्व उपपादुक इति फलापवादिका। न सन्ति लोकेऽर्हन्त इत्यार्यापवादिका। *Sakv.* p. 409.

Cf. also, यथाभुच्चगहणाभावेन मिच्छा पस्सती ति 'मिच्छादिट्ठि'। सा 'नत्थि दिन्नं' ति आदिना नयेन विपरीतदस्सनलक्खणा।…तत्थ नत्थिक-अहेतुक-अकिरियदिट्ठीहि एव कम्मपथभेदो होति, न अञ्ञदिट्ठीहि। *Dhs A.* III. 156.

[७] After this, *Akb.* IV. 78 d. discusses : कर्मपथा इति कोऽर्थः। See infra, p. 171.

[१] तया पुनर्मिथ्यादृष्ट्या प्रकर्षप्राप्तया नव(3)प्रकारया नवप्रकाराणि कुशलमूलानि समुच्छिद्यन्ते ।[१] भावनाहेयक्लेशप्रहाणवत् ।[२]

यत्तर्हि शास्त्र उक्तम्—“कतमान्यधिमात्राण्यकुशलमूलानि यैरकुशलमूलैः कुशलमूलानि समुच्छिनत्ति ?[3] कामवैराग्यं चानुप्राप्नुवन् यानि तत्प्रथमत उपलिखति ?”[४] नैष दोषः। अकुशलमूलाध्याहृतत्वात्। मिथ्यादृष्टेस्तेष्वेव तत्क(4)र्मोपचर्यते।[५] तद्यथाऽग्निरेव ग्रामस्य दग्धा चौरास्तु तस्याध्याहारकास्तद्वदिति ।

[१-१] Cf. **मूलच्छेदस्त्वसद्दृष्टया कामाप्तोत्पत्तिलाभिनाम्** । *Ak.* IV. 79 ab.

[२] Cf. **क्रमशः** ।

नवप्रकारया मिथ्यादृष्टया नव प्रकाराणि कुशलमूलानि समुच्छिद्यन्ते । **भावनाहेय-क्लेशवत्** । यावदधिमात्राधिमात्रया मृदुमृदूनीति । एवमयं ग्रन्थः पालितो भवति—“कतमान्यणुसहगतानि कुशलमूलानि आहारैरकुशलमूलैः कुशलानि समुच्छिन्नानि पूर्वपश्चाद्विजहाति यैः विकीर्णैः समुच्छिन्नकुशलमूल इति संख्यां गच्छति ?” इति । *Akb.* IV. 79 d.

—भावनाहेयक्लेशवदिति । यथा नव प्रकारेण मार्गेणाधिमात्राधिमात्रक्लेशप्रकाराः प्रहीयन्ते, यावदधिमात्राधिमात्रेण मृदुमृदुः । एवं नवप्रकारयाऽपि मिथ्यादृष्टया नवप्रकाराणि कुशलमूलानि समुच्छिद्यन्ते ।···मृदुमृद्व्या मिथ्यादृष्टयाऽधिमात्राधिमात्रः कुशलमूलप्रकारः समुच्छिद्यते । *Sakv.* p. 412.

For a controversy on this theory of gradual purification(क्रमशः भावनाहेयक्लेशप्रहाणम्), see *Kv.* I. 4; II. 9.

[3] Cf. अस्य तर्हि ग्रन्थस्य को नयः—“कतमान्यधिमात्र···समुच्छिनत्ति” इति ? समाप्तिमेतत्सन्धायोक्तम् । तैर्निरवशेषच्छेदात् । एकोऽपि हि प्रकारस्तेषामनुपच्छिन्नः सर्वेषां पुनरुत्पत्तौ हेतुः स्यादिति । *Akb.* IV. 79 d.

[४] Quoted in *Akb.* IV. 79 ab and 79 d. This is a passage from *Jñānaprasthāna*, 2, 8; *Vibhāshā*, 35, 5. (See *LVPAk.* IV. p. 170).

[५] **मिथ्यादृष्टया कुशलमूलसमुच्छेद** इत्येवमर्थं वक्तुकाम उपोद्घातं ब्रवीति ।···किं तर्हि शास्त्र उक्तमिति । **यदि मिथ्यादृष्टया कुशलमूलसमुच्छेदो नाकुशलमूलैः**, यच्च शास्त्र उक्तम्—‘**यैरकुशलमूलैः कुशलमूलानि समुच्छिनत्ती**’त्यादि । तानि हि लोभादिस्वभावानि । न मिथ्यादृष्टिस्वभावानीत्यर्थः । ‘अकुशलमूलाध्याहृतत्वादि’ति विस्तरः । अकुशलमूलैर्लोभादिभिरधिमात्रै**र्मिथ्यादृष्टिरध्याहृता**ऽपनीता । तस्मात्, अकुशलमूलाध्याहृतत्वान्मिथ्यादृष्टेः ‘तेष्वेव तत्कर्मापदेशः’, तेष्वेवाकुशलमूलेषु । मिथ्यादृष्टेः कुशलमूलसमुच्छेदकं यत्कर्म तस्यापदेशः । *Sakv.* p. 411.

कामावचराण्युपपत्तिलम्भिकान्येव च समुच्छिद्यन्ते, प्रायोगिकेभ्यः पूर्व(र्वं) परिहीणत्वात् ।[१]

एवं ह्युक्तं भगवता—"समन्वागतोऽयं[२] पुरुषः कुशलैरपि धर्मैरकुशलैरपि धर्मैः" इति विस्तरः । तत्र समन्वागतोऽयं पुद्गलः कुशलैरपि धर्मै(5)-रविशेषेण द्विविधैः—प्रायोगिकैरुपपत्तिलाभिकैश्च । तेऽस्य पुद्गलस्य कुशला धर्मा अन्तर्धास्यन्ति, प्रायोगिकाः अनुपूर्वसमुच्छेदे, पूर्वं तद्विहानेः । अस्ति चास्य कुशलमूलमनुसहगतमनुपच्छिन्नमुपपत्तिलाभिकम्[३] । तदप्यपरेण सम-

---

[१] Cf. **कामाप्तोत्पत्तिलाभिनाम्** ।

कामावचराणि कुशलमूलानि समुच्छिद्यन्ते । रूपारूप्यावचरैरसमन्वागतत्वात् । **प्रज्ञप्तिभाष्यं** तर्हि कथं नीयते "इयतानेन पुद्लेन त्रैधातुकानि कुशलमूलानि समुच्छिन्नानि भवति" इति ? तत्प्राप्तिदूरीकरणमभिसन्धायैतदुक्तम् । सन्ततेस्तदभाजनत्वापादनात् । उपपत्तिलम्भिकान्येव च समुच्छिद्यन्ते । प्रयोगिकेभ्यः पूर्वं परिहीणत्वात् । *Akb*. IV. 79b.

—'**तत्प्राप्तिदूरीकरणमि**'ति । रूपारूप्यावचराणां प्राप्तेर्दूरीकरणमभिप्रेत्य तस्य पुद्गलस्य । एतदुक्तं त्रैधातुकानि कुशलमूलानि समुच्छिन्नानीति । कथं च पुनस्तत्प्राप्तिदूरीकरणम् ? '**सन्ततेस्तदभाजनत्वापादनात् ।**' यस्मादसौ तत्संततिः पूर्वं भाजनभूता तत्प्राप्तीनाम् । कुशलमूलसमुच्छेदादिदानीं तत्प्राप्तीनामभाजनमापादितेति । अतस्तत्प्राप्तिर्दूरीकृता भवति । '**प्रायोगिकेभ्यः पूर्वं परिहीणत्वात्**' इति । श्रुतचिन्ताभावनामयेभ्यः प्रायोगिकेभ्यः पूर्वमेवासौ मृदुमृद्वचवस्थायां तेभ्यः परिहीणः । तदैव तस्य प्राप्तिच्छेद इत्यर्थः । *Sakv*. p. 411.

[२] **समन्वागमः कतमः** । लक्षणतः पूर्ववत् । तत् प्रभेदः पुनः त्रिविधः । वीजसमन्वागमः वशितासमन्वागमः समुदाचारसमन्वागमश्च । **वीजसमन्वागमः कतमः ?** कामधातौ जातो भूतः कामप्रतिसंयुक्तैः क्लेशोपक्लेशैः रूपारूप्यप्रतिसंयुक्तैश्च क्लेशोपक्लेशैर्बीज समन्वागमेन समन्वागतः उपपत्तिप्रतिलाभिकैश्च कुशलैः···त्रैधातुकप्रतिपक्षलाभी यस्य यस्य प्रकारस्य पतिपक्ष उत्पन्नस्तस्य बीजसमन्वागमेनासमन्वागतः । यस्य प्रतिपक्षो नोत्पन्नस्तस्य बीजसमन्वागमेन समन्वागतः । **वशितासमन्वागमः कतमः** ? प्रायोगिकानां धर्माणां··· लौकिकानां लोकोत्तराणां वा ध्यानविमोक्षसमाधिसमापत्त्यादीनाम्···। **समुदाचारसमन्वागमः कतमः ?** स्कन्धधात्वायतनानां यो य एव धर्मः संमुखीभूतः कुशलो वा अकुशलो वा अव्याकृतो वा तस्य समुदाचारसमन्वागमेन समन्वागतः । **समुच्छिन्नकुशलमूलः कुशलानां धर्माणां वीजसमन्वागमेन समन्वागतोऽसमन्वागतश्च वक्तव्यः** । **आत्यन्तिकः पुन संक्लेशसमन्वागमः अपरिनिर्वाणधर्मकाणामिच्छन्तिकानां द्रष्टव्यः** । *Asm*. p. 35.

[३] Yaśomitra quotes a similar passage to illustrate the *sabhāga-hetu*, *Akb*. II. 49-6. :—**समन्वागतोऽयं पुद्गलः कुशलैरपि धर्मैरकुशलैरपि यावदस्ति चास्याणुसहगतं कुशलमूलमसमुच्छिन्नं यतोऽस्य कुशलमूलादन्यत्कुशलमूलमुत्पत्स्यते । एवमयं पुद्गल आयत्यां विशुद्धिधर्मा भविष्यतीति सभागहेतुः** । *Sakv*. pp. 188-9. In this passage note the

येण सर्वेण सर्वं समुच्छेत्स्यते। यस्य समुच्छेदात्समुच्छिन्नकुशल(6)मूल[१] इति संख्यां गमिष्यतीति। अतः सर्वाकुशलमूलभूता मिथ्यादृष्टिरिति सौगताः।[२]

---

word *aṇu-sahagata*. The *Adv.* has *anusahagata*. In Pāli *aṇu* is frequently spelt *anu*. See *aṇusahagato kāmarāgo* (*Kv.* I. 1.—p. 81) and *anusahagato asmīti māno* (*S.* III. p. 131.) See *LVPAk.* II. p. 245, n. 2.

[१] This topic is discussed in detail by the Kośakāra: —

किं स्वभावः कुशलमूलसमुच्छेदः ?

सोऽसमन्वयः ।

यदा हि कुशलमूलानां प्राप्तिर्न पुनरुत्पद्यते अप्राप्तिरप्युत्पद्यते । तस्मिन्नसमन्वागम उत्पन्ने समुच्छिन्नानि कुशलमूलान्युच्यन्ते । *Akb.* IV. 80 b.

किमालम्बनया मिथ्यादृष्टया समुच्छिद्यन्ते ?

फलहेत्वपवादिन्या

या च हेतुमपवदते…या च फलं…। आनन्तर्यविमुवितमार्गस्थानीये एते **इत्यपरे** ।

सास्रवालम्बनयैव नानास्रवालम्बनया सभागधात्वालम्बनयैव न विसभागधात्वालम्बनया । संप्रयोगमात्रानुशायित्वेन दुर्बलत्वा**दित्येके** ।

एवन्तु वर्णयन्ति—

सर्वया

नवप्रकाराण्यपि कुशलमूलानि समुच्छिद्यन्ते । दर्शनप्रहातव्यवदि**त्येके** ।

क्रमशो

नवप्रकारया मिथ्यादृष्टचा नवप्रकाराणि कुशलमूलानि समुच्छिद्यन्ते । भावनाहेयक्लेशवत् । यावदधिमात्राधिमात्रया मृदुमृदूनीति ।…… [V. supra, p. 165, n. 2.]

दर्शनमार्गवदभ्युत्थानेन च्छिनत्ती**त्येके** ।

एवन्तु वर्णयन्ति । उभयथेति । पूर्वसंवरं विजहाति पश्चात्कुशलमूलानि समुच्छिनत्ती**त्येके** ।

एवन्तु वर्णयन्ति । यस्य चित्तस्य फलसंवरत्यागात्तस्य त्याग इति ।…

नृषु ।

मनुष्येष्वेव नापायेषु ।…न देवेषु…। त्रिषु द्वीपेषु नोत्तरकुरौ ।…*Akb.* IV. 79 ab.

[२] This refers to the Vaibhāshikas as is evident from the following : एवं तु वर्णयन्ति **वैभाषिकाः** । 'सर्वया' इति । या च हेतुमपवदते या च फलं या च सभागं धातुमालम्बते या च विसभागं या च सास्रवं या चानास्रवमालम्बते । सर्वैव तया समुच्छिद्यन्ते । *Sakv.* p. 412.

It appears that the Vaibhāshikas held two different views regarding the manner in which the *kuśala-mūlas* were annihilated : 'दर्शनप्रहातव्या इव' इति । यथा दुःखादिदर्शनहेयाः क्लेशा नवप्रकारा अपि दुःखादिसत्यदर्शनात् सकृत् प्रहीयन्ते, तद्वन्नवप्रकाराण्यपि कुशलमूलानि सकृत् समुच्छिद्यन्त इत्येके ।…

['क्रमशः'] 'भावनाहेयक्लेशवत्' इति [एके] ।… *Ibid.*

The *Adv.* favours the second view. See *LVPAk.* IV. p. 170. ff.

"सूक्ष्मं कुशलधर्मबीजं तस्मिन्नकुशले चेतस्यवस्थितं यतः पुनः प्रत्ययसामग्रीसन्निधाने सति कुशलं चित्तमुत्पद्यते" इति कोशकारः ।[1]

---

[1] This is a view of the Sautrāntika. The Sautrāntika holds that the forces known as *Prāpti* snd *Aprāpti* are *prajñapti-dharmas* and not *dravya-dharmas*. While discussing *prāpti*, the Kośakāra in *Akb*. II. 36 cd, touches this topic, viz, the *kuśala-mūla-samuchchheda* and the *kuśala-mūla-pratisandhāna* (i. e., the *aprāpti* and *prāpti* of the *kuśalamūla*) :—

कुशला अपि धर्मा द्विप्रकारा अयत्नभाविनो यत्नभाविनश्च ये त उच्यन्ते उत्पत्तिप्रातिलम्भिकाः प्रायोगिकाश्चेति । तत्रायत्नभाविभिराश्रयस्य **तद्बीजभावानु**पघातात् समन्वागत उपघातादसमन्वागत उच्यते **समुच्छिन्नकुशलमूलः** । तस्य तूपघातो मिथ्यादृष्टचा वेदितव्यः । **न तु खलु कुशलानां धर्माणां बीजभावस्यात्यन्तं सन्ततौ समुदघातः** । ये पुनर्यत्नभाविनस्तैरुत्पन्नैस्तदुत्पत्तिवशित्वाविघातात् सन्ततेः समन्वागत उच्यते। तस्माद्बीजमेवात्रानपोद्धृतमनुपहतपरिपृष्ठं च वशित्वकाले समन्वागमाख्यां लभते । नान्यत् द्रव्यम् । *Akb*. II. 36 cd.

The Kośakāra gives more details about the *Kuśala-mūla-pratisandhi* :—

तेषां समुच्छिन्नानां कथं पुनः प्रतिसन्धिः ?

सन्धिः कांक्षास्तिदृष्टिभ्याम्

यदाऽस्य हेतुफले विचिकित्सा चोत्पद्यते । अस्तिदृष्टिर्वा सम्यक्दृष्टिरित्यर्थः । तदा पुनः तत्प्राप्तिसमुत्पादात् प्रतिसन्धितानि कुशलमूलान्युच्यन्ते । नवप्रकाराणां युगपत् प्रतिसन्धानं क्रमेण तु संमुखीभाव आरोग्यबललाभवत् । स पूनस्तेषां प्रतिसन्धिः

नेहानन्तर्यकारिणः ।

अन्यस्यैवेह स्यादानन्तर्यकारिणस्तु नेह स्यात् । तमेव सन्धायोक्तम्—"अभव्योऽयं पुद्गल दृष्ट एव धर्मे कुशलमूलानि प्रतिसन्धातुं नियतमयं नरकेभ्यश्च्यवमानो वा उपपद्यमानो वा कुशलमूलानि प्रतिसन्धास्यति" इति ।...तत्र पुनर्यो **हेतुबलेन** समुच्छिनत्ति स च्यवमानः प्रतिसन्दधाति यः **प्रत्ययबलेन** स उपपद्यमानः । एवं यः स्वबलेन परबलेन ।...

स्यात्समुच्छिन्नकुशलमूलो न मिथ्यात्वनियत इति ? चतुष्कोटिकम् । प्रथमा कोटिः—पूरणादयः । द्वितीया–अजातशत्रुः । तृतीया–देवदत्तः । चतुर्थी–एतानाकारान् स्थापयित्वा ।...
Akb. IV. 80 cd.

Cf. (१) इधाहं आनन्द एकच्चं पुग्गलं एवं चेतसा चेतो परिच्च पजानामि '**इमस्स खो पुग्गलस्स विज्जमाना कुसला पि धम्मा अकुसला पि धम्मा** ।' तमेनमपरेन समयेन एवं चेतसा चेतो परिच्च पजानामि' **इमस्स खो पुग्गलस्स कुसला धम्मा अन्तरहिता, अकुसला धम्मा सम्मुखीभूता, अत्थि च ख्वास कुसलमलं असमुच्छिन्नं**, तम्हा तस्स **कुसला कुसलं पातुभविस्सति** । **एवमयं पुग्गलो आयतिं अपरिहानधम्मो भविस्सती**'ति ! सेय्यथा पि...**बीजानि** अखण्डानि...सुखेत्ते सुपरिकम्मकताय भूमिया निक्खित्तानि...वेपुल्लं आपज्जिस्सन्ति...।

(२) इध पनाहं...इमस्स खो पुग्गलस्स...**अकुसला धम्मा अन्तरहिता कुसला सम्मुखीभूता, अत्थि च च ख्वास अकुसलमूलमसमुच्छिन्नं, तम्हा तस्स अकुसला अकुसलं पातुभविस्स-**

युक्त्यागमविरोधात्तन्नेति दीपकारः।

तत्र युक्तिविरोधस्तावद्विजातीयाद्धेतोर्विजातीय(7)फलानुत्पत्तिदर्शणा-(ना)द्यवबीजाच्छालिफलवद्योनिशो मनसिकारपरतः सद्घोषाभ्यां मिथ्यादृष्टि-

---

ती'ति। सेय्यथा पि··· **बीजानि** अखण्डानि···पुथुसिलाय निक्खित्तानि···न वेपुल्लं आपज्जिस्सन्ति···।

(३) इध पनाहं···इमस्स खो पुग्गलस्स विज्जमाना कुसला पि धम्मा अकुसला पि धम्मा। तमेनमपरेन···**नत्थि इमस्स पुग्गलस्स बालग्गकोटिनित्तुद्दनमत्तो पि सुक्को धम्मो, समन्नागतोऽयं पुग्गलो एकन्तकाळकेहि अकुसलेहि धम्मेहि। कायस्स भेदा··निरयं उपपज्जिस्स**-तीति। सेय्यथा पि···**बीजानि** खण्डानि···सुपरिकम्मकताय भूमिया निक्खित्तानि···न··· वेपुल्लं आपज्जिस्सन्ति···।

(४) इधाहं···इमस्स खो पुग्गलस्स···इमस्स खो पुग्गलस्स कुसला धम्मा अन्तरहिता, अकुसला धम्मा सम्मुखीभूता, **अत्थि च ख्वस्स कुसलमूलं असमुच्छिन्नं, तं पि सब्बेन सब्बं समुग्घातं गच्छति। एवमयं** पुग्गलो आयतिं **परिहानधम्मो भविस्सती**'ति। सेय्यथा पि··· सायण्हसमयं सुरिये ओगच्छन्ते···आलोको अन्तरधायिस्सति, अन्धकारो पातुभविस्सती'ति···।

(५) इध पनाहं···इमस्स खो पुग्गलस्स···अकुसला धम्मा अन्तरहिता कुसला धम्मा सम्मुखीभूता, **अत्थि च ख्वास्स अकुसलमूलमसमुच्छिन्नं, तं पि सब्बेन सब्बं समुग्घातं गच्छति।** एवमयं··अपरिहानधम्मो भविस्सती ति। सेय्यथापि···रत्तिया पच्चूससमये सुरिये उग्गच्छन्ते··· आलोको पातुभविस्सती'ति।

(६) इध पनाहं···इमस्स खो पुग्गलस्स···**नत्थि इमस्स पुग्गलस्स बालग्गकोटिनित्तुद्दनमत्तो पि अकुसलो धम्मो, समन्नागतोयं पुग्गलो एकन्तसुक्केहि** अनवज्जेहि **धम्मेहि** दिट्ठेव धम्मे **परिनिब्बायिस्सती ति।** सेय्यथापि अंगारानि सीतानि निब्बुतानि···न वेपुल्लं आपज्जिस्सन्तीति।

तत्रानन्द ये ते पुरिमा तयो पुग्गला, तेसं तिण्णं पुग्गलानं एको अपरिहानधम्मो, एको परिहानधम्मो, एको आपायिको नेरयिको।···ये'मे पच्छिमा तयो पुग्गला, इमेसं···एको अपरिहान धम्मो, एको परिहानधम्मो, एको परिनिब्बानधम्मो ति। *Aṅg.* III. p. 404-409.

The *Kathā-vatthu* contains many controversies allied to the *Kuśala-mūla-samuchchheda*. See कप्पट्ठकथा (XIII. 1), कुसलचित्तपटिलाभकथा (XIII. 2), अनन्तराप्पयुत्तकथा (XIII. 3.), नियतस्स नियामकथा (XIII. 4), कुसलाकुसलपटिसन्धानकथा (XIV. 1), and अच्चन्तनियामकथा (XIX, 7). In the **अच्चन्तनियामकथा**, the controversy centres round a *sutta* passage: "इध भिक्खवे एकच्चो पुग्गलो समन्नागतो होति एकन्तकाळकेहि अकुसलेहि धम्मेहि, सो सकिं निमुग्गो निमुग्गो व होती'ति। (*P.Paññatti*, VII. 1.) The Commentary on this passage says: 'सकिं निमुग्गो' ति एकवारं निमुग्गो। 'एकन्त काळकेही' ति एकन्तनेव काळकेहि नत्थिकवाद-अहेतुकवाद-अकिरियवादसङ्खातेहि नियतमिच्छादिट्ठिधम्मेहि। एवं पुग्गलो···निमुग्गो व होति। एतस्स हि पुन भवतो

वद्य ।[१] चक्षूरूपाभ्यां विज्ञानवदिति चेत् । न । सभागहेतौ सति चक्षूरूपयोर्निमित्तकारणमात्रत्वा[त्], दध्युत्पत्तावातञ्चनवत् । किञ्च, विरुद्धानामन्यतरोपपत्तेश्च । न हि विरुद्धानां सुखदुःखालोकतमःप्रभृतीनां चै(8)कत्र [संभवद]वस्थानं दृष्टम् । नापि परस्परं बीजफलाभिसंबन्धः । किञ्च, चित्तबीजैकत्वाभ्युपगमाच्च । अकुशलमेव हि चित्तं भवतां जीव(बीज)मिष्टम् । तस्य कुशले चित्तक्षणे विरुद्धक्रिये च चित्तान्तरे बीजलेशानुपपत्तिः ।[२]

वुट्ठानं नाम नत्थीति वदन्ति । **मक्खलिगोसालादयो** विय हेट्ठा हेट्ठा नरकग्गीनं येव आहारा होन्ति । *P.Paññatti A.* VII. 1.

On **कुसलचित्तपटिलाभकथा**, Buddhaghosha says :—तत्थ कप्पट्ठो सकसमये कामावचरकुसलमेव पटिलभति, येन पन तं उपपत्ति पटिबाहेय्य, तं महग्गतं लोकुत्तारं वा न पटिलभति । येसं पन इमं विभागं अकत्वा अविसेसेनेव **सो कुसलचित्तं** न पटिलभतीति लद्धि, सेय्यथा पि **उत्तरापथकानं** । *KvA.* XIII. 5.

The *Śikshāsamuchchaya* contains several references to the *Kuśalamūla* :—कुत्रेमानि भगवन् कुशलमूलानि तनुत्वं परिक्षयं गच्छन्ति ? (p. 149), पूर्वकुशलमूलं क्षपयति, नवं नोत्थापयति (p. 152), बोधिसत्त्वस्य कुशलमूलम् (p. 84); कुशलमूलपर्येषणा (p. 187), कुशलमूलसंभरणम् (p. 215), न बोधिसत्त्वः क्वचिदेव कुशलमूलानि समुच्छिनत्ति (p. 91), कुशलमूलपरिणामना (pp. 177, 214, 281), and निर्वाणपर्यवसानं कुशलमूलम् (p. 309).

See *S.Puṇḍarīka*, pp. 51, 284, 304; *Aaa.* pp. 467, 525 and N. Dutt : *Aspects of Mahāyāna Buddhism and its relation to Hīnayāna (=AMBRH)*, pp. 247 ff.

[१] For an allied controversy, see *Kv.* XIV. 1— इदानि **कुसलाकुसलपटिसन्धिकथा** नाम होति । **तत्थ कुसलं वा अकुसलस्स अकुसलं वा कुसलस्स अनन्तरं उप्पज्जनकं नाम नत्थीति तेसं अञ्ञमञ्ञं पटिसन्धानं न युज्जति ।** ये पन यस्मा एकवत्थुकस्मिं येव रज्जति विरज्जति च, तस्मा तं अञ्ञमञ्ञं पटिसन्दहतीति लद्धि गहेत्वा ठिता, सेय्यथा पि **महासङ्घिका** । *KvA.* XIV. 1.

[२] Yaśomitra, while commenting on the above quoted passage (V. supra, p. 168, n. 1.) on *prāpti-aprāpti*, gives a view of Āchārya Saṁghabhadra about the theory of *bīja*. This view of Saṁghabhadra and its criticism by Yaśomitra shed abundant light on this present controversy raised by the Dīpakāra :—

इदमस्येति ज्ञानचिह्नं प्रतिलब्धधर्माविप्रणाशकारणं च प्राप्तिरित्याचार्यसंघभद्रः ।··· **स एव च शक्तिविशेषलक्षणं बीजभावमाचार्येण व्यवस्थापितं दूषयति ।** किमयं शक्तिविशेषश्चित्तादर्थान्तरमुतानर्थान्तरम् । किं चातः । अर्थान्तरं चेत् । सिद्धं प्राप्तिरस्तीति ।··· अनर्थान्तरं चेत् । **नन्वकुशलं कुशलस्य बीजमभ्युपगतं भवत्यकुशलस्य च कुशलम्** ।··· कुशलबीजं ह्यकुशले चेतस्यव्याकृते वा वर्तते । एवमकुशलबीजं कुशले चेतस्यव्याकृते वा वर्तते ।···इति **सांकर्यदोषः प्रसज्यत** इति ।

उक्तोत्तरत्वाच्च । विस्तरेण ह्यत्रोत्तरमुक्तम् ।[१] तत्स्मर्यतामिति ।

आगमविरोधोऽपि, “सर्वं सर्वेण च्छे[त्स्य(?)ते” इति ……च्य]मानं बीजमवस्थितं गंस्यते । इति ।

व्याख्याताः सलक्षणाः कर्मपथाः ॥

कः पुनः सलक्षणः कर्मपथार्थः ? कर्म च कर्मणश्च चेतनाख्यस्य पन्थान इति कर्मपथाः । तत्र सप्त कर्म च कर्मणश्च पन्था [इ]ति कर्मपथाः, त्रयस्त्वभिध्यादयः कर्मणः पन्थानो न कर्म ।[२] चेतना [हि तत् संप्रयोगिणी भवति ।]

Yaśomitra's answer to this is as foollws :—**अत्र वयं ब्रूमः ।** अनर्थान्तरभावे सांकर्यदोषो भवेत् । **तत्तु बीजं न चित्तादर्थान्तरं वक्तव्यम् । नाप्यनर्थान्तरम् । उपादायप्रज्ञप्तिरूपत्वात् ।** अथाप्यनर्थान्तरभावः, तथाप्यदोषः । कुशलेन हि चित्तेनोत्पन्नेन स्वजातीयेऽन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत । ततः कारणविशेषात् कार्यविशेष इति विशिष्टम् । तेन तच्चित्तमुत्पद्येत । तद्विशिष्टं चित्तं कुशलबीजकार्यक्रियायां समर्थमुत्पद्येत । …इत्येवमन्योन्यबीजाधायकमन्योन्यजनकं च चित्तं चित्तान्तरादुत्पद्यमानमन्योन्यवास्यवासकत्वेन प्रवर्तते । न च कुशले नाकुशले चित्ते शक्तिविशेष आहित इति तदकुशलं कुशलतामापद्यते कुशलं वा तदकुशलतां शक्तिविशेषमात्रत्वात् । शक्तिर्बीजं वासनेत्येकोऽयमर्थः । ‥भवतामपि **वैभाषिकाणामिदं** चिन्त्यते । यदा सास्रवचित्तासमनन्तरमनास्रवमनास्रवचित्तासमनन्तरं वा सास्रवचित्तमुत्पद्यते । तदा किं पूर्वकः सास्रवकलापोऽनास्रवकलापो वा शक्तिमान् **समनन्तरप्रत्यया**दिभावेनोत्तारकलापोत्पत्तावुताशक्तिमान् ।…तेन यदुक्तं नन्वकुशलं कुशलस्य बीजमभ्युपगतं भवतीत्यादि तदयुक्तम् । न हि कुशलाहितेन शक्तिविशेषेण विशिष्टं समर्थमकुशलमकुशलबीजकार्यं करोति । स्वहितेन तु शक्तिविशेषेण तदकुशलं स्वबीजकार्यं करोति । तत् कथमिदमुच्यते कुशलस्याकुशलं बीजमिति । ब्रूयास्त्वमकुशलचित्ते तत्कुशलबीजमाहितं किमकुशलं न भवतीति । **न भवन्तो बीजार्थं जानते । कुशलेन चित्तेन निरुध्यमानेन तथा शक्तिविशिष्टमकुशलं चित्तं जन्येत । यथा तच्चित्तं स्वोत्पत्तियोग्यं भविष्यति साक्षात् पारम्पर्येण वेति शक्तिविशेष एव बीजम् । न बीजं नामास्ति किञ्चित्प्रज्ञप्तिसत्त्वात् ।** *Sakv.* pp. 148 ff.

[१] The Dīpakāra must have discussed this topic in detail in the Second *Adhyāya*, while dealing with *prāpti* and *aprāpti*. V. supra, p. 37, n. 4.

[२] Cf. **त्रयो ह्यत्र पन्थानः सप्त कर्म च ।** *Ak.* IV. 78d.

अभिध्यादयो हि त्रयः कर्मणः पन्थान इति कर्मपथाः । *Akb.* IV. 78d.—‘कर्मणः पन्थान’ इति चेतनाख्यस्य कर्मणः पन्थानः । कथमित्याह । ‘तत्संप्रयोगिणी हि चेतना ।’ अभिध्यादिसंप्रयोगिणी तेषामभिध्यादीनां ‘वाहेन’ गत्या ‘वहति’ । गच्छतीत्यर्थः । ‘तद्वशेन तथाभिसंस्करणात् ।’ यस्मादभिध्यादीनां यथाक्रमं सक्ति-प्रतिकूलमिथ्या-नितीरणाकाराणां वशेन । तदनुरूपा चेतनाऽभिसंस्करोति । चेतयत इत्यर्थः । अतस्तेषां वाहेन वहति । ‘कर्म च । कायवाक्कर्मस्वभावत्वात् । कर्मणश्च चेतनाख्यस्य ‘पन्थान’ इति कर्मपथाः ।

[IV. B, 3.Fol. 97 a.[१]](1)संप्रयुक्ता [तद्वषे(शे)ण(न) गच्छ]त्यभिसंस्करोतीत्यर्थः। सा तु कर्मैव न कर्मपथः। न ह्यसौ त्रयाणां वशेन वर्तते[२]। इदमुच्यते—

[200] चेतना न क्रियामार्गस्तैस्तु सत्ता प्रवर्तते।

कतिभिः पुनः कर्मपथैः सार्धं चेतना युगपदुत्पन्ना वर्तते? तदारभ्यते—

युगपद्याव[दष्टा]भिरशुभैश्चेतनैः सह ॥[३]

[४][एकेन तावत्सह वर्तते। विनान्येनाभिध्यादिसंमुखीभा(2)वे[५]] अक्लिष्टचेतसो वा तत्प्रयोगेण रूपिणामन्यतमनिष्ठागमने[६]।

'तत्समुत्थानचेतनायाः' कायवाक्कर्मसमुत्थानचेतनायाः। 'तानधिष्ठाय' तान् प्राणातिपातादीनधिष्ठाय 'प्रवृत्तेः।' 'असरूपाणामप्येकशेषसिद्धेः' इति। *Sakv.* pp. 409-410.

See *LVPAk.* IV. p. 168, n. 2.

Also cf. तत्थ 'धम्मतो' ति एतेसु हि पटिपाटिया सत्त चेतना धम्मा होन्ति, अभिज्झादयो तयो चेतनासम्पयुत्ता। *Dhs A.* III. 158.

[१] This folio is erazed in many places. The reconstructions given in the brackets are done with the help of *Akb.*

[२] Cf. ये तर्हि **दार्ष्टान्तिका** अभिध्यादीनेव मनस्कर्मेच्छन्ति तेषां ते कथं कर्मपथाः? [V. supra, p. 148, n. 5.] **त एव हि प्रष्टव्याः।** अपि तु शक्यं वक्तुं कर्म च ते पन्थानश्च सुगतिदुर्गतीनामिति कर्मपथाः। इतरेतरावाहनाद्वा। *Akb.* IV. 78 d.

—**तेषां ते कथं कर्मपथा** इति। न हि तेषामभिध्यादिभ्योऽन्यन्मनस्कर्मास्ति चेतना। यस्य कर्मणस्तेऽभिध्यादयः पन्थान इति कर्मपथाः स्युः। **त एव प्रष्टव्या** इति। तैरेव परिहारो वक्तव्यः। 'अपि तु शक्य'मिति विस्तरः। **स्वमतेन तत्पक्षं समर्थयति।** इतरेतरावाहनाद्वे'ति। किम्? तेऽभिध्यादयः कर्मपथा इति प्रकृतम्। अभिध्या व्यापादमिथ्यादृष्टी आवाहयति। ते च तामिति। कर्म च ते। कर्मणश्चैषामेकतरस्य पन्थान इति कर्मपथाः। *Sakv.* p. 411.

[३] Cf. **युगपद्यावदष्टाभिरशुभैः सह वर्तते।** *Ak.* IV. 81 ab.

[४] This whole *Adv.* (*kārikā* 201 cd) is almost identical with *Akb.* IV. 81 ab.

0 I

[५] **विनाऽन्येनाभिध्यादिसम्मुखीभाव** इति। विनाऽन्येन कर्मपथेन प्राणातिपातादिनाऽभिध्यादीनामन्यतमसम्मुखीभावे, **सा चेतना एकेन कर्मपथेन सह वर्तते** अभिध्यया वा व्यापादेन वा मिथ्यादृष्ट्या वा। *Sakv.* p. 414.

[६] **अक्लिष्टचेतसो वेति** कुशलाव्याकृतचित्तस्य।...**रूपिणां** प्राणातिपातादीनां काममिथ्याचारवर्ज्यानामन्यतमस्य **निष्ठापने।** तेनैकेन सह चेतना वर्तते। अभिध्यादिव्यतिरिक्तक्लिष्टचित्तस्य वेति वक्तव्यम्। *Ibid.*

द्वाभ्यां सह वर्तते । व्यापन्नचित्तस्य प्राणिवधे । अभिध्याविष्टस्य चादत्तादाने काममिथ्याचारे संभिन्नप्रलापे वा ।

त्रिभिः सह । व्यापन्नचित्तस्य परकीयप्राणिमारणापहरणे [1]युगपत् । अभिध्याविष्टस्य तत्प्रयोगेण रूपि[द्वयनिष्ठागमने त्रिभिरेव] ।

[चतुर्भिः सह वर्तते । (3)भेदा]भिप्रायस्य[2] नन्दनवचने परुषवचने वा । तत्र हि मानस एको भवति वाचिकास्त्रयः[3] । अभिध्यादिगतस्य वा तत्प्रयोगेऽण्य(न्य)त्रयन्नि(नि)ष्ठागमने ।

एवं पञ्चषटि(ट्)सप्तभिर्योज्यम ।

अष्टाभिः सह वर्तं(र्त)त(ते) । षट्सु[4] प्रयोगं कृत्वा परे संप्रेषणेन स्वयं काममिथ्याचारं कुर्वतः समनिष्ठागमने । एवं [तावदकुशलैः] ॥

[201] [शुभैस्तु] (4)दशभिर्यावत्सार्वं(र्धं) नैकाष्टपञ्चभिः ।[5]

[6]शुभैः खलु कर्मपथैर्यावद्दशभिः सह वर्तत इत्युत्सृष्टिः । तदपवादोयम्—'नैकाष्टपञ्चभिः' । न खल्वेकेन पञ्चभिरष्टाभिर्वा सह वर्तते[7] ।

---

[1] **व्यापन्नचित्तस्य प्राणिमारणापहरणे युगपदिति ।** यत्र मारणेनैवापहरणं सिध्यति तत्र हि व्यापादप्राणिवधादत्तादानकर्मपथा युगपद्भवन्तीति । *Ibid.* p. 415.

[2] **भेदाभिप्रायस्यानृतवचन** इति । भेदाभिप्रायत्वादेवानृतं पैशुन्यं भवति । तदेव संभिन्नप्रलापः ।···इति चतुर्भिः सह वर्तते । *Ibid.*

[3] **मानस एको भवति वाचिकास्त्रय** इति । अनृतवचनेऽभिध्या व्यापादो वा भवेत् । वाचिकास्त्रयः । मृषावादपैशुन्यसंभिन्नप्रलापाः । परुषवचनेऽपि मानस एको व्यापादः । वाचिकास्त्रयः । पारुष्यपैशुन्यसंभिन्नप्रलापाः । **नामत एवं त्रयो भवन्ति । न तु स्वभावतः । अपरे पुनर्व्याचक्षते ।** स्वभावभेदोऽप्यस्तीति । यथा मृषावादपैशुन्यसंभिन्नप्रलापाविज्ञप्तयो हि भिद्यन्ते तथा पारुष्यपैशुन्यसंभिन्नप्रलापाविज्ञप्तयो भिद्यन्त इति । *Ibid.*

[4] **षट्सु** प्राणातिपातादिषु । *Ibid.*

[5] Cf. **चेतना दशभिर्यावच्छुभैर्नैकाष्टपञ्चभिः ।** *Ak.* IV. 81 cd.

[6] This whole *Adv.* (*kārikā* 201 ab.) is almost identical with *Akb.* IV. 81 cd.

[7] **नैकेनैव** मानसेन । कुशले चेतस्यनभिध्याव्यापादयोरवश्यं भावात् । नापि रूपिणैकेन संवरसंगृहीतेन कर्मपथेन सह चेतना वर्तते । क्लिष्टाव्याकृतचित्तावस्थायामप्युपासकसंवरादिषु प्राणातिपातादत्तादानकाममिथ्याचारमृषावादानामवश्यं सहभावात् ।

न पञ्चभिरेव । कुशले चेतस्यनभिध्याव्यापादयोर्द्वयोरवश्यं सहभावात् । संवरसंगृहीतानां च प्राणातिपातादीनामेषां चतुर्णामवश्यं सहभावात् ।

तत्र द्वाभ्यां सह वर्तते। कुशलेषु पञ्चसु विज्ञानेषु[१] स्थितस्यारूप्यसमापत्ति[२]संगृहीते च क्षयानुत्पादज्ञान[3]संप्रयुक्तविज्ञानं तत्सं[प्रयुक्ता च] (5)प्रज्ञानदृष्टिरिति।

त्रिभिः सह वर्तते। सम्यग्दृष्टिसंप्रयुक्ते मनोविज्ञाने[४]। यत्र संवरो णा(ना)स्ति।

चतुर्भिरकुशलाव्याकृतचित्तस्यो[५]पासकस्य श्रामणेरसंवरसमादाने[६]।

षड्भिः कुशलेषु पञ्चसु विज्ञानेषु[७] तत्समादाने।

सप्तभिः कुशले मनोविज्ञाने तत्समादान एव। अकुशलाव्याकृतचित्तस्य [च भिक्षु]संवरसमादाने।[८]

नाष्टाभिरेव। भिक्षुसंवरसंगृहीतानां कायिकवाचिकानां क्लिष्टाव्याकृतावस्थायां सप्तानामेव संभवात्। कुशलचित्तावस्थायां च नवानां दशानां वा संभवात्। पारिशेष्याद् द्व्यादिभिः सह वर्तत इत्युक्तं भवति। *Sakv.* p. 416.

[१] **कुशलेषु पञ्चसु विज्ञानेषु** अनभिध्या चाव्यापादश्च स्तः न सम्यग्दृष्टिः। "पञ्चविज्ञानसहजा धीर्न दृष्टिरतीरणात्" इति सिद्धान्तात्। [V. supra, p. 29, n. 5.] अतोऽनभिध्याऽव्यापादाभ्यां द्वाभ्यामेवात्र सह वर्तते। *Ibid.*

[२] **आरूप्यसमापत्तिग्रहणं** ध्यानसमापत्तिसंगृहीतयोः क्षयानुत्पादज्ञानयोः सप्तविधकायिकवाचिकानास्रवसंवरस्वभावकर्मपथनिवृत्त्यर्थम्। *Ibid.*

[3] **क्षयानुत्पादज्ञानग्रहणं** सम्यग्दृष्टिनिरासार्थम्। क्षयानुत्पादज्ञानयोरसम्यग्दृष्टिस्वभावत्वात्। *Ibid.* V. infra, *Ad. kārikā* 441.

[४] सम्यग्दृष्टिसंप्रयुक्ते **मनोविज्ञाने** रूपिकर्मपथाभाव इति वाक्यशेषः। तत्र ह्यनभिध्याऽव्यापादसम्यग्दृष्टय एव त्रयः कर्मपथा भवन्तीति। *Sakv.* p. 416.

[५] **अकुशलाव्याकृतचित्तस्येति** विशेषणान्मानसा न सन्तीति दर्शितं भवति। *Ibid.*

[६] **उपासकश्रामणेरसंवरसमादाने च।** प्राणातिपातादत्तादानकाममिथ्याचारमृषावादविरतिलक्षणाश्चत्वार एव कर्मपथाः सन्ति। मद्यपानादिविरतीनां दशकर्मपथानन्तर्भावात्। पैशुन्यविरत्यादीनां चोपासकश्रामणेरसंवरसंग्रहात्। श्रामणेरसंवरसमादानवचनाच्चोपवाससंवरसमादानमुक्तरूपमवगन्तव्यम्। श्रामणेरसंवरसमादाने त्वब्रह्मचर्याद्विरतिस्तृतीयः कर्मपथः। तत्र च काममिथ्याचारोऽन्तर्भूत एव। *Ibid.*

[७] विज्ञानकायेषु in *Akb.* IV. 81 cd.

[८] …**भिक्षुसंवरसमादाने** सप्तभिरेव रूपिभिः। न मानसैः। अकुशलाव्याकृतचित्तत्वात्। *Ibid.*

[नवभिः] (6)कुशलेषु पञ्चसु विज्ञानेषु तत्समादाने,[१] क्षयानुत्पादज्ञानसंप्रयुक्ते च मनोविज्ञाने तस्मिन्नेव च ध्यानसंगृहीते ।

दशभिस्ततोऽन्यत्र[२] कुशले मनोविज्ञाने भिक्षुसंवरसमादान एव । सर्वा च ध्यानानास्रवसंवरसमावर्तिनी चेतनाऽन्यत्र क्षयानुत्पादज्ञानाभ्याम् । संवर-[निर्मुक्तेन[३] त्वेकेनापि सह स्यादन्यचित्तस्यै][४] (7)काङ्गविरतिसमादाने । पञ्चाष्टाभिरपि स्यात् । कुशलमनोविज्ञानस्य द्विपञ्चाङ्गसमादाने युगपत्[५] ।

कस्यां पुनर्गतौ कति कुशलाश्चाकुशलाश्च कर्मपथाः संमुखीभावतः समन्वागमतो[६] वा सन्तीति ?

विलापद्वेषपारुष्याण्युषन्ति नरके द्विधा ॥[७]

एते त्रयः संभिन्नप्रलापपारुष्यव्यापादा नारके [संमुखीभाव](8)तः समन्वागमतश्च विद्यन्ते ।

[202] तद्वदेव मताऽभिध्या मिथ्यादृष्टिस्तथैव च ।[८]

केचित्खलु ब्रुवते—अभिध्या मिथ्यादृष्टिश्चापि द्वाभ्यां प्रकाराभ्यां विद्येते ।

अन्ये पुनराहुः—समन्वागमत एवाभिध्यामिथ्यादृष्टी विद्येते। रञ्जनीयवस्त्वभावात्, कर्मफलप्रत्यक्षत्वाच्च ।[९]

[१०]तच्चैतदकारणम् । तत्र तावत्तृष्णाऽविद्याऽधिमात्रतमत्वादिति [पूर्व]-मपाक्षिकः ।[१०]

---

[१] …तत्समादाने भिक्षुसंवरसमादाने । सम्यग्दृष्टेरेवाभावात् । *Ibid.*

[२] ततोऽन्यत्रेति क्षयानुत्पादज्ञानवर्जिते । *Ibid.*

[३] संवरनिर्मुक्तेन त्वष्टविधसंवरनिर्मुक्तेन । *Sakv.* p. 417.

[४] अन्यचित्तस्येति । तत्संवरनिर्मुक्तकुशलकर्मपथसमुत्थापकाच्चित्तादन्यचित्तस्य । क्लिष्टाव्याकृतचित्तस्येत्यर्थः । *Ibid.*

[५] युगपन्मानसैस्त्रिभिः, रूपिभ्यां द्वाभ्यामिति पञ्चभिः । *Ibid.*

[६] For *samanvāgama*, see *Asm.* p. 35. V. supra, p.—n.—

[७] Cf. भिन्नप्रलापपारुष्यव्यापादा नरके द्विधा । *Ak.* IV. 82 ab.

[८] Cf. समन्वागमतोऽभिध्या मिथ्यादृष्टिः कुरौ त्रयः । *Ak* IV. 82. cd.

[९] This view is given in *Akb.* IV. 82 cd.

[१०-१०] This view is not given in *Akb.*

अभिध्यादित्रयं तद्वत्कुरौ प्रलपनं द्विधा ॥

कुरौ खल्वेवमेव त्रयोऽभिध्याव्यापादमिथ्यादृष्टयः ।

अन्ये पुनराहुः—'समन्वागमत एव न संमुखीभावतः । अममापरिग्रहत्वात्, स्निग्धसन्तानत्वादाघातवस्त्वभावादपापाशयत्वाच्च[1] ॥

[203] अशुभास्तु दशान्यत्र

नरकोत्तरकुरुभ्यामन्यत्र कामधातौ द्वाभ्यां प्र[IV A. 3. Fol. 97 b.](1)काराभ्यां दशाशुभा विद्यन्ते ।

सर्वत्र कुशलास्त्रयः ।[2]

शुभास्तु 'त्रयः' । त्रयोऽनभिध्याऽव्यापादसम्यग्दृष्टयः सर्वत्र त्रैधातुके पञ्चस्वपि गतिषु द्वाभ्यां प्रकाराभ्यां सन्तीति ।

आरूप्याऽर्याऽसंज्ञिनां च रूपिणः सप्त लाभतः ॥[3]

आरूप्येषु खल्वार्याणामेवातीतानागतेनानास्रवसंवरेण समन्वागमोऽस्त्यसंज्ञिनां च । ध्यानसंवरेण (2)यावद्भूम्याश्रयं[4] ह्यनास्रवशीलमार्यं उत्पादितनिरोधितं कृत्वा आरूप्येषूपपन्नो भवति तेनातीतेन समन्वागतो भवति । षड्[5]भूम्याश्रयेणानागतेनापि, न तु संमुखीभावतः, आरूप्याणां चतुस्कन्धात्मकत्वादसंज्ञिसत्त्वाणां(नां) चाचित्तकत्वात्[6] । भूतचित्तप्रतिबद्धो हि तत्संवरसंमुखीभावः ॥

---

[1] Cf. कुरौ त्रयः ।

समन्वागमत इति वर्तते । अभिध्याव्यापादमिथ्यादृष्टयो न संमुखीभावतः । अममापरिग्रहत्वात्···ditto···अपापाशयत्वाच्च । *Akb.* IV. 82 d.

For 'संमुखीभाव', see *Kv.* XIII. 6.

[2] Cf. सप्तमः स्वयमप्यत्र कामेऽन्यत्र दशाशुभाः ।
शुभास्त्रयास्तु सर्वत्र संमुखीभावलाभतः ॥ *Ak.* IV. 83.

[3] Cf. आरूप्यासंज्ञिसत्त्वेषु लाभतः सप्त शेषिते । *Ak.* IV. 84 ab.

[4] यद्भूम्याश्रयं in *Akb.* IV. 84 ab—यद्भूम्याश्रयमिति विस्तरः । पञ्च भूमयः । यावच्चतुर्थध्यानभूमिम् । यद्भूमिराश्रयोऽस्येति यद्भूम्याश्रयम् । *Sakv.* p. 418.

[5] पञ्चभूम्याश्रयेण in *Akb.* IV. 84 ab.

[6] V. supra, p. 93, n. 4.

[204] कुरून्सनरकान्हित्वा सर्वत्रान्यत्र(3) ते द्विधा ।[१]

कुरून् हित्वा नरकांश्च । अन्यत्र गतौ संमुखीभावतो ह्येते सप्त कुशलाः कर्मपथा विद्यन्ते । संवरनिर्मुक्ता एव तु तिर्यक्प्रेतेषु । संवरसंगृहीता एव रूपधातावन्यत्रोभयथा ।

ते खल्वेते द्विविधाः कर्मपथाः

सर्वे विपाकनिष्यन्दाधिपत्यफलदा दश ॥[२]

[३]तत्राकुशलैः सर्वैरासेवितैर्भावितैर्बहुलीकृतैर्न(4)रकेषूपपद्यते तदेषां विपाकफलम् । सचेदित्थत्वमागच्छति स मनुष्याणां सभागताम्, प्राणातिपातेनाल्पायुष्को भवति ।[४] अदत्तादानेन भोगव्यसनी । काममिथ्याचारेण सपत्नदारः । मृषावादेनाभ्याख्यानबहुलः । पैशून्येनादृढमित्रः । पारुष्येना(णा)मनोज्ञशब्दश्रावी । संभिन्नप्रलापेनानादेयवाक्यः । अभि(5)ध्यया तीव्ररागः । व्यापादेन तीव्रद्वेषः । मिथ्यादृष्ट्या तीव्रमोहः । इतीदमेषां णि(नि)ष्यन्दफलम् ।[५]

प्राणातिपातेनात्यासेवितेन बाह्या भावा अल्पौजस्का भवन्ति ।[६] अदत्तादानेन परीत्तफला अल्पसस्या अशनिबहुलाः । काममिथ्याचारेण रजोऽवकीर्णाः । मृषावादेन दुर्गन्धाः । पैशून्येनोत्कूलनिकूलाः । पारुष्येन(ण) दुःस्पर्शाः करण्डक(6)प्रायाश्च । संभिन्नप्रलापेन विषमपरिणामाः । अभिध्यया पचितफलाः । व्यापादेन कटुकर्मफलाः । मिथ्यादृष्ट्या बीजादपकृष्टफला अफला वा । इदमेषामाधिपत्यफलम् ॥[७]

---

[१] Cf. संमुखीभावतश्चापि हित्वा सनरकान् कुरून् । *Ak.* IV. 84 cd.

[२] Cf. सर्वेऽधिपतिनिष्यन्दविपाकफलदा मताः । *Ak.* IV. 85 ab.

[३] This whole *Adv.* (*kārikā* 204 cd.) is almost identical with *Akb.* IV. 85 ab.

[४] Cf. पाणातिपातकम्मं नाम निरये तिरच्छानयोनियं पेत्तिविसये असुरकाये च निब्बत्तेति, मनुस्सेसु निब्बत्तट्ठाने अप्पायुकसंवत्तनिकं होति । *Jātaka*, I. p. 275. Also cf. पाणातिपातो भिक्खवे आसेवितो भावितो बहुलीकतो निरयसंवत्तनिको तिरच्छानयोनिसंवत्तनिको पेत्तिविसयसंवत्तनिको । यो सब्बलहुसो पाणातिपातस्स विपाको मनुस्सभूतस्स अप्पायुकसंवत्तनिको होति । *Aṅg.* IV. p. 247. For other references, see *LVPAk.* IV. pp. 185 ff. V. supra, p. 90, n. 5.

[५] विपाकफलमिति सत्त्वसंताने । इदं निष्यन्दफलमिति बाह्यं तद्वस्त्विति । न तद्विपाकफलम् । *Sakv.* p. 418.

[६] See *Dīgha*, XVI. 17.

[७] For details, see *Sakv.* pp. 419-420.

तत्पुनरेतत्

[205] दुःखोपसंहृतेर्दुःखमल्पायुष्ट्व(ष्य)न्तु मारणात् ।
तेजोनाशात्कृशौजस्त्वमिदं तत्त्रिविधं फलम् ॥[१]

यत्तेन परस्य दुःखा वेदना जनिता ततो (7)नरकेषूपपद्यते । यदिष्टं जीवितमुपच्छिन्नं ततोऽल्पायुः । यत्तेजो नाशितं तेन बाह्या भावाः कृशौजसः । एवमन्येषामपि योज्यम् ।[२]

कुशलानामपि कर्मपथानामेवमेव तत्फलत्रयं विपर्ययेण लक्षयितव्यम् । प्राणिवधविरत्या सेवितया देवेषूपपद्यते । सचेदित्थत्वमागच्छति मनुष्याणां सभागतां दीर्घायुर्भवति । तदाधि(8)पत्येनैव बाह्या भावा महौजसो भवन्तीति । सर्वं विपर्ययेण द्रष्टव्यम् ॥[3]

अत्र पूर्वं याणि(नि) पञ्च फलान्युक्तानि[४] तेषां कतरत्कर्म कतिभिः फलैः सफलम् ?

[206] आनन्तर्यपथे कर्म फलवत्पञ्चभिः फलैः ।
चतुर्भिस्त्वमलेनार्यं तद्वदन्यच्छुभाशुभम् ॥[५]

---

[१] Cf. दुःखनान्मारणादोजोनाशनात् त्रिविधं फलम् । *Ak.* IV. 85 cd.
Cf. also, *Yogasūtra*, II. 34.

[२] See *Sakv*. pp. 419-420.

[३] The Kośakāra discusses one more point : यद्भगवता "मिथ्यावाङ मिथ्याकर्मान्तो मिथ्याजीव" इत्युक्तं कोऽयमन्यस्ताभ्यां मिथ्याजीवः ? *Akb.* IV. 86. This is not discussed in *Adv.*

[४] यानि पूर्वं पञ्च फलान्युक्तानीति । अधिपतिफलम् । पुरुषकारफलम् । निष्यन्दफलम् । विपाकफलम् । विसंयोगफलं च । *Sakv.* p. 421. The Kośakāra has dealt with this topic in the II *kośasthāna* :—

विपाकोऽव्याकृतो धर्मः सत्त्वाख्यो व्याकृतोद्भवः ।
निःष्यन्दो हेतुसदृशः विसंयोगः क्षयो धिया ॥
यद्बलाज्जायते यत्तात्फलं पुरुषकारजम् ।
अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम् ॥ *Ak.* II. 57-58.

The *Adv.* also might have contained a discussion on this topic in the last *pāda* of the Second *Adhyāya*, which is lost. V. supra, p. 114, n. 4

[५] Cf. प्रहाणमार्गे समले सफलं कर्म पञ्चभिः ।
चतुर्भिरमलेऽन्यच्च सास्रवं यच्छुभाशुभम् ॥ *Ak.* IV. 87.

प्रहाणमार्गे[१] समले[२] पञ्चभिः फलैः कर्म सफलं भवति । तुल्या अधिका अपि तस्य पश्चादुत्प(1)न्नाः सदृशा[३] धर्मा णि(नि)ष्यन्दफलम् । विपाकफलं स्वभूमिनियतो विपाकः । विसंयोगफलं यत्क्लेशप्रहाणम् । [४]पुरुषकारफलं ये तद्बलसमुत्पन्ना धर्माः । न तथा सहभुवः । यच्चानन्तरोत्पन्नो विमुक्तिमार्गः, यच्चानागतं भाव्यते, यच्च तत्प्रहाणं तद्बलेन हि तत्प्राप्त्युत्पत्तिः ।[४] अधिपतिफलं स्वभावादन्ये सर्वसंस्काराः पूर्वोत्पन्न व[IV. B, 4. Fol. 98 a.]र्ज्या इति द्रष्टव्यम् । प्रहाणमपि तन्मार्गस्याधिपतिफलं युज्यते । तदाधिपत्येन तत्साक्षात्करणादित्यन्ये । यत्तु निर्मलप्रहाणमार्गे कर्म तच्चतुर्भिः फलैः सफलं विपाकफलं मुक्त्वा । 'तद्वदन्यच्छुभाशुभम् ।' अन्यदपि सास्रवं यच्छुभाशुभम्, यच्च प्रहाणमार्गादन्यत्कुशलसास्रवं [कर्म] यच्चाकुशलं तदपि चतुर्भिरेव फलैः सफलं विसंयोगफलं त्य(2)क्त्वा ॥

[207] ततोऽन्यन्निर्मलं ज्ञेयं त्रिभिरव्याकृतं तथा ।[५]

शेषं पुनरणा(ना)स्रवं यत्प्रहाणमार्गादन्यत्, यच्चाव्याकृतं तत्त्रिभिर्विपाक[वि]संयोगफलं मुक्त्वा ।

फलं शुभस्य चत्वारि द्वे त्रीणि च शुभादयः ॥[५]

कुशलस्य कर्मणः कुशला धर्माश्चत्वारि फलानि विपाकफलं हित्वा । अकुशला द्वे पुरुषकाराधिपतिफले । अव्याकृतास्त्रीणि निष्यन्दविसंयोगफले हि(3)त्वा ॥

[208] शुभाद्यास्त्वशुभस्य द्वे त्रीणि चत्वारि च क्रमात् ।[६]

---

[१] प्रहाणार्थं मार्गः प्रहीयन्ते वाऽनेन क्लेशा इति प्रहाणमार्ग आनन्तर्यमार्गः । *Akb.* IV. 87. V. infra, *Ad. kārikā* 439.

[२] **ससमले** in the Ms.

[३] **समाधिजा** उत्तरे सदृशा धर्माः । *Akb.* IV. 87.—**समाधिजग्रहणं** असमाधिजनिरासार्थम् । **सदृशग्रहणमनास्रवाव्याकृतनिरासार्थम्** । *Sakv.* p. 421.

[४-४] Cf. पुरुषकारफलं तदाकृष्टा धर्मास्तद्यथा अधिमुक्तिमार्गः **तत्सहभुवश्च** । यच्चानागतं भाव्यते तच्च प्रहाणम् । *Akb.* IV. 87.—**सहभुव** इति । संप्रयुक्ताश्च तत्र वेदनादयः । विप्रयुक्ताश्च जात्यादयः । **यच्चानागतं भाव्यत** इति । अनागतो धर्मस्तद्बलेन प्राप्यत इति । तस्य तत्पुरुषकारफलम्, अत एव **तच्च प्रहाणं** पुरुषकारफलं व्यवस्थाप्यते । न केवलं विसंयोगफलमिति । *Sakv.* p. 421.

[५] Cf. **अनास्रवं पुनः शेषं त्रिभिरव्याकृतं च यत् ।**
चत्वारि द्वे तथा त्रीणि कुशलस्य शुभादयः ॥ *Ak.* IV. 88

[६] Cf. **अशुभस्य शुभाद्या द्वे त्रीणि चत्वार्यनुक्रमम् ।** *Ak.* IV. 89 ab.

अकुशलस्य कर्मणः कुशला धर्मा द्वे पुरुषकाराधिपतिफले। अकुशलास्त्रीणि विपाकविसंयोगफले हित्वा। अव्याकृताश्चत्वारि विसंयोगफलं हित्वा। अव्याकृतमपि ह्यकुशलानां निष्यन्दफलमस्ति। यथा कामावचरे सत्कायान्तर्ग्राहदृष्टी। सर्वेषां दुःखदर्शण(न)प्रहातव्याणां(नां) समुद(4)यदर्शण(न)प्रहातव्याणां(नां) च सर्वत्रगाणा(ना)म्।

अव्याकृतस्य ते तु द्वे त्रीणि त्रीणि शुभादयः ॥[१]

अव्याकृतस्य कर्मणः कुशला धर्माः द्वे पुरुषकाराधिपतिफले। अकुशलास्त्रीणि विसंयोगफले हित्वा। अव्याकृतस्य तान्येव त्रीणि॥

[209] सर्वे चत्वार्यतीतस्य मध्यमस्य च भाविनः ।[२]
मध्यमा द्वे स्वकस्यैव त्रीण्यनागामिजन्मनः ॥

[३]तत्र 'सर्वे' इति त्रैकालिकाः। (5)अतीतस्य कर्मणोऽतीतानागतप्रत्युत्पन्ना धर्माश्चत्वारि फलानि विसंयोगमपास्य। प्रत्युत्पन्नस्यापि कर्मणोऽनागता धर्माश्चत्वारि फलान्येतान्येव। वर्तमानास्तु धर्मा वर्तमानस्य कर्मणः द्वे पुरुषकाराधिपतिफले। अजातस्य त्वजाता धर्मास्त्रीणि फलानि निष्यन्दविसंयोगफले हित्वा ॥[३]

[210] चत्वार्येकभुवो द्वे वा त्रीणि चापरभूमिकाः ।[४]

(6)स्वभूमिका धर्माः कर्मणो यथासंभवं चत्वारि फलानि विसंयोगफलं हित्वा। अन्यभूमिका धर्माः ते(त्रि)वेदनास्रवास्त्रीणि, विपाकविसंयोगफले हित्वा। निष्यन्दफलं ह्यधातुपतितानामन्यभूमिकं न वार्यते। सास्रवाश्चेद् द्वे, पुरुषकाराधिपतिफले।

शैक्षाद्यास्त्रीणि शैक्षस्य त एवाशैक्षकर्मणः ॥[५]

शैक्षस्य कर्मणः शैक्षा धर्मा(7)स्त्रीणि फलानि, विपाकविसंयोगफले

---

[१] Cf. अव्याकृतस्य द्वे त्रीणि त्रीणि चैते शुभादयः। *Ak.* IV. 89 cd.

[२] Cf. सर्वेऽतीतस्य चत्वारि मध्यमस्याप्यनागताः।
मध्यमा द्वे अजातस्य फलानि त्रीण्यनागताः॥ *Ak.* IV. 90.

[३-३] This *Adv.* is almost identical with *Akb.* IV. 90. See *Sakv.* pp. 422-423.

[४] Cf. स्वभूमिधर्माश्चत्वारि त्रीणि द्वे वाऽन्यभूमिकाः। *Ak.* IV. 91 ab.

[५] Cf. शैक्षस्य त्रीणि शैक्षाद्याः, अशैक्षस्य तु कर्मणः॥ *Ak.* IV. 91. cd.

हित्वा। अशैक्षा अप्येवम् । नैवशैक्षाणा(ना)शैक्षास्त्रीण्येव निष्यन्दविपाकफले हित्वा ॥

अशैक्षस्य[1] तु कर्मणः

[211] एकं त्रीणि द्वयं चैव शैक्षाद्याः पश्चिमस्य तु ।
द्वे द्वे पञ्च यथासंख्यं[2]

अशैक्षस्य खलु कर्मणः शैक्षा धर्मा एकमधिपतिफलम्, अशैक्षास्त्रीणि विपाकविसंयोग(8)ले हित्वा। नैवशैक्षाणा(ना)शैक्षा द्वे पुरुषकाराधिपतिफले। नैवशैक्षानाशैक्षाणां पुनः शैक्षा धर्मा द्वे पुरुषकाराधिपतिफले। एवमशैक्षाः। नैवशैक्षानाशैक्षाः पञ्चफलानि।

दृग्घेयस्य तु कर्मणः ॥

[212] त्रीणि चत्वारि चैकं च दृष्टिहेयादयः स्मृताः ।[3]

दर्शण(न)हेयस्य खलु कर्मणः दर्शण(न)हेया धर्मास्त्रीणि फलानि, वि(9)पाकविसंयोगफले हित्वा। भावनाहेयाश्चत्वारि, विसंयोगफलं हित्वा। अप्रहेया एकमधिपतिफलम्।

ते त्वभ्यासप्रहेयस्य द्वे चत्वारि त्रिधा मताः ॥[4]

[213] क्रमादेकद्विचत्वारि ते त्वहेयस्य कर्मणः ।[3]

भावनाहेयस्य खलु कर्मणो दर्शण(न)हेया धर्माः द्वे, पुरुषकाराधिपतिफले। भावनाहेयाश्चत्वारि विसंयोगफलं हित्वा। अप्र[IV. A, 4. Fol. 98b.]हेयास्त्रीणि, विपाकनिष्यन्दफले हित्वा। अप्रहेयस्य तु कर्मणो दर्शण(न)प्रहातव्या धर्मा एकमधिपतिफलम्। भावनाहेया द्वे, पुरुषकाराधिपतिफले। अप्रहेयाश्चत्वारि विपाकफलं हित्वा ॥

अथ किमेकं कर्मैकं जन्माक्षिपति, अथानेकम्?[5] तदादर्श्यते—

---

[1] अशैक्षस्याशैक्षस्य in the Ms.

[2] Cf. धर्माः शैक्षादिका एकं फलं त्रीण्यपि च द्वयम् ।
ताभ्यामन्यस्य शैक्षाद्या द्वे द्वे पञ्च फलानि च ॥ *Ak.* iv. 92

[3] Cf. त्रीणि चत्वारि चैकं च दृग्घेयस्य तदादयः ।
ते द्वे चत्वार्यथ त्रीणि भावना हेयकर्मणः ॥ *Ak.* iv. 93.

[4] Cf. अप्रहेयस्य ते त्वेकं द्वे चत्वारि यथाक्रमम् । *Ak.* iv. 94 ab.

[5] Cf. इमस्मिं ठाने साकेतपञ्हं नाम गण्हिसु । साकेते किर उपासका सालायं निसीदित्वा 'किं नु खो एकाय चेतनाय कम्मे आयूहिते एका पटिसन्धि होति उदाहु नाना ?'

एकेनाक्षिप्यते [जन्म] भूरिभिः परिपूर्यते ॥[1]

एकेन खलु कर्मणा सकलमेकं जन्माक्षिप्यते(2)**। बहुभिस्तु परिपूर्यते। तद्यथा चित्रकर एकया वर्त्या कृत्स्नं रूपमाक्षिपति, बह्वीभिः परिपूरयति तद्वदिति**[2] **॥**

ति पञ्हं समुट्ठापेत्वा निच्छेतुं असक्कोन्ता आभिधम्मिकत्थेरे उपसंकमित्वा पुच्छिसु। थेरा 'यथा एकस्मा अम्बबीजा एको व अंकुरो निक्खमति, एवं एका व पटिसन्धि होती' ति सञ्ञापेसुं। अथ एकदिवसं **'किं नु खो नानाचेतनाहि कम्मे आयूहिते पटिसन्धियो नाना होन्ति उदाहु एका ?'** ति पञ्हं समुट्ठापेत्वा निच्छेतुं असक्कोन्ता थेरे पुच्छिसु। थेरा 'यथा बहुसु अम्बबीजेसु रोपितेसु बहू अंकुरा निक्खमन्ति, एवं बहुका व पटिसन्धियो' ति सञ्ञापेसुं। *DhsA.* III. 588. For details, see *Vipākuddhāra-kathā*, *DhsA.* III. 587-650. V. supra, p. 144, n. 5.

[1] Cf. **एकं जन्माक्षिपत्येकमनेकं परिपूरकम्।**
नाक्षेपिके समापत्ती अचित्ते प्राप्तयो न च ॥ *Ak.* IV. 95.

[2] Cf. **एष हि सिद्धान्तः। एकमेव जन्माक्षिपत्येकमेव च कर्म नानेकं जन्मेति निकायसभागस्याख्या।** तत्र हि लब्धे जात इत्युच्यते। यर्त्ताहि स्थविरानिरुद्धेनोक्तं "सोऽहं तस्यैकपिण्डपातस्य विपाकेन सप्तकृत्वस्त्रयस्त्रिंशेषु देवेषूपपन्नो यावदेतर्ह्याढ्ये शाक्यकुले जात" इति ?···यथा मनुष्यो दीनारोत्थोऽनेन सहस्रं निर्विश्याह एकेन दीनारेणाहमैतदीश्वर्यं प्राप्त इति।···*Akb.* IV. 75 a.

Also cf. विपाकस्त्रिविधो जातिरायुर्भोग इति। तत्रेदं विचार्यते—**किमेकं कर्मैकस्य जन्मनः कारणम्? अथैकं कर्मानेकं जन्माक्षिपतीति?** द्वितीया विचारणा—**किमनेकं कर्मानेकं जन्म निर्वर्तयति? अथानेकं कर्मैकं जन्म निर्वर्तयति?** इति। न तावदेकं कर्म एकस्य जन्मनः कारणम्, कस्मात्? अनादिकालप्रचितस्यासंख्येयस्यावशिष्टस्य कर्मणः सांप्रतिकस्य च फलक्रमानियमात् अनाश्वासो लोकस्य प्रसक्तः, स चानिष्ट इति। न चैकं कर्मानेकस्य जन्मनः कारणम्, कस्मात्? अनेकेषु जन्मस्वेकैकमेव कर्मानेकस्य जन्मनः कारणमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः, स चाप्यनिष्ट इति। न चानेकं कर्मानेकजन्मकारणम्, कस्मात्? तदनेकं जन्म युगपन्न भवतीति क्रमेण वाच्यम्, तथा च पूर्वदोषानुषङ्गः। तस्माज्जन्मप्रायणान्तरे कृतः पुण्यापुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्जनभावेनावस्थितः प्रायणाभिव्यक्तः, एकप्रघट्टकेन मरणं प्रसाध्य सम्मूर्च्छित एकमेव जन्म करोति, तच्च जन्म तेनैव कर्मणा लब्धायुष्कं भवति। तस्मिन्नायुषि तेनैव कर्मणा भोगः संपद्यत इति। असौ कर्माशयो जन्मायुर्भोगहेतुत्वात्त्रिविपाकोऽभिधीयते। अत एकभविकः कर्माशय उक्त इति। *Yogasūtra-bhāshya*, II. 12.

For the Jaina view on this topic, see Pt. Sukhalalji Sanghavi: Yaśovijaya's *Vṛitti* on *Yoga-darshana*, II. 12.

अथ यदुक्तं भगवता—"कर्मस्वकोऽयं भिक्षवो लोकः" इति ।[१] तत्केयं कर्मस्वकता नाम ?[२] तदारभ्यते—

[214] कुशलं वाऽथवा पापं यद्तीतं ददत्फलम् ।
स्वं कायवाङ्मनस्कर्म सा कर्मस्वकता मता ॥

यत्खलु कायवाङ्मनस्कर्म स्वयं कृतं कुशला(3)कुशलमभ्यतीतं ददत्फलं सा कर्मस्वकता द्रष्टव्या ॥

कथं पुनः प्रतिक्षणभिदुरेषु संस्कारेषु परस्पराकृतसङ्केतेषु सत्सु, असति च नित्ये कर्त्तरि भोक्तरि च कर्मस्वकताऽभिधीयते ? तदत्र प्रतिसमाधीयते—

[215] संवृत्या स्कन्धसन्ताने तत्क्रियाफलदर्शणा(ना)त् ।
कर्त्तृता भोक्तृता चोक्ता निषिद्धा शाश्वतस्य तु ॥

स्वात्माभ्युदयविशेषार्थः खलु क(4)र्मारभ्यते । कश्चिदहं विशिष्टज्ञानविज्ञानसौख्यरूपकान्तिलावन्य(ण्य)सौष्ठवयुक्तं जन्म प्रतिलभेयेति । शाश्वते त्वात्मनि निष्क्रिये पूर्वपश्चाद्विशेषाभावात् कर्त्तृत्वं भोक्तृत्वं चात्यन्तापध्वस्त युक्तिविधानम् । स्कन्धसन्ताने तु विशिष्टस्कन्धान्तरोत्पत्तौ सत्यां बीजजलाभिषेकाद्यनुग्रहा[द्] विशिष्टफलोत्पत्तिवदिति[३] । पूर्वमेवाविष्कृतमेतदिति ॥[४]

इ(5)दमिदानीं वक्तव्यम् ।

[216] स्यात्कर्मस्वकता नास्ति तस्य चेति चतुष्किका ।

स्यात्खलु कर्मस्वकता नापि च तस्य कर्मणो विपाकेऽवस्थित इति चतुष्कोटिका ।

प्रथमा तत्फलस्थस्य विहाणा(ना)त्तस्य कर्मणः ॥

यदि तस्य कर्मणः फलेऽवस्थितस्तच्च कर्म विहीनं भवति ॥

---

[१] Cf. भासितं पे' तं···भगवता—कम्मस्सका माणव सत्ता, कम्मदायादा, कम्मयोनी, कम्मबन्धू, कम्मपटिसरणा, कम्मं सत्ते विभजति, यदि'दं हीनपणीतताया'ति । *Milinda*. p. 69,

For *kamma-nānatta*, see *DhsA*. I. 37-38.

Also cf. यदुक्तं **भगवता** यथा सत्त्वाः कर्मस्वका कर्मदायादाः कर्मयोनीयाः कर्मप्रतिसरणाः कर्म सर्वान् विभजति उच्चनीचतया हीनप्रणीततया इति । *Asm*. p. 60.

For *kamma-niyāma*, see *Dhs A*. III. 601-603.

[२] This topic is not discussed in *Akb*. The Kośakāra, however, discusses *trīṇyāvaraṇāni* and *pañchānantarya-karmāṇi*, (*Akb*. IV. 96-105) which are not discussed in *Adv*.

[३] See, *B.Pañjikā*, VI. 26-30; IX. 58-60.

[४] V. supra, p. 22, n. 1. V. infra, *Adv*. *kārikās* 304-3 05.

[217] द्वितीया तत्फलस्थस्य कर्मणा तेन चान्वयात् ।
तृतीयोभययुक्तस्य चतुर्थ्यनुभय(6)स्य तु ॥

[218] स्यात्कर्मस्वकता नापि तत्फलं वेदयिष्यति ।

द्वितीया चतुष्कोटिका । तत्र प्रथमा कोटिः—

तत्फलावस्थितस्याद्या ज्ञेया तच्चरमे फले ॥

[219] द्वितीया ध्रुवपाकस्य तद्विपाकानवस्थिते ।
तृतीया द्वयसद्भावा चतुर्थी तूभयं विना ॥

तृतीया चतुष्कोटिका—

[220] स्यात्कर्मणान्वितश्चैव नो च तत्फलवेदनम् ।

स्यात्खलु कर्मणा समन्वागतो न(7) च तस्य कर्मणः फलं वेदयते । चतुष्कोटिका ।

आद्या दत्तविपाकेन निरुद्धानागतादिना ॥

[221] द्वितीया तु विहीणे(ने)न ध्रुवपाकेन कर्मणा ।
तृतीया द्वयमुक्तस्य चतुर्थी तु द्वयादृते ॥

अथ यदिदं शास्त्रि(स्त्रे) योगविहितमयोगविहितं च कर्मोक्तं तस्य किं लक्षणम् ? तदभिधीयते—

[222] अयुक्तविहितं कर्म क्लेशोपक्लेशदूषितम् ।
शिक्षालिङ्गा(8)द्यपेतं च केचिदाहुर्विपश्चितः ॥[१]

यत्किञ्चित्खलु क्लिष्टं कायवाङ्मनस्कर्म क्लेशोपक्लेदूषितं सर्वं तदयोगविहितम्, [२]अयोनिशोमनस्कारसमुत्थापितत्वात् । अन्ये पुनर्ब्रुवते—यत्खलु शिक्षाव्यपेतं यथा गन्तव्यं स्थातव्यमित्येवमादि, यत्तु लिङ्गवचनहीनमसंबद्धं निरर्थकं च वाक्कर्म तदयोगविहितम् । विधिभ्रष्टत्वादिति । विपर्य(9)याद्योगविहितं द्रष्टव्यमिति ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ चतुर्थस्याध्यायस्य तृतीयः पादः ॥

---

[१] Cf. अयोगविहितं क्लिष्टं विधिभ्रष्टं च केचन । *Ak.* IV. 94 cd.

[२] Cf. धीः प्रज्ञा । साप्युपपरीक्ष्य एव वस्तुनि प्रविचयो योगायोगविहितोऽन्यथा वेति ।···युक्तिर्योगः । सा पुनराप्तोपदेशोऽनुमानं प्रत्यक्षं च । तेन त्रिप्रकारेण योगेन यो जनितः स योगविहितः ।···अयोगोऽनाप्तोपदेशोऽनुमानाभासो मिथ्याप्रणिहितश्च समाधिस्तेनायोगेन जनितोऽयोगविहितः । *Tvb.* 10 c.

चतुर्थाध्याये

चतुर्थपादः ।

अथैतां परमगम्भीरां दुरवबोधां प्रकृतिपुरुषेश्वरादिकुदर्शण(न)तिमिरोत्सादनकरीं कर्मस्वकतां कः स्वयमभिसंबुद्ध्य लोकानुग्रहाय प्रदर्शयतीति ? ब्रूमः । पुरुषो(षः) तु सो बोधिसत्त्वः ।[१]

[IV. B, 5. Fol. 99 a.](1)स पुनः किं चित्तोत्पादात्प्रभृति बोधिसत्त्वो[२] भवति ? अथ लाक्षणिककर्माक्षेपेण, आहोस्विच्चरमभविक इति ? अत इदं प्रस्तूयते—

[223] बोधिसत्त्वः कुतो यावदविवर्त्यमना यतः ।[३]
बध्नाति बोधिसन्नाहमङ्गीकृत्वा जगद्धितम् ॥[४]

यतः प्रभृति[५] कल्याणमित्रं भगवन्तं सम्यक्संबुद्ध[माप]द्य तदुपदर्शितदक्षिणमार्गः योनिशो मनसिकाराधिष्ठितबुद्धिः कृ(2)त्स्नं लोकमत्राणमशरणमपरायणं पञ्चगतिमहावर्तें जातिजराव्याधिमरणादिदुःखक्षाराम्भसि, कर्मराक्षसाधिष्ठिततीरे, पापमित्रकुम्भीरानुबद्धवेले, रूपादिविषयविकल्पपवनोद्धततृष्णातरङ्गे, मोहकर्णधारपरिभ्रामितबुद्धिनौके संसारमहासमुद्रे निमग्नमवलोक्य कृपाविष्टचेतास्तदभ्युद्धरणाय वी(3)र्यबाहुमभिप्रसार्य, अविवर्त्यं चित्त-

---

[१] This topic *(Bodhisattva)* is discussed in *Akb.* only incidentally, and not in such details as in *Adv.* The Kośakāra, while discussing *trīṇyāvaraṇāni*, deals with an *ānantarya-sabhāga-karma*, viz., *bodhisattvasya-māraṇa. (Akb.* IV. 96.*)* The *Akb.* (IV. 108-118) is brief in dealing with the nature of *Bodhisattva* and four *Pāramitās*. For the doctrines of *Bodhisattva* and *Pāramitās* and their place in the Hīnayāna Buddhism, see *AMBRH.* Chapters I and II. (pp. 1—90.)

[२] बोधिसत्ता ति बुज्झनकसत्ता, बोधिया वा नियतभावेन सत्ता लग्गा अधिमुत्ता, तन्निन्ना तप्पोणा ति अत्थो । *Vm T.* p. 114. For various interpretations of this term, see *The Bodhisattva Doctrine*, pp. 4-9.

[३] Cf. बोधिसत्त्वः कुतो यावद्यतो लक्षणकर्मकृत् । *Ak.* IV. 108 ab.

[४] On *sannāha-pratipatti*, see *Aaa.* pp. 81-83.

[५] The *Akb.* is brief. Cf. यतः प्रभृति लक्षणविपाकानि कर्माण्यारभते कर्त्तुं स हि तदानीं नियतिपतितो भवति । कथं कृत्वा । स हि तस्मात् कालात् प्रभृति नित्यो भवति । *Akb.* IV. 108 ab.

मेवमुत्पादयति—अविद्यान्ध[ः]कारोपहतबुद्धिनयनोऽयं लोकः स मया सम्यग्दृष्टिप्रभावभासितेन शीलसंक्रमेणोत्तारयितव्यः। प्रतिघभुजङ्गदंष्ट्रा विषदूषितोऽयं लोकः स मया मैत्र्यागदेन प्रशमितव्यः। तृष्णापिशाचीललिताभिभूतमतिरयं लोकः स मया शमथबलेन तृष्णा(4)निरोधसुखं लम्भयितव्यः। परामर्शभूतग्रहाविष्टोऽयं लोकः स मया विमोक्षसुखस्वस्त्ययनेन निर्भयममृतपदं प्रवेशयितव्यः। मानगिरिशिखराधिरूढबुद्धिरयं लोकः स मया कर्मस्वकताज्ञानवज्रेण मानगिरीन्विचूर्ण्य प्रशान्तमानमदामर्शशान्तिपदे स्थापयितव्यः। विचिकित्साकथंकथीभावशल्यविद्धहृदयोऽ(5)यं लोकः स मया प्रतीत्यसमुत्पादप्रविचयशलाकया काङ्क्षाशल्यमुत्पाट्यामृतरसं पाययितव्यः। जराव्याधिमरणमकरदंष्ट्रान्तर्गतोऽयं लोकः स मया सर्वानर्थवियुक्तं निर्वृतिसुखं प्रापयितव्यः। श्रद्धादिगुणधनदरिद्रोऽयं लोकः स मया बोध्यङ्गरत्नखचिते महति गुणैश्वर्यपदे सन्निवेशयितव्यः।[१] इत्येतस्माद(6)विवर्त्याद् बोधिचित्तोत्पादात्प्रभृति[२] बोधिसत्त्वो वक्तव्य इत्याचार्यकम् ॥

यत्तर्हि शास्त्र उक्तम्—"बोधिसत्त्वः कुतः प्रभृति? यतो लक्षणवैपाक्यं[३] कर्म करोति" इति।[४] नैष दोषः। यस्मादसौ—

[224] यदा लाक्षणिकं कर्म प्रकरोत्यनपायगः।
महाकुलः समग्राक्षः स्वपर्षत्संग्रहे रतः ॥[५]

[225] पुमाञ्जातिस्मरो वाग्मी प्रज्ञावीर्यक्रियान्वितः।[५]

यदा खल्व(7)यं पुरुषत्वजातिस्मरत्वादिषु पदस्थानेषु नियतीभूतो भवति—

तदा देवमनुष्याणामभिव्यक्तिं निगच्छति ॥

अतो ज्ञानप्रस्थानेऽस्मादवधेः प्रभृति बोधिसत्त्वः अनेनाभिप्रायेण पठितः।

---

[१] Compare this style with *S.* IV. p. 94, *S.Puṇḍarīka*, pp. 118, 278; *Śikshā*, p. 29 and *B. Pañjikā*, III. 7--9.

[२] See *S. Puṇḍarīka*, pp. 67; 207. For the *avaivartikaliñgas* of the *Bodhisattva*, see *Aaa.* pp. 418--420.

[3] See *LVPAk.* IV. p. 221, notes.

[४] Cf. यच्चैतल्लक्षणविपाकं कर्मेत्युक्तम्

जम्बुद्वीपे पुमानेव संमुखं बुद्धचेतनः।
चिन्तामयं कल्पशते शेष आक्षिप्यते हि तत् ॥ *Ak.* IV. 109.

[५] Cf. सुगतिः कुलजोऽव्यक्षः पुमान् जातिस्मरोऽनिवृत्। *Ak.* IV. 108 cd.

[226] स हि त्रिभिरसंख्येयैर्धर्मकायगुणार्णवम् ।[१]
प्रचिनोति तदाधारं कायं कल्पशतेन तु ॥

[227] द्वात्रिंशल्लक्षणोपेतमशीतिव्यञ्ज(8)नोज्ज्वलम् ।
द्विषतामपि यं दृष्ट्वा मनः सद्यः प्रसीदति ॥

एषा खलु धर्मता यत्त्रिभिः कल्पासंख्येयैर[२]णि(नि)रस्तश्रद्धाशीलश्रुतत्यागप्रज्ञादिगुणधनैश्वर्यप्रयोगाणां(नां) भगवतां सम्यक्संबुद्धानां पुरुषोत्तमानां धर्मकाय[३]चरणपरिसमाप्तिर्भवति । कल्पशतेन खड्गविषाणकल्पानां प्रत्येकबुद्धानाम् । षष्ठ्या कल्पैः प्र(9)ज्ञावतामग्र्याणाम् । चत्वारिंशद्भिः ऋद्धिमच्छ्रेष्ठानाम् । विंशतिभिः कल्पैः श्रुतधरप्रवराणां धर्मकायचरणपरिपूरिर्भवति ।

यत्पुनर्जन्मशरीरं[४] भगवतां सम्यक्संबुद्धानां बोधेराश्रयभूतं द्वात्रिंशता महापुरुषलक्षणैः खचितमशीत्यानुव्यञ्जनैर्विराजितम् , यत्खलु दृष्ट्वा स्वविकल्प-

---

[१] Cf. बुद्धत्वम्

असंख्येयानां कल्पानां त्रयेण ।···किन्नु खलु कालप्रकर्षेणैव कृतप्रणिधाना बोधिसत्त्वा बोधिमभिसंबुध्यन्ते । किमेतदेव भविष्यति ।···यद्यप्यन्यथाप्यस्ति मोक्षावकाशः किमर्थं त इयन्तं यत्नमारभन्ते ? परार्थम्···। *Ak.* III. 94 a. See *The Bodhisattva Doctrine*, pp. 76—9.

[२] V. infra, *Adv. kārikā* 236.

[३] Cf. तथागतस्स हेतं वासेट्ठ अधिवचनं—'**धम्मकायो** इति पि ब्रह्मकायो इति पि, धम्मभूतो इति पि ब्रह्मभूतो इति पीति ।" *Dīgha*, XXVII. 9. The *dhammakāya* in Pāli means "having a body that is, or is characterized by, the Doctrine." (*BHSD.* p. 277).

The term *dharma-kāya* is not used here in the Mahāyānist sense.

On the doctrine of *kāya*, see *AMBRH.* pp. 96—128, *The Bodhisattva Doctrine*, pp. 27, 192 and *BHSD.* p. 277.

[४] Cf.···तस्माल्लक्षणव्यञ्जनोज्ज्वलो योऽयं रूपकायस्तथागतो भव्यसत्त्वैः समीक्ष्यते नासौ तात्त्विको धर्मकायः शास्ता किन्तु परमविमलानन्तगुणराशिधर्मकायाधिपत्यादेव तेषां स्वज्ञानं तथाभूतरूपकायाकारेण प्रतिभासते । *Aaa.* p. 207. Also cf. तदनु दशभूमिप्रविष्टमहाबोधिसत्त्वैः सह परमानवद्यमहायानधर्मसंभोगप्रीतिसुखोपभोगात्**साम्भोगिकोऽयं कायो** द्वात्रिंशल्लक्षणाशीत्यनुव्यञ्जनविराजितगात्रो **रूपकायस्वभाव**स्तृतीयो बुद्धस्य भगवतो ग्राह्यः । तथा चोक्तम्

द्वात्रिंशल्लक्षणाशीतिव्यञ्जनात्मा मुनेरयम् ।
साम्भोगिको मतः कायो महायानोपभोगतः ॥ *Ibid.* pp. 525—6.

समुत्थितप्रतिघदूषितबुद्धी[IV. A, 5. Fol. 99 b.]नामपि मारपक्ष्याणां तीर्थ्याणां च मनः प्रसीदति ।[1]

कानि पुनस्तानि द्वात्रिशन्महापुरुषलक्षणानि? कानि वाशीत्यनुव्यञ्जनानि ? तदिदं प्रदर्श्यते—

तत्र तावदमूनि द्वात्रिंशन्महापुरुषलक्षणानि—[2]

बुद्धा हि भगवन्तः सममहीतलाक्रमणात् सुप्रतिष्ठित[पा]दाः ॥१॥

सहस्रारसनाभिकसनेमिकसर्वाकारपरिपूर्णचक्रा⁽²⁾ङ्कितपाणिपादत्वाच्चक्राङ्कहस्तपादाः ॥२॥

आयतहस्तपादाङ्गुलित्वाद्दीर्घाङ्गुलयः ॥३॥

दीर्घायतत्वादायतपार्ष्णिपादाः ॥४॥

तूलपिचुतरुणसुकुमारोपमकोमलकरचरणत्वान्मृदुतरुणपाणिपादाः ॥५॥

अभिताम्राष्टापदविचित्रतनुजालावनद्धत्वादभिजातहंसराजवज्जालावनद्धपादाः ॥६॥

उच्चैः सु⁽³⁾जातगुल्फत्वादुच्छङ्कुचरणाः ॥७॥

अनुपूर्वोपचितवृत्ततरगर्भैणेयमृगजङ्घत्वादैणेयजङ्घाः ॥८॥

प्रांशुबाहुत्वादनवनतकायजानुमण्डलस्पर्शिनः ॥९॥

परमाभिरूपनिगूढपुरुषनिमित्तत्वादभिजातहस्त्यश्वाजानेयवत्कोशगतवस्तिगुह्याः ॥१०॥

कायव्यामसमायामत्वान्न्यग्रोधपरिमण्डलाः ॥११॥

अनुपूर्वोर्ध(र्ध्व)मुखजातत्वादूर्ध्वाङ्गरोमाणः ॥१२॥

सुविभक्ताद्वितीयनीलजातरोमत्वादेकैकाभिनीलप्रदक्षिणावर्तरोमान:
(णः) ॥१३॥

---

[1] Cf. द्वात्रिशतां च महापुरुषलक्षणानां संमुखदर्शनेन कुशलमूलमुपचितं भविष्यति । *Śikshā*, p. 313. See, *B. Pañjikā*, I. 36.

[2] The Kośakāra does not enumerate the thirtytwo marks of the *Mahā-purusha*. For the origin of this theory, see *Dialogues of the Buddha*, Vol. I. p. 110, Vol. II. p. 14.

Prof. F. Edgerton has recorded almost all lists of the *mahāpurusha-lakshaṇas*, available both in the Pāli and *BHS*. Texts. See *BHSD*. pp. 458-460.

उत्तप्तहाटकसन्निभदृग्व्याममात्रप्रभावभासनात् सुवर्णवर्णाः ॥१४॥

सुपरिकर्मीकृतरजतजातरूपश्लक्ष्णच्छवित्वाद्रजोमलानुपक्लेशनाच्च सूक्ष्मच्छवयः ॥१५॥

(5)समुपचितहस्तपादांसग्रीवत्वात्सप्तोत्सदकायाः ॥१६॥

काञ्चनशिलातलश्लक्ष्णोपचितोरस्कन्धाचितान्तरांसाः ॥१७॥

सिंहवद्विस्तीर्णसंहतोर्ध्वाङ्गत्वात्सिंहपूर्वार्धकायाः ॥१८॥

अवक्रोपचितदशतालसमुच्छ्रितत्वाद् बृहदृजुगात्राः ॥१९॥

समन्तोपचितमांसनिगूढजत्रुदेशत्वात्सुसंवृत्तस्कन्धाः ॥२०॥

(6)अधस्तादुपरिष्टाच्च समदन्तविंशतित्वाच्चत्वारिंशद्दन्ताः ॥२१॥

अनुन्नतावनतसमप्रमान(ण)त्वात्समदन्ताः ॥२२॥

निरन्तरावस्थितत्वादविरलदन्ताः ॥२३॥

कुन्देन्दुशङ्खावभेदसितत्वाच्छुक्लदन्ताः ॥२४॥

श्लक्ष्णवृत्तोपचितदर्शणी(नी)यमहाहनुत्वात्सिंहहनवः ॥२५॥

वातपित्तश्लेष्माऽण(न)भिभूतरसहर(7)णिरसारसप्रविभावनासदृशविज्ञानत्वाद्रसनरसाग्रप्राप्ताः ॥२६॥

विस्तीर्णपेशलत्वाज्जिह्वायाः सर्वमुखमण्डलप्रतिच्छादनात्प्रभूततनुजिह्वाः ॥२७॥

गम्भीरवल्गुहृदयङ्गमविस्पष्टश्रवणीयपञ्चाङ्गोपेतस्वरत्वाद्ब्रह्मस्वराः ॥२८॥

कलविङ्कमनोज्ञभाषिणो दुन्दुभिस्वरणि(नि)र्घोषाः ॥२९॥

(8)शुक्लकृष्णप्रदेशानुपक्लिष्टलोहितराज्यविनद्धनीलोत्पलसमानवर्णत्वादभिनीलनेत्राः ॥३०॥

अधरोर्ध्वावस्थितानां सम्यगवनतासंलुडितदीर्घत्वादक्षिपक्ष्माणां गोपक्ष्माणः ॥३१॥

वृत्तपरिमण्डलसमानुपूर्वोपचितदर्शणी(नी)यास्थिवज्रजातमूर्धत्वादुष्णीषालङ्कृतशिरसः शङ्खावदातप्रदक्षिणा(9)वर्तोर्णाविद्योतितभ्रूविनतत्वादूर्णाङ्कितमुखाः ॥३२॥

एतानि द्वात्रिंशन्महापुरुषलक्षणानि बुद्धानां भगवतामिति ॥[1]

---

[1] For an allied controversy, see *Kv*. IV. 7.—इदानि **लक्खणकथा** नाम होति । तत्थ 'येहि समन्नागतस्स महापुरिसस्स द्वेव गतियो भवन्ती'ति इमं सुत्तं अयोनिसो गहेत्वा लक्खणसमन्नागतो बोधिसत्तोव होती ति येसं लद्धि, सेय्यथा पि **उत्तरापथकानं**। *Kv A*. IV. 7. See *Milinda*. p. 78.

अशीत्यनुव्यञ्जनान्यप्युच्यन्ते ।[1] बुद्धा हि भगवन्तः
अपृथुप्रमाणमृदुताम्रतुङ्गस्निग्धनखाः ॥१॥
वृत्तनिरन्तरानुपूर्वोपचिताङ्गुलयः ॥२॥
निर्ग्रन्थिनिगूढाल्पतनुशिराप्रतानाः ॥३॥
[IV. B, 6. Fol. 100 a](1)निर्गूढसमातीक्ष्णगुल्फाः ॥४॥
अविश(ष)मावक्ररक्तस्निग्धपादाः ॥५॥
[मृग]पतिद्विरदवृषभहंसराजप्रदक्षिणावर्तचारुगतयः ॥६॥
अलोमसाश्लेषसमप्रमाणोभयजङ्घाः ॥७॥
सुवृत्तसमसंहतनिगूढजानवः ॥८॥
कदलीस्कन्धोपमपो[ननिबि]डाविषमानुपूर्वोपचितचारूरवः ॥९॥
अर्धचन्द्राकृतिविस्ती(2)र्णसमुन्नतापगतरोमवक्षाणाः(णः) ॥१०॥
श्लक्ष्णसुसंहतचतुरस्रणा(ना)भ्यायतकुकुन्दरसुन्दरकटीदेशाः ॥११॥
गम्भीराच्छिद्ररक्तप्रदक्षिणावर्तणा(ना)भयः ॥२२॥
श्लक्ष्णालोमशाश्लथानुक्रमक्षामोदराः ॥१३॥
अनाभुग्नानिभुग्नसुवृत्तपृष्ठकुक्षयः ॥१४॥
समवतीर्णोपचितनातिदीर्घश्लक्ष्णपार्श्वाः ॥१५॥
अनिम्नो(3)पचितह्रस्ववज्रसंस्थानोपपन्नसूक्ष्मदीर्घलेखाङ्कितादृश्यास्थिसन्धिचारुपृष्ठाः ॥१६॥
विस्तीर्णोपचितदृढसन्धिहृदयाः ॥१७॥
अविषमोन्नतविस्तीर्णोरसः ॥१८॥
अनतिस्थूलोन्नतशङ्खावर्तनिभसूक्ष्मलेखापरिक्षिप्तसमरक्तस्तनाः ॥१९॥
हृदयविप्रकृष्टदेशजातत्वाद्विस्तीर्णस्तनान्तराः ॥२०॥
मांसोपचितानति(4)विस्तीर्णत्वादुन्नतकक्षाः ॥२१॥
स्थूलदृढसुबद्धनिमग्नसमाक्षकाः ॥२२॥
अश्लक्ष्णपृथुमांसनिमग्नाविषमप्रमाणस्फिजः ॥२३॥
करिकरणि(नि)भनिगूढसन्धिपीनकठिनश्लक्ष्णसमबाहवः ॥२४॥
वर्तितश्लक्ष्णरोमशसिंहोपमदृढप्रकोष्ठाः ॥२५॥
समताम्रदीर्घपाणयः ॥२६॥

---

[1] The *Akb.* does not enumerate the eighty *anu-vyañjanas*. For other lists and details, see *BHSD*. p. 34.

गम्भीराच्छिद्रासंकीर्णवक्रायतस्नि(5)ग्धतनुताम्रपाणिलेखाः ॥२७॥

सूक्ष्मयमलीकृताव्याकुलारक्ताङ्गुलिपर्वाणः ॥२८॥

अनामिकापर्वाधिकप्रमान(ण)कनीनिकाङ्गुलयः ॥२९॥

अनतिबहुतनुमृदुस्निग्धसुबद्धमूलसमरोमाणः ॥३०॥

स्निग्धासंकुचितानुपहतसारच्छवयः ॥३१॥

शीतोष्णस्पर्शाव्यक्तच्छवीव वर्णाः ॥३२॥

स्थिरनिबिडानतिस्थूलान(6)तिकृशमांसाः ॥३३॥

जवापुष्पाभिताम्रस्वच्छस्निग्धमधुरचन्दनगन्धिरुधिराः ॥३४॥

मांसोपगूढस्थूलदृढसुशिरास्थिकाः ॥३५॥

नागग्रन्थ्यवस्थितनिर्गूढास्थिसन्धयः ॥३६॥

वज्रवदभेद्यशरीरत्वात्सुसंहननाः ३७॥

चारुसुविभक्ताङ्गप्रत्यङ्गाः ॥३८॥

अनुपूर्वोपचितसुपरिमृष्टसुकुमारादीन्न(प्त)स्वच्छश(7)रीराः ॥३९॥

निर्मशकतिलकालपिल्याः ॥४०॥

जरादौर्बल्यकृतापगतवलयः ॥४१॥

सिहशय्यानुष्ठाण(न)व्यपगतकायविक्षेपाः ॥४२॥

स्वेदमलानुपक्लिष्टशुचिसौम्यच्छायाः ॥४३॥

ज्वलनमनि(णि)महौषधिशशाङ्कसवितृसमतेजसः॥४४॥

महीधरवरगुरुत्वोपेताः ॥४५॥

ऋतुसुखकालिन्दिकसु(8)खसंस्पर्शाः ॥४६॥

मधुरमृदुसुरभिकुसुमचन्दनसमानरोमकूपगन्धाः ॥४७॥

अभिनवनीलोत्पलतुल्यसार्वकालिकमुखगन्धाः ॥४८॥

अद्भुतमृदुदीर्घस्निग्धपिण्डितव्यपगतशब्दनिश्वासाः ॥४९॥

अनशनकदन्नाशन(ना)तङ्कात्तु विपरिणामानुपरतधर्मदेशनाभिरप्यसञ्जितस्वरभेदाः ॥५०॥

नातिसं(9)कुचितविदारितरक्तास्याः ॥५१॥

शुचिसमाचाराः ॥५२॥

देशस्थोत्तप्तविस्पष्टपरिपूर्णव्यञ्जनाः ॥५३॥

समन्तप्रासादिकत्वादसेचनकदर्शणाः(नाः) ॥५४॥

अनतिह्रस्वानतिदीर्घवृत्तोपचितत्रिवलिविभूषितकम्बुग्रीवाः ॥५५॥

समप्रमान(ण)दृढावक्रह्रस्वविपुलचिबुकाः ॥५६॥

बिम्बफलताम्रनात्यायतसमस्नि[IV. A, 6. Fol. 100 b.]ग्ध(1)रुचिरौष्ठाः ॥५७॥

बन्धूकपुष्पोपमश्लक्ष्णदशनमांसाः ॥५८॥

शुचिस्निग्धस्पष्टरचनाक्षीणदन्ताः ॥५९॥

अनुपूर्ववृत्तस्निग्धतीक्ष्णसमसितदंष्ट्राः ॥६०॥

सप्रयोजनदक्षिणदन्तरश्मिप्रदर्शितमुहूर्तस्मिताः ॥६१॥

अपमलमृदुताम्रस्निग्धजिह्वाः ॥६२॥

नित्योष्णश्लक्ष्णमांसजालगजतालुसमवर्णतालवः ॥६३॥

घुरोच्चा(2)यतसंगततुङ्गनासाः ॥६४॥

अघनमृदुदृढमूलस्निग्धतनुनीलकुण्डलितस्मश्रुवः ॥६५॥

अनुन्नतातीक्ष्णमांसलमार्ष्टिपिण्डितगण्डाः ॥६६॥

आदर्शसमोपचिताश्लथरुचिरकपोलाः ६७॥

पीनायतसमानु(नो)पहतचारुकर्णाः ॥६८॥

ललाटकर्णगण्डसन्धिश्लेषाणि(नि)म्नपूर्णचन्द्राकृतिशङ्खाः ॥६९॥

विशालायतस्नि(3)ग्धमधुरप्रसन्नसमनेत्राः ॥७०॥

प्रहसिताञ्चिताग्रपक्ष्माणः ॥७१॥

सोम्यभ्राजिष्णुस्थिरविसन्धिदृष्टयः ॥७२॥

अपरिमितबलत्वादपगतोन्मेषनिमेषाः ॥७३॥

दीर्घासितश्लक्ष्णानुपूर्ववर्तितस्निग्धतनुभ्रुवः ॥७४॥

काञ्चनपट्टश्लक्ष्णार्धचन्द्राकृतिविपुलललाटाः ॥७५॥

परिपूर्णचन्द्रमण्डलसमवदनाः ॥७६॥

एकघनवज्र(4)संहतशिरस्कपालाः ॥७७॥

सुपरिपूर्णच्छत्राकृतिशिरसः ॥७८॥

श्लक्ष्णाचितासंलुडितपलितदोषापनतभ्रमराभस्निग्धमृदुसुबद्धमूलसुरभिस्वस्तिकनन्द्यावर्ताकृतिकेशरचणाः(नाः) ॥७९॥

ससुरासुरमनुजादिलोकानवलोकितमूर्धानः ॥८०॥

अथ तदाद्यं बोधिचित्तं[1] बोधिसत्त्वानां दार्ढ्येण कथमिव द्रष्टव्यम्? नैतल्लौकिकेन (5)वस्तुनोपपादयितुं शक्यम्। कस्मात्? यतः

---

[1] तत्रादौ गोत्रसामर्थ्यात् कृपाबीजप्रबोधतः।
प्रयोगाशयसम्पत्त्या बोधिचित्तपरिग्रहः॥ *Aaa*. p. 29.

बोधिचित्तमिति बोध्यर्थं चित्तं प्रणिधिप्रस्थानात्मकं चित्तम्।···अथवानुत्पादरूपबोधि-

[228] युगान्तवायुणा(ना) मेरुः वह्निणा(ना) वरुणालयः ।
वज्रेण ध्वस्यते वज्रमविकारि तु तन्मनः ॥

किं पर्यापन्नम्, कतरत्, कति प्रकारम्, किं पुरस्सरम्, कस्मिन्वा काले को वा तदुत्पादयति ? इत्येतदपदिश्यते—

[229] कामाप्तं षष्ठजं त्रेधा कृपाश्रद्धापरम्परम् ।
बुद्धोत्पादे नरः स्त्री वा तदाद्यं चित्तमश्नुते ॥[१]

तत्खलु बो(6)धिचित्तमाद्यं कामधातुपर्यापन्नमेव। षष्ठजं मनोधातुजमित्यर्थः। त्रिप्रकारमुपपत्तिलाभिकं श्रुतमयं चिन्तामयं[२] चेति। कृपापुरस्सरेण श्रद्धाबहुलेन च मनस्कारेण संप्रयुक्तम्। बुद्धोत्पाद एव नासति बुद्धशासने। मनुष्यो वा स्त्री वोत्पादयति नान्य इति।

तस्यास्य बोधिबीजस्थानीयस्य चित्तरत्नस्य सर्वधातुग(7)तिव्यापिबुद्धत्वमहावृक्षाङ्कुराभिवृद्धये भूमिजलसेकादिहेतुप्रत्ययस्थानीयान् प्रज्ञादिचतुरधिष्ठान[3]परिवारान्पारमिताद्यान्गुणान्वक्ष्यमान(ण)स्वरूपान्बोधिसत्त्वः क्रमेणाभ्यस्यति।

कथं पुनः क्रमेन(ण) दानादिपारमितानां परिपूरिर्भवति ? तत्र तावत्—

[230] सर्वेभ्यः सर्वदा सर्वं ददतो दानपूरणम् ।[४]

प्रथमे खल्वसंख्येये (8)वर्तमानो बोधिसत्त्वः न सर्वस्मै नापि सर्वं न सर्वदा ददाति। द्वितीये सर्वस्मै सर्वदा नतु सर्वम्। तृतीये सर्वं[५] सर्वस्मै सर्वदा च प्रयच्छति। इयता दानपारमिता परिपूर्णा भवति।

स्वभावं चित्तं बोधिचित्तम् । तदेव च योगिसंवृत्या आदर्शादिज्ञानसंबन्धेन कथञ्चिद् व्यावृत्त्या सर्वज्ञताचित्तमित्यादि चतुर्धा व्यपदिश्यते । सर्वमप्येतदसाधारणमगम्यं सर्वश्रावकप्रत्येकबुद्धानाम् । *Aaa*. p. 79.

[१] Cf. जम्बुद्वीपे पुमानेव संमुखं बुद्धचेतनः ।
चिन्तामयं कल्पशते शेष आक्षिपते हि तत् ॥ *Ak*. IV. 109.

Also cf. मनुस्सत्तं लिङ्गसम्पत्ति हेतु सत्थार-दस्सनं ।
पब्बज्जा गुणसम्पत्ति अधिकारो च छन्दता ॥
अट्ठधम्मसमोधाना अभिनीहारो समिज्झति । *Buddhavaṁsa*, II. 59—60.

[२] See *LVPAk*. IV. p. 223, n. 2.

[३] V. infra, *Ad. kārikā* 232.

[४] Cf. सर्वत्र सर्वं ददतः कारुण्याद्दानपूरणम् । *Ak*. IV. 111 ab.

[५] Cf. बोधिसत्त्वः सर्वदातेत्युच्यते । सर्वदानं न बहुधनं किन्तु दानचित्तम् ।···गवेषयन्ननुत्तरां बोधिं यद्ददाति तदुच्यते सर्वदानं । *Bodhichittotpāda-sūtra-śāstra*, p. 12.

मरणेऽपि दमात्यागः शीलस्योत्कृष्टिरुच्यते ।।[१]

यदा पुनः प्राणपरित्यागेनापि प्राणातिपातादिशिक्षापदं न क्षोभयति, इयता शीलपा(9)रमिता परिपूर्णा वेदितव्या । कौञ्चादिराजदुहिताभिक्षु[२]-दृष्टान्ताश्चात्रोदाहार्याः ।

[231] वीर्यस्य तिष्यसंस्तुत्या धियो वज्रोपमात्परम् ।[3]

भगवन्तं खलु तिष्यं सम्यक्संबुद्धं एकया गाथया[४] एकपादेन स्थित्वा सप्ताहमभिष्टुवतः शाक्यमुनेर्वीर्यपारमिता परिपूर्णा नव च कल्पाः प्रत्युदावर्तिताः ।

प्रज्ञापारमितायास्तु वज्रोपमात्समाधेरूर्ध्वं[५] [IV. B, 7. Fol. 101 a.](1) क्षयज्ञाने परिपूरिर्भवति ।

'सर्वासां तु क्षयज्ञाने[६] परिपूरिर्विधीयते ।।'[७]

---

[१] Cf. अङ्गच्छेदेऽप्यकोपात्तु रागिणः क्षान्तिशीलयोः । *Ak.* IV. 111 cd

Buddhaghosha speaks of a *pāramitā-śīla*:—तण्हावसेन पवत्तितं हीनं, अत्तनो विमोक्खत्थाय पवत्तितं मज्झिमं, **सब्बसत्तविमोक्खत्थाय पवत्तितं पारमितासीलं पणीतं** । *Vm.* I. 33.—**पारमितासीलं महाबोधिसत्तसीलं**—या करुणोपायकोसल्लपरिग्गहीता महाबोधिं आरब्भ पवत्ता परमुक्कंसगतसोचेय्यसल्लेखा देसकालसत्तादि विकप्परहिता सीलपारमिता । *VmT.* p. 29.

[२] This seems to be a reference to the *Kshānti-jātaka*, as it relates to the *kshānti-pāramitā* (included in the *śīla-pāramitā*—V. infra, p. 195). See *Jātakamālā*, 28; *Jātaka*, *(Khantivādi-jātaka)* 313; *Avadānakalpalatā*, 38.

[३] Cf. **तिष्यस्तोत्रेण वीर्यस्य धीसमाधेरनन्तरम्** । *Ak.* IV. 112 ad.

[४] Cf. **तिष्यं** तथागतरत्नगुहायां··· भगवान् बोधिसत्त्वभूत एकेन पादेन स्थित्वा सप्त दिवसान् स्तुतवानेकगाथया

"न दिवि भुवि वा नास्मिन् लोके न वैश्रवणालये ।
न मरुभवने दिव्ये स्थाने न दिक्षुविदिक्षु वा ।।
चरतु वसुधां स्फीतां कृत्स्नां सपर्वतकाननाम् ।
पुरुषवृषभस्त्वत्तुल्यो महाश्रमणः कुतः ।।" इति ।

Akb. IV. 112 ab. See *LVPAk.* IV. p. 230, n. 2.

[५] V. infra, *Ad. kārikā* 433-434.

[६] For *kshaya-jñāna*, v. infra, *Ad. kārikā* 441.

[७] Cf. **प्रज्ञापारमिता** सर्वाकारैर्निखिलधर्मपरिज्ञानम् । *Aaa.* p. 396

इत्यागमः ।

अत्र पुनः "क्षान्तिध्यानपारमिते शीलप्रज्ञापरिवारत्वान्नार्थान्तरम्" इति वैभाषिकाः । विनयधरवैभाषिकास्तु विनये चतस्रः[1] पारमिताः पठन्ति ।[2]

अत्र पुनः केचिद् बुद्धवचने (ब)हिष्कृतबुद्धयः प्राहुः—"न हि पिटकत्रये[3] भगवता बोधिसत्त्वमार्ग उपदिष्टः ।"[4] (2)त एवं व्याहर्तव्याः ।[5] भ्रान्ता ह्यत्र भवन्तः । यस्मात्

---

[1] For the ten *pāramitās*, see *The Bodhisattva Doctrine*, pp. 167-170 and *AMBRH*. pp. 11-13. *Dāna*, *śīla*, *kshānti* and *prajña* occupy important place : तत्रायं **व्यासनिर्देशो** यथाह—'मत्सरिणः सत्त्वान् **दाने**, दुःशीलान् **शीले**, व्यापादबहुलान् **क्षान्तौ** प्रापयितुकामेन **प्रज्ञापारमितायां** शिक्षितव्यम्' इति । *Aaa*. p. 227.

द्रव्यतः षट् पारमिताः । नामतस्तु दश भवन्ति । प्रज्ञापारमिताप्रभेदत्वाच्चतसृणां पारमितानाम् । *Aaa*. p. 227.

For the *krama* of the six *pāramitās*, see *Aaa*. p. 461.

[2] These two views are not mentioned in *Akb*.

[3] The *Abhidharma-samuchchaya* gives the following details about the three *piṭakas* in Hīnayāna and Mahāyāna :—एवं सूत्रादीनि द्वादशाङ्गान्यार्यशासनादि **त्रिषु पिटकेषु** संगृहीतानि भवन्ति । कतमानि त्रीणि ? **सूत्रपिटकं विनयपिटकमभिधर्मपिटकं च । पुनर्द्विविधानि । श्रावकपिटकं बोधिसत्त्वपिटकं** च । सूत्रं गेयं व्याकरणं गाथा उदानं चैतानि पञ्च **श्रावकाणां पिटकस्य सूत्रपिटके** संग्रहितानि भवन्ति । निदानमवदानमितिवृत्तकं जातकं चैतानि चत्वारि द्वयोः पिटकयोः **सपरिवारे विनयपिटके** संगृहीतानि भवन्ति । निदानमवदानमितिवृत्तकं जातकं चैतानि चत्वारि द्वयोः पिटकयोः **सपरिवारे विनयपिटके** संगृहीतानि भवन्ति । वैपुल्यमद्भुतधर्माश्च एते द्वे **बोधिसत्त्वपिटकस्य सूत्रपिटके** संगृहीते भवतः । उपदेश एकः श्रावकबोधिसत्त्वपिटकयोः **अभिधर्मपिटके** संगृहीतो भवति । *Asm*. p. 79. Cf. *Dhs A*. I. 45-69. *Vaipulya* is also called *pāramitā-piṭaka* : केन कारणेन वैपुल्यं बोधिसत्त्वानां पारमितापिटकमित्युच्यते ? पारमितानां संख्यानिर्देशतामुपादाय लक्षण…क्रमनिरुक्ति-भावना-प्रभेद-संग्रह-विपक्ष-गुणवर्णननिर्देशतामुपादाय अन्योऽन्यविनिश्चयतां चोपादाय । *Asm*. p. 83.

[4] This criticism is from the Mahāyānists as is evident from the following :—**ननु श्रावकयानेऽपि बोधिसत्त्वधर्मा दानादयो निर्दिष्टा एव** इत्याशङ्क्याह—तत्कस्य हेतोरिति । इहैव हीत्याद्युत्तरम् ।…यत्रेति येषु बोधिसत्त्वधर्मेषु । एवं मन्यते । **श्रावकादिधर्मास्तत् पिटके विस्तरेणाभिहिता बोधिसत्त्वधर्मास्तु प्रसङ्गात्** । इह पुनर्बोधिसत्त्वधर्मा एव विस्तरेण निर्दिष्टाः श्रावकधर्माः प्रसङ्गादिति । *Aaa*. .p. 49.

Also cf. **ननु श्रावकयानेऽपि तथागतत्वप्रापककरुणादिधर्मनिर्देशात्** कथं तेन सर्वाकारज्ञता पर्येषणीयेति ?… सर्वाकारानिर्देशान्निर्दिष्टोऽप्यविशिष्ट इत्यर्थः । *Ibid*. p. 319,

[5] This controversy is not found in *Akh*.

[232] त्रिपुण्यकृतिवस्त्वाद्यास्तल्लाभोपायदेशनाः [1]।
तथा चतुरधिष्ठानं[2] सप्तसद्धर्मशासनम् ॥[3]

[233] सप्तयोगा[4]स्त्रयःस्कन्धा[5]स्त्रिशिक्षाद्याश्च[6] देशिताः ।
तथा पारमिताश्चापि चतस्रो[7] विनयोदिताः ॥

[234] बोधिपक्ष्याश्च कण्ठोक्ताः सप्तत्रिंशत्स्वयंभुवा ।[8]

---

[1] Cf. तीनि **पुञ्ञकिरियवत्थूनि**। दानमयं…सीलमयं…भावनामयं पुञ्ञकिरियवत्थु। *Dīgha*, xxxiii, 1,10. V.infra, *Adv. kārikā* 253, 255, 256. See *S. Puṇḍarīka*, p. 228.

[2] Cf. चत्तारि **अधिट्ठानानि**। पञ्ञा अधिट्ठानं, सच्चाधिट्ठानं, चागाधिट्ठानं, उपसमाधिट्ठानं। *Dīgha*, xxxiii, 1.10. See *S. Puṇḍarīka*, p. 180.

[3] Cf. सत्तिमे भिक्खवे **सद्धम्मा**। कतमे सत्त? सद्धो होति, हिरिमा होति, बहुस्सुतो होति, आरद्धविरियो होति, सतिमा होति, पञ्ञवा होति। इमे खो भिक्खवे सत्त सद्धम्मा ति। *Aṅg.* iv. p. 145. See *Vm.* vii. 31, *Vm T.* p. 192.

[4] The seven *yogas* are not mentioned in any Abhidharma-work. The four *yogas*, viz., *kāma-bhava-dṛishṭi-avidyā* (V. infra, *Adv. karikā* 361) are not meant here. The seven *yogas* probably refer to the seven *saṁjñās*, which are repeatedly recommended for practice:—

इमे सत्त धम्मा भावेतब्बा। कतमे सत्त? असुभसञ्ञा, मरणसञ्ञा, आहारे पटिक्कूलसञ्ञा, सब्बलोके अनभिरतिसञ्ञा, अनिच्चसञ्ञा, अनिच्चे दुक्खसञ्ञा, दुक्खे अनत्तसञ्ञा। रागस्स भिक्खवे…परिञ्ञाय परिक्खयाय पहानाय खयाय वयाय विरागाय निरोधाय चागाय पटिनिस्सग्गाय इमे सत्त धम्मा भावेतब्बा। *Aṅg.* iv. p. 148. Also see **सत्त निद्दसवत्थूनि**। *Aṅg.* iv. p. 15.

[5] *Śīla*, *samādhi* and *prajñā-skandhas*.

[6] Cf. तिस्सो सिक्खा। अधिसीलसिक्खा, अधिचित्तसिक्खा, अधिपञ्ञासिक्खा। *Dīgha*, xxxiii. 1. 10. V. infra, *Ad. kārikā* 434.

[7] *Dāna-śīla-vīrya* and *prajñā*. V. supra, p. 195, n. 1.

[8] V. infra, *Ad. kārikās* 440-458.

The *Bodhipākshika-dharmas* constitute the basic teachings of all Buddhas: देसेन्ता च भन्ते नागसेन **सब्बे पि तथागता सत्ततिंस बोधिपक्खियधम्मे** देसेन्ति,… *Milinda*, p. 232.

These are essential in the career of a *Bodhisattva*: तौ च द्वौ दारकौ…**बोधिसत्त्वचर्यायां** चाभियुक्तावभूताम्। तद्यथा दान…शील…वीर्य…ध्यान…प्रज्ञा…उपायकौशल्यपारमितायां मैत्र्यां करुणायां मुदितायामुपेक्षायां यावत् **सप्तत्रिंशत्सु बोधिपक्षिकेषु धर्मेषु**। *S. Puṇḍarīka*, p. 299. Also cf. भावनं अनुयुत्तस्स भिक्खवे…नेव चित्तं विमुच्चति।

हेतवः सर्वबोधिनां त्रिविधा मृदुतादिभिः ॥[१]
[235] तस्मान्न (3)बोधिमार्गोऽन्यः सूत्रादिपिटकत्रयात् ।
अतोऽन्यमिह यो ब्रूयात्स भवेन्मारभाषितः ॥[२]

उक्तं हि भगवता—"यद्भिक्षवः सूत्रे ण(ना)वतरति, विनये ण(न) दृश्यते, धर्मतां च विलोमयति नेदं शास्तुः शासनम्"[३] इति कृष्णापदेशः । शुक्लापदेशो विपर्ययेण । यत्खलु सूत्रं भगवता बुद्धेन भाषितं तच्चतुर्ष्वागमेषु[४] स्थविरमहाकाश्यपस्थवि(4)राण(न)न्दादिभिः संगीतिकर्तृभि[५]रुद्दानगाथाभिर्निबद्धं[६] तदेव ग्राह्यम् ।[७] गतमेतत् ।

तं किस्स हेतु ? अभावितत्ता ति'स्स वचनीयं । किस्स अभावितत्ता ? चतुन्नं सतिपट्ठानानं चतुन्नं सम्मप्पधानानं चतुन्नं इद्धिपादानं पञ्चन्नं इन्द्रियानं पञ्चन्नं बलानं सत्तन्नं बोज्झङ्गानं अरियस्स अट्ठङ्गिकस्स मग्गस्स । *Aṅg.* IV. p. 125.

For details, see infra, *Adv. kārikā* 440, notes.

[१] *Mṛidu-madhya-adhimātra*. V. infra, *Adv. kārikā* 441.

[२] For *māra-bhāshitā*, see *Aaa.* p. 410; *S. Puṇḍarīka*, p. 49; *Māra-saṁyutta*, *S.* I. pp. 103 ff.

[३] V. supra, p. 100 ; n. 1.

[४] *Dīrghāgama*, *Madhyamāgama*, *Saṁyuktāgama* and *Ekottarāgama*.

[५] It is interesting to note that only the First Council is referred to here, instead of the traditional three or four Councils.

[६] *Uddāna* means summary, brief statement, especially of the contents of a longer literary work or passage. In Pāli *nikāyas*, at the end of a chapter are given verses summarizing the contents of the chapter. (e. g., सेखबलवग्गो पठमो । तस्स उद्दानं···*Aṅg.* III. p. 9.) *Uddāna-gāthā* would therefore mean a collection of such *gāthās*. See *BHSD*. p. 130.

[७] The controversies regarding the authenticity of Buddhist scriptures date back as early as the First Buddhist Council. The four *Mahāpadesas* or Authorities mentioned in the *Mahāparinibbāna sutta* (V. supra, p. 100, n. 1.) point to the existence of various versions of the *Buddhavachana*. The *nidānakathā* of *Aṭṭhasālinī* contains a long debate on the authenticity of the *Abhidharma-sūtra* :···'अभिधम्मसुत्तं न वट्टती' ति ? 'अभिधम्मो केन भासितो ति ? 'न एसो बुद्धभासितो' ति । *DhsA.* I. 70. Buddhaghosha refers to the *Vedalla-piṭaka* i.e., the Mahāyāna-scriptures, (V. supra, p. 100, n. 3.) and declares them to be unauthentic. For the claims of authenticity made by the Mahāyānists for their scriptures, see the following :—

मोहपुरुषा इति । स्वकेऽवतारात् स्वस्यैव विनयदर्शनादपि । औदार्यादपि । गम्भीर्यादविरुद्धैव धर्मतेति वचनात् । यत्सूत्रेऽवतरति विनये च सन्दृश्यते । धर्मताञ्चानुलोम-

इदमिदानीं वक्तव्यम्। कतमेषां कल्पाणा(ना)मसंख्येयत्रयेण बुद्धत्वं प्राप्यते ?

यतीति बुद्धभाषितलक्षणावगमेन सूत्रादिसङगृहीताया मातुः स्वभावानवधारणान्मूढः। स्यादेतन्निकायग्रन्थे परिमितपरिमाणसूत्रेष्वनवतारात्तथापरिच्छिन्नप्रमाणविनयपिटकेऽसंदर्शनात्तथाव्यवस्थापितपुद्गलनैरात्म्यादिधर्मताविलोमनेनाबुद्धवचनमहायानप्रतिक्षेपादमोह इति। एवं च सति मुक्तकसूत्राण्यपि सूत्रान्तपिटकेष्वपठितत्वादबुद्धवचनान्यभ्युपेयानि स्युस्तथैकैकस्मिन् सूत्रान्तपिटकेऽन्यानि सूत्रान्तपिटकानि न सर्वप्रकारमवतरन्ति। तथैकैकस्मिन् विनयेऽन्ये विनया न सर्वप्रकारं संदृश्यन्ते। तथैकैकस्मिन् निकाये या धर्मता व्यवस्थापिता न साऽन्येषु निकायेषु धर्मतां सर्वप्रकारमनुलोमयतीत्येवमष्टादशभेदभिन्नानि सूत्रविनयाभिधर्मपिटकानि परस्परं ग्रन्थार्थव्यतिभिन्नानि कथं बुद्धवचनानि सिद्धचन्तीत्यव्यापकमेतत् बुद्धवचनलक्षणमभ्युपगच्छन्तीति मूढा एव। *Aaa.* pp. 260—1.

Also cf. यद्यप्युभयसिद्धत्वमसिद्धम्। इदं तर्हि साधनमस्तु यद्गुरुशिष्यपरंपरयाम्नायायातं बुद्धवचनत्वेन। यच्च सूत्रेऽवतरति। विनये संदृश्यते। धर्मतां च न विलोमयति। तद्बुद्धवचनं नान्यदित्यत्राह—

यत्प्रत्यया च तत्रास्था महायानेऽपि तां कुरु।
महायानेऽप्युक्तस्यास्थाकारणस्य विद्यमानत्वात्।

इदं पुनः सर्वप्रवचनसाधारणमव्यभिचारि लक्षणं यदुक्तमध्याशयसंचोदनसूत्रे। अपि तु मैत्रेय चतुर्भिः कारणैः प्रतिभानं सर्वबुद्धभाषितं वेदितव्यम्। कतमैश्चतुर्भिः। इह मैत्रेय प्रतिभानमर्थोपसंहितं भवति नानर्थोपसंहितम्। धर्मोपसंहितं भवति नाधर्मोपसंहितम्। क्लेशप्रहायकं भवति न क्लेशविवर्धकम्। निर्वाणगुणानुशंससंदर्शकं भवति न संसारगुणानुशंससंदर्शकम्।···यत्किंचिन्मैत्रेय सुभाषितं सर्वं तद्बुद्धभाषितम्। तत्र य इमानि प्रतिभानानि प्रतिक्षिपेत्। नैतानि बुद्धभाषितानीति तेषु चागौरवमुत्पादयेत्। पुद्गलविद्वेषेण तेन सर्वं बुद्धभाषितं प्रतिभानं प्रतिक्षिप्तं भवति।···(see *Śikshā*, p. 15.)···एतन्महायाने सर्वमस्तीति कथमुपादेयं न स्यात्।

···अथापि स्यात्। मदागमे बुद्धवचनत्वेऽविवादो न तु महायाने।···

सविवादं महायानमिति चेदागमं त्यज।
तीर्थिकैः सविवादत्वात्स्वैः परैश्चागमान्तरम्॥

···चतुर्निकायमष्टादशभेदभिन्नं भगवतः शासनम्। तत्रैकस्यैव निकायस्यानेकभेदसंभवात्।···एकभेदव्यवस्थितैः सौत्रान्तिकाभिधार्मिकवैनयिकैः परस्परं सविवादत्वात्सूत्राभिधर्मविनयाः परित्यागमर्हन्ति। अस्ति ह्येकभेदव्यवस्थितानां सौत्रान्तिकादीनामन्योन्यं विवादः।···एतेन यदुक्तं गुरुपर्वोपक्रमेणाम्नायायातं बुद्धवचनमित्यादि। तदनेनैव प्रत्याख्यातं द्रष्टव्यम्। न ह्यविस्मृतसंप्रदायानामन्योन्यस्य विवादो युक्तः। न च सर्वज्ञवचनेषु परस्पराहतिरस्ति। न च सूत्राभिधर्मविनयानां परस्परमेकवाक्यता भवतः संभवति। तत्कथं सूत्रादिसंस्यदनं बुद्धवचनत्वे हेतुरुक्तम्? तस्माद्यत्किंचिदेतत्। *B. Pañjikā*, IX. 43-44. See *Śikshā*, pp. 95-96.

[236] कल्पानां महतामेतदसंख्येयत्रयं मतम् ।

कल्पाणां(नां) यदि संख्या न विद्यते कथं तर्हि त्रयमिति निर्धार्यते ?[१] न खलु संख्या न विद्यते । किं तर्हि ?

स्थानान्तरमसंख्याख्यमदःसंख्योपरि स्थितम् ॥

(5)स्थानान्तरविशेषस्य[२] खल्वेतन्नाम(मा)संख्येयमिति । न तु न संख्या विद्यत इत्येतद्विवक्षितम् ।

अथायं शाक्यमुनिर्भगवान्सम्यक्संबुद्धो बोधिसत्त्वचर्यायामेषु त्रिष्वसंख्येयेषु[३] कियतो बुद्धानां पर्युपासां चक्रे ? तदत्र वर्णयन्ति । प्रथमेऽसंख्येये पञ्चसप्ततिसहस्राणि । द्वितीये षट्सप्ततिम् । तृतीये सप्तसप्ततिम् ।

The *Nettipakaraṇa* points out that the *Sutta* means four *Ārya-satyas* :— कतमस्मिं **सुत्ते** ओतारेतब्बानि ? **चतूसु अरियसच्चेसु** । कतमस्मिं **विनये** सन्दस्सयितब्बानि ? **रागविनये दोसविनये मोहविनये** । कतमियं **धम्मतायं** उपनिक्खिपितब्बानि ? **पटिच्चसमुप्पादे** । यदि चतुसु अरियसच्चेसु अवतरति किलेसविनये सन्दिस्सति धम्मतञ्च न विलोमेति, एवमासवे न जनेति । *Netti*, p. 22.—तत्थ यस्मा भगवतो वचनं एकगाथामत्तम्पि सच्चविमुत्तं नत्थि, तस्मा **सुत्तेति** पदस्स अत्थं दस्सेतुं **चतूसु अरियसच्चेसू** ति वुत्तं । **अट्ठकथायं पन तीणि पिटकानि सुत्तं ति वुत्तं । तं इमिना नेत्तिवचनेन अञ्ञादत्थु संसन्दति चेव समेति च** । *Netti A.* p. 219.

[१] This topic is discussed by the Kośakāra in the III *Kośasthāna* : बुद्धत्वम् । असंख्येयानां कल्पानां त्रयेण । कथमसंख्येयस्यासति संख्येयावसाने पुनस्त्रित्वमुच्यते ? नैतदेवं वेदितव्यम् । किं तर्हि ? षष्ठिः स्थानान्तराण्यसंख्येयमिति **मुक्तकसूत्रं** पठ्यते । कतमानि षष्ठिः ?···*Akb.* III. 94 a.

[२] The Kośakāra enumerates the sixty *sthānāntaras*. For *asaṅkhyeyas*, see *Vm*. XIII. 55, 57, 63 and *A Manual of Buddhist Philosophy*, Vol. I. pp. 39-41. For *kalpas*, see *Ibid*. pp. 46—48. V. supra, p. 100, n. 1. LVP. deals with the *kalpa*, *asaṅkhyeyas* and *sthānāntaras* in great detail. See *LVPAk*. III. pp. 187—194.

[३] The Pāli traditon is different :—

कप्पे च सतसहस्से चतुरो च असंखेय्ये ।
एत्थन्तरे यं चरितं सब्बं तं बोधिपाचनं ॥ *Chariyā-piṭaka*, I. 1. 1.

Cf. तथागतेन चतूहि च असंखेय्येहि कप्पेहि कप्पानं सतसहस्सेन च एत्थन्तरे सब्बञ्ञुतञ्ञाणं परिपाचितं । *Milinda*, p. 227.

The *Aaa*. gives a different view :—

कस्य पुनः कल्पासंख्येय(6)स्यावसाने कतमो बुद्धो बभूव ?[1] अत्रापि वर्णयन्ति। रत्नशिखिनि[2] सम्यक्संबुद्धे प्रथमोऽसंख्येयः समाप्तः। भगवति दीपङ्करे[3] द्वितीयः। भगवति विपश्यिनि[4] तृतीयः समाप्तः।

कस्मिन्पुनः सम्यक्संबुद्धे बुद्धत्वे प्रथमं चित्तमुत्पादितम्? शाक्यमुनौ[5]। शाक्यमुनिर्नाम प्रथमस्यासंख्येयस्यादौ बभूव यत्र भगवता भार्गवभूतेन (6)सुखोदकेनाङ्गपरिचर्याभिरुपस्थानं[6] कृत्वा प्रथमं बोधिचित्तमुत्पादितमहमप्येवं प्रकारो भूयासमिति[7]।

तथा हि **प्रथमेन कल्पासंख्येयेन** सम्भारभूमिमारभ्य यावत्प्रथमा भूमिर्निष्पाद्यते **द्वितीयेन** तु विमलाभूमिमुपादाय यावत्सप्तमी भूमिः, **तृतीयेन पुनः कल्पासंख्येये**नाचलाभूमिमारभ्य यावद्बुद्धभूमिरित्येवं **त्रिभिः कल्पासंख्येयैर्बुद्धत्व**मधिगम्यत इति···। त्रिकसामान्यात् त्रिभिः कल्पासंख्येयैरित्युक्तं न पुनः परमार्थत इत्येवं नेयार्थसूत्रव्याख्याने नितरामेव विरोधः। तथा हि सम्भारभूमिमापूरयन्नेकं कल्पासंख्येयमतिक्रामति, तदनन्तरमधिमुक्तिचर्याभूमिं निष्पादयन् कल्पासंख्येयद्वयमतिनामयति। तदनु प्रमुदिताभूमिमुपादाय यावद्धर्ममेघां बोधिसत्त्वभूमिं प्रत्येकं त्रिभिस्त्रिभिः कल्पासंख्येयैर्बोधिसत्त्वो निष्पाद्य समन्तप्रभां बुद्धभूमिमासादयतीत्येवं **त्रयस्त्रिंशता कल्पासंख्येयैर्बुद्धत्वं प्राप्यत** इत्याचार्यवसुबन्धुपादाः। *Aaa*. pp. 558-9.

[1] Cf. **असंख्येयत्रयान्त्यजाः।**

विपश्यी दीपकृद्रत्नशिखी शाक्यमुनिः पुरा। *Ak*. IV. 110. bcd.

[2] See *BHSD*. p. 452.

[3] See *BHSD*. p. 265.

[4] See *BHSD*. p. 491.

[5] See *Mahāvastu*, I. 47 and *BHSD*. p. 525. According to the Pāli tradition, however, it was under Dīpaṅkara Buddha, that Gautama (the Bodhisattva) made the *Praṇidhāna*. See *Buddhavamso*, chapter II.

[6] Cf. यत्र भगवता···**प्रभास नाम्ना कुम्भकार**कुमारभूतेनासुखोदकाभ्यङ्गपरिचर्याभिरुपस्थानं कृत्वाद्यं प्रणिधानं कृतम्। *Sakv*. p. 432. *Bhārgava* means a potter. See *BHSD*. p. 408. See Pāli *Bhaggava*, *DPPN*. II. p. 344.

The *Śikshā*. quotes similar instances:—यथोक्तं **भद्रकल्पिकसूत्रे।** घोषदत्तो नाम तथागतो यत्र नक्षत्रराजेन प्रथमं बोधिचित्तमुत्पादितं ताम्बूलपत्रं दत्वा गोपालकभूतेन। *Śikshā*, pp. 8--9.

[7] **बोधिचित्तमिति** बोध्यर्थं चित्तं प्रणिधिप्रष्ठानात्मकं चित्तमिति। *Aaa*. p. 78. See *Bodhichittotpāda-sūtra-śāstram*, pp. 5--7. and *The Bodhisattva Doctrine*, pp. 58-64.

उत्पादितचित्तो बोधिसत्त्वः···दृढमादावुत्पादयति **सम्यक्प्रणिधानं** संग्रहीतुं सर्वानप्रमेयान्सत्वान्। गवेषयाम्यहमनुत्तरां बोधिं···तस्माच्चित्तोत्पादादारभ्य महाकरुणायाः करुणाचित्तेनोत्पादयति **दशोत्तराणि सम्यक्प्रणिधानानि।** *Badhichittotpāda-sūtraśāstra*, p. 8. For ten *mahāpraṇidhānas*, see *Śikshā*, p. 295.

प्रभासेतुराजनि[1] तदेव पुनर्द्रढिमानमापादितमिति ॥

कस्मिन्पुनः काले बुद्धा भगवन्तो बुद्धादित्याः प्रादुर्भवन्ति ? तदारभ्यते—

[237] अपकर्षे जिनोत्पत्तिर्यावच्छतसमायुषः ।
द्वयोः प्रत्येकबुद्धानामुत्कर्षे चक्रवर्ति(8)णा(ना)म् ॥[2]

कल्पापकर्षे खलु बुद्धानामुत्पत्तिर्भवति । उत्कर्षे चापकर्षे च प्रत्येकजिनानाम् । उत्कर्ष एव चक्रवर्तिणा(ना)म् ॥

चक्रवर्तिणां(नां) पुनरयं णि(नि)यम :—

[238] नाधोऽशीतिसहस्रासौ(यो)स्तत्समुत्पत्तिरिष्यते ।

अशीतिवर्षसहस्रायुर्भ्यश्चक्रवर्तिणा(ना)मूर्ध्वमुत्पत्तिर्भवति नाध इति ।

ते हेमरूप्यताम्रायश्चक्राः पुण्यप्रभावतः ॥

---

[1] See *BHSD*. p. 382.

For an allied controversy on 'Bodhisat's entering the Path of Assurance', see *Kv*.—

न वत्तब्बं "बोधिसत्तो कस्सपस्स भगवतो पावचने चरित ब्रह्मचरियो"ति ?

आमन्ता ।

ननु वुत्तं भगवता —'कस्सपे अहं आनन्द भगवति ब्रह्मचरियं अचरिं आयतिं संबोधाया ति ? *Kv*. IV. 8—इदानि **नियामोक्कन्तिकथा** नाम होति । तत्थ येसं **घटीकारसुत्ते** [Cf. *M. sutta* 81.] जोतिपालस्स पब्बज्जं सन्धाय बोधिसत्तो कस्सपभगवतो पावचने ओक्कन्तनियामो चरितब्रह्मचरियो ति लद्धि, सेय्यथा पि एतरहि **अन्धकानं** ।…ततो यस्मा नियामो ति वा ब्रह्मचरियं ति वा अरियमग्गस्स नामं, **बोधिसत्तानञ्च ठपेत्वा पारमीञाणं अञ्ञा नियामोक्कन्ति नत्थि, यदि भवेय्य बोधिसत्तो सोतापन्नो सावको भवेय्य, न चेवमेतं, केवलं हि बुद्धा अत्तनो ञाणबले ठत्वा अयं बुद्धो भविस्सती ति व्याकरोन्ति**…*Kv A*. IV 8. See *Points of Controversy*, pp. 167-170.

[2] Cf. **बुद्धत्वमपकर्षे हि शताद्यावत्तदुद्भवः ।**
द्वयोः प्रत्येकबुद्धानां खड्गः कल्पशतान्वयः ॥ *Ak*. III. 94.

[3] Cf. **चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात् ।**
सुवर्णरूप्यताम्रायश्चक्रिणस्तेऽधरक्रमात् ॥ *Ak*. III. 95.

After this, the Kośakāra discusses two more points : किमत्र त्रिसाहस्रमहासाहस्रो लोकधातुर्लोक इष्ट उताहो सर्वलोकधातव इति ? and चक्रवर्तिनः पृथिवीं कथं जयन्ति ? *Akb*. III. 96-98. These points are not discussed in *Adv*. It is possible that these topics were discussed in the Third *Adhyāya* of *Adv*., which is lost. V. supra, p. 115, n. 1.

(९)चतुर्विधाः खलु चक्रवर्तिणः(नः)—सौवर्णचक्राः, रूप्यचक्राः, ताम्रचक्राः, लोहितचक्राश्च स्वपुण्यप्रकर्षादिति । यथाक्रमं चैते चतुस्त्रिद्व्येकद्वीपेश्वराः ॥

अथ यदुक्तम्—'तस्मान्न बोधिमार्गोऽन्यः सूत्रादिपिटकत्रयात् ।'[१] इति । यदि तर्हि मार्गभेदो नास्ति[२] बुद्धप्रत्येकबुद्धश्रावकाणां(नां) फलभेदेनापि तर्हि न भवितव्यम् ।[३] नैष दोषः । [IV. A. 7. Fol. 101 b.] (1)यस्मात्—

---

[१] V. supra, *Ad. kārikā* 235 ab.

[२] On *mārga-bheda*, see *Aaa*. p. 138.

[३] The Pāli as well as Buddhist Sanskrit works contain many passages which explain the concepts of *Buddha*, *Pratyekabuddha* and *Śrāvaka* :—

(a) कतमो च पुग्गलो **सम्मासंबुद्धो** ? इधेकच्चो पुग्गलो पुब्बे अननुस्सुतेसु धम्मेसु सामं सच्चानि अभिसम्बुज्झति, तत्थ च सब्बञ्ञुतं पापुणाति, फलेसु च वसीभावं, अयं वुच्चति पुग्गलो सम्मासंबुद्धो । *P. Paññatti*, I. 28.

—'पुब्बे अननुस्सुतेसू'ति **पच्छिमभवे सच्चपटिवेधतो पुब्बे** अञ्ञस्स कस्सचि सन्तिके अस्सुतपुब्बेसु । ततो पुरिमपुरिमेसु पन भवेसु सब्बञ्ञुबोधिसत्ता बुद्धसासने पब्बजित्वा तीणि पिटकानि उग्गहेत्वा गतपच्चागतवत्तं आरुह्य कम्मट्ठानं अनुलोमं गोत्रभुं आहच्च ठपेन्ति, **तस्मा पच्छिमभवस्मिं येव अनाचरियभावं सन्धायेतं वुत्तं** । तदा हि तथागतो पूरितपारमितत्ता···सामं अननुस्सुतेसु संखतासंखतधम्मेसु···चत्तारि सच्चानि अभिसंबुज्झति । तत्थ चा ति तस्मिञ्च **चतुसच्चसंबोधिसंखाते अरहत्तमग्गे सब्बञ्ञुतं पापुणाति** । *P. Paññatti*, *A*. I. 28.

(b) कतमो च पुग्गलो पच्चेकसंबुद्धो ? इधेकच्चो पुग्गलो पुब्बे अननुस्सुतेसु धम्मेसु **सामं सच्चानि अभिसम्बुज्झति, न च तत्थ सब्बञ्ञुतं पापुणाति, न च फलेसु वसीभावं,** अयं···**पच्चेकसंबुद्धो** । *P. Paññatti*, I. 29.

Cf. विनोपदेशेनात्मानमेकं प्रतिबुद्धा इति प्रत्येकबुद्धाः । ते ह्येकमात्मानं दमयन्ति नान्यान् । किं पुनरत्र कारणम् ? नहि तावदशक्ता धर्मं देशयितुं प्रतिसंवित् प्राप्तत्वात् ।··· पूर्वाभ्यासवशेनाल्पोत्सुकताधिमुक्तत्वान्नोत्सहन्ते···। *Akb*. III. 74 d.

Cf. also, श्रावकपिटकमेवावलम्ब्य स्वमार्गसंमुखीकरणादबुद्धोत्पदे प्रत्येकबुद्धः । *Aaa*. p. 43.

The *pratyeka-buddha* is also known as *khaḍga*. The *Khaggvisāṇa-sutta* of the *Sutta-nipāta* and the *Khaḍga-vishāṇa gāthā* of the *Mahāvastu* (I. 357.) point to the solitary habits of the *Pratyeka-buddhas*. Yaśomitra says that according to some Ābhidhārmikas, the *khaḍga* and *pratyek-buddha* are not identical :—**येषामाभिधार्मिकाणां मतेन खड्गादन्योऽपि प्रत्येकबुद्धोऽस्ति** । उत्पादितनिर्वेधभागीयमात्रोऽपि वर्गचारी प्रत्येकबुद्ध इत्यभिप्रायः । *Sakv*. p. 540.

The *Śrāvaka* is only an *Arhat*. The Kośakāra speaks of six kinds of

[239] तुल्येऽपि साधनोपाये तद्भेदोऽक्षादिभेदतः ।
भवमोक्षार्थिनोर्मात्रोः प्रदानफलभेदवत् ॥

यावत्खलु कश्चिद्गुणः सम्यक्संबोधिमभिसंबुध्य भगवता देशितो विनिर्मुक्त(क्ति)द्वयप्राप्तिहेतुभूतः सर्वोऽसौ पिटकत्रयानुवर्तीः(र्ती)[१]। तत्पुन-

---

Arhats : **सूत्र उक्तं षडर्हन्तः**—परिहाणधर्मा चेतनाधर्मा अनुरक्षणाधर्मा स्थिताकम्प्यः प्रतिवेधनाभव्योऽकोप्यधर्मा चेति । *A.kb.* vi. 56 ab. See *P. Paññatti*, *(mātikā-ekakam)*.

These three concepts, (the *śrāvaka*, *pratyeka-buddha* and *buddha*) lead to the concept of three *yānas*. The *S. Puṇḍarīka* gives in brief the essential differences of these three as below :—

तत्र केचित् परघोषश्रवानुगमनमाकाङ्क्षमाणा आत्मपरिनिर्वाणहेतोश्चतुरार्यसत्यानुबोधाय तथागतशासनेऽभियुज्यन्ते । त उच्यन्ते **श्रावकयान**माकाङ्क्षमाणाः ।

अन्ये सत्त्वा अनाचार्यकं ज्ञानं दमशमथमाकाङ्क्षमाणा आत्मपरिनिर्वाणहेतोर्हेतुप्रत्ययानुबोधाय तथागतशासनेऽभियुज्यन्ते । त उच्यन्ते **प्रत्येकबुद्धयान**माकाङ्क्षमाणाः ।···

अपरे पुनः सत्त्वाः सर्वज्ञज्ञानं बुद्धज्ञानं स्वयम्भुज्ञानमनाचार्यकं ज्ञानमाकाङ्क्षमाणा बहुजनहिताय···सर्वसत्त्वपरिनिर्वाणहेतोस्तथागतज्ञानबलवैशारद्यानुबोधाय तथागतशासनेऽभियुज्यन्ते । त उच्यन्ते **महायान**माकाङ्क्षमाणाः ।···*S. Puṇḍarīka*, p. 60.

Also cf. **श्रावकयानिकः** पुद्गलः कतमः ? यः समापन्नो वा असमापन्नो वा श्रावकधर्मताविहारी प्रकृत्या **मृद्विन्द्रियः स्वविमुक्तये प्रणिहितः** वैराग्यभावनया विमुक्ताशयः **श्रावकपिटक**मेवावलम्ब्य वीर्यभावनया धर्मानुधर्मचारी **दुःखस्यान्तमनुप्राप्नोति** ।

प्रत्येकबुद्धयानिकः पुद्गलः कतमः ? यः समापन्नो वा असमापन्नो वा प्रत्येकबुद्धधर्मताविहारी प्रकृत्या **मध्येन्द्रियः स्वविमुक्तये प्रणिहितः** वैराग्यभावनया विमुक्ताशयः **केवलभावनया चाधिगतबोध्याशयः श्रावकपिटकमवलम्ब्य**···खड्गविषाणकल्पः एकविहारी प्रत्येकजिनः वर्गचारी **दुःखस्यान्तमनुप्राप्नोति** ।

महायानिकः पुद्गलः कतमः ? यः समापन्नो वा असमापन्नो वा बोधिसत्त्वधर्मताविहारी प्रकृत्या **तीक्ष्णेन्द्रियः सर्वसत्त्वविमोक्षाय** प्राणिहितः **अप्रतिष्ठितनिर्वाणाशयः बोधिसत्त्वपिटक**मवलम्ब्य वीर्यभावनया धर्मानुधर्मचारी **सत्त्वान् परिपाचयति शुद्धां बुद्धभूमिं भावयति व्याकरणं च प्रतिलभते सम्यक्संबोधिं च साक्षात्करोति** । *Asm.* p. 87.

On the origin and development of the three *yānas*, see *AMBRH*. pp. 80-84.

[१] A similar claim is made by the Mahāyänists :—···**अत्र प्रज्ञापारमितायां सर्वाणि त्रीणि यानानि विस्तरेणोपदिष्टानि ।** तानि पुनरनिमित्तयोगेनानुपलम्भयोगेनासंक्लेशयोगेनाव्यवदानयोगेन । यावत्तत् पुनर्लोकव्यवहारेणापरमार्थयोगेनेति विस्तरः । उक्तं च

बुद्धः प्रत्येकबुद्धैश्च श्रावकैश्च निषेविता ।
मार्गस्त्वमेका मोक्षस्य नास्त्यन्य इति निश्चयः ॥ *B. Pañjikā*, ix. 41 cd.

विमुक्तिद्वयं[1] त्रिभिः पुद्गलैः प्राप्यते । भगवता सम्यक्संबुद्धेन प्रत्येकजिनेनार्य(2)श्रावकेण च । तेषां पुण(न)स्तुल्ये बोधिवर्त्मनि[2] पतितानामिन्द्रियप्रणिधानावरणभेदाद्भेदः ।[3] तद्यथा द्वयोर्मात्रोस्तुल्यं वस्तु तुल्ये क्षेत्रे प्रतिपाद-

---

[1] This refers to two *vimuktis*, viz., *chetovimukti* and *prajñāvimukti* :—
साङ्गः सैव विमुक्ति द्वे

…द्वे विमुक्ती सूत्र उक्ते । **चेतोविमुक्तिः प्रज्ञाविमुक्तिश्च ।** *Akb.* VI. 77. c.

These two *vimnktis* are often mentioned together : इध भिक्खवे भिक्खु आसवानं खया **अनासवं चेतोविमुत्तिं पञ्ञाविमुत्तिं** च दिट्ठेव धम्मे सयं अभिञ्ञा सच्छिकत्वा उपसम्पज्ज विहरति । *Digha*, XXVI. 28.

They have been variously explained as below :

चेतोविमुत्ति ति फलसमाधि, पञ्ञाविमुत्ति ति फलञाणं । *Vbh. A.* p. 464.

रागविरागा चेतोविमुत्ति सेखफलं, अविज्जाविरागा पञ्ञाविमुत्ति असेखफलं । *Netti.* p. 82.

रागविरागाच्चेतोविमुक्तिः । अविद्याविरागात् प्रज्ञाविमुक्तिः । *Sakv.* p. 607.

तृष्णाऽविद्यापक्षसर्वक्लेशोपक्लेशप्रहाणात् **समाधिसमापत्तयश्चेतोविमुक्तिः, अर्हन्मार्गज्ञानं प्रज्ञाविमुक्तिः ।** *Aaa.* p. 11.

See *Jpś.* p. 25, and *AMBRH.* pp. 34 (n. 1) and 199. V. infra, *Ad. kārikā* 466.

[2] V. infra, *Adv. kārikā*, 241 and 441.

[3] Cf. **श्रावकेभ्यः सखड्गेभ्यो बोधिसत्त्वस्य तायिनः ।**
मृदुमध्याधिमात्राणामूष्मादीनां विशिष्टता ॥ *Aa. kārikā* 26.

The Hīnayānists as well as the Mahāyānists acknowledge the *indriyabheda* and the consequent *phalabheda* :—एसो च भन्ते मग्गो एसा पटिपदा पञ्चन्नं ओरम्भागियानं संयोजनानं पहनाय, अथ किञ्चरहि इध **एकच्चे भिक्खू चेतोविमुत्तिनो, एकच्चे पञ्ञाविमुत्तिनो** ति ? **'एत्थ खो तेसा'**हं आनन्द **इन्द्रियवेमत्तं वदामी**'ति । *M. sutta* 64.

Cf. ननु भन्ते भगवा सब्बपाणभूतहितानुकम्पी विहरतीति ?…अथ किञ्चरहि भन्ते **भगवा एकच्चानं सक्कच्चं धम्मं देसेति । एकच्चानं नो तथा**….

…सेय्यथा पि गामणि यं अदुं **खेत्तं अग्गं** एवमेव मय्हं **भिक्खुभिक्खुनियो ।** तेसाहं धम्मं देसेमि आदिकल्याणं…परिसुद्धं ब्रह्मचरियं पकासेमि । तं किस्स हेतु ? एते हि गामणि मं दीपा मं लेणा मं ताणा मं सरणा विहरन्ति ।

सेय्यथा पि गामणि यं अदुं **खेत्तं मज्झिमं** एवमेव मय्हं **उपासका उपासिकायो** ।…मं सरणा विहरन्ति ।

सेय्यथा पि गामणि यं अदुं **खेत्तं हीनं** जङ्गलं ऊसरं पापभूमि एवमेव मय्हं **अञ्ञतित्थिया समणब्राह्मणपरिब्बाजका ।** तेसं पाहं…पकासेमि । तं किस्स हेतु ? अप्पेव नाम एकपदं पि आजानेय्युं तं नेसमस्स दीघरत्तं हिताय सुखाय चाति । *S.* IV. p. 316.

यतोश्चेतनाविशेषादतुल्यं फलं भवति, तद्वदुत्तमार्थं प्रार्थयमानानां त्रयणामपि पुद्गलानां प्रणिधानेन्द्रियसततघननिरन्तरभावनाप्रयोगपटुत्वाभ्या(3)सादिविशेषात्तुल्येऽपि मार्गे पतितानां कश्चित्फलविशेषो भवति ।

इतश्च

[240] **करुणाभावनोद्रेकात्स्वसंविच्चित्तयोस्तथा ।**
परसंविद्गुरोस्तद्वत्तद्विशेषो विधीयते ॥

तत्र भगवतो बुद्धस्य करुणाभावना[१] चोद्रेकेन वर्तते भगवान्बुद्धः । स्वसंविच्चिन्ता च प्रत्येकबुद्धस्याधिक्येन वर्तते । परसंवित्परतो घोषश्च श्राव(4)कस्य । किञ्च, परतो घोषमन्तरेणापि चरमे जन्मनि सुयोनिषो(शो)मनस्कारबलेन[२] हेतुप्रत्ययफलावबोधोपलम्भात्, हेतुप्रत्ययबलैरशेषप्रनष्टं निश्रेयसं मार्गं प्रथममधिगम्य परत्रोपदेशादित्येवमादि ॥[3]

The Mahāyānists hold that the Buddha preaches the law according to the *adhimukti* and *āśaya* of the disciples :

नानाधिमुक्तानां सत्त्वानां नानाधात्वाशयानामाशयं विदित्वा धर्मं देशितवन्तः··· *S. Puṇḍarīka*, p. 31.

स खलु···भगवान्···धर्मं देशयति स्म । यदिदं **श्रावकाणां** चतुरार्यसंप्रयुक्तं धर्मं देशयति स्म जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायाससमतिक्रमाय **निर्वाणपर्यवसानं** प्रतीत्यसमुत्पादप्रवृत्तम् । **बोधिसत्त्वानां** महासत्त्वानां षट्पारमिताप्रतिसंयुक्तानामनुत्तरां सम्यक्संबोधिमारभ्य तथागतज्ञानदर्शनपर्यवसानं धर्मं देशयति स्म ।··*Ibid.* pp. 251-2.

For *āśaya*, *adhimukti* and *indriya-bheda*, see *Vbh.* pp. 340-341. *V.* infra, *Ad. kārikās* 492-495.

[१] For the difference between the *karuṇā* of *Śrāvaka* and *Buddha*, v. infra, *Adv. kārikā* 506.

[२] Cf. द्वौ हेतू द्वौ प्रत्ययौ सम्यग्दृष्टेरुत्पादाय । तथा ह्युक्तं भगवता ।···कतमौ द्वौ ? परतश्च घोषोऽध्यात्मं च योनिशो मनसिकार इति । *Sakv.* p. 188.

Cf. द्वे' मे भिक्खवे पच्चया सम्मादिट्ठिया उप्पादाय । कतमे द्वे ? **परतो च घोसो योनिसो च मनसिकारो ।** *Aṅg.* I. p. 87.

Also cf. यस्मा च खो महाराज **सवणेन** करणीयं होति । **थेरो** महाराज, **सारिपुत्तो** अपरिमितमसङ्ख्येय्यकप्पं उपादाय उपचितकुसलमूलो पञ्ञायं कोटिं गतो, **सो पि विना सवणेन नासक्खि आसवक्खयं पापुणितुं ।** *Milinda*, p. 259.

[३] The Pāli *Piṭakas* contain many old passages indicating the difference between a *Śrāvaka* and a *Buddha*. The following passage perhaps gives a fairly old theory :—

तथागतो भिक्खवे अरहं सम्मासम्बुद्धो रूपस्स··पे···विञ्ञाणस्स निब्बिदा···विमुत्तो सम्मासम्बुद्धो ति वुच्चति । भिक्खुपि भिक्खवे पञ्ञाविमुत्तो रूपस्स···पे···विञ्ञाणस्स

अथ तुल्यायां विमुक्तौ स्थितानां[1] त्रयाणामभिसमेतॄणां को विशेषः ?[2] तदुच्यते—

निब्बिदा…विमुत्तो पञ्ञाविमुत्तो ति वुच्चति । तत्र भिक्खवे को विसेसो को अधिप्पायो किं नानाकरणं तथागतस्स अरहतो सम्मासम्बुद्धस्स पञ्ञाविमुत्तेन भिक्खुना ति ?

भगवम्मूलका नो भन्ते धम्मा ?

तथागतो भिक्खवे अरहं सम्मासम्बुद्धो अनुप्पन्नस्स मग्गस्स उप्पादेता असञ्जातस्स मग्गस्स सञ्जनेता अनक्खातस्स मग्गस्स अक्खाता मग्गञ्ञू मग्गविदू मग्गकोविदो । मग्गानुगा च भिक्खवे एतरहि सावका विहरन्ति पच्छा समन्नागता । अयं खो भिक्खवे विसेसो…। *S.* III. p. 65.

For details on this topic, see *Dialogues of the Buddha*, II. p. 87, n. 3., and *The Bodhisattva Doctrine*, pp. 1-49.

[1] The Mahāyānists accept this claim with certain reservations :—

तुल्ये नाम धर्मधातुप्रवेशे वयं भगवता हीनेन यानेन निर्यातिताः । *S. Puṇḍarīka*, p. 46. Also see—यद्यपि भगवन् सत्त्वा नानाधिमुक्तयो **ये त्रैधातुकान्निःसृताः किं तेषामेकं निर्वाणमुत द्वे त्रीणि वा ?** भगवानाह—**सर्वधर्मसमतावबोधाद्धि** काश्यप **निर्वाणम् ।** तच्चैकं न द्वे न त्रीणि । *Ibid.* p. 95…**येन सर्वधर्मा न प्राप्ताः कुतस्तस्य निर्वाणम् ?** *Ibid.* p. 98.

यानभेदं वर्णयन्ति बुद्धयानं तु निश्चितम् ।
यस्तु शून्यान् विजानाति धर्मानात्मविवर्जितान् ।
संबुद्धानां भगवतां **बोधि जानाति तत्त्वतः ॥** *Ibid.* p. 98.

Also cf. यानत्रये संभारेन्द्रियस्वभावाधिमुक्तिविभिन्नेऽपि **अभिसमयः आर्यमार्गश्चाभिन्नः इति तु सर्वे वयं श्रद्दधामहे । क्लेशावरणप्रहाणस्येष्टत्वात् ।** संवृतिनयेन स मार्गो विभिन्नः । यदि धर्मनैरात्म्यावतारमपाकरोषि **ज्ञेयावरणस्याप्रहाणात्** शास्ता प्रादेशिकविमुक्तः स्यात् ।…ननु मुक्तिर्मुक्तेरभिन्नेति किं नोपदिष्टम् । सत्यमुपदिष्टम् । **क्लेशावरणविमुक्तिसाम्यादेवमुक्तम् ।** न तु सर्वप्रकारेण । यथा रोमकूपो महाकाशेन तुलितोऽपि नाभिन्नः ।… *Karatalaratna*, p. 77.

See *B. Pañjikā*, IX. 55 and *Aaa.* p. 140.

[2] The *Abhidharma-samuchchaya* gives the following details :—

श्रावकाभिसमयः कतमः ? पूर्वोक्तः सप्तविधोऽभिसमयः । [धर्म-अर्थ-तत्त्व-पृष्ठ-रत्न-असमुदाचारनिष्ठाभिसमयाः ।] श्रावकाणां परतो घोषमागम्य प्रतिलम्भतः श्रावकाभिसमय इत्युच्यते ।

प्रत्येकबुद्धाभिसमयः कतमः ? पूर्वोक्ताः सप्ताभिसमयाः । परतो घोषमनागम्य प्रतिलम्भतः…।

बोधिसत्त्वाभिसमयः कतमः । पूर्वोक्तेषु सप्ताभिसमयेषु या समुदागमक्षान्तिः नो तु साक्षात्क्रिया । केवलं बोधिसत्त्वप्रमुदिताभूमौ बोधिसत्त्वस्य सम्यक्त्वनियामावक्रान्तिः ।

श्रावकाभिसमयात् बोधिसत्त्वाभिसमयस्य को विशेषः ? संक्षेपत एकादश । आलम्बनविशेषः उपस्तम्भविशेषः प्रतिवेधविशेषः अभ्युपगमविशेषः निर्याणविशेषः परिग्रहविशेषः

[241] हेतुतत्त्वफलोद्भूतं (5)महत्त्वं शासितुस्त्रिधा ।
विमुक्तावपि तुल्यायां त्रयाणां बोधि[६]लम्भनात् ॥

तत्र हेतुकृतं तावद्भगवतो बुद्धस्य महत्त्वं(त्त्वं) त्रिषु कल्पासंख्येयेषु सूत्रविनयाभिधर्मालोकेन विनेयजनमनोग्रहेष्वज्ञानतिमिरोत्सादनात्। स्वभावकृतमपि बलवैशारद्यस्मृत्युपस्थानमहाकरुणादिस्वरूपत्वात्।[७] फलकृतमपि

व्यवस्थानविशेषः प्रतिष्ठापरिवारविशेषः अभिजन्मविशेषः जन्मविशेषः **फलविशेषश्च । फलविशेषः पुनर्दशविधः ।** आश्रयपरिवृत्तिविशेषतः गुणसमृद्धि···त्रिकाय···निर्वाण···मिश्रोपमिश्रज्ञानशक्तिलाभ···आवरणविशुद्धि···मिश्रोपमिश्रकर्मक्रिया··अभिसंबोधिनिर्वाणसंदर्शनोपायविशेषतः पञ्चाकारपरित्राणविशेषतश्च वेदितव्यः । *Asm.* pp. 93-4.

The *Kathāvatthu* contains many controversies about the relative imperfection of the *Arhat*, on account of his not being a *sarvajña* :—

न वत्तब्बं 'अत्थि किञ्चि संयोजनं अप्पहाय अरहत्तप्पत्ती' ति ?
आमन्ता ।
अरहा सब्बं बुद्धविसयं जानाती ति ?
न हेवं वत्तब्बे ।
तेन हि अत्थि किञ्चि संयोजनमप्पहाय अरहत्तप्पत्ती ति । *Kv.* xxi. 3.—

—इदानि संयोजनकथा नाम होति । तत्थ **यस्मा अरहा सब्बं बुद्धविसयं न जानाति तस्मा तस्स तत्थ अविज्जाविचिकिच्छाहि अप्पहीनाहि भवितब्बं** ति सञ्ञाय अत्थि किञ्चि संयोजनं अप्पहाय अरहत्तप्पत्ती ति येसं लद्धि, सेय्यथापि **महासंघिकानं ।** ···**सब्बं बुद्धविसयं** ति···**अरहतो सब्बञ्ञुतञ्ञाणभावेन पटिसेधो कतो, न अविज्जाविचिकिच्छानं अप्पहानेन ।** इतरो पन तेसं अप्पहीनतं सन्धाय तेन हीति लद्धि पतिट्ठापेति । सा अयोनिसो पतिट्ठापितत्ता अप्पतिट्ठिताव होति । *KvA.* xxi. 3.

Also cf. इदानि **अञ्ञाण, कङ्खा, परवितरणाति तिस्सो कथा** नाम होन्ति । तत्थ येसं अरहतो इत्थिपुरिसादीनं नामगोत्तादीसु ञाणप्पवत्तिया अभावेन अत्थि अञ्ञाणं, तत्थेव सन्निट्ठानाभावेन अत्थि कङ्खा यस्मा च नेसं तानि वत्थूनि परे वितरन्ति, पकासेन्ति आचिक्खन्ति, तस्मा नेसं अत्थि परवितरणा ति इमा लद्धियो, सेय्यथापि एतरहि **पुब्बसेलियादीनं ।** तेसं ता लद्धियो भिन्दितुं···पुच्छा सकवादिस्स ।···*KvA.* ii. 2—4. See *Kv.* iv. 10, xxii. 1, viii. 10, xvii. 1.; *Milinda*, pp. 107—109, 261 and *Aaa.* p. 62.

[६] Cf. यं नून हं पि इम **बुद्धबोधिं त्रिधा विभज्येह** प्रकाशयेयम् *S. Puṇḍarīka*, p. 43.
Cf. तत्थ **बोधी** ति **चतुमग्गञ्ञाणस्सापि सब्बञ्ञुतञ्ञाणस्सापि** अधिवचनं । *KvA.* iv. 6. V. infra, *Adv. kārikā*, 441.

[७] These are some of the special powers of Buddha. Cf. तथागता···असङ्गाप्रतिहतज्ञानदर्शनबलवैशारद्यावेणिकेन्द्रियबलबोध्यंगध्यानविमोक्षसमाधिसमापत्त्यद्भुतधर्मसमन्वागता विविधधर्मसंप्रकाशकाः । तेषु धर्मेषु तथागत एव प्रत्यक्षोऽपरोक्षः । *S. Puṇḍarīka*, p. 23.

सदे(7)वकेषु लोकेष्वप्रतिहतशासनप्रतिष्ठाणा(ना)न्मारचतुष्टय[1]निर्जयनाच्चेति ॥

अथ यदेतत्सर्वसत्त्वप्रतिविशिष्टं पुरुषोत्तमस्य जन्मशरीरं तत्किमनियतकालाक्षेपम्, आहोस्विन्नियतकालाक्षेपमिति ? तदभिधीयते—

[242] बुद्धस्य संमुखीनस्य बौद्धमाक्षिप्यते वपुः ।

नान्यस्मिन्काले । चिन्तामयेन ज्ञानेन विशि(7)ष्टतमत्वात् । तत्र पुनः—

सैकपुण्यशतोद्भूतमेकैकं लक्षणं मुनेः ॥[2]

तत्र पञ्चाशच्चेतनाः प्रयोगभूताः पञ्चाशत्पृष्ठभूताः, एकया तल्लक्षणमाक्षिपति ॥

ता पुनः पञ्चाशच्चेतनाः कतमाः ? तदुच्यते—

[243] यथाकर्मपथास्तद्वत्पुण्यादित्रयमिष्यते ।

प्रतिकर्मपथं पञ्च, मौलकर्मपथपरिशुद्धिः सामन्तकस्य (8)वितर्कानुपघातः स्मृत्यनुपरिग्रहः, निर्वाणपरिणामनं च । ताः सर्वास्तदालम्बनाः पञ्चाशत्प्रयोगभूताः । पृष्ठेऽप्येतावत्य एव ।[3]

---

[1] The four *Māras* are—*Skandha-māra*, *Kleśa-māra*, *Devaputra-māra* and *Maraṇa-māra*. See *Śikshā*, p. 198.

Cf. चतुर्मारजयाज्जिनो भगवान् । *B. Pañjikā*, IX. 36. Also cf. संखेपतो वा पञ्च किलेस-खन्ध-अभिसङ्खार-देवपुत्त-मच्चुमारे अभञ्जि, तस्मा···भगवा ति वुच्चति । *Vm.* VII. 59. V. supra, p. 101, n. 2.

[2] चिन्तामयं कल्पशते शेष आक्षिप्यते हि तत् ।
एकैकं पुण्यशतजं । *Ak.* IV. 109 cd, 110 a.

[3] Yośomitra gives the following details:—

उक्तं पुण्यस्य परिमाणम् । तेषामेवं कृतपरिमाणानां शतेनैकं महापुरुषलक्षणं निर्वर्तते । एवं यावद् द्वात्रिंशत्तममपीति । केचित्ते व्याचक्षते । बुद्धालम्बनमनस्कारसम्मुखीभावात्पञ्चाशच्चेतना भवन्ति । अहमपीत्थं स्यामित्यपराः पञ्चाशच्चेतना भवन्ति ।

अपरे वर्णयन्ति । कामधातुर्विंशतिस्थानानि । रूपधातुः षोडश । आरूप्याश्चत्वारः । अष्टौ च शीतनरका इत्यष्टचत्वारिंशद्विकल्पं त्रैधातुकं भवति । तदालम्बनमस्य बोधिसत्त्वस्य करुणाचित्तमुत्पद्यते । ततस्तत्संप्रयुक्ताश्चेतना अष्टचत्वारिंशद्भवन्ति । अतोऽनन्तरं बुद्धालम्बना चेतनोत्पद्यते । यथाऽनेनास्मात् त्रैधातुकात् सत्त्वा मोचिता इत्येका चेतना । अतोऽनन्तरं द्वितीया चेतनोत्पद्यते । अहमप्येवं मोचेय्यमित्यात्मालम्बनेति । पञ्चाशच्चेतना भवन्ति तासां पुनर्द्विःसम्मुखीभावाच्चेतनाशतं भवतीति ।

अन्ये आहुः । प्राणातिपातविरतिर्बुद्धस्य भगवतः पञ्चभिः कारणैरुपेता भवति ।

अन्ये तु ब्रुवते—बुद्धा द्विशरीराधिष्ठानाः । जन्मशरीराधिष्ठानाः, द्वात्रिंशन्महापुरुषलक्षणालम्बनाः । धर्मशरीराधिष्ठानाश्चाष्टादशावेनि(णि)कबुद्धगुणालम्बनाः सामन्तकपृष्ठ(?)संगृहीताः ।

अन्ये पुनराहुः—प्राणिवधविरतिचेतना मृदुमध्याधिमात्राधिमात्रतरतमभेदाद्देवमनुष्येषु योज्यं(ज्या) ।

केचिन्मन्त्रयन्ते—द्विधा[१] समुद्राश्चत्वारो द्वीपाः[२] षोडशनरकाः,[३] तिर्यक्प्रेतौ षट्कामावचरा[४] विंशतीरूपारूप्यान्(:) देवान्(वाः)[५] । एतान्सर्वान् भगवान् करुणायते ।

एवन्तु वर्णयन्ति—सन्निकृष्टं बोधिसत्त्वं स्थापयि[IV. B, 8. Fol. 102 a]**त्वा यत्सर्वसत्त्वानां भोगैश्वर्याधिपत्यफलमियदेकस्य पुण्यस्य प्रमाणम् ॥**[६]

पञ्च कारणानि । मौलकर्मपथपारिशुद्धिः । सामन्तकपारिशुद्धिः । वितर्कानुपघातः । स्मृत्यनुपरिगृहीतत्वम् । निर्वाणपरिणामितत्वं चेति । तदालम्वना अपि चेतनाः पञ्च भवन्ति ।

एवं दशकर्मपथालम्वना दश पञ्चकाश्चेतनानां पञ्चाशच्चेतना भवन्ति । तेषां द्विः सम्मुखीभावाच्चेतनाशतं भवतीत्येतत् पुण्यशतम् ।···*Sakv*. pp. 431-2.

[१] *Ābhyantara* and *bāhya*. See *Akb*. III. 52.

[२] The four great Continents are : जम्बुद्वीप, पूर्वविदेह, अपरगोदानीय and उत्तरकुरु. See *Akb*. III. 54-55. and *A Manual of Buddhist Philosophy*, vol. I. p. 55.

[३] अर्बुद, निरर्बुद, अटट, हहव, हुहुव, उत्पल, पद्म and महापद्म are cold hells. संजीव, कालसूत्र, संघात, रौरव, महारौरव, तापन, प्रतापन and अवीचि are hot hells. *Ibid*. pp. 61-63. See *Akb*. III. 58-59.

[४] चातुर्महाराजिक-त्रायस्त्रिंश-याम-तुषित-निर्माणरति-परनिर्मितवशवर्ति ।
See *Vbh*. p. 566.

[५] Sixteen *Rūpāvachara-bhūmis* and four *Ārūpya-bhūmis*. The sixteen *Rūpāvachara-bhūmis* are :—ब्रह्मपारिसज्जा, ब्रह्मपुरोहिता, महाब्रह्मा चेति पठमज्झानभूमि । परित्ताभा, अप्पमाणाभा, आभस्सरा चेति दुतियज्झानभूमि । परित्तसुभा, अप्पमाणसुभा सुभकिण्हा चेति ततियज्झानभूमि । वेहप्फला असञ्ञसत्ता सुद्धावासा चेति चतुत्थज्झानभूमी ति रूपावचरभूमि सोळसविधा होति । अविहा, अतप्पा, सुदस्सा, सुदस्सी, अकनिट्ठाचेति सुद्धावासभूमि पञ्चविधा होति । *A. Saṅgaho*. v. 6. See *Vbh*. pp. 570-572.

These are variously enumerated as sixteen, seventeen and eighteen. See *Akb*. VIII. 2. For details, see *A Manual of Buddhist Philosophy*, vol. I. pp. 67-69.

For the four *Ārūpya-bhūmis*, v. infra, *Ad. kārikā* 549-551.

[६] The Kośakāra gives only a few views in brief : किं पुण्यस्य परिमाणम् ? सन्निकृष्टवोधिसत्त्वं स्थापयित्वा यावत्सर्वसत्त्वानां भोगफलमित्येके । यावत् सर्वसत्त्वानां कर्माधिपत्येन त्रिसाहस्रमहासाहस्रको लोकोऽभिनिवर्तत **इत्यपरे** । बुद्धा एव च तत्परिमाणाभिज्ञा **इत्यपरे** । *Akb*. IV. 110 a.

अथ यदुक्तम्—'दानपारमिता' इति। तत्र कः समासः किं साधनो वा दानशब्दः, को वा स्वभावो दानस्य इति ? तदपदिश्यते। दानस्य पारमितायां निश्चयबुद्धिः सा दानपारमिता। एवं शेषास्वपि वाच्यम्।

यत्पुनरुच्यते—'किं साधनो वायं दानशब्दः, को वा दानस्य स्वभावः' इति तत्रापदिश्यते—

दानं हि दीयते येन स्वपरार्थाद्यपेक्षया ॥
[244] कायादिकर्म तत्तत्त्वमविज्ञप्तिः क्वचित्पुनः ।[1]

करणसाधनोऽयं दानशब्दः। दीयते तेनेति दानं मानवत्। हस्तादिषु तर्हि दानप्रसंगः। अस्तु तर्हि कर्मसाधनो दीयते तदिति दानम्। सुवर्णादिषु दानप्रसंगः। भवतु को (3)दोषः। विपाकफलाभावः, सुवर्णादीनामव्याकृतत्वात्। भवतु तर्हि करणसाधन एव। ननूक्तं हस्तादिषु प्रसंगः ? नैष दोषः। कुशलकर्मत्रयपरिग्रहात्।[2] स्पर्धायशोगुप्तिसेवादिव्युदासार्थमिदमारभ्यते।

Cf. सर्वविकल्पबीजविगमादप्रमेयासंख्येयं पुण्यं प्रसवति। अप्रमेयमित्यनेनाप्रमाणमप्याक्षिप्तम्।···*Aaa*. p. 427.

Also cf. जगदानन्दबीजस्य जगद्दुःखौषधस्य च ।
चित्तरत्नस्य यत्पुण्यं तत्कथं हि प्रमीयताम् ॥
···एतदुक्तमार्यवीरदत्तपरिपृच्छायां—
बोधिचित्ताद्धि यत्पुण्यं तच्च रूपि भवेद्यदि ।
आकाशधातुं संपूर्य भूयश्चोत्तरि तद्भवेत् ॥ *B. Pañjikā*, I. 26.

See *Bodhichittotpāda-sūtra-śāstra*, p. 2.

[1] Cf. दीयते येन तद्दानं पूजानुग्रहकाम्यया ।
कायवाक्कर्मसोत्थानं महाभोग्यफलं हि तत् ॥ *Ak*. IV. 113.

Also cf. अनुग्रहार्थं स्वस्यातिसर्गो दानम्। *Tattvārtha-sūtra*, VII. 33.

[2] Cf. इदानि दानकथा नाम होति। तत्थ दानं नाम तिविधं चागचेतनापि विरतिपि देय्यधम्मंपि। 'सद्धा हिरियं कुसलञ्च दानं' ति आगतट्ठाने चागचेतना दानं। 'अभयं देती' ति आगतट्ठाने विरति। 'दानं देति अन्नं पानं' ति आगतट्ठाने देय्यधम्मो। तत्थ चागचेतना देति वा देय्यधम्मं, देन्ति वा एताय देय्यधम्मं ति दानं। सा हि उप्पज्जमाना भयभेरवादिसंखातं दुस्सील्यचेतनं दाति लुनाति चाति दानं। देय्यधम्मो दीयती ति दानं। एवमेतं तिविधम्पि अत्थतो चेतसिको चेव धम्मो देय्यधम्मो चाति दुविधं होति। तत्थ येसं चेतसिकोव धम्मो दानं, न देय्यधम्मो ति लद्धि, सेय्यथापि राजगिरिकसिद्धत्थिकानं। ते सन्धाय पुच्छा सकवादिस्स।···*KvA*. VII. 4.

Cf. फलेन सह सर्वस्वत्यागाच्चित्ताज्जनेऽखिले ।
दानपारमिता प्रोक्ता तस्मात्सा चित्तमेव तु ॥ *Bodhicharyāvatāra*, V. 10.

'स्वपरार्थाद्यपेक्षया'—स्वात्मपरार्थानुग्रहाद्यपेक्षया। स्वात्मानुग्रहाय परानुग्रहाय उभयानु(4)ग्रहा[य। आ]दिशब्दात् पूजाकाम्यया चेति। स्वभावोऽपि 'कायादिकर्माविज्ञप्तिः'। क्वचित्पुनः कायवाङ्मनः कर्म। ससंप्रयोगं सपरिवारं चात्र मनस्कर्म द्रष्टव्यम्। तत्पुनरेतद्दानम्—

प्राधान्यान्मुनिना प्रोक्तं महाभोगफलं हि तत् ॥

स्वर्गापवर्गहेतुत्वेऽपि प्राधान्यान्महाभोगतायां तद्विनियोगः। तत्पुनरेतद्दानम्—

[245] स्वा(5)न्योभयार्थसिद्ध्यर्थं दानं ददति केचन ।
साधुवृत्त्यनुवृत्त्यर्थं नोभयार्थाय चापरे ॥[1]

द्वाभ्यां खलु कारणाभ्यां स्वान्यात्महितचिकीर्षुश्च, उभयहितप्रतिपन्नश्च स एवंगुणयुक्तं दानं दीयते[2] (ददाति)। आत्मनश्च कुशलमूलोपचयार्थं परस्य चेन्द्रियमहाभूतोपचयार्थम्। तत्र स्वहितायैव यथा पृथग्जनः(6)परिनिर्वृते भगवति चैत्याय ददाति परार्थमेव यथा अर्हन् संघाय ददाति, न चेष्टधर्मवेदनीयं भवति। उभयार्थं यदवीतरागः संघाय ददाति। नोभयार्थं यदर्हंश्चैत्याय ददाति तच्चेन्न (तच्च न) दृष्टधर्मवेदनीयं भवति केवलं तु सत्पुरुषप्रशस्तमार्गावस्थान प्रदर्शणा(ना)र्थम् ॥

तत्पुनरेतद्दानं कथं फ(7)लतो विशिष्यते[3] ? तदुच्यते—

[246] दातृवस्त्वादिवैशिष्ट्यात्तत्फलातिशयः स्मृतः ।
तत्र कथं दातृविशेषः कथं वस्तुविशेषः कथं क्षेत्रविशेषः ?
श्रद्धादिभिर्गुणैर्दाता दत्तेऽतः सत्क्रियादिभिः[4] ॥

---

[1] Cf. स्वपरार्थोभयार्थाय नोभयार्थाय दीयते । *Ak.* IV. 114. ab.

[2] कतमत् दानम्। स्वस्वामिकानां धनवस्तूनां वितरणं दानम्। तत् त्रिविधहेतोर्भवति। आत्महेतोः परहेतोः परात्महेतोश्च। चैत्यमंदिराणां बुद्धप्रत्येकबुद्धार्हतां चोपस्थानमात्महेतोः। सत्त्वेभ्यो दानं परहेतोः। जनेभ्यो दानं परात्महेतोः। *Aaa.* pp. 1-2.

[3] See *M. Dakkhiṇā-vibhaṅga-sutta*, 142.

[4] Cf. दाता विशिष्टः श्रद्धाद्यैः सत्कृत्यादि ददात्यतः ।
सत्कारोदाररुचिता कालानाच्छेद्यलाभिता ॥ *Ak.* IV. 115.

Also cf. विधिद्रव्यदातृपात्रविशेषात्तद्भेदः। *Tattvārtha-sūtra*, VII. 34.

यदा दाता हेतुफलसंबद्ध(न्ध)निश्चय(ये) श्रद्दधानो ददाति शीलवान् कल्याणधर्मा बुद्धवचनबहुश्रुतश्च भ(8)वति निर्मत्सरी मुक्तहस्तश्च भवति निर्वाणानुशंसः सत्कृत्य स्वहस्तं कालेन पराननुपहत्य ददाति, स खलु

[247] सत्कारादिगुणोपेतं फलं तस्मादवाप्नुते ।

अतः सत्कृत्य दानात्सत्कारलाभी भवति। स्वहस्तदानादुदारेषु भोगपरिभोगेषु रुचिं लभते । कालदानात्कालभोगा[न्] लभते। परानु(9)पघातादनाच्छेद्यांल्लभते निरपक्षालमग्न्या(न्या)दिभिरसाधारणान्। एतावद्दाता विशिष्यते ।

कथं वस्तु ?

वस्तु वर्णादिसंपन्नं सौरूप्यादि फलप्रदम् ॥[१]

यदि वस्तु वर्णगन्धरसस्पर्शसम्पन्नं भवति तदा विशिष्यते। ततः सुरूपित्वं यशस्विता पृ(प्रि)यता सुकुमारत्वं सुखस्पर्शाङ्गता भवति यथाक्रमम् । ए[IV. A, 8. Fol. 102 b.] (1)वं वस्तु विशिष्टं भवति ॥

[248] गुणदुःखोपकाराख्यैर्धर्मैः क्षेत्रं विशिष्यते ।[२]

गुणाधिकं क्षेत्रं[३] भवति। [ति]र्यञ्चमुपादाय यावन्मनुष्याणां गुणास्तरतमक्रमेण यावद्बुद्धस्य। यथोक्तम्—[४]"तिर्यग्योणि(नि)गताय दानं दत्वा शतगुणो विपाकः प्रतिकाङ्क्षि[तव्यः स्यात्]। दुःशीलाय मनुष्यभूताय दत्वा सहस्रगुणः।"[५] दुःखविशेषा(2)त्क्षेत्रं विशिष्यते । यथो(थौ)पधिकेषु पुण्यक्रियावस्तुषु[६] । "ग्लानाय दानं ग्लानोपस्थाय कायदानं शीतलिकावर्दलिका-

---

[१] Cf. वर्णादिसम्पदा वस्तु सुरूपत्वं यशस्विता ।
प्रियता सुकुमारत्तुंसुखस्पर्शाङ्गता ततः ॥ *Ak*. IV. 116.

[२] Cf. गतिदुःखोपकारित्वगुणैः क्षेत्रं विशिष्यते । *Ak*. IV. 117. ab.

[३] अस्मिन् लोके त्रिंशद्विधं पुण्यक्षेत्रं भवति। माता पिता वृद्धो रोगी सत्पुरुषो वीतरागपुद्गलः सास्रवाः सप्त पुद्गलाश्चत्वारो मार्गप्रतिपन्नाश्चत्वारः फलप्रतिपन्नाः प्रत्येकबुद्धा बुद्धा बोधिसत्त्वा भिक्षुसंघोऽध्वगाः क्षृत्तृट्श्रमातुराश्च । *Aaa*. p. 32.

[४] Quoted in *Akb*. IV. 117. ab.

[५] Cf. तिरच्छानगते दानं दत्वा सतगुणा दक्खिणा पाटिकङ्खितब्बा । पुथुज्जनदुस्सीले दानं दत्वा सहस्सगुणा दक्खिणा पाटिकङ्खितब्बा । पुथुज्जनसीलवन्ते दानं दत्वा सतसहस्सगुणा दक्खिणा पाटिकङ्खितब्बा । *M. sutta* 142.

[६] For the seven *aupadhika-punya-kriyā-vastus*, see *LVPAk*. IV. p. 237, n. 1.

दिषु च दानम् ।" इति विस्तरः। उपकारित्वविशेषात्। यथा मातापित्रोरण्ये(न्ये)षां चोपकारिणां ये अटवीदुर्गकान्तारे भूतव्यसनेभ्यो निस्तारयन्ति।

यदुक्तम्—'चेतनाविशेषात्फलविशेषः' इति। अथ कथं चेतनायाः विशेषो भवति? ब्रूमः—

आशयादि मृदुत्वादेर्मृदुत्वादीनि कर्मणः ॥[१]

षन्नां(ण्णां) खलु कारणानां मृदुत्वादिविशेषात्कर्म विशिष्यते। आशयचेतनाप्रयोगाधिष्ठानक्षेत्रपृष्ठाणां मृदुत्वादेः कर्मविशेषः।

तत्राशयाभिप्रायः यथा—एवं चैवं च कुर्यां करिष्यामीति वा चेतनाया(याः) (4)कर्मपथं समाक्षिपति। प्रयोगस्तदधिष्ठानं कायवाक्कर्म। अधिष्ठानं कर्मपथः। क्षेत्रं यस्मै वस्तु प्रतिपाद्यते। पृष्ठं नाम यत्कृत्वा पुनः सकृदसकृद्वानुकरोति॥

यदुक्तम्—'आर्येभ्यो दानमप्रमेयफलम्' इति। अथ किमनार्येभ्यः सर्वेभ्यः प्रमेयम्? नेत्याह—

[249] धर्मदात्रेऽपि बालाय पित्रे मात्रेऽथ रोगिणे।
अ(5)मेयं बोधिसत्त्वाय दानमन्यभवाय च ॥[२]

एभ्यः पञ्चेभ्यः पृथग्जनेभ्योऽपि दानमप्रमेयं भवति॥[३]

अथ कस्य कस्मै दत्वा दानमग्र्यफलं भवति? तदभिधीयते—

[250] बोधिसत्त्वस्य यद्दान्न(न)मन्यस्यापि यदष्टमम्।
विपश्चिद्भिस्तदाख्यातं श्रेष्ठं यच्चार्हतोऽर्हते ॥[४]

---

[१] Cf. पृष्ठं क्षेत्रमधिष्ठानं प्रयोगश्चेतनाशयः।
एषां मृद्वधिमात्रत्वात् कर्ममृद्वधिमात्रता ॥ *Ak*. IV. 118.
See *Milinda*, p. 112, *DhsA*. III. 143, and *Vinaya A*. II. p. 439.

[२] Cf. मातृपितृग्लानधर्मकथिकेभ्योऽन्त्यजन्मने।
बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा ॥ *Ak*. IV. 118.

[३] Cf. बाहिरके कामेसु वीतरागे दानं दत्वा कोटिसतसहस्सगुणा दक्खिणा पाटिकङ्खितब्बा। सोतापत्तिफलसच्छकिरियाय पटिपन्ने दानं दत्वा असंखेय्या अप्पमेय्या दक्खिणा पाटिकङ्खितब्बा। को पन वादो सोतापन्ने?…को पन वादो तथागते अरहन्ते सम्मासम्बुद्धेति? *M. sutta* 142.

[४] Cf. अग्रं मुक्तस्य मुक्ताय बोधिसत्त्वस्य चाष्टमम्। *Ak*. IV. 117 cd.

यत्खलु बोधिसत्त्वः सर्वसत्त्वहिताध्याशयेण (6)दानं ददाति तदग्र्यमुत्तमार्थफलत्वात्। भगवताऽष्टौ खलु दानान्युक्तानि सूत्रे[१] "आसाद्य दानम्। भयदानम्। अदात् मे दानम्। दास्यति मे दानम्। दत्तपूर्वं मे पितृभिर्दानम्। ददाति स्वर्गार्थम्। कीर्त्यर्थम्। यावदुत्तमार्थस्य प्राप्तये ददात्येतदग्र्यम्। यच्च त्रैधातुकवीतरागोऽर्हन्नर्हते ददाति[२] दानमि(7)दमग्र्यम्" इति ॥

सूत्र उक्तम्—"सांचेतनिकस्याहं कर्मणः कृतोपचितस्य नाप्रतिसंवेद्यफलं वदामि" इति।[३] अथ किमिदं कृतमुपचितं वा? तदुच्यते—

[251] संप्रधार्य यदाक्षिप्तं पूरणादिदृढीकृतम्।
विगतप्रतिपक्षं च तत्कर्मोपचितं मतम् ॥[४]

तत्र संप्रधार्याक्षिप्तं नाबुद्धिपूर्वं(8) यदृच्छाय(च्छया) यच्च कृत्वा परिपूरिकाभिश्चेतनाभिः परिपूरितं भवति। पृष्ठतश्च दृढीकृतं भवति। निष्कौकृत्यादिप्रतिपक्षं च भवति। तत्कर्मोपचितमुच्यते ॥

कथं चैत्यादिष्वसति प्रतिगृहीतरि पुण्योपजातिर्भवति? ब्रूमः।

---

[१] Quoted in *Akb*. iv. 117 cd.

Cf. अट्ठ दानवत्थूनि। आसज्ज दानं देति। भया दानं देति। अदासि मेति दानं देति। दस्सति मेति दानं देति। साधु दानं ति दानं देति, अहं पचामि, इमे न पचन्ति, नारहामि पचन्तो अपचन्तानं न दातुं ति दानं देति। इमं मे दानं ददतो कल्याणो कित्तिसद्दो अब्भुग्गच्छतीति दानं देति। चित्तालङ्कारचित्तपरिक्खारत्थं दानं देति। *Dīgha*, xxxiii. 3. 1. See *Aṅg*. iv. p. 236.

[२] Cf. **यो वीतरागो वीतरागेसु ददाति दानं धम्मेन लद्धा सुपसन्नचित्तो।**
अभिसद्दहं कम्मफलं उळारं तं वे दानं विपुलं ति ब्रूमि ॥ *M. sutta* 142.

[३] Cf. नाहं भिक्खवे सञ्चेतनिकानं कम्मानं कतानं उपचितानं अप्पटिसंविदित्वा व्यन्तिभावं वदामि…। *Aṅg*. v. p. 292.

[४] Cf. **सञ्चेतनसमाप्तिभ्यां निष्कौकृत्यविपक्षतः।**
परिवाराद्विपाकाच्च कर्मोपचितमुच्यते ॥ *Ak*. iv. 120.

—सञ्चेतनतः सञ्चिन्त्य कृतं भवति। नाबुद्धिपूर्वंकृतं भवति। तद्यथा। अव्याकृतेन चित्तेन पाषाणं ददामीति सुवर्णपिण्डं दद्यात्। कृतं तन्न पुनरुपचितम्। अव्याकृतं हिं तत्कर्म। न सहसा कृतम्। यथा भाष्याक्षेपात् सत्यवचनं कृतं तत्कुशलं न पुनरुपचितम्। कश्चिदेकेन सुचरितेन सुगतिं याति। कश्चिद्यावत् त्रिभिः। कश्चिदेकेन कर्मपथेन। कश्चिद्यावद्दशभिः। तत्र यो यावता गच्छति तस्मिन्नसमाप्ते कृतं कर्म नोपचितम्। समाप्ते तूपचितम्। एवं यावद्विपाकदाने नियतमिति। *Sakv*. p. 435. See *LVPAk*. iv. p. 114, n. 1.

[252] स्वस्मात्त्यागगुणापेक्षाश्चैत्ताश्चैत्यार्चनादिषु ।
विना प्रतिगृहीत्रापि फलं मैत्रीविहारवत् ॥[१]

तद्य(7)था मैत्रीविहारिणो महर्षयो न च लोकं सुखेन योजयन्त्यथ चापरिमितं पुण्यं प्रतिगृह्णन्त्येवं चैत्यादिषु तद्गुणाधिमुक्तिवशेण(न) स्वचित्तप्रसादादेव पुण्यप्रसूतिमिच्छति(न्ति) ॥[२]

सूत्र उक्तम्—"द्वे दाने। धर्मदानमामिषदानं च ।"[३] तत्रामिषदानमुक्तम्। धर्नदानमुच्यते—

[253] धर्मदानस्वभावो वाक्तत्त्वनामादिगोचरः ।[४]
[V. B, 1. Fol. 103 a.]
(1)अव्याकृतस्वभावत्वान्न नामाद्यन्नदानवत् ॥

यथैव कुशलत्वात् त्रिकर्मस्वभावमामिषदानं नान्नपानम्। सुवर्णादिस्वभावं तत्, अव्याकृतत्वात्। तद्वद्वाचः कुशलत्वाद्धर्मदानं वाक्स्वभावम्। न नामकायादिस्वभावम् ॥

उक्तं दानमयं पुण्यक्रियादिवस्तु[५]। शीलमयमारभ्यते।

[254] शीलं शुभमयं रूपं व्याख्यातं तत्प्रभेदतः ।

(2)कुशलमेव रूपं शीलमयं पुण्यक्रियावस्तु। तत्पुनर्विज्ञप्त्यविज्ञप्तिरूपम्[६]। अविज्ञप्तिरूपमपि त्रिप्रभेदं प्रातिमोक्षध्यानानास्रवसंगृहीतम्। तदपि-

---

[१] Cf. चैत्ये त्यागान्वयं पुण्यं मैत्रादिवदगृह्णति ।
कुक्षेत्रेऽपीष्टफलदा फलबीजाविपर्ययात् ॥ *Ak.* IV. 121.

[२] Cf. अप्रतिगृह्णति कस्मिंश्चित्कथं परित्यागान्वयमपि पुण्यम् । किं पुनः कारणं सति प्रतिग्रहीतरि भवितव्यं पुण्येन नासति ।···यदि हि पुण्यं परानुग्रहादेव स्यात्, मैत्र्याद्यप्रमाण्यसम्यग्दृष्टिभावनायां न स्यात्···। *B. Pañjikā*, IX. 38.

See *Milinda*, p. 98.

[३] Cf. द्वे'मानि भिक्खवे दानानि ।···आमिसदानं च धम्मदानं च । *Aṅg.* I. p. 91. See *Bodhichittotpāda-sūtra-śāstra*, p. 11.

[४] Cf. धर्मदानं यथाभूतसूत्राद्याक्लिष्टदेशना । *Ak.* IV. 125 ab.

On *dharma-dāna*, see *Sikshā*, p. 351.

[५] See *Dhs A.* III. 73-79.

[६] Cf. दौःशील्यमशुभं रूपं शीलं तद्विरतिर्द्विधा ।
प्रतिक्षिप्ताच्च बुद्धेन विशुद्धं तु चतुर्गुणम् ॥ *Ak.* IV 122.

See *Dhs A.* III. 95-102.

व्याख्यातं विस्तरशः[१]। एतदपि शीलमयं पुण्यक्रियावस्तु महाभोगताफलं मोक्षफलं च, प्रणिधिपरिणामनविशेषात्।

शास्त्रे तु तत्प्रधा(3)नत्वात्प्रोक्तं स्वर्गोपपत्तये ॥[२]

तत्पुनरेतच्छीलं विशुद्धं चाविशुद्धं च भवति। तत्र विशुद्धम्

[255] दौःशील्याशुभमूलाद्यैर्दोषैर्यन्न विदूषितम्।
तद्विपक्षशमाङ्गं च यत्तच्छुद्धमिहोच्यते ॥

[३]यत्खलु शीलं दौःशील्येन न विदूषितं प्राणातिपातादिनाऽष्टप्रकारेण, तत्समुत्थापकैश्च क्लेशोपक्लेशैर्मि(4)थ्यादृष्ट्यादिभिरनुपहतम्, क्लेशोपक्लेशविपक्षैश्च स्मृत्युपस्थानादिभिः परिगृहीतम्, निर्वाणपरिणामितं च न संसारबीजभूतं भवति।

पञ्चभिः कारणैरित्यन्ये। मौलैः कर्मपथैर्विशुद्धम्, सामन्तकैर्विशुद्धम्, वितर्कैरनुपहतम्[४], स्मृत्यानुपरिगृहीतम्[५], निर्वाणाभिमुखं चेति तद्विशुद्धशीलमिष्यते। तद्वि(5)पर्ययादविशुद्धं वेदितव्यम्।[३]

व्याख्यातं शीलमयं पुण्यक्रियावस्तु ॥[६]

भावनामयमुच्यते—

[256] पुण्यं समाहितं त्वत्र भावना चित्तभावनात्।[७]

यत्समाधिस्वभावं समाहितं पुण्यं[८] तद्भावनेत्युच्यते। कस्मात्?

---

[१] V. supra, p. 128, n. 4.

[२] Cf. दौःशील्यतद्धेत्वहतं तद्विपक्षशमाश्रितम्। *Ak.* IV. 123 ab.

[३]—[३] This passage is idenitcal with *Akb.* IV. 123 ab. After this, the *Akb.* has :—

चतुर्विधं शीलमित्यपरे। भयशीलं···आशास्तिशीलं···बोध्यङ्गानुलोमं···परिशुद्धं···।
For various kinds of *Śīla*, see *Vm.* I. 25. Buddhaghosha mentions a *pāramitā-śīla* : सब्बसत्तविमोक्खत्थाय पवत्तितं पारमितासीलं पणीतं। *Vm.* I. 31.

[४] वितर्कैरिति कामवितर्कादिभिः। *Sakv.* p. 437.

[५] स्मृत्या···कायादिस्मृत्युपस्थानैः। *Ibid.*

[६] See *DhsA.* III. 80.

[७] Cf. समाहितं तु कुशलं भावना चित्तवासनात्। *Ak.* IV. 123. cd.

[८] समाहितग्रहणमसमाहितनिवृत्यर्थम्। कुशलग्रहणं समाहितास्वादनासंप्रयुक्तक्लिष्टध्याननिवृत्यर्थम्। तत्समाहितकुशलसदृशमुत्पद्यते। *Sakv.* p. 437.

चित्तभावनात् । यथा तैलं पुष्पैश्चम्पकादिभिर्वासितं तन्मयी भवति तत्समाधिसंप्रयुक्तैस्तत्सहभूकैश्च धर्मैश्चित्तं (6)भावितं वासितमित्युच्यते, तन्मयीकरणात् । न चैवमसमाहितमिति । समाहितमेव चित्त(त्तं) भावनामयं पुण्यक्रियावस्तु मैत्र्यादिगुणसंप्रयुक्तं द्रष्टव्यम् ।

कथं पुनरेतत्पुन्य(ण्य)क्रियावस्तु मन्तव्यम् ?[१] किं पुण्यं क्रिया च वस्तु च पुण्यक्रियावस्तु, समाहारलक्षणोऽयं द्वन्द्वः समासोऽथ पुण्यक्रिययोर्वस्तु पुण्यक्रियावस्तु ? (7)अथ पुण्यक्रियाया वस्तु पुण्यक्रियावस्त्विति ?[२] यथा न दोषस्तथास्तु । कथं च न दोषः ? तत्र तावत् । कायवाक्कर्मस्वभावत्वात् त्रिधा कुशलत्वात्पुण्यम् । कर्मात्मकत्वात्क्रिया । तत्समुत्थापिकायाः(या)श्चेतनाया अधिष्ठानात्वाद्वस्तु । या तत्समुत्थापिका चेतना सा पुण्यं च क्रिया च, तत्सहभुवो धर्माः पुण्यमेव । शीलमयं तु काय(8)वाक्कर्मैवेति त्रिधा भवति । भावनामयं मैत्री पुण्यं च पुण्यक्रियायाश्च वस्तु । तत्संप्रयुक्तायाश्चेतनाया मैत्र्यधिष्ठानेनाभिसंस्काराणां मैत्रीसहभूचेतना शीलं च पुण्यक्रिया च । अन्ये तत्सहभुवः पुण्यमेवेति ।[३]

तत्पुनरेतद्भावनामयं पुण्यक्रियावस्तु सर्वं तत्सर्वहेतुत्वेऽपि सति

प्रधान्यादपवर्गाय तदुक्तं सर्वदर्शि(9)ना ॥[४]

उत्तमार्थप्राप्तये खल्वासन्नतमो हेतुर्भावनेति कृत्वा भगवता भावनामयमेव कुशलमूलं विसंयोगाय विधियुक्तमुक्तम् । पुण्यक्रियावस्तुभेदेन त्रिप्रकारं शुभम् ॥[५]

पुनरण्ये(न्ये)न प्रकारत्रयेण शुभभेदो व्याख्यायते—

---

[१] Cf. **पुण्यं क्रियाऽथ तद्वस्तु त्रयं कर्मपथा यथा ।** *Ak.* IV. 112 cd.

[२] Cf. पुण्यमप्येतत् त्रयं क्रियाऽपि वस्त्वपि यथायोगमिति पुण्यक्रियावस्तु । तद्यथा कर्म च ते पन्थानश्च पन्थान एव च कर्मण इति कर्मपथा उक्ताः । *Akb.* IV. 112 cd.

पुण्यं तावदिष्टविपाकत्वात् । **क्रिया** कर्मस्वभावत्वात् । **वस्तु** तत्समुत्थानचेतनायास्तदधिष्ठाय प्रवृत्तेः । *Sakv.* p. 433

[३] Cf. **अन्ये तत्सहभुवः पुण्यमेव** पुण्यस्य वा कारणं पुण्यक्रिया पुण्यप्रयोगस्तस्या एतानि त्रीणि वस्तूनि । एषां सम्पादनार्थं पुण्यप्रयोगारम्भादिति । **कुशलचेतना परमार्थेन पुण्यक्रिया, तस्या एतानि वस्तूनीत्यपरे ।** *Akb.* IV. 112 cd.

[४] Cf. **स्वर्गाय शीलं प्राधान्याद्विसंयोगाय भावना ।** *Ak.* IV. 124 ab.

[५] After this, the Kośakāra deals with one more point :—

सूत्र उक्तम्—"चत्वारः पुद्गला ब्राह्मं पुण्यं प्रसवन्तीति" । कतमत्तद्ब्राह्मपुण्यम् ? यत्तल्लक्षणविपाकस्य कर्मणः परिमाणज्ञापनायोक्तमिति **वैभाषिकाः । पूर्वाचार्यास्तु** व्याचक्षते—

चतुर्णां ब्राह्मपुण्यत्वं कल्पं स्वर्गेषु मोदनात् । *Akb* IV. 124 cd. See *Aṅg.* v. p. 76.

[257] पुण्यनिर्वाणभागीयं निर्वेधानुगुणं तथा।
शासनेऽस्मिन्समासेन शुभमूलं त्रिधेष्यते ॥[१]

[V. A, 1. Fol. 103b.](1) पुण्यभागीयं येन देवमनुष्योपपत्तिबीजं प्रतिगृण्हाति महेशाख्यैश्च कुलमहाभोगरूप्यचक्रवर्तिशक्रपुष्पकेतुब्रह्मत्वादीनां प्राप्तये फलमाक्षिपति। मोक्षभागीयं[२] येनाविकल्प्य मोक्षाशयावस्थानादवश्यं परिणि(नि)र्वाणधर्मा भवति। निर्वेधभागीयमूष्मगतमू[ष्मं] चतुर्विधम् ॥[३]

अथ यदिदं लोक उच्यते लिपिमुद्रागणना(2)संख्येति एषां कः स्वभावः? उच्यते—

[258] लिपिमुद्राऽथ गणना कायवाक्कर्मलक्षणा।
संख्या खल्वपि विज्ञेया मनस्कर्मस्वभाविका ॥[४]

तत्र तावल्लिपिमुद्रे योगप्रवर्तितं कायकर्मसमुत्थानमिति[५] पञ्चस्कन्धात्मिका लिपिः। येण(न) तु कर्मणाऽक्षराणि निर्वर्त्यन्ते तत्कर्म लिपिरित्युच्यते। नाम यत्खन्यते दन्तविषाणसुवर्णादिषु सा मुद्रा। न (3)तु येण(न) कर्मणा खन्यते तत्कर्मोच्यते। काव्यमपि योगप्रवर्तितं वाक्कर्मसमुत्थानं पञ्चस्कन्धाः। संख्यापि योगप्रवर्तितं मनस्कर्म। यन्मनसा संकलितं धर्माणां सा तु सपरिवारा चतुस्कन्धस्वभावेति[६] ॥[७]

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ चतुर्थाध्यायस्समाप्तः ॥

---

[१] पुण्यनिर्वाणनिर्वेधभागीयं कुशलं त्रिधा। *Ak.* IV. 125 cd.
Also cf. अतुट्ठो सीलमत्तेन निब्बिदं योनुयुञ्जति।
होति निब्बेधभागीयं सीलमेतस्स भिक्खुनो ॥ *Vm.* I. 39.

[२] See *LVPAk.* IV. p. 252, n. 5.

[३] V. infra, *Ad. kārikā* 421 and 422.

[४] Cf. योगप्रवर्तितं कर्म ससमुत्थापकं त्रिधा।
लिपिमुद्रे सगणनं काव्यं संख्या यथाक्रमम् ॥ *Ak.* IV. 126.

[५] —ससमुत्थानमिति। सचित्तचैतसिककलापम्। येन तत्कायकर्मोत्थाप्यते। ···लिपिर्मुद्रा च। कारणे कार्योपचारात्। येन हि कायकर्मणा लिपिर्लिख्यते मुद्रा वा खन्यते। सा लिपिर्मुद्रा च शास्त्रेभिप्रेते। न यथा लोके। लोकेह्यक्षरचिह्नं पुस्तकादौ लिपिरिष्यते। अक्षरानक्षरचिह्नं च मुद्रेति। *Sakv.* p. 439.

[६] यन्मनसा संकलनं धर्माणामिति। एकं द्वे त्रीणीत्येवमादि सा संख्या। यत्तु वाचा न मनसा सा गणनेत्याभिधार्मिकाः। *Ibid.* See *Milinda*, p. 81.
See *LVPAk.* V. p. 254.

[७] After this, the *Ak.* has one more (last) *kārikā* dealing with धर्माणां केचित् पर्यायाः। (*Ak.* IV. 127).

पञ्चमोऽध्यायः ।

प्रथमः पादः ।

उक्तानि कर्मानि(णि) । अथ यदयं लोकः पञ्चग(4)ति[१] चक्रावर्तपरिवर्तनिमित्तानि कर्माण्याचिनोति, कार्याणि चोत्सृज्याकार्यकर्मकारी भवति, दक्षिणं च मार्गं हित्वा वामं वर्त्माश्रयति, परमप्रशान्तं च परं ब्रह्मापास्यानेकदुःखोपद्रवनीडभूते संसारे जन्म प्रतिपद्यते तत्र को हेतुरित्यभिधीयते—

[259] अकार्यप्रवणो लोको दुःखभागी च यद्वशात् ।
रागादी(5)न् भवसंबन्धान्क्लेशान्वक्ष्यामि तानहम् ॥

ते पुनः क्लेशाः

[260] स्वशक्तिजक्रियोद्भूतैर्विशेषैस्ते तु नामभिः ।
आत्तसामान्यसंज्ञाकाश्चोद्यन्तेऽनुशयादिभि[ः] ॥[२]

तत्र तावत्सामान्यसंज्ञा स्वक्रियानिर्जाताः क्लिश्नन्तीति क्लेशाः[3] अनुशेरत

---

[१] नरकप्रेततिर्यग्मनुष्यदेवगतयः ।

[२] Cf. आसयन्त्यास्रवन्त्येते हरन्ति श्लथयन्त्यतः ।
उपगृह्णन्ति चेत्येषामास्रवादिनिरुक्तयः ॥ *Ak*. v. 40.

[३] क्लेशो हि प्रवर्तमानो दशकृत्यानि करोति । मूलं च दृढीकरोति, सन्ततिमवस्थापयति, क्षेत्रमापादयति, निःस्यन्दं प्रवर्तयति, कर्मभवमभिनिर्हरति, स्वसंभारं परिगृह्णाति, आलम्बने संमोहयति, विज्ञानस्रोतो नमयति, कुशलपक्षाद्व्युत्क्रामयति, बन्धनार्थं च स्फुरति धात्वनतिक्रमयोगेनेति । *Akb*. v. 1a.

—यो धर्मो उत्पद्यमानोऽप्रशान्तलक्षण उत्पद्यमानेन येन कायचित्तप्रबन्धाप्रशमप्रवृत्तिः । इदं क्लेशलक्षणम् । *Asm*. p. 43.

Cf. अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ।

···क्लेशा इति पञ्चविपर्यया इत्यर्थः । ते स्यन्दमाना गुणाधिकारं द्रढ़यन्ति परिणाममवस्थापयन्ति कार्यकारणस्रोत उन्नमयन्ति परस्परानुग्रहणतन्त्रीभूत्वा कर्मविपाकं चाभिनिर्हरन्ति । *Yoga-bhāshya*, II. 3.

Also cf. संसारस्य हि कर्म क्लेशाश्च कारणम् । तयोश्च क्लेशः प्रधानम् । तथा हि क्लेशाधिपत्यत्वात् कर्म पुनर्भवाक्षेपसमर्थं भवति नान्यथा । तथा आक्षिप्तपुनर्भवमपि कर्म क्लेशाधिपत्यादेव पुनर्भवो भवति नान्यथा । एवं च क्लेशा एव संसारप्रवृत्तेः प्रधानत्वान्मूलम् । *Tvb*. 19.

इत्यनुशयाः। आभवाग्रमुपादाय यावदवीचिं स्रवन्ति स्रावयन्ति च चित्तसन्ततिमित्यास्रवाः[१]। आस्रवानिति (6)पञ्चलक्षणो(णान)त्र संयोजन्तीति संयोजनानि। ग्रन्थयन्तीति ग्रन्थाः। योजयन्तीति योगाः। अपहरन्तीत्योघाः। उपाददत इत्युपादानान्येषां सामान्य नाम क्लेश इति ॥

तत्र के कियन्तो वाऽनुशयाः ? तदवद्योत्यते—

[261] रागप्रतिघसंमोहमानकाङ्क्षाकुदृष्टयः ।
षडेतेऽनुशयाः प्रोक्ताः श्रेयोद्वारविबन्धिनः ॥[२]

एते खलु षडनुश(7)याः संसारप्रवृत्तिहेतवः श्रेयोमार्गविबन्धिनश्च शास्त्र उक्ताः। तेषां निरुक्तिः सन्तानानुगता इत्यनुशयाः[३] धात्रीचैलमलवत्। अनुबध्नन्तीति वाऽनुशयाः, खचरजलचरवत्। त एते वृत्तितश्च द्रष्टव्याः, हिङ्ग्वादिभक्षणवत्। फलतश्च पारावतभुजङ्गसूकरजन्मापातनवत्। पुद्गलतश्च नन्दाङ्गुलिमालसुनक्ष(8)त्रादिवत्।[४]

[५]अथ रागादयोऽनुशयाः कथं द्रष्टव्याः ? किं रागादय एवानुशयाः[६], आहोस्विद्रागादीनामनुशयाः ? किञ्चातः। रागादय एवानुशयाश्चेत्सूत्र-

---

[१] V. supra, p. 18, n.5.

[२] Cf. मूलं भवस्यानुशयाः षड्रागः प्रतिघस्तथा ।
मानोऽविद्या च दृष्टिश्च विचिकित्सा च ते पुनः ॥ *Ak.* v. 1.

The Vijñāna-vādin enumerates these six as *kleśas* :—
क्लेशा रागप्रतिघमूढयः । मानदृग्विचिकित्साश्च । *Triṁśikā*, 11 d, 12 a.

[३] V, supra, pp. 18—19. See infra, *Ad.* *kārikā* 287—8.

[४] Nanda=Sundarānanda. see *DPPN*. II. p. 10. Aṅgulimāla is the name of a famous brigand. See *DPPN*. I. p. 22. Sunakshatra (Pāli Sunakkhatta) was a Buddhist monk who later on defamed the Buddha. See *DPPN*. II. p. 252. These three are mentioned to illustrate *rāga*, *pratigha* and *dṛishṭi*, respectively. Cf. दुर्दमानामपि केषाञ्चित् पुरुषदम्यानां तीव्ररागद्वेषमोहमानानामार्यसुन्दरानन्दाङ्गुलीमालोरुविल्वाकाश्यपमहाराजकप्फिणप्रभृतीनां विनायक इति प्रदर्शनार्थम् । *Aaa.* p. 162.

[५] This *Adv.* (from अथ रागादयोऽनुशयाः to तस्मात्संप्रयुक्ता एवानुशयाः) is almost identical with *Akb.* v. 1 a. The *Akb.*, however, begins : कथमिदं ज्ञातव्यम् । कामराग एवानुशयः कामरागानुशयः आहोस्वित् कामरागस्यानुशयः कामरागानुशयः ?

[६] 'आहोस्वित् कामराग एवानुशय' इति । वैभाषिकनयेन पर्यवस्थानमेवानुशयः । वात्सीपुत्रीयनयेन प्राप्तिरनुशयः । सौत्रान्तिकनयेन बीजम् । *Sakv.* p. 442.

विरोधः—"इहैकत्यो न कामरागपर्यवस्थितेन चेतसा बहुलं विहरत्युत्पन्नस्य कामरागपर्यवस्थाने(न)स्योत्तरे(र)णि(नि)स्सरणं[१] यथाभूतं प्रजानाति। तस्य तत्कामरागप(७)र्यवस्थानं स्थामशः सम्यक्सुसंवहतं[२] सानुशयं प्रहीयते" इति।[३] रागादीनामनुशया इति चेद्विप्रयुक्तानुशयप्रसङ्गादभिधर्मविरोधः—"कामरागानुशयस्त्रिभिरिन्द्रियैस्संप्रयुक्तः"[४] इति। कर्मधारय एव परिगृह्यते न षष्ठीसमास इति वैभाषिकाः। ननु चोक्तं सूत्रविरोध इति। सानुशयं सानुबन्धमित्यर्थः[५]।[६] औप[V. B, 2. Fol. 104a.](1)चारिको वा सूत्रेऽनुशयशब्दः

---

[१] उत्तरनिःसरणं इति पश्चान्निःसरणमित्यर्थः। *Ibid.*

[२] सम्यक्त्वसमवहतम् in *Akb.*

[३] Cf. सुतवा च खो आनन्द अरियसावको···सुविनीतो न कामरागपरियुट्ठितेन चेतसा विहरति न कामरागपरेतेन उप्पन्नस्स च कामरागस्स निस्सरणं यथाभूतं पजानाति; तस्स सो कामरागो सानुसयो पहीयति। *M. sutta* 64. See *Aṅg.* III. p. 233.

—**परियुट्ठितेन।** ति···गहितेन अभिभूतेन,···परेतेना ति···अनुगतेन, **निस्सरणं** ति दिट्ठिनिस्सरणं नाम निब्बानं···, **सानुसयो पहीयती ति वचनतो पनेत्थ एकच्चे अञ्ञं संयोजनं** अञ्ञो **अनुसयो** ति वदन्ति। यथा हि सव्यञ्जनं भत्तं ति वुत्ते भत्ततो अञ्ञं व्यञ्जनं होति। एवं सानुसया ति वचनतो परियुट्ठानसक्कायदिट्ठितो अञ्ञेन अनुसयेन भवितब्बं ति नेसं लद्धि। ते ससीसं पारुपित्वा ति आदीहि पटिक्खिपितब्बा। ···तस्मा सो येव किलेसो बन्धनट्ठेन संयोजनं **अप्पहीनट्ठेन अनुसयो** ति इदमत्थं सन्धाय भगवता सानुसया पहीयतीति एवं वुत्तं ति वेदितब्बं। *MA.* III. p. 144.

[४] **अभिधर्मविरोध इति।** "कामरागानुशयस्त्रिभिरिन्द्रियैः सम्प्रयुक्तः कतमैस्त्रिभिः। सुखसौमनस्योपेक्षेन्द्रियैः सम्प्रयुक्तः" इति। न हि विप्रयुक्तस्य प्राप्तिलक्षणस्य एभिरिन्द्रियैः संप्रयोगो युज्यत इति शास्त्रविरोधः। *Sakv.* p. 443.

Cf. कत्थ कामरागानुसयो अनुसेति? कामधातुया द्वीसु वेदनासु। एत्थ कामरागानुसयो अनुसेति। *Yamaka,* I. p. 268.

—कामावचरभूमियं **सुखाय** च **अदुक्खमसुखाय** च वेदनासु। एत्थ **अनुसेती ति** इमासु द्वीसु वेदनासु **उप्पज्जति।**···कामधातुया द्वीसु वेदनासु अनुसयमानो चेस ताहि वेदनाहि **सम्पयुत्तेसु** सञ्ञासंखारविञ्ञाणेसु पि अनुसेति एव।···यस्मा इमे द्वे वेदनाव सातसंतसुखत्ता अस्सादनट्ठेन कामरागानुसयस्स उप्पत्तिया सेससम्पयुत्तधम्मेसु पधानं तस्मा 'द्वीसु वेदनासू···' ति वुत्तं। *Yamaka A.* p. 239. (SHBS. Vol. xl.)

[५] नास्ति विरोधः। सानुशयं सानुबन्धमित्यर्थात्। in *Akb.*

[६] 'सानुशयं सानुबन्धमित्यर्थाद्' इति। कामरागस्यानुबन्धोऽनुशयशब्देनोक्तः। **अनुबन्धः** पुनः क्लेशान्तरस्योत्पादानुकूल्येनावस्थानम्। अनुवृत्तिर्वा अनुशयः। अनुशयं प्रहीयते। न पुनरनुवर्तते संक्लेश इत्यर्थः। *Sakv.* p. 443.

प्राप्तो(प्तौ)[१] यथा दुःखोऽग्निरिति । लाक्षणिकस्त्वभिधर्मे क्लेश एवानुशयः[२]। तस्मात्संप्रयुक्ता एवानुशयाः।[३]

"एवं तु साधु यथा दार्ष्टान्तिकानाम्' इति कोशकारः।[४] कथं च दार्ष्टान्तिकानाम् ?[५] "कामरागस्यानुशयः कामरागानुशयः।[६] न चानुशयः संप्रयुक्तो न विप्रयुक्तः, तस्याद्रव्यान्तरत्वात्।[७] सुप्तो हि क्लेशोऽनुशय(2)इत्युच्यते। प्रबुद्धः पर्यवस्थानम्। का च तस्य प्रसुप्तिः ? असमुखीभूतस्य बीजभावानुबन्धः। कः प्रबोधः ? संमुखीभावः। कोऽयं बीजभावो नाम ? आत्मभावस्य क्लेशजं(जा) क्लेशोत्पादनशक्तिः, यथा चाङ्कुरादीनां [७]शालि-

---

[१] 'औपचारिको वा···' इति उपचारे भव औपचारिकः। कुत्रौपचारिक इत्याह—'प्राप्तौ'। **मुख्यवृत्त्या पर्यवस्थानेऽनुशयशब्दो वर्तते, उपचारेण तु प्राप्तौ**। तस्यानुशयहेतुभावात्। *Ibid.*

[२] 'क्लेश एव' इति। आलम्बनसम्प्रयोगतश्चानुशेरत इत्यनुशया इति। *Ibid.*

[३] After this, the Kośakāra gives the following details :—

···तस्मात् **संप्रयुक्ता एवानुशयाः**। कथमिदं गम्यते ? अनुशयानां
"चित्तक्लेशकरत्वादावरणत्वाच्छुभैर्विरुद्धत्वात्।"

यस्मादनुशयैः क्लिष्टं चित्तं भवत्यपूर्वं कुशलं नोत्पद्यते उत्पन्नाच्च परिहीयते तस्मान्न विप्रयुक्ताः। अथ विप्रयुक्तैरप्येवं स्यात्। कुशलं न कदाचिदुपलभ्येत। तेषां नित्यसन्निहितत्वात्। उपलभ्यते च। अतः

"कुशलस्य चोपलम्भादविप्रयुक्ता इहानुशयाः ॥" इति।

तदिदमज्ञापकम्। यस्माद्यो विप्रयुक्तमनुशयमिच्छति स एतत्सर्वमनुशयकृतं नेच्छति। क्लेशकृतमेवेच्छति। *Akb.* v. 2 a.

—**आचार्य आह** तदिदमज्ञापकम्। यदिदं **वैभाषिकैरुक्तम्**। चित्तक्लेशकरत्वादित्यादि। यो हि विप्रयुक्तमनुशयमिच्छतीति **वात्सीपुत्रीयः**। *Sakv.* p. 444.

[४] Cf. **एवं तु साधु यथा सौत्रान्तिकानाम्**। कथं च सौत्रान्तिकानाम् ?··· *Akb.* v. 2 a. V. supra, p. 47. n. 4.

[५] This *Adv.* from कामरागस्यानुशयः to शालिफलोत्पादनशक्तिरिति, is identical with *Akb.* v. 2 a.

[६] Cf. **कामरागानुसयो** ति आदीसु कामरागो च सो अप्पहीनट्ठेन अनुसयो ति कामरागानुसयो। सेसपदेसु पि एसेव नयो। *Yamaka A.* p. 239 (SHBS. vol. xl.)

[७–७] Yaśomitra gives the following comment :—कामरागस्यानुशय इति नास्ति सूत्रविरोधः। किन्तु विप्रयुक्तोऽनुशय इति प्राप्नोति। अत आह—'**न चानुशयः संप्रयुक्तो न विप्रयुक्तः**' इति। कथमित्याह। **तस्याद्रव्यान्तरत्वात्** इति। शक्तिरूपस्य बीजस्य रागादिभ्योऽनर्थान्तरत्वात्। **आत्मभावस्य** आश्रयस्य **क्लेशजा** पूर्वोत्पन्नक्लेशजनिता **क्लेशोत्पादनशक्तिः** क्लेशोत्पादनाय शक्तिः **यथाऽनुभवज्ञानजा स्मृत्युत्पादनशक्तिः** न

फलजा शालिफलोत्पादनशक्तिः" इति ।[१]

[२]"यर्त्तीह सूत्र एव क्लेशोऽनुशय उक्तः षट्षट्के[३]—"सोऽस्य भवति सुखायां वेदनायां रागानुशयः"[४] इति ? भवतीति वचनाददोषः। नासौ तदे(दै)वानुशयः। कदा तर्हि ? यदा प्रसुप्तो भवति। हेतौ वा फलोपचार[५] एषः"[६] इति ।[७]

द्रव्यान्तरभूता तद्वत् । स्मृत्युत्पादनहेतुर्द्रव्यान्तरभूतः कश्चिद्विप्रयुक्त इत्याशंक्य दृष्टान्तान्तरमुपन्यस्यति । यथा चाङ्कुरादीनामिति विस्तरः । *Sakv.* p. 444.

[१] After this, the *Akb.* has the following :—शालिफलोत्पादनशक्तिरिति । यस्तु क्लेशानां बीजार्थमर्थान्तरं कल्पयति, तेन स्मृतिबीजमप्यर्थान्तरं कल्पयितव्यं जायते ।

—यस्त्विति वात्सीपुत्रीयः । *Sakv.* p. 444.

[२] From यर्त्तीह to फलोपचार एषः, is identical with *Akb.* v. 2 a.

[३] Cf. **छछक्कसुत्त ।** *M. sutta* 148.

[४] Cf. सो सुखाय वेदनाय फुट्ठो समानो अभिनन्दति, अभिवदति, अज्झोसाय तिट्ठति । तस्स रागानुसयो अनुसेति । *M. sutta* 148.

[५] तदुपचार in *Akb.*

[६] यर्त्तीह **सूत्र** 'एव क्लेशोऽनुशय उक्तः **षट्षट्के सूत्रे**···रागानुशयः' इति । राग एवानुशयः । सुखवेदनावस्थायां हि रागः समुदाचरन्नेवमुक्तः । न तु तस्य बीजमित्यभिप्रायः । 'भवतीति वचनान्नासौ तदैवानुशय' इति । अनुशय एव रागस्यायमुक्तः । न रागः । भवतीति वचनात् । तस्यामवस्थायां उत्पद्यमानस्य रागस्यानुशयो भवतीति बीजमुत्पद्यते । न तूत्पन्नमिति । बीजप्रकृतावस्थाऽत्र कथ्यत इत्यभिप्रायः । 'कदा तर्हि भवती'ति ? कदाऽनुशयोस्तीत्यर्थः । 'यदा प्रसुप्तो भवति' यदोपरतो भवतीत्यर्थः । 'हेतौ वा तदुपचार' इति । हेतौ रागे अनुशयोपचारः । रागो हि रागानुशयस्य हेतुः । तथा हि रागजा रागोत्पादनशक्ती रागानुशय इत्युक्तमिति । तदिदमुक्तं भवति । **क्वचिदनुशयशब्देन बीजमुच्यते । क्वचित्पर्यवस्थानमिति ।** *Sakv.* p. 444.

[७] The *Kathāvatthu* contains various controversies on this topic :—

(i) **तिस्सो पि अनुसयकथा** (=अनुसया अब्याकता ति ?—अनुसया अहेतुका ति ?—अनुसया चित्तविप्पयुत्ता ति ?) *Kv.* IX. 4. (ii) **अञ्ञो अनुसयो ति कथा,** and (iii) **परियुट्ठानं चित्तविप्पयुत्तं ति कथा ।** *Kv.* XIV. 5-6.—

इदानि **अनुसया अब्याकता अहेतुका चित्तविप्पयुत्ता** ति **तिस्सो अनुसयकथा** नाम होन्ति । तत्थ यस्मा पुथुज्जनो कुसलाब्याकते चित्ते वत्तमाने **सानुसयो** ति वत्तब्बो । यो चस्स तस्मिं खणे हेतु, न तेन हेतुना अनुसयो सहेतुको, न तेन चित्तेन सम्पयुत्तो, तस्मा ते अब्याकता

तदेतत्सौत्रान्तिकैरन्तर्गतं बुद्धवचननीतिश्रवणकौसीद्यमाविर्भाव्यते ।

अहेतुका चित्तविप्पयुत्ता ति येसं लद्धि सेय्यथा पि **महासंघिकानञ्चेव सम्मितीयानञ्च ।** ते सन्धाय तीसु पि कथासु पुच्छा सकवादिस्स । *KvA.* IX. 4.

इदानि **परियुट्ठानं चित्तविप्पयुत्तं ति कथा** नाम होति । तत्थ यस्मा अनिच्चादितो मनसिकरोतो पि रागादयो उप्पज्जन्ति···तस्मा परियुट्ठानं चित्तविप्पयुत्तं ति येसं लद्धि, सेय्यथा पि **अन्धकानं** येव ।···*KvA.* XIV. 6.

Buddhaghosha in the *YamakaA.* sums up this whole controversy and gives the Sthavira-vādin's view :—

अनुसया ति केनट्ठेन अनुसया ? अनुसयनट्ठेन ।···**अप्पहीनट्ठो,** एते हि अप्पहीनट्ठेन तस्स तस्स सन्ताने अनुसेन्ति नाम । तस्मा अनुसया ति वुच्चन्ति । **अनुसेन्ती** ति अनुरूपं कारणं लभित्वा उप्पज्जन्तीति अत्थो । अथापि सिया अनुसयनट्ठे नाम अप्पहीनाकारो । अप्पहीनाकारो च उप्पज्जती ति वत्तुं न युज्जति, तस्मा न अनुसया उप्पज्जन्ती ति ? तत्रिदं पटिवचनं । **अप्पहीनाकारो अनुसयो ति पन अप्पहीनट्ठेन थामगतकिलेसो वुच्चति । सो चित्तसम्पयुत्तो सारम्मणो सप्पच्चयट्ठेन सहेतुको एकन्ताकुसलो अतीतोपि होति अनागतो पि तस्मा उप्पज्जतीति वत्तुं युज्जति ।** तत्रिदं **पमाणं । अभिधम्मे ताव कथावत्थुस्मि** "अनुसया अब्याकता अनुसया अहेतुका अनुसया चित्तविप्पयुत्ता" ति सब्बे वादा पटिसेधिता । **पटिसम्भिदामग्गे** 'पच्चुप्पन्ने किलेसे पजहती' ति पुच्छं कत्वा अनुसयानं पच्चुप्पन्नभावस्स अत्थिताय 'थामगतानुसयं पजहती' ति वुत्तं । **धम्मसंगहे** पन मोहस्स पदभाजने 'अविज्जानुसयो अविज्जा-परियुठठानं अविज्जालङ्गी मोहो अकुसलमूलं, अयं तस्मि समये मोहो होती' ति अकुसलचित्तेन सद्धि अविज्जानुसयस्स उप्पन्नभावो वुत्तो ।···तस्मा अनुसेन्तीति अनुरूपं कारणं लभित्वा उप्पज्जन्तीति अदि यं वुत्तं···यम्पि 'चित्तसम्पयुत्तो सारम्मणो'ति आदि वुत्तं, तम्पि सुवुत्तमेव । **अनुसयो ति नामेस परिनिप्फन्नो चित्तसम्पयुत्तो अकुसलधम्मो ति निट्ठमेत्थ गन्तब्बं ।** *Yamaka A.* p. 239. (SHBS. yol. xl.)

For an explanation of the terms *anuśaya* and *pariyuṭṭhāna*, see *A Dissertation on the Yamaka*, by Ledi Sadaw :—

तिस्सो हि कामरागस्स भुम्मियो: **अनुसयभुम्मि, परियुट्ठानभुम्मि, वितिक्कमभुम्मीति;** तथा पटिघस्स ···पे···अविज्जाय । तत्थ कामरागो, यदा कायङ्गवाचङ्गानि चालेन्तो पवत्तति, तदा तथा पवत्ति तस्स **वितिक्कमभुम्मि** नाम । यदा कायङ्ग-वाचङ्गचलनं अपत्वा मनोद्वारे व एव उट्ठानं पापुणन्ति, तदा तथा पवत्ति तस्स **परियुट्ठानभुम्मि** नाम । मनोद्वारे पि उट्ठानं अपत्वा निच्चकालं चित्तसन्तानानुगतो अवत्थाकारविसेसो, तस्स कामरागस्स **अनुसमभुम्मि** नाम । सो हि उप्पादं पि अपत्वा चित्तसन्ताने सयनाकारेन पवत्तमानो हुत्वा यदा छसु द्वारेसु अञ्ञतरस्मि द्वारे रज्जनियवत्थुभूतं आरम्मणं आपाथं आगच्छति, तदा अयोनिसो भवङ्गं आवट्टेत्वा परतो परियुट्ठानभुम्मि पत्वा कामरागसहगतं जवनचित्तं उप्पादेति, तदा सचे तं आरम्मणं दुब्बलं होति, तस्मि आरम्मणे निरुद्धे पुन सो कामरागो निरुज्झित्वा पुन अनुसयभुम्मि पतिट्ठानि । यदि तं आरम्मणं बलवं होति, परियुट्ठानभुम्मियं पि अट्ठत्वा वितिक्कमभुम्मि पत्वा कायङ्गं वा चालेन्तो पवत्तति ।·· *Yamaka*, II. pp. 258-9 (Appendix).

कथम्? उक्तोत्तरत्वात्। उक्तमत्र कर्मचिन्ता[१]यामुत्तरं तत्त्वसप्ततौ[२] च। तत्स्म(4)र्यताम्। मा प्रमोषीः।

पुनश्चापदिश्यते। सौत्रान्तिकपरिकल्पिते प्रतिबीजकल्पे चित्तशक्तिबीजभावनापक्षे निवृत्त्युत्तरमन्यानन्यत्वादिदोषात्। नान्यानन्य इति बीजवासनावस्थाने चित्तविनाशाभ्युपगमे च मध्यमाप्रतिपत्तिसिद्धिरिति चेत्। न। चित्तस्वभावशक्तिक्रियाभावे तदन्तद्वयासिद्धौ मध्यमाप्रतिपदनुपपत्तेः ख(5)पुष्पमयदण्डवत् ॥

ते पुनः

[262] रागद्वेधात् मताः सप्त[3] दृष्टिभेदाद्दश स्मृताः[४] ।
भूयोऽष्टानवतिर्ज्ञेया धात्वाकारादिभेदतः ॥

तत्र कामरागभवरागभेदं पुरस्ताद्वक्ष्यते। दृष्टिभेदोऽपि सत्कायदृष्ट्यादिभेदेन पञ्चधा। रागभेदं च द्विधा वक्ष्यामः। ते पुनरेते सर्व एवानुशया यथासंभवं धात्वाकारप्रकारभेदेनाष्टान(6)वतिर्भवन्ति।

तत्र केचित्पण्डिता दर्शयन्ति। धातुभेदेन कामावचराः षड्त्रिंशद्दर्शण(न)भावनाहेयाः। द्वात्रिंशद्दर्शनहेयाः। रूपावचरा एकत्रिंशदुभयहेयाः, अष्टाविंशतिर्दर्शनहेयाः पञ्च प्रतिघवर्ज्याः। एवमारूप्यावचराः।

तत्र कथं कामावचराः षड्त्रिंशद्भवन्ति? दर्शनभावनाहेयप्रकारणै(नै)यस्य[भेदात्]। दृष्टीनामपि (7)धात्वाकारप्रकारभेदात् षड्त्रिंशत्वम्। प्रतिघस्य धातुनैयम्यात् पञ्चत्वम्। वयं पुनरेषां भेदं श्लोकानुगतमेव दर्शयिष्यामः।

तत्र कत्येषामष्टानवतेरनुशयाणां दुःखदर्शनहेयाः कति यावद्भावनाहेयाः? तत्र कामधातौ तावत्। प्रतिदुःखादिसत्यं यथाक्रमं दश सप्त सप्ताष्टौ दुःखादिदर्शण(न)हेया द्वात्रिंशत्का(8)मधातौ भवन्ति। तेषु तेषां विप्रतिपत्तेः। एवं रूपारूप्यधात्वोरभ्युह्य वक्तव्यम् ॥

---

[१] This refers to the Fourth *Adhyāya* of *Adv.*

[२] *Tattva-saptati* appears to be a title of some work by the author of *Adv.*, written on the model of the *Paramārtha-saptati* of Vasubandhu.

[३] Cf. षड्रागभेदात्सप्तोक्ताः। *Ak.* v. 2 a.

[४] पुनरेते षडनुशया अभिधर्मे दश क्रियन्ते। *Akb.* v. 2 d.

—अभिधर्म इति न सूत्र इत्यभिप्रायः। *Sakv.* p. 445.

[263] कामरागो भवाख्यश्च द्विधा रागः प्रभिद्यते ।
प्रायो बहिष्प्रवृत्तत्वादत्तवृत्त्यादिभेदतः ॥[1]

यथाक्रमम् । उक्तो रागभेदः ॥

दृष्टिभेदो निर्दिश्यते—

[264] सत्कायान्तद्वयग्राहौ मिथ्यादर्शण(न)मेव च ।
दृष्टिशीलव्रतामर्शावित्येताः पञ्च दृष्टयः ॥[2]

(9)ते पुनरेते प्रभिद्यमाना धातुप्रकाराकारभेदेनाष्टानवतिर्भवन्ति ।[3] षट्त्रिंशत्कामावचराः । एकत्रिंशद्रूपावचराः । एकत्रिंशदारूप्यावचराः । दर्शण(न)भावनाहेयप्रकारणै(नै)यस्यात् ॥

---

[1] Cf. **षड्रागभेदात्सप्तोक्ता भवरागो द्विधातुजः ।
अन्तर्मुखत्वात्तन्मोक्षसंज्ञाव्यावृत्तये कृतः ॥** *Ak*. v. 2.

समापत्तिरागो हि तेषां प्रायेण । स चान्तर्मुखप्रवृत्तस्तस्मात् भवरागः । ते च सत्त्वाः समापत्तिसाश्रयामास्वादयन्तः आत्मभावमेवास्वादयन्ति कामवीतरागत्वात् । अतः स रागो भवराग इत्युक्तः । *Akb*. v. 2. आस्वादनासंप्रयुक्ते ध्याने प्रायेण तेषां रागः । स चान्तर्मुखप्रवृत्तः समाहितरूपत्वात् । तथा च सति मोक्षसंज्ञोपतिष्ठते । तद्विच्छेदनार्थं भगवान् देशयामास कामरागो भवराग इत्येवमादि । भवे राग एषः, नैष मोक्षे । *Sakv*. p. 444.

Cf. **भवरागानुसयो** पन किञ्चापि दिट्ठिविप्पयुत्तेसु चतुसु चित्तेसु उप्पज्जनतो सहजातानुसयवसेन **कामधातुया द्वीसु वेदनासु अनुसेती ति वत्तब्बो भवेय्य । कामधातुयं पनेस द्वीहि वेदनाहि सद्धिं उप्पज्जमानो पि रूपारूपावचरधम्ममेव पटिलभति ।** कामधातुया परियापन्नं एकधम्मं पि आरम्मणं न करोति, तस्मा आरम्मणानुसयवसेन नियमं कत्वा "रूपधातुया अरूपधातुया एत्थ भवरागानुसयो अनुसेती" ति वुत्तं । अपि च **रागो नामेस कामरागभवरागवसेन** दुविधो । तत्थ कामरागो कामधातुया द्वीसु वेदनासु अनुसेतीति वुत्तो । सचे पन भवरागो पि कामरागो विय एवं वुच्चेय्य, कामरागेन सद्धिं देसना संकिण्णा विय भवेय्याति रागकिलेसं द्विधा भिन्दित्वा कामरागतो भवरागस्स विसेसदस्सनत्थं पि एवं देसना कता । *YamakaA*. p. 242. (SHBS. vol. xl.)

[2] Cf. **दृष्टयः पञ्च सत्कायमिथ्यान्तग्राहदृष्टयः ।
दृष्टिशीलव्रतपरामर्शाविति पुनर्दश ॥** *Ak*. v. 3.

[3] पुनरेते दशानुशया **अभिधर्मे**ऽष्टानवतिः क्रियन्ते । *Akb*. v. 3.

कति पुनरेभ्यः कामधातौ दर्शनहेयाः[१] कति यावद्भावनाहेयाः[२] ? तदवद्योत्यते—

[265] दशेह दुःखदृग्घेयाः

सर्वेऽपि दशेह कामधातौ [V. A, 2. Fol. 104 b.] (1)दुःखे ⌈विप्रतिपन्नत्वाद्दुःखदर्शनहेयाः ।

सप्त हेत्वीक्षणक्षयाः ।

एभ्यो दशभ्यः सत्कायान्तर्ग्राहदृष्टिशीलव्रतपरामर्शत्रयं हित्वा ।

सप्तापवर्गदृग्घेयाः

एत एव

अष्टौ मार्गेक्षणक्षयाः ॥[३]

सत्कायान्तर्ग्राहदृष्टी हित्वा। तेऽपि फलभूतेषु स्कन्धेषु विप्रतिपन्न[त्वा]द्दुःखदर्शनहेयैव ।

[266] दृष्टिहेयावलम्बित्वात्सदाकारपरिग्र(2)हात् ।
रागादयस्तु चत्वारो ज्ञेया मार्गद्वयक्षयाः ॥[४]

ते दर्शनप्रहातव्यास्तेषां चतुर्णां रागादीनां यस्मादालम्बनमतस्तत्प्र-

---

[१] दस्सनत्तिके **दस्सनेना** ति सोतापत्तिमग्गेन । सो हि पठमं निब्बाणं दस्सनतो दस्सनं ति वुत्तो । **भावनाया** ति सेसमग्गत्तयेन । सेसमग्गत्तयं हि पठममग्गेन दिट्ठस्मि येव धम्मे भावनावसेन उप्पज्जति, अदिट्ठपुब्बं किञ्चि न पस्सति, तस्मा भावना ति वुच्चति । *Dhs A.* II- 24.

कतमे धम्मा दस्सनेन पहातब्बा ? तीणि संयोजनानि—सक्कायदिट्ठि विचिकिच्छा सीलब्बतपरामासो । *Dhs*. 1002.—इमिस्सा च पालिया दिट्ठिसंकिलेसो विचिकिच्छासंकिलेसो ति द्वे येव आगता । लोभो दोसो मोहो मानो थीनं उद्धच्चं अहिरिकं अनोत्तप्पं ति इमे अट्ठ अनागता । आहरित्वा दीपेतब्बा । एत्थ हि···**अपायगमनीयो** लोभो···अनोत्तप्पं सब्बे पि' मे पहानेकट्ठा हुत्वा पहीयन्ति । *Dhs A.* v. 30.

[२] कतमे धम्मा भावनाय पहातब्बा ? अवसेसो लोभो दोसो मोहो तदेकट्ठा च किलेसा···इमे धम्मा भावनाय पहतब्बा । *Dhs*. 1007—अवसेसो ति दस्सनेन पहीनावसेसो । ··**दस्सनेन** हि अपायगमनीया व पहीना । *Dhs A.* v. 33.

[3] Cf. दशैते सप्त सप्ताष्टौ त्रिद्विदृष्टिविवर्जिताः ।
यथाक्रमं प्रहीयन्ते कामे दुःखादिदर्शनैः ॥ *Ak*. v. 4.

[४] Cf. चत्वारो भावनाहेयाः । *Ak*. v. 5a.

हाणात्तेषामपि प्रहाणं स्तम्भनिपातादुपस्तम्भनिपातनवत् । ये तु रागादयश्चत्वारः स्वलक्षणक्लेशास्ते भावनाप्रहातव्या द्रष्टव्या रागप्रतिघमानाविद्याः ॥

अत्र पुनः

[267] प्रतिकल्पवशोत्पत्तेर्दृष्टिका(3)ङ्क्षे तु दृक्त्रये ।

अविद्यमाने खलु वस्तुन्येते स्कन्धेषु विपरीतसंदेहाकारग्रहणं कृत्वा प्रवर्तेते। तस्मादेते दर्शण(न)हेये चेतोद्घाटनमात्रेण सारद्रव्यास्तिसत्त्व(त्व)-संदेवा(हा)पगमवत् ।

रूपेऽप्येवं तथाऽरूप्ये प्रतिघानुशयादृते ॥[1]

यथा कामधातौ प्रोक्ताः, रूपारूप्यधात्वोरप्येवं द्रष्टव्याः । प्रतिघानुशयं वर्जयित्वा । तत्र हि शमथस्नि(4)ग्धसन्तानत्वात्प्रतिघनिमित्ताभावाच्च प्रतिघानुशयो नास्ति ।[2]

तत्र सत्कायान्तर्ग्राहदृष्टी एकप्रकारे दुःखदर्शण(न)मात्रहेयत्वात् । मिथ्यादृष्टिदृष्टिपरामर्शविचिकित्साः प्रत्येकं चतुष्प्रकाराः, चतुस्सत्यदर्शण(न) हेयत्वात् । शीलव्रतपरामर्शो द्विप्रकारो दुःखमार्गदर्शनहेयत्वात् । रागादयः पञ्चप्रकाराः, चतुस्सत्यदर्शनभा(5)वनाहेयत्वात् । त एते कामधातौ षट्त्रिंशद्भवन्ति । रूपधातावेकत्रिंशदारूप्यधातावेकत्रिंशदिति समस्ता दर्शनभावनाहेया अष्टानवतिर्भवन्ति ।[3] तेभ्यः पुनरष्टाशीति दर्शनप्रहातव्याः । दश भावनाप्रहातव्याः ॥

अथ य एतेऽष्टाशीतिरनुशया दर्शनप्रहातव्याः किमेते दर्शनमार्गेणैव प्रहीयन्ते ? नेत्याह । किं तर्हि ?

[268] भवाग्रे(6) क्षान्तिहेया ये दृग्घेया एव ते मताः ।[4]

---

[1] Cf. त एवाप्रतिघा पुनः ।
रूपधातौ तथारूप्ये इत्यष्टानवतिर्मताः ॥ *Ak.* v. 5 bcd.

[2] Cf. "रूपधातुया अरूपधातुया अपरियापन्ने एत्थ पटिघानुसयो च नानुसेति कामरागानुसयो च नानुसेति ।" *Yamaka A.* p. 241. (SHBS. vol. xl.)

[3] त एवमेते षडनुशया आकारप्रकारधातुभेदैरष्टानवतिर्मताः आभिधार्मिकाणाम् । *Akb.* v. 5 d.

[4] Cf. भवाग्रजाः क्षान्तिवध्या दृग्घेया एव शेषजाः ।
दृग्भावनाभ्यामक्षान्तिवध्या भावनयैव तु ॥ *Ak.* v. 6.

भवाग्रजग्रहणं तदन्यभूमिकविशेषणार्थम् । न हि लौकिकोऽस्ति भवाग्रप्रतिपक्षभूतो भावनामार्ग इति । *Sakv.* p. 447.

ते ह्येकान्तेनान्वयक्षान्ति[१]वध्याः ।
ज्ञानवध्यास्तु ये तस्मिन्नभ्यासेनैव तत्त्वयः ॥

एवमन्यास्वपि भूमिषु येऽनुशया ज्ञानवध्यास्त आर्याणां पृथग्जनानां च भावनामार्गेणैव[२] प्रहीयन्ते । शेषास्तूभयथा । यथायोगं शेषासु खलु भूमिषु यथासंभवं धर्मान्वयक्षान्तिवध्या अनुशया आर्याणां दर्शनहेयाः, (7)पृथग्जनानां च भावनाहेया इति बोद्धव्यम् ॥[3]

अथ या इमाः पञ्च दृष्टयो धात्वाकारप्रकारभेदेन[४] षट्त्रिंशद्धा भिन्नास्तासां प्रत्येकं कः स्वभावः[५] ? तदारभ्यते—

[269] अहं ममेति या दृष्टिरसौ सत्कायदृक् स्मृता ।
तदुच्छेदध्रुवग्राहौ यौ सान्तग्राहदृङ्मता ॥

हेतुबलसामर्थ्यादसच्छास्त्रश्रवणाच्च पृथग्जनस्याहं ममेति पञ्चसूपादा-(8)नस्कन्धेषु य आत्मग्राहः सा सत्कायदृष्टिरित्युच्यते[६] । सति सीदति वा काये दृष्टिर्विपरीताकारा सत्कायदृष्टिरिति [नि]र्वचनम्(8) । सैषात्मात्मीयाकारभेदा[द्] द्विप्रकारा । पुनः पञ्चस्कन्धालम्बनाः पञ्चात्मदृष्टयो भवन्ति ।

---

[१] V. infra, *Ad. kārikās* 423-424.

[२] द्विविधो हि भावनामार्गः लौकिको लोकोतरश्च । *Sakv.* p. 447.

[३] After this, the *Akb.* has : नैव हि बाह्यकानां दर्शनप्रहातव्याः प्रहीयन्त इत्यपरे । ···दृष्टयुत्पादसमकालं ते परिहीणा देवदत्त इवेति वैभाषिकाः । *Akb.* v. 6 d. See *Sakv.* pp. 447-450.

[४] आकारप्रकारधातुभेदैरिति । आकारभेदो दशानामनुशयानां 'आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः' इत्येवमादिकः । प्रकारभेदो दुःखदर्शनप्रहातव्यो निकायो यावद्भावनाप्रहातव्य इति । धातुभेदः कामावचरः, रूपावचरः, आरूप्यावचर इति । *Sakv.* p. 436.

[५] Cf. आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः ।
अहेत्वमार्गे तद्दृष्टिरेतास्ताः पञ्चदृष्टयः ॥ *Ak.* v. 7.

[६] Compare this definition of *satkāya-dṛisthṭi* with Āchārya Saṁghabhadra's definition, as given by LVP:—Saṁghabhadra (xxiii. 5, 9 b) explique : Par la force de la cause (*hetu*, sans doute *sabhāgahetu*,···) et de l'enseignement, des sots reconnaissent-moi-et-mien-dans les cinq *upādāna-skandhas*. Cette vue est nommée *satkāya-drishṭi*···*LVPAk.* v. p. 15. note 3.

The Kośakāra gives the following definition : आत्मदृष्टिरात्मीयदृष्टिर्वा सत्कायदृष्टिः । सीदतीति सत् । चयः कायः संघात इत्यर्थः । सच्चायं कायश्चेति सत्कायः । पञ्चोपादानस्कन्धाः *Akb.* v. 7.

पञ्चदशात्मीयदृष्टयः। ताः समस्ता विंशतिकोटिका[१] सत्कायदृष्टिरिति व्याख्यायते।

तयोर्गृहीत(9)स्य विपर्यासेनात्माख्यस्यासद्वस्तुनोऽसत्पुरुषसंसर्गान्नित्यत्वग्राहो वा नित्यत्वग्राहेण वा साऽन्तर्ग्राहदृष्टिरिति ॥[२]

[270] फलहेत्वपवादो यः सा मिथ्यादृष्टिरुच्यते।[३]

फलहेतुग्रहणे वस्तुक्रियाग्रहणं प्रत्येतव्यम्। अनेन शास्त्रप्रोक्तया मिथ्यादृष्टेः साकल्येन ग्रहणं प्रत्येतव्यम्।

ज्ञेयो दृष्टिपरामर्शः हीनवस्तूत्त [V. B, 3. Fol. 105 a.] मग्रहः ॥[४]

For various derivations of the term *satkāya-dṛishṭi*, see *LVPAk*. v. p. 15. n. 1-2.

Also cf. ये केचि भिक्खवे समणा वा ब्राह्मणा वा अनेकविधं अत्तानं समनुपस्सन्ति सब्बे ते पञ्चूपादानक्खन्धे समनुपस्सन्ति एतेसं वा अञ्ञतरं। *S*. III. p. 46. सक्कायदिट्ठी ति विज्जमानट्ठेन सति खन्धपञ्चकसंखाते काये; सयं वा सती तस्मिं काये दिट्ठी ति 'सक्कायदिट्ठि'। *Dhs A*. v. 13. तत्र सत्कायदृष्टिर्यत् पञ्चसूपादानस्कन्धेषु आत्मात्मीयदर्शनम्। *Tvb*. 12 a. पञ्चस्कन्धेषु विकल्पयत्यात्मानमित्येवं दृष्टिरुच्यते सत्कायदृष्टिः। *Aam*. p. 77. आत्मात्मीयाकारेण पञ्चस्कन्धदर्शनं स्वकायः। *Aaa* p. 78.

[१] Cf. तत्थ कतमा सक्कायदिट्ठि? इध अस्सुतवा पुथुज्जनो…रूपं अत्ततो समनुपस्सति, रुपवन्तं वा अत्तानं, अत्तनि वा रुपं, रूपस्मिं वा अत्तानं, वेदनं…सञ्ञं…सङ्खारे…विञ्ञाणं…विञ्ञाणस्मिं वा अत्तानं, या एवरूपा दिट्ठि—पे—विपरियेसग्गाहो, अयं वुच्चति सक्कायदिट्ठि। *Dhs*. 1003.—एत्थ पण्णरस भवदिट्ठियो पञ्च विभवदिट्ठियो होन्ति। ता सब्बा पि…पठममग्गवज्झा…। *DhsA*. v. 26. See *Asm*. p. 8.

Cf. केन कारणेन पञ्चदशात्मीयदृष्टयः। संम्वन्धात्मीयतामुपादाय वशवर्तनात्मीयतामुपादाय अविनिर्भोगवृत्त्यात्मीयतां चोपदाय। *Asm*. p. 8.

[२] Cf. अन्तग्राहदृष्टिस्तेष्वेव पञ्चसूपादानस्कन्धेष्वात्मात्मीयत्वेन गृहीतेषु यदुच्छेदतः शाश्वततो वा दर्शनम्। *Tvb*. 12 a. लोकस्यास्ति अन्तः नास्ति अन्तः—इत्येवं दृष्टिरुच्यते अन्तग्राहदृष्टिः। *Aam*. p. 77. शाश्वतोच्छेदमाश्रित्य हेतुप्रत्ययफलविपाकानामज्ञानमन्तग्राहदृष्टिः। *Ibid.*

[३] Cf. मिथ्यादृष्टिः। यया मिथ्यादृष्टया हेतुं वापवदति फलं क्रियां वा सद्वा वस्तु नाशयति। या सर्वदर्शनपापत्वान्मिथ्यादृष्टिरित्युच्यते। *Tvb*. 12 a. v. supra, p. 164, n. 6. *Akb*. says: एषा ह्यपवादिका अन्यास्तु समारोपिकाः। v. 7. See *Sakv*. p. 450.

[४] Cf. दृष्टिपरामर्शः। पञ्चसूपादानस्कन्धेष्वग्रतो विशिष्टतः श्रेष्ठतः परमतश्च यद्दर्शनम्। *Tvb*. 12 a. सास्रवधर्मेषु विकल्पयति सततमग्रताम् इत्येवं दृष्टिरुच्यते दृष्टिपरामर्शः। *Aam*. p. 77. अपरमार्थभूतमसुखमशुचिं पश्यति सुखं शुचिं…इति दृष्टिपरामर्शः। *Ibid.*

[271] अहेतावपथे चैव तद्धि शीलव्रताह्वयः।

सर्वं खलु सास्रवं वस्तु हीनार्हत्वाद्धीनम्। आदिग्रहणशब्दस्य चात्र लोपो द्रष्टव्यः।[१] दृष्ट्यादिपरामर्शो दृष्टिपरामर्शः। चतस्रो दृष्टीः प्रत्यवरं च वस्त्वग्रतो गृह्णाति। कथमग्र्येयं दृष्टिः? येयमात्मदृष्टिः—आत्मानमहं पूजयिष्यामि वासुदेवोऽत्र पूजितो भविष्यतीति हीनपुरुषं (2)पञ्चोपादानस्कन्धात्मकमग्रतः प्रतिपद्यते। नास्ति दत्तं यथासुखं प्रवर्तिष्यत इत्येवमादिः।

अकारणे कुमार्गे च कारणमार्गग्रहणं शीलव्रतपरामर्शः। तद्यथा प्रकृतीश्वरपुरुषादिहेतुकं पञ्चोपादानस्कन्धात्मकं न तृष्णाहेतुकमित्यकारणे कारणदर्शण(नम्)। कुमार्गे चाग्निजलप्रवेशादौ प्रकृतिपुरुषान्तरज्ञा(3)नादौ च स्वर्गापवर्गहेतुत्वम्।[२]

शीलं त्वत्राग्निहोत्रानुष्ठानं प्रतिजुहोत्याद्यास्तिस्रोऽन्तरङ्गक्रियाः, पश्वालम्भनाद्याः बहिरङ्गाः, तदुभयस्य यावज्जीवमनुष्ठानं शीलम्। यथोक्तम्—“जरामर्यं वैतत्सत्रं यदग्निहोत्रं जुहोति”[३] इति।

व्रतम्—आग्नेयमग्निपरिचरणं शौक्रमापो हि ष्ठाद्यनुष्ठानम्[४] अपां शुक्रदैवत्यत्वात्। वार्हस्पत्यौपनिषद(4)गोदानीयं जटावतारणम्। अथवा गोव्रतादीनि[५] व्रतान्येभिः शुध्यते मुच्यत इत्याहुः।

---

[१] Cf. दृष्टचादिपरामर्श इति वक्तव्ये आदिशब्दलोपः कृतः। *Akb.* v. 7.—‘आदिशब्दलोपः कृतः’ इति। दृष्टचादीनामुपादानस्कन्धानां परत्वेन प्रधानत्वेनामर्शो दृष्टिमरामर्श इति। **परशब्दप्रयोगेण चायमतिशयार्थो लभ्यत इति आचार्यसंघभद्रः**। *Sakv.* p. 450. See *LVPAk.* v. p. 18, n. 3.

[२] Cf. अहेतौ हेतुदृष्टिरमार्गे मार्गदृष्टिः शीलव्रतपरामर्शः। तद्यथा **महेश्वरो** न हेतुर्लोकानाम्। तं च हेतुं पश्यति···। अग्निजलप्रवेशादयश्च न हेतुः स्वर्गस्य तां च हेतुं पश्यिन्ति। *Akb.* v. 7.

शीलव्रतपरामर्शः। पञ्चसूपादानस्कन्धेषु शुद्धितो मुक्तितो नैर्याणिकतश्च यद्दर्शनम्। *Tvb.* 12 a.

अशुचिहेतुप्रत्ययेषु गदेषयति परिशुद्धमार्गमित्येवं दृष्टिरुच्यते शीलव्रतपरामर्शः। *Aam.* p. 78.

तत्थ कतमो **सीलब्बतपरामासो**? इतो बहिद्धा समणब्राह्मणानं ‘सीलेन सुद्धि, वतेन सुद्धि, सीलब्बतेन सुद्धीति’ या एवरूपा दिट्ठि··· *Dhs.* 1005.

[३] Cf. **एतद्वै जरामर्यं सत्त्रं यदग्निहोत्रं** जरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा। *Śatapatha-brāhmaṇa*, 12, 4, 1, 1.

[४] Cf. **आपो हि ष्ठा मयोभूवस्ता** नऽऊर्जे दधातन। महे रणाय चक्षसे। *Śukla-yajurveda*, xi, 50.

[५] Cf. वतेना ति गोवतादिना *Dhs A.* v. 30. See *M. sutta* 57.

त्रयीधर्म(र्मा)णस्त एव ते हरिहरहिरण्यगर्भादयो न कारणमुपादानस्कन्धात्मकत्वात्। न च नित्याः, न चाग्र्या इत्येतद्विस्तरेणाविष्कृतम्।[1] पश्चा(श्वा)लम्भनाग्निजलप्रवेशादयश्च न स्वर्गापवर्गहै(हे)तुर्दानशीलभावनानां तद्धेतुत्वात्। इत्यतो विप(5)रीतदर्शण(न)मेतच्छीलव्रतपरामर्शाख्यमिति ॥

यदि तर्हि पुरुषेश्वरादिकारणद्वारेण शीलव्रतपरामर्शः प्रवर्तते, प्राप्तस्तर्हि समुदयदर्शनप्रहातव्यः ? नैतदस्ति। यस्मादसौ

दुःखभ्रान्त्यपथादानात्तदृष्टयुत्सार्य एव सः ॥[2]

---

[1] V. supra, p. 119.

[2] Cf. **ईश्वरादिषु नित्यात्मविपर्यासात् प्रवर्तते ।**
कारणाभिनिवेशोऽतो दुःखदृग्घेय एव सः ॥ *Ak.* v. 8.

सत्यकारणे कारणदृष्टिः शीलव्रतपरामर्शः । कस्मादयं न समुदयदर्शनप्रहातव्यः ?··· दुःखदर्शनादेव हि तेषु तौ नित्यात्मग्राहौ प्रहीयेते । तस्मात् तत्कृतोऽपि कारणाभिनिवेशस्तत एव प्रहीयते ।

यस्तर्हि जलाग्निप्रवेशादिभिः स्वर्गोपपत्तिं पश्यति शीलव्रतेन वा शुद्धिं सोऽपि दुःखदर्शनप्रहातव्य एव । एष हि **सूत्रपाठः '···अकारणं कारणतः प्रत्येति शीलव्रतपरामर्शो दुःखदर्शनप्रहातव्यः''** इति विस्तरः । किं पुनः कारणमसौ दुःखदर्शनप्रहातव्यः ? दुःखे विप्रतिपन्नत्वात् ।

अति प्रसंगः···सर्वेषां सास्रवालम्बनानां दुःखे विप्रतिपन्नत्वात् । कीदृशो वाऽन्यः शीलव्रतपरामर्शो मार्गदर्शनप्रहातव्यः ? यो मार्गदर्शनालम्बनः । सो पि हि नाम दुःखे विप्रतिपन्नः ।···**तस्मात् परीक्ष्य एषोऽर्थः ।** *Akb.* v. 8.

Yaśomitra gives the following comment :—कस्मादयं न समुदयदर्शनप्रहातव्यः' इति । हेतुविप्रतिपन्नत्वादित्यभिप्रायः । 'तत्कृतोऽपिकारणाभिनिवेशः' इति । नित्यैकात्मकर्तृग्राहकृतोऽपीत्यर्थः । 'तत एव प्रहीयते' इति दुःखदर्शनादेव प्रहीयते । 'यस्तर्हि जलाग्निप्रवेशादिभिः स्वर्गोपपत्तिं पश्यति, शीलव्रतेन वा शुद्धिं' इति । नायं तत्कृतः कारणाभिनिवेशः । कथं दुःखदर्शनात्प्रहीयते ? **तस्मात्समुदयदर्शनप्रहातव्य एवायं भविष्यतीत्यभिप्रायः ।**

वैभाषिक आह—'सोऽपि दुःखदर्शनप्रहातव्यः' इति विस्तरः । दुःखे विप्रतिपन्नत्वादिति **वैभाषिकाः ।** कथं च पुनर्दुःखे विप्रतिपन्नः ? तेन स्वर्गगमनाच्छुद्धिदर्शनाद्वा ।

'अतिप्रसंगः' इति विस्तरेणाचार्यः । 'सर्वेषां सास्रवालम्बनानां' अदृष्टिस्वभावानां च दुःखादिदर्शनप्रहातव्यानां दुःखे विप्रतिपन्नत्वात् । सर्वं हि सास्रववस्तु दुःखमिति दुःखदर्शनप्रहातव्यप्रसंगः । तथा सति न कश्चित्समुदयादिदर्शनप्रहातव्यः स्यात् ।

'कीदृशो वाऽन्यः शीलव्रतपरामर्शो मार्गदर्शनप्रहातव्यः स वक्तव्यः ।' योऽपि हि गोशीलादिना शुध्यति···इति पश्यति तस्याप्ययमकारणं कारणतः प्रत्येतीति दुःखदर्शनप्रहातव्यः शीलव्रतपरामर्शः इति पठ्येत ।

वैभाषिक आह—'यो मार्गदर्शनप्रहातव्यालम्बनः' इति । यो मार्गदर्शनहेयानष्टौ

दुःखभूतेषूपादानस्कन्धेषु हरिहरहिरण्यगर्भादिष्वकारणेषु बुद्ध्या भ्रान्तः । तस्माद्यत्रैव भ्रान्त(6)स्तत्रैवाविपरीतदर्शणा(न)त्प्रहीयते । कापथे च

मिथ्यादृष्टचादीनालम्बते, स मार्गदर्शनप्रहातव्यः शीलव्रतपरामर्श इति । 'सोऽपि हि नाम दुःखे विप्रतिपन्नः' **इत्याचार्यः** । मिथ्यादृष्टचादयो हि मार्गदर्शनप्रहातव्या अष्टावनुशयाः शीलव्रतपरामर्शस्यालम्बनम् । ते च सास्रवत्वाद् दुःखसत्यसंगृहीताः । तत्र च विप्रतिपन्न इति । **दुःखदर्शनप्रहातव्य एव स्यादित्यभिप्रायः** । …'तस्मात् परीक्ष्य एषोऽर्थः' इति । **यस्मादयं दुःखदर्शनप्रहातव्यः शीलव्रतपरामर्शो न संभवति मार्गदर्शनप्रहातव्यश्च । अतिप्रसंगादिदोषात्तस्मात् परीक्ष्य एषोऽर्थः । शीलव्रतपरामर्शो दुःखदर्शनप्रहातव्यः मार्गदर्शनप्रहातव्यश्चेति । तदिदमाचार्येण संशयावद्यं कृतम्, न स्वमतं दर्शितम् ।**

अन्य आहुः—**योगाचारमतिमपेक्ष्यैवं कृतम् । योगाचारा ह्यष्टाविंशत्युत्तरं क्लेशशतं वर्णयन्ति ।** यथैव हि दुःखदर्शनप्रहातव्या इमे दशानुशया भवन्ति ।…तथैवेमे दश समुदयदर्शनप्रहातव्याः । तथैव च दश निरोधदर्शनप्रहातव्याः । दश मार्गदर्शनप्रहातव्या इति चत्वारिंशत् कामवचरा दर्शनहेया भवन्ति । भावनाहेयास्तु षट् । अकल्पिका सत्कायदृष्टिः उच्छेददृष्टिः सहजो रागः प्रतिघः मानः अविद्या चेति । षट्चत्वारिंशत् कामावचरा अनुशया भवन्ति । रूपावचरास्त्वेकचत्वारिंशदेत एव प्रतिघवर्ज्याः । यथा रूपावचराः, एवमारूप्यावचरा इति । (Cf. *Asm.* p. 52.)

अत्र कश्चित्समाधिमाह—यदुक्तं 'अतिप्रसंगः सर्वेषां सास्रवालम्बनानां दुःखे विप्रतिपन्नत्वात्' इति । **अत्र ब्रूमः । नातिप्रसंगः ।** दुःखादिमुखेन विप्रतिपत्तेः । यद्यपि सास्रवालम्बना दुःखसत्यविप्रतिपन्नाः, तथापि तु केचिद् दुःखमुखेन विप्रतिपन्नाः, केचित् समुदयमुखेन । केचिन्निरोधविप्रतिपन्नविप्रतिपन्नाः । केचिन्मार्गविप्रतिपन्नविप्रतिपन्नाः । तत्र ये दुःखमुखेन… ते दुःखदर्शनप्रहातव्याः । **शीलव्रतपरामर्शश्च दुःखमुखेन दुःखे विप्रतिपन्नो नित्यात्मग्रहणात् । तस्माद् दुःखदर्शनप्रहातव्यः ।** यस्तु मार्गविप्रतिपन्नविप्रतिपन्नः, तद्यथा **सांख्यनिर्ग्रन्थादयः**… मिथ्यादृष्टिमुत्पादयन्ति । तां च मिथ्यादृष्टि शीलव्रतपरामर्शोऽग्रतः पश्यति । **अयमेषां शीलव्रतपरामर्शो मार्गदर्शनप्रहातव्यः ।** नास्ति तु स शीलव्रतपरामर्शः यः समुदयमुखेन… नापि निरोधमुखेन…विप्रतिपन्नः स्यात् । **तस्माद् दुःखमार्गदर्शनप्रहातव्य एव शीलव्रतपरामर्श इति ।**

कथं पुनः समुदय–निरोधमुखेन न विप्रतिपद्यते ? **अत्राचार्यसंघभद्र आह…अतो मार्गदर्शनप्रहातव्य एव शीलव्रतपरामर्शः संभवति । न निरोधदर्शनप्रहातव्य इति ।**

इह शीलव्रतोपरामर्शो द्विप्रकार इष्यते आभिधर्मिकैः ।…योऽपि हि गोशीलादिना शुद्धिं प्रत्येति सोऽप्यमार्गे मार्गं पश्यतीति । **यः शीलव्रतादिदुःखालम्बनः शीलव्रतपरामर्शः, स दुःखदर्शनप्रहातव्यः । यो मार्गविप्रतिपत्त्यालम्बनः, स मार्गदर्शनप्रहातव्यः ।** यः शीलव्रताद्यालम्बनः स न मार्गविप्रतिपत्तिः । तथा न बाधते यथा मार्गविप्रतिपत्त्यालम्बनः । यस्माच्छीलव्रताद्यालम्बन औदारिकः, न दूरगतः न दृढाशयः अल्पयत्नघात्यः । तद्विपर्ययान्मार्गविप्रतिपत्त्यालम्बन इति । *Sakv.* pp. 450-453.

See *LVPAk.* v. pp. 19-21.

सत्पथबुद्ध्या भ्रान्त इति सम्यक्स्वमार्गदर्शणा(ना)त्प्रहीयते । इति सिद्धं द्विदर्शण(न)हेयः शीलव्रतपरामर्शः ॥

[272] सत्कायदृष्ट्यवच्छेदो धर्ममात्रेक्षणाद्यतः ।
दुःखाभिसमये तच्च तद्दृग्घेयैव सोऽप्यतः ॥

यदा खल्वस्य धर्मेषु धर्ममात्रबुद्धिरुत्पन्ना भवत्यनित्याः, दुःखाः, (7)शून्याः, अनात्मानश्च धर्मा इति तदैव सत्कायदृष्ट्यवच्छेदो भवति, तत्प्रवर्तिता चान्तर्गाहदृष्टिः, तत्रोपात्तस्या अपि समुद्घात इति । तच्च धर्मदर्श[न]मनित्याद्यन्यतमाकारं यस्माद्दुःखाभिसमयमात्राद्भवत्यत एतद् दृष्टिद्वयं दुःखदर्शनहेयमेवेति सिद्धम् ॥[१]

अथ य एते चत्वारो विपर्यासाः—"अनित्ये नित्यम्"[२] एव(8)मादयस्ते किं स्वभावाः ? तदारभ्यते—

[273] द्वयं दृष्टिपरामर्शादिकः सत्कायदृष्टितः ।
अन्तग्राहार्धमन्यस्तु विपर्यासः प्रकल्प्यते ॥[३]

तत्र तावत् । दृष्टिपरामर्शात्सुखशुचिविपर्यासौ प्रकल्प्य(ल्प्ये)ते । सत्कायदृष्टेरात्मदृष्टिविपर्यासः, अन्तर्ग्राहदृष्ट्यर्धा[त्] नित्यविपर्यासः प्रकल्प्यत

---

[१] Cf. सत्कायदृष्टिर्दुःखसत्यहेया पञ्चस्कन्धेष्वात्मविकल्पनात् । शाश्वतोच्छेदसंज्ञा दुःखसत्यहेया प्रत्युत्पन्नपञ्चस्कन्धालम्बनत्वात् । मिथ्यादृष्टिर्दुःखसत्यदुःखदर्शनहेया । एवं समुदयनिरोधमार्गसत्यसमुदयनिरोधमार्गदर्शनहेयो दृष्टिपरामर्शः । दुःखसत्ये चेत् सुखशुच्यादिविकल्पना दुःखदर्शनहेया । एवं समुदयनिरोधमार्गसत्येषु सुखशुच्यादिविकल्पना चेत् समुदयनिरोधमार्गदर्शनहेया । शीलव्रतपरामर्शः अमार्गे निर्वाणपर्येषणं अहेतौ हेतुदर्शनम् । शीलव्रतपरामर्शो दुःखदर्शनमार्गदर्शनहेयः । *Aam*. p. 128.

Also cf. शीलव्रतपरामर्शसंयोजनं द्विविधं । दुःखदर्शनहेयं वा मार्गदर्शनहेयं वा । *Jpś*. p. 75.

[२] Cf. चत्तारो'मे भिक्खवे सञ्ञाविपल्लासा चित्तविपल्लासा दिट्ठिविपल्लासा । कतमे चत्तारो ? अनिच्चे भिक्खवे निच्चं ति···दुक्खे भिक्खवे सुखं ति···अनत्तनि भिक्खवे अत्ताति···असुभे भिक्खवे सुभं ति···। *Aṅg*. II. p. 52.

See *Yogasūtra*, II. 5; *Śikshā*. p. 198 and *Aam*. p. 128.

The *Jpś*. enumerates the following *dṛishṭis*:—अनित्ये नित्यदृष्टिः नित्येऽनित्यदृष्टिः, दुःखे सुखदृष्टिः, सुखे दुःखदृष्टिः, अशुचौ शुचिदृष्टिः, शुचावशुचिदृष्टिः, अनात्मन्यात्मदृष्टिः, अहेतौ हेतुदृष्टिः, हेतावहेतुदृष्टिः भावेऽभावदृष्टिः, अभावे भावदृष्टिः । *Jpś*. pp. 7-9.

[३] Cf. दृष्टित्रयाद्विपर्यासचतुष्कं विपरीततः । *Ak*. v. 9 ab.

See *Śikshā*, p. 198.

इति। ननु सत्कायदृष्टेरर्थात्प्राप्नोति ?[१] (9)न। दृष्ट्यन्तरत्वात्। शाश्वतदृष्टेरुच्छेददृष्टिर्दृष्ट्यन्तरम्। पुरुषमेव त(तु) स्वतन्त्रं कर्तारं वशिनमात्मवादी मन्यमानो ममेदमित्यभ्युपगच्छति तस्मादात्मदृष्टिरेवासौ। यदि च ममेत्येतद् दृष्ट्यन्तरं स्यान्मया मह्यमित्येवमाद्यपि दृष्ट्यन्तरं स्या[त्]। तस्मादहंकारपर्याया एवैते द्रष्टव्याः॥

ननु च सर्वे क्लेशा विपर्यासाः[V. A, 3. Fol. 105 b.](1)विपरीतप्रवृत्तत्वात् ? तत्किमुच्यते चत्वार इति ?[२] नैष दोषः। यस्मात्

[274] नितीरणसमारोपविपरीतप्रवृत्तितः।
विपर्यासोक्तिरेष्वेव दृग्वशा(शात्) चित्तसंज्ञयोः॥[3]

विपरीततो नितीरणात्समारोपादेकान्तविपर्यासाच्च। न ह्येतदन्येषां क्लेशानां समस्तमस्ति। मिथ्यादृष्ट्युच्छेददृष्टी यद्यपि नितीरयतः, एकान्तविपर्यस्ते च, न तु स(2)मारोपिके द्रव्यनाश[४]प्रवृत्तत्वात्। शीलव्रतपरामर्शो नैकान्तविपरीतः कामवैराग्यादिसंभवात्।[५] अन्ये क्लेशा न सन्तीरकाः। इति चत्वार एव।

---

[१] Cf. सत्कायदृष्टेरात्मदृष्टिरात्मविपर्यासः। **सकलेत्यपरे।** कथमात्मीयदृष्टिर्विपर्यासः ? कथं च न विपर्यासः। **विपर्याससूत्रात्।** आत्मानमेव तत्र वशिनं पश्यन्नात्मीयं पश्यतीत्यात्मदृष्टिरेवासौ द्विमुखी। अथाहमित्येतस्मात् ममेति दृष्ट्यन्तरं स्यात्, मया मह्यमेतदपि स्यात्। *Akb.* v. 9 ab.

दृष्टित्रयस्वभावा विपर्यासा इति दर्शयति। 'सत्कायदृष्टेरात्मदृष्टिः, आत्मविपर्यासः' इति। **नात्मीयदृष्टिरित्यभिप्रायः।** **'सकलेत्यपरः'** इति सकला सत्कायदृष्टिः आत्मदृष्टिरात्मीयदृष्टिश्चात्मविपर्यास इत्यर्थः।

वैभाषिक आह—'कथमात्मीयदृष्टिर्विपर्यासः' इति ? न ह्यात्मीयविपर्यास इत्युच्यते। कथं च **न** भवितव्यमिति परः। **विपर्याससूत्रादिति वैभाषिकः।** अनात्मनि आत्मेति विपर्यास इति **सूत्रवचनात्।** न पुनरात्मीय इति। **अस्त्येवं सूत्रनिर्देशः।** **न पुनरसावत्मदृष्टेरर्थान्तरभूता।** कथं कृत्वा। 'आत्मानमेव तत्र' पञ्चोपादानस्कन्धेषु 'वशिनं पश्यन्नात्मीयं पश्यति' इति। न केवलमात्मानं पश्यत्यात्मीयमपि पश्यतीत्यर्थः। 'आत्मदृष्टिरेवासौ द्विमुखी' ति। आत्मात्मीयमुखी एका द्रव्यतोऽस्तीति अहंकारममकारमुखद्वयवतीत्यर्थः।···**तस्मात्सकलेति सिद्धम्।** *Sakv.* p. 454. See *Aaa.* p. 230.

[२] Cf. 'कस्मादन्ये क्लेशा न विपर्यासाः' इति ? सत्कायदृष्ट्यन्तग्राहदृष्टिपरामर्शेभ्योऽन्ये **उच्छेदमिथ्यादृष्टिशीलव्रतपरामर्शरागादयः।** *Sakv.* p. 454.

[३] Cf. **नितीरणात्समारोपात् संज्ञा चित्ते तु तद्वशात्।** *Ak.* v. 9 cd.

[४] अभावमुखप्रवृत्तत्वात्। *Akb.* v. 9 c.

[५] तन्मात्रशुद्ध्यालम्बनत्वात्। *Ibid.*

सत्पथबुद्ध्या भ्रान्त इति सम्यक्स्वमार्गदर्शणा(ना)त्प्रहीयते । इति सिद्धं द्विदर्शण(न)हेयः शीलव्रतपरामर्शः ॥

[272] सत्कायदृष्ट्यवच्छेदो धर्ममात्रेक्षणाद्यतः ।
दुःखाभिसमये तच्च तद्दृग्घेयैव सोऽप्यतः ॥

यदा खल्वस्य धर्मेषु धर्ममात्रबुद्धिरुत्पन्ना भवत्यनित्याः, दुःखाः, (7)शून्याः, अनात्मानश्च धर्मा इति तदैव सत्कायदृष्ट्यवच्छेदो भवति, तत्प्रवर्तिता चान्तर्गाहदृष्टिः, तत्रोपात्तस्या अपि समुद्घात इति । तच्च धर्मदर्श[न]मनित्याद्यन्यतमाकारं यस्माद्दुःखाभिसमयमात्राद्भवत्यत एतद् दृष्टिद्वयं दुःखदर्शनहेयमेवेति सिद्धम् ॥[१]

अथ य एते चत्वारो विपर्यासाः—"अनित्ये नित्यम्"[२] एव(8)मादयस्ते किं स्वभावाः ? तदारभ्यते—

[273] द्वयं दृष्टिपरामर्शादिकः सत्कायदृष्टितः ।
अन्तर्ग्राहार्धमन्यस्तु विपर्यासः प्रकल्प्यते ॥[३]

तत्र तावत् । दृष्टिपरामर्शात्सुखशुचिविपर्यासौ प्रकल्प्य(ल्प्ये)ते । सत्कायदृष्टेरात्मदृष्टिविपर्यासः, अन्तर्ग्राहदृष्ट्यर्धा[त्] नित्यविपर्यासः प्रकल्प्यत

---

[१] Cf. **सत्कायदृष्टि**र्दुःखसत्यहेया पञ्चस्कन्धेष्वात्मविकल्पनात् । **शाश्वतोच्छेदसंज्ञा** दुःखसत्यहेया प्रत्युत्पन्नपञ्चस्कन्धालम्बनत्वात् । **मिथ्यादृष्टि**र्दुःखसत्यदुःखदर्शनहेया । एवं समुदयनिरोधमार्गसत्यसमुदयनिरोधमार्गदर्शनहेयो **दृष्टिपरामर्शः** । दुःखसत्ये चेत् सुखशुच्यादिविकल्पना दुःखदर्शनहेया । एवं समुदयनिरोधमार्गसत्येषु सुखशुच्यादिविकल्पना चेत् समुदयनिरोधमार्गदर्शनहेया । **शीलव्रतपरामर्शः अमार्गे निर्वाणपर्येषणं अहेतौ हेतुदर्शनम् । शीलव्रतपरामर्शो दुःखदर्शनमार्गदर्शनहेयः** । *Aam*. p. 128.

Also cf. शीलव्रतपरामर्शसंयोजनं द्विविधं । दुःखदर्शनहेयं वा मार्गदर्शनहेयं वा । *Jpś*. p. 75.

[२] Cf. चत्तारो'मे भिक्खवे सञ्ञाविपल्लासा चित्तविपल्लासा दिट्ठिविपल्लासा । कतमे चत्तारो ? अनिच्चे भिक्खवे निच्चं ति···दुक्खे भिक्खवे सुखं ति···अनत्तनि भिक्खवे अत्ताति···असुभे भिक्खवे सुभं ति···। *Aṅg*. II. p. 52.

See *Yogasūtra*, II. 5; *Śikshā*. p. 198 and *Aam*. p. 128.

The *Jpś*. enumerates the following *dṛishṭis*:—अनित्ये नित्यदृष्टिः नित्येऽनित्यदृष्टिः, दुःखे सुखदृष्टिः, सुखे दुःखदृष्टिः, अशुचौ शुचिदृष्टिः, शुचावशुचिदृष्टिः, अनात्मन्यात्मदृष्टिः, अहेतौ हेतुदृष्टिः, हेतावहेतुदृष्टिः भावेऽभावदृष्टिः, अभावे भावदृष्टिः । *Jpś*. pp. 7-9.

[३] Cf. **दृष्टित्रयाद्विपर्यासचतुष्कं विपरीततः** । *Ak*. v. 9 ab.

See *Śikshā*, p. 198.

इति । ननु सत्कायदृष्टेरर्थात्प्राप्नोति ?[१] (9)न । दृष्ट्यन्तरत्वात् । शाश्वतदृष्टेरुच्छेददृष्टिर्दृष्ट्यन्तरम् । पुरुषमेव त(तु) स्वतन्त्रं कर्तारं वशिनमात्मवादी मन्यमानो ममेदमित्यभ्युपगच्छति तस्मादात्मदृष्टिरेवासौ । यदि च ममेत्येतद् दृष्ट्यन्तरं स्यान्मया मह्यमित्येवमाद्यपि दृष्ट्यन्तरं स्या[त्] । तस्मादहंकारपर्याया एवैते द्रष्टव्याः ॥

ननु च सर्वे क्लेशा विपर्यासाः [V. A, 3. Fol. 105 b.] (1)विपरीतप्रवृत्तत्वात् ? तत्किमुच्यते चत्वार इति ?[२] नैष दोषः । यस्मात्

[274] नितीरणसमारोपविपरीतप्रवृत्तितः ।
विपर्यासोक्तिरेष्वेव दृग्वषा(शात्) चित्तसंज्ञयोः ॥[3]

विपरीततो नितीरणात्समारोपादेकान्तविपर्यासाच्च । न ह्येतदन्येषां क्लेशानां समस्तमस्ति । मिथ्यादृष्ट्युच्छेददृष्टी यद्यपि नितीरयतः, एकान्तविपर्यस्ते च, न तु स(2)मारोपिके द्रव्यनाश[४]प्रवृत्तत्वात् । शीलव्रतपरामर्शो नैकान्तविपरीतः कामवैराग्यादिसंभवात् ।[५] अन्ये क्लेशा न सन्तीरकाः । इति चत्वार एव ।

---

[१] Cf. सत्कायदृष्टेरात्मदृष्टिरात्मविपर्यासः । **सकलेत्यपरे** । कथमात्मीयदृष्टिर्विपर्यासः ? कथं च न विपर्यासः । **विपर्याससूत्रात्** । आत्मानमेव तत्र वशिनं पश्यन्नात्मीयं पश्यतीत्यात्मदृष्टिरेवासौ द्विमुखी । अथाहमित्येतस्मात् ममेति दृष्टचन्तरं स्यात्, मया मह्यमेतदपि स्यात् । *Akb.* v. 9 ab.

दृष्टित्रयस्वभावा विपर्यासा इति दर्शयति । 'सत्कायदृष्टेरात्मदृष्टिः, आत्मविपर्यासः' इति । **नात्मीयदृष्टिरित्यभिप्रायः** । **'सकलेत्यपरः'** इति सकला सत्कायदृष्टिः आत्मदृष्टिरात्मीयदृष्टिश्चात्मविपर्यास इत्यर्थः ।

वैभाषिक आह—'कथमात्मीयदृष्टिर्विपर्यासः' इति ? न ह्यात्मीयविपर्यास इत्युच्यते । कथं च **न** भवितव्यमिति परः । **विपर्याससूत्रादिति वैभाषिकः** । अनात्मनि आत्मेति विपर्यास इति **सूत्रवचनात्** । न पुनरात्मीय इति । **अस्त्येवं सूत्रनिर्देशः** । **न पुनरसावत्मदृष्टेरर्थान्तरभूता** । कथं कृत्वा । 'आत्मानमेव तत्र' पञ्चोपादानस्कन्धेषु 'वशिनं पश्यन्नात्मीयं पश्यति' इति । न केवलमात्मानं पश्यत्यात्मीयमपि पश्यतीत्यर्थः । 'आत्मदृष्टिरेवासौ द्विमुखी' ति । आत्मात्मीयमुखी एका द्रव्यतोऽस्तीति अहंकारममकारमुखद्वयवतीत्यर्थः ।···**तस्मात्सकलेति सिद्धम्** । *Sakv.* p. 454. See *Aaa.* p. 230.

[२] Cf. 'कस्मादन्ये क्लेशा न विपर्यासाः' इति ? सत्कायदृष्टचन्तग्राहदृष्टिपरामर्शेभ्योऽन्ये **उच्छेदमिथ्यादृष्टिशीलव्रतपरामर्शरागादयः** । *Sakv.* p. 454.

[३] Cf. **नितीरणात्समारोपात् संज्ञा चित्ते तु तद्वशात्** । *Ak.* v. 9 cd.

[४] अभावमुखप्रवृत्तत्वात् । *Akb.* v. 9 c.

[५] तन्मात्रशुद्ध्यालम्बनत्वात् । *Ibid.*

ननु च सूत्र उक्तम्—"अनित्ये नित्यमिति संज्ञाविपर्यासः, चित्तविपर्यासो दृष्टिविपर्यास एवं यावदात्मनि" इति द्वादश भवन्ति।[१] नैष दोषः। नहि संज्ञाचित्ते नितीरके। तस्माच्चतुर्ष्वेव दृष्टि(3)स्वभावेषु विपर्यासोक्तिः। 'दृग्वशात् चित्तसंज्ञयोः' तदुक्तिरिति। संज्ञा हि लोककार्यव्यवहारपतिता दर्शण(न)वशाद्विपर्यस्तमालम्बननिमित्तमुद्गृह्णाति। चित्तं च तद्वशानुवर्तीति तयोरेव ग्रहणम्। लोकेऽपि विपर्यस्तसंज्ञो विपर्यस्तचित्तश्चोच्यते न विपर्यस्तवेदनो विपर्यस्तचेतन इति॥[२]

अथ किं दृष्ट्यनुशयवत् माना(4)नुशयस्यापि कश्चिद्भेदोऽस्ति? विद्यत इत्याह। कथमित्यादर्श्यते—

[275] सप्त मानविधास्त्रिभ्यो नव मानविधास्त्रिधा।
त्रिधाऽत्युन्नमनादिभ्यः स्वोत्कर्षाद्यस्ति नास्तिता॥[३]

तदस्य श्लोकस्य संक्षेपविस्तारव्याख्याप्रभेदोऽयमादर्श्यते। तत्र तावत्कर्मस्वकतासामर्थ्यसंमुग्धस्य येन केनचिद्वस्तुना चित्तस्योन्नतिर्मानः। प्रभिद्यमानः सप्तधा भव(5)ति[४] मानः, अतिमानः, मानातिमानः, अस्मिमानः, अभिमानः, ऊनमानः, मिथ्यामानश्च। एतेषां प्रपञ्चो यथा प्रकरणेषु।[५]

---

[१] **द्वादश विपर्यासा इति।** चतुर्षु विपर्ययेषु प्रत्येकं संज्ञा-चित्त-दृष्टिविपर्यास इति। *Sakv*. p. 454. Cf. अनिच्चे निच्चं ति…दुक्खे सुखं ति…अनत्तनि अत्ता ति…असुभे सुभं ति सञ्ञाविपरियेसो, चित्तविपरियेसो दिट्ठिविपरियेसो। *Vbh*. p. 376.

विपल्लासा ति, अनिच्च-दुक्ख-अनत्त-असुभेसु येव वत्थुसु, निच्चं सुखं अत्ता सुभं ति एवं पवत्ता, सञ्ञाविपल्लासो, चित्तविपल्लासो, दिट्ठिविपल्लासो ति इमे तयो। *Vm*. XXII. 53.

[२] After this, the Kośakāra gives some more details :—ते एते विपर्यासाः सर्वेऽपि स्रोतआपन्नस्य प्रहीणा भवन्ति। दर्शनप्रहेयत्वात् दृष्टीणां ससंप्रयोगाणाम्। द्वादश विपर्यासाः।…तत्राष्टौ दर्शनप्रहातव्याश्चत्वारो भावनाप्रहातव्याः। दुःखे च संज्ञाचित्तविपर्यासावशुचौ चेति **निकायान्तरीयाः**। इतरथा हि कथमन्तरेण सुखशुचिसंज्ञामवीतरागस्यार्यस्य कामरागः संभवेदिति। तदेतन्नेच्छन्ति **वैभाषिकाः**। *Akb*. v. 9d. See *Sakv*. pp. 455-6. See *Aam*. p. 128.

[३] Cf. **सप्त माना नव विधास्त्रिभ्य दृग्भावनाक्षयाः।** *Ak*. v. 10ab.

[४] Cf. तत्थ कतमे सत्त माना? मानो अतिमानो मानातिमानो ओमानो अधिमानो अस्मिमानो मिच्छामानो। इमे सत्त माना। *Vbh*. p. 383. See *VbhA*. p. 488, *Dhs*. 1116, *DhsA*. v. 64-5, *Aaa*. p. 456 and *Asm*. p. 45.

[५] *Prakaraṇapāda*, XXIII. 10, fol. 13 b (see *LVPAk*. v. p. 26). The Kośakāra gives the definitions of the seven *mānas*, but does not mention the *Prakaraṇa*.

न[नु] पुनर्ज्ञानप्रस्थाने[१] नवमानविधा उक्तास्तद्यथा[२]–"श्रेयानहमस्मीति मानविधा। सदृशोऽहमस्मीति तद्दृष्टिसंनिश्रितैव मानविधा। सदृशाद्धीनोऽहमस्मीति मानविधा। अस्ति मे श्रेयानस्ति मे(6) सदृशोऽस्ति मे हीनः, नास्ति मे श्रेयो नास्ति मे सदृशो नास्ति मे हीनः" इति।

तत्र श्रेयानहमस्मीति सत्कायदृष्टिसनि(न्नि)श्रिता अतिमानविधा। सदृशोऽहमस्मीति तद्दृष्टिसन्निश्रिते(तै)व मानविधा। हीनोऽहमस्मीति तद्दृष्टिसन्निश्रितैवोनमानविधा। अस्ति मे श्रेयानित्यूनमानविधा। अस्ति मे सदृश इति मानवि(7)धा। अस्ति मे मान इति मानातिमानविधा। नास्ति मे श्रेयानिति मानविधा। नास्ति मे सदृश इत्यतिमानविधा। नास्ति मे हीन[३] इत्यूनमानविधा। इति एवमेता नवमानविधास्त्रिभ्यो मानेभ्यो व्यवस्थाप्यन्ते मानाभिमानोनमानेभ्यः।[४]

त एते सप्तमानाः सर्वेऽपि[५] दर्शण(न)भावनाहेयाः स्थविरक्षेमकसूत्रोक्तेः[६]—(7)"अस्ति मे एषु पञ्चस्वूपादानस्कन्धेष्वस्मीति मानोऽप्रहीनः(णः)"[७] इति ॥

---

[१] *Jñānaprasthāna*, 20, 6. See *Jpś.* pp. 55-7.

[२] Cf. यर्त्तहि शास्त्रे नव मानविधा उक्ताः…। *Akb.* v. 10 a.

[३] युक्तस्तावद् बह्वन्तरविशिष्टादल्पान्तरहीनोऽस्मीत्यूनमान उन्नतिस्थानत्वात्। नास्ति मे हीन इत्यत्र किमुन्नतिस्थानम्। अस्ति सदृशो योऽभिप्रेते वरे सत्त्वराशौ निहीनमप्यात्मानं बहु मन्यते। अपि चास्त्येव **ज्ञानप्रस्थान**विहितो विधिः। **प्राकरणं** तु निर्देशं परिगृह्य श्रेयानहमस्मीत्येकेषु मानोऽपि स्यादिति मानोपि मानातिमानोऽपि हीनसमविशिष्टापेक्षया। *Akb.* v. 10 a.

[४] Cf. कतमे **नवविधा माना** ? सेय्यस्स सेय्योहमस्मीति मानो। सेय्यस्स सदिसोहमस्मीति मानो। सेय्यस्स हीनोहमस्मीति मानो। सदिसस्स सेय्योहमस्मीति मानो। सदिसस्स सदिसोहमस्मीति मानो। सदिसस्स हीनोहमस्मीति मानो। हीनस्स सेय्योहमस्मीति मानो। हीनस्स सदिसोहमस्मीति मानो। हीनस्स हीनोहस्मीति मानो। इमे नवविधा माना। *Vbh.* p. 389.

[५] एतदुक्तं भवति **सर्वे** दर्शनभावनाप्रहातव्या इति। *Akb.* v. 10 ab.—**सर्वे** इति ग्रहण**मस्मिमानो**ऽपि भावनाप्रहातव्यः। न केवलं शेषाः। शेषा अपि दर्शनप्रहातव्याः। न केवलमस्मिमान इति प्रदर्शनार्थम्। *Sakv.* p. 457.

[६] This *sūtra* is not referred to in *Akb.*

[७] Cf.…तेन खो पन समयेन आयस्मा **खेमको** बदरिकारामे विहरति आबाधिको दुक्खितो…। आयस्मा **दासको** येन…खेमको…तेनुपसंकम्म…इमेसु आयस्मा खेमको पञ्चसु उपादानक्खन्धेसु किञ्चि अत्तानं वा अत्तनियं वा समनुपस्सती ति ?…"**इमेसु ख्वाहमावुसो पञ्चसु उपादानक्खन्धेसु न किञ्चि अत्तानं वा अत्तनियं वा समनुपस्सामी**" ति।

किं पुनर्यद्भावनाहेयमप्रहीणं सर्वं तदार्यस्य समुदाचरति ? नेत्याह ।[१] प्रहीणमपि हि किञ्चित्समुदाचरति । तद्यथा श्रद्धादीनि पञ्चेन्द्रियाणि मिद्धं दुःखेन्द्रियं चक्षुराद्यष्टकं चेति । अप्रहीन(ण)मपि खलु किञ्चिन्न समुदाचरति । तद्यथा

[276] व(9)धादिपर्यवस्थानं कौकृत्यमशुभं विधाः ।
विभवेच्छा च नार्यस्य जायन्ते हेत्वभावतः ॥[२]

येन खलु क्लेशपर्यवस्थानेन संचिन्त्य प्राणिवधादत्तादानकाममिथ्याचारमृषावादानध्यापद्येतैतद्वधाद्यप्रहीन(ण)मपि न समुदाचरति भावनाहेयत्वात् । कौकृत्यं चाकुशलं न समुदाचरति । मानविधाश्च नव न समुदा[V. B. 4. Fol. 106 a.](1)चरन्ति । विभवतृष्णापि[३] भावनाप्रहातव्यापि सती न समुदाचरति । 'च'शब्दाद्भवतृष्णायाश्च कश्चित्प्रदेशः । अहो वताहमैरावणः स्यां नागराजः(जा) । अहो वताहमसुरेन्द्रः स्यां वैमचित्रादिः ।[४] अहो वताहमुत्तरेषु कुरुषु जन्म लभेयेत्येवमादि ।

…थेरा आहंसु…"तेनायस्मा खेमको अरहं खीणासवो" ति ।

…खेमको…"इमेसु ख्वाहं आवुसो पञ्चसु उपादानक्खन्धेसु न किञ्चि अत्तानं वा अत्तनियं वा समनुपस्सामि । न चम्हि अरहं खीणासवो । अपि च मे आवुसो पञ्चसु उपादानक्खन्धेसु अस्मीति अधिगतं अयमहमस्मीति च न समनुपस्सामी"ति । *S*. III. pp. 1261—30.

[१] Cf. यद् भावनाहेयमप्रहीणं किमवश्यं तदार्याणां समुदाचरति ? **नावश्यम्**…। *Akb*. v. 10 ab.—'**नावश्यम्**' इति । प्रहीणं न समुदाचरतीति नियमः । तथा हि श्रद्धादिमिद्धदुःखेन्द्रियचक्षुरादयः प्रहीणा अपि समुदाचरन्ति । दर्शनहेयानामन्तर्मुखत्वात् । भावनाहेयालम्बनैव रागद्वेषमोहैर्विज्ञप्तिरुत्थाप्यत इति भावनाहेयमेव वधादिपर्यवस्थानम् । *Sakv*. p. 457.

[२] Cf. **वधादिपर्यवस्थानं हेयं भावनया तथा ॥**
विभवेच्छा न चार्यस्य संभवन्ति विधादयः ।
नास्मिता दृष्टिपुष्टत्वात् कौकृत्यं नापि चाशुभम् ॥ *Ak*. v. 10 cd, 11.

[३] **विभावो नाम क एष धर्मः ?** त्रैधातुकी अनित्यता । तत्र प्रार्थना विभवतृष्णा । *Akb*. v. 11 a.—तत्र त्रैधातुक्यायामनित्यतायां प्रार्थना । किं तत्रापि प्रार्थना भवति ? भवतीत्याह । **यथोक्तं सूत्रे**—यावदयमात्मा जीवति तिष्ठति ध्रियते यापयति तावत्सरोगः सगण्डः सशल्यः सज्वरः सपरिदाहकः । यश्चायमात्मा उच्छिद्यते विनश्यति न भवति । इयतात्मा सम्यक् समुच्छिन्नो भवति" इति । *Sakv*. p. 457.

Also cf. विभवो नाम कतमो धर्मः । प्रतिवचनं । त्रिधात्वनित्यता । *Jpś*. p. 25. For details, see *LVPAk*. v. p. 29, n. 1.

[४] Cf. *Vepachitti* (an *asura* chieftain). See *DPPN*. II. p. 259.

किं पुनरत्र कारणं यदेते[ऽ]प्रहीणाः खल्वपि सन्तो नार्यस्य समुदा(2)चरन्ति ? शून्यतायाः सुभावितत्वात्कर्मफलसंबन्धयुक्तेश्च विदितत्वात्, दृष्टिपुष्टत्वाच्च ॥

तत्र मानविधा अस्मिमानश्च सत्कायदृष्टिपुष्टाः। वधादिपर्यवस्थानं मिथ्यादृष्टिपुष्टम्। विभवतृष्णोच्छेददृष्टिपुष्टा। भवतृष्णाप्रदेशः शाश्वतदृष्टिपुष्टः। इति विधादयस्तत्पोषा(ष)कक्लेशाभावादार्यस्य नोत्सहन्ते सन्तानमध्यारोढुम्। (3कौकृत्यमपि चाकुशलमवीतरागस्यार्यस्याप्रहीणं न चास्य तत्संभवति विचिकित्सासमुत्थितत्वादिति ॥

अथानुशयाः सर्वत्रगाः[१] कस्मात्क्लेशनिकाया व्यवस्थाप्यन्ते ? तदारभ्यते—

[277] दुःखात्समुदयाच्चैव सर्वगानां व्यवस्थितिः।

दुःखसमुदयदर्शण(न)प्रहातव्याः खल्वनुशयाः सर्वत्रगाः। यस्मात्

तद्दृष्टिहेयजातीनां स(4)र्वासां द्विपदस्थितेः ॥

द्वयोः खलु निकाययोः दुःखसमुदयाख्ययोस्तद्दर्शण(न)हेयाना(णां) वक्ष्यमाना(णा)नां क्लेशानामुभयत्र लब्धप्रतिष्ठत्वात् ॥

किं पुनः सर्वे दुःखसमुदयहेयाः न हेयाः सर्वत्रगाः ? नेत्याह। किं तर्हि ?

[278] काङ्क्षा पञ्च दृशोऽविद्या तद्द्वयामिश्राऽथ केवलाः।
सप्त सर्वत्रगा दुःखाद्धेतोरेभ्यश्चतुष्टयम् ॥[२]

सप्तदृष्टयो[३](5)द्वे विचिकित्से[४] ताभिश्च संप्रयुक्ताऽविद्या आवेणिकी[५] च

---

[१] 'सर्वत्रगाः' इति। सर्वत्र गच्छन्तीति सर्वत्रगाः। पञ्चापि निकायानलम्बत इत्यर्थः। पञ्चानामपि निकायानां हेतुभावेनावतिष्ठन्त इत्यपरे। *Sakv.* p. 458.

Also cf. सर्वत्रगार्थः कतमः। तथा हि तृष्णा वस्तुसर्वत्रगा अवस्थासर्वत्रगा अध्वसर्वत्रगा धातुसर्वत्रगा एषणासर्वत्रगा प्रकारसर्वत्रगा च। *Asm.* p. 43.

[२] Cf. सर्वत्रगा दुःखहेतुदृग्घेया दृष्टयस्तथा।
विमतिः सह ताभिश्च याऽविद्याऽवेणिकी च या ॥ *Ak.* v. 12.

[३] सप्तदृष्टयो दुःखदर्शनप्रहातव्याः सत्कायदृष्ट्यादयः पञ्च। समुदयदर्शनप्रहातव्ये द्वे दृष्टी मिथ्यादृष्टिपरामर्शदृष्टीति सप्त। *Sakv.* p. 458

[४] द्वे विचिकित्से दुःख-समुदयदर्शनप्रहातव्ये। *Ibid.*

[५] आवेणिकीति कोऽर्थः ? एवमाहुः। सम्पर्को वेणिरित्युच्यते। न वेणिरवेणिः। पृथग्भाव इत्यर्थः। ···अवेण्या चरीत्यावेणिकी। नान्यानुशयसहचारिणीत्यर्थः। *Ibid*.

See *Aam.* pp. 78-9 and *Asm.* p. 51.

द्विप्रकारा इत्येकादशानुशया धातौ धातौ स्वधातुभूमिसर्वत्रगा[1] ज्ञेयाः। सकलस्वधातुभूम्यालम्बनत्वात्[2]। एते च परिपिण्ड्य त्रयस्त्रिंशत्सर्वत्रगा भवन्ति ॥

एते पुनः सर्वत्रगाः

[279] द्रव्यतो दश चैकश्च नाम्ना सप्त तु ते मताः।

तिसृणामप्यविद्यानां द्वयोश्च वि(6)चिकित्सयोरेकणा(ना)मत्वात्।

अथ कस्माद्रागप्रतिघमाना न सर्वत्रगाः?[3] तदुच्यते—

रागप्रतिघमानास्तु परिच्छेदप्रवर्तिणः(नः) ॥

एते खलु स्वलक्षणक्लेशाः[4] प्रतिक्लेशमनवयवं चालम्ब्योत्पद्यन्ते। तस्मान्न सर्वगाः ॥

विचिकित्साद्यास्तु

[280] प्रकारान्तरवर्तित्वात्सकृत्सर्वस्वभूगतिः।
धात्वन्तरावलम्बित्वात्पूर्वोक्ता एव (7)सर्वगाः ॥

---

[1] सभागधातुसर्वत्रगाः in *Akb.* v. 12.

[2] सकलस्वधात्वालम्बनत्वात् in *Akb.* v. 12.

यस्मादेते सकलं स्वधातुमालम्बन्ते तस्मात्सर्वत्रगा इत्युच्यन्ते। *Sakv.* p. 458.

After this, the *Akb.* deals with one more topic : किमेभिर्युगपदालम्बन्ते, आहोस्वित् क्रमेण? V. infra, *Ad. kārikā* 278—9.

[3] Cf. सर्वसंयोजनेषु रागद्वेषमानेतराणि सर्वत्रगाणि। तत्कस्य हेतोः। तेषां पञ्चालम्बन[हेय]त्वात्। *Aam.* p. 79.

[4] Cf. इतीमे एकादशानुशयाः सभागधातुसर्वत्रगाः।…सकलस्वधात्वालम्बनत्वात्। किमेभिर्युगपदालम्बते आहोस्वित् क्रमेण? यदि क्रमेण अन्येषामपि प्रसंगः। अथ युगपत् कः सकलेन कामधातुना शुद्धिं प्रत्येत्यकारणं वा कारणतः। सकलं नोच्यते सकलं युगपदालम्बन्त इति। अपि तु पञ्चप्रकारमपि सर्वं युगपत्। एवमपि यत्रात्मदृष्टिस्तत्रात्मतृष्णा यत्राग्रशुद्धदृष्टी तत्र तत्प्रार्थना तेन च मान इति तृष्णामानयोरपि सर्वत्रगत्वं प्राप्नोति। …स्वलक्षणक्लेशावेतौ न सामान्य क्लेशौ। तस्मान्न सर्वत्रगाविति वैभाषिकाः। *Akb.* v. 12.

वैभाषिक इदानीं स्वपक्षं स्थापयति 'स्वलक्षणक्लेशावेतौ न सामान्यक्लेशौ भवतः, तस्मान्न सर्वत्रगौ' इति। यत्रात्मदृष्टिस्तत्र तृष्णामानौ। न तु युगपत्सर्वस्मिन्। स्वलक्षणक्लेशत्वात्। एकदेशालम्बना हि तौ। तस्मान्न सर्वत्रगौ। न चेत्सर्वत्रगौ तेन यौ यद्दर्शनहेयालम्बनौ तौ तद्दर्शनहेयौ, परिशिष्टौ भावनाहेयाविति सिद्धम्। *Sakv.* p. 459.

अत्र पुनः

[281] नवोर्ध्वधातुकास्तेषामाद्या दृष्टिद्वयादृते ।[१]

सत्कायान्तर्ग्राहदृष्टी हित्वाऽन्ये नव विसभागधातुसर्वत्रगाः ।[२]

किं पुनरणु(नु)शया एव सर्वत्रगाः ? नेत्याह । किं तर्हि ?

तेषां सहभुवो धर्माः प्राप्तिवर्ज्याश्च सर्वगाः[३] ॥

ये सर्वत्रगानुशयसहभुवो वेदनादयो धर्माः, जात्यादयश्च ते(8)हि(ऽपि) सर्वत्रगास्तदेकफलत्वात् ॥

तेषां पुनरष्टानवतीनामनुशयानां कति सास्रवालम्बनाः कत्यनास्रवालम्बनाः ? तदारभ्यते—

[282] काङ्क्षामिथ्यादृगाभ्यां च मिश्राऽविद्याथ केवला ।
निरोधमार्गदृग्घेयाः षडेते निर्मलेक्षिणः ॥[४]

निरोधमार्गदर्शनहेया मिथ्यादृष्टिविचिकित्सा तत्संप्रयुक्ता चाविद्या सहावेणि(9)क्याऽविद्यया । इत्येते धातौ धातौ षडनुशया[५] अनास्रवालम्बनाः । शेषाः सास्रवालम्बनाः ॥

अथैते निर्मलालम्बनाः कति कत्युपरममालम्ब्यन्ते, कति भूमिप्रतिपक्षं च ? तदुच्यते—

[283] स्वभूमेरेव निर्वाणं मार्गस्थन्नवभूमिकः ।
तद्दृश्यविश(ष)योऽन्योऽन्यो हेतुत्वाद्धेतुभावतः ॥[६]

---

[१] Cf. नवोर्ध्वालम्बना एषां दृष्टिद्वयविवर्जिताः । *Ak.* v. 13 ab.

[२] The *Akb.* here discusses one more point : यदा कामधातौ स्थितो ब्रह्मणि सत्त्वदृष्टिं नित्यदृष्टिं चोत्पादयति । तदा कथं सत्कायान्तग्राहदृष्टी विसभागधात्वालम्बने न भवतः ? *Akb.* v. 13 ab.

[३] Cf. प्राप्तिवर्ज्याः सहभुवो येऽप्येभिस्तेऽपि सर्वगाः । *Ak.* v. 13 cd.
प्राप्तयस्तु नैवम् । अनेकफलत्वात् । *Akb.* v. 13 cd.

[४] Cf. मिथ्यादृग्विमती ताभ्यां युक्ताऽविद्याऽथ केवला ।
निरोधमार्गदृग्घेयाः षडनास्रवगोचराः ॥ *Ak.* v. 14.

[५] त्रयो निरोधदर्शनप्रहातव्या अनास्रवालम्बनाः । एवं मार्गदर्शनप्रहातव्या अप्येत एव त्रय इति षट् । *Sakv.* p. 460.

[६] Cf. स्वभूम्युपरमो मार्गः षड्भूमिनवभूमिकः ।
तद्गोचराणां विषयो मार्गो ह्यन्योऽन्यहेतुकः ॥ *Ak.* v. 15.

स्वभूमिनिरोध एव निरोधालम्बनानां [V. A, 4. Fol. 106 b.] (1)मिथ्यादृष्ट्यादीनामालम्बनम् । कामावचराणां कामावचराणि(नि)रोधः । एवं यावद्भवाग्रभूमिकानां भवाग्रस्यैव । मार्गालम्बनानां तु कामावचराणां सर्व एव स्वभूमिकाः क्लेशाः मार्ग आलम्बनम् । योऽप्यसौ रूपारूप्यप्रतिपक्षः, रूपारूप्यावचराणामप्यष्टभूमिकाणां(नां) मिथ्यादृष्ट्यादीनां नवभूमिकोऽन्वयज्ञानपक्ष्यो[१] मार्ग आल(2)म्बनः । किं पुनः कारणं मिथ्यादृष्ट्या निरोधः परिच्छिन्न आलम्ब्यते, न मार्गेण ? तदुच्यते । 'हेतुत्वाद्धेतुभावतश्च ।' मार्गो हि परस्परहेतुकः,[२] न तु निरोध इत्यस्ति विशेषः ॥

अथ कस्माद्रागप्रतिघमाना दृष्टिशीलव्रतपरामर्शौ च नानास्रवालम्बना इष्यन्ते ? तत्रापदिष्यते—

[284] न रागः शक्त्यहेतुत्वान्न द्वेषो[ऽ]नपराधतः ।
न (3)मानोऽतिप्रशान्तत्वान्न भावत्वाद् दृशोऽपराः ॥[३]

तत्र रागस्तावद्यद्यनास्रवालम्बनः स्यान्निर्वाणाभिलाषप्रवृत्तत्वात्कुशलधर्मच्छन्दवत्, न योगिणां(नां) वर्जनीयः[४] स्यात् । द्वेषोऽप्यपकारवस्तुन्युत्पद्यते, मोक्षस्तु सर्वदुःखोपरमादुपकारी । मानोऽप्यप्रशान्तत्वादुन्नतिलक्षणः, निर्मलास्तु धर्मास्तदपघातिनः । परामर्शौ च यद्य(4)नास्रवालम्बनौ स्यातां सम्यग्दृष्टित्वं प्रतिपद्येयाताम् । तस्मात्पूर्वोक्ता एवानुशया निर्मलगोचराः ॥

अथैतेषामष्टानवतेरनुशयानां कत्यालम्बनतोऽनुशेरते कति संप्रयोगतः ?[५]

---

[१] **अन्वयज्ञानपक्ष्यः पुनर्नवभूमिकः**—अनागम्यध्यानान्तर-चतुर्ध्यानि-आकाशविज्ञानाकिञ्चन्यायतनभूमिकः । स सर्व एव प्रथमध्यानभूमिकानां एषां त्रयाणामनुशयानामालम्बनम् । एवं यावद् भवाग्रभूमिकानामिति । *Sakv*. p. 461.

[२] Cf. कस्मात्पुनः स्वभूमिनिरोध एव तद्गोचरावलम्बनम्, मार्गस्तु षड्भूमिकोऽपि नवभूमिकोऽपि वा तेषामालम्बनमित्यत्र हेतुं दर्शयति । '**मार्गो ह्यन्योन्यहेतुकः**' इति । कथमन्योन्यहेतुकः । षड्भूमिको धर्मज्ञानपक्ष्यो मार्गोऽधरभूमिकस्योर्ध्वभूमिकस्य वा समस्य विशिष्टस्य वा धर्मज्ञानपक्ष्यान्तरस्यान्वयज्ञानपक्ष्यस्यापि च मार्गस्य हेतुर्भवति । सोऽपि तस्यान्वयज्ञानपक्ष्य नवभूमिको योज्यः । *Sakv*. p. 461. See *Akb*. II. 52 cd.

[३] Cf. **न रागस्तस्य वर्ज्यत्वान्न द्वेषोऽनपकारतः ।**
न मानो न परामर्शौ शान्तशुद्धचग्रभावतः । *Ak* v. 16.

[४] न वर्जनीयः स्यादिति । न प्राप्तिच्छेदेन प्रहेयः स्यादित्यर्थः । *Sakv*. p. 462.

[५] य आलम्बनतोऽनुशेरते तेऽवश्यं सम्प्रयोगतोऽनुशेरते···। ये तु **संप्रयोगत** एवानुशेरते ते नालम्बनतोऽनास्रवविसभागभूम्यालम्बना अनुशया इति । *Ibid*.

[285] सर्वगोऽनुशयः कृत्स्नामनुशेते स्वधातुगः ।
स्वामालम्बनतो भूमिं स्वनिकायं त्वसर्वगः ॥[१]

द्विविधाः खलु सर्वगाः । स्वधातुभूमिसर्वगाः, वि(5)सभागधातुभूमिसर्वगाश्च । असर्वगा अपि द्विविधाः । सास्रवालम्बनाः, अनास्रवालम्बनाश्च । तत्र ते[२] येऽनुशयाः स्वधातुभूमिसर्वत्रगास्ते सकलामेव पञ्चप्रकारां स्वधातुभूमिमालम्बनतोऽनुशेरते । ये वत्सर्वत्रगाः सास्रवालम्बनास्ते स्वभूमौ स्वनिकायमालम्बनतोऽनुशेरते । दुःखदर्शण(न)प्रहातव्याः दुःखदर्शण(न)(6)प्रहातव्यमेव निकायं यावद्भावनाप्रहातव्या भावनाप्रहातव्यमेवेति ॥

आलम्बनतश्च

[286] अस्वीकाराद्विपक्षत्वान्नोर्ध्वभूमार्गगोचरः ।[३]

आलम्बनतोऽनुशेरत इति वर्तते । किं कारणम् ? अन्यभूमिकस्यानास्रवस्य च वस्तुनः 'अस्वीकाराद्विपक्षत्वा'च्च । आत्मदृष्टितृष्णाभ्यां हि स्वीकृते वस्तुन्यनुशयोऽनुशयितुमुत्सहते । अना(7)स्रवे तु वस्तुन्यूर्ध्वभूमिक(के) च प्रवृत्तिरेव सत्कायदृष्टितृष्णयोर्नास्तीति न्न(न) तत्रानुशेरते ।

संप्रयोगिनि(णि) तु स्वस्मिन्नहीने संप्रयोगतः ॥[४]

अनुशेरत इत्यधिकृतम् । यो येन धर्मेणानुशयः संप्रयुक्तः स तस्मिन्संप्रयोगिणि संप्रयोगतोऽनुशेरते यावदप्रहीणो भवतीति 'तु' शब्दो विशिनष्टि । त(8)तश्चेदमपि सिद्धं भवति—अनास्रवालम्बना विसभागधातुभूम्यालम्बनाश्च संप्रयोगत एवानुशेरते । सास्रवालम्बनाः स्वभूमावालम्बनतः संप्रयोगतश्चेति ॥

कुतः पुनरेतेऽनुशया उच्यन्ते ? तदुच्यते । प्रागाविष्कृतमेतत्प्रसङ्गागतं न तु सूत्रितमित(ति) । तदिदानीं सूत्रगतं प्रदर्श्यते ।

[287] धात्रीवस्त्रमलन्यायैः खचराम्बुचरक्रमैः ।
ए(७)तेऽनुशेरते यस्मात्तस्मादनुशयाः स्मृताः ॥

---

[१] सर्वत्रगा अनुशयाः सकलामनुशेरते ।
स्वभूमिमालम्बनतः स्वनिकायमसर्वगाः ॥ *Ak*. v. 17.

[२] This ते is not required.

[३] Cf. नानास्रवोर्ध्वविषया अस्वीकाराद्विपक्षतः । *Ak*. v. 18 ab.

[४] Cf. येन यः संप्रयुक्तस्तु स तस्मिन्संप्रयोगतः । *Ak*. v. 18 cd.

इतश्च,

[288] स्वैरिष्टादिभिना(रा)कारैः परमाणुक्षणेष्वपि ।
यतोऽनुशेरते चैति(ते) ततश्चानुशया मताः ॥[१]

तत्र रागस्तावदिष्टाकारेण खण्डक्षीरभक्षणवत् । द्वेषस्त्वनिष्टाकारेण काञ्जिककोद्रवौदनभक्षणवदित्येवमादि । परमानु(णु)षु क्षणेषु च सूक्ष्मेष्वेकेष्वप्यनुशेरत इत्य[V. B, 5. Fol. 107 a.](1)नुशयाः । निरुक्तन्यायेन[२] **पूर्वं वा प्राप्तिमुत्सृज्य पश्चात्समुदाचारतोऽनुशेरत इत्यनुशयाः । अन्य[त्] पूर्वमेव व्याख्यातमिति ॥**[3]

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ पञ्चमस्याध्यायस्य प्रथमः पादः ॥

---

[१] Cf. **अणवोऽनुगताश्चैते द्विधा चाप्यनुशेरते ।**
अनुबध्नन्ति यस्माच्च तस्मादनुशयाः स्मृताः ॥ *Ak.* v. 39.

तत्राणवः सूक्ष्मप्रचारत्वात् दुर्विज्ञानतया । अनुगताः प्राप्त्यनुषंगतः । अनुशेरते द्वाभ्यां प्रकाराभ्याम्, आलम्बनतः सम्प्रयोगतश्च । अनुबध्नन्त्यप्रयोगेण प्रतिवारयतोऽपि पुनः पुनः संमुखीभावात् । एभिः कारणैरनुशया उच्यन्ते । *Akb.* v. 39.

[२] अणवः शेरते इत्यनुशयाः, **निरुक्तेन विधिनाऽस्य सिद्धिः ।** सूक्ष्मप्रचारत्वादिति सूक्ष्मप्रवृत्तत्वादित्यर्थः । कथं पुनः सूक्ष्मा प्रवृत्तिः ? अरूपिणां दुर्विज्ञानतया ।··· *Sakv.* pp. 487—8. See *LVPAk.* v. p. 37, n. 2.

[३] V. supra, p. 220, n. 3.

पञ्चमाध्याये

द्वितीयपादः ।

अथैषामष्टानवतेरनुशयानां कत्यकुशलाः कत्यव्याकृताः[१] ? तदारभ्यते—

[289] आद्यं दृष्टिद्वयं कामे निवृताव्याकृतं म(2)तम् ।
धातुद्वये तु सर्वेऽपि निवृताव्याकृता मलाः ॥[२]

कामधातौ तावत् । सत्कायान्तर्ग्राहदृष्टी तत्संप्रयुक्ताविद्ये निवृताव्याकृते । सत्कायदृष्टिस्तावद्दानशीलभावनाभिरविरुद्धत्वात्कुशलमूलसमुच्छेदवैरोधिकत्वाच्च नाकुशला । विपरीताकारत्वान्न कुशला । तृष्णावदकुशलेति चेत् ।[3] न । तृष्णाप्रकर्षे सर्वाकार्यप्रवृत्तिदर्शणा(ना)(3)त् । अन्तर्ग्राहदृष्टिरपि जन्मोच्छेदप्रवृत्तत्वान्निर्वाणविरोधिनी संवेगानुकूला चेति नाकुशला । यथोक्तं भगवता—“येयं दृष्टिः सर्वं मे न क्षमत इतीयं दृष्टिरसंरागाय न संरागाय” इति ।[४] तथोक्तम्—इदमग्र्यं बाह्यकानां दृष्टिकृतानां यदुत नो च स्यान्न च मे स्यान्न भविष्यामि न मे भविष्यति” इति[५] । रूपारूप्यधात्वोः

---

[१] क्लेशा अपि द्विविधाः । अकुशला निवृताव्याकृताश्च । अकुशलेभ्यो विशेषार्थमाह निवृताव्याकृतैरिति । न हि निवृतेन विज्ञानेनाकुशलानां संप्रयोगो भवति । निवृताः क्लिष्टत्वात् । अव्याकृताः कुशलाकुशलत्वेनाव्याकरणात् । *Tvb.* 6 ab.

[२] Cf. **ऊर्ध्वमव्याकृतं सर्वे कामे सत्कायदर्शनम् ।
अन्तग्राहः सहाभ्यां च मोहः शेषास्त्विहाशुभाः ॥** *Ak.* v. 19.

[३] सहजा सत्कायदृष्टिरव्याकृता या मृगपक्षिणामपि वर्तते । **विकल्पिता त्वकुशलेति पूर्वाचार्याः ।** *Akb.* v. 19 c.—‘विकल्पिता त्वकुशला’ इति । य आत्मवादिभिः **कपिलोलूकादिभि**र्विकल्पिता सा नाव्याकृता । किं तर्हि । अकुशलेति । अन्तग्राहदृष्टिरपि या तैर्विकल्पिता साऽप्यकुशला । *Sakv.* p. 463.

[४] Cf. **सन्त’ग्गिवेसन** एके समणब्राह्मणा एवं वादिनो एवं दिट्ठिनो—सब्बं मे खमती ति । सन्ति···सब्बं मे न खमती ति । सन्ति···एकच्चं मे खमति एकच्चं मे न खमती ति । **तत्राग्गिवेसन ये ते···एवंदिट्ठिनो**—सब्बं मे खमती ति···**‘सब्बं मे न खमती ति, तेसमयं दिट्ठि सरागाय सन्तिके संयोगाय सन्तिके** अभिनन्दनाय **सन्तिके अज्झोसनाय सन्तिके उपादानाय सन्तिके** ।···*M. sutta* 74.

[५] Cf. इध भिक्खवे भिक्खु एवं पटिपन्नो होति, ‘नो च’ स्स, नो च मे सिया, न भविस्सति, न मे भविस्सति, यदत्थि यं भूतं तं पजहामी ति···।*Aṅg.* IV. p. 70.

‘सर्वेऽपि (4)निवृताव्याकृता मलाः ।’[१] समाधिसमापत्त्युपहतत्वा[त्] न शक्नुवन्ति निवर्तयितुम् । कुशलास्तु धर्मा अव्याबाधफलत्वाद्विपाकं जनयितुमुत्सहन्ते ॥

[290] कामेष्वकुशलाः शेषाः[२]

सत्कायान्तग्राहदृष्टितत्संप्रयुक्ताऽविद्यावर्जिताः क्लेशाः कामधातावकुशलाः, सव्याबाधफलनिर्वर्तकत्वात् ।

एभ्यः पुनः कत्यकुशलमूलानि कति नेति ? तदु(5)च्यते—

रागद्वेषतमांस्यतः ।
त्रीण्येवाशुभमूलानि पञ्चकारणयोगतः ॥[३]

ये धर्मा अकुशलाश्चाकुशलमूलं च दर्शनभावनाहेयाश्च पञ्चप्रकाराश्च[४] षड्विज्ञानकायिकाश्च[५] त एवाकुशलमूलानीष्यन्ते ॥[६]

किं पुनर्यथा[ऽ]कुशलं(लानि) अनुशयानां मूलानि सन्त्येवमव्याकृतानामपि सन्तीति ? आह—

[291] अव्याकृतद्वयस्यापि त्रीणि मूलानि तत्समाः ।
(6)अविद्या धीश्च तृष्णा च न काङ्क्षामानदृष्टयः ॥

“त्रीणि खल्वव्याकृतमूलानि, अव्याकृताऽविद्या तृष्णा प्रज्ञा” इति काश्मीराः ।[७] हेत्वर्थो हि मूलार्थः । अनिवृताव्याकृता च प्रज्ञा हेतुत्वेन वर्तत इत्यसावप्यव्याकृतमूलम् । विचिकित्सा नाव्याकृतमूलम् । न च मानः ॥

---

[१] रूपारूप्यावचरास्तावत्सर्व एवाव्याकृताः । किं कारणम् । क्लिष्टानां धर्माणां दुःखविपाकः स्यात् । तच्च तयोर्नास्ति । परव्याबाधहेत्वभावात् । *Akb*. v. 16 a.

[२] Cf. शेषास्त्विहाशुभाः । *Ak* v. 19 d.

[३] Cf. कामेऽकुशलमूलानि रागप्रतिघमूढयः । त्रीण्यकुशलमूलानि । *Ak*. v. 20 abc. See *Dhs*. 1058—1061.

[४] दुःख-समुदय-निरोध-मार्गदर्शनहेयाः, भावनाहेयाश्च ।

[५] चक्षुः-श्रोत्र-घ्राण-जिह्वा-काय-मनोविज्ञानकायाः ।

[६] कामधातौ सर्वरागः प्रतिघः सर्वो मोहोऽन्यत्र सत्कायान्तग्राहदृष्टिसंप्रयुक्ता यथाक्रमम् ।…यद्धि अकुशलं चाकुशलस्य च मूलं तदेवाकुशलमूलमिष्टम् । *Akb*. v. 20 bc. See *Dhs*. 1062-1070.

[७] Cf. तृष्णाऽविद्या मतिश्च सा । *Ak*. v. 20 d.

[292] चलत्वादूर्ध्ववृत्तित्वादव्यापित्वाद्यथाक्रमम् ।[1]

चला हि विचिकित्सा प्रतिष्ठार्थश्च (7)मूलार्थः। ऊर्ध्ववृत्तिरुन्नतलक्षणो मानः, अधोगमनवृत्तीनि च मूलानि। न चैतौ क्लेशौ षड्विज्ञानकायिकौ। तस्मादव्यापित्वान्न मूलेषु व्यवस्थाप्येते ।

अव्याकृता[ः] तृष्णादृष्टिमानाविद्या इति बहिर्देशीयकाः, ध्यायिसूत्रोक्तेः।[2] त्रयो हि ध्यायिनः—तृष्णादृष्टिमानोत्तरध्यायिभेदात्। सर्वे च तेऽविद्यावशाद्भवन्तीति चत्वार्ये(8)व इति।

एतच्च न ते। कस्मा[त्] ?

सूत्रस्यार्थापरिज्ञानादहेतुर्ध्यायिचोदनात् ॥

या काचिदव्याकृता तृष्णा अविद्या प्रज्ञा चान्ततो विपाकजाऽपि सर्वाऽसावव्याकृतमूलमिति **काश्मीराः**। *Akb.* v. 20 d. •

'अव्याकृतमूलानि' इति। अनेनाव्याकृतशब्देन केवलेन तृष्णाऽविद्यामतयो विशेषिता इति दर्शयति। अत्र च **मतिरक्लेशस्वभावाऽप्यव्याकृतमूलमितीष्यते वैभाषिकैः**। 'या काचिदव्याकृता तृष्णा' इति। आस्वादनासम्प्रयुक्तेषु ध्यानारूप्येषूपपत्तिकाले वा विमानादिषु सम्भवतः। या काचिदविद्या रूपारूप्यधात्वोः कामधातौ च सत्कायान्तग्राहदृष्टिसंप्रयोगिणीति। एवं प्रज्ञा च या काचिदव्याकृता। अन्ततो विपाकजाऽपि। कामधातौ विपाकजैर्यापथिकशैल्पस्थानिकनिर्माणचित्तसंप्रयुक्ता सत्कायान्तग्राहदृष्टिसंप्रयुक्ता च रूपारूप्यधात्वोः सर्वक्लेशसंप्रयुक्ता प्रज्ञा। *Sakv.* p. 464.

[1] Cf. **द्वैधोद्ध्र्ववृत्तेर्नातोऽन्यौ**। *Ak.* v. 21 a.

[2] Cf. **चत्वार्येवेति बाह्यकाः**।

तृष्णादृङ्मानमोहास्ते ध्यायित्रित्वादविद्यया ॥ *Ak.* v. 21 bcd.

बाह्यकाश्चत्वार्यव्याकृतमूलानीच्छन्ति···अव्याकृता तृष्णा दृष्टिर्मानोऽविद्या च।··· यस्मात् **त्रयो ध्यायिनः, तृष्णादृष्टिमानोत्तरध्यायिनः**। ते चाविद्यावशाद्भवन्तीति। *Akb.* v. 21.—

'अव्याकृता तृष्णा' इति। रूपारूप्यधात्वोः। दृष्टिरपि तयोश्च कामधातौ च सत्कायान्तग्राहदृष्टिस्वभावा। अविद्याऽपि कामधातौ तत्संप्रयोगिण्येव। रूपारूप्यधात्वोश्च सर्वा। 'तृष्णादृष्टिमानोत्तरध्यायिनः' इति। य आस्वादनासंप्रयुक्तध्यानध्यायी स **तृष्णोत्तरध्यायी**। यो ध्याननिश्रयेण शाश्वतादि दृष्टिमुत्पादयति। स **दृष्ट्युत्तरध्यायी**। मानोत्तरध्यायी च। यस्तेन मन्यते लाभ्यहमस्य ध्यानस्य नान्ये तथेति स **मानोत्तरध्यायी**।··· ते चाविद्यावशाद्भवन्तीति। ते च त्रयो ध्यायिनोऽविद्यावशादविद्यायोगात्तथा भवन्ति। अतोऽविद्याऽप्यव्याकृतमूलमिति। समापत्तिसमापन्नानां च एताः क्लेशसमुदाचारावस्थाः अव्याकृतानां धर्माणां मूलं कारणमिति। *Sakv.* p. 464.

Cf. तत्थ कतमो झायी? **अत्थि···दिट्ठुत्तरो झायी, तण्हुत्तरो झायी, पञ्ञुत्तरो झायी ति**। *Netti.* p. 76. See *Vbh.* p. 342.

न खल्वेषा ध्यायित्रिस्वचोदनाऽव्याकृतमूलनिर्देशपरा:(रा)। किं परा तर्ह्येषा:(षा)? योगिनां विपत्तिध्यानाधिमोक्षव्यावृत्तिपरेति पूर्वोक्तमेव साधु:॥[१]

अथ यानि सूत्रे चतुर्दशाव्याकृतवस्तून्युक्तानि,[२] किं तानि कुशलाकुशलपक्षाव्याकरणादव्याकृ(9)तवस्तूनि?[३] नेत्याह। किं तर्हि? स्थापनीयत्वात्।

[293] प्रश्नव्याकरणान्याख्यच्चत्वारि वदतां वर:।
शिष्यानां(णां) वादशिक्षार्थं स्थितीनां च चतुष्टयीम्॥

त्रीणि खलु कथावस्तून्यारभ्य[४] चत्वारि व्याकरणान्यवबुध्य[५] चतस्रश्च स्थितीरवगम्य[६] विगृह्य सभायां पञ्चभिरवयवै:[७] स्वपक्षं प्रतिष्ठाप्य वाद: करणीयो नातोऽन्यथा इत्यत्र वि[V. A, 5. Fol. 107 b.](1)निश्चयात्॥

---

[१] The Kośakāra does not disapprove the view of the Bahirdeśīyaka. See *LVPAk*. v. p. 43, n. 1--2.

[२] शाश्वतो लोक: अशाश्वतो लोक: इत्येवमादि। *Sakv*. p. 465. See *M. sutta* 63.

[३] अव्याकृतसंबन्धेन पर्यनुयुंक्ते। *Sakv*. p. 465. For an allied controversy on the *drishtis* being *avyākrita*, see *Kv*. XIV. 8.—इदानि **अब्याकतकथा नाम होति**। तत्थ विपाककिरियरूपनिब्बानसंखातं चतुब्बिधं अब्याकतत्ता अब्याकतं ति वुत्तं। दिट्ठिगतं '**सस्सतो लोकोति खो वच्छ अब्याकतमेतं**'ति सस्सतादिभावेन अकथितत्ता। येसं पन इमं विभागं अग्गहेत्वा पुरिमाब्याकतं विय दिट्ठिगतं पि अब्याकतं ति लद्धि सेय्यथापि **अन्धकानञ्च उत्तरापथकानञ्च**। *Kv A*. XIV. 8.

[४] Cf. **तीणिमानि भिक्खवे कथावत्थूनि**। कतमानि तीणि? **अतीतं** वा भिक्खवे अद्धानं आरब्भ कथं कथेय्य—एवं अहोसि अतीतमद्धानं ति। **अनागतं** वा···एवं भविस्सति अनागतमद्धानं ति। एतरहि वा भिक्खवे **पच्चुप्पन्नं**···एवं एतरहि पच्चुप्पन्नं ति। *Ang*. I. p. 197.

Also cf. अहञ्च ते गामणि **अतीतं अद्धानं आरब्भ** दुक्खस्स समुदयञ्च अत्थंगमञ्च देसेय्यं,···**अनागतमद्धानं आरब्भ**···देसेय्यं,···अपि चाहं **इधेव** निसिन्नो **एत्थ** च ते निसिन्नस्स दुक्खस्स समुदयञ्च अत्थंगमञ्च देसिस्सामि। *S*. IV. p. 327.

See *Addhāna-kathā*, *Kv*. XV. 3.

[५] V. infra, *Ad. kārikā* 294.

[६] V. infra. *Ad. kārikā* 295.

[७] The five *avayavas* probably refer to *pratijñā*, *hetu*, *drishṭānta*, *upanaya* and *nigamana*. The *Asm*. deals with various aspects of *vāda*, viz., *vāda-viniśchaya*, *vāda-adhishṭhāna*, *vādālaṁkāra*, *vāda-nigraha* and *vāda-niḥsaraṇa*: वादाधिष्ठानं यदधिष्ठाय वाद: क्रियते। संक्षेपतो द्विविधम्। साध्यं साधनं च। साध्यं द्विविधम्। स्वभावो विशेषश्च। **साधनानि अष्टौ। प्रतिज्ञा हेतु: दृष्टान्त: उपनय: निगमनं प्रत्यक्षं अनुमानं आप्तागमश्च**। *Asm*. p. 105. The *Akb*. does not refer to the *pañcha-avayavas* of *vāda*. For the *aṭṭha-mukha-vāda* of the *Kathāvatthu*, see *Points of Controversy*, Prefatory notes, pp. xlviii-ii and *Dhs A*. I. 6.

कानि पुनस्तानि चत्वारि व्याकरणानि ? काश्च ताश्चतस्रः स्थितयः ? तदवद्योत्यते—

[294] एकांशाख्यं विभज्याख्यं पृच्छाख्यं स्थाप्यमेव च ।
मरणप्रसवोत्कर्षजीवद्रव्यान्यतादिवत् ॥[१]

[२]तत्रैकांशव्याकरणम्[३]—कि(किं) यः कश्चिज्जायते सर्वोसौ मृ(म्रि)यते ? ओमिति वाच्यम् । अथ यः कश्चिन्म्रियते सर्वोसौ जायत इति ? विभज्य व्याकर्तव्यम्[४]—क्षीणास्रवो न (2)जायतेऽन्यः सर्वो जायते । किं मनुष्यो विशिष्टोऽथ हीन इति ? परिपृच्छय व्याकर्तव्यम्[५]—कानधिकृत्य पृच्छसि ? देवांस्तिर्यगादीन्वा ? यदि देवानारभ्य हीन इति वाच्यम् । अथ तिरश्चः श्रेष्ठ इति व्याकर्तव्यम् । किमन्यः स्कन्धेभ्यः पुरुषो वाऽनन्य इति ? एष प्रश्नः स्थापनीयः[२], सदसतोरन्यानन्यत्वव्याकरणायोगात्[६], खपुष्पसौगन्ध्यदौर्गन्ध्यव्या(3)करणवत् ॥[७]

---

[१] Cf. एकांशतो व्याकरणं विभज्य परिपृच्छच च ।
स्थाप्यं च मरणोत्पत्तिविशिष्टात्माऽन्यतादिवत् ॥ *Ak*. v. 22.

Also cf. चत्तारो पञ्हव्याकरणा । एकंसव्याकरणीयो पञ्हो, विभज्ज व्याकरणीयो पञ्हो, पटिपुच्छा व्याकरणीयो पञ्हो, ठपनीयो पञ्हो । *Dīgha*. xxxiii. 1. 11.

एकंसवचनं एकं विभज्जवचनं परं ।
ततियं पटिपुच्छेय्य चतुत्थं पन ठापये ॥ *Aṅg*. ii. p. 46.

[२=२] This whole passage (upto एष प्रश्नः स्थापनीयः) is almost identical with *Akb*. v. 22. The *Akb*. begins:—किं सर्वसत्वा मरिष्यन्तीत्येकांशेन व्याकर्तव्यं मरिष्यन्तीति ।

[३] Cf. एकंसिका पि खो पोट्ठपाद, मया धम्मा देसिता···अनेकंसिका पि···। *Dīgha*. ix. 33. Also cf. न खो'त्थ सारिपुत्त सुकरं एकंसेन व्याकातुं । *Aṅg*. i. p. 120.

[४] Cf. विभज्जवादो खो अहमेत्थ, माणव; नाहमेत्थ एकंसवादो । *M. sutta* 99.

[५] पञ्चविधा हि पुच्छा—अदिट्ठजोतना पुच्छा, दिट्ठसंसन्दना पुच्छा, विमतिच्छेदना पुच्छा, अनुमतिपुच्छा, कथेतुकम्यता पुच्छा । *Dhs A*. iii. 3.

[६] *Akb* has : सत्त्वद्रव्यस्याभावात् वन्ध्यापुत्रश्यामगौरतादिवत् ।

[७] The Kośakāra gives three other illustrations (of the four *prashna-vyākaraṇas*) according to Bhadanta Rāma, the Ābhidharmikas and the Mahāsāṅghikas. See *Sakv*. pp. 465-7.

Cf. अस्ति प्रश्न **एकान्तवचनीयः** सर्वो जातो मरिष्यति । ॐ भो इति । अथ सर्वे मृत्वा जनिष्यन्त इति **विभज्य वचनीयमेतत्** । प्रमुदितख्यातिः क्षीणतृष्णः कुशलो न जनिष्यते इतरस्तु जनिष्यते । तथा मनुष्यजातिः श्रेयसी वा न श्रेयसी ? इत्येवं **परिपृष्टे**

स्थितयश्चतस्रो निर्दिश्यन्ते ।[१]

[295] स्थानवादित्वसंज्ञैका परिकल्पाह्वया परा ।
अन्या प्रतिपदाख्याऽन्या ज्ञानवादित्वसंज्ञिता ॥[२]

विभज्य वचनीयः प्रश्नः, पशूनुद्दिश्य श्रेयसी, देवान् ऋषींश्चाधिकृत्य नेति । अयं **त्ववचनीयः प्रश्नः** संसारोऽयमन्तवानथानन्त इति ? कुशलस्यास्ति संसारक्रमपरिसमाप्तिर्नेतरस्येति अन्यतरावधारणे दोषः ।··· *Yoga-bhāshya*, IV. 33.

The *Milinda-pañho* gives a different illustration of these ofur *vyākaraṇas* : चत्तारिमानि महाराज पञ्हब्याकरणानि । कतमानि चत्तारि···। कतमो च महाराज एकंसब्याकरणीयो पञ्हो ? रूपं···पे···विञ्ञाणं अनिच्चं ति एकंसब्याकरणीयो पञ्हो । कतमो विभज्जब्याकरणीयो पञ्हो ? अनिच्चं पन रूपं···पे···विञ्ञाणं ति···अयं विभज्जब्याकरणीयो पञ्हो । कतमो पटिपुच्छाब्याकरणीयो पञ्हो ? किं नु खो चक्खुना सब्बं विजानातीति अयं पटिपुच्छाब्याकरणीयो पञ्हो । कतमो ठपनीयो पञ्हो ? सस्सतो लोको ति···नेव होति न-न-होति तथागतो परं मरणा ति ठपनीयो पञ्हो ।···किं कारणा ठपनीयो ? न तस्स दीपनाय हेतु वा कारणं वा अत्थि । *Milinda*, p. 147.

[१] These are not given in *Akb*. See *sānkathya-parichchheda*, *Asm*. pp. 102—107.

[२] Cf. कथासम्पयोगेन भिक्खवे **पुग्गलो** वेदितब्बो यदि वा कच्छो यदि वा अकच्छो ति ।

सचायं भिक्खवे पुग्गलो पञ्हं पुट्ठो समानो **ठानट्ठाने** न **सण्ठाति, परिकप्पे** न **सण्ठाति, अञ्ञावादे** न सण्ठाति, **पटिपदाय** न सण्ठाति, एवं सन्तायं पुग्गलो अकच्छो होति । *Aṅg*. III. p. 197.

अकच्छो ति कथेतुं न युत्तो ।···**ठानट्ठाने न सण्ठातीति** कारणाकारणे न सण्ठाति; तत्रायं नयो––सस्सतवादी युत्तेन कारणेन पहोति उच्छेदवादिं निग्गण्हातुं, उच्छेदवादी तेन निग्गण्हियमानो कं पनाहं उच्छेदं वदामीति सस्सतवादिभावमेव दीपेति अत्तनो वादे पतिट्ठातुं न सक्कोति; एवं उच्छेदवादिम्हि पहोन्ते सस्सतवादी, पुग्गलवादिम्हि पहोन्ते सुञ्ञतवादी··· न सण्ठाति नाम ।

परिकप्पे न सण्ठातीति इदं पञ्हपुच्छनेपि पञ्हकथनेपि लब्भति । कथं ? एकच्चो हि पञ्हं पुच्छिस्सामीति कण्ठं सोधेति सो इतरेन इदं नाम त्वं पुच्छिस्ससीति वुत्तो ञातभावं ञत्वा न एतं, अञ्ञं पुच्छिस्सामीति वदति, एवं परिकप्पे सण्ठाति नाम ।

अञ्ञावादे न सण्ठातीति ञातवादे जानितवादे न सण्ठाति । कथं ? एकच्चो पञ्हं पुच्छति तं इतरो 'मनापो तया पञ्हो पुच्छितो कहं ते एस उग्गहितो'ति वदति । इतरो पुच्छितब्बनियमेनेव पञ्हं पुच्छित्वापि तस्स कथाय अपञ्हं नु खो पुच्छितं ति विमतिं करोति···

पटिपदाय न सण्ठातीति पटिपत्तियं न तिट्ठति, वत्तं अजानित्वा अपुच्छितब्बट्ठाने पुच्छतीति अत्थो । *Aṅg A*. II. pp. 308-311.

कश्चिद्धि वादी स्थानास्थाने संभवासंभवाख्ये संतिष्ठते कश्चिन्न संतिष्ठते। प्रथमः कत्थ्यः(थ्यः), द्वितीयस्त्वकथ्यः। परिकल्पे संतिष्ठते, यः परिकल्पिते दृष्टान्ते दार्ष्टान्तिकार्थं(र्थे) प्रसाधके संतिष्ठते, स च कथ्यो यो न सन्तिष्ठते सोऽकथ्यः। ⁽⁴⁾एवं प्रतिपदि ज्ञानवादितायां यः सन्तिष्ठते स कथ्यते। यस्तु न संतिष्ठते स दुर्मतिरकथ्यते।

इदमिदानीं वक्तव्यम्। अथ केनानुशयेन कस्मिन्वस्तुनि संयुक्तः ?[१] तत्र तावद्वस्तु क्षेत्रवस्त्वादिपञ्चप्रकारम्।[२] तदिह संयोगवस्त्वधिकृतं वेदितव्यम्। त[द्] द्विविधमाश्रयालम्बननैयम्येन प्रकारनैयम्येन च।

तत्राश्रयालम्बननैयम्येन ता⁽⁵⁾वच्चक्षुर्विज्ञानकायिकैरनुशयैः, रूपेष्वालम्बनतः संयुक्तः। तत्संप्रयुक्तेषु संप्रयोगतः। ते च मनोधर्मायतने। एवं यावत्कायविज्ञानिकैर्यथाविषयमालम्बनतः, तत्संप्रयुक्तेषु संप्रयोगतः। मनोविज्ञानकायिकैर्द्वादशस्वायतनेष्वालम्बनतः। संप्रयुक्तेषु संप्रयोगतः। इत्याश्रयालम्बननियमः।

प्रकार⁽⁶⁾नैयम्येन तु दुःखदर्शनप्रहातव्यैः सर्वत्रगैः पञ्चसु निकायेष्वालम्बनतः संयुक्तः। तत्संप्रयुक्तेषु संप्रयोगतः। असर्वत्रगैस्तु स्वनैकायिकेष्वालम्बनतः। संप्रयुक्तेषु संप्रयोगतः[३]। इत्येवं सर्वत्र यथासंभवं वक्तव्यम्॥

अथेदानीमतीतानागतप्रत्युत्पन्ननैयम्येन[४] कः पुद्गलः कस्मिन्वस्तुनि कतमेनानुशयेण(न) सं⁽⁷⁾युक्तः ? तदिदमुद्भाव्यते—

---

[१] Cf. यस्य पुद्गलस्य योऽनुशयो यस्मिन्नालम्बने अनुशेते स तेन तस्मिन् संप्रयुक्तः। इदं तु वक्तव्यम्। अतीते न कस्मिन् यावत् प्रत्युत्पन्ने न कस्मिन्निति ?···*Akb.* v. 22.

See *Jpś.* p. 19 and *Yogasūtra*, IV. 11.

[२] **पञ्चविधवस्तु। स्वभाववस्तु।** यथोक्तं—"यद्वस्तु प्रतिलब्धं समन्वागमतः स तेन वस्तुना" इति। **आलम्बनवस्तु।** यथोक्तं—"सर्वधर्मज्ञेया ज्ञानेन यथावस्त्विति"। **संयोगवस्तु।** यथोक्तं—"यस्मिन् वस्तुनि अनुनयः संयोजनेन संप्रयुक्तः प्रतिघसंयोजनेनापि तस्मिन्" इति। **हेतुवस्तु।** यथोक्तं—"सवस्तुकाः धर्माः कतमे ? संस्कृता धर्माः" इति। **परिग्रहवस्तु।** यथोक्तं—"क्षेत्रगृहवस्तु" इति। *Akb.* II. 55. See *Sakv.* pp. 21-22.

[३] See *Asm.* pp. 33, 44 and 51.

[४] **कथमतीतं कत्यतीतानि किमर्थमतीतपरीक्षा।** उत्पन्ननिरुद्धलक्षणतोऽपि हेतुफलोपयोगतोऽपि संक्लेशव्यवदानकारित्रसमतिक्रान्तितोऽपि हेतुपरिग्रहविनाशतोऽपि फलस्वलक्षणभावाभावतोऽपि स्मरसंकल्पनिमित्ततोऽपि अपेक्षासंक्लेशनिमित्ततोऽपि उपेक्षाव्यवदाननिमित्ततोऽपि अतीतं द्रष्टव्यम्। सर्वेषामेकदेशः। प्रवर्तकात्माभिनिवेशत्याजनार्थम्।

कथमनागतं··। हेतौ सत्यनुत्पन्नतोऽपि अलब्धस्वलक्षणतोऽपि हेतुफलानुपयोगतोऽपि

[296] मानप्रतिघसंरागैर्वर्तमानोज्झितक्रियैः ।
जाता यत्राप्रहीणाश्च संयुक्तस्तत्र वस्तुनि ॥[१]

एते हि मानप्रतिघरागाः स्वलक्षणक्लेशाः सद्वस्तुविषयत्वात् । सामान्यलक्षणक्लेशास्तु दृष्टिविचिकित्साद्याः । अत एते मानादयोऽतीताः प्रत्युत्पन्नाश्च यस्मिन्वस्तुन्युत्पन्ना न च प्रहीणास्तस्मिन्व(8)स्तुनि तैः संप्रयुक्तो वेदितव्यः । नह्येते सर्वस्य सर्वत्रोत्पद्यन्ते स्वलक्षणक्लेशत्वात् ॥[२]

संक्लेशव्यवदानभावाप्रत्युपस्थानतोऽपि हेतुस्वभावाभावतोऽपि अभिनन्दनासंक्लेशनिमित्ततोऽपि अभिनन्दनाव्यवदाननिमित्ततोऽप्यनागतं द्रष्टव्यम् ।···

कथं **प्रत्युत्पन्नं**···। उत्पन्ननिरुद्धलक्षणतोऽपि हेतुफलोपयोगानुपयोगतोऽपि संक्लेशव्यवदानप्रत्युपस्थानतोऽपि अतीतानागतभावनिमित्ततोऽपि कारित्रप्रत्युपस्थानतोऽपि प्रत्युत्पन्नं द्रष्टव्यम् ।···*Asm.* p. 21.

Also see—अपि च अतिक्कन्तहेतुपच्चयकिच्च**मतीतं**, निट्ठितहेतुकिच्चमनिट्ठितपच्चयकिच्चं **पच्चुप्पन्नं**, उभयकिच्चमसम्पत्तं **अनागतं**। सकिच्चक्खणे वा पच्चुप्पन्नं, ततो पुब्बे अनागतं, पच्छा अतीतं ।···*Vm.* xiv. 191. See *VmT.* pp. 496-7 and *Dhs.* 1038-40.

The terms *pachchuppanna* and *uppanna* are explained as below :—

पच्चुप्पन्नं च नामेतं तिविधं—खणपच्चुप्पन्नं सन्ततिपच्चुप्पन्नं अद्धापच्चुप्पन्नं च। तत्थ उप्पादट्ठितिभंगप्पत्तं 'खणपच्चुप्पन्नं' । एकद्विसन्ततिवारपरियापन्नं 'सन्ततिपच्चुप्पन्नं' ।··· एवं ताव **मज्झिमभाणका** । **संयुत्तभाणका** पन '**रूपसन्तति अरूपसन्तती**'ति द्वे सन्ततियो वत्वा 'उदकं अतिक्कमित्वा गतस्स याव तीरे अक्कन्तउदकलेखा न विप्पसीदति···अयं रूपसन्तति नाम; द्वे तयो जवनवारा अरूपसन्तति नामा' ति वत्वा तदुभयं सन्ततिपच्चुप्पन्नं नामा' ति वदन्ति । एकभवपरिच्छिन्नं पन अद्धापच्चुप्पन्नं नाम···। *Dhs A.* vi. 19-21.

उप्पन्नं होती ति **वत्तमान-भूतापगत-ओकासकत-भूमिलद्धवसेन उप्पन्नं नाम अनेकप्पभेदं** । तत्थ सब्बं पि उप्पादजराभङ्गसमङ्गिसंखातं **वत्तमानुप्पन्नं** नाम । आरम्मणरसं अनुभवित्वा निरुद्धं, अनुभूतापगतसंखातं कुसलाकुसलं, उप्पादादित्तयं अनुप्पत्वा निरुद्धं, हुत्वापगतसंखातं, सेससंखातं च **भूतापगतुप्पन्नं** नाम । "यानि'स्स तानि पुब्बे कतानि कम्मानी"ति एवमादिना नयेन वुत्तं कम्मं अतीतं पि समानं, अञ्ञं विपाकं पटिबाहित्वा अत्तनो विपाकस्सोकासं कत्वा ठितत्ता, तथा कतोकासं च विपाकं अनुप्पन्नं पि समानं एवं कतोकासे एकान्तेन उप्पज्जनतो **ओकासकतुप्पन्नं** नाम । तासु तासु भूमिसु असमूहतं अकुसलं **भूमिलद्धुप्पन्नं** नाम ।···**भूमी** ति विपस्सनाय आरम्मणभूता तेभूमका पञ्चक्खन्धा । **भूमिलद्धं नाम तेसु खन्धेसु उप्पत्तिरहं किलेसजातं** । *Dhs A.* iii. 40-44.

[१] Cf. **रागप्रतिघमानैः स्यादतीतप्रत्युपस्थितिः ।
यत्रोत्पन्नाऽप्रहीणास्ते तस्मिन्वस्तुनि संयुतः ॥** *Ak.* v. 23.

[२] Cf. समासत इमे द्विविधाः क्लेशाः । स्वलक्षणक्लेशाश्च रागप्रतिघमानाः, सामान्य-

[297] अजातैर्माण(न)सैरेतैः सर्वत्रान्यैः स्वकाध्विकैः ।
सर्वत्राजैस्तथा शेषः संयुक्ता स्कन्धसन्ततिः ॥[१]

यथा प्रहीणा इति वर्तत(ते) । यस्य खलु योऽतीतः क्लेशप्रकारः प्रहीणोऽनागतोऽपि । अतो ये मानरागादयो नागता न प्रहीणास्तैः सर्वस्मिंस्त्रै(9)यध्विके वस्तुनि संयुक्तः । तदालम्बनानामुत्पत्तिसंभवान्मानसानां च त्रैयध्वविषयत्वात् । अतोऽन्यै रागादिभिरनागतैरणा(ना)गत एव वस्तुनि संयुक्तोऽतीतैरतीत एव प्रत्युत्पन्नैः प्रत्युत्पन्न एव । मानसेभ्यो ह्यन्ये पञ्चविज्ञानकायिकाः । ततः सिद्धं भवत्यतीतप्रत्युत्पन्नैरपि मानसैरस्वाध्विकेऽपि वस्तुन्यप्रहीणैः सं[V. B, 6. Fol. 108 a](1)युक्तः स्यान्न च केवलं मानसैरेवानागतैरेभिः सर्वत्र । किं तर्हि ? पञ्चविज्ञानकायिकैरपि । अनुत्पत्तिधर्मिकैस्तु पञ्चविज्ञानकायिकैः सर्वत्र त्रैयध्विकैर्वस्तुनि संयुक्तः, तद्विषयस्यातीतानागतप्रत्युत्पन्नत्वात् ।[२] सामान्यक्लेशैस्तु दृष्टिविचिकित्साऽविद्याख्यैस्त्रैयध्विकैरपि सर्वस्मिंस्त्रैयध्विके वस्तुनि संयुक्तः, तेषां सामान्य(2)क्लेशत्वाद्यावदप्रहीणा इत्यनुवर्तते ।

कथं पुनर्गम्यतेऽतीतादिषु वस्तुषु रागादय उत्पद्यन्ते तैश्च तत्र संयुक्तो भवतीति ? सूत्रादेव हि । भगवतोक्तम्—“त्रयश्छन्दरागस्थानीया धर्माः । अतीताश्छन्दरागस्थानीया धर्माः, अनागतप्रत्युत्पन्नाः । अतीतांश्छन्दरागस्थानीयान्धर्मान्प्रतीत्योत्पद्यते च्छन्दः । उत्पन्ने च्छन्दे संप्रयुक्तस्तैर्धर्मै(3)-

---

क्लेशाश्च दृष्टिविचिकित्साऽविद्याः । *Akb.* v. 22.—**‘स्वलक्षणक्लेशाश्च’** इति स्वलक्षणं सुखवेदनीयादि वस्तु । तत्र **रागः** सुखवेदनीयमेव वस्त्वालम्ब्योत्पद्यत इति स्वलक्षणक्लेश इत्युच्यते । तेन सुखवेदनीयेन वस्तुनालम्ब्यमानेनोन्नतिर्भवतीति **मानोऽपि** स्वलक्षणक्लेशः । तथा दुःखवेदनीयं वस्त्वालम्ब्य **प्रतिघ** उत्पद्यत इति प्रतिघोऽपि स्वलक्षणक्लेश इत्युच्यते । **‘सामान्यक्लेशाश्च दृष्टिविचिकित्सादयः’** सामान्याः सामान्येन वा क्लेशाः सामान्यक्लेशाः । एते ह्यविशेषेण सुखवेदनीयादिके वस्तुन्युत्पद्यन्त इति । अतस्तदालम्ब्योत्पन्नाः सामान्यक्लेशा इत्युच्यन्ते । *Sakv.* p. 467. V. supra, p. 240, n. 4.

[१] Cf. **सर्वत्रानागतैरेभिर्मानसैः स्वाधिके परैः ।**
अजैः सर्वत्र शेषैस्तु सर्वैः सर्वत्र संयुतः ॥ *Ak.* v. 24.

[२] **‘तैरनुत्पत्तिधर्मिभिः सर्वत्र वस्तुनि त्रैयध्विके संयुक्तः ।’** एते ह्यनुत्पत्तिधर्मिणोऽनागत एवाध्वन्यवतिष्ठन्ते । एषां चालम्बनानि संचरन्ति । ससंप्रयोगा हि क्लेशाः सुवर्चलावदनुत्पत्तिधर्मिणो विषयाभिमुखा एवावतिष्ठन्ते । तथा ह्यनुत्पत्तिधर्मिणो नैवालम्बनमालम्ब्योत्पद्यन्त इति । अतः केषाञ्चिदालम्बनमतीतम् । केषाञ्चिद्वर्तमानम् । केषाञ्चिदनागतं भवति । **न ह्यालम्बनानुत्पत्तित एव तेषामनुत्पत्तिः । किं तर्हि ? प्रत्ययवैकल्यात् । अवस्थाफलं हि सामग्र्यं न द्रव्यफलमिति सिद्धान्तः ।** *Sakv.* p. 468.

वक्तव्यो न विसंयुक्तः।"[१] तथा—"यस्मिन् रूपेऽतीतानागतप्रत्युत्पन्ने उत्पद्यतेऽनुनयो वा प्रतिघो वा।"[२] इत्येवमादि।

कः पुनरत्र संयुज्यते ? यदा शून्याः[३] सर्वसंस्काराः, नित्येन ध्रुवेन(ण) शाश्वतेनाविपरिणामधर्म(र्मे)णात्मनाऽत्मीयेन[४] वा ? तथोक्तम्—"अस्ति कर्मास्ति विपाकः कारकस्तु नोपलभ्यते य इमांश्च स्कन्धान् प्रतिनिक्षिप्यान्यान् स्कन्धान् प्रति(4)संदधातीत्यन्यत्र धर्मसंकेतात्"[५] इति विस्तरः।

---

[१] The Sarvāstivādin quotes a similar *āgama* against the Sthaviravādin :

न वत्तब्बं 'अतीतं अत्थि अनागतं अत्थी' ति ? आमन्ता।

ननु वुत्तं भगवता—"यं किञ्चि भिक्खवे रूपं अतीतानागतपच्चुप्पन्नं···या काचि वेदना···विञ्ञाणं···अयं वुच्चति विञ्ञाणक्खन्धोति।" [*S.* III. p. 47.] अत्थेव सुत्तन्तो ति ?···तेन हि अतीतं अत्थि अनागतं अत्थी ति। *Kv.* I. 1.

Cf. अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्।

नास्त्यसतः सम्भवः। न चास्ति सतो विनाश इति द्रव्यत्वेन सम्भवन्त्यः कथं निर्वर्तिष्यन्ते वासना इति। अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्। भविष्यद्व्यक्तिकमनागतम्। अनुभूतव्यक्तिकमतीतम्। स्वव्यापारोपरूढं वर्तमानम्। त्रयं चैतद्वस्तु ज्ञानस्य ज्ञेयम्। यदि चैतत्स्वरूपतो नाभविष्यन्नेदं निर्विषयं ज्ञानमुदपत्स्यत तस्मादतीतानागतं स्वरूपतोऽस्तीति। *Yoga-bhāshya*, IV. 12.

[२] Cf. "पपञ्चेति अतीतानागतपच्चुप्पन्नं चक्खुविञ्ञेय्यं रूपमारब्भ···" Quoted in *Netti*, p. 38.

[३] 'सुञ्ञो लोको सुञ्ञो लोको ति भन्ते वुच्चति। कित्तावता नु खो भन्ते सुञ्ञो लोको ति वुच्चती ति ?' 'यस्मा खो आनन्द सुञ्ञं अत्तेन वा अत्तनियेन वा तस्मा सुञ्ञो लोको ति वुच्चति।···*S.* IV. p. 54.

···परमत्थेन हि सब्बानेव सच्चानि वेदक-कारक-निब्बुत–गमकाभावतो सुञ्ञानी ति वेदितब्बानि। *Vm.* XVI. 90.

शून्यतालक्षणं कतमत्। तेषु तस्य अभावः। तेषु अभावः कतमः। स्कन्धधात्वायतनेषु नित्यध्रुवकूटस्थाविपरिणामधर्मात्मात्मीयाभावः। अनेन नयेन तेषां शून्यता। *Asm.* p. 40.

[४] अनात्मलक्षणं कतमत्। यथाऽऽत्मवादे स्थितस्य आत्मलक्षणस्य स्कन्धधात्वायतनेषु तल्लक्षणस्याभावः। स्कन्धधात्वायतनेषु आत्मलक्षणाभावतामुपादाय। इदमुच्यते अनात्मलक्षणम्। एतदभिसंधायोक्तं भगवता सर्वे धर्मा अनात्मन इति। *Ibid.*

[५] See *LVPAk.* v. p. 59, n. 3. Quoted in *Akb.* III. 18a, *B. Pañjikā*, IX. 73; *Ts.Pañjikā*, p. 11.

Cf. स च तथागतस्य हेतुप्रत्ययसंयुक्तां धर्मदेशनामवतरेत्। नात्र कश्चिदात्मा वा सत्त्वो वा जीवो वा पुद्गलो वा यः करोति प्रतिसंवेदयते इति ह्यकृतामनभिसंस्कारां माया-

तत्र प्रतिसमाधानम्—'संयुक्ता स्कन्धसन्ततिः।' स्कन्धसन्ततौ हि स्कन्धलक्षणसन्तानैकत्वाभिमानात्, संवृत्या सत्त्वसंज्ञप्तिरित्यदोषः ॥[१]

त्रयात्पुनरेतस्मात्—

[298] द्वयमेवात्र निष्पन्नं तृतीयं तूपचारतः ।

वस्तुसंयोजनाख्यं द्वयं परमार्थतो विद्यते सत्त्वाख्यस्तु तृतीयोऽर्थः संवृ(5)त्या विद्यत इति ।[२]

धर्मतामसंक्लेशधर्मतां प्रकृतिप्रभास्वरतां सर्वधर्माणामवतरत्यादिशुद्धान्सर्वधर्मानभिश्रद्धधात्यधिमुच्यते ।··· *Tathāgata-kośa-sūtra*. (Quoted in *Śikshā*, p. 172.)

Also cf. दुक्खमेव उप्पज्जमानं उप्पज्जति, दुक्खमेव निरुज्झमानं निरुज्झति । *S*. II. p. 17.

किन्नु सत्तो ति पच्चेसि । मारदिट्ठिगतं नु ते ।
सुद्धसङ्खारपुञ्जोयं । नयिध सत्तूपलब्भति ॥
दुक्खमेव हि सम्भोति । दुक्खं तिट्ठति वेति च ।
नाञ्ञत्र दुक्खा सम्भोति । नाञ्ञं दुक्खा निरुज्झति ॥ *S*. I. p. 135.

दुक्खमेव हि, न कोचि दुक्खितो, कारको न, किरिया व विज्जति ।
अत्थि निब्बुति, न निब्बुतो पुमा, मग्गमत्थि गमको न विज्जति । *Vm*. XVI. 90.

The *Abhidhamma-mūla-ṭīkā* gives the following comment :—

"यथापि अङ्गसम्भारा होति सद्दो रथो इति ।
एवं खन्धेसु सन्तेसु होति सत्तोति सम्मुतीति ॥" [*S*. I. p. 135.]

—यदि पुग्गलो न विज्जति कथं सारम्मणता सिया ति ? अविज्जमानस्सापि आरम्मणस्स गहणतो । अविज्जमानम्पि हि परिकप्पितं लोकसञ्जातं वा विज्जमानं वा सभावभूतं आरम्मणं गहेत्वा वा उप्पज्जनतो सारम्मणता वुत्ता । **सियारम्मणता ति हि वचनं चित्तचेतसिकानं आरम्मणेन विना अप्पवत्तिञ्ञेव दीपेति न तेहि गहितस्स आरम्मणस्स विज्जमानतं वाति ।** अयं संखतासंखतविनिम्मुत्तस्स अत्थितापटिसेधो सब्बथा अनुवत्तन्तानं विनिच्छयो । *A. Mūlaṭīkā*. p. 131. V. infra, *Adv. kārikā* 306.

[१] Cf. **नात्मास्ति**

कीदृश आत्मा य इमान्निक्षिपत्यन्यांश्च स्कन्धान् प्रतिसन्दधातीति परिकल्प्यते । स तादृशो नास्त्यन्तर्व्यापारपुरुषः । एवं तूक्तं भगवता—'अस्ति कर्म···धर्मसंकेतात् ।'···कीदृशस्तर्ह्यात्मा न प्रतिषिध्यते ?

स्कन्धमात्रन्तु क्लेशकर्माभिसंस्कृतम् ।

यदि तु स्कन्धमात्रमेवात्मेत्युपचीयते तस्याप्रतिषेधः । *Akb*. III. 18 ab.

[२] Cf. बुद्धानं पन द्वे कथा **सम्मुतिकथा परमत्थकथा** च । तत्थ सत्तो पोसो देवो ब्रह्मा ति आदिका **सम्मुतिकथा** नाम । अनिच्चं दुक्खं अनत्ता खन्धा धातुयो आयतनानि

कुतः पुनरेतद् द्वयं परमार्थतो विद्यते ? तदुच्यते—

सदसद्धेतुनो यस्मान्मध्यस्थैश्च परिग्रहात् ॥

शुभाशुभफलं कर्मनैयम्याद् गुणदोषफलनियम्यता:(ता) । किञ्च, 'मध्यस्थैश्च परिग्रहात् ।' मध्यस्था उच्यन्ते वीतक्लेशाः । तैः शुभं च शुभतोऽशुभं चाशुभतः, गुणाश्च गुणतः दोषाश्च दोषतः परिगृही(6)ताः । तत्फलं चेष्टमिष्टतः परिगृहीतमनिष्टं चानिष्टतः । इति सिद्धं द्वयं परिनिष्पन्नं[१] तृतीयं तूपचारत इति ।

युक्तं तावदिदम् । यदिदं प्रत्युक्तं वस्तुहेतुप्रत्ययात्प्रतीत्योत्पन्नं परमार्थतो विद्यते[२] प्रत्यात्मवेदनीयत्वात्, तदालम्बनाश्च रागादयः द्रव्यतः सन्तीति । यत्पुनरिदमुक्तमतीतानागते वस्तुनि त्रैय(7)ध्विकैरनुशयैः संयुक्त इति तदेतत्साहसमाहोपुरुषिकमात्रम् । कः पुनरेतदतीतानागतादि द्रव्यतोऽभिवाञ्छतीत्याहाभिधार्मिकाः ॥[३]

सतिपट्ठाना सम्मप्पधाना ति आदिका **परमत्थकथा** नाम ।···पकतिया पन पठमं एव **परमत्थकथं** कथेन्तस्स देसना लूखाकारा होति तस्मा बुद्धा पठमं सम्मुतिकथं कथेन्ता पि सच्चमेव सभावमेव अमुसा व कथेन्ति, परमत्थकथं कथेन्ता पि सच्चमेव सभावमेव अमुसा व कथेन्ति ।

दुवे सच्चानि अक्खासि सम्बुद्धो वदतां वरो ।
सम्मुतिं परमत्थञ्च ततियं नूपलब्भति ॥
संकेतवचनं सच्चं लोकसम्मुतिकारणं ।
परमत्थवचनं सच्चं धम्मानं भूतलक्खणं ति ॥ *Dīgha A.* IX. 49.

For a discussion on the terms *paramattha* and *sachcha*, see *Points of Controversy*, pp. 371—4.

For the Mahāyānist definitions of *paramārtha* and *saṁvṛitisatya*, see *B. Pañjikā*, IX. 2, *Madhyamakāvatāra*, VI. 23, 25; *Mādhyamikakārikā*, XXIV. 8.

[१] On *parinishpanna*, see *Triswabhāvanirdeśa*, 3; *Points of Controversy*, pp. 395-6.

[२] The Mahāyānists hold the opposite view :—**तदुपदर्शितं च प्रतीत्यसमुत्पन्नं वस्तुरूपं संवृतिरुच्यते । तदेव लोकसंवृतिसत्यमित्यभिधीयते ।** *B. Pañjikā*. IX. 2.

[3] The Kośakāra initiates a long discussion on this controversy and gives the Vaibhāshika view as below :—

किं पुनरिदमतीतानागतमुच्यतेऽस्त्यथ न । यद्यस्ति सर्वकालास्तित्वात्संस्काराणां **शाश्वतत्वं प्राप्नोति** । अथ नास्ति । कथं तत्र तेन वा संयुक्तो भवति विसंयुक्तो वा । **न संस्काराणां शाश्वतत्वं प्रतिज्ञायते वैभाषिकैः** संस्कृतलक्षणयोगात् । प्रतिज्ञायते तु विशदं···

सर्वकालास्तितोक्तत्वात्

उक्तं हि **भगवता**—"अतीतं चेद् भिक्षवो रूपं नाभविष्यन्न श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षोऽभविष्यत्···"

चत्वारः खल्विह प्रवचने वादिनः । कतमे चत्वारः ? तदपदिश्यते—

[299] सर्वमस्ति प्रदेशोऽस्ति सर्वं नास्तीति चापरः ।
अव्याकृतास्तिवादीति चत्वारो वादिनः स्मृताः ॥[१]

तत्र सर्वास्ति(8)वादा(द)स्याध्वत्रयमस्ति स ध्रुवत्रयमिति । विभज्यवादिनस्तु[२] दार्ष्टान्तिकस्य च प्रदेशो वर्तमानाध्वसंज्ञकः । वैतुलिकस्य अयोग-

---

द्वयात्

"द्वयं प्रतीत्य विज्ञानस्योत्पादात्" इत्युक्तम् । ···असति वा अतीतानागते तदालम्वनं विज्ञानं द्वयं प्रतीत्य न स्यात् ।···

सद्विषयात्

सति विषये विज्ञानं प्रवर्तते नासति । यदि चातीतानागतं न स्यादालम्वनं विज्ञानं न स्यात् ।···

फलात् ।

यदि चातीतं न स्यात् शुभाशुभस्य कर्मणः फलमायत्यां कथं स्यात् ।···**तस्मादस्त्येवातीतानागतमिति वैभाषिकाः । अवश्यं च किलैतत्सर्वास्तिवादेन सताऽभ्युपगन्तव्यम् ।** *Akb.* v. 25 ab.

For a detailed exposition of the arguments between the Vaibhāshikas and the Sautrāntikas on the question of Sarvāstivāda, see Stcherbatsky: *The Central Conception of Buddhism*, pp. 76—91 (Appendix I); *LVPAk.* v. pp. 49—66. For the त्रैकाल्यवादिमतखण्डन, see *Bodhicharyāvatāra-pañjikā*, IX. 143-150. For the earliest reference to this topic in the Pāli literature, see *Poṭṭhapāda-sutta* (*Dīgha.* IX. 50—53).

This controversy is recorded in the *Kathāvatthu*, I. 6-8.

—इदानि **सब्बमत्थी ति वादकथा** नाम होति । तत्थ येसं 'यं किञ्चि रूपं **अतीतानागतपच्चुप्पन्नं** —पे— अयं वुच्चति रूपक्खन्धो' ति आदिवचनतो सब्बे पि **अतीतादि भेदा धम्मा खन्धसभावं न** विजहन्ति **तस्मा सब्बं अत्थि येव** नामा ति लद्धि, सेय्यथापि एतरहि **सब्बत्थिवादानं** । तेसं लद्धिविसोधनत्थं सब्बमत्थीति पुच्छा **सकवादिस्स** । *KvA.* I. 6. On 'सब्बं अत्थि' see *Points of Controversy*, pp. 375—7.

[१] Cf. **तदस्तिवादात् सर्वास्तिवादा इष्टाश्चतुर्विधाः ।** *Ak.* v. 25 cd.

[२] ये तु किञ्चिदस्ति यत्प्रत्युत्पन्नमदत्तफलं चातीतं कर्म, किञ्चिन्नास्ति यद्दत्तफलमतीतानागतं चेति विभज्य वदन्ति ते **विभज्यवादिनः** । *Akb.* v. 25 cd.

This view, attributed to the Vibhajyavādins, is referred to in the *Kathāvatthu* :—अतीतं अत्थीति ?

एकच्चं अत्थि एकच्चं नत्थीति ।

···किं अत्थि किं नत्थीति ?···**अतीता अविपक्कविपाका धम्मा ते अत्थीति ?**

शून्यतावादिनः[१] सर्वं नास्तीति । पौद्गलिकस्यापि[२] अव्याकृतवस्तुवादिनः पुद्गलोऽपि द्रव्यतोऽस्तीति ।

अत्र पुनः

[300] एभ्यो यः प्रथमो वादी भजते साधुतामसौ ।
तर्काभिमानिनस्त्वन्ये (9)युक्त्यागमबहिष्कृताः ॥

यः खल्वेष प्रथमो वादी सर्वास्तिवादाख्यः, एष खलु युक्त्यागमपोपपन्नाभिधायित्वात्सद्वादी । तदन्ये वादिनो दार्ष्टान्तिकवैतुलिकपौद्गलिकाः न युक्त्यागमाभिधायिनः, तर्काभिमानिनस्ते । मिथ्यावादित्वादेते लोकायतिक-

---

आमन्ता ।
अतीता विपक्कविपाका धम्मा ते अत्थीति ? न हे'वं वत्तब्बे ।
···अनागता उप्पादिनो धम्मा ते अत्थीति ? आमन्ता ।
अनागता अनुप्पादिनो धम्मा ते अत्थीति ? न हे'वं वत्तब्बे । *Kv*. I. 8.

—इदानि **एकच्चं अत्थी ति कथा** नाम होती । तत्थ **ये एकच्चं अतीतं अत्थी ति मञ्ञन्ति**, सेय्यथा पि **कस्सपिका** ।···अयं हि'स्स अधिप्पायो **अविपक्कविपाका अत्थि, विपक्कविपाका नत्थी ति** । *Kv A*. I. 8.

From this it would appear that the Kassapikas are vibhajyavādins. The Sthaviravādins too claim to be vibhajyavādins :—'विभज्जवादी भन्ते सम्मासम्बुद्धो ति' ? 'आम महाराजा' ति । *Vinaya A*. I. p. 61. Also see विभज्जवादिमण्डलं ओगाहेत्वा··· *Vm*. XVII. 25.

Cf. 'राजा आह···किमेतं अद्धानं नामा' ति ? **अतीतो अद्धा । अनागतो अद्धा । पच्चुप्पन्नो अद्धा** ति । **किं पन भन्ते सब्बे अद्धा अत्थी ति ?** कोचि महाराज अद्धा अत्थि, **कोचि नत्थी** ति ।···**ये ते महाराज सङ्खारा** अतीता विगता निरुद्धा विपरिणता **सो अद्धा नत्थि । ये धम्मा विपाका ये च विपाकधम्मधम्मा ये च** अञ्ञत्र **पटिसन्धिं देन्ति, सो अद्धा अत्थि** । ये सत्ता कालङ्कता अञ्ञत्र उप्पन्ना सो च अद्धा अत्थि । ये सत्ता कालङ्कता अञ्ञत्र अनुप्पन्ना, सो अद्धा नत्थि । ये च सत्ता परिनिब्बुता, सो च अद्धा नत्थि परिनिब्बुतत्ता' ति । *Milinda*, p. 52.

Also cf. लद्धोकासस्स हि कम्मस्स विपाको दुविधो—खणप्पत्तो अप्पत्तो च । तत्थ **'खणप्पत्तो' उप्पन्नो नाम । 'अप्पत्तो' चित्तानन्तरे वा उप्पज्जतु, कप्पसतसहस्सातिक्कमे वा । धुवपच्चयट्ठेन नत्थि नाम न होति, उप्पादिनो धम्मा नाम जाता** । *Dhs A*. v. 41. See *A. Mūlaṭīkā*, p. 121.

[१] V. supra, p. 33.

[२] The Kośakāra does not mention, in this connection, the views of Vaitulika and Paudgalika.

वैनाशिकनग्नाटपक्षे प्रक्षेप्तव्याः । इत्यतश्च सर्वं सर्वगतमुपदर्ष(र्श)[V. A, 6. Fol. 108 b.](1)यिष्यामीति ॥

कः पुनरयं सर्वास्तिवादी साधुता(तां) भजते ? तदिदमवद्योत्यते । एष खलु वादी

[301] इच्छत्यध्वत्रयं यस्मा[त्] कृत्यतश्च ध्रुवत्रयम् ।
सर्वास्तिवाद इत्युक्तस्तस्मादाद्यश्चतुर्विधः ॥

खल्वेष सर्वास्तिवादश्चतुर्धा भेदं प्रतिपन्नः । कथम् ? तदारभ्यते—

[302] भा[वाङ्काऽ]न्यथिकाख्यौ द्वाव[व]स्थाऽन्यथिको परः ।
अन्यथाऽन्यथिकश्चान्यः, तृ(2)तीयो युक्तिवाद्यतः ॥[१]

[२]तत्र भावान्या(न्य)थिको भदन्तधर्मत्रातः । स ह्येवमाह—धर्मस्याध्वसु प्रवर्तमानस्यानागतादिभावमात्रमन्यथा भवति । न द्रव्यान्यथात्वम् । यथा सुवर्णस्य कटकादिसंस्थानान्तरेण कृ(क्रि)यमान(ण)स्य पूर्वसंस्थाननाशे न सुवर्णनाशः । क्षीरस्य वा दधित्वेन परिणमतो यथा रसवीर्यविपाकपरित्यागो न व(3)र्णस्येति ।[३] तदेष वार्षगण्यपक्षभजमानत्वात्तद्वर्ग्य एव द्रष्टव्यः । यस्मात् एषोऽवस्थितस्य द्रव्यस्य जातिलक्षणस्य समुदायरूपस्य वाऽन्यथाऽन्यथावस्थानलक्षणं परिणाममिच्छति ।[४]

लक्षणान्यथिको[५] भदन्तघोषक इह पश्यत्यतीतो धर्मोऽतीतलक्षणेन युक्तोऽनागतप्रत्युत्पन्नलक्षणाभ्यामवियुक्तः, एवमनागतप्रत्युत्पन्ना(4)वपि । यथा पुरुषः

---

[१] Cf. ते भावलक्षणावस्थाऽन्यथाऽन्यथिकसंज्ञिताः ।
तृतीयः शोभनोऽध्वानः कारित्रेण व्यवस्थिताः ॥ *Ak*. v. 26.

[२] The following *Adv*., containing the views of the four Āchāryas, is almost identical with *Akb*. v. 26.

[३] Cf. तत्र धर्मस्य धर्मिणि वर्तमानस्यैवाध्वस्वतीतानागतवर्तमानेषु भावान्यथात्वं भवति न तु द्रव्यान्यथात्वम् । यथा सुवर्णभाजनस्य भित्त्वाऽन्यथाक्रियमाणस्य भावान्यथात्वं भवति न सुवर्णान्यथात्वमिति ।··· *Yoga-bhāshya*, III. 13.

[४] एषां तु प्रथमः परिणामवादित्वात् सांख्यपक्षे निक्षेप्तव्यः । *Akb*. v. 26 ab.

[५] Cf. लक्षणपरिणामो धर्मोऽध्वसु वर्तमानोऽतीतलक्षणयुक्तोऽनागतवर्तमानाभ्यां लक्षणाभ्यामवियुक्तः । तथा वर्तमानो···तथानागतो···। यथा पुरुष एकस्यां स्त्रियां रक्तो न शेषासु विरक्तो भवतीति । *Yoga-bhāshya*, III. 13.

एकस्यां स्त्रियां रक्तोऽन्यास्वविरक्तः। तदस्याप्यध्वसंकरो[१] भवत्येकस्य धर्मस्य त्रिलक्षणयोगाभ्युपगमात्। एषोऽपि पुरुषकारणि(?)वागुरायां प्रवेशयितव्यः।

अवस्थाऽन्यथिको भदन्तवसुमित्रः। स खल्वाह—धर्मोऽध्वसु प्रवर्तमानोऽवस्थामवस्थां प्राप्याऽन्यथाऽन्यथाऽस्तीति निर्दिश्यते। अवस्थान्तरविशेषवि(5)कारात्स्वभावापरित्यागाच्च। यथा निक्षेपवर्तिकैकाङ्कविन्यस्तैकेत्युच्यते, सैव शताङ्के शतं सहस्राङ्के सहस्रमिति।[२]

अन्यथाऽन्यथिको भदन्तबुद्धदेवः। स ब्रूते। धर्मोऽध्वसु प्रवर्तमानस्या(-मानः) पूर्वापरमवेक्ष्यान्यथा चान्यथा चोच्यते। नैवास्य भावान्यथात्वं भवति द्रव्यान्यथात्वं वा। यथैका स्त्री पूर्वापरमपेक्ष्य माता चो(6)च्यते दुहिता च। तद्वद्धर्मोऽनागतप्रत्युत्पन्नमवे(पे)क्ष्यातीत इत्युच्यते। तथेतरोऽपीतरद्वयमपेक्ष्येति।[३]

अस्याप्येकस्यातीतस्याध्वनः पूर्वोत्तरक्षणत्र(द्व)यमपेक्ष्याध्वत्रित्वापत्तिदोषप्रसङ्गः।

तदेभ्यश्चतुर्भ्यः सर्वास्तिवादेभ्यस्तृतीयः स्थविरवसुमित्रः पञ्चविंशतितत्त्वनिरासी परमानु(णु)संचयवादोन्माथी (7)च। इत्यतोऽसावेव युक्त्यागमानुसारि[त्वा]दाप्तः प्रामाणिक इत्यध्यवसेयम्।

भदन्तबुद्धदेवोऽपि तीर्थ्यपक्ष्यभजमानत्वान्न परिगृह्यते।[४]

भदन्तघोषकोऽप्यध्वसंकरवादित्वादेकैकस्याध्वनोऽध्वत्रयलक्षणभाग्भवति।

---

[१] द्वितीयस्याध्वसङ्करः प्राप्नोति। सर्वस्य सर्वक्षणयोगात्। पुरुषस्य तु कस्यांचित् स्त्रियां रागः समुदाचरति कस्यांचित् केवलं समन्वागम इति किमत्र साम्यम्। *Akb.* v. 26 ab.

Cf. अत्र **लक्षणपरिणामे सर्वस्य सर्वलक्षणयोगादध्वसङ्करः प्राप्नोतीति परैर्दोषश्चोद्यत इति। तस्य परिहारः**—धर्माणां धर्मत्वमप्रसाध्यम्। सति च धर्मत्वे लक्षणभेदोऽपि वाच्यो न वर्तमानसमय एवास्य धर्मत्वम्। एवं हि न चित्तं रागधर्मकं स्यात्, क्रोधकाले रागस्यासमुदाचारादिति। किञ्च त्रयाणां लक्षणानां युगपदेकस्यां व्यक्तौ नास्ति सम्भवः। क्रमेण तु स्वव्यञ्जकाञ्जनस्य भावो भवेदिति··· *Yoga-bhāshya*, III. 13.

[२] Cf. धर्मास्तु त्र्यध्वानस्ते लक्षिता अलक्षितास्तत्र लक्षितास्तां तामवस्थां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्ते। अवस्थान्तरतो न द्रव्यान्तरतः। यथैका रेखा शतस्थाने शतं दशस्थाने दश एका चैकस्थाने। *Ibid.*

[३] Cf. यथा चैकत्वेऽपि स्त्री माता चोच्यते दुहिता च स्वसा चेति। *Ibid.*

[४] Cf. चतुर्थस्याप्येकस्मिन्नेवाध्वनि त्रयोऽध्वानः प्राप्नुवन्ति। अतीतेऽध्वनि पूर्वपश्चिमौ क्षणावतीतानागतौ मध्यमः क्षणः प्रत्युत्पन्न इति। एवमनागतेऽपि। *Akb.* v. 26 ab.

इत्यतस्तृतीय एवापदोषः । यस्मात्—

[303] कारित्रेणाध्वनामेष व्यवस्थामभिवाञ्छति ।
तत्कुर्वन्वर्तमानोऽध्वा (8)कृतेऽतीतोऽकृते परः ॥[१]

ये खलु भगवतोक्ताः स्वभावसिद्धास्त्रैयाध्विका धर्मा अतीतानागतप्रत्युत्पन्नास्तेषामयमाचार्यः क्रियाद्वारेणावस्थाभेदमिच्छत्यजहत्स्वरूपो हेतुसामग्रीसन्निधानप्रबोधितशक्तिः । क्रियावा[न्] हि संस्कारो वर्तमान इत्युच्यते । स एव त्यक्तक्रियोऽतीतोऽनुपात्तक्रियोऽनागतः । इत्येवं च (9)सति कालत्रयस्यैकाधिकरण्यमेकाधिष्ठानव्यापारपरिच्छेद्यत्वं चोपपन्नम् । अन्यथैकः(क)द्रव्यजातिनिमित्ताभावे वैयधिकरण्ये सति कालत्रयसंबन्धाभावः प्राप्नुयादिति ।[२]

अत्राह चोदकः—न, अतीतानागतस्यार्थस्य प्रज्ञप्त्या[३] व्यपदेशसिद्धेः । न, परमार्थद्रव्याभावे निरधिष्ठानप्रज्ञप्तिव्यपदेशानुपपत्तेः । व[V. B, 7. Fol. 109a.](1)र्तमानापेक्षयस्तद्व्यपदेश इति चेत् । न । वर्तमानस्वरूपस्थितिशक्तिक्रियाभावे सत्त्वानुपपत्तेः, सदसतोरपेक्षासंबन्धाभावाच्च । सत्त्वलक्षणमिदानीमेव द्योत्यते अतीतादीनां पदार्थानाम्—

---

[१] Cf. तृतीयः शोभनोऽध्वानः कारित्रेण व्यवस्थिताः । *Ak.* v. 26 cd.

यदा स धर्मः कारित्रं न करोति तदाऽनागतः । यदा करोति तदा प्रत्युत्पन्नः । यदा कृत्वा निरुद्धस्तदाऽतीत इति । *Akb.* v. 26 cd.

—'तृतीयः शोभनः' इति **वैभाषिकः** ।···कारित्रं पुनः चक्षुरादीनां दर्शनादीनीति । रूपादीनामपि स्वेन्द्रियगोचरत्वम् । *Sakv.* p. 471.

[२] **अवस्थापरिणामे कौटस्थ्यदोषप्रसङ्गदोषः कैश्चिदुक्तः** । कथम् । अध्वनो व्यापारेण व्यवहितत्वाद्यदा धर्मः स्वव्यापारं न करोति तदानागतो यदा करोति तदा वर्तमानो यदा कृत्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणोर्लक्षणानामवस्थानां च कौटस्थ्यं प्राप्नोतीति परैर्दोष उच्यते । नासौ दोषः । कस्मात् ? गुणिनित्यत्वेऽपि गुणानां विमर्दवैचित्र्यात् ।···तत्रेदमुदाहरणम्—मृद्धर्मी पिण्डाकाराद्धर्माद्धर्मान्तरमुपसम्पद्यमानो धर्मतः परिणमते घटाकारमिति । घटाकारोऽनागतं लक्षणं हित्वा वर्तमानलक्षणं प्रतिपद्यत इति लक्षणतः परिणमते । घटो नवपुराणतां प्रतिक्षणमनुभवन्नवस्थापरिणामं प्रतिपद्यत इति । धर्मिणोऽपि धर्मान्तरमवस्था धर्मस्यापि लक्षणान्तरमवस्थेत्येक एव द्रव्यपरिणामो भेदेनोपदर्शित इति । *Yoga-bhāshya*, III. 13.

[३] On *prajnapti (paññatti)*, see *Dhs.* 1306—7, *Dhs A.* v. 112, *Vm.* VII. 54, *A. Mūlaṭīkā*, pp. 129—131, and *JPTS.* 1913—14, pp. 124—9. V. infra, *Adv. kārikā* 319.

[304] **बुद्ध्या यस्येद्यते चिह्नं तत्संज्ञेयं चतुर्विधम् ।**
परमार्थेन संवृत्या द्वयेनापेक्षयाऽपि च ॥[१]

यस्य खल्वर्थवस्तुन(नः) स्वभावसिद्धस्वरूपस्याविपरी(2)ताकारया धर्मोपलक्षणया परिच्छिन्नं लक्षणमुपलक्ष्यते तत्स[द्]द्रव्यमित्युच्यते । तत्पुनः सत् प्रतिभिद्यमान(नं) चतुर्विधं भवति ।

---

[१] This topic is discussed in the Sixth *Kośasthāna* of *Akb* :—

…द्वे अपि सत्ये संवृतिसत्यं परमार्थसत्यं च । तयोः किं लक्षणम् ?

यत्र भिन्ने न तद्बुद्धिरन्यापोहे धिया च तत् ।
घटाम्बुवत्संवृतिसत् परमार्थसदन्यथा ॥

यस्मिन्नवयवशो भिन्ने न तद्बुद्धिर्भवति तत् **संवृतिसत्** । तद्यथा घटः । तत्र हि कपालशो भिन्ने घटबुद्धिर्न भवति । यत्र चान्यानपोह्य धर्मान् बुद्ध्या तद्बुद्धिर्न भवति तच्चापि संवृतिसद्वेदितव्यम् । तद्यथाम्बु । तत्र हि बुद्ध्या रूपादीन् धर्मानपोह्याम्बुबुद्धिर्न भवति । तेष्वेव तु संवृतिसंज्ञा कृतेति संवृतिवशात् घटश्चाम्बु चास्तीति ब्रुवन्तः सत्यमेवाहुर्न मृषेत्येतत् संवृतिसत्यम् ।

अतोऽन्यथा **परमार्थसत्यम्** । तत्र भिन्नेऽपि तद्बुद्धिर्भवत्येव । अन्यधर्मापोहेऽपि बुद्ध्या तत् परमार्थसत् । तद्यथा रूपम् । तत्र हि परमाणुशो भिन्ने वस्तुनि रसाहीनपि च धर्मानपोह्य बुद्ध्या रूपस्य स्वभावबुद्धिर्भवत्येव । एवं वेदनादयोऽपि द्रष्टव्याः । एतत् परमार्थेन भावात् परमार्थसत्यमिति ।

यथा लोकोत्तरेण ज्ञानेन गृह्यते तत् पृष्ठलब्धेन वा लौकिकेन तथा **परमार्थसत्यम्** । यथाऽन्येन तथा **संवृतिसत्यमिति पूर्वाचार्याः** । *Akb.* VI. 4.

—'संवृतिसत्' इति । संव्यवहारेण सत् । 'परमार्थत सत्' इति । परमार्थेन सत् । **स्वलक्षणेन सदित्यर्थतः** । 'एवं वेदनादयोऽपि द्रष्टव्याः' इति । वेदना-चेतना–संज्ञादयोऽपि **द्रव्यसन्त** एव द्रष्टव्याः । कथम् ? वेद(चेत)नादीन् धर्मानपोह्य बुद्ध्या वेदनास्वभावे बुद्धिर्भवतीति । द्रव्यसती वेदना । एवं संज्ञा चेतनादयोऽपि योज्याः ।…

'न मृषे'ति । संवृतिसत्यस्य वचने प्रयोजनं दर्शयति । उक्तं च

"द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥" इति [*Mādhyamika-kārikā*, XXIV. 8.]

तथा 'परमार्थसत्यम्' इति । **परमस्य ज्ञानस्यार्थः परमार्थः** ।…यथा अन्येन **ज्ञानेन लौकिकेन गृह्यते तथा संवृतिसत्यम्** । संवृत्या संव्यवहारेण ज्ञानेन वा क्लिष्टेनाक्लिष्टेन वा गृह्यत इति संवृतिसत्यम् ।

त्रिविधं हि योगाचाराणां सत् । परमार्थ-संवृतिसत् द्रव्यसच्च । द्रव्यतः स्वलक्षणतः सत् द्रव्यसदिति । *Sakv.* p. 524.

See also—सर्वमेवासंस्कृतमद्रव्यमिति **सौत्रान्तिकाः** । *Akb.* II. 55 cd.

परमार्थेन यन्नित्यं स्वभावेन संगृहीतं न कदाचित्स्वमात्मानं जहाति, विशिष्टज्ञानाभिधानापौरुषेयविषयविषयिसंबन्धं तत्परमार्थसदित्युच्यते।

यत्पुनरणे(ने)कपरमार्थसत्यपृष्ठे(3)न व्यवहारार्थं प्रज्ञप्तिरूपतया निर्दिश्यते तत्संवृतिसत्। तद्यथा घटपटवनपुद्गलादिक[म्]।

किञ्चिदुभयथा। तद्यथा पृथिव्यादि। किञ्चित्सत्त्व[ा]पेक्षया पितृपुत्रगुरुशिष्यकर्तृक्रियादि॥

अथ यदिदमुक्तं द्रव्यसन्तोऽतीतानागताऽध्वस्था धर्मा इति तदागमयुक्त्यनभिधानादभिधानमात्रम्। तस्मादागमयुक्तिभ्यामु(4)पपाद्योऽयमर्थ इत्यत इदं प्रतिज्ञायते—

Also cf. "दुवे सच्चानि अक्खासि सम्बुद्धो वदतां वरो।
सम्मुतिं परमत्थञ्च ततियं नूपलब्भति॥
सङ्केतवचनं सच्चं लोकसम्मुतिकारणं।
परमत्थवचनं सच्चं धम्मानं तथलक्खणं॥"ति। Quoted in *KvA.* I. 1.

The *Abhidharma-samuchchaya* gives the following illustrations of the twofold preaching of Buddha :—

यदुक्तं द्विविधे दुःखे इति। तत् संवृतिसत्येन दुःखं परमार्थसत्येन दुःखं च।··· जातिर्दुःखं यावत् यदपीच्छन्न लभते तदपि दुःखमिति **संवृतिसत्येन दुःखम्**। यदुक्तं संक्षिप्तेन पञ्चोपादानस्कन्धा दुःखमिति **परमार्थसत्येन दुःखम्**। *Asm.* p. 38.

संवृतितः कतमत्? लौकिकमार्गैर्बीजनिग्रहेण यो निरोधो लभ्यते। अतो भगवता तदांशिकनिर्वाणमित्युच्यते। **परमार्थतः** कतमत्? आर्यप्रज्ञया बीजनिर्मूलनेन यो निरोधो लभ्यते। *Ibid.* p. 63.

Cf. 'एकं हि सच्चं न दुतीयं' [*Suttanipāta*, 884.] आदिसु **परमत्थसच्चे** निब्बाने चेव मग्गे च। *Vm.* XVI. 26.

The Mahāyānist view is fully discussed in the *B. Pañjikā* :—

संवृतिः परमार्थश्च सत्यद्वयमिदं मतम्।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते॥

···तदुपदर्शितं च **प्रतीत्यसमुत्पन्नं** वस्तुरूपं **संवृतिरुच्यते**। तदेव लोकसंवृतिसत्यमित्यभिधीयते।···

विनोपघातेन यदिन्द्रियाणां षण्णामपि ग्राह्यमवैति लोकः।
सत्यं हि तल्लोकत एव शेषं विकल्पितं लोकत एव मिथ्या।

···**परमार्थः**। अकृत्रिमं वस्तुरूपं यदभिगमात् सर्ववृत्तिवासनानुसन्धिक्लेशप्रहाणं भवति। **सर्वधर्माणां निःस्वभावता**। शून्यता तथता भूतकोटिः धर्मधातुः। सर्वस्य हि प्रतीत्यसमुत्पन्नस्य पदार्थस्य निःस्वभावता पारमार्थिकं रूपम्। *B. Pañjikā*, IX. 2.

For other views and details, see *LVPAk.* VI. pp. 139-142, notes.

[305] सदतीतासमुत्पन्नं बुद्धोक्तेर्वर्तमानवत् ।
धीनामगोचरत्वाच्च तत्सत्त्वं वर्तमानवत् ॥

उक्तं हि भगवता—"अस्ति भिक्षवोऽतीतं रूपं नोचेदतीतं रूपं अभविष्यन्नेमे सत्त्वा अतीते रूपे समरञ्ज्यन्तः। यस्मात्तर्ह्यस्त्यतीतं रूपं तस्मादिमे सत्त्वा अतीते रूपे संरञ्ज्यन्ते ।"[१] एवमनागतप्रत्यु(5)त्पन्न(न्नं) चेति वाच्यम्। विभक्तिप्रतिरूपकोऽयं निपात इति चेत् ।[२] न। वर्तमानेऽपि तत्प्रसङ्गात्। क्रियावचनेन चोत्तरपदेन पूर्वस्य क्रियावचनस्यैव पदस्य सामानाधिकरण्यात्।

---

[१] Cf. सर्वकालास्तितोक्तत्वात्

उक्तं हि भगवता—"अतीदं चेद् भिक्षवो रूपं नाभिविष्यन्न श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षोऽभविष्यत् । यस्मात्तर्ह्यस्त्यतीतं रूपं···" । *Akb*. v. 25 a.

Also cf. "अतीते राध रूपे अनपेक्खो होहि, अनागतं रूपं मा अभिनन्दि, पच्चुप्पन्नस्स रूपस्स निब्बिदाय विरागाय निरोधाय चागाय पटिनिस्सग्गाय पटिपज्जा"ति । Quoted in *Netti*. p. 30.

See *M. suttas* 109, 132, 133; *Madhyamaka-vṛitti*, XII. 11.

This passage from Scriptures provides the first argument for the case of *sarvāstivāda* of the Vaibhāshika :—"अथासत्यतीतानागते कथं तेन तस्मिन् वा संयुक्तो भवति ?" The answer of the Sautrāntika is : "तज्जतद्धेत्वनुशयभावात् क्लेशेन तदालम्बने क्लेशानुशयभावाद्वस्तुनि संयुक्तो भवति ।" *Akb*. v. 27 c. See *Sakv*. p. 477 and *The Central Conception of Buddhism*, p. 90.

[२] यत्तूक्तमुक्तत्वादिति । वयमपि ब्रूमोऽस्त्यतीतानागतमिति । अतीतं तु यद्भूतपूर्वम् । अनागतं यत्सति हेतौ भविष्यति । एवं च कृत्वास्तीत्युच्यते । न पुनर्द्रव्यतः । कश्चैवमाह वर्तमानवत्तदस्तीति । कथमन्यथाऽस्ति । अतीतानागतात्मना । इदं पुन तवोपस्थितम् । कथं तदतीतमनागतं चोच्यते यदि नित्यमस्तीति । तस्माद्यत् भूतपूर्वस्य च हेतोर्भाविनश्च फलस्य भूतपूर्वतां भावितां च ज्ञापयितुं हेतुफलापवाददृष्टिप्रतिषेधार्थमुक्तं भगवता—'अस्त्यतीतमनागतमिति ।' अस्ति शब्दस्य निपातत्वात् । यथा अस्ति दीपस्य प्रागभावोऽस्ति पश्चादभाव इति वक्तारो भवन्ति यथा चास्ति निरुद्धः स दीपो न मया निरोधित इति । एवमतीतानागतमप्यस्तीत्युक्तम् । अन्यथा ह्यतीतानागतभाव एव न सिध्येत् । *Akb*. v. 27 c.

—आसीदतीतं भविष्यत्यनागतमिति वक्तव्येऽस्तीतिवचनमस्तिशब्दस्य निपातत्वात् । त्रिकालविषयो हि निपातः । आसीदर्थे भविष्यदर्थेऽपि प्रवर्तते । यथाऽस्ति दीपस्येति विस्तरः ।···न चास्ति प्रयोगान्निरुद्धोऽप्यसावस्तीति । ननु च वैभाषिकस्य निरुद्धोऽप्यसावस्तीति । सत्यमस्ति । न तु प्रदीपरूपतामेव बिभ्राणः सोऽस्ति ।···यदि तेनैव लक्षणेन विद्येतातीतानागत एव न सिध्येदित्यर्थः । *Sakv*. p. 473.

See *B. Pañjikā*, IX. 143 ab. V. infra, *Adv. karikā* 319, notes.

पुनश्चोक्तं भगवता—[१]“रूपमनित्यमतीतानागतम्, कः पुनर्वादः प्रत्युत्पन्नस्य ? एवंदर्शी श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षो भवत्यना(6)गतं रूपं नाभिनन्दति । प्रत्युत्पन्नस्य रूपस्य निर्विदे विरागाय निरोधाय प्रतिपन्नो भवति । अतीतं चेद्रूपं नाभविष्यन्न श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षोऽभविष्यत्; यस्मात्तर्ह्यस्त्यतीतं रूपं तस्माच्छ्रुतवानार्यश्रावकः अतीते रूपेऽनपेक्षो भवति”[१] इति विस्तरः ।

तथोक्तम्—“यच्छारिपुत्र कर्माभ्यतीतं क्षीणं (7)निरुद्धं विगतं विपरिणतं[२] तदस्तीति । तच्चेत् कर्म शारिपुत्र नाभविष्यन्नेहैकतीयस्तद्धेतोः तत्प्रत्ययादपायदुर्गतिविनिपातं कायस्य भेदान्नरकेषूपपत्स्यते”[३] इति विस्तरः ।

[१–१] This *sūtra*-passage is also quoted in *Akb.* v. 25 ab and in *Sakv.* pp. 468-9. Yaśomitra says: निर्विषयत्वाद्वैराग्यकालेऽतीतविषयापेक्षार्यश्रावकस्यानपेक्षा मतिर्न स्यादित्यर्थः । यदातीतं रूपमपेक्ष्यते तदा तत्रासक्तिरिति ।···प्रत्युत्पन्नं चेद्भिक्षवो रूपं नाभविष्यन्न श्रुतवानार्यश्रावकः प्रत्युत्पन्नस्य रूपस्य निर्विदे···प्रतिपन्नोऽभविष्यदित्येतन्नोक्तमुभयपक्षप्रसिद्धत्वात् । *Sakv.* p. 469.

Cf. रूपा भिक्खवे, अनिच्चा **अतीतानागता,** को पन वादो **पच्चुप्पन्नानं,** एवं पस्सं भिक्खवे, सुतवा अरियसावको **अतीतेसु** रूपेसु अनपेक्खो होति, **अनागते** रूपे नाभिनन्दति, **पच्चुप्पन्नानं** रूपानं निब्बिदाय विरागाय निरोधाय पटिपन्नो होति । सद्दा गन्धा रसा फोट्ठब्बा धम्मा अनिच्चा···पटिपन्नो होति । *S.* IV. p. 5.

Also cf. पुब्बे मे भिक्खवे सम्बोधा···एतदहोसि—ये मे पञ्चकामगुणा चेतसो सम्फुट्ठपुब्बा **अतीता निरुद्धा विपरिणता** तत्थ मे चित्तं बहुलं गच्छमानं गच्छेय, **पच्चुप्पन्नेसु** वा अप्पं वा **अनागतेसु**···*S.* IV. p. 97.

[२] **क्षीण**मुपचयविनाशात्, **निरुद्धं** प्रबन्धविनाशेन, **विगतं** प्रकृतिविनाशात्, विपरिणतं विकारविनाशेन । *Aaa.* p. 233.

[३] Cf. **फलात्**

यदि चातीतं न स्यात्, शुभाशुभस्य कर्मणः फलमायत्यां कथं स्यात्, न हि फलोत्पत्तिकाले वर्तमानो विपाकहेतुरस्तीति । तस्मादस्त्येवातीतानागतमिति **वैभाषिकाः** । *Akb.* v. 25 6.

The Kośakāra refutes this Vaibhāshika view :—यदप्युक्तं फलादिति । नैव हि **सौत्रान्तिका** अतीतात् कर्मणः फलोत्पत्तिं वर्णयन्ति । किं तर्हि ? तत्पूर्वकात् सन्तानविशेषादित्या**त्मवादप्रतिषेधे** संप्रवेदिष्यामः । यस्य त्वतीतानागतं द्रव्यतोऽस्ति तस्य फलं नित्यमेवास्तीति किं तत्र कर्मणः सामर्थ्यम् ? *Akb.* v. 27 ab.

Also cf. यदप्युच्यते । अस्त्यतीतं कर्म । अस्त्यनागतं फलमिति सूत्रवचनात् । अस्त्यतीतादिभावः । तदपि हेतुफलापवादे तद् दृष्टिप्रतिषेधार्थमुक्तं भगवता । *B. Pañjikā,* IX. 143.

तदाहितचित्तभावनां सन्धाय वचनाददोष[१] इति चे[त्] । न । उक्तोत्तरत्वात्। उक्तोत्तरो ह्येष वादः[२] । किं तिलपीडकवत्पुनरावर्तसे ?

किञ्च,(8) भावनाभाव्यमानचित्तयोः स्वरूपशक्तिक्रियानुपपत्तेः पुष्टवासिततैलवत्, अन्यानन्यत्वादिवक्ष्यमान(ण)दोषाच्च ।

परमार्थशून्यतासूत्रादसदिति चेत्। न। तदर्थापरिज्ञानात्। तत एवानागताद्यस्तित्वसिद्धेश्च। तत्रैतत् स्यात्—परमार्थशून्यता सूत्रे भगवता

---

[१] Cf. यत्तर्हि **लगुडशिखिपकान् परिव्राजकानधिकृत्योक्तं भगवता "यत्कर्माभ्यतीतं क्षीणं निरुद्धं विगतं विपरिणतं तदस्ती"**ति । किं ते तस्य तस्य कर्मणो भूतपूर्वत्वं नेच्छन्ति स्म ? **तत्र पुनस्तदाहितं तस्यां सन्ततौ फलदानसामर्थ्यं सन्धायोक्तम्** । अन्यथा हि स्वेन भावेन विद्यमानमतीतं न सिद्ध्येत् । *Akb.* v. 27. cd.

—यत्तर्हि लगुडशिखीयकान् इति विस्तरः ।' '**नालन्दाया बुद्धभाषितं च सूत्रम्। संयुक्तागमे** च । **आर्यमहामौद्गल्यायनश्च** मारित इत्याहुरभियुक्ताः । यतो नो मारित इत्यत्र सूत्र एवं पठ्यते, लगुडशिखीयकाः परिव्राजका आनन्तर्यकारिणो यत्कर्माभ्यतीतं तन्नास्तीत्येवंवादिन इति विस्तरः ।' ' एतदुक्तं भवति । **इच्छन्ति स्म ते तस्य कर्मणो भूतपूर्वताम्। किंतु न द्रव्यमिति तस्मिं कर्मणि ते विप्रतिपन्नाः । नास्ति तत्कर्माभ्यतीतमिति ।** यतो **भगवता** यत्र ते विप्रतिपन्नाः स्वभावे '**तत्कर्माभ्यतीतमस्ती**'ति विस्तरेण । **तस्मादस्ति स्वभावेनातीतमिति** विस्तरः । तत्र पुनः सूत्रे यद् भूतपूर्वं कर्म, न तदेवातीतमित्यभिसन्धायोक्तं तत्कर्मास्तीति । किं तर्हि ? **तदाहितं तेन** भूतपूर्वेण कर्मणा आहितमर्पितम् । **तस्यां सन्ततौ फलदानसामर्थ्यं सन्धायोक्त**मित्यनेनाभिप्रोयेणोक्तमिति । कथं गम्यत इत्याह। **अन्यथा** हि····स्वलक्षणेन विद्यमानं तत्कर्म प्रत्युत्पन्नलक्षणेन विद्यमानमतीतं न सिध्येत् । प्रत्युत्पन्नमेव सिध्येदित्यभिप्रायः । तदाहितमिति विस्तरेणोच्यमानेऽभ्यतीतं कर्मास्तीति सिध्यति । *Sakv.* p. 474.

For the legend of Moggallāna's death, see *DhammapadaA.* x. 7 and *Jātaka* 522. Also see—एतदग्गं भिक्खवे मम सावकानं भिक्खूनं इद्धिमन्तानं यदिदं महामोग्गल्लानोति । पुन च किर **सो लगुलेहि परिपोथितो भिन्नसीसो** सञ्चुण्णितट्ठिमंसधमनिमज्जपरिकत्तो परिनिब्बुतो । *Milinda*, p. 188. See *DPPN.* II. p. 546.

[२] While discussing the *visaṁyogaphala*, the Kośakāra incidentally deals with a subtopic—'त्रैयध्विकस्य दुःखस्य प्रहाणम्' and says :—एतदतीतानागतस्यास्तित्वचिन्तायां चिन्तयिष्यामः । *Akb.* II. 55.

It is possible that the Dīpakāra, too, had discussed this topic in the corresponding portion of the Second *Adhyāya* of *Adv.*, which is lost. V. supra, p. 114, n. 4.

For कर्मफलसम्बन्धपरीक्षा, see *Tattvasaṅgraha*, 479-544 ; *B.Pañjikā*, IX. 70-73 and *Mādhyamikakārikā*, XVII. 21—33.

विस्पष्टमनागतादिनास्तित्वं प्रदर्शितम् । तत्र ह्युक्तम्—"चक्षुरुत्प(9)द्यमानं न कुतश्चिदागच्छति, निरुध्यमानं न क्वचित्संनिचयं गच्छति" इति विस्तरः ।[१] अतीतानागतसद्भावे चागतिगतिदोषो(षा)भ्युपगमः प्राप्नोतीति[२] ।

एतच्च न । कुतः ? सूत्रार्थापरिज्ञानात् । अत एवानागताद्यस्तित्वसिद्धेश्च ।

सूत्रस्य तावदयमर्थः । यदुक्तम्—"चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति, निरुध्यमानं न क्वचित्संनिचयं ग[V.A, 7. Fol. 109 b.](1)च्छति" इति तद्वेदोक्तवादविधिप्रतिषेधार्थं सांख्यमतव्युदासार्थं च ।

वेदे ह्युक्तम्—"पञ्चत्वमापद्यमानस्य चक्षुरादित्यादागतं पुनस्तत्रैव प्रतिविगच्छति । श्रोत्रमाकाशम् । घ्राणं पृथिवीम् । जिह्वा आपः । कायो वायुम् । मनः सलिलं सोममित्यर्थः ।"[3] तत्प्रतिषेधार्थं भगवानवोचत्—"चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति" इति विस्तरः ।

---

[१] Cf. इत्थं चैतदेवं यत् **परमार्थशून्यतायामुक्तं** भगवता—"चक्षुरुत्पद्यमानं…संनिचयं गच्छति । इति हि भिक्षवश्चक्षुरभूत्वा भवति भूत्वा च प्रतिविगच्छति" इति । *Akb.* v. 27 ab. See *LVPAk.* v. p. 59, n. 3.

Also cf. **यथैव चक्खुविञ्ञाणं मनोधातु अनन्तरं ।**
न चैव आगतं नापि न निब्बत्तं अनन्तरं ॥ *Vm.* xix. 23.

सो एवं पजानाति—इमस्स नामरूपस्स उप्पत्तितो पुब्बे अनुप्पन्नस्स रासि वा निचयो वा नत्थि, उप्पज्जमानस्सापि रासितो वा निचयतो वा आगमनं नाम नत्थि, निरुज्झमानस्सापि दिसाविदिसागमनं नाम नत्थि, निरुद्धस्सापि एकस्मिं ठाने रासितो निचयतो निधानतो अवट्ठानं नाम नत्थि । यथा पन वीणाय वादियमानाय उप्पन्नस्स सद्दस्स नेव उप्पत्तितो पुब्बे सन्निचयो अत्थि…न निरुद्धो कत्थचि सन्निहितो तिट्ठति, अथ खो वीणञ्च उपवीणञ्च पुरिसस्स च तज्जं वायामं पटिच्च अहुत्वा सम्भोति, हुत्वा पटिवेति **एवं सब्बे पि रूपारूपिनो धम्मा अहुत्वा सम्भोन्ति हुत्वा पटिवेन्तीति** । *Vm.* xx. 96.

Also see—षडिमे महाराज धातवः…षडिमानि स्पर्शायतनानि…अष्टादशेमे मनउपविचाराः ।…तत्र महाराजाध्यात्मिकः **पृथ्वीधातुः उत्पद्यमानो न कुतश्चिदागच्छति, निरुध्यमानो न क्वचित्संनिचयं गच्छति**…*B. Pañjikā*, ix. 88. See *Śikshā*, p. 229.

[२] Cf. यदि चानागतं चक्षुं स्यान्नोक्तं स्याद् 'भूत्वा न भवती'ति । वर्तमानेऽध्वन्यभूत्वा भवतीति चेत् । न । अध्वनो भावादनर्थान्तरत्वात् । अथ स्वात्मन्यभूत्वा भवति, सिद्धमिदमनागतं चक्षुर्नास्तीति । *Akb.* v. 27 ab. See *B. Pañjikā*, ix. 142 ab.

[3] Cf. याज्ञवल्क्येति होवाच **यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि** वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते…*Bṛihadāraṇyakopanishat*, iii. 2. 13.

सांख्याः खल्वप्याचक्षते—“चक्षुष्प्रधानादागच्छति तत्रैव च पुनर्विगच्छति” इति। तन्निरासार्थं च भगवानवोचत्—“चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति।” अदेशप्रदेशस्थाः खल्वनागतातीतपरमाण्वविज्ञप्तिसंज्ञिता धर्मः(र्माः) इति तदागमनगमनानुपपत्तिः।

कस्तर्हि वाक्यार्थः—“अभूत्वा भवति। भूत्वा च प्रतिविगच्छति”[१] इति? द्विविधं हि चक्षुर्द्रव्यसदे(3)व परमार्थसतो यदप्रबुद्धमुभयम्(?)। अन्यत्प्रबुद्धमनु(-द्धमु ?)पात्तक्रियम्। पूर्वं तद्धेतून्प्रतीत्य क्रियामुपादत्ते प्रबुध्यत इत्यर्थः। उपात्तक्रियं च द्वितीयम्। तद्धि क्रियामुज्झत्प्रतिविगच्छतीत्युक्तं भवति।

सांख्यमतनिषेधार्थं वा। सांख्यानां खल्वेकं कारणं नित्यं स्वां जातिमजहत्तेन तेन विकारविशेषात्मना भूत्वा भूत्वाऽन्येनान्येन कार्य(4)विशेषात्मना परिणमतीति। तत्प्रतिषेधार्थं भगवानवोचत्—“चत्तुरुत्पद्यमानं न कुतश्चिदागच्छति निरुध्यमानं न क्वचित्संनिचयं गच्छति” इति। चक्षुरभूत्वा वर्तमानेऽध्वनि क्षणमात्रं क्रियारूपमादाय त्यक्त्वा पुनरदर्शनं गच्छति।

किञ्चान्यत्, अत एवानागतास्तित्वसिद्धेः। यदुक्तमस्मिन्नेव सूत्रे “चत्तुरुत्पद्यमानं न कुतश्चि(5)दागच्छति” इत्यत्रैतदादर्शितम्। सदिदं चक्षुरन्तरङ्गबहिरङ्गकारणसामग्रीसन्निधानोपाधिवशेन क्रियामुपाददानं न कुतश्चिदागच्छति। कुतः पुनस्तत्सत्त्वमिति चेत्। मुख्यसत्ताविष्टे कर्तरि शानचो विधानान्निरुध्यमानवदिति। तस्मा[द्] दुर्विहितवेताडोत्थानवत् सौत्रान्तिकैः स्वपक्षोपघाताय सूत्रमेतदाश्रीयते।

(6)एवं तावदागमात्सिद्धमध्वत्रयास्तित्वम्।

युक्तितोऽपि—‘धीनामगोचरत्वाच्च तत्सत्त्वं वर्तमानवत्।’[२] तदाकारया खलु बुद्ध्या यस्यार्थस्य स्वसामान्यलक्षणं परिच्छिद्यते, यश्च बुद्धोक्तनामकायधर्मकायाभ्यां(भ्या)मभिद्योत्यते स परमार्थतो विद्यते। कथम्? वर्तमानचक्षूरूपादिवत्। ज्ञानज्ञेयाभिधानाभिधेयसंबन्ध[ः] खल्वकृतक (7)इति शिष्टा-त्(ः) प्रतिपद्यन्ते॥

असदालम्बनाऽपि बुद्धिरस्तीति चेत्। अत्रापदिश्यते—

---

[१] Cf. एवं किर मे धम्मा अहुत्वा सम्भोन्ति, हुत्वा पटिवेन्ति। *M. sutta* 111. Also cf. राजा आह—भन्ते नागसेन, अत्थि केचि सङ्खारा ये अभवन्ता जायन्ती'ति? नत्थि महाराज केचि सङ्खारा ये अभवन्ता जायन्ति। भवन्ता येव खो महाराज सङ्खारा जायन्ती'ति। *Milinda*, p. 55. See *Vm*. xx. 96 and *Yogasūtra*, IV. 12.

[२] *Ad. kārikā* 305 ab.

[306] नासदालम्बना बुद्धिरागमादुपपत्तितः ।

आगमस्तावत्—"चक्षुः प्रतीत्य रूपं चोत्पद्यते चक्षुर्विज्ञानं यावन्मनः प्रतीत्य धर्मांश्चोत्पद्यते मनोविज्ञानम् । एतावच्चैतत्सर्वमस्ति"[१] इत्युक्तं भगवता । तत्र मनोविज्ञानं त्रैयध्विकासंस्कृतधर्मविषया[यम्], (8)पञ्चविज्ञानकायाः प्रत्युत्पन्नपञ्चविषयालम्बनाः । न तु क्वचिदसा(स)[दा]लम्बनमुक्तं नापि तदस्तीति तद्विषयबुद्ध्यभावः ।[२]

तथोक्तम्—"यद्व(द्रु)त लोके नास्ति तदहं द्रक्ष्यामि" इति विस्तरः[३] ।

---

[१] Cf. **सब्बं** वो भिक्खवे देसिस्सामि ।···किञ्च भिक्खवे **सब्बं** ? चक्खुं चेव रूपा च । सोतञ्च सद्दा च । घानञ्च गन्धा च । जिह्वा रसा च । कायो च फोट्ठब्बा च । मनो च धम्मा च । इदं वुच्चति भिक्खवे **सब्बं** । *S.* IV. p. 15. See *S.* IV. pp. 15-30. V. supra, p. 3, n. 2. The Pāli passage is according to the *āyatanadeśanā*—इति छन्नं विञ्ञाणकायानं उप्पत्तिद्वारारम्मणतो द्वादस वुत्तानी ति । *Vm.* xv. 10.

For the *dhātu-deśanā*, see the following :—चक्खुञ्च पटिच्च रूपे च उप्पज्जति चक्खुविञ्ञाणं । सोतं च पटिच्च···मनञ्च पटिच्च धम्मे च उप्पज्जति मनोविञ्ञाणं ...*S.* II. p. 72.

[२] यदप्युक्तम् **"द्वयं प्रतीत्य विज्ञानस्योत्पादात्"** इतीदं तावदिह सम्प्रधार्यम् । यन्मनः प्रतीत्य धर्मांश्चोत्पद्यते मनोविज्ञानं, किं तस्य यथा मनो जनकः प्रत्यय एवं धर्मा आहोस्विदालम्बनमात्रं धर्मा इति । यदि तावत् जनकः प्रत्ययो धर्माः कथं यदागतं कल्पसहस्रेण भविष्यति वा न वा तदिदानीं विज्ञानं जनयिष्यति । निर्वाणं च सर्वप्रवृत्तिनिरोधाज्जनकं नोपपद्यते । अथालम्बनमात्रं धर्मा भवन्ति, अतीतानागतमप्यालम्बनं भवतीति ब्रूमः । यदि नास्ति कथमालम्बनम् ।

अत्रेदानीं ब्रूमः । यदा तदालम्बनं तथास्ति । कथं तदालम्बनम् । अभूत् भविष्यति चेति । नहि कश्चिदतीतं रूपं वेदनां वा स्मरन्नस्तीति पश्यति । किं तर्हि । अभूदिति । यथा खल्वपि वर्तमानं रूपमनुभूतं तथा तदतीतं स्मर्यते । यथा चानागतं वर्तमानं भविष्यति तथा बुद्ध्या गृह्यते । यदि च तत्तथैवास्ति वर्तमानं प्राप्नोति । अथ नास्ति, **असदप्यालम्बनं भवतीति सिद्धम्** । तदेव तद्विकीर्णमिति चेत् । न । विकीर्णस्याग्रहणात् । यदि च तत्तदेव रूपं केवलं परमाणुशो विभक्तम् । एवं सति परमाणवो नित्याः प्राप्नुवन्ति । परमाणुसंचयविभागमात्रं चैवं सति प्राप्नोति । **न तु किंचिदुत्पद्यते नापि निरुध्यत इत्याजीविकवाद आलम्बितो भवति । सूत्रं** चापविद्धं भवति । 'चक्षुरुत्पद्यमानं न कुतश्चिदागच्छती'-ति विस्तरः । अपरमाणुसंचितानां वेदनादीनां कथं विकीर्णत्वम् । तेऽपि च यथोत्पन्नानुभूताः स्मर्यन्ते । यदि च ते तथैव सन्ति नित्याः प्राप्नुवन्ति । अथ न सन्ति, **असदप्यालम्बनमिति सिद्धम्** । *Akb.* v. 27 ab. See *Sakv.* p. 474.

[३] Cf. **यर्त्ताह बोधिसत्त्वेनोक्तम्—"यल्लोके नास्ति तदहं ज्ञास्यामि वा द्रक्ष्यामि वा नेदं स्थानं विद्यत"** इति । अपरे आभिमानिका भवन्त्यसन्तमप्यवभासं सन्तं पश्यन्ति । अहं

तथा—“त्रयाणां सन्निपातः स्पर्शः। सहजाता वेदना”[१] इति विस्तरः। एतेनाभिधानाभिधेयसंबन्धः प्रत्युक्तः। तदेवं सति सूत्रेऽस्मिन्मध्यमाप्रति(१)पत्प्रदर्शिता। यदुत—केनचित्प्रकारेण शून्याः संस्काराः मिथ्यापरिकल्पितेन पुरुषालयविज्ञानाभूतपरिकल्पादिना। केनचिदशून्याः, यदुत—स्वलक्षणसामान्यलक्षणाभ्यामिति[२]। यथा कात्यायत(-य)न सूत्रे—“लोकसमुदयं ज्ञात्वा या लोके नास्ति ता सा न भवति। लोकनिरोधं ज्ञात्वा या लोकेऽस्ति ता सा न भवति इतीमौ[V B, 8. Fol. 110a](1)द्वावन्तौ परित्यज्य मध्यमया प्रतिपदा तथागतो धर्मं देशयति।”[३] न चैतद् द्व[यम]स्तिनास्तित्वाख्यमेकाधिकरणं विरोधादुपपद्यते न च निरधिष्ठानम्। नापि खपुष्पशून्याधिष्ठितम्।

तु सन्तमेवास्तीति पश्यामीत्ययं तत्राभिप्रायः। इतरथा हि सर्वबुद्धीनां सदालम्बनत्वे कुतोऽस्य विमर्शः स्यात्, को वा विशेषः। इत्थं चैतदेवम्। *Akb.* v. 27 ab.

—यद्यभावो विज्ञानस्यालम्बनं यत्तर्हीति विस्तरः। **बोधिसत्त्वेन चरमभविकेनैवमुक्तम्**—यल्लोके नास्ति, तज्ज्ञास्यामीत्येष सम्भवो नास्तीति **वचनादभावालम्बनं न भवतीति दर्शितं भवति। आचार्योऽन्याभिप्रायतामस्य सूत्रस्य दर्शयन्नाह**—अपरे आभिमानिका इति विस्तरः। अपरिशुद्धसमाधयोऽपरे···असन्तमप्यवभासं दिव्यचक्षुरवभासं प्रयोगावस्थायां सन्तमित्येवं पश्यन्ति। **अहं तु सन्तमेवावभासं पूर्वरूपं दिव्यचक्षुषोऽस्तीति पश्यामीत्ययमत्र सूत्रेऽभिप्रायः।** कुतोऽस्य विमर्श इति। सर्वबुद्धीनां सद्विषयत्वे व्यवस्थाप्यमाने कुतोऽस्य विमर्शविचारः सन्देहो वा स्यात्। यदुत लोके नास्तीति विस्तरेण य उक्तः। सदसदालम्बने तु बुद्धीनामयं विमर्शः सम्भवति। नान्यथा। को वा विशेष इति। को वा बोधिसत्त्वस्यान्येभ्यो विशेषः, यदि तेऽपि सन्तमेवावभासं पश्यन्ति नासन्तम्। सदसदालम्बनत्वे हि बुद्धीनामयं विशेषो भवति। **इत्थं चैतदेवं सत्, असदालम्बना बुद्धय इति।** *Sakv.* pp. 475—6.

[१] Cf. चक्खुञ्चावुसो पटिच्च रूपे च उप्पज्जति चक्खुविञ्ञाणं, **तिण्णं संगति फस्सो, फस्सपच्चया वेदना**···*M. sutta* 18.

[२] कायं **स्वसामान्यलक्षणाभ्यां** परीक्षते। वेदनां चित्तं धर्मांश्च। स्वभाव एवैषां **स्वलक्षणम्। सामान्यलक्षणं** तु अनित्यता संस्कृतानां दुःखता सास्रवाणां शून्यताऽनात्मते सर्वधर्माणाम्। *Akb.* vi. 14 cd.—‘स्वभाव एवैषां स्वलक्षणम्’। कः स्वभावः ? कायस्य भूतभौतिकत्वम्। वेदनाया अनुभवत्वम्। चित्तस्योपलब्धित्वम्। *Sakv.* p. 529. See *LVPAk.* vi. p. 158.

[३] Cf. कित्तावता नु खो भन्ते सम्मादिट्ठि होती ति ? **द्वयनिस्सितो ख्वायं कच्चायन** लोको येभुय्येन अत्थितं च नत्थितं च।

लोकसमुदयं खो कच्चायन यथाभूतं सम्मप्पञ्ञाय पस्सतो या लोके नत्थिता सा न होति। लोकनिरोधं खो कच्चायन यथाभूतं सम्मप्पञ्ञाय पस्सतो या लोके अत्थिता सा न होति। *S.* ii. p. 17.

युक्तिरपि। ज्ञानज्ञेयाभिधानाभिधेयसंबन्धस्याकृतकत्वात्। नास्तिशशविषान(ण)मित्यस्य ज्ञानस्याभिधानस्य चासद्विषयत्वमिति चेत्। तत्र ब्रूमः—

(2)अन्यापेक्ष्येऽथ संबन्धप्रतिषेधोऽश्वशृङ्गयोः ॥

योऽयं नास्ति शशविषाणादिप्रतिषेधोऽस्य तर्हि किं प्रतिषेध्यम्? यद्यसदालम्बना बुद्धिर्नास्त्यभिधानं वा निरभिधेयमिति? अत्रापदिश्यते। 'अन्यापेक्ष्येऽथ संबन्धप्रतिषेधः।' कार्यकारणादिस्त्रिविधः[१] संबन्धोऽत्र गोविषाणादिषु पूर्वदृष्टः शशविषाणादिषु प्रतिषिद्ध्यते। श(3)शषि(शि)रोमात्रकाकाशधातुसंबन्धदर्शणा(ना)द्यदि शशशिरस्या(स्य)पि विषाणमभविष्यत्तद्वदेवोपलप्स्यत। न चोपलभ्यते। तस्मात्संबन्धान्तरापेक्षं शशविषाणशब्दगडुमात्रं नञा संबन्ध्यन्तरसंबन्धबुद्ध्यपेक्षेणावद्योत्यते, न तु किञ्चिदभिधानमभिधेयं वा प्रतिषेध्यात्मनः(ना) श्रीयत इति सिद्धं सर्वा बुद्धिः सद्विषयेति।

(4)एतेनाजातं ध्वस्तं च गोविषाणं प्रत्युक्तम्। गोशिरसा(शिरो)मात्रमाकाशधातुवेष्टित(तं) दृष्ट्वाः(ष्ट्वा) जनिष्यते ध्वस्तं वा गोविषाणमिति द्रष्टव्यम्।

त्रयोदशायतनप्रतिषेधबुद्धिविषयाद् अस्तित्वादसदालम्बना बुद्धिरस्तीति चेत्[२]। न। भगवतैव वाग्वस्तुमात्रमेतदिति निर्णीतत्वात्। उक्तं हि भगवता हस्तताडो(लो)पमे सूत्रे—"एतावत्सर्वं यदुत(5) चक्षू रूपं च यावन्मनो धर्मांश्च। यः कश्चिदेतद् द्वयं प्रत्याख्याया[न्य]द् द्वयं ज्ञेयमभिधेयं वा

---

[१] संज्ञासंज्ञि-ज्ञानज्ञेय-क्रियाकारणसंबन्धाः। V. infra, *Adv. kārikā* 313.

[२] Cf. **यद्यसदप्यालम्बनं स्यात्, त्रयोदशमप्यायतनं स्यात्।** अथ त्रयोदशमायतनं नास्तीत्यस्य किमालम्बनम्? एतदेव नामालम्बनम्। एवं तर्हि नाम एव नास्तीति प्रतीयेत। यश्च शब्दस्य प्रागभावमालम्बते किं तस्यालम्बनम्। शब्द एव। एवं तर्हि यः शब्दाभावं प्रार्थयते तस्य शब्द एव कर्तव्यः स्यात्। अनागतावस्थ इति चेत्। सति कथं नास्तिबुद्धिः। वर्तमानो नास्तीति चेत्। न। एकत्वात्। यावता तस्य विशेषस्तस्याभूत्वाभावसिद्धिः। **तस्मादुभयं विज्ञानस्यालम्बनं भावश्चाभावश्च।** *Akb.* v. 27 ab.

त्रयोदशमप्यायतनमालम्बनं स्यादिति। त्रयोदशानामायतनानां त्रयोदशमायतनम्। तद्विज्ञानस्यालम्वनं स्यात्। असदालम्बनत्व इष्यमाणे तदालम्बनं वा विज्ञानं स्यात्। **एवं वैभाषिकेणोक्ते आचार्य** आह—अथ त्रयोदशमिति विस्तरः। **एतदेव नामेति वैभाषिकाः।** यदेतन्नाम त्रयोदशमायतनमिति। तदालम्बनम्। एवं तर्हि नामैव नास्तीति प्रतीयेत। नाभिधेयं त्रयोदशायतनाभावलक्षणम्। किं च यश्च शब्दस्य प्रागभावमालम्बते, किं तस्यालम्बनम्। भवतीति वाक्यशेषः। एवं प्रकृते **वैभाषिक** आह—शब्द एवालम्बनमिति प्रकृतम्। एवं तर्हीति विस्तरेण**आचार्यः**।···*Sakv*. p. 475.

कल्पयेत् वाग्वस्तुमात्रमेवास्य स्यात्। पृष्टो वा न संप्रजानीयादुत्तरे वा संमोहमापद्येत। यथापि तदविषयत्वात्।"[१] इति।

किञ्च, अस्तिशशविषाणाभिधानाभिधेयवन्नास्त्युक्तिरपि वाग्वस्तुमात्रं विषाणाख्याभिधेयार्थसंब(6)न्धविहीनम्। एतेन षष्ठः स्कन्धः प्रत्युक्तः। किञ्च, पञ्चस्कन्धविषयविपरीतज्ञानप्रतिषेधात्। अलातचक्रबुद्धिप्रतिषेधवत्, द्विचन्द्रबुद्धिप्रतिषेधवच्च। उक्तं हि भगवता—"ये केचिदात्मेति समनुपश्यन्तः समनुपश्यन्ति सर्वे त इमानेव पञ्चोपादानस्कन्धान्समनुपश्यन्तः समनुपश्यन्ति"[२] इति स्कन्धविषये चैषा नित्यात्म(7)द्रव्यभ्रान्तिरित्यवद्योत्यते।

किञ्च, नञः सदसत्प्रतिषेध्यविषयत्वानुपपत्तेश्च। सन्तं तावदर्थं न प्रतिषेद्धुम(म्) समर्थः। यदि हि सन्तमर्थं शक्नुयात्प्रतिषेद्धुं न राजानो हस्त्यश्वं वि(बि)भृयुर्ण(र्न) सन्ति दस्यव इत्येवं ब्रूयुः। इत्युक्ते दस्यूनामभाव[ः] स्यात्। न चैतदस्ति। अथासन्तं प्रतिषेधयति, तेनाभावप्रतिषेधाद्भाव ए(8)व स्यादिति। तस्मान्नञो न गोविषाणादि[ः] नापि शशः(श)[विषाणादिः] प्रतिषिध्यते। किं तर्हि। शशाकाशधातुसंबन्धबुद्ध्यपेक्षेण गोविषाणादिद्रव्यासंबन्धबुद्ध्योऽवद्योत्यन्ते। सिद्धा सदालम्बनैव बुद्धिः। एवमन्यत्रापि॥

[307] रूपादौ वस्तुनि क्षीणे सत्येवोत्पद्यते मतिः।
सा ज्ञानस्यासदाकारा शास्तुस्तथान्यचित्तवत्॥

रूपादौ खल्वपि (9)वस्तुन्यभ्यतीते सत्येव बुद्धिरुत्पद्यते। न ह्यसदालम्बना बुद्धिरुत्पद्यते। सदालम्बना बुद्धिरस्तीत्युपपादितम्। न च नो द्रव्यं विनश्यतीत्युक्तम्। यदेतद् रूपादिद्रव्यं पूर्वानुभूतं तदेव तत्स्मृत्या गृह्यत इत्युपरिष्टादपि साधयिष्यामः।

या तर्हि निरुद्धदेवदत्तानुस्मृतिर्घटानुस्मृतिर्वा सा कथं जायते? अतीतानाग[V. A, 8. Fol. 110 b.](1) तयोर्देवदत्तघटप्रज्ञप्त्युपादानयोरिति। अत्र ब्रूमः। सापि खलु साविद्यास्यासदाकारोत्पद्यते स्थान्वा(ण्वा)दौ पुरुषादिबुद्धिवत्। निरविद्यस्य तुशास्तुस्तत्त्वाकारा भवति रूपादिधर्ममात्रबुद्धिरेव।

---

[१] किञ्च भिक्खवे सब्बं। चक्खुं चेव रूपा च…पे…मनो च धम्मा च। इदं वुच्चति भिक्खवे सब्बं। यो भिक्खवे एवं वदेय्य। अहमेतं सब्बं पच्चक्खाय अञ्ञं सब्बं पञ्ञापेस्सामीति। तस्स वाचावत्थुरेवस्स। पुट्ठो च न सम्पायेय्य। उत्तरिञ्च विघातं आपज्जेय्य। तं किस्स हेतु। यथा तं भिक्खवे अविसयस्मिं ति। *S.* IV. p. 15.

V. supra, p. 269, n. 1.

[२] Cf. ये हि केचि भिक्खवे समणा वा ब्राह्मणा वा अनेकविहितमत्तानं समनुपस्समाना समनुपस्सन्ति। सब्बे ते पञ्चूपादानक्खन्धे समनुपस्सन्ति एतेसं वा अञ्ञतरं। *S.* III. p. 46. See *Sakv.* p. 587.

तद्यथा परचित्तविदः स्वलक्षणाकारा बुद्धिरुत्पद्यते । तत्सामर्थ्योपाधि[व]शेनान्यथापि जानीते । तद्वत्तत्सामर्थ्येण भाविनीं भूतां च संज्ञा(ज्ञां) (2)रूपादिषु देवदत्तघटलक्षणां प्रतिपद्यत इति ॥

इतश्च सदतीतानागतम्—

[308] हर्षोत्पादभयोद्वेगस्मृत्युत्पत्त्य(त्त्य)ङ्गभावतः ।

अतीतानागतं हि मित्रममित्रौ(त्रं) वा मनसि कृत्वा हर्षोत्पादभयादयोऽभ्युपजायन्ते। ते चानिमित्ता न भवितुमर्हन्ति। कथम्? वर्तमानवत्। तद्यथा सति वर्तमाने मित्रेऽमित्रे वा हर्षभयादयो भवन्ति नासती(3)ति तद्वत्।

किञ्च,

साङ्गस्य शक्त्यभिव्यक्तेः सदीपघटरूपवत् ॥

विद्यमानस्य खल्वनागतस्य वस्तुनोऽतीतप्रत्युत्पन्नसहकारिकारणसामग्रीपरिगृहीतस्य शक्तिमात्रमाविर्भवति। कथम्? 'सदीपघटरूपवत्।' तद्यथा तमसि विद्यमानस्य घटरूपस्य स्वात्मोद्भावनशक्तिः प्रदीपादिकारणसामग्रीसन्निधाने सति भवति (4)तद्वदिति। इतश्चास्त्यनागतम् ॥

[309] जनीहाकर्तृसाध्यत्वात्पञ्चभावविकारवत् ।

तद्यथा अस्ति विपरिणमते वर्धते क्षीयते विनश्यतीति सति मुख्यसत्ताविष्टे कर्तरि एते पञ्च भावविकारा भवन्ति। तद्वज्जायत इत्ययमपि षष्ठः भावविकारः[१] सति मुख्याविष्टे कर्तरि भवितुमर्हतीति। किञ्च, जायमानता सत्ता नश्यता ना(5)सामानाधिकरण्ये सत्यनन्यतापत्तिसङ्करदोषप्रसङ्गात्। वैयधिकरण्याभ्युपगमे संबन्धाभावादेकत्र तद्व्यपदेशानुपपत्तिः। किञ्च, जायमानतादिक्रियाभावेऽस्तित्वायोगात्। कथम्? शशविषाणवदिति। उपचारसत्तेति चेत्। न। मुख्यसत्ताया सत्यामुपचारसद्भावात्, वक्ष्यमान(ण)दोषाच्च।

इतश्चास्ति—

सतः कृ(क्रि)याङ्गताद्दृष्टेर्विकार्य(6)प्राप्यकर्मवत् ॥

तद्यथा विकार्ये कर्मणि सति करणं दृष्टं काशात्कटी करोति। प्राप्ये च कर्मणि सति ग्रामं गच्छति देवदत्तः सूर्यं च पश्यतीति गमनदर्शिक्रिये सति कर्मणि भवतः। तद्वन्निर्वर्त्येऽपि कर्मणि मुख्यद्रव्यास्तित्वे सति देवदत्तकर्तृका घटक्रियोपपद्यत इति ॥

सांख्यः पश्यति—विद्यमानमेव जायते। (7)तद्यथा क्षीरे विद्यमानं दधि, कार्यकारणयोरेकत्वात्। तं प्रत्यपदिश्यते—

---

[१] See *Nirukta*, I. 2. 8.

[310] द्वितीयं जन्म जातस्य वस्तुनो नोपपद्यते ॥

यदि खलु क्षीरे दध्यादयो विकाराः सन्ति बीजे चाङ्कुरादयः शुक्रशोनि(णि)ते च कललादयः, तेषां जातानां क्षीरादिवज्जन्म पुनर्ण(र्न) युज्यते । यथा च न युज्यते तथा पूर्वमेवाविष्कृतम् ।

वैशेषिको म(8)न्यते—कपालेष्वविद्यमानं घटद्रव्यं तन्तुषु चाविद्यमानं पटद्रव्यं कपालतन्तुसंयोगादुत्पद्यते । गौण्या च कल्पनया विप्रकृतावस्थाविषया जनिकर्तृसत्ता व्यपदिश्यत इति । अस्याप्यवयविद्रव्यं सहावयवैः पूर्वमेव विहितोत्तरम् । यत्पुनरुक्तमुपचारसत्तया जनिकर्त्तोपदिश्यत इत्यत्र ब्रूमः—

मुख्यसत्ता गु(9)णाभावाद्गौनी(णी) सत्ता न विद्यते ॥

न हि मुख्यसत्ता[यां] गुणाभावेऽवयवाभावे वा कारणेषु प्रागुत्पत्त्यभावे वा कार्यसत्तोपचारो युज्यते ॥

कस्मात् ?

[311] साधर्म्ये सति तद्वृत्तेर्व्याहारं मधुरोक्तिवत् ।

तद्यथा मधुरवाग्देवदत्त इति वाचि माधुर्यगुणयुक्तस्य गुडद्रव्यस्य मधुनो वा साधर्म्यमभिलषणीयता विद्यते इत्यतो वाचि [VI.B, 1. Fol. 111 a](1) माधुर्यशब्दः प्रयुज्यते । कन्यामुखे च चन्द्रकान्तिसादृश्यं दृष्ट्वा चन्द्रशब्दः प्रयुज्यते । वाहीके च जाड्यसाधर्म्याद्गोशब्दः प्रयुज्यते—गौरयं वाहीक इत्येवमादि । न च तथा कश्चिद्गुणावयवगन्धोऽपि तन्तुषु तत्संयोगे वा प्रागुत्पत्त्यभावे निरात्मनः कार्यस्यास्तीति । न च कार्यं किञ्चिदीषत्कृतमुपपद्यते । निष्ठासत्तैककालाभ्यु(2)पगमात् । प्रागव्यपदेश्यं वस्तुमात्रं विप्रकृतं जायत इति चेत् । न । उक्तोत्तरत्वात् । मम तु चन्द्रकोटीप्रकाशलक्षणो दृष्टान्तो विद्यते ।

आविष्टलिङ्गमुख्यस्य जन्मेष्टं दारकादिवत् ॥

अयं हि जनिरभिनिष्क्रमणादिवचनो नासत्प्रादुर्भाववचनः । कथम् ? 'दारि(र)कादिवत्' । तद्यथा दारको मुख्यसत्ताविष्टो मातुकुक्षेर्निष्क्रमने(णे) जायत (3)इत्युच्यते । तद्वदत्रापीति ॥

दार्ष्टान्तिकः खलु ब्रूते—कारणशक्तिषु निरात्मकजनिकर्त्रुपचारः प्रवर्तते । तं प्रति ब्रूमः—

[312] स्यात्खपुष्पैः खमुत्फुल्लं स्याज्जटालश्च दर्दुरः ।
स्वभावो यदि भावानां प्रागभूत्वा समुद्भवेत् ॥

न ह्यसतः कस्यचिच्छशविषाणादेरुत्पादो भवति नैरात्म्याविशेषसर्वा-

सदुत्पत्तिप्रसङ्गात्।[१] तद्धेतु(4)कानां च जायमानजातनश्यत्कालेष्वात्मास्तित्वस्थितशक्तीनामनुपपत्तेः। कारणानां च कार्यात्मकत्वा[त्] प्रागुत्पत्तेरसत्त्वम्, असत्त्वादनुपपत्तिदोषापत्तिः। कुतश्च नाभावो भावीभवति? स्थितिशक्तिक्रिया[ऽ]योगात्॥

कथमयोग इति चेत्। तदाविष्क्रियते—

[313] स्थितिशक्तिपरित्यक्तान्धर्मान्नाशान्वितोदयान्।
वद सोम्य कथं याति प्रतीत्या (5)वस्तु वस्तुताम्॥

इह खलु भवतामहेतुको विनाशः[२] सर्वोत्पत्तिमतां नित्यसंनिहितः। तस्मिंश्च सति जन्मस्थितिशक्तिक्रिया न विद्यन्ते, विरोधात्। तास्वसतीषु कारणमपि चे(चै)व विनष्टम्। तदस्मिन्नसति किं प्रतीत्य असन्निरात्मकं वस्तु वस्तुतां यातीत्याचक्ष्व। कथं ते कार्यं कारणं वोपपद्यते? सतां हि संज्ञासंज्ञिज्ञानज्ञेयक्रियाकारणहे(6)तुफलादीनामन्योन्यापेक्षप्रज्ञप्तेः। अथ तवाभावो न कश्चिदस्ति भावविरोधी, कथं तर्हि स भावो नष्ट इत्युच्यते? तस्माद्भवतो वाङ्मात्रमेतत्, मम तु विद्यमानयोरेवोपकार्युपकार[क]भावो युक्तः॥

यस्मात्—

---

[१] Cf.…यस्य त्वतीतानागतं द्रव्यतोऽस्ति तस्य फलं नित्यमेवास्तीति किं तत्र कर्मणः सामर्थ्यम्। उत्पादने सामर्थ्यम्। उत्पादस्तर्ह्यभूत्वा भवतीति सिद्धम्। अथ सर्व एव चास्ति। कस्येदानीं क्व सामर्थ्यम्। **वार्ष्यगण्यवादश्चैवं द्योतितो भवति—'यद्यस्त्यस्त्येव तत्। यन्नास्ति नास्त्येव तत्। असतो नास्ति संभवः। सतो नास्ति विनाश'** इति। वर्तमानीकरणे तर्हि सामर्थ्यम्। किमिदं वर्तमानीकरणं नाम। देशान्तराकर्षणं चेत्। नित्यं प्रसक्तम्। अरूपिणां च कथं तत्। यच्च तदाकर्षणं तदभूत्वा भूतम्। स्वभावविशेषणं चेत् सिद्धमभूत्वा भवनम्। **तस्मान्नैवं सर्वास्तिवादः शासने साधुर्भवति यदतीतानागतं द्रव्यतोऽस्तीति वदति।** *Akb.* v. 27 c.

—वर्तमानीकरण इति वैभाषिकः। किमिदानीं वर्तमानीकरणमिति विस्तरेणाचार्यः। देशान्तराकर्षणं चेत्। यदि मन्यसे हेतुना फलस्य देशान्तराकर्षणं वर्तमानीकरणमिति, अत्र ब्रूमः। नित्यं प्रसक्तं फलमिति वाक्यशेषः। केवलं देशान्तराद्देशान्तराकर्षणम्, न किञ्चिदपूर्वमुत्पद्यत इति नित्यं प्रसक्तम्। अरूपिणां च वेदनादीनाम्। **कथं तद्देशान्तराकर्षणा।** अमूर्तत्वेनादेशस्थत्वान्न तद्युज्यत इत्यभिप्रायः। यच्च तदाकर्षणं क्रियासंज्ञकम्, तदभूत्वा भूतमित्यभूत्वाभावसिद्धिरित्यभिप्रायः। **स्वभावविशेषणं चेत्।** यदि मन्यसे हेतुना स्वभावोऽस्य फलस्य विशेष्यते, तेन फलविशेषणं भवतीति। अत्र ब्रूमः। **सिद्धमभूत्वा भवनमिति।** सिद्धमभूत्वा विशेषणस्य भवनं प्रादुर्भाव इति। *Sakv.* pp. 476—7.

[२] V. supra, p. 107, n. 1.

[314] लोके दृष्टः सतोरेव परस्परमनुग्रहः ।
तद्वदेवोपघातोऽपि नाश्वशृङ्गाहिवा(पा)दयोः ॥

अनुग्रहोपघातयोश्च (7)कार्यकारणसंबन्धोपचारश्च सतोरेव भवतीत्यास्तनन्धयेभ्यः प्रसिद्धमेतत्, नासतोः न च सदसतोरिति ॥

वैतुलिकः[१] कल्पयति—

[315] यत्प्रतीत्यसमुत्पन्नं तत्स्वभावान्न विद्यते ।[२]

यत्खलु निस्वभावं निरात्मकं हेतून्प्रतीत्य जायते तस्य खलु स्वभावो नास्ति । न हि तत्कारणेषु प्रत्येकमवस्थितं नापि भागशो नाप्यन्य(8)त्र क्वचित् । नापि हेतुसमुदाये तद्रूपाभावात् । यच्च न क्वचिदस्ति तत्कतमेन स्वभावेनोत्पत्स्यत इति नास्ति स्वभावः । यस्य च नास्ति स्वभावः तत्कथमस्तीत्युच्यते ? तस्मादलातचक्रवन्निस्वभावत्वात् सर्वधर्मा निरात्मान इति[३] ।

तं प्रत्यपदिश्यते—

---

[१] Cf. **नैवासतो नैव सतः प्रत्ययोऽर्थस्य युज्यते ।**
असतः प्रत्ययः कस्य सतश्च प्रत्ययेन किम् ॥
न सन् नासन् न सदसद् धर्मो निर्वर्तते यदा ।
कथं निवर्तको हेतुरेवं सति हि युज्यते ॥ *Mādhyamika-kārikā*, I. 6-7.
न भावाज्जायते भावो भावोऽभावान्न जायते ।
नाऽभावाज्जायतेऽभावोऽभावो भावान्न जायते ॥ *Chatuḥ-śataka*, 364.

[२] Cf. हेतुप्रत्ययसामग्रीं प्रतीत्य जातस्य परायत्तात्मलाभस्य प्रतिबिम्बसमे कुतः सत्स्वभावता ?

"यः प्रत्ययैर्जायति स ह्यजातो ।
न तस्य उत्पादु स्वभावतोऽस्ति ॥
यः प्रत्ययाधीनु स शून्य उक्तो ।
यः शून्यतां जानति सोऽप्रमत्तः ॥ *B. Pañjikā*, IX 2.

See *Sikshā*, p. 241.

[३] Cf. **यदुक्तं वैपुल्ये निःस्वभावाः सर्वधर्मा इति ।** तत्र कोऽभिसन्धिः ? स्वयमभावतामुपादाय स्वेनात्मनाऽभावतामुपादाय स्वे भावेऽनवस्थितात्मतामुपादाय बालग्राहवच्चालक्षणतामुपादाय ॥ अपि खलु परिकल्पिते स्वभावे लक्षणनिःस्वभावतामुपादाय परतन्त्रे उत्पत्तिनिःस्वभावतामुपादाय परिनिष्पन्ने परमार्थनिःस्वभावतामुपादाय । **अनुत्पन्ना अनिरुद्धा आदिशान्ताः प्रकृतिपरिनिर्वृता इति कोऽभिसन्धिः ?** यथा निःस्वभावास्तथा अनुत्पन्नाः । यथा अनुत्पन्नास्तथा अनिरुद्धाः । यथा अनुत्पन्नाश्चानिरुद्धाश्च तथा आदिशान्ताः । यथा आदिशान्तास्तथा प्रकृतिपरिनिर्वृताः ॥ *Asm.* p. 84.

न विद्यते स्वभावाद्यद्विद्यते तत्ततोऽन्यथा ॥

ब्रह्मोद्यमेतत्—यत्प्रतीत्यसमुत्पन्नं (9)तत्संवृत्यात्मना विद्यते वनसंघादिवत् । यत्परमार्थतो विद्यते तस्य प्रतीत्यावस्थाशक्तिमूर्तिक्रियादिमात्रमुत्पद्यत[१] इति ॥

तस्य तर्हि हेतवो विद्यमानस्य कमुपकारं कुर्वन्तीति ? अत्राभिधीयते । न खलु द्रव्यस्वभावास्तित्वं प्रति कञ्चिदुपकारं कुर्वन्ति ।[२] न च स्वभावस्यापेक्ष्य प्रज्ञप्तिः । किं तर्हि ?

[316] प्रकुर्वन्ति दशामात्रं [VI. A, 1. Fol. 111 b.]
(1)हेतवो वस्तुनः सतः ।
राजत्वं राजपुत्रस्य सात्मकस्यैव मन्त्रिणः ॥

तद्यथाऽभिजातस्य राजपुत्रस्य विद्यमानस्य मन्त्रिणः सबलसमुदयाः परिग्रहानुग्रहमात्रेणोपकुर्वन्तो राजत्वं कुर्वन्त्येवमनागतस्य वस्तुनः सतो हेतुप्रत्ययाः समेत्य लक्षणमात्र(त्रं) [वर्त]मानाख्यमैश्वर्याधिपत्यं कुर्वन्तीत्यवबोद्धव्यम् ॥

अन्ये पुनर्वर्णयन्ति—

[317] (2)धर्माणां सति सामग्र्ये सामर्थ्यमुपजायते ।
चितानां परमानू(णू)नां यद्वदात्मोपलम्भने ॥

यथा खलु परमानु(णु)संचयश्चक्षुषा गृह्यते, प्रत्येकं परमान(ण)वो न गृह्यन्ते, तथा कारणसामग्र्ये सति धर्माणां क्रियासामर्थ्यमुपजायत इति द्रष्टव्यम् ।

भदन्तकुमारलातः पश्यति—वातायनप्रविष्टस्यां(स्या)न्तःपार्श्वद्वयेऽपि तुटयः (3)सन्ति । रश्मिगतस्य तु दर्शनमस्य तुटे रश्मिपार्श्वगास्त्वनुमेयाः । एतेन व्याख्यातं धर्माणामध्वयोर्द्वयोरस्तित्वम् । प्राप्य ज्ञानातिशयं मुनयः पश्यन्ति, तास्तु धीर्हि त्रिकज्ञा ॥

---

[१] V. infra, *Ad. kārikā* 323.

[२] Cf. वैभाषिकाणामेतन्मतम् । अनागतं विद्यमानं उत्पद्यत इति । तस्मादयं पसञ्जयति । 'ननु चैवं सति सभागहेतुरभूत्वा अनागतावस्थायां हेतुर्भवति वर्तमानावस्थायामिति प्राप्तं' प्रसक्तमित्यर्थः । 'इष्यत एवावस्थां प्रति न द्रव्यम्' इति ।…'अवस्थाफलं हि सामग्र्यं न द्रव्यफलम्' इति । *Sakv.* p. 201.

यस्तु मन्यतेऽतीतं कर्माभावीभवत्यनागतं च न विद्यते तं प्रत्यपदिश्यते–[१]

[318] कर्मातीतमसद्यस्य फलं भावि करोत्यसत् ।
व्यक्तं वन्ध्यासुतस्तस्य जायते व्य(4)न्तरात्मजात् ॥

न हि भवतो वर्तमानकालास्तित्वमुपपद्यते, अतीतानागतहेतुफलाभावात्, वन्ध्याव्यन्तरपुत्रजन्मवत् ॥

अत्र प्रत्यवतिष्ठन्ते दार्ष्टान्तिकाः—न ब्रूमः सर्वथाऽतीतं न विद्यते। किं तर्हि? द्रव्यात्मना न विद्यते प्रज्ञप्त्यात्मना तु सदिति।[२] तत्र प्रतिसमाधीयते—

---

[१] V. supra, p. 265.

[२] Cf. यत्तूक्तमुक्तत्वादिति। वयमपि ब्रूमोऽस्त्यतीतानागतमिति। अतीतं तु यद् भूतपूर्वम्। अनागतं यत्सति हेतौ भविष्यति। एवं च कृत्वास्तीत्युच्यते। न पुनर्द्रव्यतः। *Akb.* v. 27 c.

—अतीतं तु यद्भूतपूर्वमिति। न स्वलक्षणेनास्तीति दर्शयति। अनागतं यत्सति हेतौ भविष्यतीति अविद्यमानमपि हेतुतद्भावाद्व्यवस्थाप्यत इति दर्शयति। एवं हि कृत्वाऽस्तीत्युच्यत इति भूतपूर्वं भविष्यति चेति कृत्वा। *Sakv.* pp. 472—3.

Also cf. एवं तु साधुर्भवति। यथा सूत्रे सर्वमस्तीत्युक्तं तथा वदति। कथं च सूत्रे सर्वमस्तीति उक्तम्। "सर्वमस्तीति ब्राह्मण यावदेव द्वादशायतनानी" ति। अध्वत्रयं वा। यथा तु तदस्ति तथोक्तम्। *Akb.* v. 27 c.

The following Pāli passage supports the Sauntrāntika view that the *atīta* and *anāgata* are only notions and not realities :—

सचे तं चित्त एवं पुच्छेय्युं—अहोसि त्वं अतीतमद्धानं, न त्वं नाहोसि, भविस्ससि त्वं अनागतमद्धानं, न त्वं न भविस्ससि, अत्थि त्वं एतरहि, न त्वं नत्थीति? एवं पुट्ठो त्वं चित्त किं व्याकरेय्यासी ति?···एवं पुट्ठो अहं भन्ते एवं व्याकरेय्यं अहोसाहं···भविस्सामहं अत्थाहं···। सचे पन त्वं चित्त एवं पुच्छेय्युं—यो ते अहोसि अतीतो अत्तपटिलाभो, स्वेव ते अत्तपटिलाभो सच्चो, मोघो अनागतो मोघो पच्चुप्पन्नो, यो ते एतरहि पच्चुप्पन्नो अत्तपटिलाभो, स्वेव ते सच्चो, मोघो अतीतो मोघो अनागतो?···एवं पुट्ठो अहं भन्ते एवं व्याकरेय्यं—यो मे अहोसि अतीतो अत्तपटिलाभो स्वेव मे अत्तपटिलाभो तस्मिं समये सच्चो अहोसि मोघो अनागतो मोघो पच्चुप्पन्नो, यो मे भविस्सति···सो तस्मिं समये सच्चो भविस्सति, मोघो अतीतो मोघो पच्चुप्पन्नो।"···सेय्यथापि चित्त गवा खीरं खीरम्हा दधि, दधिम्हा नवनीतं··· यस्मिं समये खीरं होति नेव तस्मिं समये दधीति संखं गच्छति···खीरं त्वेव तस्मिं समये संखं गच्छति।···इमा खो चित्त लोकसमञ्ञा लोकनिरुत्तियो लोकवोहारा लोकपञ्ञत्तियो याहि तथागतो वोहरति अपरामसं ति। *Dīgha.* ix. 45-53.

[319] नामसल्लक्षणाभावाद् द्रव्यसत्याङ्गसिद्धितः ।
अनाग(5)ताभ्यतीतस्य नास्ति प्रज्ञप्तिसत्यता ॥

सोपादानं हि सर्वं प्रज्ञप्तिसत् । न च वर्तमानमुपादानमुपपद्यते । अनागताभ्यतीतस्य तस्मान्निरुपादानस्य प्रज्ञप्त्यभावादसदेतत् ।

यदि तर्ह्यनागतं चक्षुरादिद्रव्यं विद्यते कस्मान्न पश्यति न दृश्यते न विजानाति ? न व्यक्तं कारित्राभावादी(दि)ति ॥

तदत्र कोशकारः प्रश्नयति—

[320] को विघ्नः[1]

(6)यदि चक्षुर्विद्यते किं न पश्यति ? वयं ब्रूमः—

अङ्गवैकल्यम्[2]

दृष्टं हि प्रदीपाद्यङ्गवैकल्ये वर्तमानस्यापि चक्षुषो रूपादर्शनम् । स प्रत्याचष्टे—सर्वस्य सदास्तित्वे कुतोऽङ्गवैकल्यम् ? वयमाचक्ष्महे—

न तत्सर्वास्तिता सदा ।

त्रैयध्विकानि खल्वत्राङ्गानि विवक्षितानि । तत्र केषाञ्चिदसांनिध्यं भवति तद्वैकल्यात्कारित्रं न करो(7)तीति ।

स प्रत्याचष्टे—

तत्कथं[3]

---

[1] इदं तु वक्तव्यम् । **यद्यतीतमपि द्रव्यतोऽस्त्यनागतमिति । कस्मात्तदतीतमित्युच्यतेऽनागतमिति वा** . ननु चोक्तं—'अध्वानः कारित्रेण व्यवस्थिताः' इति । यद्येवं प्रत्युत्पन्नस्य तत्सभागस्य चक्षुषः किं कारित्रम् । फलदानप्रतिग्रहणम् । अतीतानामपि तर्हि सभागहेत्वादीनां फलदानात् कारित्रप्रसंगोऽर्द्धकारित्रस्य वेति लक्षणसंकरः । **इदं च वक्तव्यम् । तेनैवात्मना सतो धर्मस्य नित्यं कारित्रकरणे**

को विघ्नः

येन कदाचित् कारित्रं करोति कदाचिन्नेति । *Akb.* v. 27 a.

[2] **प्रत्ययानामसामग्र्यमिति चेत्** । न । नित्यमस्तित्वाभ्युपगमात् । *Ibid.*

[3] यच्च तत्कारित्रमतीतानागतं प्रत्युत्पन्नं चोच्यते

तत्कथं

किं कारित्रस्याप्यन्यदस्ति कारित्रम् । अथ तेनैवातीतं नाप्यनागतं न प्रत्युत्पन्नमस्ति

किं लक्षणात्कारित्रं ततो वा द्रव्यात्, किमन्यदाहोस्विदनन्यदिति ? तत्र वयं प्रतिवच्मः—

श्रूयतां सद्भ्यः

छात्रासनमध्यास्य न हि सर्वज्ञप्रवचनगाम्भीर्यं सदेवकेनापि लोकेन शक्यं तर्कमात्रेणावबोद्धुम्[1] । यस्मात्सोम्य—

दुर्बोधा खलु धर्मता ॥[2]

तथापि तु श्रूयताम् ॥

च । तेनासंस्कृतत्वान्नित्यत्वमस्तीति प्राप्तम् । **अतो न वक्तव्यं यदा कारित्रं न करोति धर्मस्तदाऽनागत इति ।**

नान्यत्

अतो न भवत्येष दोषः । एवं तर्हि स एव

अध्वायोगस्तथा सतः । *Akb.* v. 27 ab.

[1] Cf. "Vaibhāshika (does not feel discountenanced by this series of arguments, and says:) We Vaibhāshikas, nevertheless, maintain that the past and the future certainly do exist. But (regarding the everlasting essence of the elements of existence, we confess) that this is something we do not succeed in explaining, **their essence is deep** (it is trascendental), **since its existence cannot be established by rational methods...**" *The Central Conception of Buddhism*, pp. 90—91. (See *Ibid*, note 1.)

[2] **अजातनष्टता केन**

···अथासत्यतीतानागते कथं तेन तस्मिन् वा संयुक्तो भवति ? तज्जतद्धेत्वनुशयभावात् क्लेशेन तदालम्बने क्लेशानुशयभावाद्वस्तुनि संयुक्तो भवति । **अस्त्येव त्वतीतानागतमिति वैभाषिकाः । यन्न नेतुं शक्यते तत्रात्मकात्मनैव वेदितव्यम् ।**

गम्भीरा खलु धर्मता ॥

नावश्यं तर्ह्यसाध्या भवतीति । **अस्ति पर्यायो यदुत्पद्यते तन्निरुध्यते ।** रूपमुत्पद्यते रूपं निरुध्यते । **अस्ति पर्यायोऽन्यदुत्पद्यतेऽन्यन्निरुध्यते ।** अनागतमुत्पद्यते वर्तमानं निरुध्यते । अध्वाऽप्युत्पद्यते । उत्पद्यमानस्याध्वसंगृहीतत्वात् । **अध्वनोऽप्युत्पद्यते ।** अनेकक्षणिकत्वादनागतस्याध्वनः । *Akb.* v. 27 cd.

—**धर्मता** इति । धर्माणां स्वभावः । अतीतादिकाध्वव्यवस्थाने सति **तत्संव्यवहार**व्युत्पादनार्थमाह । अस्ति पर्याय इत्यादि । अस्ति वचनक्रमः ।···**रूपमुत्पद्यते रूपं निरुध्यते द्रव्यानन्यत्वात् । अन्यदुत्पद्यतेऽन्यन्निरुध्यते । अनागतमुत्पद्यतेऽन्यदुत्पादाभिमुखत्वात् । वर्तमानं निरुध्यतेऽन्यन्निरोधाभिमुखत्वात् । अध्वाऽप्युत्पद्यते, उत्पद्यमानस्य धर्मस्याध्वसंगृहीतत्वात्,** अध्वस्वभावादित्यर्थः । **'त एवाध्वा कथावस्तु'** इति लक्षणात् । **अध्वनोऽप्युपादानरूपादुत्पद्यते धर्मः** । कस्मादित्याह । **अनेकक्षणिकत्वादनागतस्याध्वन** इति । यस्मादनेकेषां क्षणानामनागतानां राशिरूपाणां कश्चिदेव क्षण उत्पद्यते । अतोऽध्वनोऽप्युत्पाद्यत इत्युच्यते । *Sakv.* pp. 477—8.

[321] वर्तमानाध्वसंपातात् सा(8)मग्र्याऽङ्गपरिग्रहात् ।
लब्धशक्तेः फलाक्षेपः कारित्रमभिधीयते ॥

अनागतस्य खलु धर्मस्य वर्तमानाध्वसंपातादन्तरङ्गबहिरङ्गसामग्र्याङ्गपरिग्रहात् लब्धसामर्थ्यस्य धर्मस्य यः फलाक्षेपस्तत्कारित्रमित्युच्यते ।[१] सा च वर्तमानकाला वृत्तिः कारित्रमित्याख्यायते । तत्र यो ब्रूतेऽनन्यत्कारित्रमिति तस्य द्रव्य(9)स्वभावपरित्यागः प्रसज्यते ॥

शास्त्रे तु खलु—

[322] न वर्तमानता रूपमतीताजा(ना)न(ग)ता न च ।
यतोऽतो नाध्वसंचाराद् रूपात्मान्यथतेष्यते ॥

यदि द्रव्यात्मनो नान्यथात्वं किं तर्हि हेतू[न्] प्रतीत्य जायते ? ब्रूमः—

[323] अवस्था जायते काचिद्विद्यमानस्य वस्तुनः ।
तथा शक्तिस्तथा वेला तथा सत्ता तथा क्रिया ॥

तत्रावस्थाशक्तिप्रचय [VI.B, 2.Fol.112 a](1)क्रियापेक्षा द्रव्यवशा शक्तिः क्रियापेक्षाकृतं सामर्थ्यम् । क्रियाणा(ना)गतफला । द्रव्यवृत्तिवे(वै)ला कालो वर्तमानाख्ये(ख्यः) । मूर्तिः परमानु(णु)प्रचयविशेषः । सत्ता प्रबोधाख्यं प्रज्ञप्तिसत्यम् । इति सर्वमेतदन्तरङ्गबहिरङ्गकारणसामग्रीसन्निधानापेक्षासक्तस्वरूपम् ॥[२]

---

[१] On *kāritra*, see *Aaa*. pp. 362 ff.

[२] Cf. यदि धर्म एव कारित्रं कस्मात्स एव धर्मस्तेनैवात्मना विद्यमानः कदाचिदतीत इत्युच्यते कदाचिदनागत इत्यध्वनां व्यवस्थानं न सिध्यति । किमत्र न सिध्यति ? यो ह्यजातो धर्मः सोऽनागतः । यो जातो भवति न च विनष्टः स वर्तमानः । यो विनष्टः सोऽतीत इति । एतदेवात्र वक्तव्यम् । यदि यथा वर्तमानं द्रव्यतोऽस्ति न तथाऽतीतमनागतं चास्ति । तस्य···तेनैव स्वभावेन सतो धर्मस्य कथमिदं सिध्यत्यजात इति यो विनष्ट इति वेति । किमस्य पूर्वं नासीद्यस्याभावादजात इत्युच्यते ? किं च पश्चान्नास्ति यस्याभावाद्विनष्ट इत्युच्यते ? तस्मान्न सिध्यति सर्वथाऽप्यध्वत्रयम्, यद्यभूत्वा भवतीति नेष्यते भूत्वा च पुनर्न भवतीति । यदप्युक्तम्—'संस्कृतलक्षणयोगान्न शाश्वतत्वप्रसङ्गः' इति । तदिदं केवलं वाङ्मात्रमुत्पादविनाशयोरयोगात् । नित्यं च नामास्ति स धर्मो न च नित्य इत्यपूर्वैषा वाचो युक्तिः । आह खल्वपि—

"स्वभावः सर्वदा चास्ति भावो नित्यश्च नेष्यते ।
न च स्वभावाद् भावोऽन्यो व्यक्तमीश्वरचेष्टितम् ॥" *Akb*. v. 17 bc.

Also cf. अथ पूर्वापरकालयोः कारित्रशून्यतया धर्मस्याध्वसु विशेषः । तथा हि

अत्र सर्वास्तिवादविभ्रष्टिर्वैतुलिको निराहः(ह)—वयमपि त्रीन् स्वभावान् कल्प(2)यिष्यामः।[1] तस्मै प्रतिवक्तव्यम्—

[324] परिकल्पैर्जगद्व्याप्तं मूर्खचित्तानुरञ्जिभिः ।
यस्तु विद्वन्मनोग्राही परिकल्पः स दुर्लभः ॥

ते खल्वेते भवत्कल्पितास्त्रयः स्वभावाः पूर्वमेव प्रत्यूढाः। एवमन्येऽप्यसत्परिकल्पाः प्रोत्सारयितव्याः । इत्येतदपरमध्वस(सं)मोहाङ्कनास्थानं कोशकारकस्येति ।[2]

गतमेतत्प्रासङ्गिकं प्रकरणम् । शास्त्र(3)मेवानुवर्तताम् ॥

व्याख्यातमिदं यस्मिन्वस्तुनि यैः क्लेशैर्यदवस्थैर्यः संयुक्तः । इदमिदानीं वक्तव्यम् । यद्वस्त्वप्रहीणं संयुक्तः स तस्मिन्वस्तुनि ? यस्मिन्वा वस्तुनि संयुक्तोऽप्रहीणं तस्य तद्वस्तु ? यत्तावद्वस्त्वप्रहीणं संयुक्तः स तस्मिन्वस्तुनि। स्याद्वस्तुनि संयुक्तो न च तद्वस्त्वप्रहीणं यथा तावद्दर्शनमार्गे ।[3]

यदासंप्राप्तकारित्रः, कृत्यं न करोति, तदाऽनागतोऽभिधीयते । यदा करोति तदा प्रत्युत्पन्नः। यदा तु कृत्यान्निवृत्तः, तदाऽतीत इति विशेषः ।

एतदपि न किंचित् । तेनैवात्मना तस्यैव तदापि सद्भावात् । कारित्रमपि कथं न स्यात् । इति वक्तव्यम् । प्रत्यान्तरापेक्षापि नित्यमवस्थितरूपस्य न संभवति । कारित्रशून्यस्य च वस्तुत्वेऽश्वविषाणादीनामपि तत्त्वप्रसङ्गः । कारित्रं वा कथमतीतमनागतं प्रत्युत्पन्नं चोच्यते । किं तदपरकारित्रसद्भावात् । स्वयमेव वा । पूर्वत्रानवस्थानम् । पाश्चात्ये च धर्मस्यापि स्वयमतीतत्वादिव्यवस्थाया न किञ्चित्क्षूयते । यदि च यथा वर्तमानं द्रव्यतोऽस्ति तथातीतमनागतं चास्ति । तदा नैवम् । स्वभावेन सतो धर्मस्य कथमनुत्पन्नविनष्टस्वभावता ।···तस्मादभूत्वाभवनधर्मतो न संगच्छते कथंचिदध्वत्रययोगः । तत्त्वभ्युपगच्छतो नातीतादिसद्भावः । तदयमत्र संग्रहश्लोकः—'स्वभावः सर्वदा चास्ति···'। *B. Pañjikā*, IX. 143 ab.

[1] **कल्पितः परतन्त्रश्च परिनिष्पन्न एव च ।
त्रयः स्वभावा धीराणां गम्भीरज्ञेयमिष्यते ॥
यत् ख्याति परतन्त्रोऽसौ यथा ख्याति स कल्पितः ।
प्रत्ययाधीनवृत्तित्वात् कल्पनामात्रभावतः ॥
तस्य ख्यातुर्यथाख्यानं या सदाऽविद्यमानता ।
ज्ञेयः स परिनिष्पन्नः स्वभावोऽनन्यथात्वतः ॥** *Triswabhāva-nirdeśa*, 1—3.

[2] V. supra, p. 33; p. 101, n. 4.

[3] Cf. यद्वस्तु प्रहीणं विसंयुक्तः स तस्मिन्वस्तुनि ? यत्र वा विसंयुक्तः प्रहीणं तस्य तद्वस्त्विति । यत्र तावद्विसंयुक्तः प्रहीणं तस्य तद्वस्तु । स्यात्तु प्रहीणं न च तत्र विसंयुक्तस्तद्यथा···। *Akb*. v. 28.—यद्वस्तु प्रहीणमित्यादि । इह **प्रहाणं प्राप्तिविगमात् । विसंयोगस्तदालम्बनक्लेशप्रहाणात् ।** *Sakv*. p. 477.

[325] अन्यसर्वत्रगैर्ब(4)द्धः प्रहीणे दुःखदृक्त्तये ।[१]

दुःखज्ञाने उत्पन्ने समुदयज्ञाने चानुत्पन्ने दुःखदर्शनप्रहातव्यं वस्तु[२] प्रहीणं भवति । तस्मिन्प्रहीणेऽपि समुदयदर्शण(न)प्रहातव्योऽप्रहीणः, तदालम्बनैः सर्वत्रगैः संयुक्तः ।

भावनामार्गेऽपि—

प्रहीणे प्राक्प्रकारेऽपि शेषैस्तदवलम्बिभिः ॥[३]

नवानां प्रकाराणां[४] यो यः प्रकारः पू(5)र्वं प्रहीणस्तस्मिन्प्रहीणेऽपि शेषैस्तदवलम्बिभिः क्लेशैः[५] संयुक्तो विज्ञातव्यः ॥

अथ कस्मिन्वस्तुनि कत्यनुशया अनुशेरते ? अत्र चालम्बननियम एव तावद्दर्शयितव्यः । कतमो धर्मः कतमस्य विज्ञानस्यालम्बन[म्] ? तत एव [त]द्विस्पष्टं गम्यते—अमुष्मिन्वस्तुनि इयन्तोऽनुशया अनुशेरत इति ।[६] तदिदमभिधर्मगह्वरं प्रतार्य(य)ते—

[326] (6)धर्माः षोडष(श) विज्ञेयाः प्रत्येकं त्रिभवात्मकाः ।
पञ्चधा निर्मलाश्चैव विज्ञानानि तथैव च ॥

धर्मास्तावत् कामरूपारूप्यधातुषु प्रत्येकं पञ्चप्रकारा दुःखादिदर्शनहेया अप्रहेयाश्च निर्मला इति षोडश भवन्ति । एवं विज्ञानानि द्रष्टव्यानि ॥

तत्र तावदाभिधार्मिकोऽन्यैः पृष्टः—

[327] धात्वायतनसत्येषु प्रकारेषु च ल(7)त्तयेत् ।
धर्मसंग्रहविज्ञानज्ञानानुशयचोदितः ॥

धर्मसंग्रहविज्ञाने वा पृष्टो धात्वायतनस्कन्धेषु पाद(त)यित्वा लक्षयेत् ।

---

[१] Cf. प्रहीणे दुःखदृग्घेये संयुक्तः शेषसर्वगैः । *Ak.* v. 28 cd.

[२] निकाय: in *Akb.*

[३] Cf. प्राक् प्रहीणे प्रकारे च शेषैस्तद्विषयैर्मलैः । *Ak.* v. 28 cb.

[४] V. supra, p. 165, n. 2.

[५] शेषैस्तद्विषयैर्मलैरिति । प्रहीणप्रकारविषयानुशयैरित्यर्थः । तद्यथाऽधिमात्राधिमात्रे प्रकारे प्रहीणेऽधिमात्रमध्यादिभिः शेषैरप्रहीणैरनुशयैः संयुक्तः । तथा ह्यसावधिमात्राधिमात्रेण प्रहीणेन क्लेशप्रकारेण विसंयुक्तोऽपि स संयुक्त एव तैः शेषैरिति । *Sakv.* p. 478.

[६] Cf. तत्र कतमो धर्मः कस्य चित्तस्यालम्बनमिति ज्ञात्वा अमुष्मिन्नियन्तोऽनुशया अनुशेरत इत्येतदभ्यूहितव्यम् । *Akb.* v. 28.

ज्ञानेषु पृष्टः सत्येषु पातयित्वा लक्षयेत्। अनुशयेषु पृष्टः प्रकारेषु पातयित्वा निर्दे(र्दि)शेत्। एवमसंमूढो व्याकरोतीति ॥

तत्र तावत्। विज्ञानेषु षोडशधर्माश्चोद्यन्ते। कस्य विज्ञा(8)नस्य कतमे धर्मा गोचर[ा] इति ? तदाविष्क्रियते—

[328] सदुःखहेतुदृग्घेयाः कामाप्ता भावनात्त्रयाः।
स्वकत्रयैकरूपाप्तविरजाश्चित्तगोचराः ॥[१]

कामावचराः खलु दुःखसमुदयदर्शनभावनाप्रहातव्या धर्माः प्रत्येकं पञ्चानां विज्ञानानां गोचरीभवन्ति। कतमेषां पञ्चानाम् ? स्वेषां[२] त्रयाणां कामावचर(9)स्य दुःखदर्शण(न)प्रहातव्यस्य विज्ञानस्यालम्बनम्। समुदयदर्शण(न)प्रहातव्यस्य सर्वत्रगसंप्रयुक्तस्य। भावनाप्रहातव्यस्य कुशलस्य। एकस्य च रूपाप्तस्य भावनाप्रहातव्यस्य कुशलस्यानास्रवस्य चेति। एवं समुदयदर्शण(न)भावनाप्रहातव्यावपि वक्तव्यौ ॥

एत एव त्रयो धर्माः

[329] आत्मीयाधस्त्रयैकोर्ध्वनिर्मलानां तु [VI. A, 2. Fol. 112 b.]
(1)रूपजाः।[3]

रूपावचरो हि दुःखदर्श[न]प्रहातव्यो धर्मः अष्टानां विज्ञानानामालम्बनम्। स्वकत्रयस्याधरत्रयस्योर्ध्वैकस्यामलस्य च। स्वधातुकस्य त्रयस्य पूर्ववत्। अधरधातुकस्य तु कामावचरयोर्दुःखसमुदयदर्शण(न)प्रहातव्यविसभागधात्वालम्बनयोः। भावनाप्रहातव्यस्य च कुशलस्य ऊर्ध्वैकस्यारूप्यावचर(2)स्य[४] भावनाप्रहातव्यस्य कुशलस्यानास्रवस्य[५] च। एवं समुदयदर्शनभावनाप्रहातव्यौ वाच्यौ।

आरूप्याप्तास्त्रिधात्वाप्तत्रिकनिर्मलगोचराः ॥[६]

---

[१] Cf. दुःखहेतुदृगभ्यासप्रहेयाः कामधातुजाः।
स्वकत्रयैकरूपाप्तामलविज्ञानगोचराः ॥ *Ak.* v. 29.

[२] स्वधातुकानाम् in *Akb.* v. 29. See *Sakv.* p. 479.

[3] Cf. स्वकाधरत्रयोर्ध्वैकामलानां रूपधातुजाः। *Ak.* v. 30 ab.

[४] आकाशानन्त्यायतनसामन्तकसंगृहीतस्य। *Sakv.* p. 479.

[५] अनास्रवस्य चान्वयज्ञानपक्षस्येति। *Ibid.*

[६] Cf. आरूप्यजास्त्रिधात्वाप्तत्रयानास्रवगोचराः। *Ak.* v. 30 cd.

आरूप्यावचरास्त एव त्रयो धर्माः, दशानां विज्ञानानामालम्बनम् । त्रैधातुकानां प्रत्येकं त्रयाणाम्, एषामेवानास्रवस्य च । इत्येवं त्ता(ता)वत् त्रैधातुकाः दुःखसमुदयदर्शण(न)हेया (3)भावनाहेयाश्च धर्मा उक्ताः ॥

[330] सर्वे स्वाधिकविज्ञेयाः समनिर्याणदृक्त्तयाः ।[१]

सर्व एव त्रैधातुकाः निरोधमार्गदर्शनहेयाः स्वनैकायिकाधिकश्चि(चि)त्त गोचरा विज्ञातव्याः ।[२] कामावचरो हि निरोधदर्शण(न)प्रहातव्यो धर्मो दुःखदर्शनप्रहातव्यादिवत् पञ्चानां विज्ञानानामालम्बनम् । स्वनैकायिकस्य चानिरोधदर्शनप्रहात(4)व्यस्येति षण्णाम् । एवं मार्गदर्शण(न)प्रहातव्योऽपि वेदितव्यः । रूपावचरौ निरोधमार्गदर्शण(न)प्रहातव्यौ पूर्ववदष्टाणां(नां) विज्ञानानां प्रत्येकमालम्बनं स्वनैकायिकस्य चाधिकस्येति नवानाम् । एवमारूप्यावचरौ पूर्ववद्दशानां स्वनैकायिकस्य चाधिकस्येत्येकादशानामालम्बनं भवतः । उक्ताः पञ्चदशधर्माः ।[3]

निष्क्लेशा(5)स्त्रिभवाप्तान्त्यत्रयनिर्मलगोचराः ॥[४]

त्रैधातुकानां पञ्चानां प्रकाराणां प्रत्येकं येऽन्त्यास्त्रयः प्रकारा णि(नि)रोधमार्गदर्शण(न)भावनाहेयाख्याः, तेषां नवानामनास्रवस्य चेति । एवमनास्रवा धर्मा दशानां विज्ञानानामालम्बनं भवन्ति ॥[५]

पुनरप्येष एवार्थपिण्डः श्लोकेनावद्योत्यते—

[331] कामाप्त(प्तं) पञ्चविषयो रूपाप्तं त्वष्टगोचरः ।
(6)आरूप्याप्तं दशानां तु दशानामेव चामलम् ॥

---

[१] Cf. निरोधमार्गदृग्घेयाः सर्वे स्वाधिकगोचराः । *Ak.* v. 31 ab.

[२] Cf. निरोधमार्गदर्शनहेयानां स्वं चित्तं निरोधमार्गदर्शनहेयमेव तस्याधिकस्य ते धर्मा आलम्बनं ज्ञेयाः ।··· *Akb.* v. 31 ab.

[3] See *Sakv.* p. 480.

[४] Cf. अनास्रवास्त्रिधात्वन्त्यत्रयानास्रवगोचराः । *Ak.* v. 31 cd.

[५] अनास्रवा इति निरोधादयः । त्रिषु धातुषु यान्यन्त्यानि त्रयाणि निरोधमार्गदर्शनभावनाप्रहातव्यलक्षणानि । तेषां यथायोगमनास्रवस्य च गोचरः । कथम् ? प्रतिसंख्यानिरोधार्यमार्गौ तावत्तदालम्बनानां मिथ्यादृष्टिविचिकित्साऽविद्यासम्प्रयुक्तानां भावनाप्रहातव्यानामनास्रवस्य च धर्मज्ञानान्वयज्ञानपक्षस्य यथायोगमालम्बनम् । आकाशाप्रतिसंख्यानिरोधौ तु भावनाप्रहातव्यस्यैवाक्लिष्टस्य चित्तस्यालम्बनमिति वेदितव्यम् । आचार्यगुणमतिवसुमित्रौ तु व्याचक्षाते—आकाशाप्रतिसंख्यानिरोधौ भावनाप्रहातव्यस्य क्लिष्टाक्लिष्टस्यालम्बनमिति । तदयुक्तम् ।···अतो न क्लिष्टचित्तस्य भावनालम्बनमिति सिद्धान्तः । *Sakv.* p.481.

दुःखसमुदयदर्शण(न)भावनाहेयानुशयसंप्रयुक्तं विज्ञानं त्रैधातुकमनास्रवं च पञ्चाष्टदशदशविज्ञानगोचरम्। एवमेषां षोडशानां धर्माणामेतानि षोडशचित्तानि त्रैधातुकानि पञ्चप्रकाराण्य(ण्य)नास्रवं च व्यवस्थाप्यानुशयकार्यं योजयितव्यम्।[१]

तत्र तावत्कामा(7)वचरदुःखदर्शनप्रहातव्या धर्मा दशानुशयाः, तत्संप्रयुक्ताश्च चित्तचैतसिका धर्माः सलक्षणानुलक्षणः(णाः) अप्राप्तिप्राप्तिप्राप्तयः। एते धर्मा विषयः पञ्चानां विज्ञानानाम्, दुःखदर्शनप्रहातव्यस्य सर्वस्य विज्ञानस्य, समुदयदर्शण(न)हेयस्य सर्वत्रगसंप्रयुक्तस्य, भावनाहेयस्य कुशलस्याक्लिष्टस्य, द्विविधस्य (8)कुशलसास्रवस्याव्याकृतस्य च, रूपावचरस्याक्लिष्टस्य कुशलसास्रवस्य, अक्लिष्टस्याव्याकृतस्य च कुशलस्योष्मगतादिविमोक्षाप्रहा(मा)णादिसंप्रयुक्तस्य। अव्याकृतस्य तु विपाकजस्य मनोभौमस्य सुखसौमनस्योपेक्षासंप्रयुक्तस्यानास्रवस्य च दुःखधर्मज्ञानसमुदयधर्मज्ञानतत्क्षान्तिसंप्रयुक्तस्य विज्ञा(9)नस्य ॥[१]

तत्रानास्रवे विज्ञाने न केचिदनुशया अनुशेरते। सास्रवे तु तत्र तावत्—

[332] कामाप्तमूर्ध्वधर्मार्थे विज्ञाने स्वभुवस्त्रयः।
रूपाप्ता भावनाहेयाः सर्वगाश्चानुशेरते ॥

कामाप्तदुःखदर्शण(न)प्रहातव्ये विज्ञाने कामावचरा दुःखसमुदयभावनाहेयाः सर्वेऽनुशेरते। रूपावचरे त्वक्लिष्टे कामावचरधर्म[VI. B, 3. Fol. 113a] (1)गोचरा एव रूपावचराः सर्वत्रगाः, भावनाहेयाश्चानुशेरते ॥

[333] चत्वारः परिवृत्ते स्वे रूपाप्ताः खल्वपि त्रयः।
आरूप्यावचराः सार्धं सर्वगैर्भावनात्त्रयाः ॥

परिवृत्ते तु खल्वालम्बनालम्बने विज्ञान इत्यर्थः। पूर्वकाः कामावचररूपावचरा यथोक्ताः। [केना]धिकीभवन्ति ? कामावचरस्तावच(च्च)तुर्थो निकायो मार्गदर्श(2)नप्रहातव्यः। कथं कृत्वा ? यत्तद्दुःखसमुदयज्ञानं तत्क्षान्तिसंप्रयुक्तं विज्ञानं कामावचरदुःखदर्शण(न)हेयधर्मालम्बनम्। तत्खल्वालम्बनं मार्गदर्शण(न)हेयमिथ्यादृष्टिविचिकित्साऽविद्यासंप्रयुक्तस्य विज्ञानस्य।

---

[१] Cf. एवमेषां षोडशानां चित्तानां षोडशधर्मालम्बनव्यवस्थां विदित्वा कथमनुशयकार्यं योजयितव्यम् ? दिङ्मात्रं दर्शयिष्यामः।··· *Akb*. v. 31 cd. See *Sakv*. pp. 481-3.

The *Akb*. is very brief. The *Adv*. deals with this topic in detail (*kārikās* 331-346).

तस्मिन्विज्ञाने ते[ऽ]नास्रवालम्बनाः संप्रयोगतोऽनुशेरते । सास्रवालम्बनाः आलम्बनतः । एवं कामाव(3)चराश्चत्वारो निकाया भवन्ति ।

रूपावचरे विज्ञाने सर्वत्रगसंप्रयुक्ते त्वसर्वत्रगालम्बते (?)। एवं रूपावचरास्त्रि(स्त्र)यो निकाया भवन्ति । तस्य तु चतुर्थध्यानभौमस्याक्लिष्टस्य विज्ञानस्य कामधात्वालम्बनस्योष्मगतविमोक्षाप्रमाना(णा)शुभादिसंप्रयुक्तस्योपेक्षोपविचारसंप्रयुक्तस्य विज्ञानस्यालम्बनम् । तत्पुनराकाशा(4)नन्त्यायतनसामन्तकेन कुशलेनालम्ब्यते । अतस्तत्रारूप्याः सर्वत्रगा भावनाहेयाश्चानुशेरते । उक्तं दुःखदर्शनप्रहातव्यम् ॥

[334] तद्वदेव द्वितीयेऽपि पञ्चमेऽपि तथैव च ।

एवं समुदयदर्शनभावनाप्रहातव्ययोरपि विज्ञानयोर्यथोक्तयोर्द्रष्टव्यम् । अयं तु विशेषः । दुःखे दुःखदर्शण(न)हेयाः सर्वे, समुदयसर्वत्र(5)गाश्च । समुदये तु समुदयदर्शनहेयाः सर्वे, दुःखदर्शनहेयाश्च सर्वत्रगाः । अन्यत्सर्वं समानम् ।

सास्रवालम्बनाः स्वे च तृतीयेऽप्यनुशेरते ॥

निरोधदर्शनप्रहातव्यं तृतीयं विज्ञानम् । तत्राप्येते च त्रयो निरोधदर्शनहेयाश्च सास्रवालम्बनाः ॥

[335] परिवृत्ते तु कामाप्ताः संस्कृतार्थावलम्बिनः ।

परिवृत्ते तु (6)विज्ञाने कामावचराश्चत्वारो णि(नि)कायाः, निरोधदर्शण(न)हेयालम्बनाश्च सास्रवालम्बनाः । ये ह्यणा(ना)स्रवालम्बनास्ते निर्वाना(णा)लम्बने विज्ञानेऽनुशेरते, न विज्ञानालम्बने ।

शेषं पूर्ववदाख्येयम्

पूर्वं चत्वारो णि(नि)कायाः, दुःखसमुदयमार्गभावनाहेयाश्चानुशेरत इत्यर्थः ।

चतुर्थेऽपि तृतीयवत् ॥

चतुर्थेऽपि (7)खलु मार्गदर्शनहेये विज्ञाने कामावचरास्त्रयो मार्गदर्शण(न)हेयाश्च सास्रवालम्बना रूपावचराः सर्वत्रगा भावनाहेयाश्च ॥

[336] परिवृत्ते तु कामाप्ताश्चत्वारोऽन्यत्र पूर्ववत् ।

परिवृत्ते तु खलु विज्ञाने कामावचराश्चत्वारो णि(नि)रोधदर्शण(न)हेयं

मुक्त्वा । रूपावचरास्त्रयो दुःखसमुदयदर्शनभावनाहे(8)याः । आरूप्याः सर्वत्रगाः भावनाहेयाश्च । समाप्तं कामावचरं विज्ञानम् ॥

रूपाप्ते प्रथमेऽधस्तात् त्रयः स्वे खल्वपि त्रयः ॥
[337] आरूप्याः सर्वगाः सार्धं भावनापथसंत्तयै[ः] ।

रूपावचरे प्रथमे खलु विज्ञाने कामावचरास्त्रयो दुःखसमुदयविसभागधात्वालम्बनाः संप्रयोगतः । असर्वत्रगास्त्वालम्बनतो (9)भावनाहेयाश्च स्वे च त्रयः । एत एवारूप्याः सर्वत्रगा भावनाहेयाश्च ।

परिवृत्ते त्रयोऽधस्तात्

दुःखसमुदयदर्शण(न)भावनाहेयाः ।

चत्वारश्च स्वधातुतः ॥

मार्गदर्शण(न)हेयाश्च दुःखसमुदयान्वयज्ञानक्षान्तिसंप्रयुक्ते विज्ञाने ॥

[338] आरूप्याप्ताश्च चत्वारो णि(नि)काया अनुशेरते ।

दुःखसमुदययोः [VI. A, 30 Fol. 113 b.] (1)मार्गदर्शण(न)मिथ्यादि(दृ)ष्ट्यादिसंप्रयुक्तचित्तालम्बनत्वात् ।

तद्वदेव द्वितीयेऽपि पञ्चमेऽपि तथैव च ॥

द्वितीयेऽपि खलु कामावचररूपावचरास्त्रयो दुःखसमुदयभावनाहेयाः । आरूप्याः सर्वगा भावनाहेयाश्च ॥

[339] सास्रवालम्बनाः स्वे च तृतीयेऽप्यनु[शेर]ते ।

यथा निर्दिष्ट इति ।

परिवृत्ते तु रूपाप्ताः संस्कृतार्थाव(2)लम्बिनः ॥

निरोधदर्शनहेया असंस्कृतालम्बनान् मुक्त्वा ॥

[340] अन्यत्तु पूर्ववज्ज्ञेयं चतुर्थेऽपि तृतीयवत् ।

कामावचराः त्रयो दुःखसमुदयभावनाहेयाख्याः, आरूप्यावचराश्चत्वारः, निरोधाख्यं मुक्त्वा । 'चतुर्थेऽपि' मार्गदर्शण(न)हेये 'तृतीयवत्' द्रष्टव्यम् । यथा तृतीये सास्रवालम्बनाः स्वनैकायिका अधिकीभवन्ति, (3)तथा चतुर्थेऽपि स्वे सास्रवालम्बना अधिकीभवन्ति ।

तृतीयवत्परावृत्ते

चत्वारो दुःखसमुदयमार्गदर्शनभावनाहेयाख्याः रूपावचराः, कामावचरास्त्रयः, आरूप्यावचराश्चत्वारो निरोधदर्शनहेयं(यं) मुक्त्वा। मार्गाच्च त्रयः। समाप्तं रूपावचरम्।

आरूप्याद्ये निबोधये[त्] ॥

[341] स्वे त्रयः कामधात्वाप्ता रूपाप्ताश्च त्रयस्त्रयः।

(4)स्वे त्रयो दुःखसमुदयदर्शण(न)भावनाहेयाः कामाप्ताः एत एव। रूपाप्ताश्च एत एव त्रयः।

रूपाप्तवत्परावृत्ते द्वितीये पञ्चमे तथा ॥

परावृत्तेऽपि त्रयो णि(नि)रोधमार्गदर्शनहेयौ हित्वा। रूप्यारूप्याश्चत्वारो निरोधदर्शनहेयं मुक्त्वा ॥

यथा प्रथमे द्वितीये पञ्चमे च,

[342] तृतीये खल्वपि स्वे च सास्रवार्थावलम्बिनः।

तृतीये(5)ऽपि खल्वेत एव 'स्वे च सास्रवार्थावलम्बिनः'।

परावृत्ते स्वधात्वाप्ताः संस्कृतार्थावलम्बिनः ॥

परावृत्ते खलु सर्वेऽऽरूप्यावचरा असंस्कृतालम्बनान्मुक्त्वा ॥

[343] अन्यत्त्वाद्यवदाख्येयं चतुर्थेऽपि तृतीयवत्।

कामावचररूपावचराः पूर्ववदाख्यातव्याः। 'चतुर्थेऽपि तृतीयवत्।' स्वे सास्रवालम्बनास्त्वत्राधिकी भवन्ति।

(6)आद्यवत्तु परावृत्तो विज्ञाने निर्दिशेद् बुधः ॥

परावृत्ते खलु विज्ञाने आद्यवत्कामावचरास्त्रयः, निरोधमार्गदृग्घेयौ हित्वा। रूपावचराश्चत्वारः, निरोधदर्शनहेयं मुक्त्वा। अप्रहातव्यधर्मालम्बने विज्ञाने निरोधमार्गदर्शनहेयानास्रवालम्बनसंप्रयुक्तम्(क्ते)। तत्र त्रैधातुकास्त्रयोऽनुशेरते। आलम्बनालम्बनं तु दुः(7)खसमुदयमार्गदर्शनभावनाहेयेन निकायेनालम्बते। निरोधदर्शनहेयेण(न) च सास्रवालम्बनेनालम्ब्यते। तत्र संस्कृतालम्बनाश्चत्वारो निकायाः, निरोधालम्बनं मुक्त्वा। ते हि निर्वाणालम्बने विज्ञाने नाऽनुशेरते, विज्ञानालम्बने तु ॥

समाप्तानि षोडशचित्तानि । तेषु चानुशयनिर्देशः कृतः । अधुना चक्षु(8)रिन्द्रियादीनां वक्तव्यः ।[१] सोऽयमुपदिश्यते—

[344] भावनापथहातव्यो निकायः सर्वगैः सह ।
अनुशेते द्विधात्वाप्तो व्यारूप्याश्चक्षुरिन्द्रिये ॥

चक्षुरिन्द्रिये खलु भावनाहेयाः सर्वत्रगाश्चानुशयाः कामावचररूपावचरा अनुशेरते । एवं यावत्कायेन्द्रिये चक्षुर्धातौ रूपधातौ चक्षुर्विज्ञानधातौ यावद्विस्तरेण (9)कायविज्ञानधातौ यावद्रूपस्कन्धे वाच्यम् ॥

अधुना चक्षुरिन्द्रियालम्बने विज्ञाने वक्तव्याः—

[345] निकायाः कामरूपाप्ताश्चक्षुरिन्द्रियगोचरे ।
दुःखहेतुदृगभ्यासप्रहातव्यास्त्रयस्त्रयः ॥

[346] आरूप्या भावनाहेयाः सर्वगाश्चानुशेरते ।

चक्षुरिन्द्रियालम्बने खलु विज्ञाने कामावचररूपावचराः दुःखसमुदयद[VI. B, 6. Fol. 114 a](1)र्शनभावनाप्रहातव्याः, आरूप्यावचराश्च भावनाप्रहातव्याः, सर्वत्रगाश्चानुशेरते ।

परिवृत्ते तु चत्वारः समदृक्त्रयवर्जिताः ॥

चक्षुरिन्द्रियालम्बनालम्बने तु विज्ञाने चत्वारो णि(नि)काया अनुशेरते । निरोधदर्शनहेयं हित्वा । तद्धि चक्षुरिन्द्रियालम्बनं विज्ञानं सर्वत्र संप्रयुक्तम् । तदप्यालम्बनं सर्वत्रगाणाम् । एवं त्रयः (2)परावृत्ते ।

द्विष्परावृत्ते तु चक्षुरिन्द्रियं खल्वालम्बनं दुःखसमुदयधर्मज्ञानक्षान्तिसंप्रयुक्तस्य चित्तस्य । तत्पुनरालम्बनं कामावचरमार्गदर्शनप्रहातव्यम् । मिथ्यादृष्टिविचिकित्साऽविद्या[त]त्संप्रयुक्तानां विज्ञानानाम् । तेषु विज्ञानेष्वनास्रवालम्बनाः संप्रयोगतः, सास्रवालम्बनास्त्वालम्बनतोऽनुशेरते । एवं चतुर्थो नि(3)कायो वर्धते मार्गदर्शनहेयः । तदेवं सति कामावचराश्चत्वारः, आरूप्यावचराश्चत्वारः, सर्वेऽभिसमस्य त्रैधातुकाश्चत्वारो भवन्ति ।

आकाशानन्त्यायतनस्य खलु कुशलस्य चक्षुरिन्द्रियमालम्बनम् । तत्रारूप्याः सर्वत्रगा भावनाहेयाश्चानुशेरते । तत्रापि सर्वत्रगसंप्रयुक्ते चेतसि असर्वत्रगा वर्धन्त इति त्रयो (4)भवन्ति । दुःखसमुदयालम्बनज्ञानक्षान्तिसंप्रयुक्तस्य च विज्ञानस्य चक्षुरिन्द्रियमालम्बनम् । तदारूप्यमार्गदर्शनप्रहातव्यस्य मिथ्यादृष्ट्यादिसंप्रयुक्तस्य विज्ञानस्यालम्बनम् । तत्र तेऽनास्रवालम्बनाः संप्रयोगतः, सास्रवालम्बनाः आलम्बनतः । एवमारूप्यावचरा अपि चत्वारो निकाया भवन्तीति ॥

---

[१] The *Akb.* has not discussed this. Only the *sukhendriya* is explained as an illustration. See *Sakv.* pp. 483—4.

[347] दुःखेन्द्रिये[१] तु का(5)माप्ताः स्वैरेव सह सर्वगैः ।
तद्गोचरे तु विज्ञाने निकाया अनुशेरते ॥

[348] कामापन्नास्त्रयो रूपा[ः] सर्वगाभ्याससंह्वयाः ।
परवृत्ते तु चत्वारः कामाप्ता अनुशेरते ॥

[349] त्रयो रूपभवादन्त्याद्भावनाहेयसर्वगाः ।
सकला द्विषपरावृत्तेश्चत्वारश्चानुशेरते ॥

[350] सुखेन्द्रिये तदालम्बे चित्ते तद्गोचरेऽपि च ।
कामाद्याप्ताः (6)यथायोगं सर्वगाश्चानुशेरते ॥[२]

तत्र तावत् । [३]सुखेन्द्रियं सप्तविधम् । कामावचरं भावनाप्रहातव्यम्, रूपावचरं पञ्चप्रकारम्, अनास्रवं चेति । तदेतत्समासतो द्वादशविधस्य विज्ञानस्यालम्बनं भवति । कामावचरस्य चतुष्प्रकारस्य[४] अन्यत्र निरोधदर्शनहेयात्[५], रूपावचरस्य पञ्चप्रकारस्य,[६] आरूप्यावचरस्य द्वि(7)प्रकारस्य मार्गदर्शनभावनाहेयस्य [अ]नास्रवस्य च । इदं द्वादशविधं सुखेन्द्रियालम्बनं विज्ञानम् । तत्र यथायोगं कामावचराश्चत्वारो निकायाः रूपावचराः संस्कृतावलम्बनाः, आरूप्यावचरौ द्वौ निकायौ, सर्वत्रगाश्चानुशया अनुशेरत इति ।[३]

[७]तत्पुनः सुखेन्द्रियालम्बनं विज्ञानं यस्य चित्तस्यालम्बनं तच्चित्तं सुखेन्द्रिया(8)लम्बनालम्बनम् । तस्मिन् कत्यनुशयाऽनुशेरते ? तत्खलु सुखे-

---

[१] See *Sakv.* pp. 483-4.

[२] The *Akb.* gives only this as an illustration :···दिङ्मात्रं दर्शयिष्यामः । सुखेन्द्रियालम्बने विज्ञाने कत्यनुशया अनुशेरत इति प्रश्न आगते विचारयितव्यम् । सुखेन्द्रियं सप्तविधम् ।···

[३=३] From सुखेन्द्रियं सप्तविधम् to अनुशेरत इति is identical with *Akb.* v. 31 cd.

[४] कामावचरस्य चतुःप्रकारस्य इति । दुःखसमुदयमार्गदर्शनभावनाप्रहेयस्य ।··· *Sakv.* p. 481.

[५] न तु निरोधदर्शनहेयस्य चित्तस्य । तत्र मिथ्यादृष्टयादीनां निरोधालम्बनत्वात् । दृष्टिपरामर्शादीनां च स्वनिकायालम्बनत्वात् । तत्र च सुखेन्द्रियाभावात् । तेनोच्यते—अन्यत्र निरोधदर्शनहेयादिति । *Ibid.* p. 482.

[६] रूपावचरस्य पञ्चप्रकारस्येति । यस्मात् तृतीयध्यानसंगृहीतं पञ्चप्रकारं सुखेन्द्रियं भवति । *Ibid.*

[७] Cf. सुखेन्द्रियालम्बनालम्बने विज्ञाने कत्यनुशया अनुशेरते ? तत् पुनः··· *Akb.* v. 31 cd.

न्द्रियालम्बनं द्वादशविधं चित्तं कतमस्य विज्ञानस्यालम्बनम् ? [१]तस्यैव च द्वादशविधस्यारूप्यावचरस्य च भूयो द्विप्रकारस्य दुःखसमुदय[दर्शन] [२]प्रहातव्यस्य। इदं चतुर्दशविधं सुखेन्द्रियालम्बनं[३] विज्ञानम्। तत्रारूप्यावचरौ दुःखसमुदयदर्शन(9)हेयौ वर्धयित्वा कामावचरा आरूप्यावचराश्च चत्वारो निकायाः, रूपावचराश्च संस्कृतालम्बना अनुशयाऽनुशेरत इति[१] 'यथायोग'-वचनात्, 'अपि'शब्दाच्च द्रष्टव्यम् ॥[४]

[351] त्रिधातुसंगृहीतास्तु सकला मनइन्द्रिये।
तदालम्बिनि विज्ञाने सर्वसंस्कृतगोचराः ॥

मनइन्द्रिये खलु सर्वत्रैधातुकाः येऽपि [VI. A. 6. Fol. 114 b.](1)ते निर्वाणालम्बनास्तेऽपि संप्रयोगतः। मनइन्द्रियालम्बनं खलु विज्ञानं संस्कृतालम्बनम्। अतस्तत्रा(त्र) संस्कृतालम्बनास्तेऽनुशया अनुशेरते।

[352] संस्कृतालम्बना एव परिवृत्तेऽनुशेरते।
विशेषो द्विःपरावृत्तौ विद्यतेऽत्र न कश्चन ॥

पूर्वनीत्य(त्या) वाऽत्र परिवृत्ते[ऽनुश]यकार्यं बोद्धव्यम्। द्विष्परावृत्तेऽप्यत्र न कश्चिद्विशेष इति द्र(2)ष्टव्यम् ॥

अधुना षोडशानां चित्तानां कस्य चित्तस्य समनन्तरं कति चित्तान्युत्पद्यन्त इत्युपदिश्यन्ते(ते)।[५]

[353] दुःखं दर्शनहेयादेश्चित्ताच्चित्तानि कामिनः।
भवत्यनन्तरं षड् वा तस्योर्ध्वं पञ्च पञ्च वा ॥

कामधातूपपन्नस्य दुःखदर्शनहेयादेश्चित्तादनन्तरं स्वभूमिकानि पञ्च, षष्ठं च भावनाप्रहातव्यं प्रथमध्यानसामन्तकात्। (3)स यदा कामधातौ(तो)श्च्युत्वा रूपधातावुपपद्यते तस्य तत्रत्यानि पञ्च भवन्ति। एवमारूप्येषूपपद्यमानस्यारूप्यानि(णि) पञ्च भवन्तीति ॥

[354] रूपधातूपपन्नस्य चित्तानि तु विनिर्दिशेत्।
एकं वा पञ्च वा षड् वा सप्त वा यदि वा दश ॥

[१-१] From तस्यैव च to अनुशेरत इति is identical with *Akb.* v. 31 cd.

[२] …दर्शनप्रहातव्यस्य in *Akb. Ibid.*

[३] सुखेन्द्रियालम्बनालम्बनं *Ibid.*

[४] The *Akb.* does not discuss further :—अनया वर्त्तन्याऽन्यदप्यनुगन्तव्यम्। *Ibid.*

[५] This topic is not discussed in *Akb.*

तत्र 'एकम्' वीतरागस्योपरिसामन्तकाद्भावनामयम् । 'षड्' वीतरागस्य कामावचरं भावना(4)प्रहातव्यं निर्माणचित्तं प्रथमध्यानफलम् । 'पञ्च' स्वभौमानि । 'सप्त वा' उपरिसामन्तकाद्भावनाप्रहातव्यं कुशलं सास्रवम् । 'दश वा' रूपेभ्यः प्रच्युतस्य कामरूपेषूपपद्यमानस्येति ॥

[355] आरूप्यधातुजातस्य चित्तानीमानि लक्षयेत् ।
स्वधातुकानि पञ्चैव च्युतिकाले दशान्यतः ॥

रूपकामेषूपपद्यमानस्य तत्रत्यानि द(5)श भवन्ति । स्वानि पञ्च पञ्चान्यतः । गतमेतत् ॥

इदानीं वक्तव्यम् । अथ यदिदं सानुशयं चित्तमुक्तं तत्कथम् ? इत्यत्राभिधीयते—

[356] साचिव्यादनुशायित्वाच्चित्तं सानुशयं मतम् ।
द्विधा वा क्लिष्टमक्लिष्टमेकधैवापदिश्यते ॥[१]

द्वाभ्यां खलु प्रकाराभ्यां चित्तं सानुशयमुच्यते । साचिव्यभावेनानुशायित्वेन च । तत्र क्लिष्टं द्वाभ्यां का(6)रणाभ्यां सानुशयं यदप्रहीन(ण)क्लेशम् । अक्लिष्टं पुनरेकधा साचिव्यभावनैवेति । तत्र क्लिष्टं चित्तमनुशयैः संप्रयुक्तैरप्रहीणैः सानुशयं तदालम्बनैश्चाप्रहीणैः ।

कथमिह योऽनुशयो येन चित्तेन संप्रयुक्तः स खल्वप्रहीन(ण)स्तस्मिंश्चित्तेऽनुशेते ?[२] यावद्धि तदनुशयानुप्राप्तिविशेषेण सा चित्तसन्तति(7)रवष्टब्धा चाधिष्ठिता च भवति, निष्यन्दफलस्य चानागतस्य तस्यां चित्तसन्ततौ सभागहेतुरुत्पत्तये कृतास्पदो भवति, तावदसावनुशयस्तस्मिंश्चेतस्यनुशेत इत्युच्यते । तस्य पुनः क्लेशाशीविषस्य प्राप्तिद्रंष्ट्रावभङ्गे कृते विद्यमानोऽपि सन् क्लेशस्तस्मिंश्चेतस्यनर्थानुत्पादनात् सन्नपि संप्रयोगतः ना(8)नुशेत इत्यु-

---

[१] Cf. द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः । *Ak.* v. 32 ab.

क्लिष्टं चित्तमनुशयानैरनुशयैः सानुशयं तत्संप्रयुक्ततदालम्बनैरप्रहीणैरननुशयानैश्च तत्संप्रयुक्तैः प्रहीणैस्तत्सहितत्वात् । अक्लिष्टं तु चित्तमनुशयानैरेव तदालम्बनैरप्रहीणैरिति । *Akb.* v. 32 ab.

अनुशयानैरननुशयानैश्चानुशयैः सानुशयं क्लिष्टमित्यर्थः । तत्सहितत्वात् सदावस्थितत्वात् । अक्लिष्टं चित्तमनुशयानैरेव सानुशयं विवेचयितुं शक्यत्वात् । *Sakv.* p. 484.

This topic is dealt with in detail in *Adv.* The *Akb.* is very brief.

[२] Cf. यैरनुशयैर्यच्चित्तं सानुशयं तेऽनुशयास्तस्मिश्चित्तेऽनुशेरते ? स्युरनुशेरते । येऽनुशयास्तेन चित्तेन संप्रयुक्ता अप्रहीणास्तदालम्बनाश्चाप्रहीणाः ? स्युर्नानुशेरते । येऽनुशयास्तेन चित्तेन संप्रयुक्ताः प्रहीणास्तदालम्बनाश्च । तदेवं कृत्वा भवति—

द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः । *Akb.* v. 32 ab.

च्यते। नित्यं च तदालम्बनतो कारित्राकरणात्, तस्मिन्नालम्बने मार्गविदूषणाकारदूषिते आलम्बनतोऽपि नानुशेत इत्युच्यते। न तु कदाचिन्मुञ्जेशीकावदुद्धृत्य शक्यते तस्मात् क्लेशः चित्तात्पृथक्कर्तुं निर्नाशयितुं वा स्वालम्बनाद्वा विमुखीकर्तुम्। उक्तं हि—“यो धर्मो यस्य धर्मस्यालम्बनं कदाचित्स धर्मस्तस्य धर्मस्य नालम्बनम्? आह—न कदाचित्”[1] इति। अतस्तच्चित्तं सहायभावेन सानुशयं सहायभावस्यापरित्यागात्। न त्वनुशयभावेन सानुशयं तत्रानर्थानुत्पादनात्।

कतरत्पुनश्चित्तं सानुशयम्?[2] त्रैधातुकं प्रत्येकं पञ्चप्रकारम्। पुनः प्रत्येकं द्विधा भिद्यते। सर्वत्रगासर्वत्रगसास्रवा[VI. B, 7. Fol. 115 a.](1)नास्रवालम्बना(न)क्लिष्टाक्लिष्टभेदैः।

तत्र दुःखदर्शनप्रहातव्यं सत्कायदृष्टिसंप्रयुक्तम्। तया च सत्कायदृष्ट्या तत्संप्रयुक्तया चाविद्यया सहायभावेन चानुशयाने च सानुशयम्। शेषैः स्वनिकायिकैः समुदयदर्शनप्रहातव्यैश्च सर्वत्रगैरनुशयभावेनैव। शेषैर्नोभयथा। एवं सर्वैः दुःखदर्शनप्रहात(2)व्यैः समुदयदर्शण(न)प्रहातव्यैश्च संप्रयुक्तं चित्तं यथायोगमभ्यूहितव्यम्।

निरोधदर्शण(न)प्रहातव्यं मिथ्यादृष्टिसंप्रयुक्तम्। तयैव तत्संप्रयुक्तया चाविद्ययोभयथा। शेषैः स्वानिकायिकसास्रवालम्बनैः सर्वत्रगैश्चानुशयभावेनैव। स्वानिकायिकानास्रवालम्बनैस्तदन्यैश्च नोभयथा। एवमन्यै(3)र्णि(र्नि)रोधदर्शनप्रहातव्यैः मार्गदर्शनप्रहातव्यैश्च यथासंभवं वक्तव्यम्।

भावनाप्रहातव्यं रागसंप्रयुक्तम्। तेनैव तत्संप्रयुक्तया चाविद्ययोभयथा। शेषैर्भावनाप्रहातव्यैः सर्वत्रगैश्चानुशयैर्भावनैर्वा। अन्यैर्नोभयथा। एवमन्यद्भावनाहेयसंप्रयुक्तमपि यथायोगं वाच्यम्।

अक्लिष्टन्तु स्वानिकायिकैः स(4)र्वत्रगैश्चानुशया(य)भावेनैव सानुशयमिति॥

कः पुनरेषामनुष(श)यानां प्रवृत्त्यनुक्रमः? तदुच्यते। मोहस्तावत् सर्वक्लेशाग्रणी, तस्मात्क्लेशपुरोयायिनः।

[357] मोहात्सत्कायदृक्तस्या अनुग्राहेक्षणं ततः।
काङ्क्षामिथ्येक्षणं तस्याः शीलामर्शस्ततो दृशः॥[3]

---

[1] Quoted in *Akb.* II. 62 c. See *LVPAk.* II. p. 307.

[2] V. supra, p. 221.

[3] Cf. मोहकाङ्क्षा ततो मिथ्यादृष्टिः सत्कायदृक्ततः।
ततोऽन्तग्रहणं तस्माच्छीलामर्शस्ततो दृशः॥ *Ak.* v. 32 cd, 33 ab.

[358] रागः सु(स्व)दृशि मानश्च द्वेषोऽन्यत्र प्रतायते ।
(5)ज्ञेयः प्रवृत्तिबाहुल्यादेवमेषामनुक्रमः ॥[१]

इह तावद् बालस्य पञ्चोपादानस्कन्धात्मके दुःखे संमुग्धस्य फलभूता[न्] पञ्चोपादानस्कन्धानजानतः सत्कायदृष्टिरुपजायते। सत्त्ववी(बी)जपुद्गलात्मग्राहयोगेन। ततोऽस्य तच्छाश्वतोच्छेदान्तग्राहलक्षणाऽन्तग्राहदृष्टिः। तस्यैवं भवति—यदि तावदयं (6)नित्योऽविकारी पुरुषः किं धर्मेण यः सुखेन नानुगृह्यते, दुःखेन वा नोत्पीड्यते। अथायमुच्छेदधर्माऽनित्यस्तथापि किं धर्मि(र्मे)णेति विचारयतः कांक्षो(काङ्क्षो)त्पद्यते। कांक्षा(काङ्क्षा)प्रवृद्ध्या मिथ्यादर्शण(न)मावहति। तदकारणे कारणाभिनिवेशान्निहीनं चाग्रतो ग्रहणात् शीलव्रतदृष्टिपरामर्शावाकर्षति। (7)ततोऽस्य 'रागः स्वदृशि मानश्च द्वेषोऽन्यत्र प्रतायते।' तस्य खलु मिथ्यादर्शनभूतग्रहावेधवशादश्रेयसि श्रेयोबुद्ध्या प्रवृत्तस्यानग्र(ग्रे) चाग्र्यबुद्ध्यभिनिविष्टस्य स्वपक्षे रागो भवति परपक्षे च द्वेषः प्रवर्तते।[२] इत्यतः त्य(तत्) 'ज्ञेयः प्रवृत्तिबाहुल्यादेवमेषामनुक्रमः' ॥

वयं तु पश्यामः

[359] सदसन्मि(8)त्रयोगात्तु तद्वृत्त्यनियमो मतः ।

कल्याणमित्रपापमित्रसंसर्गाद्धि प्रायेण श्रद्धादीनां गुणानामेषां च क्लेशानां समु[दा]चारप्रवृत्तिः आचार्याणामभिमतेति। स पुनरेषः—

क्लेश उत्पद्यते कश्चित्संपूर्णैः कारणैस्त्रिभिः ॥[३]

हेतुप्रयोगविषयबलैः[४] कश्चित् त्रिभिरुत्पद्यते। कश्चिद् द्वाभ्यामिति।

---

[१] रागः स्वदृष्टौ मानश्च द्वेषोऽन्यत्रेत्यनुक्रमः। *Ak.* v. 33 cd.

[२] स्वदृष्टयध्यवसितस्य तत्प्रत्यनीकभूतायां परदृष्टौ द्वेषः प्रवर्तते। अपरे स्वदृष्टावेवान्यत्र गृहीते त्यक्तायां द्वेषमिच्छन्ति। दर्शनहेयानां दृष्टीनां स्वासान्तनिकदृष्टयालम्बनत्वात्। *Akb.* v. 33 d.

[३] अप्रहीणादनुशयाद्विषयात्प्रत्युपस्थितात् ।
अयोनिशो मनस्कारात्क्लेशः संपूर्णकारणः ॥ *Ak.* v. 34.

[४] तद्यथा रागानुशयोऽप्रहीणो भवत्यपरिज्ञातः कामरागपर्यवस्थानीयाश्च धर्मा आभासगता भवन्ति तत्र चायोनिशो मनस्कार एवं कामराग उत्पद्यते। तान्येतानि यथाक्रमं हेतुविषयप्रयोगबलानि। *Akb.* v. 34 abc.

हेतुविषयप्रयोगबलानीति। हेतुबलं कामरागोत्पत्तये कामरागानुशयोऽप्रहीणो भवत्यपरिज्ञातः। कामरागपर्यवस्थानीया विषयबलम्। तत्र चायोनिशोमनस्कारः प्रयोगबलम्। *Sakv.* p. 485.

(9)तत्र हेतुबलं सभागसर्वत्रगादिहेतुभावनाऽनागतोत्पत्तये वर्तमानप्राप्त्युत्सर्गे मेघिकादिनिदर्शणा(ना)त्[१] । प्रयोगबलमप्ययोणि(नि)शो मनस्कारादिसंनिधानम् । प्रत्ययबलमपरिज्ञातविषयाभासगमनं निदर्शण(न)मर्हत्परिहाणिसूत्रमिति[२] ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ

पञ्चमस्याध्यायस्य द्वितीयः [VI. A, 7. Fol. 115b.] (1)पादः ॥

---

[१] See *Ang.* IV. pp. 354-358.

[२] कदाचित् किल विषयबलेनैवोत्पद्यन्ते । न हेतुबलेन । यथा **परिहाणधर्मकस्यार्हत** इति । *Akb.* v. 34 d.

This is one of the major controversial points recorded in the *Kathāvatthu.* Buddhaghosa gives the following details :—

इदानि **परिहानिकथा** नाम होति । "परिहानधम्मो अपरिहानधम्मो", "**पञ्चिमे भिक्खवे धम्मा समयविमुत्तस्स भिक्खुनो परिहानाय संवत्तन्ति** । [कतमे पञ्च ? कम्मारामता भस्सारामता निद्दारामता सङ्गणिकारामता यथाविमुत्तं चित्तं न पच्चवेक्खति । इमे…पञ्च धम्मा…*Ang.* III. p. 173.] इति वा एवमादीनि हि सुत्तानि निस्साय **सम्मितिया वज्जिपुत्तका, सब्बत्थिवादिनो, एकच्चे च महासङ्घिका अरहतो पि परिहानिं इच्छन्ति**…तेसं लद्धिभिन्दनत्थं परिहायति अरहा अरहत्ता ति पुच्छा सकवादिस्स । तत्र परिहायती ति द्वे **परिहानियो पत्तपरिहानि च अप्पत्तपरिहानि च** । तत्थ "**दुतियम्पि खो आयस्मा गोधिको तम्हा सामयिकाय चेतोविमुत्तिया परिहायती**' ति अयं **पत्तपरिहानि नाम** ।…इध पत्तपरिहानि अधिप्पेता । **सकसमये** पन इमं पत्तपरिहानिं नाम **लोकियसमापत्तिया व इच्छन्ति, न अरहत्तादीहि सामञ्ञफलेहि** । **परसमये** पि नं सब्बसामञ्ञफलेसु सब्बभवेसु सब्बकालेसु सब्बेसञ्च पुग्गलानं न इच्छन्ति । *KvA.* I. 3.

Cf. **गोत्राच्चतुर्णां पञ्चानां फलाद्धानिर्न पूर्वकात्** ।

…स्रोतआपत्ति फलान्नास्ति परिहाणिः ।…दर्शनहेयानामवस्तुकत्वात् ।

अर्हत्त्वादपि नास्ति परिहाणिरिति सौत्रान्तिकाः । एष एव च न्यायः । कथमिदं गम्यते ? आगमाद्युक्तितश्च ।…"शैक्षस्य चाप्रमादकरणीयेऽप्रमादकरणीयं वदामी"त्युक्तं नार्हतः ।…**सामयिक्या** अस्तीति चेत् । वयमप्येवं ब्रूमः । सा तु विचार्या । किमर्हत्त्वमाहोस्विद् ध्यानानीति ।…**प्रतिज्ञायते हि लौकिकमार्गप्रतिलब्धात्फलद्वयात्परिहाणिः । अर्हत्वादपि तु परिहाणिं वर्णयन्ति वैभाषिकाः** । *Akb.* VI. 58 ab.

See *Ang.* III. p. 173; *P. Paññatti*, P. 11; *Aam.* p. 87; *Sakv.* pp. 586—590 and *LVPAk.* VI. pp. 256—261. V. infra, *Ad. kārikā* 437, notes.

पञ्चमाध्याये

तृतीयपादः ।

अथ य इमे भगवता त्रय आस्रवा आख्याताः—“कामास्रवो भवास्रवोऽविद्यास्रवश्च ।”[१] एषां कः स्वभावः ? तददिमारभ्यते—

[360] व्यविद्याः सकलाः क्लेशाः कामे कामास्रवो मतः ।
स्त्यानौद्धत्ये च हित्वोर्ध्वं समानत्वाद्भवास्रवः ॥[२]

सर्वे ह्ये[ते स]माना निवृताव्याकृतत्वादन्तर्मुखप्रवृत्तत्वाच्च ॥

[361] अविद्या(2)ख्यस्तु मूलत्वादविद्या सार्वधातुकी ।[३]

अविद्या खलु संसारमूलम् । उक्तं हि भगवता—“अविद्याप्रत्ययाः संस्काराः ।”[४] तथा—“याः काश्चन दुर्गतयोऽस्मिल्लोके परत्र च ।
सर्वास्ता अविद्यामूलिकाः”[५] इति ।

तत्र तावत्कामास्रवः एकचत्वारिंशद् द्रव्यानि(णि) । रागप्रतिघमानाः प्रत्येकं पञ्चप्रकारत्वात् पञ्चदश भवन्ति । विचि(3)कित्साः चतस्रः । दृष्टयो द्वादश । दश पर्यवस्थानानि । इत्येतान्येकचत्वारिंशद् द्रव्यानि(णि) कामास्रव इत्याख्यायते ।

---

[१] Cf. तयो आसवा । कामासवो भवासवो अविज्जासवो । *Dīgha*, xxxiii. 1. 10.

[२] Cf. कामे सपर्यवस्थानाः क्लेशाः कामास्रवो विना ।
मोहेनानुशया एव रूपारूप्ये भवास्रवः ॥ *Ak.* v. 35.

V. supra, pp. 18, 220. For a controversy whether *āsrava*, is *sāsrava*, see *Kv*. xv. 5.—इदानि आसवकथा नाम होति । तत्थ यस्मा चतूहि आसवेहि उत्तरिं अञ्ञो आसवो नाम नत्थि, येन चत्तारो आसवा सासवा सियुं, तस्मा चत्तारो आसवा अनासवा ति येसं लद्धि, सेय्यथापि हेतुवादानं । *KvA*. xv. 5.

[३] Cf. मूलमविद्येत्यास्रवः पृथक् । *Ak.* v. 36 d.

[४] Cf. अविज्जापच्चया संखारा । *Vbh.* p. 135.

[५] Cf. याः काश्चन दुर्गतयोऽस्मिल्लोके परत्र च ।
अविद्यामूलिकाः सर्वा इच्छालोभसमुत्थिताः ॥ Quoted in *Sakv.* p. 486.

Cf. also, या काचि'मा दुग्गतियो अस्मिं लोके परम्हि च ।
अविज्जामूलका सब्बा इच्छालोभसमुस्सया ॥ *Itivuttaka*, 40.

भवास्रवः चतुष्पञ्चाशद् द्रव्यानि(णि) ।[१] रागमानौ विंशतिः। अष्टौ विचिकित्साः। चतुर्विंशति दृष्टयोऽविद्या(द्यां) हित्वा। द्वे च पर्यवस्थाने स्त्यानौद्धत्याख्ये, परतन्त्रत्वात् ।[२]

अविद्यास्रवः पञ्चदशद्रव्याणि।[३] तानि पि(4)ण्डेनाष्टोत्तरं द्रव्यशतमास्रवाणां स्वभावः।

तथौघयोगा दृग्वर्ज्जं तत्पृथक्त्वन्तु पाटवात् ॥[४]

कामास्रव एव खलु कामौघः कामयोगश्च। दृष्टी वर्जयित्वा। दृष्टयस्तु पटुत्वात्पृथगोघेषु योगेषु च व्यवस्थाप्यन्ते।[५] हरणश्लेषणकार्यप्रधानभूता हि दृष्टयः।[६] यथा हि सर्वे क्लेशाः दृष्टिवर्ज्याः, अपहरन्ति श्ले(5)षयन्ति च

---

[१] The *Akb.* discusses one more point : किं पुनः कारणं रूपारूप्यावचरा अनुशयाः समस्यैको भवाग्र उक्तः ?

अव्याकृतान्तर्मुखा हि ते समाहितभूमिकाः। अत एकीकृताः। *Akb.* v. 36 abc. V. supra, p. 226, n. 1.

[२] Cf. ननु च तत्राप्यस्ति पर्यवस्थानद्वयं स्त्यानमौद्धत्यं च। **प्रकरणेषु** चोक्तम्—'भवास्रवः कतमः। अविद्यां स्थापयित्वा यानि तदन्यानि रूपारूप्यप्रतिसंयुक्तानि। संयोजनबन्धनानुशयोपक्लेशपर्यवस्थानानि" इति। कस्मादिह तस्याग्रहणम्। **अस्वातन्त्र्यादिति काश्मीराः।** *Akb.* v. 35.

—**कस्मादिह तस्याग्रहणमिति**। तस्य पर्यवस्थानद्वयस्य। **अस्वातन्त्र्यादिति**। कथमस्वातन्त्र्यम्। रागादिसंप्रयोगित्वादीर्ष्यादिवदविद्यामात्रासंप्रयोगित्वाच्च। एतद्धि द्वयं रागादिभिः सम्प्रयुज्यते। न तथेर्ष्यामात्सर्यकौकृत्यक्रोधम्रक्षाः। स्वतन्त्राः। अविद्यामात्रेण संप्रयोगादिति। *Sakv.* p. 485.

[३] Cf. किं कारणमसौ पृथग्व्यवस्थाप्यते। सर्वेषां हि तेषां

मूलमविद्येत्यास्रवः पृथक्। *Akb.* v. 36 d.

[४] Cf. **तथौघयोगा दृष्टीनां पृथग्भावस्तु पाटवात्।** *Ak.* v. 37 ab.

[५] दृष्टियोग इह चतुर्थ उक्तः। तेनाह **अन्यत्र दृष्टिभ्य** इति। **ताः किलेति**। **किलशब्दः परमतद्योतकः**। विनेयजनवशात्तु दृष्टियोगः पृथगुक्त इत्यभिप्रायो युज्यते। *Sakv.* p. 486.

[६] Cf. **नास्रवेष्वसहायानां न किलास्यानुकूलता।** *Ak.* v. 37 cd.

आसयन्तीत्यास्रवाणां निर्वचनं पश्चाद्वक्ष्यते। न च किल केवला दृष्टय आस्यानुकूलाः पटुत्वात्। अत आस्रवेषु न पृथग्व्यवस्थापिताः। मिश्रीकृत्य स्थापिताः। *Akb.* v. 37 cd.

—**आस्रवेषु दृष्टयः किमर्थं न पृथग्व्यवस्थापिता** इत्याह।...असहायानां दृष्टीनामास्यानुकूलताऽवस्थानानुकूलता चलत्वात्पटुत्वाच्च न भवति। नासनानुकूलतेत्यर्थः।···*Sakv.* p. 486.

तथैवैकाकिन्योऽपि द्रष्टय इति । तदेवं सति कामौघ एकान्नत्रिंशत् द्रव्याणि ।[१] रागप्रतिघमानाः पञ्चदश । विचिकित्साश्चतस्रः । दश पर्यवस्थानानीति ।

भवौघोऽष्टाविंशतिर्द्रव्याणि ।[२] रागमाना विंशतिः ।[३] विचिकित्सा अष्टौ । दृष्ट्योघः षट्त्रिंशद् द्रव्याणि ।[४] अविद्यौघः[५] पञ्चदशद्रव्याणि । एवमेव (6)योगा द्रष्टव्याः ॥[६]

[362] साऽविद्या द्वे उपादाने यथाक्तो(क्तौ) द्वे तु दृङ्मये ।[७]
चतस्रोऽप्येकमन्त्यैकं कुमार्गादिसमाश्रयात् ॥

[363] शेषास्त्रैधातुकास्त्वन्त्ये सात्मभावप्रवृत्तितः ।

[८]तत्र कामयोग एव सहाऽविद्यया कामोपादानं चतुस्त्रिंशद् द्रव्याणि । रागप्रतिघमानाविद्या विंशतिः । विचिकित्साश्चतस्रः । दशपर्यव(7)स्थानानि ।

भवयोग एव सहाविद्यया[९] आत्मवादोपादानम्,[१०] अष्टात्रिंशद् द्रव्याणि । रागमानाविद्यास्त्रिंशत् । विचिकित्सा अष्टौ ।

---

[१] द्वादशदृष्ट्यपनयनान्नास्रववदेकचत्वारिंशद् द्रव्याणि भवन्ति । किं तर्हि ? एकान्नत्रिंशद् द्रव्याणि भवन्ति । *Sakv.* p. 487.

[२] भवास्रवो द्विपञ्चाशद् द्रव्याण्युक्तानि । ततश्चतुर्विंशतिर्दृष्टीरपनीयाष्टाविंशतिर्द्रव्याणि *Ibid.*

[३] रागमाना विंशतिरिति द्विधातुका रागा दश भवन्ति । माना अपि दशेति विंशतिः । *Ibid.*

[४] दृष्ट्यौघ षट्त्रिंशद् द्रव्याणीति त्रिषु धातुषु त्रिद्वादश द्रष्टव्य इति । *Ibid.*

[५] स्रोतोऽनुकूल प्रवाहावर्त **ओघार्थः** । *Asm.* p. 47. यस्स संविज्जन्ति तं वट्टस्मिं ओहनन्ति ओसीदापेन्तीति **ओघा** । *Dhs A.* II. 45. See *Jpś.* p. 66.

[६] **योगश्चतुर्विधः** ।···विसंयोगपरिपन्थकरो **योगार्थः** । *Asm.* p. 47. यस्स संविज्जन्ति तं वट्टस्मिं योजेन्तीति **योगा** । *Dhs A.* II. 46. See *Jpś.* p. 66.

[७] Cf. **यथोक्ता एव साऽविद्या द्विधा दृष्टिविवेचनात् ।**
उपादानानि । *Ak.* v. 38 abc.

[८] From तत्र कामयोग एव to शुद्धिप्रत्यागमनादिति, is almost identical with *Akb.* v. 38 abc.

[९] The Kośakāra discusses one more point here :

अविद्या तु ग्राहिका नेति मिश्रिता । *Ak.* v. 38 d.

—'अविद्या तु ग्राहिका नेति मिश्रिता'इति । न केवला अविद्या भवमुपाददाति । कस्मादित्याह । असंप्रख्यानलक्षणतया अपटुत्वादिति । मिश्रितात्वन्यक्लेशसंपर्कवशादुपाददातीत्यभिप्रायः । *Sakv.* p. 487. See *LVPAk.* v. p. 77.

[१०] On *upādāna*, see *Dhs A.* v. 99 and *Asm.* p. 47.

दृष्टियोगाच्छीलव्रतं निष्कृष्य[१] दृष्ट्युपादानं त्रिंशद् द्रव्याणि । शीलव्रतोपादानं षड्द्रव्याणि । कस्मात्पुनरेते(त)द् द्रि(दृ)ष्टिभ्यो निष्कृष्टम् ? 'कुमार्गादिसमाश्रयात् ।' मार्गप्रतिद्वन्द्वभूतं[२] ह्येत(8)दुभयपक्षविप्रलम्भकं च । गृहिनो(णो)ऽपि ह्यनेन विप्रलब्धाः अनशनादिभिः स्वर्गमार्गसंज्ञया । प्रव्रजिता अपीष्टविषयविवर्जने शुद्धिप्रत्यागमनादिति[३] ।

'शेषास्त्रैधातुकाः ।' दृष्टयो दृष्ट्युपादानम् । त्रैधातुकाश्च शीलव्रतपरामर्शाः परामर्शोपादानम् । कामास्रवस्तु एकधा(9)तुकः । भवास्रवस्तु द्विधातुकः । तस्मादेव तत् 'अन्त्यम्' द्वयं सार्वधातुकमेव । 'आत्मभावप्रवृत्तितः ।' आत्मभावालम्बनप्रवृत्तं खल्वेतदिति ।

ते खल्वेते अनुशयाः

संयोजनादिभिः शब्दैर्दर्शिताः पञ्चधा पुनः ॥[४]

संयोजनबन्धनानुशयोपक्लेशपर्यवस्थानभेदेन पञ्चधा भित्त्वोक्ताः ।
[VI. B. 4. Fol. 116. a.]

[364] (1)नव संयोजनान्यस्मिन्नीर्ष्यामात्सर्यमेव च ।
द्रव्यामर्षणसामान्याद् दृशः संयोजनद्वयम् ॥[५]

[365] शेषान्य(ण्य)नुशयाः पञ्च

[६] नव खलु संयोजनानि सूत्र उक्तानि—अनुनयप्रतिघमानाविद्यादृष्टिपरामर्शविचिकित्सेर्ष्यामात्सर्यसंयोजनानि ।[७]

---

[१] दृष्टियोगाच्छीलव्रतं निष्कृष्येति षट्त्रिंशद् द्रव्यकाद् दृष्टियोगाद्धातुभेदेन षच्छीलव्रतपरामर्शान्निष्कृष्य । *Sakv.* p. 487.

[२] मार्गप्रतिद्वन्द्वादिति । सांख्ययोगज्ञानादिभिर्मोक्षप्राप्तिदर्शनान्मार्गप्रतिद्वन्द्वभूतं शीलव्रतोपादानम् । *Ibid.*

[३] Yaśomitra seems to refer to the Jaina ascetics : रसपरित्यागभूमिशय्यामलपङ्कधारणनग्नचर्याकेशोल्लुञ्चनादिना शुद्धिप्रत्यागमनात् । *Ibid.* Cf. *Tattvārthasūtra*, IX. 19.

[४] Cf. संयोजनादिभेदेन पुनस्ता पञ्चधोदिताः । *Ak.* v. 41 ab.

[५] Cf. द्रव्यामर्षणसामान्याद् दृष्टी संयोजनान्तरम् । *Ak.* v. 41 cd.

[६] From नव खलु to द्वे दृष्टी is identical with *Akb.* v. 40 ab.

[७] नव संयोजनानि । *Asm.* p. 44. दश संयोजनानि । *Aam.* p. 52. The *Sangīti-sutta* enumerates only seven : सत्त संयोजनानि । अनुनयसंयोजनं, पटिघ…

तत्रानुनयसंयोजनं त्रैधातुको रागः। एवमन्यानि यथायोगं वक्तव्यानि। दृ(2)ष्टिसंयोजनं तिस्रो दृष्टयः परामर्शसंयोजनं द्वे दृष्टी।

किं पुनः कारणं संयोजनेषु तिस्रो दृष्टयो दृष्टिसंयोजनं पृथगुक्तम्? द्वे पुनर्दृष्टी परामर्शसंयोजनं पृथगिति? तदुच्यते—'द्रव्यामर्षणसामान्याद् दृशः संयोजनद्वयम्।' अष्टादशद्रव्यानि(णि) खलु तिस्रो दृष्टयः।[१] अष्टादशैव द्वे परामर्शदृ(3)ष्टी।[२] द्वयोश्च नामसामान्यम्। तस्मादेतद् द्वयमेकं संयोजनमुक्तमिति।[३]

पुनरप्यन्यत्र भगवान्संयोजनम्

पञ्चधा पञ्चधा पुनः।
जगादावरभागीयमूर्ध्वभागीयमेव च ॥[४]

दिट्ठि···विचिकिच्छा···मान···भवराग···अविज्जासंयोजनं। *Dīgha*, xxxiii. 2. 3. The following ten are often mentioned in the Pāli *suttas* :—सक्कायदिट्ठि, विचिकिच्छा, सीलब्बतपरामासो, कामच्छन्दो, व्यापादो, रूपरागो, अरूपरागो, मानो, उद्धच्चं, अविज्जा। A different enumeration of the ten *saṅyojanas* is found at *Chullaniddesa*, 657. and *Dhs*. 1113—1463 :—कामरागो, पटिघो, मानो, दिट्ठि, विचिकिच्छा, सीलब्बतपरामासो, भवरागो, इस्सा, मच्छरियं, अविज्जा। See *A Buddhist Manual of Psychological Ethics*, p. 297, n. 1.

The *Aam*. identifies the ten *anuśayas* with ten *saṅyojanas*. For their relation, see *M. sutta* 64.

[१] कथम्? कामधातौ सत्कायान्तग्राहदृष्टी द्वे। ते च दुःखदर्शनप्रहातव्ये एवेष्टे। मिथ्यादृष्टिश्चतुःप्रकारा। दुःखदर्शनप्रहातव्या यावन्मार्गदर्शनप्रहातव्या। इत्येवं कामधातौ षड् भवन्ति। यथा कामधातौ षड् एवं रूपधातावारूप्यधातौ चेत्यष्टादश भवन्ति। *Sakv*. p. 499.

[२] अष्टादशैव द्वे परामर्शदृष्टी। कथम्? कामधातौ दृष्टिपरामर्शो दुःखदर्शनप्रहातव्यो यावन्मार्गदर्शनप्रहातव्य इति चतुःप्रकाराः। शीलव्रतपरामर्शोऽपि दुःखदर्शनप्रहातव्यः, मार्गदर्शनप्रहातव्यश्चेति द्विप्रकारः। इत्येवं कामधातौ षड् भवन्ति।···एवं रूपधातावारूप्यधातौ च। इत्येवमष्टादश द्रव्याणि भवन्ति। *Ibid.*

[३] After this the Kośakāra discusses one more point :—अथ कस्मादीर्ष्यामात्सर्ये संयोजने पृथक् संयोजनद्वयमुक्तम्, नान्यत् पर्यवस्थानम्? *Akb*. v. 42. This is not discussed in *Adv*.

[४] Cf. पञ्चधावरभागीयं द्वाभ्यां कामानतिक्रमः।
त्रिभिस्तु पुनरावृत्तिः। *Ak*. v. 43 abc.

Cf. also, अहं खो भन्ते धारेमि भगवता देसितानि पञ्च ओरंभागियानि संयोजनानि··· सक्कायदिट्ठिं···विचिकिच्छं···सीलब्बतपरामासं···कामच्छन्दं···व्यापादं···। *M. sutta* 64.

[366] आद्यन्त्ये द्व दृशौ कांक्षा(काङ्क्षा) कामच्छन्दो द्विरेव यः ।

तत्र पञ्च संयोजनान्यवरभागीयानि । तद्यथा—सत्कायदृष्टिः शीलव्रतपरामर्शो (4)विचिकित्सा कामच्छन्दो व्यापाद इति । एते हि कामधातुहितत्वादवरभागीया इत्युच्यते(न्ते) । अवरा हि कामधातूरेतानि च तदनुगुणानि । यस्मात्

द्वाभ्यां कामानतिक्रान्तिः पुनराग(न)यनं त्रिभिः ॥[१]

कामच्छन्दव्यापादाभ्यां कामधातुं नातिक्रामति । सत्कायदृष्ट्यादिभिस्त्रिभिरतिक्रान्तोऽपि पुनरावर्तते दौवारिकानुचर(5)साधर्म्यात्[१] ।

अन्ये पुनराहुः—त्रिभिः सत्त्वावरतां नातिक्रामति पृथग्जनत्वम्, द्वाभ्यां धात्ववरतां कामधातुमिति ॥[२]

[३]यदा खलु स्रोतआपन्नस्य पर्यादाय त्रिसंयोजनप्रहाणे षट् क्लेशाः प्रहीणाः किमर्थं तिस्रो दृष्टीरपहाय त्रयाना(-त्रय)मेवाह सत्कायदृष्टी(ष्टिं) शीलव्रतपरामर्शं विचिकित्सां च ?[३] तदुच्यते—

पञ्चिमानि भिक्खवे उद्धंभागियानि संयोजनानि ।···रूपरागो, अरूपरागो, मानो, उद्धच्चं, अविज्जा । *Aṅg.* IV. p. 460.

See *Aṅg.* I. p. 232, II. p. 238, IV. p. 459; *Jpś.* p. 67-8 and *A Buddhist Manual of Psychological Ethics*, pp. 302, n. 1.

[१] द्वाभ्यां कामानतिक्रम इति तदप्रहाणे कामधात्वनतिक्रमात् । **दौवारिकानुचरसाधर्म्यादिति** । दौवारिकसधर्मणौ कामच्छन्दव्यापादौ । तौ हि कामधातुबन्धनागारान्निःक्रमणं न दत्तः । दौवारिकत्वात् । अनुचरसधर्माणः सत्कायदृष्ट्यादयः ।···*Sakv.* pp. 491-2.

[२] **त्रिभिः सत्त्वावरतामिति** । पृथग्जनत्वलक्षणां सत्त्वावरतां सत्कायदृष्टिशीलव्रतपरामर्शविचिकित्सासंयोजनैर्नातिक्रामति । **द्वाभ्यां** कामच्छन्दव्यापादाभ्याम् । **धात्ववरतां** कामधातुस्वभावां नातिक्रामति । नातिवर्तते । आर्येभ्यो ह्यवराः पृथग्जनाः । धातुषु च कामधातुरवरः । **तस्मादेव तान्यवरभागीयानि** । **अपरे योगाचाराः** । *Sakv.* pp. 491-2.

[३-३] From यदा खलु to विचिकित्सां च is identical with *Akb.* v. 43. c.

—**पर्यादाय त्रिसंयोजनप्रहाणादिति** । निरवशेषतः सत्कायदृष्टिशीलव्रतपरामर्शविचिकित्सासंयोजनप्रहाणादित्यर्थः । **षट् क्लेशाः प्रहीणा** इति । पञ्च दृष्टयो विचिकित्सा च । न तु रागादय उक्ताः सावशेषत्वात् । **त्रिस्रो दृष्टीरपहायेति** । अन्तग्राहमिथ्यादृष्टिदृष्टिपरामर्शदृष्टीः । **त्रयमेवाहेति** । सत्कायदृष्टिशीलव्रतपरामर्शविचिकित्सात्रयमेवाह । **क आह** । **भगवान्** । तथा हि सूत्रे पठ्यते—"कियता भदन्त स्रोतापन्नो भवति ? यतश्च महानामार्यश्रावकः इदं दुःखमार्यसत्यमिति···इदं दुःखनिरोधगामिनीप्रतिपदार्यसत्यमिति

[367] द्व्येक(6)दृग्घेयकार्योक्तेर्दृष्टिहेयमुखग्रहात् ।
सर्वदृग्घेयभाक्त्वेऽपि त्रयमेतदुदाहृतम् ॥[1]

प्रवर्तकग्रहणे खलु प्रवर्त्यमपि गृहीतं भवति प्रदीपालोकवत्। तत्र सत्कायदृष्ट्या तत्प्रवर्तिताऽन्तग्राहदृष्टिर्गृहीता। शीलव्रतपरामर्शेण दृष्टिपरामर्शः प्रवर्तितः। विचिकित्सया मिथ्यादृष्टिः प्रवर्तिता। अतो हेतु(7)ग्रहणात्कार्यग्रहणं वेदितव्यम्।

अथवा त्रिविधा क्लेशाः—एकप्रकाराः, द्विप्रकाराः, चतुष्प्रकाराश्च।[2] तत्र सत्कायदृष्ट्या एकप्रकारा गृहीताः। शीलव्रतपरामर्शेन द्विप्रकाराः। विचिकित्सया चतुष्प्रकाराः गृहीता भवती(न्ती) ति ॥

वयं ब्रूमः—[3]

[368] सर्वानर्थनिदानत्वान्मार्गप्रत्यर्थिभावतः ।
तथ्यो(8)हाविधुरत्वाच्च त्रिसंयोजनदेशना ॥[3]

सत्कायदृष्टिः खलु सर्वानर्थमलानां क्लेशस्य च भवत्रयस्य च मूलम्। अतस्तयोत्खातया सर्वानर्थवृक्षस्योत्सादनं भवति। मार्गस्य च सद्भूतस्य प्रत्यर्थिभूतः कुमार्गावलम्बी शीलव्रतपरामर्शः। तेन प्रहीणेन सन्मार्गेण मोक्षपुरप्रवेशो भवति। सम्यग्दृष्ट्यादि(9)मार्गं प्रतिपत्तिप्रतिबन्धभूता च विचिकित्सा।

यथाभूतं प्रजानाति। **त्रीणि चास्य संयोजनानि प्रहीणानि भवन्ति** परिज्ञातानि। **तद्यथा सत्कायदृष्टिः शीलव्रतपरामर्शो विचिकित्सा** च। स एषां त्रयाणां संयोजनानां प्रहाणात् स्रोतापन्नो भवत्यविनिपातधर्मा सम्बोधिपरायणः सप्तकृद्भवपरमः सप्तकृत्वो देवांश्च मनुष्यांश्च संसृत्य सन्धाय दुःखस्यान्तं करिष्यतीति।" **सर्वमेतद्वक्तव्यं स्यात्**। भवेदित्यर्थः। *Sakv.* p. 492. Cf. इधेकच्चो पुग्गलो **तिण्णं संयोजनानं परिक्खया सोतापन्नो** होति अविनिपातधम्मो नियतो सम्बोधिपरायणो, सो सत्तक्खत्तुं देवे च मनुस्से च सन्धावित्वा संसरित्वा दुक्खस्सन्तं करोति। *P. Paññatti*, p. 15.

जानाति भन्ते भगवा···अयं पुग्गलो यथानुसिट्ठं तथा पटिपज्जमानो, **तिण्णं संयोजनानं परिक्खया सोतापन्नो भविस्सति** अविनिपातधम्मो नियतो सम्बोधिपरायणो ति। *Dīgha*, xxviii. 13.

[1] Cf. **मुखमूलग्रहात् त्रयम्**। *Ak.* v. 43 d.

[2] **त्रिप्रकाराः किल क्लेशा** इति। दर्शनहेया इहाधिकृताः। **एकप्रकाराः** सत्कायान्तग्राहदृष्टयः दुःखदर्शनमात्रप्रहेयत्वात्। **द्विप्रकाराः** शीलव्रतपरामर्शः। **चतुष्प्रकाराः** विचिकित्सामिथ्यादृष्टिदृष्टिपरामर्शाः। ये तु रागादयो दर्शनहेयाः। तेऽपि तदालम्बनत्वात् गृहीता एवेति शक्यं वक्तुमिति। *Sakv.* p. 492.

[3] This view is not referred to either by the Kośakāra or Yaśomitra.

तया प्रहीन(ण)या सम्यग्दृष्टिसंकल्पपुरःसरो मार्गो निर्विबन्धः प्रवर्तते। इत्यष्टाशीत्यनुशयप्रहाणेऽपि सति त्रयाणामेव ग्रहणम् ।

वैभाषाः पुनः पश्यन्ति[१]—मोक्षान्तराय(याः) त्रयोद्भावनाः । [२]यथा खलु त्रयोऽन्तराया मार्गगमने भवन्त्यगन्तुकामताऽन्यमा[VI. A. 4 Fol. 116. b.](1)र्गग्रहणं मार्गबहुत्वसंदेहाच्च मार्गगमनाप्रतिपत्तिः। एवं मोक्षगमने त्रयोऽन्तराया भवन्ति। सत्कायदृष्ट्या मोक्षादुत्रा(त्त्रा)सं गतस्यागन्तुकामता भवति। शीलव्रतपरामर्शेनान्यमार्गग्रहणात् मार्गविभ्रान्तिः। विचिकित्सा मार्गसंशये सति मार्गाप्रतिपत्ति[रित्ये]षां मोक्षगमनान्तरायाणां प्रहाणं स्रोतआपन्नस्य द्योतयद्भगवान् (2)क्लेशत्रयस्यैव ग्रहणमकार्षीदिति ॥[२]

यथा च पञ्चविधमप(व)रभागीयं संयोजनमुक्तवांस्तथा पञ्चोर्ध्वभागीयाणि(नि) संयोजनान्याख्यातवां(वान्) सूत्रे ।

[369] द्वौ रूपारूपजौ रागौ मानमोहोद्धवास्त्रयः ।

पञ्च खलूर्ध्वभागीयाणि(नि) संयोजनानि।[३] तद्यथा—रूपरागः, आरूप्यरागः, औद्धत्यम्, मानोऽविद्या च। एषामप्रहीणानां ऊर्ध्व(3)धातुद्वयं नातिक्रामन्ति सत्त्वाः। समाप्तः संयोजनाधिकारः।

बन्धनानीदानीमुच्यन्ते। त्रीणि बन्धनानि। रागो बन्धनं द्वेषो मोहो

---

[१] Kośakāra says: अपरे पुनराहु :—

अगन्तुकामता मार्गविभ्रमो मार्गसंशयः ।
इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना ॥ *Ak*. v. 44.

Yaśomitra says that this is a view of the Kośakāra :—अपरे पुनराहुरित्ययमेवाचार्यः। *Sakv*. p. 492.

Prof. Pradhan gives the following note on this *Kośa-kārikā*(v. 44)—This *kārikā* is a problem. the Tsang Yao edition does not include this *kārikā* at its proper place and gives a note that this Sanskrit *gāthā* does not occur in the original Sanskrit. But other editions of Chinese Translations regard it as a *kārikā*.

[२-२] This passage (from यथा खलु to ग्रहणमकार्षीदिति) is almost identical with *Akb*. v. 44.

[३] Cf. पञ्चधैवोर्ध्वभागीयं द्वौ रागौ रूप्यरूपिजौ ।
औद्धत्यमानमोहाश्च *Ak*. v. 45 abc.

V. supra, p. 301, n. 4.

बन्धनम् ।[१] एभिस्त्रैधातुकाः सत्त्वाः संसारचारके बद्धाः यथायोगम् । कस्मात्पुनरेतानि बन्धनानीत्युक्तानि ? तदुच्यते—

त्रिवेदनानुशायित्वाद् दृढत्वाद्बन्धनत्रयम् ॥[२]

त्रिवेदनावशात्खलु बन्धनत्र(4)यमुक्तम् । तत्र सुखायां वेदनायां रागोऽनुशेरते । दुःखायां द्वेषः ।[३] अदुःखासुखायां मोहः[४] ।[५] एते च त्रयो मूलक्लेशाः षड्विज्ञानभौमाः पञ्चप्रकाराः । तस्मादेते दृढत्वाद् बन्धनशब्देनोक्ताः ॥

पुनरन्ये भगवता सूत्रे—

[370] द्विपक्षग्रन्थनाद् ग्रन्थाश्चत्वारः समुदाहृताः ।
अभिध्याख्यस्तथा द्वेषः परामर्शद्वयं तथा ॥[६]

तत्र गृही अभिध्यया वि(5)षयेषु ग्रथितस्तद्व्याघातकर्तृषु विवादमारभमानो द्वेषेणानुबध्यते । प्रव्रजितः शीलव्रतपरामर्शग्रथितस्तदपवादश्रवणादिदमेव सत्यमिति सत्याभिनिवेशपरामर्शेन दृष्टिपरामर्शाख्येन बध्यते । इति चत्वारो भवन्ति ॥

उक्ताः क्लेशाः ।

---

[१] रागो भन्ते बन्धनं दोसो बन्धनं मोहो बन्धनं । *S.* IV. p. 292.

बन्धनं त्रिविधम् । रागबन्धनेन सत्त्वानां विपरिणामदुःखतायां बन्धनम् । द्वेषबन्धनेन सत्त्वानां दुःखदुःखतायां बन्धनम् । मोहबन्धनेन सत्त्वानां संस्कारदुःखतायां बन्धनम् । *Asm* p. 46. See *Aam.* p. 81 and *Yogasūtra*, II. 7—8.

[२] Cf. विद्वशाद्बन्धनत्रयम् । *Ak.* v. 45 d.

[३] V. supra, p. 48, n. 6.

[४] Cf. अदुक्खमसुखाय हि वेदनाय अविज्जा अनुसेति । *Netti.* p. 32.

[५] After this the Kośakāra says :—न तथा रागद्वेषौ । स्वसान्तानिकालम्बनतो वा नियमः । *Akb.* v. 45 d.—ननु च रागद्वेषावप्यदुःखासुखायां यथायोगं तथैवानुशयाते । कस्मान्मोह एवोच्यते इत्याह···**रागद्वेषावप्यनुशयाते । न तु तथा यथा मोहः ।** मोहो ह्यपटुत्वादपट्व्यामदुःखसुखायां वेदनामनुकूलत्वात्सुतरामनुशेत इति ।···स्वसान्तानिकसुखाद्यनुभूतिसामर्थ्यात्तथा नियमः । **अपरे तु** व्याचक्षते···*Sakv.* p. 493.

See *A. Vibhāvinī*, pp. 43-44.

[६] This topic is not found in *Akb.* Cf. चत्तारो मे भिक्खवे **गन्था** । अभिज्झा कायगन्थो, व्यापादो···सीलब्बतपरामासो···इदं सच्चाभिनिवेसो कायगन्थो ।···*S.* IV. p. 59.

Also cf. **ग्रन्थाश्चत्वारः** ।···समाहितमनःस्वभावस्य कायस्य परिग्रन्थनार्थेन ग्रन्थो वेदितव्यः । तेन किं भवति । चतुर्विधं चित्तं विक्षिप्यते । *Asm.* p. 48.

[371] उपक्लेशास्तु विज्ञेयाः संरम्भाद्या यथोदिताः ।
सर्वे वा चैत(7)साः क्लिष्टाः संस्कारस्कन्धसंज्ञिताः ॥[1]

ये तावत्खलु क्लेशा उपक्लेशा अपि ते चित्तोपक्लेशनात् ।[2] [3]इह तु पर्यवस्थानक्लेशमलसंगृहीताः क्षुद्रकवस्तुकोद्दिष्टा[4] वेदितव्याः । येऽपि चान्ये चैतसिकाः संस्कारस्कन्धसंगृहीताः तेऽप्युपक्लेशा इत्याख्यायन्ते ॥[3]

के पुनस्ते क्लेशमलाः कानि वा पर्यवस्थानानि ? तत्र तावत्—

[372] मूल(7)क्लेशमलास्त्वन्ये षडुपक्लेशसंज्ञिताः ।

त इमे उच्यन्ते—

शाठ्योपनाहप्रदाशमायामदविहेठनाः ॥[5]

---

[1] V. supra, p. 76, n. 3. For *upakleśa*, see *M. sutta* 7, *MA*. I. p. 233-235 and *Khuddakavatthu-Vibhaṅga*, *Vbh.* pp. 345-392.

Cf. येऽप्यन्ये चैतस्याः क्लिष्टाः संस्कारस्कन्धसंज्ञिताः ।
क्लेशेभ्यस्तेऽप्युपक्लेशास्ते तु न क्लेशसंज्ञिताः ॥ *Ak*. v. 46.

[2] Cf. ये क्लेशास्ते उपक्लेशा अपि भवन्ति । उपक्लेशास्तु न क्लेशाः । क्लेशान् स्थापयित्वा तदन्यः क्लिष्टः संस्कारस्कन्धसंगृहीतः सर्वश्चैतसिको धर्मः । स पुनः कतमः । षड्रागादीन् क्लेशान् स्थापयित्वा क्लिष्टः संस्कारस्कन्धसंगृहीतः क्रोधादिकश्चैतसिको धर्मः । अपि खलु रागो द्वेषो मोहश्च चैतसिका उपक्लेशा उच्यन्ते ।···*Asm*. p. 47.

[3-3] Cf. येऽप्यन्ये क्लेशेभ्यः क्लिष्टाः धर्माः संस्कारस्कन्धसंगृहीताश्चैतसिकास्त उपक्लेशास्ते पुनर्ये क्षुद्रकवस्तुके पठिताः । इह तु पर्यवस्थानक्लेशमलसंगृहीतानेव निर्देश्यामः । *Akb*. v. 46.

[4] ये क्षुद्रकवस्तुके पठिता इति । क्षुद्रकवस्तुके प्रवचनभागे ये पठिताः । न तु चेतनादय एवेत्यभिप्रायः । तद्यथा अरतिर्विजृम्भिका चेतसो लीनत्वं तन्द्री भक्षेऽसमता नानात्वसंज्ञा अमनसिकारः कायदुष्ठुल्यं शृङ्गी भित्तिरीका अनार्जवता अमार्दवता अस्वभावानुवर्तिता कामवितर्को व्यापादवितर्को विहिंसावितर्को ज्ञातिवितर्को जनपदवितर्कोऽमरवितर्कोऽवमन्यना-प्रतिसंयुक्तो वितर्कः कुलोदयताप्रतिसंयुक्तो वितर्कः शोकः दुःखं दौर्मनस्यमुपायास इति । *Sakv*. p. 493.

The *Kshudrakavastu* corresponds to the *Khuddhakavatthu-Vibhaṅga*, *Vbh.* pp. 345-392. The latter enumerates a long list of evil states, and gives a detailed commentary on them. See *VbhA*. pp. 465-516. and *Milinda*, p. 283.

[5] Cf. अन्ये च षट् क्लेशमलाः माया शाठ्यं मदस्तथा ।
प्रदाश उपनाहश्च विहिंसा चेति रागजौ ॥ *Ak*. v. 49cd, 50 ab.

तत्र चित्तकौटिल्यं शाठ्यं चित्तस्यानृजुता वक्रीभावः ।[१] उपनाहः[२] प्रतिघनिष्यन्दो वैरानुबन्धकृद्द्रन्ध्रावधानता । सन्तोष्यमानस्याप्यधर्मदृढग्राहिता प्रदाशः ।[३] पराभिसन्धानाय मिथ्योपदर्शनकारी (8)परवञ्चना मायाः(या) ।[४] चित्तस्मयो मदः । सतुरूपकुलबलभोगयौवनारोग्यपरिजनसंपत्तिसंरागजः प्रमादास्पदं विविधेन्द्रियविभ्रमोत्पादजनकः ।[५] सत्त्वव्यापादो विहिंसा विहेठनेत्यर्थान्तरम् । उक्ताः षट् क्लेशमलाः ॥

---

[१] Cf. कतमं **साठेय्यं** ?…यं तत्थ सठता कक्करता…परिक्खत्तता…। *Vbh.* p. 358. शाठ्यं स्वदोषप्रच्छादनोपायसंगृहीतं चेतसः कौटिल्यम् ।…**शाठ्यं भ्रक्षाद्भिद्यते ।** स हि स्फुटमेव प्रच्छादयति न काक्वा ।… *Tvb.* 14. चित्तकौटिल्यं शाठ्यं येन यथाभूतं नाविष्करोति विक्षिपत्यपरिस्फुटं वा पतिपद्यते । *Akb.* v. 49 cd.

[२] Cf. पुब्बकालं कोधो अपरकालं उपनाहो ।…दळ्हीकम्मं कोधस्स अयं वुच्चति उपनाहो । *Vbh.* p. 493. आघातवस्तुबहुलीकारः **उपनाहः** । *Akb.* v. 49 cd. …प्रतिघांशिक एव वैराशयस्यानुत्सर्गः । *Asm.* p. 8.

[३] Cf. कतमो **पलासो** ? यो पलासो…विवादट्ठानं युगग्गाहो अप्पटिनिस्सग्गो अयं वुच्चति पलासो । *Vbh.* p. 357. सावद्यवस्तुदृढग्राहिता प्रदाशो येन न्यायसंज्ञप्तिं न गृह्णाति । *Akb.* v. 49 cd. प्रदाशः कतमः ? प्रतिघांशिकः क्रोधोपनाहपूर्वङ्गमश्चेतस आघातः । *Asm.* p. 8. प्रदाशश्चण्डवचोदाशिता ।…मर्मघट्टनयोगेन दशनशीलो दाशी तद्भावो दाशिता ।…अयं च क्रोधोपनाहपूर्वकश्चेतस आघातस्वभाव इति प्रतिघांशिक एव **न द्रव्यतो भिद्यते ।** *Tvb.* 14.

[४] Cf. कतमा **माया** ? इधेकच्चो कायेन…वाचाय…मनसा दुच्चरितं चरित्वा, तस्स पटिच्छादनहेतु पापिकं इच्छं पतिदहति…या एवरूपा मायां । *Vbh.* p.357. माया परवञ्चना…। इयं च सहिताभ्यां रागमोहाभ्यामभूतान् गुणान्प्रकाशयतस्तयोः समुदितयोः प्रज्ञप्यत इति…**प्रज्ञप्तित एव न द्रव्यतः ।** *Tvb.* 14.

[५] Cf. यः स्वधर्मेष्वेव रक्तस्य दर्पचेतसः पर्यादानात्कुशलधर्मक्रियाभ्यः प्रतिसंहारः मद **इत्याचार्यसंघभद्रः** *Sakv.* p. 140.

Also cf. **मदः स्वधर्मे रक्तस्य पर्यादानं तु चेतसः ।** *Ak.* II. 33 cd.

…संप्रहर्षणविशेषो मद **इत्यपरे ।** *Akb.* II. 33 cd.—**संप्रहर्षविशेषो मद इति** क्लिष्टसौमनस्यमभिप्रेतम् । तदेतन्नेच्छन्ति **वैभाषिकाः** । यस्मात्सौमनस्यमाद्वितीयाद् ध्यानात्, मदश्च त्रैधातुकः । *Sakv.* p. 141. Cf. **मदः स्वसंपत्तौ रक्तस्योद्धर्षश्चेतसः पर्यादानम् ।…उद्धर्षो हर्षविशेषः ।**…*Tvb.* 14.

मदः कतमः ? सर्वो मदः मादः उन्मादः क्षोभः संक्षोभः चित्तस्तब्धतानुविधायी चित्तात्मग्राहः । इति मदः । **मानः कतमः** ? सर्वो मानः…चित्तोत्थानाश्रयाश्चित्तात्मग्राहः । **मदमानयोः** को भेदः ? यः परान् अनुद्दिश्य आत्मधर्मानुरक्तस्य चित्तस्तब्धतानुधावनलक्षणः स उच्यते **मदः** । यः पुरानुद्दिश्य आत्मोत्थानाश्रयणलक्षणः स उच्यते **मानः** । इति भेदः । *Jpś.* p. 55. V. supra, p. 84, n. 6. The *Vibhaṅga* (p. 345) enumerates 28 different kinds of *mada*.

दश पर्यवस्थानान्युच्यन्ते ।

[373] म्रक्षेर्ष्याह्र्यनपत्राप्यस्त्यानमिद्धोद्धवक्रुधः ।
मात्स(१)र्यं कुकृतत्वं च दशधा पर्यवस्थितिः ॥[१]

एते ह्यनुबन्धाऽदार्ढ्यान्नानुशयाः । न ह्येषामनुबन्धदार्ढ्यमस्त्यनुशयास्तु दृढानुबन्धाः। तस्मादेतानि कालान्तरमात्रं चित्तपर्यवस्थापनात् पर्यवस्थानानीत्युच्यन्ते ।[२]

अवद्यं छादयते(तः) चित्तापलेपो म्रक्षः, चित्तं म्रक्षयतीति म्रक्षः ।[३] **परसम्पत्त्यमर्षणमीर्ष्या । अकार्यं कुर्वतः** [VI. B, 5. Fol. 117 a.](1)**स्वात्मान-**

---

[१] Cf. कानि पुनः पर्यवस्थानानीत्याह—"क्लेशा अपीहि पर्यवस्थानं कामरागपर्यवस्थानप्रत्ययदुःखम्' इति सूत्रे वचनात् । **प्रकरणशास्त्रे तु**

आह्रीक्यमनपत्राप्यमीर्ष्यामात्सर्यमुद्धवः ।
कौकृत्यं स्त्यानमिद्धं च पर्यवस्थानमष्टधा ॥

वैभाषिकन्यायेन पुनर्दश पर्यवस्थानान्येतानि चाष्टौ
क्रोधम्रक्षौ च । *Akb.* v. 47, 48 a.

Cf. **पर्यवस्थानान्यष्टौ ।** स्त्यानं मिद्धमौद्धत्यं कौकृत्यमीर्ष्या मत्सर्यमाह्रीक्यमनपत्राप्यं च । पुनः पुनः उद्वेगेन चित्तं पर्यवनह्यन्तीति पर्यवस्थानानि । तथा च शमथप्रग्रहनिमित्तभावनाकाले तत्सन्निश्रयब्रह्मचर्यादिशुद्धिसंगृहीतशीलकाले चित्तं पर्यवनह्यन्ति । *Asm.* p. 47.

ओकासदानवसेन किलेसानं चिते कुसलप्पवत्तिं परियादियित्वा ठानं परियुट्ठानं । तं समाधि विक्खम्भेति । *VmT.* p. 18. समुदाचारवसेन परियुट्ठन्तीति परियुट्ठानं । *Vbh A.* p. 509. Only seven *pariyuṭṭhānas* are mentiond in the Pāli Canon—तत्थ कतमे **सत्त परियुट्ठाना ?** कामरागपरियुट्ठानं पटिघ—मान—दिट्ठि—विचिकिच्छा—भवराग—अविज्जा परियुट्ठानं । इमे सत्त परियुट्ठाना । *Vbh.* p. 383. These seven *pariyuṭṭhānas* correspond to the seven *anuśayas*. For a controversy on the relation of these two, see *Kv.* xiv. 5—इदानि **अञ्ञो अनुसयो ति कथा** नाम होति । तत्थ यस्मा पुथुज्जनो कुसलाब्याकते चित्ते पवत्तमाने **सानुसयो ति वत्तब्बो, न परियुट्ठितो ति,** तस्मा अञ्ञो अनुसयो अञ्ञं परियुट्ठानं ति येसं लद्धि, सेय्यथापि **अन्धकानं ।** …**सानुसयो** ति आदि पन तस्मिं समये **अनुसयस्स अप्पहीनत्ता सानुसयो ति वत्तब्बं, अनुप्पन्नत्ता च परियुट्ठितो** ति अवत्तब्बत्तं दीपेति, न अनुसयपरियुट्ठानानं अञ्ञत्तं, तस्मा असाधकमेतं । *KvA.* xiv. 5. V. supra, pp. 222 ff.

[३] अवद्यप्रच्छादनं **म्रक्षः ।** *Akb.* v. 48 a. **म्रक्षः** आत्मनोऽवद्यप्रच्छादना । छन्दद्वेषभयादीन्निराकृत्य काले तद्धितैषिणा चोदकेन तत्र त्वमेवंकारीत्यनुयुक्तस्य मोहांशिक्यवद्यप्रच्छादना **म्रक्षः ।** *Tvb.* 14. तत्थ कतमो **मक्खो ?** यो मक्खो मक्खियना मक्खितत्तं निट्ठुरियं **निट्ठुरियकम्मं** अयं वुच्चति मक्खो । *Vbh.* p. 357.

मवेक्ष्यालज्जनाऽह्रीः ।[१] परमपेक्ष्यालज्जनाऽनपत्राप्यम् ।[१] कायाकर्मण्यता स्त्यानं तन्द्रीपर्यायवचनम्[२] । कायचित्ताकर्मन्य(ण्य)ता मिद्धं चित्ताभिसंक्षेपः स्वप्नाख्यः, स तु क्लिष्ट एव पर्यवस्थानम् ।[२] चित्ताव्युपशान्तिरौद्धत्यम् ।[3] परापकारनिमित्तोद्भवोऽपरित्यागयोगेण(न) चण्डीभावः क्रोधः ।[४] स्ववस्तुन्याग्रहो मात्सर्यम्,[५] मत्तो मा सरेदेतदिति निरुक्तिः ।[६] (2)कुकृतभावः कौकृत्यम् ।[७] इत्येतानि दश पर्यवस्थानानि ॥

अथैषामुपक्लेशमलपर्यवस्थानानां कः कस्य रागादेर्मूलक्लेशस्य निष्यन्दः ? तदिदमारभ्यते ॥

[374] एभ्योऽनुनयनिष्यन्दा आह्रीक्यौद्धततादयः ।[८]

इमे खलूपक्लेशाः रागणि(नि)ष्यन्दाः । यदुत—[९]अह्रीक्यौद्धत्यमदमात्सर्यकुहनालपनानैमित्तिकतानैष्पेशिकता लाभेन लाभस्य (3)निश्चिकीर्षता पापेच्छता महेच्छतेच्छुस्विता कामज्ञातिजनपदवितर्कपापमित्रतादयः ।[१०]

---

[१] V. supra, p. 73, n. 1.

[२] V. supra, p. 74, n. 1.

[3] Cf. औद्धत्यं चित्तस्याव्युपशमः ।···स पुनरेष रागानुकूलपूर्वहसितरसितक्रीडिताद्यनुस्मरतश्चेतसोऽव्युपशमहेतुः शमथपरिपन्थकर्मकः । *Tvb.* 14. See *DhsA.* III. 547.

[४] Cf. व्यापादहिंसावर्जितः सत्त्वासत्त्वयोराघातः क्रोधः । *Akb.* v. 48 a. वर्तमानमपकारमागम्य यश्चेतस आघातः सत्त्वासत्त्वविषयो दण्डदानादिसंनिश्रयदानकर्मकश्च **स क्रोध इति प्रज्ञप्यते ।** *Tvb.* 14.

[५] Cf. कौशलप्रदानविरोधी चित्तग्राहो मात्सर्यम् । *Akb.* v. 47. cd. **पञ्च मच्छरियानि ।** आवासमच्छरियं–कुल–लाभ–वण्ण–धम्ममच्छरियं । यं एवरूपं मच्छेरं···वेविच्छं कदरियं कटुकञ्चुकता पग्गहितत्तं चित्तस्स, इदं वुच्चति मच्छरियं । *Vbh.* p. 357. See *Aṅg.* III. 301.

[६] Cf. मच्छरयोगेन मच्छरी ति पवत्तमानं मच्छरिसद्दं गहेत्वा आह मच्छरभावो मच्छरियं ति । **निरुत्तिनयेन पन 'मा इदं अच्छरियं अञ्ञेसं होतु, मय्हमेव होतू ति मच्छरियं ति पोराणा ।** *VmT.* p. 494.

[७] Cf. कुच्छितं कतं कुकतं । तस्स भावो कुक्कुच्चं । तं पच्छानुतापनलक्खणं, कताकतानुसोचनरसं, विप्पटिसारपच्चुपट्ठानं, कताकतपदट्ठानं । *Dhs A.* III. 563. See *Dhs.* v. 95-96. V. supra, p. 80, n. 3.

[८] Cf. **रागोत्था अह्रीक्यौद्धत्यमत्सराः ।** *Ak.* v. 48 b.

[९] The Kośakāra mentions only three *upakleśas*, viz., *āhrīkya*, *auddhatya* and *mātsarya.* (*Akb.* v. 48 b.)

[१०] Cf.···मदो पमादो थम्भो सारम्भो अत्रिच्छता महिच्छता पापिच्छता सिङ्गं तिन्तिनं चापल्यं असभागवुत्ति अरति तन्दि विजम्भिका भत्तसम्मदो चेतसो च लीनत्तं कुहना लपना नेमि-

तत्राह्रीक्यानपत्राप्यमदा व्याख्यातलक्षणाः। लाभसत्कारयशोलोभादभूतगुणदर्शनार्थमीर्यापथविकल्पकृच्चैत्तविशेषः कुहना। लाभाद्यर्थमेव गुणपृ(प्रि)यालपनकृल्लपनाः(ना)। उपकरणार्थित्वानिमित्तदर्शनकृच्चैत्त(4)विशेषो नैमित्तकता। परगुणवद्दोषवचननिष्पेषणकृदेव चैतसिको नैष्पेषिकता। लब्धलाभख्यापनेनान्यलाभनिश्चिकीर्षणता [लाभेन लाभस्य निश्चिकीर्षता]। परैरभूतगुणसम्भावनेच्छा पापेच्छता। लाभसत्कारपरिवारप्रार्थना महेच्छता।[१]

लोभात्परैर्भूतगुणसम्भावनेच्छा इच्छुस्विता। कामरागप्रतिसंयुक्तो वितर्कः कामवितर्कः। ज्ञाति(5)स्नेहपरीतस्य तदावाहविवाहकृषिवाणिज्यराजसेवादीनां गृहसन्धारन(ण)मुपजीवनोपायानां राजतस्करादिभयप्रशमनोपायानां च वितर्काणां [वितर्कः] ज्ञातिवितर्कः। पर्याप्तजीवितोपकरणापरितुष्टस्य लोकचि(मि)त्रता, छन्दरागापहृतचेतसस्तेषां जनपदानां भूमिरमनी(णी)यतासुभिक्षक्षेमताप्रचुरगोरसेक्षु(6)विकारगोधूमशाल्यादीनां वितर्कणाज्जनपदवितर्कः। शीलदृष्ट्याचारविपन्नानां रतिकृता संसेवा पापमित्रता।

म्रक्षानपत्रपास्त्यानमिद्धाद्या मोहसंभवाः ॥[२]

तत(त्र) 'म्रक्षाण(न)पत्रपास्त्यानमिद्धाः'। 'आदि'ग्रहणाल्लयः, अमनसिकारा(रो)द(ऽ)नादरता, दौर्वचस्यं तन्त्री(न्द्री) भक्तासमतेत्येवमादयः।

तत्रं लयो[३] **नाम दोषगुणत्यागा(7)र्जनं प्रति आत्मपरिभवजश्चित्तसंकोचः। कुशलासमन्वाहार औदासीन्ययोगेणामनसिकारः। गुणेषु गुणवत्सु चाबहु-**

त्तिकता निप्पेसिकता लाभेन लाभं निजिगिंसनता सेय्योहमस्मीति मानो···ञातिवितक्कोजनपद-अमर-परानुद्दयतापटिसंयुत्तो-लाभसक्कारसिलोकपटिसंयुत्तो अनवञ्ञत्तिपटिसंयुत्तो वितक्को। *Vbh.* p. 345. V. supra, p. 306, n. 4. For the definitions of these terms, see *Vbh.* pp. 350-7 and *Vm.* I. 61-83.

[१] Cf. **अलब्धेच्छा महेच्छता।** *Ak.* VI. 6 d.

अलब्धे तु प्रणीतेऽपि वा प्रभूतेऽपि वा इच्छाभिलाषा **महेच्छतेत्याचार्यमतम्।** *Sakv.* p. 525.

[२] Cf. **म्रक्षे विवादः**

तृष्णानिःष्यन्द इत्येके। अविद्यानिःष्यन्द इत्यपरे। उभयोरित्यन्ये। यथाक्रमं ज्ञाताज्ञातानामिति।

अविद्यातः स्त्यानमिद्धानपत्रपाः। *Akb.* v. 48 cd.

यथाक्रमं ज्ञाताज्ञातानामिति। राजादिभिर्ज्ञातानां म्रक्षवतां पुद्गलानां **म्रक्षः तृष्णानिष्यन्दः।** मा मे लाभसत्कारो न भविष्यतीति। **अज्ञातानामविद्यानिष्यन्दः।** कर्मस्वकतामश्रद्धधानः तदवद्यं प्रच्छादयति। न परस्यान्तिके विशुद्ध्यर्थं देशयतीत्येव**मुभयनिष्यन्दो म्रक्ष** इत्येके। *Sakv.* p. 494.

[३] For *laya*, see *Tvb.* 11 abc.

मानवृत्तिरणा(ना)दरता। धर्मानुशास्तृषु सासूयितप्रतिमन्त्रकृद्दौर्वचस्यम्। जृम्भिकोद्गम(मा)दक्षिवर्त्मस्तम्भनिद्रास्पदः चैत्तविशेषः स्त्यानाख्या तन्द्री। कुशलपक्षानुकूलभोजनसमताप्रति(8)वेधश्चेतसो भक्तासमता ॥

[375] कौकृत्यं विचिकित्सोत्थं क्रोधाद्या द्वेषसम्भवाः ।[1]

कौकृत्यं खलु यथोक्तलक्षणं विचिकित्सासमुत्थितम् । क्रोधाद्या द्वेषनिष्यन्दाः । 'आदि'शब्दादीर्ष्या[ऽ]क्षान्त्युपनाहप्रदाशसंरम्भादयः ।

तत्रेर्ष्या पूर्वोक्तलक्षणा । सह्यासहिष्णुताऽक्षान्तिः । रन्ध्रावधानानिवृत्तिरुपनाहः । संतोषमानस्या(9)प्यदृढग्राहिता प्रदाशः । परान्विमर्दिषतः पाणिपादौष्ठकपोलशरीरकम्पयोनिर्भ्रान्तमनसः क्षोभः संरम्भः । निमित्तमात्रेण सातत्यविहेठनकृच्छृङ्गी । निस्तनतोऽभीक्ष्णविवाच(द)कृत्तंस्तत्त(कृत्यं स्त)म्भनता । काम्यान्विषयाननुस्मरतो रतिविपरीतमनसः प्रवृत्तिररतिः । चित्तापैशल्यमनार्जवता । व्यापादार्थ[VI. A, 5. Fol. 117 b.](1)प्रयुक्तो वितर्को व्यापादवितर्कः । विहिंसासंप्रयुक्तो वितर्कः [विहिंसावितर्कः] ।

प्र[मा]दस्तम्भमार्द्र(?)व्य मायाशाठ्यविजृम्भिकाः ॥

[376] कायदुष्ठूलताद्याश्च ज्ञेया व्यामिश्रसम्भवाः ।

तत्र दोषप्रवणस्य गुणानभिसंमुख्यं प्रमादः । पूजार्हेष्वसंन्न(न)तिः स्तम्भः । परानुरोधात्पापानुवृत्तिकृ[च्चै]तो(त्तो) मार्द्दक्ष्यम्(?)[2] । पराभिसन्धानाय मिथ्योपदर्शण(न)कृच्चैत्तो म(मा)या । चित्तकौटि(2)ल्यं शाठ्यम् । क्लेशसमुत्थितः कायस्यानमनविनमनकृच्चैत्तो विजृम्भिका । क्लेशकृता विविधालम्बनं(न)संज्ञा नानात्वसंज्ञाः । अतिवीर्यभक्तासमतानिर्ज(र्जा)तकायवैषम्याबाध(धः) कायदौष्ठुल्यम् । कल्याणमित्राणां गुणेष्वननुशिक्षा असभागानुवर्तनता । क्लेशसमुत्था परसम्पद्वितर्कणा, परोदयप्रतिसंयुक्तो वितर्कः । इत्येवमा(3)दयो व्यामिश्रसमुत्थिता द्रष्टव्याः ।

प्रदाशो दृक्परामर्शनिष्यन्दः शठता दृशः ॥[3]

पूर्वोक्तलक्षणः प्रदाशः परामर्शनिष्यन्दः । शाठ्यं दृष्टिसमुत्थितमिति ॥

अथ कः क्लेशः कया वेदनया संप्रयुज्यते ? तदिदमारभ्यते—

---

[1] Cf. कौकृत्यं विचिकित्सातः क्रोधेर्ष्ये प्रतिघान्वये । *Ak.* v. 49 ab.

[2] The reading of this word is doubtful.

[3] Cf. दृष्ट्यामर्शात्प्रदाशस्तु शाठ्यं दृष्टिसमुत्थितम् । *Ak.* v. 51 ab.

[377] सौमनस्येन रागस्य संप्रयोगः सुखेन च ।

रागः खलु सुखसौमनस्याभ्यां संप्रयुक्तः ।

द्वेषस्य दौर्मण(न)स्येन दुःखेन (4)च निगद्यते ॥[१]

संप्रयोग इति वर्तते । प्रतिघः खलु दुःखदौर्मण(न)स्याभ्यां संप्रयुक्तः ॥

[378] सर्वैर्मोहस्य

मोहस्य तु पञ्चभिरपीन्द्रियैः संप्रयोगः ।

वित्तिभ्यां चैतसीभ्यामसद्दृशः ।[२]

मिथ्यादृष्टिर्हि दौर्मण(न)स्यसौमनस्याभ्यां संप्रयुज्यते, पापकर्मणां पुण्यकर्मणां च यथाक्रमम् ।

काङ्क्षा च दौर्मण(न)स्येन

सांशयितो हि निश्चि(श्च)याकांक्षी(काङ्क्षी) (5)दौर्मण(न)स्येन संबध्यते ।

शेषाणां सुमनस्तया ॥[३]

शेषास्त्वनुशयाः—चतस्रो दृष्टयः,[४] मानश्च । पार्षाक(हर्षाका)रवृत्तित्वात्सौमनस्येन संप्रयुक्ताः ॥

[379] उपेक्षया तु सर्वेषाम्

सर्वेऽप्यविशेषेणानुशया उपेक्षया संप्रयुज्यन्ते । प्रवाहच्छेदकाले खलु क्लेशानामवश्यमुपेक्षा संमुखीभवति ।[५]

कामाप्तानामयं विधिः ।

---

[१] Cf. सुखाभ्यां संप्रयुक्तो हि रागः द्वेषो विपर्ययात् । *Ak*. v. 55 ab.

[२] Cf. मोहः सर्वैरसद्दृष्टिर्मनोदुःखसुखेन तु । *Ak*. v. 55 cd.

[३] Cf. दौर्मनस्येन कांक्षाऽन्ये सौमनस्येन कामजाः । *Ak*. v. 60 ab.

[४] चतस्रो दृष्टय इति । सत्कायदृष्टिः, अन्तग्राहदृष्टिः, दृष्टिपरामर्शः, शीलव्रतपरामर्शश्च । *Sakv*. p. 496.

[५] उपेक्षा सन्तिष्ठत इति विनाशावस्थायां मन्दत्वात् । *Sakv*. p. 496.

कामावचराणां खल्वनुशयानामेष विधिः द्रष्टव्यः ।

इतोऽन्यधातुजानां तु प्रतिभूम्यन्तरं स्वकैः ॥[१]

यस्यां यस्यां भूमौ यावदि(न्ती)न्द्रियाणि सन्ति तत्रापि चातुर्विज्ञानकायिकाश्चातुर्विज्ञानकायिकैर्मनोभूमिका मनोभूमिकैरेव यथासंभवम् ॥[२]

उक्ताः क्लेशानामिन्द्रियसंप्रयोगः । उपक्लेशानामुच्यते—

[380] ईर्ष्यया दौर्मण(न)स्येण(न) कौकृत्यस्य तथा क्रुधः ।
(7)प्रदष्टेश्चोपनद्धेश्च विहिंसायास्तथैव च ॥[3]

दौर्मण(न)स्येन खल्वीर्ष्याकौकृत्यक्रोधप्रदाशोपनाहविहिंसाः संप्रयुज्यन्ते ॥

[381] मात्सर्यं दौर्मण(न)स्येन सौमनस्येन कस्यचित् ।[४]

प्रार्थ्यमानो ह्यप्रयच्छन् परस्य जह्रीयमानो दुर्मणा(ना)यते । केचित्पुनः व्याचक्षते—सौमनस्येन संप्रयुज्यते लोभान्वयत्वेन हर्षाकारवर्तित्वात् ।

द्वाभ्यां(8) माया तथा शाठ्यं म्रक्षो मिद्धं तथैव च ॥[४]

दौर्मण(न)स्यसौमनस्याभ्यां मायाशाठ्यमिद्धानि संप्रयुज्यन्ते । कदाचिद्धि सुमनाः परं वञ्चयते । कदाचिद्दुर्मनाः । एवं यावत्स्वपि(पी)ति ॥

[382] मदस्तु सुमन[ः]स्कन्धसुखाभ्यां संप्रयुज्यते ।[५]

तृतीये ध्याने सुखेनाधस्तात्सौमनस्येनोर्ध्वं नोपेक्षया । 'तु' शब्दस्य विशेषणत्वादयं विशेषो लभ्यते ।

आ(9)ह्रीक्यमनपत्राप्य(प्यं) स्त्यानौद्धत्ये च पञ्चभिः ॥

---

[१] Cf. सर्वेऽप्युपेक्षया स्वैःस्वैर्यथाभूम्यूद्ध्र्वभूमिकाः । *Ak.* v. 56 cd.

[२] See *Sakv.* p. 496.

[3] Cf. दौर्मनस्येन कौकृत्यमीर्ष्या क्रोधो विहिंसनम् ।
उपनाहः प्रदाशश्च । *Ak.* v. 57 abc.

[४] Cf. मात्सर्यं तु विपर्ययात् ।
सौमनस्येनेत्यर्थः । लोभान्वयत्वेन हर्षाकारवर्तित्वात् *Akb.* v. 57 d.

[५] Cf. माया शाठ्यमथो म्रक्षो मिद्धं चोभयथा मदः ।
सुखाभ्यां सर्वगोपेक्षा चत्वार्यन्यानि पञ्चभिः ॥ *Ak.* v. 58.

पञ्चभिरपीन्द्रियैः आह्रीक्यानपत्राप्यस्त्यानौद्धत्यानि संप्रयुज्यन्ते । एषां चतुर्णां पर्यवस्थानानामकुशलमहाभूमिकत्वात् क्लेशमहाभौमिकत्वाच्च ॥

इदमिदानीं वक्तव्यम् । क एषां किं प्रहातव्यः? यानि तावद्दश पर्यवस्थानानि तेभ्यः—

[383] आह्रीक्यमनपत्राप्यं स्त्यानमिद्धं तथोद्धवः ॥[1]

[Folios 118—125 lost.][2]

……[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ पञ्चमाध्यायस्य तृतीयः पादः ॥]

……[पञ्चमोध्यायः समाप्तः ॥]

---

[1] Cf. तत्राह्रीक्यानपत्राप्यस्त्यानमिद्धोद्धवा द्विधा ॥
तदन्ये भावनाहेयाः स्वतन्त्राश्च तथा मलाः । *Ak*. v. 51 cd, 52 ab.

[2] Folios 118—125 (comprising the last portions of the third *pāda*, the entire fourth *pāda* of the Fifth *Adhyāya* and the first *pāda* of the Sixth *Adhyāya*) are lost. In these lost folios the *Adv*. might have discussed following topics, which are dealt with in the corresponding *Akb*. v. 53—70 :—

१ कति पुनरेषां (उपक्लेशानां) कुतस्त्या वेदितव्याः ?
२ कत्यकुशलाः कत्यव्याकृताः ?
३ अनुशयानां कति मनोभूमिकाः कति षड्विज्ञानभूमिकाः ?
४ पञ्च निवरणानि ।
५ विसभागधातुसर्वत्रगाणां निरोधमार्गदर्शनप्रहातव्यानां च सास्रवालम्बनानां यदालम्बनं परिज्ञायते तदा न प्रहीयन्ते । यदा प्रहीयन्ते तदालम्बनं न परिज्ञायते, इति कथमेषां प्रहाणम् ?
६ कतिविधश्च प्रतिपक्षः ?
७ प्रहीयमाणः क्लेशः कुतः प्रहातव्यः ?
८ चतुर्विधा दूरता ।
९ किं मार्गविशेषगमनात् क्लेशानां पुनः प्रहाणविशेषो भवति ? कतिषु कालेषु ?
१० नव परिज्ञाः परिज्ञाफलानि च ।
११ कः कतिभिः परिज्ञाभिः समन्वागतः ?
१२ कः कति परिज्ञास्त्यजति लभते वा ?

षष्ठोऽध्यायः

प्रथमः पादः ।....[१]

..........[VII. B, 1. Fol. 126 a]वौदारिकम्[२] । अतस्तत्पूर्वम् । ततो वेदनास्मृत्युपस्थानं द्वाभ्यां स्थूलतरं वेदनास्कन्धवत् । ततः चित्तस्मृत्युपस्थानं रूपादिप्रतिविज्ञप्तिस्वाभाव्यात्सुलक्षम् । धर्मास्तु संज्ञाचेतनाद्या संप्रयुक्ताः, प्राप्त्यादयः विप्रयुक्ताः, संस्कृताश्च परमसूक्ष्मास्तस्मादन्ते धर्मस्मृत्युपस्थानम् । अत एवोत्पत्तिक्रमोपि[३] तथैव ।

---

[१] A major portion of the First *pāda* of this *Adhyāya* is lost in the lost folios. (V. supra, p. 314, n. 2.) In these lost folios the *Adv.* might have discussed the following topics, which are dealt with in the corresponding *Akb.* vi. 1—15 :—

(१) दर्शनभावनामार्गौ किमनास्रवौ सास्रवौ वा ?
(२) कानि सत्यानि कति च ?
(३) कथं सर्वे सास्रवाः संस्कारा दुःखम् ?
(४) संवृतिसत्यं परमार्थसत्यं च । तयोः कि लक्षणम् ?
(५) कथं पुनस्तेषां दर्शनं भवति ?
(६) किं पुनरासां प्रज्ञानां लक्षणम् ?
(७) भावनायां प्रयुक्तस्य कथं भावना संपद्यते ?
(८) कः पुनरल्पेच्छतासंतुष्टयोः स्वभावः ?
(९) चतुर्भिरार्यवंशैः किं दर्शितं भगवता ?
(१०) भावनायां कथमवतारो भवति ?
(११) स्मृत्युपस्थानभावनानां कः स्वभावः ?

[२] The topic under discussion is *smṛityupasthāna* :—

निष्पन्नशमथः कुर्यात्स्मृत्युपस्थानभावनाम् ।
कायविच्चित्तधर्माणां द्विलक्षणपरीक्षणात् ॥ *Ak.* vi. 14.

[३] Cf. **यत्रोत्पत्तिः**

कस्मात्पुनरेवमुत्पत्तिः । औदारिकस्य पूर्वं दर्शनात् । *Akb.* vi. 15 c.

औदारिकस्य पूर्वं दर्शनादिति । कायस्त्रिभ्य औदारिकः । षड्विज्ञानविज्ञेयत्वादिति । तस्य पूर्वं दर्शनम् । द्वाभ्यां वेदना प्रकारौदारिकतयेति तदनन्तरं तस्या दर्शनम् । सूक्ष्मप्रचारत्वाद् दुर्विज्ञतया धर्माः सूक्ष्मा इत्यतस्तेभ्यः पूर्वं चित्तस्य दर्शनम् । अन्ते धर्माणामिति । *Sakv*. p. 531.

पञ्चभिरपीन्द्रियैः आह्रीक्यानपत्राप्यस्त्यानौद्धत्यानि संप्रयुज्यन्ते । एषां चतुर्णां पर्यवस्थानानामकुशलमहाभूमिकत्वात् क्लेशमहाभौमिकत्वाच्च ॥

इदमिदानीं वक्तव्यम् । क एषां किं प्रहातव्यः? यानि तावद्दश पर्यवस्थानानि तेभ्यः—

[383] आह्रीक्यमनपत्राप्यं स्त्यानमिद्धं तथोद्धवः ॥[1]

[Folios 118—125 lost.][2]

……[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ पञ्चमाध्यायस्य तृतीयः पादः ॥]

……[पञ्चमोध्यायः समाप्तः ॥]

---

[1] Cf. तत्राह्रीक्यानपत्राप्यस्त्यानमिद्धोद्धवा द्विधा ॥
तदन्ये भावनाहेयाः स्वतन्त्राश्च तथा मलाः । *Ak.* v. 51 cd, 52 ab.

[2] Folios 118—125 (comprising the last portions of the third *pāda*, the entire fourth *pāda* of the Fifth *Adhyāya* and the first *pāda* of the Sixth *Adhyāya*) are lost. In these lost folios the *Adv.* might have discussed following topics, which are dealt with in the corresponding *Akb.* v. 53—70 :—

१ कति पुनरेषां (उपक्लेशानां) कुतस्त्या वेदितव्याः ?
२ कत्यकुशलाः कत्यव्याकृताः ?
३ अनुशयानां कति मनोभूमिकाः कति षड्विज्ञानभूमिकाः ?
४ पञ्च निवरणानि ।
५ विसभागधातुसर्वत्रगाणां निरोधमार्गदर्शनप्रहातव्यानां च सास्रवालम्बनानां यदालम्बनं परिज्ञायते तदा न प्रहीयन्ते । यदा प्रहीयन्ते तदालम्बनं न परिज्ञायते, इति कथमेषां प्रहाणम् ?
६ कतिविधश्च प्रतिपक्षः ?
७ प्रहीयमाणः क्लेशः कुतः प्रहातव्यः ?
८ चतुर्विधा दूरता ।
९ किं मार्गविशेषगमनात् क्लेशानां पुनः प्रहाणविशेषो भवति ? कतिषु कालेषु ?
१० नव परिज्ञाः परिज्ञाफलानि च ।
११ कः कतिभिः परिज्ञाभिः समन्वागतः ?
१२ कः कति परिज्ञास्त्यजति लभते वा ?

षष्ठोऽध्यायः

प्रथमः पादः ।....[1]

..........[VII. B, 1. Fol. 126 a]वौदारिकम्[2] । अतस्तत्पूर्वम् । ततो वेदनास्मृत्युपस्थानं द्वाभ्यां स्थूलतरं वेदनास्कन्धवत् । ततः चित्तस्मृत्युपस्थानं रूपादिप्रतिविज्ञप्तिस्वाभाव्यात्सुलक्षम् । धर्मास्तु संज्ञाचेतनाद्या संप्रयुक्ताः, प्राप्त्यादयः विप्रयुक्ताः, संस्कृताश्च परमसूक्ष्मास्तस्मादन्ते धर्मस्मृत्युपस्थानम् । अत एवोत्पत्तिक्रमोपि[3] तथैव ।

---

[1] A major portion of the First *pāda* of this *Adhyāya* is lost in the lost folios. (V. supra, p. 314, n. 2.) In these lost folios the *Adv.* might have discussed the following topics, which are dealt with in the corresponding *Akb.* vi. 1—15 :—

(१) दर्शनभावनामार्गौ किमनास्रवौ सास्रवौ वा ?
(२) कानि सत्यानि कति च ?
(३) कथं सर्वे सास्रवाः संस्कारा दुःखम् ?
(४) संवृतिसत्यं परमार्थसत्यं च । तयोः कि लक्षणम् ?
(५) कथं पुनस्तेषां दर्शनं भवति ?
(६) किं पुनरासां प्रज्ञानां लक्षणम् ?
(७) भावनायां प्रयुक्तस्य कथं भावना संपद्यते ?
(८) कः पुनरल्पेच्छतासंतुष्ट्योः स्वभावः ?
(९) चतुर्भिरार्यवंशैः किं दर्शितं भगवता ?
(१०) भावनायां कथमवतारो भवति ?
(११) स्मृत्युपस्थानभावनानां कः स्वभावः ?

[2] The topic under discussion is *smṛityupasthāna* :—

निष्पन्नशमथः कुर्यात्स्मृत्युपस्थानभावनाम् ।
कायविच्चित्तधर्माणां द्विलक्षणपरीक्षणात् ॥ *Ak*. vi. 14.

[3] Cf. यत्रोत्पत्तिः

कस्मात्पुनरेवमुत्पत्तिः । औदारिकस्य पूर्वं दर्शनात् । *Akb*. vi. 15 c.

औदारिकस्य पूर्वं दर्शनादिति । कायस्त्रिभ्य औदारिकः । षड्विज्ञानविज्ञेयत्वादिति । तस्य पूर्वं दर्शनम् । द्वाभ्यां वेदना प्रकारौदारिकतयेति तदनन्तरं तस्या दर्शनम् । सूक्ष्मप्रचारत्वाद् दुर्विज्ञतया धर्माः सूक्ष्मा इत्यतस्तेभ्यः पूर्वं चित्तस्य दर्शनम् । अन्ते धर्माणामिति । *Sakv*. p. 531.

प्रायेण हि सत्त्वाः रूपाद्यु(2)पभोगरतत्वात् मोक्षविमुखा भवन्ति वेदनाभिनन्दित्वात्, सा चाभिनन्दना चित्तस्यादान्तत्वात्। तच्चादान्तत्वं रागादिभिः। श्रद्धादिभिश्च दान्तत्वं भवति[१]।

चतुष्कमपि चतुर्विपर्यासप्रतिपक्षत्वात्।[२] अशुचौ शुचिसंज्ञाविपर्यासप्रतिपक्षो हि कायपरीक्षा। दुःखे सुखसंज्ञाविपर्यासप्रतिपक्षो वेदनापरीक्षा। अनित्ये नित्य(3)संज्ञाविपर्यासप्रतिपक्षश्चित्तपरीक्षा, चित्तस्य लघुपरिवर्तित्वात्। अनात्मन्यात्मसंज्ञाविपर्यासप्रतिपक्षो धर्मपरीक्षा। धर्मस्मृत्युपस्थानस्य वैचित्र्यादेकात्मसंज्ञाविपर्यासो निवर्तते। 'आदि'शब्दाच्चतुराहार[३]-पञ्चस्कन्ध[४]प्रतिपक्षत्वाद्यथायोगम्॥

स तदानीं योगाचारः

[384] समस्तालम्बिनान्त्येन तान्वेत्य(त्त्य)ध्रुवतादिभिः।[४]

(4)सम्भिन्नालम्बनं हि धर्मस्मृत्युपस्थानं[६] त्रिचतुष्पञ्चस्कन्धालम्ब-

---

[१] Cf. यतो वा कामरागस्य कायोऽधिष्ठानं स च वेदनाऽभिलाषात्, स च चित्तस्यादान्तत्वात्, तत्क्लेशप्रहाणादिति **वैभाषिकाः**। *Akb*. VI. 15 c.

[२] Cf. **चतुष्कन्तु विपर्यासविपक्षतः**। *Ak*. VI. 15 d.

…पिण्डविभागतो धर्माणामनात्मकारित्वाद्धर्ममात्रं रहितमात्मनेति **धर्मनिर्वचनतः**। धर्मा इमे पृथग् पृथगवस्थिताः। न च कश्चित्स्वतन्त्र आत्मेति। तद्दर्शनाद्वा। *Sakv*. pp. 531-2. —यस्माच्चतुरो विपर्यासान् भिन्दन्ति तस्माच्चत्वार्येवोच्यन्ते स्मृत्युपस्थानानि न न्यूनाधिकानि। *Aam*. p. 113.

Cf. **कस्मा पन भगवता चत्तारो व सतिपट्ठाना वुत्ता** अनूना अनधिका ति? **वेनेय्यहितत्ता** तण्हाचरित-दिट्ठिचरित-समथयानिक-विपस्सनायानिकेसु…आरम्मणत्ता…। **सुभ-सुख-निच्च-अत्तभावविपल्लासप्पहानत्थं वा**…। न केवलञ्च विपल्लासप्पहानत्थमेव अथ खो चतुरोघयोगासवगन्थउपादानअगतिप्पहानत्थम्पि चतुब्बिधाहारपरिञ्ञत्थम्पि चत्तारो व वुत्ता। **अट्ठकथायं पन** सरणवसेन चेव एकत्थसमोसरणवसेन च **एकमेव सतिपट्ठानं, आरम्मणवसेन चत्तारो ति** एतदेव वुत्तं। *Vbh. A*. p. 215.

[3] **चत्तारो आहारा**। कबळिंकारो आहारो ओळारिको वा सुखुमो वा, फस्सो दुतियो, मनोसञ्चेतना ततिया, विञ्ञाणं चतुत्थं। *Dīgha*, XXX. III. 1. 11.

[४] *Rūpa-vedanā-saṁjñā-saṁskāra-vijñāna*.

[५] Cf. **स धर्मस्मृत्युपस्थाने समस्तालम्बने स्थितः।**
अनित्यदुःखतः शून्यानात्मतस्तान् विपश्यति॥ *Ak*. VI. 16.

[६] चतुर्थमुभयथेति। **धर्मस्मृत्युपस्थानमसंभिन्नालम्बनममिश्रालम्बनं भवति**। कायवेदनाचित्तव्यतिरिक्तधर्मालम्बनत्वसंभ[illegible]। **संभिन्नालम्बनमपि भवति**।…यदि कायं वेदनां

नत्वात्। पञ्चस्कन्धालम्बनमेव तु सामान्यालम्बनमिति निर्दिश्यते। तेन तु चत्वार्यपि स्मृत्युपस्थानान्यभिसमस्यानित्यतो दुःखतः शून्यतोऽनात्मतश्चेति चतुर्भिराकारैः प्रत्यवेक्षते। ततः पुनर्योगी कायं परमाणुसंघातक्षणसन्ताना(न)-भेदेन प्रभिद्य परमा(5)णुशः क्षणशश्च निरीक्षते। कललादीनां वा बीजाद्यशुध्य-(च्य)ङ्गाणि(नि) पृथङ्मिश्रीभूतानि च योगी रूपानि(णि) निमित्तेषु पश्यति। तदूर्ध्वं तस्यानित्यत्वादिभिः सामान्यलक्षणेन यथायोगं सर्वधर्मैकजातीयत्वाधिमोक्षे सत्यहंकारममकारविष्कम्भनप्रहानं(णं)[१] भवति। तत्प्रहाणाद्रागादयोपि दोषाः श्रुतचिन्तामयाभ्यां (6)ज्ञानाभ्यां विष्कम्भ्यते(न्ते)।

कतमेन पुनरत्र स्मृत्युपस्थानेन[२] क्लेशात्यन्तक्षयो भवति? ब्रूमः।

क्लेशात्यन्तक्षयोऽन्त्येन संभिन्नालम्बनेन वा ॥[३]

च द्वे पश्यति धर्मस्मृत्युपस्थानं तत् संभिन्नालम्बनम्। यदि कायं यावद्धर्मांश्च पश्यति तदपि तथैव। यदपि कायं वेदनां चित्तं धर्मांश्च समस्तान् पश्यति, तदपि संभिन्नालम्बनं धर्मस्मृत्युपस्थानमिति। *Sakv.* p. 532.

[१] यं ससेवाले उदके पक्खित्तेन घंटेन सेवालस्स विय तेन तेन लोकियसमाधिना नीवरणादीनं पच्चनीकधम्मानं विक्खम्भनं, इदं **विक्खम्भनप्पहाणं** नाम। **पाळियं** पन, "विक्खम्भनप्पहानञ्च नीवरणानं पठमज्झानं भावयतो" [*Paṭisambhidā*, I. p. 27.] ति नीवरणानं येव विक्खम्भनं वुत्तं, तं पाकटत्ता वुत्तं ति वेदितब्बं।··· *Vm.* XXII. 111.

अप्राप्तेऽनास्रवचित्ते शीलग्रहणभावनाभ्यां स्थापयति रागद्वेषमोहान् चित्तं भवत्यनुपादानमिति विष्कंभणप्रहाणं। *Aam.* p. 74.

[२] Cf. **एकायनो अयं भिक्खवे मग्गो सत्तानं विसुद्धिया** सोकपरिदेवानं समतिक्कमाय दुक्खदोमनस्सानं अत्थङ्गमाय ञायस्स अधिगमाय निब्बानस्स सच्छिकिरियाय, **यदिदं चत्तारो सतिपट्ठाना।** कतमे चत्तारो? इध भिक्खवे भिक्खु **काये कायानुपस्सी** विहरति···**वेदनासु वेदनानुपस्सी**···**चित्ते चित्तानुपस्सी**···**धम्मे धम्मानुपस्सी** विहरति आतापी सम्पजानो सतिमा, विनेय्य लोके अभिज्झादोमनस्सं। *Dīgha*, XXII. 1. See *Satipaṭṭhāna Vibhaṅga, Vbh.* pp. 193—207.

कुसलरासी ति भिक्खवे वदमानो चत्तारो सतिपट्ठाने···वदेय्य। **केवलो हायं भिक्खवे कुसलरासी यदिदं चत्तारो सतिपट्ठाना।** *S.* v. p. 146.

कुतः पुनरेतत् **स्मृत्युपस्थानभावनया विपश्यना संपद्यत इति?** **सूत्रात्।** **एकायनोऽयं भिक्षवो मार्ग यदुत स्मृत्युपस्थानानि।** केवलोऽयं कुशलराशिर्यदुत चत्वारि स्मृत्युपस्थानानीति वचनात्। *Sakv.* p. 529.

[३] **अथ स्मृत्युपस्थानानां कः स्वभावः?** विविधस्मृत्युपस्थानं **स्वभावसंसर्गालम्बनस्मृत्युपस्थानम्।** तत्र स्वभावस्मृत्युपस्थानम्—

प्रज्ञा श्रुतादिमयी

श्रुतचिन्ताभावनामयानि स्मृत्युपस्थानानि।

अन्ये संसर्गालम्बनाः क्रमः।

संसर्गस्मृत्युपस्थानेन खलु 'संभिन्नालम्बनेन अत्यन्तक्लेशप्रहाणं क्रियते। 'वा' शब्दो विकल्पार्थः ॥

यस्मात्—

[385] असंभिन्नार्थविषयं त्रयमेतद् द्विधेष्यते।
साम्रवानास्रवभेदात्। त(7)तः पुनः स्कन्धाननित्यादिना
तस्यैवं पश्यतः साक्षादुदयव्ययदर्शण(न)म् ॥
[386] स्कन्धेषु जायते पश्चाच्चक्रभ्रमरिकादिवत्।

अन्ये तत्सहभुवो धर्माः **संसर्गस्मृत्युपस्थानम्**। तदालम्बना **आलम्बनस्मृत्युपस्थानम्**। **स्वभावस्मृत्युपस्थानं प्रज्ञेति**। कुत एव तत्? 'काये कायानुपश्यना स्मृत्युपस्थानम्' इति वचनात्। का पुनरनुपश्यति? प्रज्ञा। कस्मात्प्रज्ञा स्मृत्युपस्थानमित्युक्तं भगवता? **स्मृत्युद्रेकत्वादिति वैभाषिकाः। एवं तु युज्यते। स्मृतिरनयोपतिष्ठत इति स्मृत्युपस्थानं प्रज्ञा,** यथा दृष्टस्याभिलपनात्। तद्यथा ह्यायुक्तमनिरुद्धेन—'तस्य काये कायानुपश्यिनो विहरतः कायालम्बनानुस्मृतिरुपतिष्ठति संतिष्ठते।' **भगवताऽपि**—'तस्य काये कायानुपश्यिनो विहरत उपस्थिता स्मृतिर्भवत्यसंमूढा' इति। **यत्र तूक्तं**—कथं भिक्षवश्चतुर्णां स्मृत्युपस्थानानां समुदयश्चास्तंगमश्च। आहारसमुदयात् कायस्य समुदयो भवत्याहारनिरोधात्कायस्यास्तंगमः' इति। **अत्र आलम्बनमेव स्मृत्युपस्थानमुक्तम्**। स्मृतिरत्रोपतिष्ठत इति कृत्वा। *Akb.* VI. 16 ab. See *Sakv.* pp. 529—531.

Cf. चत्वारि स्मृत्युपस्थानानि।··· **नित्यं स्मृतिरक्षिणी प्रज्ञोच्यते स्मृत्युपस्थानम्**। *Aam.* p. 113. स्मृत्युपस्थानानां···**स्वभावः कतमः? प्रज्ञा स्मृतिश्च**। *Asm.* p. 71. **सतिपट्ठाना ति तयो सतिपट्ठाना; सतिगोचरोपि, तिधा पटिपन्नेसु सावकेसु सत्थुनो पटिघानुनयवीतिवत्ततापि, सति पि।** 'चतुन्नं भिक्खवे सतिपट्ठानानं समुदयञ्च अत्थङ्गमञ्च देसिस्सामि···को पन भिक्खवे कायस्स समुदयो? आहारसमुदयो कायस्स समुदयो' ति आदिसू हि **सतिगोचरो सतिपट्ठानं** ति वुच्चति। तथा 'कायो उपट्ठानं, नो सति, सति उपट्ठानञ्चेव सति चा' ति अदीसु। तस्सत्थो पतिट्ठाति अस्मि ति पतिट्ठानं; का पतिट्ठाति? सति; **सतिया पट्ठानं सतिपट्ठानं**···। 'तयो सतिपट्ठाना यदरियो सेवति। तदरियो सेवमानो सत्था गणं अनुसासितुमरहती' ति एत्थ तिधा पटिपन्नेसु सावकेसु सत्थुनो पटिघानुनयवीतिवत्तता सतिपट्ठानं ति वुत्ता। तस्सत्थो **पट्ठपेतब्बतो पट्ठानं**।···चत्तारो सतिपट्ठाना भाविता···सत्तसम्बोज्झङ्गे परिपूरेन्ती' ति आदीसु पन **सति येव सतिपट्ठानं। अथवा सरणट्ठेन सति उपट्ठानट्ठेन पट्ठानं; इति सति च सा उपट्ठानञ्चाति सतिपट्ठानं; इदमिध अधिप्पेतं**। *Vbh A.* p. 224.

For various interpretations of the term *smṛityupasthāna*, see *The Bodhisattva Doctrine*, pp. 83 ff.

एषा च स्मृत्युपस्थानकुशलमूलनिष्ठा । तस्य खल्वनित्याकारमभ्यस्यतः सर्वसंस्कारेषु प्रतिक्षणमुदयव्ययदर्शण(न)मुत्पद्यते, 'चक्रभ्रमरिकादि[वदि]'ति।

स प्रतीत्यसमुत्पादं स्कन्धानां प्रत्यवेक्षते ॥

(8)तस्य प्रतिक्षण(णं) उत्पादव्ययं पश्यतः एवं भवति—कथं चैते संस्काराः सन्तानेन प्रवर्तन्ते नोच्छिद्यन्ते। स प्रतीत्यसमुत्पादं पश्यति त्रैयध्विकानां संस्काराणां हेतुफलसम्बन्धनियमावस्थितानाम्। ततः पुनः प्रतीत्यसमुत्पादम्॥

[387] सत्येषु पातयित्वतं तदा कश्चित्परीक्षते ।
तदनित्यत्वदुःखत्वे समवेत्य ततः पुनः ॥

एकैकमङ्गं सत्येषु पातयित्वाऽनित्यतो दुःखतश्च प्रत्यवेक्ष्य

[388] अकर्तृकान्निरीहांश्च प्रत्ययाधीनसंभवान् ।
दृष्ट्वा सर्वेष्वनात्मेति तत्त्वाकारं णि(नि)षेवते ॥

तत्र स्वतन्त्रकर्तृविरहित्वाच्छून्यान्पश्यति स्ववशेन विना सहकारिभिः प्रत्ययैः क्रियाकरणात्, पराधीनजन्मत्वाच्चा[ना]त्मानं पश्यति । 'दृष्ट्वा सर्वेष्वनात्मेति [VII. A, 1. Fol. 126 b.] (1)तत्त्वाकारं णि(नि)षेवते' ॥

तदभ्यस्यतः

[389] अनधिष्ठातृकत्वं च पारतन्त्र्यं च पश्य[तः]।

न ह्यत्र कश्चित्पुरुषो वा परमेष्ठी वेश्वरः स्वतन्त्रश्चैकश्च विद्यते, परतन्त्रजन्मप्रसरा एव सर्वसंस्काराः स्वसामान्यलक्षणाधिष्ठितस्वभावाः, इति परीक्ष्यमाणस्य

सर्वधर्मे[षु नै]रात्म्ये स्थिरा बुद्धिः प्रवर्तते ॥

यथोक्तम्—

"सर्वधर्मा अना(2)त्मानः पश्यति प्रज्ञया यदा ।
तदा निर्विद्यते दुःखादेष मार्गो विशुद्धये ॥"[१]

---

[१] Cf. सब्बे सङ्खारा अनिच्चा ति यदा पञ्ञाय पस्सति ।
अथ निब्बिन्दति दुःखे, एस मग्गो विसुद्धिया ॥
सब्बे सङ्खारा दुक्खा ति यदा पञ्ञाय पस्सति ।
अथ निब्बिन्दति दुःखे एस मग्गो विसुद्धिया ॥
सब्बे धम्मा अनत्ता ति यदा पञ्ञाय पस्सति ।
अथ निब्बिन्दति दुःखे एस मग्गो विसुद्धिया ॥ *Dhammapada*, xx. 5-7.

सब्बे सङ्खारा ति कामभवादिसु उप्पन्ना खन्धा तत्थ तत्थेव निरुज्झनतो अनिच्चा ति यदा विपस्सना पञ्ञाय पस्सति ‥। दुक्खा ति पतिपीळनट्ठेन‥ । सब्बे धम्मा ति पञ्चक्खन्धाव अधिप्पेता । अनत्ता ति जीयन्तु मा मीयन्तु ति वसे वत्तेतुं न सक्कोति अवसवत्तनट्ठेन अत्तसुञ्ञा अस्सामिका अनिस्सरा ति अत्थो । *Dhammapada A.* xx. 5-7.

अथ कस्मादिह शून्याकारो न देशितः ?[१] तदुच्यते—

[390] स्वभावेनाविशून्यत्वा[द्] धर्ममुद्रा ह्नु(उ)दाहृते(ता) ।
तदुक्त्या च तदुक्तत्वाच्छून्याकारो ण(न) देशितः ॥

न खलु संस्काराः स्वभावेन शून्याः पृथिव्यप्तेजोवायुप्रभृतीनां काठिन्यादिलक्षणस्य धृत्यादिक्रियायाश्च प्र(3)त्यक्षत्वात् । रागादीनां दोषाणां श्रद्धादीनां च गुणानां चित्तमाल्यशुद्धिकरणसामर्थ्यात् । तेषां च सामर्थ्यं यथा द्रव्याणां हरीतकीचित्रकदन्तीप्रभृतीनां रसवीर्यविपाकप्रभावादिदर्शणा(ना)त् सस्वभावप्रभावाः सर्वधर्माः धर्ममुद्रायाश्च 'शून्याकारो' णो(नो)क्तः । तस्मादिहापि नोच्यते । अथवा 'तदुक्त्या च तदुक्तेः ।' अनात्माकारो(4)क्त्या च शून्यताप्युक्ता भवति ॥

तदेवं नैरात्म्ये स्थिरमतिः

[391] गोत्रद्वारसमूहादीन् धात्वादीनां यथायथम् ।
स्वसाधारणचिह्नाभ्यां सदतोपपरीक्षते ॥

धात्वायतनस्कन्धेषु स्वसामान्यलक्षणपरिच्छिन्नेषु

[392] प्रतिस्कन्धं ततस्तस्य स्वाभाव्यादिषु तत्त्वतः ।
क्रमेण जायते पश्चात्कौशलं स्थानसप्तके ॥

"रूपं यथाभूतं प्रजानाति (5)रूपसमुदयं रूपनिरोधं रूपनिरोधगामिनीं प्रतिपदं रूपस्यास्वादं रूपस्यादीनवं रूपस्य निःसरणमेवं यावद्विज्ञानस्य ।" उक्तं हि भगवता—"सप्तस्थाने कुशलो भिक्षुः त्रिविधार्थोपपरीक्षी क्षिप्रमेवास्रवक्षयं करोति"[२] इति ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ षष्ठस्याध्यायस्य प्रथमः पादः ॥

---

[१] This discussion is not found in *Akb.* V. supra, pp. 262 ff.

[२] Cf. सत्तट्ठानकुसलो भिक्खवे भिक्खु तिविधूपपरिक्खी इमस्मिं धम्मविनये केवली वुसितवा उत्तमपुरिसो ति वुच्चति ।

कथं च भिक्खवे भिक्खु सत्तट्ठानकुसलो होति ? इध भिक्खवे भिक्खु रूपं पजानाति, रूपसमुदयं···रूपनिरोधं···रूपनिरोधगामिनिं पटिपदं···रूपस्स अस्सादं···रूपस्स आदीनवं··· रूपस्स निस्सरणं पजानाति । वेदनं···सञ्ञं···संखारे···विञ्ञाणं···पजानाति ।···

कथं च भिक्खवे भिक्खु तिविधूपपरिक्खी होति । इध भिक्खवे भिक्खु धातुसो उपपरिक्खति । आयतनसो उपपरिक्खति । पटिच्चसमुप्पादसो उपपरिक्खति । *S*. III. pp. 61-65.

षष्ठाध्याये

द्वितीयपादः ।

(6)तस्यैदानीं योगिनः स्मृत्युपस्थानादिषु कुशलमूलेषु दृष्टपूर्वं ज्ञेयं सत्याकारव्यवस्थानेनानुचितश्रुतचिन्तामयाकारसमुदाचारण्या(न्या)येण(न)

[393] निर्मथ्नतः क्रमेना(णा)स्य दुःखसत्यभवारणिम् ।
श्रद्धावीर्यसहायस्य तत्त्वज्ञानानलार्थिनः ॥

[394] आकारपतितं ज्ञानं ततः शमनियामकम् ।
भावनामयमूष्माख्यं जा(7)यते सानुवर्तकम् ॥[१]

तत्खलूष्मगतं[२] प्रकर्षितत्वात् षोडशाकारम्, प्रतिसत्यं चतुराकारत्वात्, सामान्यं धर्मस्मृत्युपस्थानं भविष्यस्यार्यमार्गाग्नेर्निमित्तभूतं धूमाग्निवत्। तस्मिंश्च लब्धे शमः[3] प्रत्यासन्नीभवति। अतस्तत् 'शमनियामकं भावनामयम्' इति। ध्यानसंवराश्रितसमाधिबलेन दृढीभावाच्चित्तं भावयति (8)चम्पकपुष्पतिलतैलवदिति । 'सानुवर्तकं' च पञ्चस्कन्धस्वभावं नैरात्म्यबुद्धिपरितोषाच्चानुस्कन्धशः प्रसाद उत्पद्यते—स्कन्धमात्रकमेवेदं सत्कायदृष्टेर्वस्तुभूतं नात्रात्मास्त्यात्मीयं वा ॥

[395] ततस्तथैव मूर्धानो मिथ्यादृष्ट्युपघातिनः ।
ऊष्मभ्योऽधिकसामर्थ्याद्रत्नश्रद्धाविवर्धिनः ॥[४]

तदूर्ध्वं ततो मूर्धा(9)नतस्थैव षोडशाकाराः ।[५] तेषां पुनरयं विशेषः ।

---

[१] Cf. **तत ऊष्मगतोत्पत्तिः**

तस्माद्धर्मस्मृत्युपस्थानादेवमभ्यस्तात् क्रमेणोष्मगतं नाम कुशलमूलमुत्पद्यते । ऊष्मगतमिवोष्मगतम् । क्लेशेन्धनदहनस्यार्यमार्गाग्नेः पूर्वरूपत्वात् ।

तच्चतुः सत्यगोचरम् । *Ak*. vi. 17 ab.

[२] **ऊष्मगत**मित्यूष्मप्रकारं कुशलमूलम् । **प्रकर्षकत्वादिति** प्रारम्भकत्वादित्यर्थः । *Sakv*. p s 33. ऊष्मा कतमः। सद्धर्मविनयेऽल्पश्रद्धासमादानम् । *Jpś*. p. 7.

V. infra, *Adv. kārikā* 421 ab, notes.

[3] see *Śikshā*, p. 119.

[४] Cf. **षोडशाकारमूष्मेभ्यो मूर्धानस्तेऽपि तादृशाः ।** *Ak*. vi. 17 cd.

[५] मृदुमध्याधिमात्रक्रमाभिवृद्धेभ्य ऊष्मभ्यो मूर्धनि उत्पद्यन्ते । यादृशा ऊष्मणश्चतुःसत्यालम्बनाः षोडशाकाराश्च । उत्कृष्टतरत्वात्तु नामान्तरं चलकुशलमूलमूर्धत्वात् मूर्धानः ।

मिथ्यादृष्टिशक्त्युपघातित्वम्, तदुपघातात् कुशलमूलानि न समुच्छिन्दन्ति।[१] **ऊष्मभ्योऽधिको विशेषः रत्नत्रयश्रद्धाविवर्धिनश्च। तेषु खल्वधिमात्रेण बुद्धादिषु रत्नेषु त्रिष्वाकारतः प्रसादोऽभिवर्धते, न स्कन्धशः, प्रागेवोष्मगतेषु तद्बुद्धिपरितोषात्। मूर्धसू**······[Folio No. 127 lost][२]······

Akb. v. 17 cd. —**मूर्धशब्दोऽयं** प्रकर्षपर्यन्तवाची। तथा हि लोके वक्तारो भवन्ति। मूर्धगता खल्वस्य श्रीरिति। द्वे हि कुशलमूले चले। ऊष्मगतमूर्धलक्षणे परिहाणिसंभवात्। द्वे अचले क्षान्तिलौकिकाग्रधर्मलक्षणे विपर्ययात्। तत्र तयोर्यन्मृदु **तदूष्मगतम्**। यदधिमात्रं ते **मूर्धानः**, अचलयोरपि यन्मृदु सा **क्षान्तिः**। यदधिमात्रं ते **लौकिकाग्रधर्माः**। *Sakv*. p. 532.

Cf. **मूर्धा** कतमः। बुद्धघर्मसंघेष्वल्पप्रमाणश्रद्धोत्पादः। यथा **पारायणमाणवक**मवोचद् भगवान्—

बुद्धे धर्मेऽथ संघे चेत्प्रसादोऽल्पोऽपि जायते।
मूर्धधर्मं गतो नाम विज्ञातव्यः स माणव॥

मूर्धपातः कतमः।....

एवं त्रिधर्मतो यदि परिहीयेत पूरुषः।
वदामि मूर्धपतितं ज्ञेयं नाम तथाविधम्॥ *Jpś*. p. 6.

The terms *mūrdha* and *mūrdha-pāta* occur with a different meaning in *Suttanipāta* : **मुद्धं मुद्धातिपातं** च बावरी परिपुच्छति।
तं व्याकरोहि भगवा कंखं विनय नो इसे।
अविज्जा मुद्धा ति जानाहि, विज्जा मुद्धाधिपातिनि।
सद्धासतिसमाधीहि छन्दविरियेन संयुता॥ *Suttanipāta*, 1025-26.

[१] V. supra, p. 167, n. 1.

[२] Folio No. 127 is lost. In this lost folio the *Adv.* might have discussed the following topics, which are discussed by the Kośakāra in *Akb.* vi. 18-25 ab.

(१) मूर्धानः।
(२) उभयेषां (ऊष्म-मूर्ध) विन्यसनं वर्धनं च।
(३) त्रिप्रकारा क्षान्तिः (मृद्वी-मध्या- अधिमात्रा)।
(४) क्षान्तिः कामावचरदुःखालम्बनैव।
(५) लौकिकाग्रधर्माः।
(६) चतुर्विधमपि निर्वेधभागीयं भावनामयं षड्भौमं च।
(७) एतानि चत्वारि कामाश्रयाणि।
(८) कथं निर्वेधभागीयानां त्यागः?
(९) एते पुनर्विहानिपरिहाणी किं स्वभावे?
(१०) निर्वेधभागीयानि त्रिगोत्राणि श्रावकादिभेदात्।
(११) मोक्षभागीयानि कर्माणि।

[VII. B, 2. Fol. 128 a]·········[१]

[396d.] ····नेत्वस्मिन्नुभयत्रापि पश्चिमा ॥[२]

विन्यासे विवर्धने चैव धर्मस्मृत्युपस्थानां(नं) प्रत्युत्पन्नं तदेव चानागतं भाव्यते ॥[3]

[397] भाव्यते स्कन्धदृक्त्वादौ न्न(न) तन्निर्वाणदर्शिनः ।

न खलु स्कन्धोपरमदर्शिनः स्कन्धमतिर्भाव्यते ।

आकारांस्तुल्यजातीयात्(न्) सर्वत्रात्र तु निर्दिशेत् ॥[४]

यादृशाः प्रत्युत्पन्नास्तादृशा एवानागता भाव्यन्ते ॥

[398] द्रष्टव्याऽन्यतरा (2)ताभ्यः प्रत्युत्पन्ना विवर्धने ।
चतसृभ्योश्च(भ्यस्त्व)न्यतमा प्रत्युत्पन्ना विवर्धते(ने) ॥[५]

---

[१] V. supra. p. 322, n. 2.

[२] The topic under discussion is *ākaraṇa* of *ūshmagata* and *mūrdha* by *dharmasmṛityupasthāna*. **किमिदमाकरणम् ? सत्येष्वाकाराणां प्रथमतो विन्यसनम् ।··· चतुर्भिरपि स्मृत्युपस्थानैरेषां वर्धनम् ।** *Akb.* vi. 18 ad. The Kośakāra deals with this topic in brief in *Akb.* vi. 19 d (corresponding to *Ad. kārikās* 396—408).

[३] Cf. तत्र त्रिसत्यालम्बनोष्मगताकरणे **धर्मस्मृत्युपस्थानं प्रत्युत्पन्नमनागतानि चत्वारि भाव्यन्ते ।** निरोधसत्यालम्बने तदेवोभयथा । *Akb.* vi. 19 d.

—त्रिसत्यालम्बनोष्मगताकरण इति । दुःखसमुदयमार्गालम्बनोष्मगताकरणे । **धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम् ।** यत्नजन्यस्य कार्यस्याकरणे समस्तालम्बनत्वेन धर्मस्मृत्युपस्थानस्यैव समर्थत्वात् । प्रतिनियतालम्बनत्वेन हि कायस्मृत्युपस्थानादीन्यसमर्थानीति । **अनागतानि चत्वारि भाव्यन्त** इति । यस्मात्स्मृत्युपस्थानेन कायवेदनादयोऽपि दुःखसत्यादिसंगृहीता गृह्यन्ते । कायस्मृत्युपस्थानादीनि च पूर्वप्रतिलब्धानि भवन्तीत्यतश्चत्वार्यपि भाव्यन्ते प्राप्त्युत्पादादिति । निरोधसत्यालम्बूने **तदेवोभयथेति ।** निरोधसत्यालम्बने ऊष्मगताकरणे धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम्, तदेव चानागतं भाव्यते । न कायस्मृत्युपस्थानादीनि । निरोधसत्ये कायाद्यभावात् । *Sakv.* pp. 535—536.

[४] Cf. सर्वत्राकाराः सभागाः । *Akb.* vi. 19 d.—**सर्वत्राकारा सभागा इति ।** त्रिसत्यालम्बनस्य निरोधसत्यालम्बनस्य चोष्मगतस्याकरणे सदृश एवाकारा भाव्यन्ते । दुःखसत्यालम्बने दुःखसत्याकारा एव चत्वारो भाव्यन्ते । न समुदयसत्याकाराः ।··· *Sakv.* p. 536.

[५] Cf. विवर्धने चतुर्णामन्यतमदनागतानि चत्वारि । *Akb.* vi. 19 d.—**विवर्धन** इति त्रिसत्यालम्बने । कायस्मृत्युपस्थानादीनामन्यतमत् **प्रत्युत्पन्नं** संभवति । *Sakv.* p. 536.

[399] अनागतास्तु भाव्यन्ते चतस्रोऽप्यत्र निश्चयात् ।
मोक्षेऽन्त्ये संमुखीभूता[ः] समग्राः खल्वनागताः ॥[१]

निरोधे तु प्रत्युत्पन्नं धर्मस्मृत्युपस्थानं चत्वारि त्वनागतानि भाव्यन्ते ॥

[400] आकाराः खलु सर्वेपि भाव्यन्ते गोत्रलाभतः[२] ।

गोत्रानि(णि) खलु लब्धानि निरोध(3)सत्यतोऽत्र षोडशाप्याकारा भाव्यन्ते ।

गोत्रलाभे तु विज्ञेया सभागाकारभावना ॥

प्रथमयोः सत्ययोः गोत्राणि आलम्बनानि । तेनात्र न विसभागाकारभावना ॥

[401] सर्वत्राकिरणे मूर्ध्नो निरोधाकिरणैधने ।
धर्माख्याः संमुखीभूताश्चतस्रः खल्वनागताः ॥

मूर्धाकारविन्यासे 'निरोधाकिरणैधने' च धर्मस्मृत्युप(4)स्थानं प्रत्युत्पन्नम्, चत्वार्यनागतानि भाव्यन्ते ॥[3]

[402] आकाराः सकलास्तत्र भाव्यन्ते गोत्रलाभतः ।
सर्वाभ्योऽन्यतरोत्पन्ना[ः] सत्यत्रयविवर्धने ॥[४]

---

[१] Cf. तत्रैव निरोधालम्बनेऽन्त्यमनागतानि चत्वारि । *Akb*. vi. 19. d.—निरोधसत्यालम्बनेऽन्त्यं प्रत्युत्पन्नं संभवति । *Sakv*. p. 536.

[२] Cf. आकाराः सर्वे लब्धत्वाद् गोत्राणाम् । *Akb*. vi. 19 d.—**आकाराः सर्वेऽपि षोडशापि भाव्यन्ते । किं कारणम् ? लब्धत्वाद् गोत्राणाम् ।** सम्भवतश्चतुःसत्यालम्बनकायस्मृत्युपस्थानादिजातीनां लब्धत्वादित्यर्थः । *Sakv*. p. 536. The Kośakāra deals in detail with *gotras*—निर्वेधभागीयानि त्रिगोत्राणि श्रावकादिगोत्रभेदात् *Akb*. vi.23 c. See *Akb*. vi. 57 and 58. Yaśomitra gives the following views : **तत्र केचिदेवं वर्णयन्ति कुशलमूलानि गोत्रमिति ।···अन्ये पुनराहुः पृथग्जनावस्थायामारभ्येन्द्रियभेदो गोत्रमिति । सौत्रान्तिकाः पुनर्वर्णयन्ति—बीजं सामर्थ्यं चेतसो गोत्रमिति ।** *Sakv*. pp. 593-4. On *gotta*, see *The Bodhisattva Doctrine*, pp. 51 ff. and *AMBRH*. pp. 55, 84-7.

[3] Cf. मूर्धाकरणे चतुःसत्यालम्बनेऽपि निरोधालम्बनवर्धने चान्त्यमनागतानि चत्वारि । *Akb*. vi. 19 d.—**मूर्धाकरणे** सर्वत्रापि धर्मस्मृत्युपस्थानमेव प्रत्युत्पन्नम् । कायादिस्मृत्युपस्थानामाकरणेऽसामर्थ्यात् । **निरोधालम्बनविवर्धने**ऽप्यन्त्यं धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम् । इतरेषामयोगात् । *Sakv*. p. 536.

[४] Cf. आकाराः सर्वे । त्रिसत्यालम्बनवर्धने चतुर्णामन्यतमदनागतानि चत्वारि । *Akb*. vi. 19. d.

[403] अनागताश्चतस्रस्तु भाव्यन्ते तत्र निश्चयात् ।
आकाराः सकला ज्ञेयाः क्षान्तिविन्यसने श्रि(शृ)णु ॥[१]

[404] सर्वत्रान्त्याः समुत्पन्नाश्चतस्रः खल्वनागताः ।
आकाराः सकलास्तत्र भाव्यन्ते चाप्यना(5)गताः ॥

[405] प्रत्युत्पन्नाग्र्यधर्मेषु धर्माख्या स्मृत्युपस्थितिः ।
अनागतास्तु भाव्यन्ते चतस्रस्तेषु निश्चयात् ॥[२]

[406] आकाराः खलु चत्वारो दृङ्मार्गसदृशत्वतः ।[3]
यथोष्मकिरणे तद्वद् द्रष्टव्यं दृष्टिवर्त्मनि ॥

[407] अन्त्यां मार्गान्वयज्ञाने प्रत्युत्पन्नां विनिर्दिशेत् ।
चतस्रोऽनागतास्तद्वत् षोडशाकारभावनात्(ः) ॥

[408] तदूर्ध्वमपि चार्यस्य सर्वापूर्वगु(6)णोदये ।
श्रुतचिन्तामयं हित्वा सूक्ष्मसूक्ष्मं व्यपोह्य च ॥

एवं तावदार्यस्य स्मृत्युपस्थानभावना द्रष्टव्या ॥

[409] बालस्यारम्भमार्गे तु चतुर्भूमिविनिर्जयैः ।
भूतामन्यतरां ताभ्यश्चतस्रः खल्वनागताः ॥

[410] आनन्तर्यपथे मुक्तावन्त्यां सर्वास्त्वनागताः ।
अन्त्ये ध्याने प्रयोगादिमार्गेष्वष्टासु पूर्ववत् ॥

---

[१] Cf. **क्षान्तीनां** सर्वत्र चान्त्यम् । *Akb.* vi. 19 d.—आकरणे विवर्धने चान्त्यं धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम् । तथा ह्युक्तम्—सर्वस्याः क्षान्त्या धर्मेण वर्धनमिति । *Sakv.* p. 536.

[२] Cf. **अग्रधर्मेष्व**न्त्यमनागतानि चत्वारि । *Akb.* vi. 19 d:—**अग्रधर्मेषु** सम्मुखीक्रियमाणेष्वन्त्यं धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम् । अनागतानि चत्वार्यनुत्पत्तिधर्माण्येव प्राप्यन्ते । *Sakv.* p. 536.

[३] Cf. **आकाराश्चत्वार एव । अन्याभावाद्दर्शनमार्गसादृश्याच्च ।** *Akb.* vi. 19 d.—**आकाराश्चत्वार एवेति ।** अनित्यदुःखशून्यानात्माकाराः । **दर्शनमार्गसादृश्याच्चेति ।** दुःखाकारा एव चत्वारो भाव्यन्ते । कस्मात् ? दर्शनमार्गसादृश्यात् । दर्शनमार्गे ह्यस्य सत्यस्य दर्शनं भवति । तदाकारा एव भाव्यन्ते । **दर्शनमार्गसदृशा ह्यग्रधर्माः** ।··· *Sakv.* p. 536.

[411] तिस्रस्तु नवमे विद्यात् (7)मौलभूमिप्रवेशतः ।
सामन्तकप्रयोगे तु चतस्रोऽन्त्याथवा भवेत् ॥

[412] दिव्याक्षिश्रुत्यभिज्ञायां विमोक्षादौ तथैव चः(च) ।
प्रथमां संमुखीभूतां चतस्रः खल्वनागताः ॥

[413] परि(र)चित्ते तृतीयास्तु(या तु) चतस्रश्चाप्यनगताः ।
प्राङ्निवासाप्रमाना(णा)नामन्त्यां सर्वास्त्वनागताः ॥

[414] आरूप्यानां(णां) विमोक्षाणां तिसृभ्योऽन्यतमां वदेत् ।
सं(8)मुखे नाम जातास्तु तिस्र एव विनिर्दिशेत् ॥

[415] आरूप्यकृत्स्नयोस्त्वन्त्यां प्रत्युपन्नामुदाहरेत् ।
तिस्रः खल्वसमुत्पन्नाः कथयन्नियमेन तु ॥

[416] आर्यस्य खलु वैराग्यप्रयोगे क्षपने(णे) पि च ।
सर्वेभ्योऽन्यतराभूताश्चतस्रश्चाप्यनागताः ॥

[417] आनन्तर्यपथे मुक्तावन्त्याः सर्वास्त्वनागताः ।
रि(ऋ)ध्यादौ तु गुणाः सर्वमनार्यस्यैव निर्दिशेत् ॥

[418] (9)अन्त्यपूर्वनिवासादौ स(च) धर्मप्रतिसंविदि ।
तथापरसमाध्यादावरणायां तथैव च ॥

[419] आरूप्याख्यविमोक्षादौ संज्ञासूक्ष्मोदये तथा ।
सर्वाभ्योऽन्यतराभूताश्चतस्रः खल्वनागताः ॥

[420] ब्रूयात्तु सूक्ष्मसूक्ष्मेऽन्त्यां भूतां तिस्रस्त्वनागताः ।
समासेनेयमाख्याता स्मृत्युपस्थानभावना ॥

निर्वेधभागीयानधिकृत्य [VII. A, 2. Fol. 128 b.]

[421] (1)एतन्निर्वेधभागीयं चतुर्धा भावनामयम् ।[१]

---

[१] Cf. इति निर्वेधभागीयं चतुर्धा भावनामयम् । *Ak*. vi. 20 ab.
इत्येतानि चत्वारि निर्वेधभागीयानि कुशलमूलानि यदुत ऊष्मगतं मूर्धानः क्षान्तयोऽग्रधर्माश्च । *Akb*. vi. 20 ab.

परमार्थदक्षिणीयभिक्षुसङ्घप्रवेशद्वारभूतत्वात्[१] **भावनामयं न श्रुतमयं चिन्तामयम् । कुतः पुनरुपपत्तिप्रातिलम्भिकं भविष्यतीत्येतच्च सन्धाय**

Also cf. **निर्वेधभागीयानि** कुशलमूलानि ऊष्मगतः मूर्धानः सत्यानुकूलक्षान्तिः लौकिकाग्रधर्मश्च । **ऊष्मगतं** कतमत् । प्रत्यात्मं सत्येष्वालोकलब्धः समाधिः प्रज्ञासंयोगश्च । **मूर्धानं** कतमत् । प्रत्यात्मं सत्येष्वालोकवृद्धः समाधिः प्रज्ञासंयोगश्च । **सत्यानुकूलक्षान्तिः** कतमा । प्रत्यात्मं सत्येष्वेकदेशप्रविष्टानुसृतः समाधिः प्रज्ञा संयोगश्च । **लौकिकाग्रधर्मः** कतमः । प्रत्यात्मं सत्येष्वानन्तर्यचित्तसमाधिः प्रज्ञासंयोगश्च । *Asm.* pp 65—66.

ध्यानविधिषु पौर्विको भवति चित्तस्यैकायतनप्रतिसंयोगः ।···क्रमेण प्रत्यवेक्षते कायं वेदनां चित्तं धर्मान् इत्यवतरन् धर्ममनःस्थितौ सुविनीतैकाग्रचित्तस्य पारमार्थिकप्रज्ञाधिगमः । प्रत्यवेक्षते सर्वे संस्काराः···अनित्याः···दुःखाः···शून्याः···अनात्मानः । ततो लभते **ऊष्मधर्मं** चित्तोत्थापितम् । यथा मथनात्काष्ठेष्वनलोत्पादस्तथा बुद्धधर्मेषु परिशुद्धकुशलमूलश्रद्धोत्पादः ।

चतुर्भिः प्रत्ययैः पश्यति षोडशाकारान् । चतुर्भिराकारैः पश्यति दुःखसत्यं···समुदय···निरोध···मार्गसत्यम् । **पश्यन् षोडशाकारकुशलधर्मान् नित्यमातापी विहरति वीर्यवानित्यूष्मधर्मः** । एतस्मादूष्मतः कुशलमूलं संप्रवृद्धमुच्यते **मूर्धा कुशलमूलम्** ।···ऊष्मधर्मोत्तरमूर्धा उद्वृद्ध इति । सत्यक्षान्तिमनुगतो मूर्धा नाम **क्षान्तिकुशलमूलम्** । त्रिविध एष···अधिमात्रः मध्यः मृदुश्च । चतुःसत्यविपश्यनामुपादाय पश्यति षोडशाकारान् सत्यमनुसरन् संप्रवर्धयति कुशलमूलमित्युच्यते **लौकिकाग्रधर्म** इति ।···कश्चिदाह । लौकिकाग्रधर्मो हि श्रद्धादीनि पञ्चेन्द्रियाणि । परमार्थतस्तु एकाग्रचित्तकाले चित्तचैतसिका धर्मा लौकिकाग्रकुशलमूलमिति । *Aam.* pp. 83-84.

The Mahāyānistic interpretations of these terms are given in *Aaa:—*

एवं कृतधर्मप्रविचयः समाहितचित्तश्च सर्वधर्मनैरात्म्यं भावयन् क्रमेण यदा पृथग्भूतार्थाभिनिवेशाभावादीषत्स्पष्टज्ञानालोकेन मनोमात्रमेव पश्यति **तदाऽस्योष्मगतावस्था । स एवात्रालोकलब्धो नाम समाधिरुच्यते महायाने** ।

यदा तस्यैव धर्मालोकस्य वृद्धयर्थं नैरात्म्यभावनायां वीर्यारम्भेण मध्यस्पष्टो ज्ञानालोको भवति, **तदा मूर्धावस्था । स एव वृद्धालोको नाम समाधिः** ।

यदा तु चित्तमात्रावस्थानेन स्पष्टतरो बाह्यार्थाभिनिवेशाभावो ज्ञानालोको जायते, **तदा क्षान्त्यवस्था** । ग्राह्याकाराभावानुप्रवेशा**त्तत्त्वार्थैकदेशप्रविष्टो नाम समाधिः** ।

यदा पुनरर्थग्राहकविक्षेपानाभासो ज्ञानालोको निष्पद्यते, **तदा लौकिकाग्रधर्मावस्था । स एवानन्तर्यो नाम समाधिः । सर्वाश्चैता अवस्था दृढाधिमुक्तितोऽधिमुक्तिचर्याभूमिरुच्यते** । *Aaa.* p. 64.

[१] Cf. **निर्वाणद्वारोद्घाटनप्रतिबल** इति पृथग्जनधर्मेष्वग्रः प्रतीत्य प्रथमसत्यदर्शनं चतुराकारं···। *Aam.* p. 84. **यानत्रयाधिगमप्राप्तये** मृदूष्मगतं कुशलं हेतुरिति । अयं च हेतुभावः सर्वेषामेवोष्मादीनां वेदितव्यः । *Aaa.* p. 50.

भगवतोक्तम्—"च्युतौ बतेमौ मोहपुरुषावस्माद्धर्मवि[न]याद्यत्र नामानयोः मोहपुरुषयोरूष्मगतमपि नास्ति"[1] इति। तच्चैतत्सर्वम्

(2)षड्भौमं[2] षोडशाकारं पञ्चस्कन्धा विनाप्तिभिः ॥[3]

'षड्भौमं' दर्शनमार्गवतो,[4] 'षोडशाकारं' दर्शनमार्गवत् सानुपरिवर्तकं। 'पञ्चस्कन्धं[5] विनाप्तिभिः।' प्राप्तयः खलु नोष्मागतादिस्वभावाः।[6] तत्स्वा-

---

[1] Cf. ऊष्मा कतमः ।···सद्धर्मविनयेऽल्पश्रद्धासमादानम् । **यथा भगवानुद्दिश्याश्वजित्पुनर्वसू भिक्षू अवोचत् ।** एतौ मोघपुरुषौ मम सद्धर्मेण विगतौ विनयेन च । तथा हि । महापृथिवी दूरमाकाशाद् गता । **एतौ मोघपुरुषौ मम सद्धर्मविनये नाल्पांशतोऽप्यूष्मीकृतौ ।** *Jpś*, p. 7.

Cf. also, **अपि नायं अरिट्ठो भिक्खु गद्धबाधिपुब्बो उस्मीकतो पि इमस्मिं धम्मविनये।** *M. sutta* 22.—**उस्मीकतो** ति यथा निब्बुतेपि महन्ते अग्गिक्खन्धे खज्जूपनकमत्तापि अग्गिपपटिका होति येव, यं निस्साय पुन महा अग्गिक्खन्धो भवेय्य; किन्नु खो एवं इमस्स अप्पमत्तिका पि ञाणुस्मा अत्थि यं निस्साय वायमन्तो **मग्गफलानि निब्बत्तेय्या** ति ? *MA. sutta* 22.

[2] Cf. **अनागम्यान्तरध्यानभूमिकं द्वे त्वधोऽपि वा ।** *Ak*. vi. 20 cd.

[3] Cf. **तथाग्रधर्माः सर्वे तु पञ्चस्कन्धा विनाप्तिभिः ।** *Ak*. vi. 19 cd.

[4] The six *bhūmis* are the following :—

अनागम्यं ध्यानान्तरं चत्वारि च ध्यानानि अस्य (निर्वेधभागीयस्य) **भूमिः ।** तत्संगृहीतत्वात् । नोर्ध्वम् । **दर्शनमार्गपरिवारत्वात् ।** तदभावः कामधात्वालम्बनत्वात् । तस्य च पूर्वं परिज्ञेयप्रहेयत्वात् ।···**भदन्तघोषकस्य** द्वे प्रथमे निर्वेधभागीये सप्तभूमिके कामावचरेपि स्तः । *Akb*. v. 20 cd.—नारूप्येषु निर्वेधभागीयमस्ति ।···दर्शनमार्गप्रयोगत्वात् । ···दर्शनमार्गस्य···ऊर्ध्वम्···आरूप्येषु···अभावः । यस्मादारूप्याः कामधातुं नालम्बन्ते । आह । किं कामधात्वालम्बनेन दर्शनमार्गेण प्रयोजनमिति ? अत उच्यते । तस्य पूर्वं परिज्ञेयप्रहेयत्वादिति । तस्य कामधातोर्दुःखरूपस्य पूर्वं परिज्ञेयत्वात् । समुदयरूपस्य च प्रहेयत्वात् । अत्र च हेतुर्यस्मात्स योगी कामावचरेण दुःखेन विहन्यते । तेन स सर्वं ततो मोक्षमन्वेषत इति । *Sakv*. p. 537. According to the Sthavaravādins, the *darshanamārga*, (i. e., the first supermundane path) is not attained in the *Arūpa-loka* due to the absence of *hadaya-vatthu* :—अरूपावचरा देवा वत्थुस्स अभावा दुक्खसच्चं परिञ्ञातुं असमत्था, तस्मा पठममग्गं उप्पादेतुं न सक्कोन्ति । *A. Saṅgaho, Navanīta Tīkā*, vi. 24. See *Jpś*. 3 and *Aam*. p. 84.

The *Adv*. might have contained a full discussion on this topic in its lost portion. V. supra. p. 322. n. 2.

[5] **सर्वे तु पञ्चस्कन्धाः** सपरिवारग्रहणादिति । समाहितभूमिकत्वादूष्मगतादीनामविज्ञप्तिलक्षणो रूपस्कन्धोऽस्तीति पञ्चस्कन्धा ऊष्मगतादय···सपरिवारा गृह्यन्त इति । *Sakv*. p. 535.

[6] Cf. **प्राप्तयो नोष्मगतादिभिः संगृह्यन्ते ।** मा भूदार्यस्य तत्सम्मुखीभावादूष्मग-

भाव्ये हि तासामार्यस्योष्मगतादिसंमुखीभावः स्यात्। न चेष्यते। सत्यदर्शनसमङ्गिनो दृष्टसत्यस्य वा सत्यदर्शनप्रयोगसंमु(3)खीभावे प्रयोजनाभावादिति।

आह। के पुनस्ते षोडशाकाराः[१] येषां भावनेन(नया) स्रोतआपन्नो भवति? तदुच्यते। चतुर्भिराकारैरणि(नि)त्यदुःखशून्यानात्माकारैः दुःखं परीक्षते। तत्र बोधिसत्त्वादृते तृष्णाचरितः[२] प्रायोऽणि(नि)त्याकारेण, कौसीद्याधिको दुःखाकारेण, आत्मीयदृष्टिचरितः शून्याकारेण, आत्मदृष्टिचरितोऽनात्माका(4)रेण।

हेतुसमुदयप्रभवप्रत्ययतः समुदयम्। हेतुतः अहेतुदृष्टिचरितः। समुदयतः एककारणदृष्टिचरितः। प्रभवतो नित्यकारणदृष्टिचरितः। प्रत्ययतोऽबुद्धिपूर्वकृतदृष्टिचरितः।

निरोधशान्तप्रणीतनिःसरणतो निरोधम्। एभिश्चतुर्भिर्निरोधः। नास्ति मोक्ष इत्येवं दृष्टिचरितो निरोधतः। श(4)रीरादिमत इत्येवं चरितः शान्ततः। विषयसुखचरितः प्र[णीत]तः। ध्यानादिसुखचरितो निःसरणतः।

मार्गन्यायप्रतिपन्नैर्यानि(णि)कतो मार्गः(र्गम्)। एभिश्चतुर्भिर्मार्गः। नास्ति मोक्षमार्ग इत्येवं दृष्टिचरितो मार्गतः। कष्टतपोभिरित्येवं दृष्टिचरितो न्यायतः। लौकिकवैराग्यमार्गचरितः प्रतिपत्तितः। अ(6)सकृल्लौकिकमार्गपरिहाणितो(को) नैर्याणिकतः।[3] इत्येवमादिते(के?) समये व्यभिचरणकाले त्वेकोपि सर्वैः

तादीनां सम्मुखीभाव इति। *Akb.* vi. 19 d.—प्राप्तिसम्मुखीभावादार्यपुद्गलस्योष्मगतादीनां फलप्राप्तिप्रयोगभूतानां सम्मुखीभावो मा भूदिति प्राप्तयो नोष्मगतादिषु गृह्यन्ते। न हि प्राप्तप्रयोगफलस्यार्यस्य प्रयोगसम्मुखीकरणं न्याय्यमिति। *Sakv.* p. 535.

[१] See *Aam.* p. 83.

Cf. कथं तथट्ठेन चत्तारि सच्चानि एकपटिवेधानि? **सोळसहि आकारेहि** तथट्ठेन चत्तारि सच्चानि एकपटिवेधानि। **दुक्खस्स** पीळनट्ठो, सङ्खतट्ठो, सन्तापट्ठो, विपरिणामट्ठो तथट्ठो। **समुदयस्स** आयूहनट्ठो, निदानट्ठो, संयोगट्ठो, पलिबोधट्ठो तथट्ठो। **निरोधस्स** निस्सरणट्ठो विवेकट्ठो, असङ्खतट्ठो, अमतट्ठो तथट्ठो। **मग्गस्स** निय्यानट्ठो, हेतुट्ठो, दस्सनट्ठो, अधिपतेय्यट्ठो तथट्ठो। इमेहि सोळसहि आकारेहि तथट्ठेन चत्तारि सच्चानि एकपटिवेधानीति। *Paṭisaṁbhidā*, vol. ii. pp. 104-5. See *Vm.* xvi. 15.

[२] **चरिया च छ चरिया।** रागचरिया दोसचरिया मोहचरिया, सद्धाचरिया, बुद्धिचरिया, वितक्कचरिया। *Vm.* iii. 74. For details, see *Vm.* iii. 74-96.

[3] Cf. यं पनेतं लोकियं तत्थ **दुक्खञाणं** वा धुवसुभसुखत्तभावविरहितेसु खन्धेसु धुवसुभसुखत्तभावसङ्खातं फले विप्पटिपत्तिं, **समुदयञाणं** इस्सरपधानकालसभावादीहि लोको पवत्ततीति अकारणे कारणाभिमानपवत्तं हेतुम्हि विप्पटिपत्तिं, **निरोधञाणं** अरूपलोक-

परीक्षते। रोगगण्डशल्याघाताकारादिभिर्ण(र्न) तु तैरत्यन्तप्रहाणमित्यतः षोडशैवार्याकारा इत्युच्यन्ते ।[1] पुरस्ताच्चैतच्छ्लोकानुगतमेवोपदर्शयिष्यामि ॥[2]

निर्वेधभागीयेभ्यः पुनः

[422] पश्चात्तु खलु(7)निर्वेध आर्यमार्गाह्वयस्ततः ।
स यस्मान्निश्चितो वेधस्तस्मान्निर्वेध उच्यते ॥[2]

लोकथूपिकादिसु अपवग्गगाहभूतं निरोधे विप्पटिपत्तिं, **मग्गञाणं** कामसुखल्लिक-अत्तकिलमथानुयोगप्पभेदे अविसुद्धिमग्गे विसुद्धिमग्गगाहवसेन पवत्तं उपाये विप्पटिपत्तिं निब्बत्तेति। *Vm*. xvi. 85.

[1] Cf. ··**छहाकारेहि** सुञ्ञतं परिगण्हाति ।··छहाकारेहि सुञ्ञतं परिग्गहेत्वा पुन **अट्ठहाकारेहि** परिगण्हाति ।···पुन **दसहाकारेहि** परिगण्हाति ।··**द्वादसाकारेहि** परिगण्हाति । ··एवं द्वादसाकारेहि सुञ्ञतं परिग्गहेत्वा पुन तीरणपरिञ्ञावसेन **द्वाचत्तालीसाय** **आकारेहि** सुञ्ञतं परिगण्हाति । **रूपं** अनिच्चतो, दुक्खतो, **रोगतो गण्डतो सल्लतो** अघतो·· समुदयतो, अत्थङ्गमतो, आदीनवतो, निःसरणतो पस्सति । वेदनं· पे··विञ्ञाणं···अनिच्चतो··पे ··निस्सरणतो पस्सति । *Vm*. xxi. 56-59. Also see, *Vm*. xvi-15, 48; *Paṭisambhidā*, vol. i. 118, vol. ii. 104-5 and *Chulla-niddesa*, pp. 279-280, 283.

[2] Cf. **निर्वेधभागीयानीति कोऽर्थः** । विध विभागे । **निश्चितो वेधो निर्वेधः आर्यमार्गस्तेन** विचिकित्साप्रहाणात्, सत्यानां च विभजनादिदं दुःखमयं यावत् मार्ग इति। तस्य भागो दर्शनमार्गैकदेशः । तस्यावाहकत्वेन हितत्वान्निर्वेधभागीयानि । *Akb*. vi. 20 ab.

Cf. also, इध भिक्खवे अरियसावको आरद्धविरियो होति, उदयत्थगामिनिया पञ्ञाय समन्नागतो **अरियाय निब्बेधिकाय** सम्मादुक्खक्खयगामिनिया । इदं···पञ्ञाबलं । *Aṅg* iii. p. 2. For *nibbedhabhāgīya-sīla*, see *Vm*. i. 39. For *nibbedhabhāgīya-samādhi*, see *Dīgha*, xxxiv. 1. 6.

The *Vibhaṅga* gives the following definition of *nibbedhabhāginī-paññā*:— **निब्बिदासहगता सञ्ञामनसिकारा समुदाचरन्ति विरागूपसंहिता निब्बेधभागिनी पञ्ञा ।** *Vbh*. p. 330.—**निब्बिदासहगता** ति तमेव पठमज्झाना वुट्ठितं निब्बिदासङ्खातेन विपस्सनाञाणेन सहगता; विपस्सनाञाणं हि झानङ्गभेदे वत्तन्ते निब्बिन्दति उक्कण्ठति तस्मा निब्बिदा ति वुच्चति। **समुदाचरन्ती** ति निब्बाणसच्छिकिरियाय चोदेन्ति तुदन्ति । **विरागूपसंहिता** ति, विरागसङ्खातेन निब्बाणेन उपसंहिता; विपस्सनाञाणम्हि सक्का इमिना मग्गेन विरागं निब्बाणं सच्छिकातुं ति पवत्तितो विरागूपसंहितं ति वुच्चति । तं सम्पयुत्ता **सञ्ञामनसिकारा** पि विरागूपसंहिता एव नाम, तस्मा **तेसं सञ्ञामनसिकारानं वसेन सा पठमज्झानपञ्ञा अरियमग्गपटिवेधस्स पदट्ठानताय निब्बेधभागिनी ति वुत्ता** । एवं चतुसु ठानेसु पठमज्झानपञ्ञाव कथिता । दुतियज्झानपञ्ञादीसु पि इमिनाव नयेन अत्थो वेदितब्बो । *VbhA*. p. 418-9. For *nibbidā* and *paṭivedha*, see *Vbh*. p. 330.

इति प्रागाविष्कृतमेतत्[1] ॥[2]

[423] धर्मज्ञानरुचिर्दुःखे निर्मलं धर्मदर्शनम् ।
ततस्तत्रैवावधृतिः धर्मज्ञानमनन्तरम् ॥[3]

लौकिकेभ्यः खल्वग्रधर्मेभ्यो[4] निरास्रवा लोकोत्तराः(रा) धर्ममात्रेक्षण-

---

[1] This topic is discussed earlier in *Adv.* in its lost portion. V. supra, p. 322, n. 2. See also p. 326, n. 1.

[2] Here begins a new topic—the *darśana-mārga* and *bhāvanā-mārga.*

[3] Cf. **अभिसमयक्रमस्तु वक्तुमारब्धः।** तत्र च यावदग्रधर्मा उक्ताः। शेषं वक्तव्यम् । अत इदं उच्यते—

लौकिकेभ्योऽग्रधर्मेभ्यो धर्मक्षान्तिरनास्रवा ॥
कामदुःखे ततोऽत्रैव धर्मज्ञानं तथा पुनः । *Ak.* VI. 25. cd, 26 ab.

The *B. Pañjikā* gives in brief the *abhisamaya-krama* :—तत्र **वैभाषिकादयः** सर्वधर्मशून्यतायाः सर्वावरणप्रहाणमसहमानाः चतुरार्यसत्यदर्शनभावनां च तदुपायमिच्छन्तः प्राहुः

सत्यदर्शनतो मुक्तिः शून्यतादर्शनेन किम् ।

...तत्र **वृत्तस्थस्य** श्रुतचिन्तावतो भावनायां प्रवृत्तस्य । अशुभानापानस्मृत्युपस्थानभावनानिष्पत्तिक्रमेण । अनित्यतो दुःखतः शून्यतोऽनात्मतश्चेत्येतैः **षोडशभिराकारैर्दुःखादिसत्यं** पश्यतः । **ऊष्मगतादिचतुर्निर्वेधभागीयद्वारेण** दुःखे धर्मज्ञानक्षान्त्यादिपञ्चदशलक्षणस्य **दर्शनमार्गस्य,** ततः परं **भावनामार्गस्याधिगमाद्दर्शन**भावनाहेयत्रैधातुकक्लेशोपक्लेशराशिप्रहाणात् **क्षयानुत्पादज्ञानोत्पत्तिरित्यार्यसत्येषु संक्षेपतोऽभिसमयक्रमः। इत्थमार्यसत्यदर्शनतो मुक्तिरुच्यते।** *B. Pañjikā*, IX. 41 ab.

[4] **लौकिकाग्रधर्मः कतमः ।**...चित्तचैतसिकधर्माः समनन्तराः सम्यक्त्वन्याममवक्रान्ता लौकिकाग्रधर्म इति । **अपर आह ।** पंचेन्द्रियाणि समनन्तराणि सम्यक्त्वन्याममवक्रान्तानि लौकिकाग्रधर्म इति ।...

कस्मादभिधीयते लौकिकाग्रधर्म इति ।...चित्तचैतसिकाधर्मा एव भवन्त्यन्येषु लौकिकेषु वराः प्रकृष्टा ज्येष्टाः प्रधाना उत्तराः परमा इत्यभिधीयते लौकिकाग्रधर्म इति । पुनः खल्वेवमेते चित्तचैतसिकधर्माः **समनन्तरा विहाय पृथग्जनत्वं प्राप्नुवन्त्यार्यत्वं विहाय मिथ्यात्वं प्राप्नुवन्ति सम्यक्त्वं प्रतिबलाश्च सम्यक्त्वन्यामावक्रान्तये इत्यभिधानं लौकिकाग्रधर्म इति ।**

...लौकिकाग्रधर्मो...**नियतमविवर्तनीयः** । कस्मात्...लौकिकाग्रधर्मः सत्यानुसारी सत्याभिमुखः सत्यनिर्वेधांशिकः । अन्योन्यान्तरे नावकाशोऽसदृशचित्तोत्पादस्य येन नार्यसत्याभिसमयनिर्वेधः । पुनः खलु । **लौकिकाग्रधर्मो दुःखधर्मज्ञानक्षान्तेर्भवति समनन्तरप्रत्ययः ।** *Jpś.* pp. 2 and 5.

The *laukikāgradharma* corresponds to the *gotrabhū-chitta,* which is followed by the *sotāpatti-magga-chitta* :—

अथ तस्मिं निमित्तपवत्तारम्मणे पालिबोधतो उपट्ठिते **अनुलोमञाणस्स आसेवनन्ते**

दृष्टिरुत्पद्यते[1] । सूत्र उक्तम्“लौकिकाग्रधि(8)र्मानन्तरं सम्मं नियाममवक्रामति[2]

अनिमित्तं विसङ्खारं निरोधं **निब्बानं आरम्मणं कुरुमानं, पुथुज्जनगोत्तं पुथुज्जनसङ्खं पुथुज्जनभूमिं अतिक्कममानं** निब्बानारम्मणे पठमावट्टन-पठमाभोग-पठमसमन्नाहारभूतं **मग्गस्स** अनन्तर-समनन्तरासेवन-उपनिस्सय-नत्थि-विगतवसेन छहि आकारेहि **पच्चयभावं साधयमानं सिखाप्पत्तं विपस्सनाय मुद्धभूतं अपुनरावट्टकं उप्पज्जति गोत्रभूञाणं**, यं सन्धाय वुत्तं—“**कथं** बहिद्धा वुट्ठानविवट्टने **पञ्ञा गोत्रभूञाणं** ? **उप्पादं अभिभुय्यतीति गोत्रभू**, पवत्तं···पे···उपायासं अभिभुय्यती ति गोत्रभू,···बहिद्धा सङ्खारनिमित्तं अभिभुय्यती ति गोत्रभू, अनुप्पादं पक्खन्दती ति गोत्रभू, अप्पवत्तं···पे···अनुपायासं निरोधं निब्बानं पक्खन्दती ति गोत्रभू, उप्पादं अभिभुयित्वा अनुप्पादं पक्खन्दती” [*Paṭisaṁbhidā*, vol. I. p.66] ति सब्बं वित्थारेतब्बं । *Vm.* XXII. 5. **तं** [गोत्रभूञाणं] हि अनावज्जनम्पि समानं आवज्जनट्ठाने ठत्वा, एवं निब्बत्ताही ति **मग्गस्स सञ्ञं दत्वा विय निरुज्झति । मग्गो** पि तेन दिन्नसञ्ञं अमुञ्चित्वा व अवीचिसन्ततिवसेन तं ञाणं अनुबन्धमानो अनिब्बिद्धपुब्बं अपदालितपुब्बं लोभ···दोस···मोहक्खन्धं निब्बिज्झमानो व पदालयमानो व निब्बत्तति । *Vm.* XXII. 11. कतमो च पुग्गलो **गोत्रभू** ? येसं धम्मानं समनन्तरा अरियधम्मस्स अवक्कन्ति होति तेहि धम्मेहि समन्नागतो अयं वुच्चति पुग्गलो **गोत्रभू** । *P. Paññatti.* p. 2.

[1] The *dharma-mātrekshaṇa-dṛishṭi* means *dharma-jñāna-kshānti*, the first *lokottara-chitta* :—**लौकिकाग्रधर्मानन्तरमनास्रवधर्मज्ञानक्षान्तिरुत्पद्यते । कस्मिन्नालम्बने ?**

कामदुःखे ।

कामावचरमस्या आलम्बनम् । सेयं दुःखे **धर्मज्ञानक्षान्तिरित्युच्यते** । अनास्रवज्ञानार्थं निःष्यन्देन विशेषणम् । कर्मज्ञानार्थं क्षान्तिः । पुष्पफलवृक्षवत् । *Akb.* VI. 25 cd and 26 a. —यस्या धर्मज्ञानं निष्यन्दः सा धर्मज्ञानक्षान्तिः । **धर्मज्ञानार्थं क्षान्तिः धर्मज्ञानक्षान्तिः** ।··· यथा पुष्पार्थं वृक्षः पुष्पवृक्षः फलार्थं वृक्षः फलवृक्षः । *Sakv. p.* 541.

Cf. लौकिकाग्रधर्मानन्तरं **दुःखे धर्मज्ञानक्षान्तिः** ।···**दुःखं** कतमत् ? दुःखसत्यम् । दुःखे **धर्मः** कतमः ? दुःखसत्याधिपतेयः शासनधर्मः । **धर्मज्ञानं** कतमत् ? प्रयोगमार्गे सत्याधिपतेयं धर्मविचारणाज्ञानम् । **ज्ञानक्षान्तिः** कतमा ? पूर्वाधिपतिबलविचारणामुपादाय प्रत्यात्मं दुःखसत्ये प्रत्यक्षानुभाविनी अनास्रवा प्रज्ञा । यया प्रज्ञया दुःखदर्शनप्रहातव्यान् सर्वक्लेशान् प्रजहाति । तस्मादुच्यते **दुःखे धर्मज्ञानक्षान्तिरिति** । *Asm.* p. 66.

Also cf. षड्भूमिषु लौकिकाग्रधर्मा क्रमेण जायतेऽनास्रवपुद्गलः—इत्युच्यते **दुःखधर्मक्षान्तिः** । अदृष्टपूर्वस्य प्रथमदर्शने क्षमत्वादुच्यते **क्षान्तिः** । एषा आदिक्षान्तिरुच्यते आनन्तर्यमार्गः । *Asm.* pp. 84-5. See *Aaa.* p. 150.

[2] Cf. **सैव** [अनास्रवा दुःखे धर्मज्ञानक्षान्तिः] **च नियामावक्रान्तिरित्युच्यते । सम्यक्त्वनियामावक्रमणात् । सम्यक्त्वं निर्वाणमित्युक्तं सूत्रे** । तत्र **नियमो** नियाम एकान्तीभावः । तस्याभिगमनमवक्रमणम् । तस्यां चोत्पन्नायामार्यपुद्गल उच्यते । अनागताया पृथग्जनत्वं व्यावर्त्यते । एतदेव तस्याः कारित्रमनागतायामभ्युपगम्यते । नान्यत् । प्रदीपजातिवत् । *Akb.* VI. 26 a.

यदवक्रान्तौ पृथग्जनभूमिं समतिक्रामति[1]” इति । तदनन्तरं दुःखे धर्म-

---

—‘सम्यक्त्वं निर्वाणमित्युक्तम्’ इति । **सम्यक्त्वं कतमत् ? यत्तत् पर्यादाय रागप्रहाणमिति विस्तरः** ।···सम्यक्त्वे नियम एकान्तीभावो नियाम’ इति घञि रूपम् ।···‘तस्याभिगमनमवक्रमणम्’ इति । तस्यैकान्तीभावस्याभिगमनं प्राप्तिः । तदेव विपर्यासस्यापक्रमान्नियामावक्रान्तिरित्युच्यते । ‘तस्यां च’ इति धर्मज्ञानक्षान्तौ । ‘प्रदीपजातिवत्’ इति । प्रदीपस्येव जातेरिव चेत्यर्थः । **यथा प्रदीपस्यानागतस्य तमोविनाशे सामर्थ्यम्, जातेश्चानागताया जन्यजनने; तथा पृथग्जनत्वव्यावर्तने सामर्थ्यमनागताया धर्मज्ञानक्षान्तेरभ्युपगम्यते ।** *Sakv.* p. 541.

The Pāli scriptures contain several references to *samyaktva* and *niyāma-avakrānti*. Here too, *niyāma* means the *lokottara-mārga* :—

(१) दिट्ठिविसूकानि उपातिवत्तो **पत्तो नियामं पटिलद्धमग्गो** । *S. Nipāta*, 55.—उपातिवत्तो ति दस्सनमग्गेन अतिक्कन्तो । **पत्तो नियामं** ति अविनिपातधम्मताय सम्बोधिपरायणताय च नियतभावं अधिगतो, **सम्मत्तनियामसंखातं वा पठममग्गं** ति; एत्तावता पठममग्गनिप्फत्ति च तस्स पटिलाभो च वुत्तो । इदानि पटिलद्धमग्गो ति इमिना सेसमग्गपटिलाभं दीपेति । *S. Nipāta A.* 55. Also cf. **संखातधम्मो नियतो पधानवा** । *S. Nipāta* 70; सद्धो सुतवा नियामदस्सी । *Ibid.* 371.

(२) **ओक्कमति नियामं कुसलेसु धम्मेसु सम्मत्तं** । *Aṅg.* I. p. 121 :—कुसलेसु धम्मेसु **मग्गनियामसंखातं सम्मत्तं** । *Aṅg A.* II. p. 192.

For various controversies on *niyāma* and *niyama*, see the following *kathās* in *Kathāvatthu* :—ओक्कन्त**नियाम**कथा, IV. 8; **नियाम**कथा, V. 4; **नियामो** असंखतो ति कथा VI. 1. सत्तक्खत्तुपरमो पुग्गलो सत्तक्खत्तुपरमता **नियतो** ति कथा, XII. 5; कोलंकोलो पुग्गलो कोलंकोलता **नियतो** ति कथा, XII. 6; एकबीजी पुग्गलो एकबीजिता **नियतो** ति कथा, XII. 7; अनन्तरापयुत्तो पुग्गलो सम्मत्त**नियामं** ओक्कमेय्या ति कथा, XIII. 3; नियतो **नियामं** ओक्कमती ति कथा, XII. 4; अत्थि पुथुज्जनस्स अच्चन्त**नियामता** ति कथा, XIX 7 and सब्बे धम्मा **नियता** ति कथा, XXI. 7.

नियामो ति ब्रह्मचरियं ति वा अरियमग्गस्स नामं । *Kv A.* IV. 8. **नियामगमनाया** ति नियामो वुच्चति मग्गो, मग्गगमनाय मग्गोक्कमनाया ति अत्थो । *Ibid.* V. 4. **नियमो** ति ‘भब्बो नियामं ओक्कमितुं कुसलेसु धम्मेसु सम्मत्तं’ ति [*Aṅg.* I. p. 121.] वचनतो अरियमग्गो वुच्चति । *Ibid.* VI. 1.—**द्वे नियामा** सम्मत्तनियामो च मिच्छत्तनियामो च । **सम्मत्तनियामो अरियमग्गो** । सो अविनिपातधम्मतं चेव फलुप्पत्तिं च नियमेति । **मिच्छत्तनियामो आनन्तरियकम्मं** । तं अनन्तरा निरयूपपत्तिं नियमेति । *Ibid.* XII. 5.···**इमे द्वे नियामे ठपेत्वा अञ्ञो नियामो नत्थि । सब्बेपि हि सेसा तेभूमकधम्मा अनियता नाम** । *Ibid.* XIII. 4. For details, see *Points of Controversy*, pp. 275, 383—386; Woghihara : Asanga's *Bodhisattva-bhūmi*, p. 31; *LVPAk.* VI. p. 180, n. 6.

[1] कतमो च पुग्गलो **पुथुज्जनो** ? यस्स पुग्गलस्स तीणि संयोजनानि अप्पहीनानि न च तेसं धम्मानं पहानाय पटिपन्नो—अयं वुच्चति पुग्गलो पुथुज्जनो । *P. paññatti.* p. 12.

ज्ञानं निश्चयात्मकम् ।[१] क्षान्त्या वा संयोगप्राप्तिं छिनत्ति ज्ञानेन विसंयोग-

---

पुथुज्जननिद्देसे **तीणि संयोजनानी** ति दिट्ठिसंयोजनसीलब्बतपरामाससंयोजनविचिकिच्छासंयोजनानि । एतानि हि **फलक्खणे पहीनानि नाम होन्ति** ।···तेसञ्च धम्मानं ति तेसं संयोजनधम्मानं । **मग्गक्खणस्मिं हि तेसं पहानाय पटिपन्नो नाम होति** । *P. paññatti A*. p. 25.

Cf. पृथग्जनत्वं कतमत् ।···यदार्यधर्मे आर्योष्मगते आर्यदर्शने आर्यक्षान्तौ आर्यच्छन्दे आर्यप्रज्ञायामप्राप्तिरप्राप्तता अप्राप्स्यमानता इति पृथग्जनत्वम् ।···लौकिकाग्रधर्मसम्यग्निरोधे दुःखधर्मज्ञानक्षान्तिसमुत्पादः । अथ तस्मिन् काले त्रैधातुकं पृथग्जनत्वं व्यपगच्छति, लभ्यते तत्—[पृथग्जन]स्वभावस्यानिष्पत्तिः । *Jpś*. pp. 59—60.

The *Saṁyutta-nikāya* makes specific reeference to the *prithag jana-bhūmi-samatikramaṇa* :—

चक्खुं···पे···मनो···पे···विञ्ञाणं अनिच्चं विपरिणामी अञ्ञथाभावि । **यो भिक्खवे इमे धम्मे एवं सद्दहति अधिमुच्चति, अयं वुच्चति भिक्खवे सद्धानुसारी ओक्कन्तो सम्मत्तनियामं सप्पुरिसभूमिं ओक्कन्तो** वीतिवत्तो **पुथुज्जनभूमिं** । अभब्बो तं कम्मं कातुं यं कम्मं कत्वा निरयं वा तिरच्छानयोनियं वा पेत्तिविसयं वा उप्पज्जेय्य । **अभब्बो च ताव कालं कातुं याव न सोतापत्तिफलं सच्छिकरोति** ।

यस्स खो भिक्खवे **इमे धम्मे एवं पञ्ञाय मत्तसो निज्झानं खमन्ति, अयं वुच्चति धम्मानुसारी ओक्कन्तो सम्मत्तनियामं**···पे···सच्छिकरोति । *S*. III. pp. 225--7. (*Okkaṅtika-saṁyutta*).

The Kośakāra gives two more views regarding the *prithagjanatva-vyāvartana* :—**लौकिकाग्रधर्मैरित्यपरे** । न । तद्धर्मत्वात्तद्विरोधित्वाददोषः । शत्रुस्कन्धारूढतद्घातनवत् । **उभयैरित्यपरे** । आनन्तर्यविमुक्तिमार्गसाधर्म्यादिति । *Akb*. VI. 26 a.

—'लौकिकाग्रधर्मैरित्यपर'इति । पृथग्जनत्वं व्यावर्तत इति प्रकृतम् । 'न । तद्धर्मत्वात्' इति । **न युक्तमेतल्लौकिकैरग्रधर्मैस्तद्व्यावर्तनमिति । कस्मात् ? तेऽपि हि पृथग्जनधर्मस्य पृथग्जनधर्मं व्यावर्तिष्यन्त इति** । 'तद्विरोधित्वाददोषः' । **अग्रधर्माणां पृथग्जनत्वविरोधाददोष एषः** । किम् ?···यथा शत्रुस्कन्धारूढ एव कश्चिच्छत्रुं घातयेत् । एवं किलाग्रधर्माः पृथग्जनत्वशत्रुस्कन्धारूढास्तदेव पृथग्जनत्वं घातयेयुरिति ।

उभयैरिति । लौकिकाग्रधर्मैः क्षान्त्या च पृथग्जनत्वं व्यावर्त्यते । कथम् ? आनन्तर्यविमुक्तिसाधर्म्याद्' इति । **लौकिकानामग्रधर्माणामानन्तर्येण साधर्म्यम् । क्षान्तेर्विमुक्तिमार्गेण** । यथा ह्यानन्तर्यमार्गेण क्लेशः प्रहीयते, विमुक्तिमार्गेण प्रहीणः, **एवं लौकिकैरग्रधर्मैः पृथग्जनत्वं विहीयते, क्षान्त्या विहीनमिति** । *Sakv*. pp. 541-542.

See *Aaa*. p. 84; *Asm*. p. 66. For the Sthaviravādin's view, see *Kv*. III. 1. (सरागं चित्तं विमुच्चती ति कथा) and XIII. 5 (निवुतो नीवरणं जहती ति कथा) । Cf. *Jpś*. pp. 25-26.

[१] Cf. ततः पुनर्दुःखे धर्मज्ञानक्षान्तेरनन्तरमत्रैव कामावचरे दुःखे **धर्मज्ञान**मुत्पद्यते । तत् दुःखे **धर्मज्ञान**मित्युच्यते । *Akb*. VI. 26 ab.—तत् दुःखे धर्मज्ञानमित्युच्यत इति । **शास्त्रे** तेन नाम्ना व्यवहार इति दर्शयति । *Sakv*. p. 542.

प्राप्तिमावहतीति विशेषः ।[1]

[424] एवं त्रिष्वपि सत्येषु तथैवान्वयधीर्द्विधा ।[2]

द्वाभ्यां धर्मज्ञानक्षान्तिधर्मज्ञानेक्षणाभ्यां समनन्तरं(9) रूपारूप्यावचरे दुःखेऽन्वयज्ञानक्षान्त्यन्वयज्ञानेक्षणमुत्पद्यते[3] । एवं त्रिष्वपि सत्येषु द्रष्टव्यम् । अत्र पुनः

Also cf. **दुःखे धर्मज्ञानं कतमत् ?** क्षान्त्यनन्तरं येन ज्ञानेन पूर्वोक्तेभ्यः क्लेशेभ्यो विमुक्ति साक्षात्करोति । तस्मादुच्यते दुःखे धर्मज्ञानमिति । *Asm.* p. 66. दुःखधर्मज्ञानं विमोक्षमार्गः । *Aam.* p. 85. V. infra, *Adv. kārikā* 477.

[1] The Kośakāra deals with this point in detail :—Cf. कस्मात् पुनः क्षान्तयो ज्ञानानि चावश्यं भवन्ति ?

क्षान्तिज्ञानान्यनन्तर्यमुक्तिमार्गा यथाक्रमम् ।

अनन्तर्यमार्गाः क्षान्तयः क्लेशप्राप्तिविच्छेदं प्रत्यन्तरयितुमशक्यत्वात् । **विमुक्तिमार्गास्तु ज्ञानानि ।** क्लेशप्राप्तिविमुक्तानां विसंयोगप्राप्तिसहोत्पादात् । अत उभयैरवश्यं भवितव्यम् । द्वाभ्यां चौरनिष्कासनकपाटपिधानवत् । ···*Akb.* vi. 27 cd.

आनन्तर्यमार्गेणेति···अनन्तरभवो अनन्तरमार्गो वा आनन्तर्यम् । तस्य मार्गा आनन्तर्यमार्गाः । **विमुक्तिमार्गा** इति विमुक्तौ मार्गा विमुक्तिमार्गाः । क्लेशविमुक्त्यवस्थामार्ग इत्यर्थः । द्वाभ्यां चौरनिष्कासनकपाटपिधानवदिति । यथा द्वाभ्यामेकेन चौरो निष्कास्यते, द्वितीयेन तदप्रवेशाय कपाटः पिधीयते । **एवमानन्तर्यमार्गेण क्लेशचौरो निष्कास्यते तत्प्राप्तिच्छेदतः । विमुक्तिमार्गेण च विसंयोगप्राप्तिकपाटं पिधीयते वर्तमानीकरणतः** ।···*Sakv.* p. 549. See *Aaa.* p. 177.

[2] Cf. **शेषे दुःखान्वयक्षान्तिज्ञाने सत्यत्रये तथा ।** *Ak.* vi. 26 cd.

[3] Cf. प्रथमतो [दुःखेऽन्वयज्ञानक्षान्त्या] धर्मतत्त्वज्ञानाद्धर्मज्ञानम् । तदन्वयादूर्ध्वं दुःखालम्बनमन्वयज्ञानम् । तथैवानुगमनात् । *Akb.* vi. 26 c.

Also cf. आनन्तर्यमार्गोऽन्वयज्ञानक्षान्तिः विमुक्तिमार्गोऽन्वयज्ञानं चेति·· । *Aam.* p. 85. दुःखेऽन्वयज्ञानक्षान्तिः कतमा ? दुःखे धर्मज्ञानक्षान्त्यां दुःखे धर्मज्ञाने च प्रत्यात्मं प्रत्यक्षानुभाविनी अनास्रवा प्रज्ञा उत्पद्यते यदुत्तरमन्वय एष आर्यधर्माणाम् ।···दूःखे अन्वयज्ञानं कतमत् ? तदनन्तरमनास्रवं ज्ञानमुत्पद्यते । येन ज्ञानेन दुःखे अन्वयज्ञानक्षान्तिमुपधारयति । *Asm.* p. 66.

यतो खो भिक्खवे अरियसावको एवं जरामरणं पजानाति··। निरोधगामिनिं पटिपदं पजानाति । **इदमस्स धम्मे ञाणं ।**

सो इमिना धम्मेन दिट्ठेन···अतीतानागते नयं नेति—ये खो केचि अतीतमद्धानं··· अनागतमद्धानं समणा वा ब्राह्मणा वा जरामरणं···अभिजानिस्सन्ति सब्बे ते एवमभिजानिस्सन्ति सेय्यथापि एतरहि । **इदमस्स अन्वये ञाणं ।**

अनन्त्यास्तत्र दृङ्मार्गाः ज्ञेयाः पञ्चदशक्षणाः ।[1]

अन्त्यक्षणं मुक्त्वा पञ्चदशस्वभावो दर्शनमार्गः[2] यस्त्वसौ स्थापितः स खलु

यतो खो अरियसावकस्स इमानि द्वे ञाणानि परिसुद्धानि होन्ति···धम्मे ञाणं च अन्वये ञाणं च । अयं वुच्चति···दिट्ठिसम्पन्नो इति पि, दस्सनसम्पन्नो इति पि, आगतो इमं सद्धम्मं इति पि, पस्सति इमं सद्धम्मं इति पि, सेखेन ञाणेन···सेखाय विज्जाय समन्नागतो इति पि, धम्मसोतं समापन्नो इति पि, अरियो निब्बेधिकपञ्ञो इति पि, अमतद्वारं आहच्च तिट्ठति इतिपीति । *S.* II. p. 8. See *Vbh.* p. 239, 329. Also see अपि च **धम्मन्वयो** विदितो । *Dīgha*, XVI. 1. 16.

[1] Cf. **किं पुनः सर्वाणि षोडशचित्तानि सत्यदर्शनात् दर्शनमार्गः ?** नेत्याह । किं तर्हि ?

अदृष्टदृष्टेर्दृङ्मार्गस्तत्र पञ्चदश क्षणाः । *Ak.* VI. 28 cd.

दुःखधर्मज्ञानक्षान्तिमारभ्य यावन्मार्गेऽन्वयज्ञानक्षान्तिरेते **पञ्चदशक्षणा दर्शनमार्गः।** किं कारणम् ? **अदृष्टसत्यदर्शनात् । षोडशे तु नास्त्यपूर्वं द्रव्यमिति यथादृष्टाभ्यासनाद्भावनामार्ग एव ।** *Akb.* VI. 28 cd. V. supra, p. 227, n. 1.

[2] The Kośakāra initiates a controversy about the sixteenth *kshaṇa*:—

ननु च तेनापि [षोडशक्षणेन] अदृष्टं पश्यति मार्गेऽन्वयज्ञानक्षान्तिम् । सत्यं प्रति चिन्ता न क्षणम् । न हि क्षणेनादृष्टेन सत्यमदृष्टं भवति । यथा नैकेन लुङ्गेनालूनेन केदारमूलं भवति । फलत्वादष्टज्ञानषोडशाकारभावनात् पूर्वमार्गविहानेः प्राबन्धिकत्वाच्च मार्गान्वयज्ञानं भावनामार्गः । अपरिहाणिस्तु दर्शनहेयक्लेशप्रहाणसन्धारणात् । अत एव दर्शनमार्ग इति चेत् । न । अतिप्रसंगात् ।···*Akb.* VI. 28 cd.

—मार्गान्वयज्ञानक्षान्तिरात्मानं विरहय्य शेषमन्वयज्ञानपक्ष्यं मार्गमालम्बते । स्वात्मनि वृत्तिविरोधात् । **तेनोच्यते 'मार्गान्वयज्ञानक्षान्तिमदृष्टं पश्यती'ति ।** सत्यं प्रति चिन्तेति विस्तरः । सत्यं प्रति चिन्ता दृष्टं न दृष्टमिति । न तु क्षणं प्रति । दृष्टः क्षणो न वेति । कस्मात् ? पञ्चदशेन क्षणेन यदन्वयज्ञानपक्षलक्षणं सत्यं दृष्टं तदेव षोडशेनापीति 'नास्त्यपूर्वदृष्टसत्यदर्शनम्' इति न षोडशक्षणो दर्शनमार्ग इति व्यवस्थाप्यते ।···*Sakv.* p. 546.

This view of the Vaibhāshika is quoted and criticised by Haribhadra in *Aaa*:—एते **षोडशचित्तक्षणा दर्शनमार्गः।** चित्तक्षणः पुनर्ज्ञेयज्ञानोत्पत्तिपरिसमाप्तितो द्रष्टव्यः । **केचिद्**

अदृष्टदृष्टेर्दृङ्मार्गस्तत्र पञ्चदश क्षणाः ।

इति वर्णयन्ति । तदयुक्तम् । तथाहि प्रयोगमार्गे दुःखसत्याधिपतेर्यस्य धर्मस्य पूर्वविचारणामधिपतिं कृत्वा प्रत्यात्मं दुःखसत्यानुभाविज्ञानमनाश्रवं येन दुःखदर्शनप्रहातव्यं क्लेशं प्रजहाति । तदुच्यते **दुःखधर्मज्ञानक्षान्तिः ।** येन ज्ञानेन क्षान्त्यनन्तरं विमुक्तिं साक्षात्करोति तदुच्यते **दुःखधर्मज्ञानम् ।** दुःखधर्मज्ञानस्यानन्तरं दुःखे धर्मज्ञानक्षान्तौ दुःखधर्मज्ञाने चान्वय

[425 ab.] क्षणोऽन्त्यो भावनामार्गात् फलमेषोऽर्थसिद्धितः ॥

योगाचार्यस्य खल्वभि·········[Folio No. 129 lost.[1]]

······[VII. B. 3. Fol. 130 a.] [2]**स्रोताश्चेति पञ्चभवन्ति ॥**

एष आर्यधर्माणामिति प्रत्यात्मं यत्प्रत्यक्षानुभाविज्ञानमनाश्रवं तदुच्यते **दुःखान्वयज्ञानक्षान्तिः** । येन ज्ञानेन तामन्वयज्ञानक्षान्तिमवधारयति तदुच्यते **दुःखेऽन्वयज्ञानम्** । एवमवशिष्टेष्वपि सत्येषु यथायोगं क्षान्तयो ज्ञानानि च वेदितव्यानीति **षोडशक्षणिक एव दर्शनमार्गो युक्तः । पञ्चदश क्षणिकत्वे तु मार्गेऽन्वयज्ञानक्षान्तेरवधारणं न स्यात् । अदृष्टदर्शनाभावेनान्त्यो मार्गेऽन्वयज्ञानक्षणो न दर्शनमार्ग इति चेत्** । यद्येवं दुःखादिसत्यत्रयेऽप्यपूर्वदर्शनवैकल्यादन्वयज्ञानक्षणो न दर्शनमार्ग इति द्वादशक्षणिक एव स्यात् । न चैतदभ्युपगमनमिति यत्किञ्चिदेतत् । तथा **चोक्तम्**—

क्षान्तिज्ञानक्षणैः सत्यं सत्यं प्रति चतुर्विधैः ।
मार्गज्ञतायां दृङ्मार्गः सानुशंसोऽयमुच्यते ॥११॥

इति तत्र धर्मज्ञानक्षान्त्या **धर्मज्ञानेन च ग्राह्यावबोधः । अन्वयज्ञानक्षान्त्याऽन्वयज्ञानेन च ग्राहकावबोधः** । सर्वेष्वेव क्षान्तिज्ञानेष्वनिमित्तविहारी योगी वेदितव्यः । अविकलकारणस्य प्रहातुमशक्यत्वाद् दुःखदर्शनप्रहातव्यकाले समुदयः प्रहीणः । अत एव निरोधः साक्षात्कृतस्तस्य चान्यथानुपपत्त्या मार्गो भावितः । समुदयादिष्वप्येवमित्येवं **कार्याभिसमयादेकक्षणाभिसमयो महायाने दर्शनमार्गो द्रष्टव्यः** । प्रतिसत्यं पुनर्विपर्यासनिराकरणेन प्रतिवेधाभिसमयतः । **षोडशभिरेव क्षणैरभिसमीयते** । *Aaa*. pp. 150-52. Also see *Aaa*. pp. 280—283.

[1] Folio No. 129 is lost. In this lost folio, the *Adv*. might have discussed the following topics which are dealt with in detail in the corresponding *Akb*. vi. 27 cd and 29—37 :—(१) षोडशचित्तको सत्याभिसमयः। (२) स्रोतआपत्तिफलप्रतिपन्नकौ । (३) सकृदागामिफलप्रतिपन्नकौ । (४) अनागामिफलप्रतिपन्नकौ । (५) फलस्थौ । (६) नवप्रकाराः क्लेशाः भूमौ भूमौ । तथा तत् प्रतिपक्षा अपि नव प्रकारा आनन्तर्यविमुक्तिमार्गाख्याः गुणाः । (७) स्रोतआपन्नः, सप्तकृत्वपरमः । (८) कुलंकुलः। (९) द्वितीयफलप्रतिपन्नकः। (१०) सकृदागामी। (११) एकवीचिकः। (१२) अनागामी। (१३) पञ्चविधोऽनागामी—अनन्तरा परिनिर्वायी। उपपद्यपरिनिर्वायी। साभिसंस्कारपरिनिर्वायी । अनभिसंस्कारपरिनिर्वायी । ऊर्ध्वंस्रोता ।

[2] The topic under discussion is *Anāgāmin-pudgala*. An *anāgāmī* is defined as :—अनागामी···कामधात्वनागमनात् । 'पञ्चानामवरभागीयानां संयोजनानां प्रहाणादित्युच्यते प्रहाणसंकलनात् ।' अवश्यं द्वे त्रीणि वा पूर्वं प्रहीणानि भवन्ति । *Akb*. vi. 36 d.

Cf. कतमो च पुग्गलो अनागामी ? इधेकच्चो पुग्गलो पञ्चन्नं ओरम्भागियानं संयोजनानं परिक्खया ओपपातिको होति तत्थ परिनिब्बायी अनावत्तिधम्मा तस्मा लोका—अयं वुच्चति पुग्गलो अनागामी । *P. Paññatli*, p. 16.—ओरम्भागियानं ति ओरं वुच्चति कामधातु ।···**ओपपातिको** ति उपपातयोनिको । इमिनास्स गब्भसेय्या पटिक्खित्ता । **तत्थ**

अत्र पुनर्यं एष पञ्चमः[1] स खलु

परिनिब्बायी ति तत्थ सुद्धावासलोके परिनिब्बायिता । **अनावत्तिधम्मा तस्मा लोका** ति पटिसन्धिगहणवसेन तस्मा लोका इध अनावत्तनसभावो । बुद्धदस्सनथेरदस्सनधम्मसवणानं पनत्थायस्स आगमनं अनिवारितं ।···*P. Paññatti A.* p. 36.

[1] The five *anāgāmins* are :

सोन्तरोत्पन्नसंस्कारासंस्कारपरिनिर्वृतिः ।

ऊर्ध्वंस्रोताश्च *Ak.* vi. 37 abc.

अन्तरापरिनिर्वायी यो अन्तराभवे परिनिर्वाति । **उपपद्यपरिनिर्वायी** य उपपन्नमात्रो न चिरात् परिनिर्वात्यभियुक्तवाहिमार्गत्वात् ।···**साभिसंस्कारं परिनिर्वात्य**भियुक्तावाहिमार्गत्वात् । **अनभिसंस्कारपरिनिर्वायी** त्वनभिसंस्कारेणाभियोगवाहिमार्गाभावात् ।···**ऊर्ध्वंस्रोता यस्योर्ध्वं गतिर्न तत्रैव परिनिर्वाणं यत्रोपपन्नः ।** *Akb.* vi. 37 abc.

The Kośakāra gives another view about the *sābhisaṁskāra* and *anabhisaṁskāra* :—**संस्कृतासंस्कृतालंबनमार्गनिर्वाणादित्यपरे । तत्तु न ।** अतिप्रसंगात् । **सूत्रे** त्वनभिसंस्कारपरिनिर्वायी पूर्वं पठ्यते । तथैव च युज्यते । *Akb.* vi. 37 c.

—**संस्कृतासंस्कृतालंबनमार्गपरिनिर्वाणादिति ।** संस्कृतं संस्कार इत्येकोऽर्थः । एवमसंस्कृतमसंस्कार इति । संस्कारालम्बनेन मार्गेण दुःखसमुदयमार्गालम्बनेन मार्गेण यः क्लेशान् प्रजहाति स साभिसंस्कारपरिनिर्वायी । योऽसंस्कृतालम्बनेन निरोधालम्बनेन सोऽनभिसंस्कारपरिनिर्वायी ति । **तत्तु न । अतिप्रसंगात्** ।···अन्तरोपपद्यपरिनिर्वायिणोरप्यसंस्कृतालम्बनमार्गपरिनिर्वाणात् प्रत्येकं साभिसंस्कारानभिसंस्कारपरिनिर्वायितव्यप्रसंगः । तत्रस्थौ द्वावेव पुद्गलौ स्याताम् । न पञ्चेति । अनभिसंस्कारपरिनिर्वायी **पूर्वं पठ्यत** इति । साभिसंस्कारपरिनिर्वायिणः पूर्वं पठ्यते···**तथैव युज्यत** इति···कथम् ?···**अयत्नयत्नप्राप्तितस्तत्परिनिर्वाणस्य यथाक्रममित्येव ।** *Sakv.* p. 559.

This view of Kośakāra, attributed to Sautrāntikas, (see *LVPAk.* vi. p. 212, n. 1.) agrees with the Sthaviravādins' definitions of these two kinds of *anāgāmins*.

Cf. कतमो च पुग्गलो **अन्तरापरिनिब्बायी ?** इधेकच्चो पुग्गलो पञ्चन्नं···(V. supra. p. 337, n. 4. ···तस्मालोका, सो उप्पन्नं वा समनन्तरा, अप्पत्तं वा वेमज्झं आयुप्पमाणं अरियमग्गं सञ्जनेति उपरिट्ठिमानं संयोजनानं पहाणाय—अयं···अन्तरापरिनिब्बायी ।

कतमो च पुग्गलो **उपहच्चपरिनिब्बायी ?** इधेकच्चो···पे···तस्मा लोका, सो अतिक्कमित्वा वेमज्झं आयुप्पमाणं उपहच्च वा काळकिरियं अरियमग्गं संजनेति उपरिट्ठमानं संयोजनानं पहाणाय—अयं···उपहच्चपरिनिब्बायी ।

कतमो च पुग्गलो **असङ्खारपरिनिब्बायी ?** इधेकच्चो···पे···तस्मा लोका, सो असङ्खारेन अरियमग्गं संजनेति, उपरिट्ठिमानं संयोजनानं पहानाय, अयं···असङ्खारपरिनिब्बायी ।

कतमो च पुग्गलो **ससङ्खारपरिनिब्बायी ?** इधेकच्चो···पे···तस्मा लोका, सो ससङ्खारेन अरियमग्गं संजनेति···अयं ससङ्खारपरिनिब्बायी ।

कतमो च पुग्गलो **उद्धंसोतो अकनिट्ठगामी ?** इधेकच्चो···पे···तस्मा लोका, सो

[426] ध्यानानि व्यवकोर्यातः पञ्चमस्त्वकनिष्ठगः ।[१]
शुद्धावासोपपत्तिः खलु ध्यानव्यवकरणफला ।[२]
चतुर्धाऽऽरूप्यगाम्यन्यो दृष्टनिर्वायकोऽपरः ॥[3]

ऊर्ध्वंगस्यानागामिनः पञ्चधा भेद उक्तः। [आ]रूप्यगामी तु चतुर्धा निर्दिश्यते पूर्वोक्तेभ्यः अन्तरापरिणि(नि)र्वायि(2)णामपास्य । इत्येते षड्[४] भवन्ति । दृष्टधर्मनिर्वायकः सप्तम इहैव जन्मनि यः परिणि(नि)र्वाति ॥

[427] पुनस्त्रिधा त्रिधा कृत्वा त्रीनतो रूपगा नव ।[५]

एते खलु रूपोपगाः पञ्चानागामिनस्त्रयो भवन्ति । अन्तरोप[प]द्यपरि-

---

अविहा चुतो अतप्पं गच्छति, अतप्पा चुतो सुदस्सं गच्छति, सुदस्सा चुतो सुदस्सिं गच्छति, सुदस्सिया चुतो अकनिट्ठं गच्छति, अकनिट्ठे अरियमग्गं संजनेति…अयं…उद्धंसोतो अकनिट्ठगामी । *P. Paññatti*. pp. 16-17.

—उपहच्च कालाकिरियं ति उपगन्त्वा कालकिरियं । आयुक्खयस्स आसन्ने ठत्वा ति अत्थो ।…असङ्खारससङ्खारपरिनिब्बायिनिद्देसेसु असङ्खारेन अप्पदुक्खेन अधिमत्तप्पयोगं अकत्वा… । *P. Paññatti A*. p. 36.

See *Aṅg*. II. p. 156, IV. pp. 70, 380; *S*. v. 201; *Vm*. XXII. 26. and *Sakv*. pp. 558 ff. For fortyeight kinds of *anāgāmins* see *P. Paññatti A*. pp. 37-39.

[१] Cf. ऊर्ध्वंस्रोताश्च स ध्याने व्यवकीर्णोऽकनिष्ठगः । *Ak*. VI. 37 cd.
On *dhyāna-vyavakiraṇa*, vide infra, p. 344.

[२] After this the Kośakāra gives more details about the *ūrdhvaṁ-srota* :—

ऊर्ध्वंस्रोता द्विविधो हेतुतश्च फलतश्च । हेतुतो व्यवकीर्णाव्यवकीर्णध्यानत्वात् । फलतोऽकनिष्ठभवाग्रपरमत्वात् । तत्र येन ध्यानं व्यवकीर्णं सोऽकनिष्ठान् गत्वा परिनिर्वाति ।

स प्लुतोऽर्द्धप्लुतः सर्वप्लुतश्च

स पुनरेषोऽकनिष्ठपरम ऊर्ध्वंस्रोतास्त्रिविधः । प्लुतादिभेदात् ।…एवं तावद् ध्याने व्यवकीर्णे कनिष्ठगो वेदितव्यः । ततः

अन्यो भवाग्रगः ।

अव्यवकीर्णध्यान ऊर्ध्वंस्रोता भवाग्रनिष्ठो भवति ।…शमथचरितो ह्येषः । पूर्वकस्तु विपश्यनाचरितः ।…*Akb*. VI. 37 d and 38 ab.

[३] Cf. आरूप्यगश्चतुर्धाऽन्य इह निर्वायकोऽपरः । *Ak*. VI. 38 cd.

[४] षडिति । अन्तरा परिनिर्वायी उपपद्यपरिनिर्वायी साभिसंस्कारपरिनिर्वायी अनभिसंस्कारपरिनिर्वायी ऊर्ध्वंस्रोताः आरूप्यगश्च । षष्ठश्चतुर्धाभेदमगणय्येति । *Sakv*. p. 561.

[५] Cf. पुनस्त्रींस्त्रिविधान् कृत्वा नव रूपोपगाः स्मृताः । *Ak*. VI. 39 ab.

णि(नि)र्वायिणमू(न्नू ?)र्ध्वस्रोताश्च । द्वितीयाद्या हि त्रयोऽणा(ना)गामिनः सर्व एवोपपद्य परिणि(नि)र्वायिणो भवन्ति । अ(3)नुपपन्नानां परिणि(नि)र्वाणात् । तेषां प्रत्येकं तृ(त्रि)धा भेदान्नवानागामिनो भवन्ति ।[१] कथमिति ? अन्तरापरिणि(नि)र्वायिणस्तावदुत्पतत एवादूरं गत्वो[२]पपत्त्यासन्नीभूतस्य च परिणि(नि)र्वानि(ण)भेदात् । उपपद्यपरिणि(नि)र्वायिणः उपपद्य साभिसंस्काराण(न)भिसंस्कारभेदादूर्ध्वस्रोतसः प्लुतादिभेदात् ।[3]

तद्विशेषः पुनर्ज्ञेयः कर्मक्ले(4)शाक्षभेदतः ॥[४]

तेषां पुनस्त्रयाणां नवानां वा अनागामिनां कर्मक्लेशेन्द्रियभेदाद्यथायोगं विशेषो बोद्धव्यः । त्रयाणां[५] तावत्कर्मतः, अभिनिर्वृत्यु[६]पपत्त्यपरपर्यायवेदनीयकर्मोपचितत्वात् । क्लेशतः मृदुमध्याधिमात्रक्लेशसमुदाचारात्[७] । इन्द्रियतोऽधिमात्रमध्यमृद्विन्द्रियभेदात् ॥

यदि तर्हि क्लेशेन्द्रियभे(5)दान्नवानागामिनो भवन्ति, कथं सूत्रे सप्त सत्पुरुषगतयो देशिताः ?[८] तदपदिश्यते—

---

[१] Cf. अन्तरापरिनिर्वायिणस्तावदाश्वनाशुचिरपरिनिर्वाणात् दृष्टान्तत्रयेण । उपपद्यपरिनिर्वायिण उपपद्याभिसंस्कारानभिसंस्कारपरिनिर्वाणात् । ऊर्ध्वस्रोतसः प्लुतादिभेदात् । **सर्वेषां वा त्रयाणामाश्वनाशुचिरपरिनिर्वाणादिति त्रित्वम्** । *Akb*. VI. 39 ab. See *Sakv*. p. 561.

[२] See *Aṅg*. IV. pp. 70 ff. V. infra. p. 341, n. 2.

[३] **प्लुतादिभेदादिति** । प्लुतार्धप्लुतसर्वच्युतभेदादित्यर्थः । *Sakv*. p. 562.—तत्र **प्लुतो** नाम य इह ध्यानानि व्यवकीर्य ध्यानत्रयात् परिहीणः प्रथमं ध्यानमास्वाद्य ब्रह्मकायिकेषूपपन्नः पूर्वाभ्यासवशाच्चतुर्थं ध्यानं व्यवकीर्य तस्मात् प्रच्युतेऽकनिष्ठेषूपपद्यते । एष हि **मध्यमनिमज्जनात् प्लुतः** । **अर्धप्लुतो** नाम यस्ततः शुद्धावासेषूपपद्य मध्यादेकमपि स्थानान्तरं विलंघ्याकनिष्ठान् प्रविशति ।···**सर्वच्युतो** नाम यः सर्वाणि स्थानान्तराणि संचार्याकनिष्ठान् प्रविशति । *Akb*. VI. 38 a. See *Sakv* p. 560.

[४] Cf. **तद्विशेषः पुनः कर्मक्लेशेन्द्रियविशेषतः** । *Ak*. VI 39 cd.

[५] अन्तरोपपद्यपरिनिर्वायिणोः ऊर्ध्वस्रोतसश्च । *Sakv*. p. 562.

[६] अभिनिर्वृत्तिरन्तराभवः । *Ibid*.

[७] कथं पुनरेते नवप्रकाराः क्लेशा भवन्ति ? इह क्लेशस्त्रिप्रकारो मृदुमध्याधिमात्रतर इति···*Ibid*. V. supra, p. 165, n. 2.

[८] Cf. त एते नवप्रकारक्लेशेन्द्रियत्वान्नवानागामिनो भवन्ति । कथं तर्हि **सूत्रे सप्तसत्पुरुषगतयो** देशिताः ? *Akb*. VI. 39 cd.

[428] षड्धोर्ध्वस्रोतसा सार्धं सप्तधा सद्गतिर्मता ।[१]

द्वौ खल्वत्रानागामिनौ त्रिधा त्रिधा भि(त्त्वा) षड्धा[२] **व्यवस्थापितौ ।**

---

[१] Cf. **ऊर्ध्वस्रोतुरभेदेन सप्तसंगतयो मताः ।** *Ak.* 40 ab.

[२] त्रयोऽन्तरापरिनिर्वायिणः; त्रय उपपद्य-परिनिर्वायिणः । *Sakv.* p. 563.

The Kośakāra quotes the *Satpurusha-gati-sūtra*, in the connection of *añtarābhava* in *Akb.* III. 12 d. Yaśomitra gives full details :—**सप्त वोऽहं भिक्षवः सत्पुरुषगतीर्देशयिष्याम्यनुपादाय च परिनिर्वाणम् ।** तच्छृणाथ···**सप्तसत्पुरुषगतयः कतमाः ?** इह भिक्षुरेवं प्रतिपन्नो भवति । नो च स्यां नो च मे स्यान्न भविष्यामि न मे भविष्यति यदस्ति यद्भूतं तत्प्रजहामीत्युपेक्षां प्रतिलभते । स भवेऽस्मिन् न रज्यते । स भवेऽस्मिन्न सज्यते । अथोत्तरं पदं शान्तं प्रज्ञया प्रतिविध्यति । तच्चानेन पदं कायेन साक्षात्कृतं भवति । एवं प्रतिपन्नस्य भिक्षोः का गतिः स्यात् कोपपत्तिः । कोऽभिसम्पराय इति स्युः प्रष्टारः । तद्यथा भिक्षवः **परीत्तः शकलिकाग्निरभिनिवर्तमान एव निर्वायात्**, एवमेव तस्य तावन्मानावशेषमप्रहीणं भवत्यपरिज्ञातम् । तस्य तावन्मानावशेषस्याप्रहाणादपरिज्ञातात्पञ्चानामवरभागीयानां संयोजनानां प्रहाणादन्तरा **परिनिर्वायी भवति ।** इयं प्रथमा **सत्पुरुषगतिराख्याता ।**

पुनरपरं···तद्यथाऽयोगुडानां वाऽयःफालानां वा प्रदीप्ताग्निसंप्रतप्तानां अयोघनेन हन्यमानानाम**यःप्रपाटिका उत्पतन्त्येव निर्वायात् ।** एवमेव···**अन्तरा परिनिर्वायी** भवति ।

पुनरपरं···अयःप्रपाटिका **उत्प्लुत्यापतित्वैव पृथिव्यां निर्वायात् ।** एवमेव···**अन्तरापरिनिर्वायी** भवति ।

पुनरपरं···अयःप्रपाटिका **उत्प्लुत्य पतितमात्रैव पृथिव्यां निर्वायात् ।** एवमेव··· **उपपद्यपरिनिर्वायी** भवति ।

पुनरपरं···अयःप्रपाटिका उत्प्लुत्य **परीत्ते तृणकाष्ठे** निपतेत् । सा तत्र धूममपि कुर्यात् । अर्चिरपि संजनयेत् । सा तत्र···तदेव **परीत्तं तृणकाष्ठं दग्ध्वा पर्यादाय निरुपादाना निर्वायात् ।** एवमेव···**अनभिसंस्कारपरिनिर्वायी** भवति ।

पुनरपरं···अयःप्रपाटिका **महति विपुले तृणकाष्ठे निपतेत् ।**···एवमेव···**साभिसंस्कारपरिनिर्वायी** भवति ।

पुनरपरं अयःप्रपाटिका **उत्प्लुत्य महति विपुले तृणकाष्ठे निपतेत्**···विपुलं तृणकाष्ठं दग्ध्वा ग्राममपि ··ग्रामप्रदेशमपि··नगरं···नगरप्रदेशमपि जनपदं···षण्डमपि दहेत् ।···**दग्ध्वा ···निर्वायात्**···। एवमेव···**ऊर्ध्वंस्रोता** भवति । **इयं सप्तमी सत्पुरुषगतिराख्याता ।** *Sakv.* pp. 270—1.

Cf. **सत्त भिक्खवे पुरिसगतियो देसिस्सामि**···।

इध भिक्खवे भिक्खु एवं पटिपन्नो होति 'नो च' स्स, नो च मे सिया, न भविस्सति, न मे भविस्सति, यदत्थि यं भूतं, तं पजहामी'ति, उपेक्खं पटिलभति । सो भवे न रज्जति, संभवे न रज्जति, अथुत्तरिं पदं सन्तं सम्मप्पञ्ञाय पस्सति, तञ्च ख्वस्स पदं न सब्बेन सब्बं

तृतीयस्तूर्ध्वस्रोताऽनाकुलीकरणार्थमभेदेनैवोक्तः । इति सप्तधा देशिता सत्पुरुषगतिः ।[१]

सच्छिकतं होति, तस्स न सब्बेन सब्बं मान···भवराग···अविज्जानुसयो पहीनो होति । सो पञ्चन्नं ओरम्भागियानं संयोजनानं परिक्खया **अन्तरापरिनिब्बायी** होती ।

सेय्यथापि भिक्खवे दिवससन्तत्ते अयोकपाले हञ्ञमाने, **पपटिका निब्बत्तित्वा निब्बायेय्य,** एवमेव···अन्तरापरिनिब्बायी होति । ·· एवं पटिपन्नो···पपटिका **निब्बत्तित्वा उप्पतित्वा** निब्बायेय्य, एवमेव···**अन्तरापरिनिब्बायी** होति ।···एवंपटिपन्नो···पपटिका निब्बत्तित्वा उप्पतित्वा **अनुपहच्चतलं** निब्बायेय्य···एवमेव···**अन्तरापरिनिब्बायी** होति ।

···एवं पटिपन्नो···पपटिका निब्बत्तित्वा उप्पतित्वा **उपहच्चतलं** निब्बायेय्य···एवमेव ···**उपहच्चपरिनिब्बायी** होति ।

···एवं पटिपन्नो···पपटिका···उप्पतित्वा **परित्ते तिणपुञ्जे** वा कट्ठपुञ्जे वा निपतेय्य, सा तत्थ अग्गिं पि जनेय्य, धूमं पि···**अनाहारा** निब्बायेय्य, एवमेव···**असङ्खारपरिनिब्बायी** होति ।

···एवं पटिपन्नो···पपटिका···**विपुले तिणपुञ्जे**···**अनाहारा** निब्बायेय्य, एवमेव··· **अनाहारा ससंखारपरिनिब्बायी** होति ।

···एवं पटिपन्नो···पपटिका···**महन्ते तिणपुञ्जे**···तिणपुञ्जं···परियादियित्वा गच्छम्पि ···दायम्पि **भूमिभागं आगम्म अनाहारा** निब्बायेय्य, एवमेव···**उद्धंसोतो होति अकनिट्ठगामी** ।

इमा खो भिक्खवे **सत्त सप्पुरिसगतियो** । *Aṅg*. IV. pp. 70-4.

See *P. Paññatti A*. pp. 36-39.

[१] Cf. सप्त सत्पुरुषगतयो नान्या इति । यत्तर्हि **सूत्र** एवोक्तम्—'**सत्पुरुषः कतमः ? शैक्ष्यः सम्यग्दृष्टया समन्वागतः**' इति विस्तरः । *Akb*. VI. 40 cd.

—नान्या शैक्षा गतय इति । न स्रोतापन्नसकृदागामिगतय इत्यर्थः । गतिरुत्पत्तिः सम्पराय इत्येते सूत्रे पर्याया उच्यन्ते । *Skav*. p. 563.

The term *satpurusha* is equal to *ārya*: सप्पुरिसानं दस्सावी···अरियानं दस्सावी···*M. sutta* 1. Buddhaghosha speaks of the following seven *ariyas*:— यं पन वुत्तं, **सत्तअरियपुग्गलविभागाय** पच्चयो होती ति, तत्थ, सद्धानुसारी, कायसक्खी, उभतोभागविमुत्तो, धम्मानुसारी, दिट्ठिप्पत्तो, पञ्ञाविमुत्तो ति इमे ताव सत्त अरियपुग्गला ।

यो हि अनिच्चतो मनसिकरोन्तो अधिमोक्खबहुलो सद्धिन्द्रियं पटिलभति, सो सोतापत्तिमग्गक्खणे **सद्धानुसारी** होति, सेसेसु सत्तसु ठानेसु **सद्धाविमुत्तो** । यो पन दुक्खतो मनसिकरोन्तो पस्सद्धिबहुलो समाधिन्द्रियं पटिलभति, सो सब्बत्थ **कायसक्खी** नाम होति । अरूपज्झानं पन पत्वा अग्गप्फलप्पत्तो **उभतोभागविमुत्तो** नाम होति । यो पन अनत्ततो मनसिकरोन्तो वेदबहुलो पञ्ञिन्द्रियं पटिलभति, सो सोतापत्तिक्खणे **धम्मानुसारी** होति, छसु ठानेसु **दिट्ठिप्पत्तो,** अग्गफले **पञ्ञाविमुत्तो ति** । *Vm*. XXI. 74—5.

See *P. Paññatti*, pp. 14-15. See *purisavagga*, *Aṅg*. II. pp. 217 ff; *Dīgha*, XXXIII. 2. 3 and *Netti*. p. 169.

कस्मात् पुनः स्रोतआपन्न(6)सकृदागामिनोः सत्पुरुषगतिर्न देशिता सत्पु[रु]षसूत्रोद्देशे लक्षणेपि सति तदुच्यते—

सति वृत्तेरणे(नै)र्याणादुक्तैषामेव सद्गतिः ॥[१]

यस्मादनागामिनः सत्येव वृत्तिर्भवति नासती ।[२] इतरयोस्तु कुशलाकुशले वृत्तिः । यस्माच्चानागामी यतो गतस्तत्र न पुनरागच्छति, तौ तु गतागती कुर्वाते तस्मा(7)त्तस्यैव स(सा) गतिर्देशिता नेतरयोरिति[३] ॥

किं पुनः परावृत्तजन्माप्यनागामी[४] सत्पुरुषगतौ व्यवस्थापितः ? नेत्याह । यस्मात्—

[429] परावृत्तभवो ह्यार्यो नेह धात्वन्तरोपगः ।[५]

रूपधातौ हि परावृत्तजन्मनः आर्यस्य धात्वन्तरगमने[६]ऽस्ति संभवः । कामधातौ तु परावृत्तजन्माऽऽर्यो न धात्वन्तरं गच्छति तत्रैव जन्मनि (8)परिणि(नि)र्वाणात्[७] ।[८]

---

[१] Cf. **सदसद्वृत्त्यवृत्तिभ्यां गतप्रत्यागतैश्च ताः ।** *Ak.* vi. 40 cd.

[२] **सति च कर्मणि वृत्तिः** प्राणातिपाताद्यकरणात् । असति **चावृत्ति**रब्रह्मचर्याद्यकरणात् । अकुशलेन हि चित्तेनाब्रह्मचर्यादिकरणमिति । तेषां तु वीतरागाणां सत्येव कर्मणि वृत्तिर्नासति परिहीणाकुशलत्वात् । *Sakv.* p. 563. See *Kv.* xii. 8 and 9.

[३] After this the *Akb.* (vi. 40 cd) has : अन्येषामप्यस्ति पार्यायिकं सत्पुरुषत्वम् । पञ्चविधस्य पापस्यात्यन्तमकरणसंवरप्रतिलम्भात् प्रायेणाकुशलप्रहाणाच्च । येषां तु निष्पर्यायेण तेषामिह [=सत्पुरुषगतिसूत्रे] अधिकारः ।

[४] परिवृत्तजन्मा in *Akb.*—**परिवृत्तजन्माऽनागामी** यः प्रथमे जन्मनि स्रोतापत्तिफलं सकृदागामिफलं वा प्राप्य द्वितीये जन्मन्यनागामी भवति । *Sakv.* p. 564.

[५] Cf. **न परावृत्तजन्मार्यः कामे धात्वन्तरोपगः ।** *Ak.* vi. 40 cd.

[६] Cf. रूपधातौ तु परावृत्तजन्मा **कदाचिदारूप्यान्** प्रविशति । य ऊर्ध्वंस्रोता भवाग्रपरमः । *Akb.* vi. 40 cd.

[७] तत्रैव जन्मनि परिनिर्वाणादिति । कामधातौ दुःखबहुलत्वेनास्य तीव्रसंवेगत्वात् । *Sakv.* p. 564.

[८] After this, the Kośakāra discusses one more point :—यर्त्तहि **शक्रेणोक्तम्**–'ये ते देवा अकनिष्ठा इति विश्रुताः अन्ते मे हीयमानस्य तत्रोपपत्तिर्भविष्यति ।' अभिधर्मानभिज्ञत्वादिति **वैभाषिकाः** । भगवताप्यनिवारणं संहर्षणीयत्वादिति । *Akb.* vi. 40 cd. —च्युतिनिमित्तोपपत्तिदुःखोद्विग्नस्य संप्रहर्षणीयत्वादित्याचार्य**संघभद्रः** । *Sakv.* p. 565.

यश्चैष कामधातौ परिवृत्तजन्माऽऽर्य उक्तः

एष चोर्ध्वगतिश्चैव नाक्षमं चारहाणि(नि)भाक् ॥[१]

ऊर्ध्वधातूपपन्नः ऊर्ध्वगतिरार्य इत्यपि कृतं द्वयोरप्यण(न)योर्णा(र्ना)स्तीन्द्रियसंचारो न परिहाणिः[२] । जन्मान्तरपरिवासेनार्यमार्गस्य सन्ततौ दृढतरणि(नि)वेशात्, आश्रयविशेषलाभादार्यस्य[3] (9)जन्मान्तरे रूपारूप्यप्रवेशेन्द्रियसंचारपरिहाणयो न सन्ति ॥[४]

अथ यदुक्तं ध्यानव्यवकिरणादिति[५] तत्र कतमद्ध्यानमादौ व्यवकीर्यते ?

[430] अन्त्यमाकीर्यते पूर्वं सिद्धिर्द्विक्षणमिश्रणात् ।[६]

चतुर्थे हि प्रश्रब्धिसुखोत्कटः समाधिः सर्वकर्मण्यो यतस्तत्संमुखीभावात्, आश्रयस्योपचये सत्यामृताभिवृद्धिः[VII 7, B. Fol. 130 b.]येन शक्नोति ध्यानानि व्यवकरितुम् ।

कथं पुनर्ध्यानानि व्यवकीर्यन्ते ? आदौ तावदनास्रवं प्रवाहयुक्तं चतुर्थं ध्यानं समापद्यते[७] । तस्माद्व्युत्थाय तदेव सास्रवं प्रवाहयुक्तं समापद्यते ।

---

[१] Cf. **स चोर्ध्वजश्च नैवाक्षसंचारपरिहाणिभाक् ।** *Ak*. vi. 41 ab.

[२] For *indriya-saṁchāra* and *parihāṇi*, see *Akb*. vi. 57 c, 60 and *Sakv*. p. 583-592.

[३] Cf. जन्मान्तरपरिवासेनेन्द्रियाणां परिपक्वतरत्वादाश्रयविशेषलाभाच्च *Akb*. vi. 41. ab.—**इन्द्रियाणां परिपाकतरत्वादिति** प्रज्ञादीनामिन्द्रियाणां निष्यन्दफलपुष्टिविशेषादित्यर्थः। **आश्रयविशेषलाभाच्च** । यस्माच्चाश्रयविशेषमनुपहतं मार्गसम्मुखीभावानुकूलं प्रतिलभते । दृश्यन्ते हि तीक्ष्णेन्द्रिया अपि सन्त आश्रयवैगुण्याद् गुणेभ्यः परिहीयमाणा इत्यतो जन्मान्तरपरिवासेनेन्द्रियाणां परिपाकतरत्वादिन्द्रियसंचारो नास्ति । आश्रयविशेषलाभाच्च परिहाणिर्नास्ति । अनेनैव जन्मान्तरपरिवासेन धात्वन्तरगमनं भवतीति । *Sakv*. p. 565.

[४] After this the Kośakāra deals with one more point : अथ कस्मादवीतरागः शैक्षो नान्तराये परिनिर्वायी भवति ? मार्गस्याजितत्वादसम्मुखीभावः, अनुशयानां च नातिमन्दत्वात् । दुःसमतिक्रामत्वात्, कामधातोरिति **वैभाषिकाः** ।···*Akb*. vi. 41 cd.—अनुशयानां च नातिमन्दत्वात्···इत्ययम**ाचार्यस्य परिहारः** । *Sakv*. p. 565.

[५] V. supra, p. 339, n. 3.

[६] Cf. **आकीर्यते चतुर्थं प्राग्निष्पत्तिक्षणमिश्रणात् ।** *Ak*. vi. 42 ab.

[७] अर्हन्ननागामी वा···समापद्यते । *Akb*. vi. 42 a.

पुनश्च तदुत्थितः अनास्रवं तथैव स तान् प्रवाहान्ह्रसित्वा याव[त्क्षण]द्वये तिष्ठतीत्येष प्रयोगः ।[१]

सिद्धिस्तु क्षणद्वयमिश्रणात्। यदा तु (2)शक्नोत्येकेनास्रवक्षणानन्तरमेकं लौकिकं संमुखीकर्तुम्, एकलौकिकक्षणानन्तरं चैकमनास्रवमयत्नेन, एवमनास्रवाभ्यां सास्रवस्य मिश्रीकरणान्निष्पन्ना भवति ध्यानव्यवकिरणा[२]।

किमर्थं पुनर्ध्यानव्यवकिरणम् ? तदुच्यते—

उद्भवार्थं सुखार्थं च क्लेशाशङ्कार्थमेव च ॥[३]

त्रिभिः कारणैर्ध्यानानि व्य(3)वकीर्यन्ते। उपपत्त्यर्थं[४] सुखविहारार्थं[५] क्लेशपरिहाणिभीरुतया[६] च। तत्र दृष्टिप्राप्तः[७] उपपत्त्यभिलाषसमापत्तिप्रियताभ्याम्। श्रद्धाधिमुक्तस्तु[८] पूर्वाभ्यां च कारणाभ्यां क्लेशभीरुतया च।

---

[१] Cf.···एवं प्रवाहापह्रासेन **यदा किल** द्वौ क्षणावनास्रवौ द्वौ सास्रवौ पुनश्चानास्रवौ। अयं व्यवकरणस्य प्रयोगः।···अशक्यं तु क्षणव्यवकिरणमन्यत्र बुद्धात्। अत इच्छातः प्रवाहत्रयसमापत्तितो निष्पन्नं भवतीति **पश्यामः**। *Akb.* vi. 41 ab.

—'यदा किले'ति **किलशब्दो वैभाषिकमतद्योतकः। स्वमतं** तु···'अशक्यं तु क्षणव्यवकिरणमिति विस्तरेण। *Sakv.* p. 565.

[२] Cf. यदा त्वनास्रवस्य क्षणस्यानन्तरं सास्रवं सम्मुखी करोति सास्रवस्यानास्रवम्। एवं सास्रवस्य क्षणस्यानास्रवाभ्यां मिश्रणात् व्यवकिरणं निष्पन्नं भवतीति **वैभाषिकाः**। द्वौ हि क्षणावानन्तर्यमार्गसदृशौ तृतीयो विमुक्तिमार्गसदृश इति। एवं चतुर्थं ध्यानं व्यवकीर्य तद्बलेनान्यान्यपि व्यवकीर्यन्ते। *Akb.* vi. 42 b.—आनन्तर्यमार्गसदृशाविति अनास्रवसास्रवौ।···विमुक्तिमार्गसदृश इत्यनास्रवः। *Sakv.* p. 565.

[३] Cf. **उपपत्तिविहारार्थं क्लेशभीरुतयापि च**। *Ak.* vi. 42 cd.

[४] शुद्धावासोपपत्त्यर्थम्। *Sakv.* p. 565.

[५] दृष्टधर्मसुखविहारार्थम्। *Ibid.*

[६] अपरिहाण्यर्थमिति फलान्न परिहीयेयमिति। *Ibid.* p. 566.

[७] कतमो च पुग्गलो **दिट्ठिप्पत्तो** ? इधेकच्चो पुग्गलो इदं दुक्खं ति···समुदयो ति···निरोधो ति···पटिपदा ति यथाभूतं पजानाति, तथागतप्पवेदिता च'स्स धम्मा पञ्ञाय वोदिट्ठा होन्ति वोचरिता, पञ्ञाय च'स्स दिस्वा एकच्चे आसवा परिक्खीणा होन्ति···अयं···**दिट्ठिप्पत्तो**। *P. Paññatti.* p. 15.

[८] कतमो च पुग्गलो सद्धाविमुत्तो ? इधेकच्चो···इदं दुक्खं ति···पे···एकच्चे आसवा परिक्खीणा होन्ति, **नो च खो यथा** दिट्ठिप्पत्तस्स, अयं वुच्चति पुग्गलो **सद्धाविमुत्तो**। *Ibid.*

असमयविमुक्तो[1]ऽप्यर्हन् द्रि(दृ)ष्टधर्मसुखविहारार्थम्[2]। समयविमुक्तश्च[3] क्लेशभीरुतया चेति ॥

यच्चैतद्व्यवकिरणमुक्तम्,

[431] (4)तत्पाञ्चविध्यतः पञ्च शुद्धावासभुवः स्मृताः[4] ।

तद्धि चतुर्थध्यानव्यवकिरणं पञ्चप्रकारं मृदुमध्याधिमात्रतरमधिमात्रतमभेदात्। अतो हेतुपाञ्चविध्यात् फलमपि पञ्चविधं भवति।[5]

एताः पुनः शुद्धावासभूमयः

न जातु दृष्टपूर्वास्ताः सर्वैरपि पृथग्जनैः ॥

—सद्धाविमुत्तनिद्देसे **नो च यथा दिट्ठिप्पत्तस्सा** ति यथा दिट्ठिप्पत्तस्स आसवा परिक्खीणा, न एवं सद्धाविमुत्तस्सा ति अत्थो। किं पन नेसं किलेसप्पहाने नानत्तं अत्थीति? नत्थि। **अथ कस्मा सद्धाविमुत्तो दिट्ठिप्पत्तं न पापुणाती ति? आगमनीयनानत्तेन।** दिट्ठिप्पत्तो···अप्पदुक्खेन अप्पकसिरेन···सद्धाविमुत्तो पन दुक्खेन कसिरेन···किलेसे विक्खम्भेतुं सक्कोति। तस्मा दिट्ठिप्पत्तं न पापुणाति। **अपि च नेसं पञ्ञाय पि नानत्तं अत्थि येव।** दिट्ठिप्पत्तस्स हि उपरितिण्णं मग्गानं विपस्सनाञाणं तिक्खं···सद्धाविमुत्तस्स···नो तिक्खं··· *P. Paññatti A.* p. 32.

[1] **कतमो च पुग्गलो असमयविमुत्तो?** इधेकच्चो पुग्गलो न हेव खो कालेन कालं समयेन समयं अट्ठविमोक्खे कायेन फस्सित्वा विहरति। पञ्ञाय चस्स दिस्वा आसवा परिक्खीणा होन्ति। अयं वुच्चति पुग्गलो असमयविमुत्तो। *P. Paññatti.* p. 11.—असमयविमुत्तो ति पनेत्थ **सुक्खविपस्सकखीणासवस्सेतं** नामं। *P. Paññatti A.* p. 22.

[2] Cf. *Diṭṭhadhammasukha-vihāra*, *Dīgha*, xxxiii. 1. 11; *Aṅg* iv. p. 362.

[3] कतमो च पुग्गलो समयविमुत्तो? इधेकच्चो पुग्गलो कालेन कालं समयेन समयं अट्ठविमोक्खे कायेन फस्सित्वा विहरति! पञ्ञाय च' स्स दिस्वा **एकच्चे आसवा** परिक्खीणा होन्ति। *P. Paññatti.* p. 11.—अट्ठविमोक्खे ति रूपावचरारूपावचरा अट्ठ समापत्तियो। ···समयविमुत्तो ति पन तिण्णं सोतापन्नसकदागामिअनागामीनं येवेतं नामं। *P. Paññatti A.* p. 21.

[4] Cf. **तत्पाञ्चविध्यात्पञ्चैव शुद्धावासोपपत्तयः।** *Ak.* vi. 43 ab.

Also cf. अविहा, अतप्पा, सुदस्सा, सुदस्सी, अकनिट्ठा चेति सुद्धावासभूमि पञ्चविधा होति। *A. Saṅgaho*, v. 6.

[5] The Kośakāra gives one more view:—श्रद्धादीन्द्रियाधिक्यात् **पञ्चेत्यपरे।** *Akb.* vi. 43 ab.—अपरे··· **भदन्तश्रीलातमतम्।** श्रद्धाधिकाया भावनाया अवृहाः फलम्। एवं यावत् प्रज्ञाधिकाया भावनाया अकनिष्ठाः फलमिति। *Sakv.* p. 566.

भवाग्रमुपादाय ब्रह्मलोकमिन्द्रलोकं (5)यावदवीचिमुपादाय सर्वबालपृथग्जनैर्दृ(रदृ)ष्टपूर्वमन्यत्र शुद्धावासेभ्य इति ॥

अभिधर्मप्रदीपे[१] विभाषाप्रभायां वृत्तौ षष्ठस्याध्यायस्य द्वितीयः पादः ॥

---

[१] Here the Text is called *Pradīpa.* At the end of the fourth *pāda* of the Seventh *Adhyāya* and the third *pāda* of the Eighth *Adhyāya* also, it is called *Pradīpa.* V. infra, *Adv. kārikā*, 531 and 585. Elsewhere it is uniformally called *Dīpa* and the author of the Text is called *Dīpakāra.* V. supra, p. 169.

षष्ठाध्याये

तृतीयपादः ।

[432] यो निरोधसमापत्तिमश्नुते कायसाक्ष्यसौ ।[१]

यः खलु निरोधसमापत्ति[२]लाभ्यनागामी[३]स कायसाक्षी[४]त्युच्यते ।

---

[१] Cf. **निरोधलाभ्यनागामी कायसाक्षी पुनर्मतः ।** *Ak*. VI. 43 cd.

[२] V. supra, pp. 93 ff. On *nirodha-samāpatti*, see *Vm*. XXIII. 16—52.

[३] श्रद्धाधिमुक्तो वा दृष्टिप्राप्तो वा [अनागामी] *Sakv*. p. 566.

[४] 'कायसक्खी कायसक्खी'ति आवुसो वुच्चति । **कित्तावता नु खो आवुसो कायसक्खी वुत्तो भगवता ति ?**

इधावुसो भिक्खु विविच्चेव कामेहि···पठमं···चतुत्थं झानं उपसम्पज्ज विहरति, यथा यथा च तदायतनं तथा तथा नं कायेन फस्सित्वा विहरति । एत्तावता पि···:कायसक्खी वुत्तो भगवता **परियायेन ।**

···पुन च परं आवुसो भिक्खु सब्बसो **नेवसञ्ञा नासञ्ञायतनं समतिक्कम्म सञ्ञावेदयितनिरोधं उपसम्पज्ज विहरति, पञ्ञाय चस्स दिस्वा आसवा परिक्खीणा होन्ति, यथा यथा च तदायतनं तथा तथा नं कायेन फस्सित्वा विहरति ।** एत्तावता पि खो आवुसो कायसक्खी वुत्तो भगवता **निप्परियायेना ति ।** *Ang*. IV. pp. 451-2.

—कायेन फस्सित्वा···ति···सहजात**नामकायेना** ति अत्थो । **निप्परियायेना** ति यत्तकं कायेन सक्खिकातब्बं सब्बस्स कतत्ता अयं निप्परियायेन कायसक्खी । *Ang. A*. IV. p. 206.

कतमो च पुग्गलो **कायसक्खी ?** इधेकच्चो पुग्गलो अट्ठविमोक्खे कायेन फस्सित्वा विहरति, पञ्ञाय च'स्स दिस्वा **एकच्चे** आसवा परिक्खीणा होन्ति—अयं···**कायसक्खी ।** *P. Paññatti*, p. 14.—कायसक्खी निद्देसे **एकच्चे आसवा** ति हेट्ठिममग्गत्तयवज्झा ।···कायसक्खी···फुट्ठन्तं सच्छिकरोतीति कायसक्खी । **झानफस्सं पठमं फुसति । पच्छा निरोधं निब्बानं सच्छिकरोतीति कायसक्खी ।** *P. Paññatti A*. p. 30.

Also cf. अष्टभूमिषु वैराग्याल्लभते निरोधसमापत्तिमित्युच्यते **कायसाक्षी** अनागामी । विमुक्तश्चेदर्हद्धर्ममिव **निर्वाणं कायेन स्पृशति** पंचावरभागीयानां संयोजनानां प्रहाणे प्राप्नोत्यनागामित्वम् । पंचोर्ध्वभागीयानां संयोजनानां प्रहाणे प्राप्नोत्यर्हत्वम् । *Aam*. p. 86.

कायसाक्षीति अर्हत्त्वप्रतिपन्नकोऽनागामी निरोधलाभी **कायसाक्षी ।** तद्वद्बुद्धत्वप्रतिपन्नकत्वेनार्य**मैत्रेयः** कायसाक्षी । *Aaa*. pp. 442-3.

निर्वाण(6)सदृशस्य धर्मस्य कायेण(न) साक्षात्करणात् ।[१] स खलु धर्मः कायाश्रयेणोपजायते । तत्प्राप्तिलाभादपि निरोधलाभीत्युच्यते ।[२]

भवाग्राष्टांशहा यावदर्हत्त्वप्रतिपन्नकः ॥[३]

प्रथमध्यानवैराग्यादेकप्रकार[४]मारभ्य यावद्भवाग्राष्टप्रकारप्रहाणादर्हत्त्वप्रतिपन्नको[५]द्रष्टव्यः ॥

[433] [६]यश्चानन्तर्य(7)मार्गेऽन्त्ये वज्रौपम्याह्वये[७]स्थितः ।

---

[१] The Kośakāra discusses this point in detail :—कथं पुनः कायेन साक्षात्करोति । चित्ताभावात् कायाश्रयोत्पत्तेः । **एवं तु भवितव्यम् ।** स हि तस्माद् व्युत्थायाप्रतिलब्धपूर्वां सविज्ञानकां कायशान्तिं प्रतिलभते । यतोऽस्यैवं भवति शान्ता वत निरोधसमापत्तिर्निर्वाणसदृशी बत निरोधसमापत्तिरिति । एवमनेन तस्यां शान्ततवं कायेन साक्षात्कृतं भवति । **प्राप्तिज्ञानसाक्षात्क्रियाभ्यां प्रत्यक्षीकारो** हि साक्षात्क्रिया । *Akb.* vi. 43 cd.

—'चित्ताभावात्' कायेनैव साक्षात्करोति । कथं कायेनैवेत्याह—'कायाश्रयोत्पत्तेः' **'एवं तु भवितव्य'मिति स्वमतमाचार्यस्य ।** *Sakv.* p. 566. See *LVPAk.* vi. p. 224, n. 2. See *Vm.* vviii. 31.

[२] Here the Kośakāra deals with one more point :—अष्टादश शैक्षा इत्यत्र सूत्रे किं कारणं कार्यसाक्षी नोक्तः ? He also enumerates various kinds of *anāgāmins*—···इत्यभिसमस्य सर्वे **चत्वारिंशदूनानि त्रयोदशसहस्राण्यनागामिनां** भवन्ति । *Akb.* vi. 43 cd. See *Sakv.* pp. 566-68 and *P.Paññatti A.* pp. 36-37.

[३] Cf. **आ भवाग्राष्टभागक्षिदर्हत्त्वे प्रतिपन्नकः ।** *Ak.* vi. 44 ab.

[४] Cf. प्रथमध्यानैकप्रकारवैराग्यमारभ्य । *Akb.* vi. 44 ab.—यस्मात् कामवैराग्यादनागामी व्यवस्थाप्यते तस्मात्ततः परेणार्हत्त्वफलप्रतिपन्नको भवति । *Sakv.* p. 568.

[५] रूपराग-अरूपराग-मान-उद्धच्च-अविज्जाय अनवसेसप्पहाणाय पटिपन्नो पुग्गलो **अरहत्तफलसच्छिकिरियाय पटिपन्नो ।** *P. Paññatti.* p. 18.

[६] Cf. **नवमस्याप्यानन्तर्यपथे वज्रोपमश्च सः ।** *Ak.* vi. 44 cd.

[७] यथा वज्रः सर्वं भिनत्ति एवमयं समाधिः सर्वमनुशयं भिनत्तीति सामर्थ्याद्वज्रोपमा अस्येति **वज्रोपमः ।** भिन्नत्वादसौ न सर्वां भिनत्ति । त्रैधातुकान् दर्शनप्रहातव्यान् भावनाप्रहातव्यांश्च कामावचरान् यावद्भावाग्रिकानष्टौ प्रकारान् ।···'सर्वांस्तु भेत्तुं समर्थ'इति संभवम्···*Sakv.* p. 568.

Cf. कतमो च पुग्गलो **वजिरूपमचित्तो ?** इधेकच्चो···आसवानं खया अनासवं चेतोविमुत्ति पञ्ञाविमुत्ति दिट्ठेव धम्मे सयं अभिञ्ञा सच्छिकत्वा उपसंपज्ज विहरति । सेय्यथापि नाम **वजिरस्स नत्थि किञ्चि अभेज्जं** मणी वा पासानो वा, एवमेवं···अयं वुच्चति **वजिरूपमचित्तो ।** *P. Paññatti.* p. 30.—वजिरं **वियं हि अरहत्तमग्गञ्ञाणं दट्ठब्बं,** मणिगण्ठिपासाणगण्ठि विय अरहत्तमग्गवज्झा किलेसा ।···वजिरेन निब्बिद्धवेधस्स पुन अपटिपूरणं विय अरहत्तमग्गेन छिन्नानं किलेसानं पुन अनुप्पादो दट्ठब्बो । *P. Paññatti A.* p. 47.

For details and other references, see *LVPAk.* vi. p. 228.

नवमस्यापि भावाग्रिकस्य प्रकारस्य प्रहाणायानन्तर्यमार्गे[१]ऽन्त्येऽन्त्यफलप्रतिपन्नकः एवावगन्तव्यः ।[२]

तत्फलार्थं क्षयज्ञानं तदेकालम्बनं न वा ॥[३]

तस्य वज्रोपमस्य समाधेर्बलादुत्थितं तद्बलोत्थमन्त्यविमुक्तिमार्गाख्यं[४] तेन सहैकालम्बनं भवति न वा । क्षयज्ञानस्य[५] चतुः(8)सत्यालम्बनत्वात् ॥

[434] तदवाप्तेरशैक्षो[६]ऽसावर्हंस्त्रैलोक्यसत्कृतः ।
सर्वक्लेशविसंयुक्तः शिक्षात्रितयपारगः ॥[७]

स खलु त्रयाणामास्रवाणां[८] निरवशेषप्रहाणात्तिसृणां च शिक्षाणां[९] पारगमनात् सब्रह्मकस्यापि लोकस्य पूजामर्हतीत्यर्हन्निरुच्यते ॥[१०]

---

[१] आनन्तर्यमार्गो वज्रोपमः समाधिरित्युच्यते । *Akb.* vi. 44 cd. Also cf. रूपारूप्यधात्वोः संयोजनबन्धनानां निरवशेषहानमुच्यते चित्तसमता वज्रोपमसमाधिः । *Aam.* p. 86.

[२] The Kośakāra enumerates several kinds of the *Vajropamasamādhi* :— वज्रोपमानां तु बहुभेदं वर्णयन्ति ।···त इमे ज्ञानाकारालम्बनभेदभिन्ना द्वापञ्चाशद्वज्रोपमा भवन्ति ।···पुनर्गोत्रेन्द्रियभेदात् भूयांसो भवन्ति । *Akb.* vi. 44 cd. —दशसहस्राण्यष्टषष्ट्युत्तराणि च त्रीणि शतानि वज्रोपमानां भवन्तीति । *Sakv.* p. 573.

[३] Cf. तत् क्षयाप्त्या क्षयज्ञानम् । *Ak.* vi. 45 a.

[४] वज्रोपमसमाधेरनन्तरं पश्चिमो विमुक्तिमार्गः । अत एव तत् क्षयज्ञानं । *Akb.* vi. 45 a.

[५] वज्रोपमसमाधिः । क्रमेण क्षयज्ञानं जायते । एतस्मिन् काले अर्हत्फलं भवत्यनुत्तरं । अपि सवैराग्यानन्तर्यमार्गं पश्चिमशैक्षचित्तं । इति वज्रोपमसमाधिक्रमेण प्रथममशैक्ष्यस्य क्षयज्ञानं जायते—'प्रहीणा मे जातिः प्राप्तं मयार्हत्त्वं क्षीणा मे सर्वसंयोजनक्लेशोपक्लेशाः ।' इत्युच्यते अर्हन् । *Aam.* p. 86. V. infra, *Adv. kārikā* 441 and 447.

[६] कतमो च पुग्गलो सेक्खो ? चत्तारो मग्गसमङ्गिनो तयो फलसमङ्गिनो पुग्गला सेक्खा । अरहा असेक्खो अवसेसा पुग्गला नेव सेक्खा नासेक्खा *P. Paññatti.* p. 14.

[७] Cf. अशैक्षोऽर्हन्नसौ तदा । *Ak.* vi. 456.

[८] V. supra, p. 297, n. 1.

[९] शिक्षात्रय इति अधिशीलमधिचित्तमधिप्रज्ञं च । ताः पुनः शीलसमाधिप्रज्ञास्वभावाः । *Akb.* vi. 45 b. The Kośakāra deals with this topic in detail. See *LVPAk.* vi. p. 230. V. supra, p. 196, n. 6.

[१०] यस्स पुग्गलस्स रूपरागो अरूपरागो मानो उद्धच्चं अविज्जा अनवसेसा पहीना—अयं···अरहा । *P. Paññatti.* p. 180.

एषां पुनस्त्रयाणां मार्गाणां कतमः सास्रवो कत(9)मो निरास्रवः ? तदुच्यते—

[435] भावनाख्यो द्विधा मार्गः समलामलभेदतः ।[१]
दर्शणा(ना)ख्यस्तु विज्ञेयः सर्वस्यैव निरास्रवः ॥

[436] आनुपूर्विकयद्भूयोवीतरागावीतरागाणाम् ।
(-वीतावीतरागिणाम्)[२]
अशैक्षाख्योपि बोद्धव्यो नित्यमेवामलीमसः ॥

कतमत्पुनः कतमां भूमिमत्येति ? तदपदिश्यते—

[437 a] भवाग्रं निर्मलोऽत्येति[३]······[Folios 131-133 lost][४]

Cf. आरकत्ता हतत्ता च किलेसारीन सो मुनि ।
हतसंसारचक्कारो पच्चयादीन चारहो ।
न रहो करोति पापानि, अरहं तेन वुच्चती ति ॥ *Vm.* VII. 25.

[१] Cf. **द्विविधो भावनामार्गो दर्शनाख्यस्त्वनास्रवः ।** *Ak.* VI. 1 cd.

भावनामार्गो द्विविधो लौकिको लोकोत्तरश्च । दर्शनमार्गस्तु लोकोत्तर एव त्रैधातुकप्रतिपक्षत्वात् । नवप्रकाराणां दर्शनहेयानां सकृत्प्रहाणाच्च । *Akb.* VI. 1 cd.

Also cf. **भावनामार्गः** कतमः ? दर्शनमार्गादूर्ध्वं **लौकिको मार्गो लोकोत्तरमार्गः मृदुमार्गो** मध्यमार्गोऽधिमात्रो मार्गः प्रयोगमार्गः आनन्तर्यमार्गः विमुक्तिमार्गः विशेषमार्गश्च । **लौकिको मार्गः** कतमः ? लौकिकं प्रथमं···नैवसंज्ञानासंज्ञायतनं च । ··**लोकोत्तरो मार्गः** कतमः ? दुःखसमुदयनिरोधमार्गज्ञानानि धर्मज्ञानान्वयपक्ष्याणि तैश्च संप्रयुक्तः समाधिः··· । *Asm.* p. 68.

[२] For *ānupūrvika* and *bhūyo-vītarāga*, v. supra, pp. 57-58.

[३] Cf. **लोकोत्तरेण वैराग्यं भवाग्रादन्यतो द्विधा ।** *Ak.* VI. 45 cd.

[४] Folios 131-133 are lost. In these lost folios the *Adv.* might have discussed the following topics, which are dealt with in the corresponding *Akb.* VI. 45—61 :—

(१) केनायं शैक्षः कुतो वैराग्यमाप्नोति ? (२) कतमया पुनर्भूम्या कुतो वैराग्यं भवति ? (३) क्षयज्ञानादनन्तरं किमुत्पद्यते ? (४) चत्वारि श्रामण्यफलानि । किमिदं श्रामण्यम् ? (५) यद्यनास्रवो मार्गः श्रामण्यं कथं लौकिकमार्गप्राप्तं फलद्वयं श्रामण्यफलं युज्यते ? (६) धर्मचक्रं ब्रह्मचक्रं च । (७) कस्मिन् धातौ कति श्रामण्यफलानि प्राप्यन्ते ? (८) षडर्हन्तः । (९) किं पुनरेते षडर्हन्त आदित एव तद्गोत्रा भवन्त्यथ पश्चात् ? (१०) कः पुनरेषां कुतः परिहीयते । फलात् गोत्राद्वा ? (११) किं कारणं प्रथमात् फलान्नास्ति परिहाणिः ? (१२) किं पुनरिमेऽर्हन्त एव षड्गोत्रा भवन्ति, अथाऽ-

[VII. B, 4. Fol. 134a.]……[१]तत्र तावदशैक्षस्य चत्वारि ध्यानानि त्रीण्यारूप्याण्यनागम्यध्यानान्तरं च । शैक्षस्य तु षडारूप्यत्रयं हित्वा ।[२] किं पुनरत्र कारणम् ?

[438] सविशेषं यतस्त्यक्त्वा फलं परमुपाश्नुते ।[3]

इह खलु यः फलविशिष्टमार्गस्थः इन्द्रियाणि संचरति सफलं फल[वि]शिष्टं[४] च मृद्विन्द्रियमार्गं त्यक्त्वा तीक्ष्णेन्द्रियमार्गसंगृहीतं फल(2)मात्रमेव प्रतिलभते । यश्चाशैक्षः आरूप्यभूमिं निःश्रित्येन्द्रियानि(णि) संचरति नियतमनागामिफलविशेषमार्गस्थस्य न चास्त्यनागामिफलमारूप्यभूमिसंगृहीतम्[५] । इत्येतत् कारणम् ।[६]

यदुक्तं भगवता—"[७]क्लेशात्(न्) प्रहायेह हि यस्तु पञ्चाहार्यधर्मा[८] परिपूर्णशैक्षः" इति । कियता परिपूर्णशैक्षो भवति ?[९]

न्येऽपि ? (१३) त्रिधा परिहाणिः । (१४) अथ योऽर्हत्फलात् परिहीयते किमसौ पुनर्जायते ? (१५) अथेन्द्रियाणि संचरतां कत्यानन्तर्यविमुक्तिमार्गा भवन्ति ? (१६) कः पुनः कतमां भूमिं निश्रित्येन्द्रियाणि संचरति ? (१७) सप्त आर्यपुद्गलाः ।

[१] The topic under discussion is :—कः पुनः कतमां भूमिं निश्रित्येन्द्रियाणि संचरति ?

[२] Cf. **अशैक्षो नव निश्रित्य भूमीः शैक्षस्तु षट् यतः ।** *Ak*. vi. 61 cd.

[3] Cf. **सविशेषं फलं त्यक्त्वा फलमाप्नोति वर्धयन् ।** *Ak*. vi. 62 ab.

[४] **फलं फलविशिष्टं** चेति । फलं सकृदागामिफलम् । फलविशिष्टं प्रथमध्यानादिप्रहाणाय प्रयोगानन्तर्यविमुक्तिविशेषमार्गलक्षणम् । *Sakv*. p. 594.

[५] **न चानागामिफलमारूप्यसंगृहीतमिति** । पञ्चानामवरभागीयानां प्रहाणादनागामीऽति सूत्रे वचनात् । दर्शनमार्गस्य च तत्राभावात् । तदभावः कामधात्वनालम्बनादिति । *Sakv*. p. 594. V. supra, p. 301, n. 4.

[६] After this the Kośakāra deals with the following topic:—इन्द्रियभेदात् षडर्हन्तो नव भवन्ति—बुद्धः, प्रत्येकबुद्धः, सप्तश्रावकाः । *Akb*. vi. 62 d 64 ab. This topic might have been discussed in the lost portions of *Adv*., v. supra, p. 352, n. 4.

[७] Quoted in *Akb*. vi. 64 cd. See *LVPAK*. vi. p. 267, n. 2.

[८] ‥ **पञ्चेति** पञ्चावरभागीयानि संयोजनानि सत्कायदृष्ट्यादीन्युक्तानि । **अहार्यधर्मेति** अपरिहाणिधर्मेत्यर्थः । *Sakv*. p. 597.

[९] Cf.…यतो च खो भिक्खवे भिक्खु सद्धो च होति सीलवा च बहुस्सुतो च धम्मकथिको च परिसावचरो च विसारदो च परिसाय धम्मं देसेति, चतुन्नं झानानं‥निकामलाभी

शैक्ष(3)स्य त्रिभिरक्षाद्यैर्द्वाभ्यां संपूर्णतार्हतः ॥[1]

शैक्षस्य खलु त्रिभिः कारणैः परिपूर्णता भवति । समापत्तीन्द्रियफलैः । तद्यथा दृष्टिप्राप्तस्य कायसाक्षिणः अन्यतरवैकल्याच्चु न परिपूर्णता स्यात्प्रागेव सर्ववैकल्यात् । तद्यथा कामावीतरागस्य श्रद्धाधिमुक्तस्यैवं तावच्छैक्षस्य ।

अशैक्षस्य द्वाभ्यामिन्द्रियसमापत्ति(4)भ्याम् । तद्यथोभयभागविमुक्तस्य[2] असमयविमुक्तस्येति ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ षष्ठस्याध्यायस्य तृतीयः पादः ॥

होति··, आसवानं खया अनासवं चेतोविमुत्तिं पञ्ञाविमुत्तिं दिट्ठेव धम्मे सयं अभिञ्ञा सच्छिकत्वा विहरति । एवं सो तेन अंगेन **परिपूरकारी** होति ।···भिक्खु समन्तपासादिको च होति । सब्बाकारपरिपूरो चा ति । *Aṅg.* IV. p. 3.

[1] Cf. **समापत्तीन्द्रियफलैः पूर्णः शैक्षोऽभिधीयते ।**
अशैक्षपरिपूर्णत्वं द्वाभ्याम् *Ak.* VI. 64 cd and 65 a.

[2] **कोऽयमुभयतो भागविमुक्तः ?···यो निरोधसमापत्तिलाभी स उभयतो भागविमुक्तः । प्रज्ञासमाधिबलाभ्यां क्लेशविमोक्षावरणविमुक्तत्वात् ।** *Akb.* VI. 64 ab.

Cf. कतमो च पुग्गलो **उभतोभागविमुत्तो** ? इधेकच्चो पुग्गलो अट्ठविमोक्खे कायेन फस्सित्वा विहरति, पञ्ञाय चस्स दिस्वा आसवा परिक्खीणा होन्ति । अयं··· उभतोभागविमुत्तो । *P.Paññatti*, p. 14. —**उभतोभागविमुत्तनिद्देसे··पञ्ञाय** चस्स दिस्वा ति **विपस्सनापञ्ञाय** सङ्खारगतानं, **मग्गपञ्ञाय** चत्तारि सच्चानि पस्सित्वा चत्तारोपि आसवा खीणा होन्ति । अयं··**द्वीहि भागेहि द्वे वारे विमुत्तो** ति **उभतोभागविमुत्तो । तत्रायं थेरवादो :—(१) तिपिटकचूळनागत्थेरो** ताव आह—समापत्तिया विक्खम्भनविमोक्खेन, मग्गेन समुच्छेदविमोक्खेन विमुत्तो ति उभतोभागेहि द्वे वारे विमुत्तो ति । (२) **तिपिटकमहाधम्मरक्खितत्थेरो** नामनिस्सितको एसो ति वत्वा

"अच्ची यथा वातवेगेन खित्ता अत्थं पलेति न उपेति संख्यं ।
एवं मुनी नामकाया विमुत्तो अत्थं पलेति न उपेति संख्यं ॥"

ति वत्वा, सुत्तं आहरित्वा **नामकायतो च रूपकायतो च सुविमुत्तता उभतोभागविमुत्तोति** आह । (३) **तिपिटकचूलाभयत्थेरो** पनाह—**समापत्तिया** विक्खम्भनविमोक्खेन एकवारं विमुत्तो, **मग्गेन** समुच्छेदविमोक्खेन एकवारं विमुत्तो ति उभतोभागविमुत्तो ।

इमे पन तयोपि थेरा पण्डिता तिण्णम्पि वादे कारणं दिस्सतीति तिण्णम्पि वादं तन्ति कत्वा ठपिंसु । **सङ्खेपतो पन अरूपसमापत्तिया रूपकायतो विमुत्तो, मग्गेन नामकायतो विमुत्तो ति उभतोभागेहि विमुत्तत्ता उभतोभागविमुत्तो ।** *P. Paññatti A.* p. 30. Also cf. सर्वविमुक्तः कतमः । प्राप्तनिरोधसमापत्तिः सर्वविमुक्तः । *Aam.* p.87 ,

षष्ठाध्याये

चतुर्थपादः ।

लौकिकलोकोत्तरदर्शण(न)भावनाशैक्ष[ाशैक्ष]मार्गभेदेनानेकविधो मार्ग उक्तः। स तु

[439] विज्ञातव्यः समासेन पुनर्मार्गश्चतुर्विधः ।
आनन्तर्यविमुक्त्याख्यौ प्रा(5)रम्भोत्कर्षलक्षणौ ॥[१]

तत्र प्रयोगमार्गः कुशलमूलफलस्यारम्भ इत्यर्थः ।[२] **तस्यानन्तरमानन्तर्यमार्गः येन क्लेशान्प्रजहाति**[3] **। विमुक्तिमार्गो**[४] **यः तत्प्रहेयावरणविमुक्ते**

---

[१] Cf. **मार्गः समासतः । विशेषमुक्त्यानन्तर्यप्रयोगाख्यश्चतुर्विधः ।** *Ak*. vi. 65 bcd.

[२] प्रयोगमार्गो यस्मादनन्तरमानन्तर्यमार्गः । *Akb*. vi. 65 cd. **प्रयोगमार्गः कतमः ? यः संभारमार्गः स प्रयोगमार्गः ।** यस्तु प्रयोगमार्गः स न संभारमार्गः । संभारमार्गोपचितानि निर्वेधभागीयानि कुशलमूलानि ऊष्मगतः मूर्धानः सत्यानुकूलक्षान्तिः लौकिकाग्रधर्मश्च । *Asm*. p. 65. (**संभारमार्गः** कतमः ? **पृथग्जनानां** शीलं···शमथविपश्यना···कुशलं श्रुतमयी··· चिन्तामयी···भावनामयी प्रज्ञा । *Ibid*.)

Cf. लौकिका अग्रधर्माः प्रयोगमार्ग इति गम्यते । यस्तु प्रतिलोमतः क्षान्त्यादिमार्गः स कस्मिन्नन्तर्भवतीति वक्तव्यम् ? आह । प्रयोगमार्ग एवान्तर्भवति । *Sakv*. p. 598.

[३] **आनन्तर्यमार्गो येनावरणं प्रजहाति ।** *Akb*. vi. 65 cd.—'आनन्तर्यमार्गो येनावरणं प्रजहाती'ति । अप्रहाणमार्गसंभवात् । **अस्ति स आनन्तर्यमार्गो येनाऽवरणं न प्रजहाति,** इन्द्रियसंचारादिषु । *Sakv*. p. 597.

Also cf. **आनन्तर्यमार्गः** कतमः ? यस्यानन्तरं निरन्तरः क्लेशः प्रहीणो भवति । *Asm*. p. 70. V. supra, p. 350, n. 1.

[४] **विमुक्तिमार्गो** यस्तत्प्रहेयावरणविनिर्मुक्तस्तत् प्रथमत उत्पद्यते । *Akb*. vi. 65 cd.

—···आनन्तर्यमार्गस्य दुःखधर्मज्ञानक्षान्त्यादेर्यत् प्रहेयमावरणम्, दुःखदर्शनप्रहातव्यो निकायो यावद्भावनाप्रहातव्यः । तेन प्रहेयावरणेन निर्मुक्तो **यः प्रथमत उत्पद्यते स विमुक्तिमार्गः ।** *Sakv*. p. 598. Cf. विमुक्तिमार्गः कतमः ? येन प्रहीणे क्लेशे विमुक्तिं साक्षात्करोति । *Asm*. p. 70. V. supra, p. 350, n. 4.

सन्ताने विसंयोगप्राप्तिसहायोत्पद्यते। विशेषमार्गो यस्तदूर्ध्वमन्यकुशलमूलप्राप्त्यर्थमुत्कर्षगमनलक्षणः॥[१]

पुनर्मार्गो भगवता (6)मोक्षपुरप्रतिपादनात् प्रतिपच्छब्देनोक्तः[२] "चतस्रः प्रतिपदः। अस्ति प्रतिपत्सुखा धन्धाभिज्ञा। अस्ति सुखा क्षिप्राभिज्ञा। अस्ति दुःखा धन्धाभिज्ञा। अस्ति दुःखा क्षिप्राभिज्ञा।"[३] तासां पुनरिन्द्रियतो भूमितश्च व्यवस्थानं तदिदं प्रदर्श्यते—

[440] तीक्ष्णेन्द्रियस्य मौलेषु ध्यानेषु प्रतिपत्सुखा।
क्षिप्राभिज्ञाल्पबुद्धेस्तु(7) धन्धान्यत्र विपर्ययात्[४]॥

मौलेषु खलु चतुर्षु ध्यानेषु यो मार्गः सा सुखाप्रतिपत्। सा च तीक्ष्णेन्द्रियस्य क्षिप्राभिज्ञा तत्रायत्नवाहित्वात्।[५] नैर्याणवत्सुखा तत्रायत्नवाहित्वा[त्] शमथविदर्शण(न)योः साम्यात्। तत्रैव सा मृद्विन्द्रियस्य धन्धाभिज्ञा। अन्यासु तु पञ्चसु भूमिष्वनागम्यध्यानान्तरिकारूप्य(8)त्रयसंगृहीतास्वनङ्गपरिगृहीतत्वात्। शमथविदर्शनान्यूनत्वात्[६] अनागम्यध्यानान्तरिकयोरारूप्यत्रये

---

[१] य एभ्यः प्रयोगमार्गादिभ्योस्त्रिभ्योऽन्यः स विशेषमार्गः। षोडशात् मार्गान्वयज्ञानक्षणात्परेण सप्तदशादयस्तज्जातीया येऽनास्रवाः क्षणास्ते **विशेषमार्गस्वभावाः**···। एवमन्यदपि विमुक्तिज्ञानम्। *Sakv.* p. 598.

Cf. **विशेषमार्गः** कतमः? तदन्यस्य क्लेशप्रकारस्य प्रयोगानन्तर्यविमुक्तिमार्गः विशेषमार्गः। अपि खलु क्लेशप्रहाणप्रयोगं निराकृत्य धर्मचिन्तायां वा प्रयुक्तस्य···अपि खलु वैशेषिकान् गुणानभिनिर्हरतो वा यो मार्गः। *Asm.* p. 70.

[२] *Pratipat* and *mārga* are often used side by side in the Pāli *Piṭkas* :— सिया खो पन भिक्खवे···कङ्खा···बुद्धे वा···**मग्गे** वा **पटिपदाय** वा···। *Aṅg.* II. p. 79; किं पनावुसो **मग्गामग्गञाणदस्सनविसुद्धत्थं**···**पटिपदाञाणदस्सनविसुद्धत्थं**···*M. sutta* 24. For various interpretations of these two words and their relation, see *Childers* p. 364 b; *PTSD.* and *BHSD.* p. 364—5.

[३] Cf. **चतस्सो पटिपदा**। दुक्खा पटिपदा दन्धाभिञ्ञा, दुक्खा पटिपदा खिप्पाभिञ्ञा, सुखा पटिपदा दन्धाभिञ्ञा, सुखा पटिपदा खिप्पाभिञ्ञा। *Dīgha*, XXXIII. 1. 11. अपरा पि चतस्सो पटिपदा। अक्खमा पटिपदा, खमा,···दमा,···समा पटिपदा। *Ibid.* See *Vibhaṅga*, p. 331; *Netti*, p. 113; *Dhs A.* III. 375 and *Aam.* p. 121.

[४] Cf. **ध्यानेषु मार्गः प्रतिपत्सुखाऽदुःखान्यभूमिषु।**
धन्धाभिज्ञा मृदुमतेः क्षिप्राभिज्ञेतरस्य तु॥ *Ak.* VI. 66.

[५] अङ्गपरिग्रहणशमथविपश्यनासमताभ्यामयत्नवाहित्वात्। *Akb.* VI. 66.

[६] शमथन्यूनत्वादनागम्यध्यानान्तरे यत्नवाहिनी। विपश्यनान्यूनत्वाच्चारूप्या यत्नवाहिनः। *Sakv.* p. 599.

चानास्रवो मार्गः तीक्ष्णेन्द्रियस्य प्रतिपत्, दुःखा क्षिप्राभिज्ञा। मृद्विन्द्रियस्य दुःखा धन्धाभिज्ञा।[१]

कथं पुनरार्यमार्गो दुःखो भवति ? नासौ दुःखात्मकः न दुःखसंप्रयुक्तः ?[२] नैष दोषः। यत्नवा(9)हित्वाभिसन्धेर्विवक्षितत्वात् ॥

पुनरप्येष मार्गो बोधिपक्ष्यशब्देनोच्यते "सप्तत्रिंशद्बोधिपक्ष्या धर्माः।[३]

---

[१] The *Aṭṭhasālinī* gives the following details :···तत्थ पठमसमन्नाहारतो पट्ठाय याव तस्स तस्स झानस्स **उपचारं** उप्पज्जति ताव पवत्ता झानभावना **पटिपदा** ति वुच्चति। उपचारतो पन पट्ठाय याव **अप्पना** ताव पवत्ता पञ्ञा **अभिञ्ञा** ति वुच्चति। ···तस्मा यो आदितो किलेसे विक्खम्भेन्तो दुक्खेन ससंखारेन सप्पयोगेन किलमन्तो विक्खम्भेति तस्स **दुक्खा पटिपदा** नाम होति। यो पन विक्खम्भितकिलेसो अप्पनापरिवासं वसन्तो चिरेन अंगपातुभावं पापुणाति, तस्स **दन्धाभिञ्ञा** नाम होति।······अपि च तण्हा-अविज्जावसेन समथविपस्सनाधिकारवसेन चा पि एतासं पभेदो दट्ठब्बो।··· *Dhs A.* III. 376-78. Also see :—**तथागतस्स** हि **सारिपुत्तत्थेरस्स** च चत्तारो पि मग्गा सुखापटिपदा खिप्पाभिञ्ञा अहेसुं। **महामोग्गल्लानत्थेरस्स** पठममग्गो सुखापटिपदो खिप्पाभिञ्ञो उपरि तयो मग्गा दुक्खापटिपदा खिप्पाभिञ्ञा। कस्मा ? निद्दाभिभूतत्ता···*Ibid.* III. 520.

[२] The Kośakāra has discussed this point earlier, while dealing with the *duḥkhatā* of *mārga-satya* :···एवं तर्हि **मार्गस्यापि संस्कारदुःखताप्रसंगः** संस्कृतत्वात् ? प्रतिकूले हि दुःखमिति लक्षणान्न मार्गो दुःखम्। नहि तस्योत्पाद आर्याणां प्रतिकूलः सर्वदुःखक्षयावाहनात्।···*Akb.* VI. 3. See *Sakv.* p. 517. For an allied controversy, see *Kv.* XVII. 5—इदानि **ठपेत्वा अरियमग्गं[अवसेसा संखारा दुक्खा]ति कथा** नाम होति। तत्थ यस्मा अरियमग्गो दुक्खनिरोधगामिनी पटिपदा ति वुत्तो, तस्मा ठपेत्वा अरियमग्गं अवसेसा संखारा दुक्खा ति येसं लद्धि, सेय्यथा पि **हेतुवादानं**। ते सन्धाय पुच्छा सकवादिस्स। *Kv A.* XVII. 5. Also see *Kv.* II. 8.

[३] V. supra, p. 196. n. 8.

On the extension of *Bodhipakkhiyādhammā* as a technical term, see Mrs. Rhys Davids' Preface to *Vibhaṅga*, pp. XIV—XVI.

The *Saṅyutta-nikāya* refers to the Five *indryas :* ये केचि बोधिपक्खिया धम्मा पञ्ञिन्द्रियं तेसमग्गमक्खायति···कतमे च···**बोधिपक्खिया** धम्मा ? सद्धिन्द्रियं बोधिपक्खियो धम्मो तं बोधाय संवत्तति···विरियिन्द्रियं···सतिन्द्रियं···समाधिन्द्रियं···पञ्ञिन्द्रियं ···तं बोधाय संवत्तति। *S.* v. p. 227.

The *Aggañña-sutta* refers to Seven :—**सत्तन्नं** बोधिपक्खियानं धम्मानं भावनमन्वाय··· *Dīgha*, VVII. 30.

The *Vibhaṅga* refers to Seven:—तत्थ कतमे बोधिपक्खिका धम्मा ? सत्त बोज्झंगा। ···इमे वुच्चन्ति बोधिपक्खिका धम्मा। *Vibhaṅga*, p. 249. Buddhaghosa gives the

चत्वारि स्मृत्युपस्थानानि चत्वारि सम्यक्प्रहाना(णा)नि चत्वारो ऋद्धिपादाः पञ्चेन्द्रियाणि पञ्च बलाणि(नि) सप्तबोध्यङ्गान्यष्टाङ्गो मार्गः" इति ।

का पुनरियं बोधिः ?[१]

[441] क्षयज्ञानं मता बोधिस्तथाऽनुत्पादधीरपि ।

[VII. A, 4. Fol. 134 b.]

(1)दश चैकश्च तत्पक्ष्याः सप्तत्रिंशत्तु नामतः ॥[२]

सा पुनरेषा बोधिः क्षयानुत्पादज्ञानरूपा [3]सती पुद्गलभेदेन त्रिधा भिद्यते ।

---

following comment :—**एत्तावता सब्बे पि सत्ततिंस बोधिपक्खियधम्मे समूहतो गहेत्वा** लोकिया पि भावनाय एकारम्मणे एकतो पवत्तनसमत्थे बोज्झङ्गे एव दस्सेन्तो **सत्त बोज्झङ्गा ति आदिमाह ।** ते लोकियलोकुत्तरमिस्सका ति वेदितब्बा । *Vbh A*. p. 347.

The *Sampasādnīya-sutta* refers to Thirty-seven, but calls them merely *kusalā-dhammā :* तत्रिमे **कुसला** धम्मा, सेय्यथीदं—चत्तारो सतिपट्ठाना, चत्तारो सम्मप्पधाना, चत्तारो इद्धिपादा, पञ्चिन्द्रियानि, पञ्च बलानि, सत्त बोज्झंगा, अरियो अट्ठङ्गिको मग्गो···एतदनुत्तरियं भन्ते कुसलेसु धम्मेसु । *Dīgha*, xxviii. 3.

The *Netti* speaks of Forty-three :—**तेचत्ताळीस** बोधिपक्खिया धम्मा ञाणवजिरं मोहजालपदालनं । *Netti*. p. 112.—तेचत्ताळीसं···ति अनिच्चसञ्ञा, दुक्ख··· अनत्त···पहान···विराग···निरोधसञ्ञा चत्तारो सतिपट्ठाना···पे···मग्गो । *Netti A*. p. 237.

Also see *Aṅg* i. pp. 38—43, iv. p. 125; *Vm*. xxii. 33; *Milinda*, p. 23; *A. Saṅgaho*, vii. 25—35; *Aam*. (*bodhipākshika-nirdeśa*) pp. 113-17; *Asm*. pp. 71—74; and *S.Puṇḍarīka*. p. 299. For details and other references, see *LVPAk*. vi. p. 281, n. 1; *The Bodhisattva Doctrine*, chapter iv. (pp. 80—164); *PTSD*. and *BHSD*. p. 402.

[१] V. supra, p. 125, n. 3. See *Aaa*. p. 431.

[२] Cf. **अनुत्पादक्षयज्ञाने बोधिस्तदनुलोम्यतः ।**
सप्तत्रिंशत्तु तत्पक्ष्याः नामतो द्रव्यतो दश ॥ *Ak*. vi. 67.

[३] "**क्षयज्ञानं कतमत् ?** दुःखं मे परिज्ञातमिति जानाति । समुदयः प्रहीणो निरोधः साक्षात्कृतो मार्गो भावित इति जानाति । तदुपादाय यत् ज्ञानं दर्शनं विद्या बुद्धिर्बोधिः प्रज्ञा आलोकोऽभिसमय इदमुच्यते क्षयज्ञानम् ।

अनुत्पादज्ञानं कतमत् ? दुःखं मे परिज्ञातं न पुनः परिज्ञेयमिति जानाति यावत् मार्गो भावितो न पुनर्भावयितव्य इति । तदुपादाये"ति विस्तरेणोक्तं शास्त्रे । *Akb*. vii. 7.

Cf. तत्थ यं च **खयेञाणं** यं च **अनुप्पादेञाणं** इमानि द्वे ञाणानि एका पञ्ञा । अपि च आरम्मणसंकेतेन द्वे नामानि लभति **'खीणा मे जाती'** ति पजानन्तस्स **खयेञाणं** ति नामं लभति, **'नापरं इत्थत्ताया'** ति पजानन्तस्स **अनुप्पादे ञाणं** ति नामं लभति । *Netti*. p. 15. V. infra, *Ad. kārikā* 479.

तिस्रो बोधयः ।[१] बुद्धप्रत्येकबुद्धश्रावकबोधयः । उत्तमनिर्वाणाङ्गभूता तद्धि तिसृणामपि बोधीनां पुरुषकारफलं तत्प्राधान्यत्वात् । मृदुमध्याधिमात्राः सप्तत्रिंशद्बोधिपक्ष्या धर्माः मृदुमध्याधि(2)मात्रभेदभिन्ना महायाण(न)म् ।[२] मृदुमध्याधिमात्रभेदभिन्नं बुद्धप्रत्येकबुद्धश्रावकयाण(न)[२]मित्युच्यते ।

तस्याः पुनस्त्रिप्रकाराया बोधेरनुकूलधर्माः स्मृत्युपस्थानादयः 'सप्तत्रिंशन्नामतः' । द्रव्यतस्त्वेकादश ।[३] श्रद्धादीनि पञ्च बलानि प्रीतिप्रस्रब्ध्युपेक्षासम्यक्संकल्पवाक्कर्मान्ताश्च षडिति । अत इदमुच्यते—

[442] सोपेक्षाप्री(3)तिसंकल्पं श्रद्धादीन्द्रियपञ्चकम् ।
सप्रस्रब्धिर्द्विरूपीत्थं नामभेदस्त्वपेक्षया ॥
[443] बलान्यत्रेन्द्रियाण्येव प्रज्ञैव स्मृत्युपस्थितिः ।
वीर्यं सम्यक्प्रधानाख्यं रि(ऋ)द्धिपादा मनस्थितिः ॥[४]

कथं पुनरेकं वीर्यं चतुर्धा निर्दिश्यते ? तदपदिश्यते—

[444] दोषहाणमनुत्पादं गुणोत्पादं विवर्धनम् ।
सकृत्करोति यत्तद्धि स प्रहाणचतुष्टयम् ॥[५]

(4)उत्पन्नानां रागादीनां खलु दोषाणां प्रहाणायानुत्पन्नानां चानुत्पादाय यद्वीर्यम्, गुणानां च स्मृत्युपस्थानर्धिपादादीनामनुत्पन्नानामुत्पादाय, उत्पन्नानां च स्थितये यद्वीर्यं, तत्प्रयोजननिष्पत्तिभेदाच्चत्वारि सम्यक्प्रहाणानि भवन्ति ॥

---

[१] V. supra, pp. 204 ff. See *Vm.* III. 128.

[२-२] These two terms are not mentioned in *Akb.*

[३] Cf.···एवमेते बोधिपक्ष्या दश द्रव्याणि भवन्ति । **वैभाषिकाणामेकादश** । कायवाक्कर्मणोरसंभिन्नत्वात् शीलांगानि द्वे द्रव्ये इति । *Akb.* VI. 69 ab.—'दशद्रव्याणि' इति केषाञ्चिन्मतेन । *Sakv.* p. 600.

[४] Cf. **श्रद्धा वीर्यं स्मृतिः प्रज्ञा समाधिः प्रीत्युपेक्षणे ।**
प्रश्रब्धिशीलसंकल्पाः प्रज्ञा हि स्मृत्युपस्थितिः ॥
वीर्यं सम्यक्प्रहाणाख्यं ऋद्धिपादाः समाधयः ।
प्रधानग्रहणं सर्वे गुणाः प्रायोगिकास्तु ते ॥ *Ak.* VI. 68-69.
See *Aaa.* p. 116 and *A. Saṅgaho*, VII. 33.

[५] **चत्तारो सम्मप्पधाना**–इध भिक्खु अनुप्पन्नानां पापकानं अकुसलानं धम्मानं अनुप्पादाय छन्दं जनेति वायमति विरियं आरभति चित्तं पग्गण्हाति पदहति, उप्पन्नानं पापकानं अकुसलानं धम्मानं पहानाय···, अनुप्पन्नानं कुसलानं ठितिया···उप्पन्नानं कुसलानं पारिपूरिया···धम्मानं पदहति । *Vbh.* p. 208.

[445] छन्दव्यायाममीमांसा चित्ताकृष्टाः समाधयः ।
रि(ऋ)द्धिपादास्तु चत्वारो गुणसम्प(5)त्तियोण(न)यः ॥[१]

छन्दमधिपतिं कृत्वा यो णि(नि)ष्पद्यते समाधिः स छन्दसमाधिः । कुशलमूलच्छन्दमूलकत्वात् समाध्यादिगुणनिष्पत्तेः, तस्मादसौ छन्दसमाधिरित्युच्यते । तत्प्रभवाः सर्वा गुणर्धयः । एवं वीर्यं चित्तं मीमांसामधिपतिं कृत्वा निष्पन्नः समाधिः स एष च्छन्दवीर्यचित्तमीमांसासमाधिश्चतुर्विधः[२] । (6)प्रहाणसंस्कारैः च्छन्दवीर्यस्मृतिबुद्धिश्रद्धाप्रस्रब्धिचेतनोपेक्षाभिः प्रत्येकं समन्वागतः सर्वगुणसमृद्धिनिष्पादको भवति छन्दवीर्यचित्तमीमांसापरिग्रहः सामर्थ्यात् । कुशलधर्मच्छन्दे ह्यसति कुतस्तत् प्राप्त्यारम्भः ? आरब्धेपि च वीर्ये यदि न तत्प्रगुणमेव चित्तं भवति न कार्याभिनिष्पत्तिर्भ(7)वति । यथाऽरणीमभिनिर्मथ्याप्यन्तरायव्युपरमो भवति पुनः शैत्यमापद्यते तद्वदिति । वीर्यानुवृत्तये चित्तमधिपतिमिष्यते । तत्प्रवणेपि चित्ते यदि सूक्ष्मान् समाध्युपक्लेशान्नोपलक्ष्य परिवर्जयति यदि समाध्यनुगुणान्, गुणांस्तु सामान्यलक्षणशक्तिक्रियानुत्तमार्थाङ्गभूताननुपलक्ष्य, प्रज्ञया (8)नोपचिनोति तस्यान्यायारब्धवीर्ये त्रयमप्येतन्न प्रयोजननिष्पत्तये भवति । एवं छन्दवीर्यश्रद्धास्मृतिबुद्धिप्रस्रब्धिचेतनोपेक्षाख्यानामष्टाणां प्रहाणसंस्काराणां समाधिपरिग्रहसामर्थ्यं यथायोगमवगन्तव्यम् ॥

[446] प्रोक्तं बोधित्रयेशित्वाच्छ्रद्धादीन्द्रियपञ्चकम् ।
कथितं बलशब्देन त(9)देवानभिभूतितः ॥

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञारूपाणि खलु पञ्चेन्द्रियाणि[३] बोधिपक्ष्येषु व्यवस्थाप्यन्ते । बोधित्रयाधिगमे श्रद्धादीनां पञ्चानामैश्वर्याधिक्यात्, सर्वभूमीषूपलब्धेश्च । एतेषां चाधिमात्रमध्यमृदुतरतमविशेषादर्हत्प्रभृतीनां व्यवस्थानं भवति । तान्येव बोधिपक्ष्येष्विन्द्रियाण्यु[VII. B, 5. Fol. 135 a.](1)क्तानि, न चक्षुरादीन्याज्ञातवतेन्द्रियपर्यवसानानि । एषामेवै[श्वर्य]र्द्धिलिङ्गत्वात् ।[४] इहेन्द्राः द्विविधाः । चित्तेश्वराश्च धनेश्वराश्चेत्यतः इन्द्रलिङ्गमिन्द्रियम(मि)-

---

[१] चत्तारो इद्धिपादा—इध भिक्खु छन्द-समाधिपधानसंखारसमन्नागतं इद्धिपादं भावेति, विरिय,·· चित्त···, वीमंसा···इद्धिपादं भावेति । *Ibid.* p. 216.

[२] The Kośakāra initiates a controversy : ये त्वाहुः "समाधिरेवर्द्धिः पादाश्च छन्दादयः" इति । तेषां द्रव्यतस्त्रयोदश बोधिपक्ष्याः प्राप्नुवन्ति । च्छन्दचित्तयोराधिक्यात् सूत्रं च विरुध्यते ।···*Akb.* VI. 69 cd. See *Sakv.* p. 602. V. infra, *Adv. kārikā* 524.

[३] V. supra, p. 54, notes.

[४] V. supra, p. 45, n. 1.

तिकृत्वेन्द्रियाणि। यथा पृथिवीश्वराणां पट्टादीनि लिङ्गानि भवन्ति यैः पृथिवीश्वरोयमिति प्रज्ञायते। यथा च पृथिवीश्वराः विभूषणोपभोगैः प(2)रिज्ञायन्ते तथा चित्तेश्वराणामार्यधनसमृद्धानां च श्रद्धादीनि विष्कम्भितप्रहीणविपक्षाणि निर्मलानि लिङ्गानि भवन्ति।

तत्र तावच्छ्रद्धायाः स्वलक्षणं[१] बुद्धधर्मसङ्घान् सम्भावयतश्चित्तं प्रसादमुपयाति सद्भूतगुणयोगादपेतदोषत्वाच्च, तद्धर्मेषु च प्रसादात्मकमेवार्थित्वमुत्पद्यते। प्रतीत्यसमुत्पा(3)दादीनां वा यथाभूतप्रत्यवेक्षणात् कर्मफलादिषु तत्र संभावना भवति। तथा च संभावयतो यश्चेतसः प्रसादः सा श्रद्धा नाम धर्मश्चित्तेन संप्रयुक्तः।[२] यदा(थाऽऽ)दर्शादौ धर्मसमूहे धर्मान्तरमादर्शप्रसादादयः, एवमरूपिणि चित्तादिधर्मसमुदया धर्मान्तरं श्रद्धादयः, चित्तस्याश्रयभावात् प्राधान्यात् स(4)न्तानानुवृत्तेश्च चित्तव्यपदेशः।

वीर्यं णा(ना)म चेतसोप्यु(भ्यु)त्साहलक्षणं प्रयोजन(ने) वार्थिशक्यतां संभाव्य विविधमीर्यत इति वीर्यम्।[३]

स्मृतीन्द्रियं नाम कायादिषु प्रज्ञयोपलक्षितेषु या खल्वविपरीताभिलपना प्रत्यभिज्ञानम्, येनावधारिते विषयसंमोषश्चेतसि न भवति स खल्वसंमोषः स्मृतीन्द्रियम्।[४]

(5)चेतस एकाग्रलक्षणं समाधीन्द्रियम्।[५] विषयग्राहिविषयिणो धर्मास्तदेकालम्बनं चित्तमेकाग्रमित्युच्यते। विचित्रविषयप्रद्युते ह्यनवस्थिते चेतसि तत्त्वावधारणं न भवति। यथा खलु विद्रुतजवनाश्वारूढः पुरुषः प्रतिमुखमागच्छतां दृष्टपूर्वाणामपि मनुष्यादीनां न शक्नोति व्यक्ति(6)मुपलक्षयितुमेवमनेकविषयप्रद्रुते लघुपरिवर्तिनि चित्ते न कायादिविषयतत्त्वोपलक्षणा भवति। यदा तु सुसारथिनेव समाधिनैकस्मिन् विषये चिरं चित्तमाधार्यते तदा धर्मतत्त्वमुपलक्षयति। तस्मात् कुड्य इव रङ्गस्य श्लेषः समाधिरालम्बने चित्तस्याधारः।

प्रज्ञेन्द्रियं[६] यत् स्वसा(7)मान्यलक्षणमुपलक्षयति। यच्च कायदीनां तत्त्वमभिमुखवदवस्थितं प्राप्तमिव श्लिष्टमिव पृष्ठे(ष्ठ इ)व च लक्षयति सोपलक्षणात्

---

[१] The Kośakāra does not give the definitions in detail.

[२] V. supra, p. 71, n. 4.

[३] V. supra, p. 73, n. 3.

[४] V. supra, p. 69, n. 4.

[५] V. supra, p. 70.

[६] V. supra, p. 70, n. 3.

प्रज्ञेन्द्रियम् । यद्यपि सर्वचित्तेषु यथाविषये प्रत्युपलक्षणा विद्यते न तु सा यथार्थप्रवृत्तेति न सेन्द्रियम् ।[१]

एतान्येवेन्द्रियाणि श्रद्धादीनि यस्माद्योगिणः(नः) क्लेश(8)संग्रामावतीर्णाः क्लेशानीकविजये प्रधानाङ्गभूतानि राज्ञ इव हस्त्यादयस्तस्माद्बलानीत्युच्यन्ते ।[२]

[447] बोधनार्थेन निर्दिष्टं शास्त्रा बोध्यङ्गसप्तकम् ।
प्रतीत्यादि(–त्या) परमार्थेण(न) प्रज्ञेत्यन्तमनुग्रहात् ॥[३]

समानेऽपि बोधिपाक्षिकत्वे विशेषेणैते सप्तधर्मा बोध्यङ्गानि भवन्ति। भावनामार्गे खल्वे(9)तेषां प्राधान्यं दृष्टसत्यस्था[न]त एव। धर्मोपलक्षणोपलक्षितस्वरूपादिषु गुणदोषेषु स्मृतिप्रमोषदोषापनयनार्थमादौ स्मृतिसंबोध्यङ्गमुक्तम्।

ह्लादः प्रस्रब्धिः[४]। रागजादिपरिदाहप्रतप्तचित्तशरीरस्य ग्रीष्मार्कप्रतप्तस्येव शीतोदकह्रदावगाहनादनास्रवज्ञानसंमुखीभावा[VII. A, 5. Fol. 135 b.](1)द्यत् कायचित्तप्रह्लादः स धर्मः प्रस्रब्धिः ।

उपेक्षा[५] नाम रागद्वेषपक्षपातविपक्षेण यथाभूतज्ञेयमवेक्षमानस्य यच्चित्तसमतान्यतरपक्षाभिसंस्कारविपक्षो निर्वाणाशया सोपेक्षा बोध्यङ्गमित्युच्यते ।

अत्र पुनः प्रीत्यादीनि त्रीण्यपि कृता[वशे]षाणि चत्वारि पूर्वमेव व्याख्यातानि। तेषां पुनः सप्तानां बुद्धि(2)धर्मप्रविचयलक्षणा बोधिश्च बोध्यङ्गं च ।[६] ज्ञानं हि बोधिः ज्ञानं च प्रज्ञा शेषाण्यङ्गान्येव ॥

तेषामपि च

[448] प्रीतिप्रस्रब्ध्युपेक्षाणामुक्ताद्धेतोस्तदङ्गता ।

निरामिषप्रीतिप्रस्रब्ध्युपेक्षाभिः प्रीणितेन्द्रियग्रामः सुखमनुद्विग्नो बोधिम-

---

[१] For the difference between *prajñā* and *prajñā-indriya*, see *Kv A*. xix. 8. V. supra, p. 54, n. 4.

[२] परित्तानि भवन्तीन्द्रियाणि महान्ति भवन्ति बलानि। *Aaa*. p. 115.

[३] सत्त बोज्झंगा—सति-धम्मविचय-विरिय-पीति-पस्सद्धि-समाधि-उपेक्खासम्बोज्झंगो । *Vbh*. p. 227.

[४] V. supra, p. 72, n., 1.

[५] V. supra, p. 72, n. 2.

[६] Cf. तत्र धर्मप्रविचयसंबोध्यङ्गं बोधिः, बोध्यङ्गं च, सम्यग्दृष्टिर्मार्गो मार्गाङ्गञ्चेति वैभाषिकाः। *Akb*. vi. 70.

धिगच्छति। याणि(नि) चैषां लक्षणनिर्देशकारणान्युक्तानि ततश्च बोध्यङ्गत्वमिति।

(3)संकल्पादेश्चतुष्कस्य पथो ज्ञेयानुकूल्यतः ॥

अङ्गतेति वर्तते। सम्यक्संकल्पसम्यग्वाक्कर्मान्ताजीवानां सम्यग्दृष्टिसम्यग्व्यायामसम्यक्स्मृतिसम्यक्समाधीनामिव मार्गानुकूल्यादङ्गत्वम् ॥

अयं पुनरार्यमार्गसतत्त्वपिण्डार्थः—

[449] विद्याप्रभः श्लक्ष्णविकल्पभूमिः शीलानुयात्रः स्मृतिवीर्यमित्रः।
समाधिसर्वा(4)धिसुखोपभोगो मार्गो विमुक्तिद्वयधिष्ण्यगोऽयम् ॥
[450] प्राधान्यं सप्तवर्गस्य प्राग(र)म्भोष्मगतादिषु।

अत्र पुनः

यथाक्रमं विबोद्धव्यं भावनादृष्टिमार्गयोः ॥[१]

तत्र स्मृत्युपस्थानान्यादिकर्मिकावस्थाप्रभावितानि कायादिस्वभावोपलक्षणात्। सम्यक्प्रहाणान्यूष्मगतेषु। तत्र संसारणि(नि)र्वाणयोरादीनवानुशंसदर्श(5)ने बलवद्वीर्याश्रयणात् संसारपारमुत्तरति। मूर्धावस्थायामृद्धिपादाः प्रभाव्यन्ते तेषु समाधिबललाभाच्चित्तनिग्रहे सति परिहाण्याभावान्न कदाचिद् गुणधनदरिद्रो भवति। इन्द्रियाणि कषा(क्षा)न्तिष्वपायात्यन्तनिवृत्तौ तदाधिपत्यात्। बलान्यत्र(ग्र)धर्मेषु क्लेशानवमर्दनीयत्वात्। बोध्यङ्गानां भावनामार्गे प्रा(6)धान्यं वासीदण्डोपमया मार्गभावण(न)या निरवशेषक्लेशप्रहाणात्। नवप्रकारतया वा मलप्रहाणे सति बोधेरासन्नीभावात्। दर्शण(न)मार्गे मार्गाङ्गानि[२] दर्शनहेयक्लेशप्रहाणार्थमाशु त्रैधातुकातिक्रमनो(णो)त्पादा[त्। आ]नुपूर्वीव्यतिक्रमस्तु[३] देशनानुकूल्यात् ॥

अथ कस्माच्चैतसिकधर्मधर्मिभूतं चित्तं (7)बोधिपक्ष्येषु ण(न) व्यवस्था-

---

[१] Cf. आदिकर्मिकनिर्वेधभागीयेषु प्रभाविताः।
भावने दर्शने चैव सप्त वर्गा यथाक्रमम् ॥ *Ak.* vi. 70.

[२] Cf. बोध्यासन्नत्वात् भावनामार्गे बोध्यंगानि। गमनप्रभावितत्वाद्दर्शनमार्गे मार्गांगानि।…तत्र धर्मप्रविचयसंबोध्यंगं बोधिर्बोध्यंगं च सम्यग्दृष्टिर्मार्गो मार्गांगं चेति वैभाषिकाः। *Akb.* vi. 70.

[३] the Kośakāra deals with this point in detail :…अपरे पुनरभित्त्वैव क्रमं बोधिपक्ष्याणामानुपूर्वीं वर्णयन्ति…*Akb.* vi. 70.—'अपरे पुनराहुः' इत्याचार्यः।…यथा वैभाषिकैर्भिन्नः क्रमः, तथा तमभित्त्वा बोधिपक्षाणामानुपूर्वीं वर्णयन्ति।…*Sakv.* p. 603.

पितम् ? संज्ञाचेतनामनस्कारच्छन्दाधिमोक्षादयश्च धर्मा बोधिपक्ष्येषु ण(न) व्यवस्थाप्यन्ते ?[1] तदिदमनुवर्ण्यते—

[451] न चित्तं राजकल्पत्वाद् गुणदोषानुवर्तनात् ।

राजस्थानीयं खलु चित्तं तद्बोधिपक्ष्यैर्धर्मैर्विशोध्य मोक्षसुखमुपलभ्यते । यथैव च गुणानुवर्ति चित्तं तथैव दोषा(8)नुवर्ति । यथोक्तम्—"चित्तसंक्लेशात्सत्त्वा संक्लिष्यन्ते । चित्तव्यवदानहेतोश्च विशुद्ध्यन्ते ।"[2] तस्य रागादयः संक्लेशकराः, श्रद्धादयो व्यवदानाधायिनस्तस्माच्चित्तं न व्यवस्थापितम् ।

व्यवहारानुकूल्यत्वात् संज्ञा ह्येतेषु नेष्यते ॥

प्रायो हि व्यवहारानुपतिता संज्ञा बोधिपक्ष्यास्त्वेकान्तेन परमार्थपक्षभजमानाः ॥

[452] (9)विपाकफलनिम्नत्वान्मार्गोक्तेश्च न चेतना ।

चेतना खल्विष्टानिष्टविपाकनिर्वर्तण(न)त्वात् मार्गशब्देनाभिधानाच्च नोच्यते ।

नाप्राधान्यान्मनस्कारो विद्याऽविद्याप्रवर्तणा(ना)त् ॥

मनस्कारोपि सम्यग्दृष्टेरङ्गभूतत्वादप्रधानं विद्याऽविद्याप्रवर्तणा(ना)च्च ॥

[453] क्रियारम्भप्रधानत्वान(न्न) च्छन्दो वीर्यबृंहणात् ।

छन्दः [VII. B. 6. Fol. 136 a.] (1)खलु कर्त्तुकामतारूपः क्रियारम्भः प्रभाव्यते । वीर्यं चानुबृंहयति । तद्वीर्यं बोधिप्रतिलम्भकर्तव्यतापरिसमाप्तेरूर्ध्वं यावदनुवर्तते ।

नाधिमोक्षः समारोपान्न स्पर्शो दौर्विभाव्यतः ॥

प्रायेण खल्वधिमोक्षोऽधिमुक्तमनस्कारेषु वर्तते । स्पर्शोपि त्रिसन्निपातमात्रविप्रतिपत्तेर्दुरवधारवृत्तिः । तस्मान्नोक्तः ॥

[454] नार्यवंश(2)ह्र्यपत्राप्यार्यो(– प्या) [अ]विशारदवृत्तितः ।

---

[1] This point (*Ad. kārikās* 451-456) is not discussed in *Akb.* V. supra, p. 50, n. 2.

[2] V. supra, p. 46, n. 1.

चत्वारः खल्वार्यवंशाः[1] ह्र्यपत्राप्ये च। नवप्रव्रजितभिक्षुवदविशारदवृत्तित्वान्न बोधिपक्ष्यात्(क्ष्याः)।

न्ना(ना)प्रमादः पराङ्गत्वान्नाविहिंसाऽविहेठनात् ॥

वीर्यभाण्डागारिकः खल्वप्रमादः। अविहिंसा च विहेठनामात्रप्रतिपक्षत्वान्नोक्ता ॥

[455] सत्त्वाधिष्ठानवृत्तित्वान्न मैत्रीकरुणादयः।[2]

(3)धर्माधिष्ठानाः खलु बोधिपक्ष्याः मैत्र्यादयस्त्वेकान्तेन सत्त्वाधिष्ठानाः।

मार्गाङ्गात्तैकदेशत्वान्नाप्यवेत्यप्रसत्तयः ॥

अवेत्यप्रसादाः खलु मार्गाङ्गैकदेशस्वभावत्वादक्षैकदेशरूपत्वाच्च न पुनर्बोधिपक्ष्येषूक्ताः।

[456] नाद्वेषः शुभमूलेभ्यः सत्त्वगोचरभावतः।

सत्त्वाधिष्ठानप्रवृत्तो हि अद्वेषः। तस्मान्न बोधिपक्ष्यः।

(4)औदासीन्यान्न निर्वाणं दविष्ठयान्न परध्वनिः ॥

निष्क्रियं खलु निर्वाणं क्रियावन्तस्तु बोधिपक्ष्या धर्माः। परतो घोषः खल्वपि बोधिपक्ष्याङ्गभावा(वो) बोधेर्बहिरङ्गभावाद्विप्रकृष्यते। तस्मात् सप्तत्रिंशदेव धर्मा बोधिपक्ष्याः ॥

कति पुनर्बोधिपक्ष्याः सास्रवाः कत्यनास्रवाः? तदिदं प्रदर्श्यते—

[457] बोध्यङ्गान्यरजस्का(5)नि बोधि(धे)र्नेदिष्टभावतः।
तदन्यान्यवबोध्यानि समलान्यमलान्यपि ॥[3]

बोध्यङ्गानि खलु बोधेरासन्नतमत्वादेकान्तानास्रवाणि। तदन्ये तु सास्रवानास्रवाः सर्वे हि कुशला धर्मा आर्यमार्गावाहका निर्वाना(णा)शयाश्च। बोधित्रयसंनिकृष्टविप्रकृष्टाङ्गभावा बोधिपक्ष्या इत्युच्यन्ते। उक्तं हि भगवता—

---

[1] Cf. चत्तारो'मे भिक्खवे अरियवंसा अग्गञ्ञा···इध···भिक्खु सन्तुट्ठो होति इतरीतरेन चीवरेन···पिण्डपातेन···सेनासनेन···। पुन च परं भिक्खवे भिक्खु भावनारामो होति भावनारतो···। *Aṅg.* II. pp. 27-28.

[2] V. infra, *Adv. kārikā* 588.

[3] Cf. अनास्रवाणि बोध्यङ्गमार्गाङ्गानि द्विधेतरे। *Ak.* VI. 71 ab.

"अधिगतो (6)मे पौराणो मार्गः"[१] इति वचनात् । शास्त्रे तु बोध्यङ्गोपरि ये पठ्यन्ते सम्यग्दृष्ट्यादयो धर्मास्तेऽनास्रवा इति ॥

कस्यां पुनर्भूमौ कियन्तो बोधिपक्ष्या विद्यन्ते ?[२]

[458] आद्ये ध्यानेऽखिला मौलेऽनागम्ये प्रीत्यपाकृताः ।[3]
द्वितीयेऽप्यपसंकल्पा[द्] द्वयोश्चास्मात् द्वयादृते ॥[४]

[459] शीलाङ्गेभ्यश्च ताभ्यां च द्रष्टव्या त्रिष्वरूपिषु ।
बोध्यङ्गेभ्य(7)श्च सर्वा(र्वे)भ्यो कामे बोध्यङ्गवर्जिताः ॥[५]

तत्र तावन्मौले ध्याने सर्वेपि सप्तत्(त्रिं)शद्बोधिपक्ष्या विद्यन्ते । अनागम्ये तु प्रीतिवर्जिताः । तत्र प्रीतेरभावात् । वीतरागावीतरागसाधारणैषा भूमिरिति नास्ति प्रीतिः । द्वितीये तु ध्याने संकल्पवर्जिताः सर्वे विद्यन्ते । तृतीयचतुर्थयोस्तु ध्यानयोः संकल्पप्रीतिवर्ज्याः (8)पञ्चत्रिंशत् । 'च'शब्दाद् ध्यानान्तरेपि पञ्चत्रिंशत् संकल्पप्रीतिवर्जिताः । त्रिष्वारूप्येषु सम्यग्वाक्कर्मान्ताजीवैस्त्रिभिः प्रीतिसंकल्पाभ्यां च । भवाग्रेपि शीलाङ्गत्रयप्रीतिसंकल्पबोध्यङ्गवर्जिताः पञ्चविंशतिः । कामधातावपि बोध्यङ्गवर्जितास्त्रिंशद्विद्यन्त इति । ये पुनरणा(ना)स्रवाण्येव मार्गाङ्गानीच्छ(9)न्ति[४] तेषां तैरपि वर्जिताः शेषा बोधिपक्ष्या विद्यन्त इति । गतमेतत् ॥

इदं तु वक्तव्यम् । बोधिप(पा)क्षिकाधिकारे—

[460] यास्तत्प्रथमताः प्रोक्ताश्चतस्रस्तत्र कोविदैः ।
न्यामावक्रान्तिवैराग्यफलाप्त्यक्षविवृद्धिषु ॥[६]

---

[१] Cf. अधिगतो खो म्या'यं धम्मो गम्भीरो··· *Vinaya*, I. p. 3.

[२] See *Aam*. p. 117.

[३] Cf. सकलाः प्रथमे ध्यानेऽनागम्ये प्रीतिवर्जिताः । *Ak*. VI. 71 cd.

[४–४] Cf. द्वितीयेऽन्यत्र संकल्पाद् द्वयोस्तद् द्वयवर्जिताः ।
ध्यानान्तरैश्च शीलांगैस्ताभ्यां च त्रिष्वरूपिषु ॥ *Ak*. VI. 72.

[५] Cf. लौकिका अपि हि सम्यग्दृष्टयादयः सन्ति । ते तु नार्यमार्गशब्दं लभन्ते । *Akb*. VI. 71 ab. Also Cf. तत्र सप्त बोध्यंगान्यनास्रवाणि । षड् विभाज्याः । ते सास्रवा वा अनास्रवा वा । अपर आह । सप्त बोध्यंगानि आर्यमार्गश्चेति साकल्येन अनास्रवाणि । अन्ये शिष्टाः द्विधा विभाज्याः । *Aam*. p. 113.

[६] This topic is not disscussed in *Akb*.

न्यामावक्रान्तितत्प्रथमता, वैराग्यतत्प्रथमता, फलप्राप्तितत्प्रथमता, इन्द्रियान्तरविवृद्धितत्प्रथ[VII. A, 6. Fol. 136 b.](1)मता तासु खल्वेतासु चतसृषु तत्प्र[थ]मतासु—

[461] अष्टानां नीरजस्कानां मार्गाङ्गाणां(नां) यथायथम् ।
तास्वेकस्याध्वसु ज्ञेयौ लाभालाभौ नवाश्रयौ ॥

बोधिपक्ष्यभावनाप्रयुक्तस्यावेत्यप्रसादप्रतिलम्भोऽवश्यम्भावीत्यतो वक्तव्यं कस्मिन् सत्ये दृश्यमाने कस्यावेत्यप्रसादस्य[1]लाभः ? तदिदं (2)निर्दिश्यते—

[462] त्रिसत्याधिगमे लाभः शीलधर्मप्रसादयोः ।
मार्गसत्येक्षणे बुद्धसङ्घगोचरयोरपि ॥[2]

दुःखसत्यमभिसमागच्छन्नार्यकान्तानि च शीलानि प्रतिलभते धर्मे चावेत्यप्रसादः। कतरस्मिन् धर्मे ? तस्मिन्नेव दुःखसत्ये। धर्ममात्रमिदं सर्वं द्वादशायतनमात्रमित्यर्थः। नात्र (3)कश्चिदेकः सर्वभेदान्वयी जातिद्रव्याख्यो धर्मी विद्यते। न चात्र सन्ति पुरुषजीवपुद्गला भूतकोटयः शशविषाणकल्पा निरात्मान इति। एवं समुदयमभिसमागच्छतो द्वयोरेव लाभः। तद्वन्निरोधं समागच्छतो द्रष्टव्यम्। मार्गसत्येक्षणे तु बुद्धे भगवति प्रसादो लभ्यते तत्सङ्घे च। सद्भूतमा(4)र्गाख्यायी भगवान्मार्गज्ञो मार्गदेशिक[:]। येपि च तं मार्गं प्रतिपन्नाः श्रावकाः शैक्षाशैक्षाः पुरुषवृषभाः ये च सप्तसद्धर्मादि[3]प्रदीपप्रकाशितबुद्ध्याशयसा(?) च बोधिसत्त्वसिंहाः दर्शनमार्गगुहाध्यासिनः तेषु च प्रसादो भवति द्व्याकारश्रद्धास्वरूपः। सोऽयं विस्तरेणोच्यते॥

[463] बौद्धात्सङ्घादृते मा(4)र्गाद्या श्रद्धा सत्यगोचरा ।
धर्मावेत्यप्रसादोसौ संप्रतीत्यप्रभावतः ॥

स पुनर्धर्मो निर्वाणं[4] बोधिसत्त्वसन्तानिकश्च मार्गः॥

कः पुनरेष बुद्धः को वा तत्प्रसाद इत्यपदिश्यते—

---

[1] Cf. बुद्धे…धम्मे…सङ्घे…अवेच्चप्पसादेन समन्नागतो होति । *S*. II. p. 69. See *Aṅg*. II. p. 57.

[2] Cf. त्रिसत्यदर्शने शीलधर्मावेत्यप्रसादयोः ।
लाभो मार्गाभिसमये बुद्ध तत्सङ्घयोरपि ॥ *Ak*. VI. 73 cd, 74 ab.

[3] V. supra, p. 196, n. 3.

[4] Cf. धर्मः सत्यत्रयं बोधिसत्त्वप्रत्येकबुद्धयोः। *Ak*. 74 cd.
V. supra, p.126, n. 1.

[464] मोहनिद्रातमोनाशाद्धीनेत्रोन्मीलना[त्] स्वयम् ।
बुद्धो यस्तद्गुणे श्रद्धा प्रसादः स जिने मतः ॥

द्विप्रकारो हि बुद्धशब्दस्यार्थो मु(6)ख्यो गौन(ण)श्च । तत्राद्यो बुद्धक(का)रका बुद्धस्याशैक्षा धर्माः । गौन(ण)स्तु तदाधारेपि शरीरे तत्फलभूतेषु चाष्टादशस्वावेणिकेषु बुद्धगुणेषु बुद्धशब्दसाधुत्वं पूर्वमेव प्रदर्शितम् ॥[१]

[465] शैक्षाशैक्षगुणाढ्यानां पुद्गलानां य आकरः ।
तद्गुणालम्बना श्रद्धा प्रसादः सङ्घगोचरः ॥[२]

उक्तं हि सूत्रे—“कति भदन्त लोके (7)दक्षिणीयाः ? द्वौ गृहपते शैक्षा अशैक्षाश्च ।[३] तत्राष्टादश शैक्षाः नव शैक्षाः ।”[४] इति विस्तरः ॥

[466] शीलानां यत्तु वैमल्यं तत्प्रसादस्तथैव तु ।

कति पुनरेषां द्रव्यतः कति नामतः ?

द्रव्यतो द्वयमेवैतन्नामतस्तु चतुष्टयम् ॥[५]

श्रद्धा रत्नत्रयालम्बनभेदेन त्रिधा भित्वार्यकान्तानि च शीलान्येकधा कृत्वा त(8)त्रापि वैमल्यप्रसादोक्तिः । यद्धि निर्मलं तत् प्रसन्नमित्युच्यते ॥

इदमिदानीं वाच्यम् । [६]अथ कस्मात्समन्वागतोपि शैक्षः सम्यग्ज्ञानेन सम्यग्विमुक्त्या चाष्टाभिरङ्गैः समन्वागतः शैक्षः प्रातिपद इत्युक्तं दशभिरर्हन् क्षीणास्रव इति ?[६] तदुच्यते—

[467] शैक्षस्य बन्धशेषत्वाद्विमुक्तिर्णा(र्ना)ङ्गमिष्यते ।[७]

---

[१] V. supra, p. 125, notes.

[२] V. supra, p. 126.

[३] Cf. कति नु खो भन्ते लोके दक्खिणेय्या कत्थ च दानं दातब्बं ति ? द्वे खो गहपति लोके दक्खिणेय्या सेखो च असेखो च । *Aṅg.* I. p. 63.

[४] V. supra, p. 126, n. 2.

[५] Cf. मार्गश्च द्रव्यतस्तु द्वे श्रद्धाशीलं च निर्मलाः । *Ak.* VI. 75 ab.

[६–६] Cf. सूत्र उक्तम्—“अष्टाभिरङ्गैः समन्वागतः शैक्षो दशभिरङ्गैः समन्वागतोऽशेक्षः” इति । कस्माच्छैक्षस्य सम्यक् विमुक्तिः सम्यग्ज्ञानं च नोक्तम् ? *Akb.* VI. 75 cd.

अष्टाभिरिति ।···कतमैरष्टाभि ? शैक्ष्या सम्यग्दृष्टचा यावच्छैक्षेण सम्यक्समाधिनेति । दशभिरङ्गैः···कतमैर्दशभिः ? अशैक्ष्या सम्यग्दृष्टचा यावदशैक्षेण सम्यक्समाधिना अशैक्ष्या सम्यग् विमुक्त्या अशैक्षेण च सम्यग् ज्ञानेनेति । *Sakv.* p. 606.

[७] Cf. नोक्ता विमुक्तिः शैक्षाङ्गं बद्धत्वात् सा पुनर्द्विधा । *Ak* VI. 75 cd.

शै(७)क्षस्य विद्यमानापि अनाकारित्वान्नाङ्गमुच्यते । सत्यामपि हि तस्यां क्लेशबन्धनबद्धः शैक्षो ण(न) च विमोक्षो युज्यते ।

का पुनरियं विमुक्तिः कतिधा च ? तदपदिश्यते—

मोक्षाधिमोक्षरूपत्वान्नित्यानित्यत्वतो द्विधा ॥[१]

स्वरूपभेदादपि द्विधा प्रकारभेदादपीति। स्वभावभेदात् मोक्षाधिमोक्षस्वभावा ।[२] [Fol. VII. B. 7. 137 a.] (1)प्रकारभेदोपि क्षराक्षरभेदात्,[३] सामयिकी कान्ताऽकोप्यभेदाद्वा[४] रा[ग]विरागाविद्याविरागभेदाच्च ॥

---

[१] Cf. **सा पुनर्द्विधा ।**

असंस्कृता क्लेशहानिरधिमुक्तिस्तु संस्कृता ।

साङ्गः सैव विमुक्ति द्वे *Ak*. vi. 75 d, 76 abc.

[२] क्लेशप्रहाण**मसंस्कृता** विमुक्तिः । अ**शैक्षाधिमोक्षः संस्कृता** विमुक्तिः । *Akb.* vi. 76 ab. The Kośakāra here introduces a controversy :—

सैव विमुक्ती द्वे

सैव संस्कृता विमुक्तिः । द्वे विमुक्ती सूत्र उक्ते । चेतो विमुक्तिः प्रज्ञाविमुक्तिश्च । विमुक्तिस्कन्धोऽपि स एव द्रष्टव्यः । **यर्त्तहि सूत्र उक्तम्**—"कतमच्च व्याघ्रबोध्यायना विमुक्तिपरिशुद्धिप्रधानम् ? इह भिक्षवो रागाच्चित्तं विरक्तं भवति विमुक्तं द्वेषान्मोहाच्चित्तं विरक्तं भवति विमुक्तम् । इत्यपरिपूर्णस्य वा विमुक्तिस्कन्धस्य परिपूरये परिपूर्णस्य चानुग्रहाय च्छन्दो वीर्यम्(Cf. *Ang*. ii. p. 194.)"इति विस्तरः । **तस्मान्नाधिमोक्ष एव विमुक्तिः ।** किं तर्हि ? तत्त्वज्ञानापनीतेषु रागादिषु **चेतसो वैमल्यं विमुक्तिरित्यपरे ।** *Akb.* vi. 76 c.

—⋯यत एवं रागादिभ्यो विमुक्तिः प्रहाणमित्येवं लक्षणा विमुक्तिरुक्ता **सूत्रे**, नाधिमुक्तिः । तस्मान्नाधिमोक्ष एव विमुक्तिः ।⋯वैमल्यं अनास्रवत्वं अनर्थान्तरभूतं घृतमण्डस्वच्छतावत्, **इत्यपर इत्याचार्यः** । *Sakv*. p. 607. See *LVPAk*. vi. pp. 296-8.

[३] संस्कृतासंस्कृतभेदात् ।

[४] Cf. **विमुक्तिः सामयिक्येषामकोप्याकोप्यधर्मणः ॥** *Ak*. vi. 56 cd.

एषां च पञ्चानां[अर्हतां] **सामयिकी कान्ताचेतोविमुक्तिर्वे**दितव्या । नित्यनुरक्ष्यत्वात् अत एवैते समयविमुक्ता उच्यन्ते । समयापेक्षाश्चैतेऽधिमुक्ताश्चेति । *Akb*. vi. 56. c.

—**सामयिकी** इति । समये उपकरणारोग्यदेशविशेषादिलक्षणे भवा सामयिकी ।

कान्ता च । **कान्ता चेतोविमुक्तिः** । कस्मात् कान्तेति ? **नित्यानुरक्ष्यत्वात्** । कान्तं हि नित्यं अनुरक्ष्यमिति लोके दृश्यते । सूत्रेऽप्युक्तम्—"तद्यथा नामैकाक्षस्य पुरुषस्य ज्ञातय एकमक्षि साधु च सुष्ठु चानुरक्षितव्यं मन्येरन्⋯एवमेव समयविमुक्तस्यार्हतोऽनुरक्ष्य एष धर्मोऽनुकम्प्योऽनुग्राह्यः⋯" *Sakv*. p. 583.

Cf. अट्ठान तं संगणिकारतस्स यं फस्सये **सामयिकं विमुत्ति** । *Suttanipāta*, 54.

—**सामयिकं विमुत्ति** ति लोकियसमापत्तियं, सा हि अप्पितप्पितसमये एव पच्चनीके

अथ सम्यग्ज्ञानं कतमत्तदुच्यते—

[468] पूर्वोक्तैव हि या बोधिः सा सम्यग्ज्ञानमुच्यते ।[१]

क्षयानुत्पादज्ञाने बोधिरित्युक्तम् ।[२] ते एव सम्यग्ज्ञानं वेदितव्यम् ।

कतरत् पुन[श्चित्तं] विमुच्यते ? किं जातनिरुद्धमथाजातनिरुद्धमथ जातमेव ?

(2)मुच्यते(ऽ)नागतं चित्तमशैक्षं क्लेशरोधतः ॥[३]

कश्चित् खल्वाह—[४]अनागतं खलु चित्तमुत्पद्यमानं विमुच्यतेऽध्वविमुक्त्या सर्वमेव त्वनागतं विमुच्यते । क्लेशावरणात् सन्तानविमुक्त्याः(क्त्या) । तत्पुनरशैक्षमेव क्लेशोपक्लेशप्राप्तिविबन्धादा(प)गमा[त्][४] । यदपि तद्रूपारूप्यप्रतिसंयुक्तं कर्मोपपत्तिफलं तदप्यर्हत्त्वप्राप्तिविबन्धक(3)रं तच्च सर्वं वज्रोपमेन प्रहीयत इत्यावरणविगमात् सर्वमेवानागतमशैक्षं चित्तं विमुच्यते ॥[५]

धर्मा एव तु परमार्थतः शिक्षन्ते । यस्मात्—

हि विमुच्चनतो सामयिका विमुत्तीति वुच्चति । *Suttanipāta A.* 54. **समयविमुत्तोति** पन तिण्णं सोतापन्न-सकदागामि-अनागामीनं येवेतं नामं ति वेदितब्बं । *P. paññatti A.* p. 22. See *Aṅg* IV. p. 349. V. supra, p. 296. n. 2.

अकुप्पधम्मो ति इदं पन अट्ठसमापत्तिलाभिनो अनागामिस्स चेव खीणासवस्स चाति द्विन्नं पुग्गलानं नामं । *P. Paññatti A.* p. 24.

[१] Cf. **ज्ञानं बोधिर्यथोदिता ।** *Ak.* VI. 76 d.

[२] V. supra, p. 357, n. 3.

[३] Cf. **विमुच्यते जायमानमशैक्षं चित्तमावृतेः ।** *Ak.* VI. 77 ab.

[४] Cf. अनागतं चित्तमुत्पद्यमानं विमुच्यते । "**अशैक्षमावरणेभ्यः**" इति सूत्रपाठः । किं पुनस्तस्यावरणम् ? क्लेशप्राप्तिः, तदुत्पत्तिविबन्धत्वात् । *Akb.* VI. 77 ab. For details on *āvaraṇa*, see *LVPAk.* VI. p. 299, notes.

[५] Cf.…वज्रोपमे हि समाधौ सा च प्रहीयते । तच्चोपपद्यमानमशैक्षं चित्तं विमुच्यते । *Akb.* VI. 77 ab.

See **किलेसजहनकथा,** *Kv.* XIX. 1.—इदानि किलेसजहनकथा नाम होति । तत्थ यस्मा किलेसप्पहानं नाम अत्थि, पहीनकिलेसस्स च अतीतापि किलेसा पहीनाव होन्ति, अनागतापि पच्चुप्पन्नापि, तस्मा अतीतेपि किलेसे पजहति, अनागतेपि पच्चुप्पन्नेपीति येसं लद्धि, सेय्यथापि एकच्चानं उत्तरापथकानं ।…यस्मा कचवरं जहन्तस्स कचवरे छड्डनवायामो विय किलेसे पजहन्तस्स न अतीतादिभेदेसु किलेसेसु वायामो अत्थि, निब्बाणारम्मणे पन अरियमग्गे पवत्तिते किलेसा अनुप्पन्नाव नुप्पज्जन्तीति पहीना नाम होन्ति…*KvA.* XIX. 1.

[469] धर्मव्यापारतो लोके धर्म्यपि व्यावृ(पृ)तो मतः ।

औष्ण्याख्यस्य धर्मस्येन्धनादिदहनव्यापारे सत्यग्नेरपि धर्मिणो व्यापार उच्यते। अग्निना काष्ठं दग्धमित्यग्निदहनव्यापारे (4)च देवदत्तेन दग्धोस्मीत्युपचर्यते। तथा धर्माणां क्लेशप्रहाणशिक्षणे सति तत्सम्बन्धापेक्षया भिक्षुरशैक्ष इत्युच्यते।

मार्गस्तूपात्तकारित्रो निरस्यति तदावृतिम् ।।[1]

'तु'शब्दान्निरुध्यमान एवेत्यर्थः, वर्तमानस्य हि क्रियाबन्धात् सामर्थ्योपपत्तेः ॥

अथ येयमसंस्कृता विमुक्तिः ये च त्रयो धातवः प्रहाणधात्वादयः,[2] (5)ते ततः किमन्येऽथानन्ये ? ब्रूमः—

[470] विमुक्ति[ः] शाश्वती यैव सा विरागादयस्त्रयः ।
आख्याता धातवः सूत्रे त्रिधा भेदो ह्यपेक्षया ।।

प्रज्ञप्तिविशेषापेक्षया खल्वेषां त्रैविध्यमुक्तम्। कथम् ?

[471] विरागो रागनिर्मोक्षः प्रहाणाख्योऽन्यसंक्षयः ।
निरोधधातुरन्यस्य सोपादानस्य वस्तुनः ।।[3]

रागप्रहाणं खलु विरागधातुरित्युच्यते। (6)तदन्येषां क्लेशोपक्लेष(शा)णां(नां) प्रहाणधातुः। तदन्यस्य सोपादानस्य वस्तुनः निरोधो निरोधधातुराख्यायते ॥

येण(न) वस्तुना निर्विद्यते विरज्यतेऽपि तेन वस्तुना ? चतुष्कोटिकः प्रश्नः। कथम् ?

---

[1] Cf. निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम् । *Ak*. vi. 77 cd.

[2] त्रयः साकल्येन धातवः। प्रहाणधातुः वैराग्यधातुः निरोधधातुः। जहाति रागसंयोजनं सर्वानन्यक्लेशानिति प्रहाणधातुः। रागसंयोजनप्रहाणमुच्यते वैराग्यधातुः। सर्वान्यधर्मप्रहाणं नाम निरोधधातुः। *Aam*. p. 129. On *nirodhadhātu*, see *Dīgha*, xxxiii. 1. 10.

[3] Cf. असंस्कृतैव धात्वाख्या विरागो रागसंक्षयः ।
प्रहाणधातुरन्येषां निरोधाख्यस्तु वस्तुनः । *Ak*. vi. 78.

[472] दुःखहेत्ववलम्बिन्या योगी निर्विद्यते धिया ।
विरज्यते तु संरक्तस्ततः कोटिचतुष्टयी ॥[१]

दुःखसमुदयक्षान्तिभिः तज्ज्ञानैश्च (7)निर्विद्यते, नान्यैः । विरज्यते तु यः संरक्तः स च सर्वैरपि दुःखसमुदयनिरोधमार्गक्षान्तिज्ञानैर्विरज्यते यैः क्लेशान् प्रजहाति । एवं चतुष्कोटिको भवति ।

तत्र निर्विद्यत एव कामवीतरागो नियाममवक्रामन् दुःखसमुदयधर्मक्षान्तिभ्यां तद्धर्मज्ञानाभ्यां च पूर्वप्रहीणत्वान्न क्षान्तिभ्यां जहात्य(8)प्रतिपक्षत्वान्न ज्ञानाभ्यामतो न विरज्यते । भावनामार्गेऽपि प्रयोगविमुक्तिविशेषा[त्] मार्गसंगृहीताभ्यां दुःखसमुदयज्ञानाभ्यां न विरज्यते विमुक्तत्वान्निर्विद्धवस्त्वालम्बनत्वात्तु निर्विद्यते ।

द्वितीयो(या) कोटिः—विरज्यते एवावीतरागः कामेभ्यो नियाममवक्रामन्निरोधमार्गधर्मान्वयक्षान्तिभिः भावनामा(9)र्गे च निरोधमार्गज्ञानैस्त्रैधातुकाद्वैराग्यं गच्छन्न निर्विद्यते ।

प्रामोद्यवस्त्वालम्बनत्वादुभयम् । वीतरागः कामेभ्यो नियाममवक्रामन् दुःखसमुदयधर्मान्वयक्षान्तिभिर्भावनामार्गे च दुःखसमुदयज्ञानैस्त्रैधातुकाद्वैराग्यं गच्छन् ।

नोभयम्—कामवीतरागो नियाममवक्रामन्निरोधमार्गधर्मज्ञानक्षान्तिभ्यां [VII. A. 7. Fol. 137 b.](1)तद्धर्मज्ञानाभ्यां च भावनामार्गे चानन्तर्यमार्गेतराभ्यां निरोधमार्गधर्मज्ञानाभ्याम् ॥

य एते त्रयो धातवस्ता एव तिस्रः संज्ञाः प्रहाणविरागनिरोधसंज्ञाः ।[२]

विस्तरेण तु

[473] संज्ञा अनित्यसंज्ञाद्या दश[३] ताभ्योऽशुभादयः ।
तिस्रो मार्गविधिर्मार्ग[श्रुत]स्रोऽन्त्यास्त्रयी फलम् ॥

---

[१] Cf. निर्विद्यते दुःखहेतुक्षान्तिज्ञानैर्विरज्यते ।
सर्वैर्जहाति यैरेवं चतुष्कोटिकसंभवः ॥ *Ak.* vi. 79.

(This is the last *kārikā* of the Sixth *Kośa-sthāna.*)

[२] This topic is not discussed in *Akb.*

[३] Cf. दस इमे भिक्खवे सञ्ञा···आमतपरियोसाना ।···असुभसञ्ञा, मरणसञ्ञा, आहारे पटिक्कूलसञ्ञा, सब्बलोके अनभिरतिसञ्ञा, अनिच्चसञ्ञा, अनिच्चे दुक्खसञ्ञा, दुक्खे अनत्तसञ्ञा, पहानसञ्ञा, विरागसञ्ञा, निरोधसञ्ञा । *Aṅg.* v. p. 105.

अशुभसंज्ञा मरणसंज्ञा सर्वलोकेऽनभिरतिसंज्ञा । (2)मार्गप्रयोगस्तिसृभिराभिरुक्तः । चतसृभिश्च मार्गोऽनित्यदुःखशून्यानात्मसंज्ञाभिः । प्रहाणविरागनिरोधसंज्ञाभिः फलमाख्यातमिति ॥

कति पुनरासां सास्रवाः कत्यनास्रवाः ?

[474] त्रितय्यशुभसंज्ञाद्या ज्ञेया तत्खलु सास्रवाः ।
समला निर्मलास्त्वन्या बोध्या नव भुवो[ऽ]मलाः ॥

अशुभा मरणसर्वलोकानभिरतिसंज्ञास्तिस्रः (3)समलाः । शेषास्तु सास्रवानास्रवाः, नवभूमिका आ(अ)[ना]स्रवा अवबोद्धव्याः ॥

[475] भूमिष्वेकादशस्वन्त्या ध्यानाद्यासूपलक्षयेत् ।
चतुर्थी पञ्चमी षष्ठी विद्या[त्] सप्तसु भूमिषु ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ षष्ठस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्च षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः

प्रथमः पादः ।

अत्राह। भगवतोक्तस्त्रिस्कन्धोऽयं (4)मार्गः। तत्र शीलस्कन्धः कर्माध्याये[1] विस्तरेण व्याख्यातः। समाधिस्कन्धोऽष्टमेऽध्याये व्याख्यायिष्यते। प्रज्ञास्कन्ध इदानीं व्याख्यातव्यः। सोऽयमारभ्यते—

[476] लोकोऽयं तत्त्वसंमुग्धो ज्ञेयतत्त्वे प्रमुह्यति ।
तानि ज्ञानानि वक्ष्यामि स्वरूपादिप्रपञ्चतः ॥

कानि पुनस्तानि कियन्ति वेति ? तदुच्यते—

[477] जातिद्रव्ये निराकृत्य प्र(5)तिपक्षाद्यपेक्षया ।
तद्भेदो दशधा प्रोक्तो धर्मज्ञानादिनामभिः ॥

जात्याश्रयणे खल्वेकत्रप्रसङ्गो द्रव्याश्रयणे ह्यानन्त्यं[2] तच्चाशक्यं वक्तुम्। तस्मादुभयमेतदुपेक्ष्य ययापेक्षयया दश[3] भवन्ति यच्च तेषां स्वलक्षणं सामान्यलक्षणं च तत्सर्वं विस्तरेण वक्ष्यामः ॥

तत्र तावत्—

[478] धर्मान्वयविशेष्ये[4] द्वे दुःखाद्यैश्च चतुष्टयम् ।
(6)द्वे संवृत्यन्यचित्ताभ्यां क्षयेणाजन्मना द्वयम् ॥

---

[1] Fourth *Adhyāya*.

[2] The *Paṭisambhidā-magga* (vol. I. pp. 1-3.) enumerates Seventy-three *ñāṇas* :—इमानि तेसत्तति ञाणानि, इमेसं तेसत्ततिया ञाणानं सत्तसट्ठिञाणानि सावकसासाधारणानि, छ ञाणानि असधारणानि सावकेहि···। The *Vibhaṅga* enumerates several kinds of *ñāṇas*. See *ñāṇavibhaṅga*, *Vbh*. pp. 306—344 and *VbhA*. pp. 396—465.

[3] दश ज्ञानानि । धर्मज्ञानं अन्वयज्ञानं संवृतिज्ञानं परचित्तज्ञानं दुःखज्ञानं समुदयज्ञानं निरोधज्ञानं मार्गज्ञानं क्षयज्ञानं अनुत्पादज्ञानं च। *Aam*. p. 89.

[4] **धर्मज्ञानं** कतमत् । कामधातुप्रतिसंयुक्तसर्वसंस्कारदुःखे···समुदये···निरोधे···माग ···अनास्रवज्ञानं···इत्युच्यते धर्मज्ञानम्। **अन्वयज्ञानं** कतमत्। रूपारूप्यधातुप्रतिसंयुक्तसर्वसंस्कारदुःखे···मार्गेऽनास्रवज्ञानं···इत्युच्यते ज्ञानम् । *Ibid*. V. supra, p. 335, n. 3.

धर्मान्वयज्ञाने खलु धर्मान्वयाभ्यामेव विशेष्य(ष्ये)ते। दुःखादीनि तु चत्वारि स्वविषयैरेव चतुर्भिरार्यसत्यैः विशेष्यन्ते। संवृत्या परचित्तेन च संवृतिपरचित्तज्ञाने[१] विशेष्येते। क्षयेणापुनरुत्पत्त्या च क्षयानुत्पादज्ञानद्वयं[२] विशिष्यते।

अथवा

[479] प्रतिपत्त[प्र]योगा(7)भ्यां स्वभावाकारगोचरैः।
तद्व्यवस्था निबोद्धव्या कृत्येनोपचयेण(न) वा ॥[3]

तत्र कामधातुविपक्षप्रतिपक्षो धर्मज्ञानम्। रूपारूप्यावचरविपक्षप्रतिपक्षोऽन्वयज्ञानम्। प्रयोगतः परचित्तज्ञानं चित्तं ज्ञास्यामीति तत्प्रयोगात्। स्वभावतः संवृतिज्ञान(नं) पिपीलिकादिष्वपि तद्भावात्। सत्याकारै[४]र्गोचरै[५]-

---

[१] **संवृतिज्ञानं** कतमत्। सर्वा सास्रवा प्रज्ञा कुशला वा अकुशला वा अव्याकृता वेत्युच्यते संवृतिज्ञानम्। **परचित्तज्ञानं** कतमत्। ध्याने भावनाबलेनावाप्नोति कामधातौ परस्य चित्तचैतसिकधर्माणां ज्ञानमित्युच्यते परचित्तज्ञानम्। *Aam*. p. 89. See *Yogabhāshya*, III. 19-20. See *sammutiñāṇakathā* and *chittārammaṇa kathā*, *Kv*. v. 6-7.

[२] The Kośakāra deals with this topic in detail : अथ क्षयानुत्पादज्ञानयोः को विशेषः ?

क्षयज्ञानं हि सत्येषु परिज्ञातादिनिश्चयः।
न परिज्ञेयमित्यादिरनुत्पादमतिर्मता॥ *Ak*. VII. 7.

क्षयज्ञानं कतमत् ?···(V. supra, p. 357, n. 3.)···विस्तरेणोक्तं **शास्त्रे**। कथमनास्रवेण ज्ञानेनैवं जानाति ? तत् पृष्ठलब्धेन व्युत्थित एवं जानाति। अतस्तद्विशेषेण तयोर्विशेषः **शास्त्रे** ज्ञापित इति **काश्मीराः**। अनास्रवेणाप्येवं जानातीत्य**परे**। दर्शनवचनं तु **भाष्याक्षेपात्**। *Akb*. VII. 7. See *Sakv*. p. 614 and *LVPAk*. VII. pp. 10-11.

[३] Cf. **स्वभावप्रतिपक्षाभ्यामाकाराकारगोचरात्।**
प्रयोगकृतकृत्यत्वहेतूपचयतो दश॥ *Ak*. VII. 8.

[४] **आकारतो दुःखसमुदयज्ञाने** इति। अकारत एव नालम्बनतः पञ्चोपादानस्कन्धलक्षणत्वेन तयोरभेदात्। तथा हि **शास्त्र** उक्तम्—'**दुःखज्ञानं कतमत्** ? पञ्चोपादानस्कन्धान् अनित्यतो···मनसिकुर्वतो यदनास्रवं ज्ञानं।···**समुदयज्ञानं कतमत्** ? सास्रवं हेतुकं हेतुतः समुदयतः प्रभवतः प्रत्ययतश्च मनसिकुर्वतो यदनास्रवं ज्ञानम्। *Sakv*. p. 617.

[५] **आकारालम्बनतो निरोधमार्गज्ञाने** इति। आकारतश्च आलम्बनतश्च निरोधमार्गज्ञाने व्यवस्थाप्येते। तथा हि शास्त्र उक्तम् "**निरोधज्ञानं कतमत्** ? निरोधं निरोधतः शान्ततः···मनसिकुर्वतो यदनास्रवं ज्ञानं। **मार्गज्ञानं कतमत्** ? मार्गं मार्गतो न्यायतः···मनसिकुर्वतो यदनास्रवज्ञानम्"। *Ibid*.

श्चत्वारि ज्ञानानि। (8)कृत्यतः क्षयज्ञानं कृत्यपरिसमाप्तेः। हेतूपचयतोऽनुत्पादज्ञानं सर्वैरणा(ना)स्रवैर्ज्ञानैस्तत्सभागहेतूपचयात् ॥

[480] धातुसत्यार्थचित्तेषु जातिध्वंसाप्रजन्मनोः।
संमोहस्य निवृत्त्यर्थं तद्भेदो दशधैव वा ॥[१]

तत्र धातुसंमोहो द्वाभ्यां धर्मान्वयज्ञानाभ्यां निवर्त्यते। सत्यसंमोहश्चतुर्भिः दुःखज्ञानादिभिः। अर्थ(9)संमोहः संवृतिज्ञानेन। चित्तसंमोहः परचित्तज्ञानेन। जातिसंमोहः क्षयज्ञानेन। पुनरुत्पत्तिसंमोहोऽनुत्पादज्ञानेनेति दशैव ज्ञानानि भगवानवोचत्। नातिभूयांसि नाल्पीयांसीति ॥

अत्र पुनः

[481 ab.] परिज्ञाताद्यवगमः दुःखादौ द्वयधी फलम्।

"दुःखं परिज्ञातं समुदयो मे प्रहीणः,……[२] [Folio No 138 lost][३]……

…[VII. B, 8. Fol. 139.]…(1)मिति वादविपक्षेण वा अनारम्भिणां संसारेणैव शुद्धिरिति वादविपक्षेण प्रतिपदाकारः। लौकिकवैराग्यमार्गमारसंज्ञाविपक्षेण वा अनात्यन्तिकवैराग्यगमनविप्रलम्भात् सर्वत्राबहुमानविपक्षेण नैर्याणिकाकारः ॥[४]

अथाकारो [ना]म क एष धर्मः। किं वा तेनाकार्यत इति? तदुभयं निर्दि(2)श्यते —

[482 cd.] धीराकारः सदाकार्यं साकारास्त्ववलम्बिनः ॥[५]

---

[१] Cf. धर्मज्ञाननिरोधे यन्मार्गे वा भावनापथे।
त्रिधातुप्रतिपक्षस्तु कामधातोस्तु नान्वयम् ॥ *Ak*. VII. 9.

[२] Cf. "दुःखं मे परिज्ञातमिति जानाति। समुदयः प्रहीणो निरोधः साक्षात्कृतो मार्गो भावित इति जानाति।"…*Akb*. VII. 7. (V. supra, p. 357, n. 3.) See तिपरिवट्टं द्वादसाकारं यथाभूतं ञाणदस्सनं'—*Vinaya*, I. p. 11.

[३] Folio No. 138 is lost. In this lost folio, the *Adv*. might have discussed the following topics, wnich are dealt with in the corresponding *Akb*. VII. 10-13 a:—(१) एषां दशानां ज्ञानानां आकाराः। (२) परचित्तज्ञानं समलं निर्मलं च। तस्याकाराः। (३) किमनास्रवः स्वलक्षणाकारोऽस्त्यथ न? (४) किं पुनरिमे षोडशाकारा नामत आहोस्वित् द्रव्यतः? See *Sakv*. pp. 618-624.

[४] V .supra, p. 329, n. 1.

[५] Cf. द्रव्यतः षोडशाकाराः प्रज्ञाकारस्तया सह।
आकारयन्ति सालम्बाः सर्वमाकार्यते तु सत् ॥ *Ak*. VII. 13.

प्रज्ञा खल्वाकार इत्युच्यते। न तर्हि प्रज्ञा साकारा भवति द्वयोः प्रज्ञयोः यौगपद्याभावात्। ततश्च न सर्वे चैतसिकाः साकाराः प्राप्नुवन्ति। न खलु ब्रूमः प्रज्ञासंप्रयोगात्साकारा वैकाकारा वा। किं तर्हि? स्ववृत्तिभिराकरणादालम्बनग्रहणादित्यर्थः।[१]

(3)किं पुनस्तदात्का(का)र्यम्? सदाकार्यम्। यत्किञ्चिद् द्रव्यतः प्रज्ञप्तितो वा विद्यते य(त)दाकार्यते। चित्तचैत्तास्तु साकाराः विषयग्राहिण[२] इत्यर्थः॥[3]

किं पुनर्ज्ञानं कति स्मृत्युपस्थानानि?

[483] परिचित्तमतिस्त्रीणि धर्मसंज्ञं निरोधधीः।
चत्वारि स्मृत्युपस्थानान्यतोऽन्यज्ज्ञानमिष्यते॥[४]

परचित्तज्ञानं खलु त्रीणि वेदनाचित्तधर्माख्या(4)नि। निरोधज्ञानं धर्मस्मृत्युपस्थानम्। परचित्तनिरोधज्ञानाभ्यामन्यानि ज्ञानानि चत्वारि स्मृत्युपस्थानानि॥

अथ कतमस्य ज्ञानस्य कति ज्ञानान्यालम्बनम्?

[484] मार्गधर्मान्वयज्ञानगोचरो नवशो धियः।[५]

---

[१] Cf. एवं तर्हि प्रज्ञा साकारा न भविष्यति। प्रज्ञान्तरासंयोगात्। **एवं तु युक्तं स्यात्।** सर्वेषां चित्तचैत्तानां आलम्बनग्रहणप्रकार आकार इति। *Akb.* VII. 13 b. **एवं तु युक्तं स्यात् इति सौत्रान्तिकमतम्। आलम्बनग्रहणप्रकार इति।** नैरुक्ता विधिरिति दर्शयति—आलम्बनशब्दाद् आकारं गृहीत्वा प्रकारशब्दाच्च कारशब्दम्। शेषवर्णलोपे च कृते आकार इति रूपं भवति। तदेवं सति प्रज्ञाऽपि साकारा भवतीति सिद्धम्। *Sakv.* p. 629.

[२] Cf. पञ्चन्नं खन्धानं कति सारम्मणा, कति अनारम्मणा?…रूपक्खन्धो अनारम्मणो। **चत्तारो खन्धा सारम्मणा।** *Vbh.* p. 428. See *Dhs.* 1185, 1508. In this connection, see the following controversies:—(१) रूपं सारम्मणं ति कथा (२) अनुसया अनारम्मणा ति कथा (३) ञाणं अनारम्मणं ति कथा (४) अतीतारम्मणकथा। *Kv.* IX. 3—7.

[3] The Kośakāra discusses here the *kuśalādi-bheda* of the ten *jñānas* in *Akb.* VI. 14-15. This topic is perhaps discussed in the lost portions of *Adv.* V. supra, p. 375, n. 3.

[४] Cf. **स्मृत्युपस्थानमेकं धीर्निरोधे परचित्तधीः।**
त्रीणि चत्वारि शेषाणि। *Ak.* VII. 16 abc.

[५] Cf. **धर्मधीर्गोचरो नव।** *Ak.* VII. 16 d.

मार्गधर्मान्वयज्ञानानां प्रत्येकं नवज्ञानान्यालम्बनम् । मार्गज्ञानस्य तावत्संवृतिज्ञानं हित्वा । धर्मज्ञानस्यान्व(5)यज्ञानम् । अन्वयज्ञानस्य धर्मज्ञानम् ।

दुःखहेतुधियोर्द्वे द्वे

दुःखसमुदयज्ञानयोः संवृतिज्ञानं सास्रवं च परि(र)चित्तज्ञानमालम्बनम्।

चतुर्णां दश

संवृतिपरचित्तक्षयानुत्पादज्ञानानां सर्वान्ये(ण्ये)व दशज्ञानान्यालम्बनम्।

नापरम् ॥[1]

निरोधज्ञानं खलु नैव ज्ञानालम्बनम् ॥

पुनरपि दशधर्मान् स्थापयि(6)त्वा कस्य ज्ञानस्य कति धर्मा विषय इति वाच्यम्। कथम्? तदुच्यते—

[485] पञ्चधर्मास्त्रिधात्वाप्तान् मार्गरूपान् सनातनान् ।
व्युत्पत्त्यर्थं द्विधा कृत्वा दर्शयेज्ज्ञानगोचरम् ॥[2]

त्रैधातुकान् धर्मात्(न्) प्रत्येकं द्विधा कृत्वा संप्रयुक्ता विप्रयुक्ताश्च[3], अप्रतिसंयुक्तांश्च द्विधा कृत्वा संप्रयुक्तविप्रयुक्तभेदेनैव, असंस्कृतमपि द्विधा (7)कृत्वा कुशलाव्याकृतभेदेनैवं[4] कृत्वा दश भवन्ति ।

तत्र तावत्संवृतिज्ञानस्य सर्व एव दशधर्मा विषयः ।[5] धज्ञानर्मस्य पञ्च

---

[1] Cf. नव मार्गान्वयधियोः दुःखहेतुधियोर्द्वयम् ।
चतुर्णां दश नैकस्य योज्या धर्माः पुनर्दश ॥ *Ak.* VII. 17.

[2] Cf. त्रैधातुकामला धर्मा अकृताश्च द्विधा द्विधा । *Ak.* VII. 18 ab.

[3] संप्रयुक्ताश्चित्तचैत्ता इति । विप्रयुक्ताः प्राप्त्यादयः । *Sakv.* p. 630.

[4] कुशलाव्याकृतभेदादिति । कुशलं प्रतिसंख्या-निरोधः परमक्षेमत्वात् । अव्याकृतावाकाशाप्रतिसंख्यानिरोधाविति । *Ibid.*

[5] The Kośakāra discusses this point in detail : स्यादेकेन ज्ञानेन सर्वधर्मान् जानीयात् ? न स्यात् । अपि तु

सांवृतं स्वकलापान्यदेकं विद्यादनात्मतः ।

संवृतिज्ञानं स्वस्मात्कलापादन्यान् सर्वधर्माननात्मतो जानीयात् सर्वधर्मा अनात्मान इति । स्वभावस्तत्सहभुवश्च धर्मास्तस्य स्वकलापः । तेषामग्रहणं विषयविषयिभेदादेवालम्बनत्वादिति । सन्निकृष्टत्वाच्च । तच्च कामावचरं श्रुतचिन्तामयं रूपावचरं श्रुतमयं भावनामयम् । तस्य व्यवच्छिन्नभूम्यालम्बनत्वात् । अन्यथा हि युगपत्सर्वतो वैराग्यं स्यात् । *Akb.* VII. 18 cd.—स्यादेकेन ज्ञानेन सर्वधर्मान् जानीयात् । न स्यात् इति । कथं गम्यते ? सूत्रात् ।

कामप्रतिसंयुक्तानास्रवाः संप्रयुक्तविप्रयुक्ताकुशलं चासंस्कृतम्। अन्वयज्ञानस्य सप्त रूपारूप्यप्रतिसंयुक्तानास्रवा[ः] संप्रयुक्तविप्रयुक्तकुशलं चासंस्कृतम्। परि(र)चित्तज्ञानस्य (8)त्रयः कामरूपप्रतिसंयुक्तानास्रवासंप्रयुक्ता एव। दुःखसमुदयज्ञानयोः षट्कामरूपारूप्यप्रतिसंयुक्तासंप्रयुक्तविप्रयुक्ताः। निरोधज्ञानस्यैको[ऽ]संस्कृतमेव कुशलम्। मार्गज्ञानस्य द्वावनास्रवः संप्रयुक्तो विप्रयुक्तश्च। क्षयानुत्पादज्ञानयोर्नव धर्मा विषयोऽसंस्कृतमव्याकृतं मुक्त्वा॥

(9)इदमिदानीं वक्तव्यम्। कः कतिभिर्ज्ञानैः समन्वागतः? सर्वस्तावत्पृथग्जनः संवृतिज्ञानेनैव। अयं तु नियमः—

[486] दृङ्मार्गे प्रथमे ज्ञाने त्रिभिर्ज्ञानैः समन्वितः।

द्वितीयक्षणे त्रिभिः संवृतिज्ञानदुःखज्ञानधर्मज्ञानैः।

चतुर्ष्वेकैकवृद्ध्योर्ध्वं विरक्तो
[VII. A. 8. Fol. 139 b.] (1)ऽन्यमनो धिया ॥[१]

अतः परं चतुर्षु चित्तक्षणेष्वेकैकं ज्ञानं वर्धते। त[द्यथा] दुःखेऽन्वयज्ञानेऽन्वयज्ञानं वर्धते। समुदयधर्मज्ञाने समुदयज्ञानम्। निरोधधर्मज्ञाने निरोधधर्मज्ञानम्। मार्गधर्मज्ञाने मार्गधर्मज्ञानं वर्धते। समुदयनिरोधमार्गान्व[यज्ञा]नेषु क्षान्तिषु च नास्त्यपूर्वज्ञानवृद्धिः। सर्वत्र तु वीतरागस्य पर(2)चित्तज्ञानं वर्धत इति वाच्यम्॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ सप्तमस्याध्यायस्य प्रथमः पादः॥

"इहास्माकं भो गौतम उपस्थानशालायां संनिषण्णानां संनिपतितानां एवंरूपान्तराकथासमुदाहारोऽभूत्। श्रमणो गौतम किलैवमाह। नास्ति स कश्चिच्छ्रमणो वा ब्राह्मणो वा यः सकृत् सर्वं जानीयात् सर्वं पश्येदिति। तथ्यमिदं भो गौतम स्मरामि भवतोऽहं एवं वक्तुम्। अपि तु नास्ति स कश्चिच्छ्रमणो वा ब्राह्मणो वा यः सकृत् सर्वं ज्ञास्यति वा द्रक्ष्यति वेति"। *Sakv.* pp. 630-1. For details, see *LVPAk.* VII. pp. 45-47, notes.

For an allied controversy, see *Kv.* v. 9.--इदानि **पच्चुप्पन्नञाणकथा** नाम होति। तत्थ येसं 'सब्बसंखारेसु अनिच्चतो दिट्ठेसु तं पि ञाणं अनिच्चतो दिट्ठं होती'ति वचनं निस्साय अविसेसेन सब्बस्मि पच्चुप्पन्ने ञाणं अत्थीति लद्धि सेय्यथापि **अन्धकानं**। *Kv A.* v. 9. Also see *Kv.* v. 8.

[१] Cf. **एकज्ञानान्वितो रागी प्रथमेऽनास्रवे क्षणे।**
द्वितीये त्रिभिरूर्ध्वंस्तु चतुर्ष्वेकैकवृद्धिमान्॥ *Ak.* VII. 19.

सप्तमाध्याये

द्वितीयपादः ।

इदमिदानीं वक्तव्यम् । कस्यां भूमौ कस्यां वावस्थायां कस्य वा पुद्गलस्य कति ज्ञानानि भाव्यन्ते ? तदारभ्यते—

[487] त्रिध्यानकामवैराग्ये पश्चिमे मुक्तिवर्त्मनि ।
मौलध्यानप्रयोगे च ज्ञेयानागतभावना ॥

[488] बाल(3)स्य स्मृत्युपस्थानध्यानाद्युत्पादने तथा ।
प्रयोगमुक्तिमार्गेषु संवृत्यान्यमनोधियः ॥

बालस्य खल्वाद्यध्यानत्रयवैराग्ये पश्चिमे विमुक्तिमार्गे मौलध्यानप्रयोगमार्गे च स्मृत्युपस्थानादिकुशलमूलोत्पादने च प्रयोगविमुक्तिमार्गे च संवृतिज्ञानस्य परचित्तज्ञानस्य चानागतभावना वेदितव्या ॥

आर्य(4)स्य तु

[489] क्षान्तिज्ञानानि भाव्यन्ते स्वजातीयानि दृक्पथे ।

दर्श(न)मार्गे खलु यद्येव संमुखीभूतं भवति क्षान्तिर्वा ज्ञानं वा तज्जातीयमेवानागतं भाव्यते । नान्यजातीयमन्यविषयं वा पृथक्कार्यत्वात् ।

सांवृतं चान्वयज्ञाने दुःखहेतुसमाह्वये ॥[1]

संवृतिज्ञानं खलु दर्शण(न)मार्गे त्रिषु चित्तेषु दुःखसमुदयनिरोधान्वयज्ञानाख्ये(5)षु भाव्यते । न धर्मज्ञानेषु, अकृतार्थत्वादालम्बनाकारपरिजयो हि नाद्यापि परिसमाप्तः ॥[2]

कस्मात्पुनः संवृतिज्ञानं तत्र भावनां गच्छति ? तदुच्यते—

[490] समानप्रतिपक्षत्वात्तेषु मार्गायितत्वतः ।

---

[1] Cf. यथोत्पन्नानि भाव्यन्ते क्षान्तिज्ञानानि दर्शने ।
अनागतानि तत्रैव सांवृतं चान्वयागमे ॥ *Ak.* VII. 20.

[2] Cf. न धर्मज्ञानेष्वकृतस्नसत्याभिसमयात । *Akb.* VII. 20.—न हि तदानीं रूपारूप्यावचरं दुःखं परिज्ञातं समुदयः प्रहीणः तन्निरोधः साक्षात्कृत इति। *Sakv.* p. 633.

यथैवान्वयक्षान्तिज्ञानानि त्रीणि तत्प्रहातव्यक्लेशप्रतिपक्षः, तथा तान्यपि संवृतिज्ञानानि प्रतिपक्षः। तैरपि तत्र मार्गायितं नि(6)र्वेधभागीयावस्थायाम्।

अतोऽभिसमयान्त्याख्यं तत्त्रिसत्यान्तलाभतः ॥[1]

अत एव तदाभिसमयान्तिकं संवृतिज्ञानमित्याख्यायते। धर्मज्ञानेषु खलु तद्भावनायामभिसमयमध्यानि स्युरिति। तच्चैतदनुत्पत्तिधर्मकमपि[2] सद्धर्मतया चिन्त्यते।

[2]कस्मात्पुनस्तदनुत्पत्तिधर्मकमेव? श्रद्धाधर्मानुसार्याश्रयेण तदुत्पत्ति(7)प्रतिबद्धत्वात्। दर्शनमार्गे च संमुखीभूते तन्नोत्पन्नम्। तस्मादनुत्पत्तिकधर्ममेव भावनां गच्छति।[3] तत्पुनरेतत्सप्तभूमिकं कामावचरं दर्शनमार्गसमानभूमिकं[4] च। उक्ता दर्शनमार्गभावना ॥

---

[1] Cf. **अतोऽभिसमयान्त्याख्यम्** । *Ak*. vii. 21 a.

अत एव तदभिसमयान्तिकं संवृतिज्ञानमाख्यायते । एकैकसत्याभिसमयान्ते भावनात् । कस्मान्न मार्गान्वयज्ञाने भावनां गच्छति ? मार्गसत्यस्य पूर्वं लौकिकेन मार्गेणानभिसमितत्वात्, अकृत्स्नाभिसमयाच्च । कृत्स्नं हि दुःखं शक्यते परिज्ञातुं समुदयः प्रहातुं निरोधः साक्षात्कर्तुं **न तु मार्गः शक्यते कृत्स्नो भावयितुम्** । इत्यभिसमयान्ताभावान्न तस्मिन्नाभिसमयान्तिकं भाव्यते ।···दर्शनमार्गपरिवारत्वादित्य**परे** । तदिदं साध्यत्वादज्ञापकम् । *Akb*. vii. 21 a.—**दर्शनमार्गपरिवारत्वादिति** । दर्शनमार्गस्य परिवारः संवृतिज्ञानम् । अतः सत्यत्रयान्ते एव दर्शनमार्गो भाव्यते । न मार्गसत्यान्ते तस्य भावनामार्गत्वात् । **साध्यत्वादज्ञापकम्** इति । साध्यमिदं दर्शनमार्गपरिवार एव । न भावनामार्गपरिवारोऽपीति । **वयं हि भावनामार्गपरिवारोऽपि** तदिति ब्रूमः । *Sakv*. p. 633.

[2] Cf. किं पुनस्तदाभिसमयान्तिकं संवृतिज्ञानं कदाचित्संमुखी क्रियते ? न कदाचित् । एकान्तेन हि **तदनुत्पत्तिधर्मकम्** । *Ak*. vii. 21 b.

[3-3] Cf. कथं पुनस्तद्भावितं भवति ? अलब्धलाभात् । कथमिदानीं तत्प्रतिलब्धं यदि नैव संमुखीकर्तुं शक्यते ? प्राप्तितः । **यस्माल्लब्धं तस्माल्लब्धमित्यपूर्वैषा** निर्देशजातिः । **तस्मान्नैवं भावना सिध्यति । एवन्तु सिध्यति यदाहुः पूर्वाचार्याः । कथं च पूर्वाचार्या** आहुः ? लोकोत्तरो मार्गसामर्थ्यात् संवृतिज्ञानं भाव्यते । यद् व्युत्थितः सत्यालम्बनं विशिष्टतरं लौकिकज्ञानं संमुखीकरोति । एष एव च तस्य लाभो यत्तत् सम्मुखीभावसमर्थाश्रयलाभः । गोत्रे हि लब्धे लब्धं गौत्रिकं भवति । एवन्तु नेच्छन्ति **वैभाषिकाः** । *Akb*. vii. 21 b.—···एतदुक्तं भवति । तत्सम्मुखीभावसमर्थाश्रयलाभे तदपि तेनाश्रयेणोत्पद्यमानं लब्धं भवतीति । अथ कस्मादेवं नेच्छन्ति **वैभाषिकाः** ? दर्शनमार्गलभ्यं तत् । तस्य कथं भावनामार्गे सम्मुखीभावो भविष्यतीति । दर्शनमार्गे चोत्पत्त्यनवकाशोऽस्यास्ति तदनुत्पत्तिधर्मकमिति वर्णयन्ते । *Sakv*. pp. 633-4. See *LVPAk*. vii. pp. 50-52.

[4] Cf. कतिभूमिकं पुनस्तत्संवृतिज्ञानं भाव्यते ? दर्शनमार्गस्य

स्वाधोभूमिनिरोधोऽन्त्यं स्वसत्याकारं यान्तिकम् । *Ak*. vii. 21 cd.

भावनामार्गे वक्तव्या ।

[491] मार्गाख्ये त्वन्वयज्ञाने ष[ड् भाव्य]न्तेऽथ सप्त वा ।[१]

षोडशे[तु वर्त]मानान्वयज्ञानचित्ते भावना(8)वर्त्मन्यवीतरागस्य षड् भाव्यन्ते। संवृतिपरचित्तक्षयानुत्पादज्ञानानि हित्वा। वीतरागस्य तु सप्तानागतानि भाव्यन्ते परचित्तज्ञानं वर्धयित्वा।

आनन्तर्यपथे चोद्‌र्ध्वं भाव्यते नान्यचित्तधीः ॥[२]

सरागस्यापि भावनामार्गे तस्मात् षोडशात्क्षणादूर्ध्वं यावत्कामे वीतरागो भवति तावत्सर्वेषु प्रयोगानन्तर्यविमुक्तिवि(9)शेषमार्गेषु सप्त ज्ञानानि भाव्यन्ते। अन्यत्र परचित्तक्षयानुत्पादज्ञानेभ्यः ॥

[492] प्रहाणमुक्तिमार्गेषु विनान्त्याया विमुक्तितः ।
भवाग्रप्रतिपक्षत्वात्संवृतस्य न भावना ॥[३]

ध्यानचतुष्टयारूप्यत्रयवैराग्ये पञ्चस्वभिज्ञासु,[४] अकोप्याप्रतिवेधे च व्यवकीर्ण[भाविते च] ध्याने। शैक्षस्य सर्वेष्वानन्तर्यविमुक्तिमार्गेषु सप्तैव ज्ञानानि [Folio no. 140 lost][५] .... ।

[......अभिधर्मदीपे विभाषाप्रभायां वृत्तौ सप्तमस्याध्यायस्य द्वितीयपादः समाप्तः ॥][६]

---

[१] Cf. षोडशे षट् सरागस्य वीतरागस्य सप्त तु । *Ak.* VII. 22 ab.

[२] Cf. सरागभावनामार्गे तदूर्ध्वं सप्त भावना ॥ *Ak.* VII. 22 cd.

[३] Cf. सप्तभूमिजयाऽभिज्ञाऽकोप्याप्त्याकीर्णभाविते ।
आनन्तर्यपथेषूर्ध्वं मुक्तिमार्गाष्टकेऽपि च ॥ *Ak.* VII. 23.

[४] V. infra, *Ad. kārikā* 515.

[५] Folio No. 140 is lost. In this lost folio, the *Adv.* might have discussed the following topics —(१) शैक्षस्य ज्ञानभावनाः । (२) कस्मिन्मार्गे कतिभूमिकं ज्ञानं भाव्यते । (३) चतुर्विधा भावनाः—प्रतिलम्भभावना निषेवणभावना प्रतिपक्षभावना विनिर्द्धावनभावना च । (४) बुद्धस्याष्टदशावेणिका धर्माः ।

These topics are discussed in the corresponding *Akb.* VII. 24-28.

[६] A major portion of the second *pāda* of the Seventh *Adhyāya* is lost.

सप्तमाध्याये

तृतीयपादः ।…[१]

[VIII. B, 1. Fol. 141 a]……[२](1)स्थानवस्तुहेतुविपाकप्रतिविस्तरैर्बोद्धव्यम् । तत्रातीतानागते प्रत्युत्पन्ने च [त]दाक्षेपाक्षेपवैचित्र्यं प्रतिकर्मसमादानं

---

[१] The beginning portion of this *pāda* is lost. V. supra, p. 381, n. 5.

[२] The topic under discussion is *asādhāraṇāḥ Buddhadharmāḥ* :—

अष्टादशावेणिकास्तु बुद्धधर्मा बलादयः । *Ak*. vii. 28 ab.

ये बुद्धस्यैव भगवतः क्षयज्ञाने भावनां गच्छन्ति नान्यस्य । **कतमेऽष्टादश ?** दश बलानि चत्वारि वैशारद्यनि त्रीणि स्मृत्युपस्थानानि महाकरुणा च । असाधारणं ह्यावेणिकम् । *Akb*. vii. 28 ab.

—एते बलादया महाकरुणान्ता अष्टादशावेणिका **वैभाषिकैर्व्यवस्थाप्यन्ते** । बलादिव्यतिरिक्तं **केचिदन्यानष्टादशावेणिकान् बुद्धधर्मान् वर्णयन्ति** । तद्यथा—नास्ति तथागतस्य स्खलितम् । नास्ति रवितम् । नास्ति द्रवता । नास्ति नानात्वसंज्ञा । नास्त्यव्याकृतं मनः । नास्त्यप्रतिसंख्यायोपेक्षा । नास्त्यतीतेषु नास्त्यनागतेषु नास्ति प्रत्युत्पन्नेषु प्रतिहतं ज्ञानदर्शनम् । सर्वं कायकर्म…वाक्कर्म…मनःकर्म ज्ञानानुपरिवर्ति । नास्ति छन्दहानिः । नास्ति वीर्यहानिः । नास्ति स्मृतिहानिः । नास्ति समाधिहानिः । नास्ति प्रज्ञाहानिः । नास्ति विमुक्तिज्ञानदर्शनहानिरिति ।

दशबलानि । स्थानास्थानज्ञानबलम् । कर्मविपाकज्ञानबलम् । ध्यानविमोक्षसमाधिसमापत्तिज्ञानबलम् । इन्द्रियपरापरज्ञानबलम् । नानाधिमुक्तिज्ञानबलम् । नानाधातुज्ञानबलम् । सर्वत्रगामिनीप्रतिपज्ज्ञानबलम् । पूर्वनिवासानुस्मृतिज्ञानबलम् । चुत्युपपत्तिज्ञानबलम् । आस्रवक्षयज्ञानबलं च ।

सूत्रं तु—"दशायुष्मन्तस्तथागतबलानि । कतमानि दश ? इहायुष्मन्तस्तथागतः स्थानं च स्थानतो यथाभूतं प्रजानाति । अस्थानं चास्थानतः । इदं प्रथमं तथागतबलम् । येन बलेन समन्वागतस्तथागतोऽर्हन् सम्यक्संबुद्ध उदारमार्षभस्थातं प्रतिजानाति ब्रह्मं चक्रं प्रवर्तयति । पर्षदि सम्यक् सिंहनादं नदति ।…" *Sakv*. p. 641.

Cf. **दस** खो पनिमानि सारिपुत्त तथागतस्स **तथागतबलानि** येहि समन्नागतो तथागतो आसभं ठानं परिजानाति, परिसासु सीहनादं नदति, ब्रह्मचक्कं पवत्तेति । कतमानि दस ? इध सारिपुत्त तथागतो ठानं च ठानतो अट्ठानं च अट्ठानतो यथाभूतं पजानाति…।…तथागतो अतीतानागतपच्चुप्पन्नं कम्मसमादानं ठानसो हेतुसो विपाकं यथाभूतं पजानाति…।… तथागतो सब्बत्थगामिनिं पटिपदं यथाभूतं पजानाति…।… तथागतो अनेकधातुनानाधातुलोकं यथाभूतं पजानाति… ।…तथागतो परसत्तानं परपुग्गलानं इन्द्रियपरोपरियत्तं यथाभूतं

भवति। किञ्चिद्धि सहसा प्रत्ययवृ(व)शात्क्रियते। किञ्चिद् दुष्टचेतसा। किञ्चित्पुनः समादाय क्रियते तेन कर्मणा मया जीवि[तव्य]मिति। तथा धर्मोऽयमधर्मो वेति समादायासमादाय करोति। स्थानादि(2)प्रविभागतश्च गाम्भीर्यं बोद्धव्यम्। तत्र स्थानमायत्युत्पत्त्यायत्तानामवकाशकारणात्। हेतुरपि येन हेतुना क्रियते[१]। यथोक्तम्—"वस्तु स्थानाधिकरणमुच्यते। साधिकरणं वस्तु स्थानम्। तद्यथा प्राणिवधकर्मणः स्वभावः। स च प्राणी यस्य चार्थे वध्यते यया प्रत्ययसामग्र्या सर्वमेतद्वस्तु सम्भवति। कुतः? स्थानहेतुविपाका(3)नां पृथगुक्तेः। यस्य खल्वेत[त्] स्थानं यच्चास्य स्थानं क्रियते यस्य तत्कर्म हेतुः, यद्धेतुकं च तत्, अयं चास्य कर्मणो विपाकोऽयमन्यस्य" इति।[२] तदेतदष्टज्ञानस्वभावं निरोधमार्गज्ञाने हित्वा ॥[३]

[493] ध्यानादीनां स्वभावादावव्याघातविसारि यत्।
ध्यानादिज्ञानसंज्ञं तन्नवज्ञानमयं बलम् ॥[४]

पजानाति···। ···तथागतो झानविमोक्खसमाधिसमापत्तीनं संकिलेसं वोदानं वुट्ठानं यथाभूतं पजानाति···। ···तथागतो अनेकविहितं पुब्बेनिवासं अनुस्सरति···। ···तथागतो दिब्बेन चक्खुना विसुद्धेन···यथाकम्मूपगे सत्ते पजानाति···। ·· तथागतो आसवानं खया अनासवं चेतोविमुत्तिं पञ्ञाविमुत्तिं दिट्ठेव धम्मे सयं अभिञ्ञा सच्छिकत्वा उपसम्पज्ज विहरति···। *M. sutta* 12. See *Aṅg.* v. pp. 33—36; *Vbh.* pp. 335—344. For details, see *Vbh A.* pp. 423—464; *LVPAk.* VII. pp. 68—72.

[१] The discussion on *sthānāsthāna-jñānabalam* is lost. (V. supra, p. 381, n. 4.) The *karma-vipāka-jñāna-balam* is under discussion.

Cf. तत्थ कतमा तथागतस्स अतीतानागतपच्चुप्पन्नानं कम्मसमादानानं **ठानसो हेतुसो विपाकं** यथाभूतं ञाणं ?

इध तथागतो पजानाति—अत्थेकच्चाानि पापकानि कम्मसमादानानि **गति सम्पत्ति-** पटिबाळ्हानि न विपचन्ति,···**उपधिसम्पत्ति**पटिबाळ्हानि···**कालसम्पत्ति** पटिबाळ्हानि··· ···**पयोगसम्पत्ति**पटिबाळ्हानि न विपचन्ति, अत्थेकच्चानि पापकानि कम्मसमादानानि **गति-विपत्ति**···**उपधिविपत्ति**···**कालविपत्ति** ·**पयोगविपत्ति** आगम्म विपचन्ति, अत्थेकच्चानि कल्याणानि कम्मसमादानानि····*Vbh* p. 338. See *Vbh A.* pp. 439. 454.

[२] This passage is not quoted in *Akb.*

[३] Cf. **स्थानास्थाने दशज्ञानान्यष्टौ कर्मफले नव ॥** *Ak.* VII. 28 cd.

—**अष्टौ कर्मफले** इति। कर्मणः सास्रवस्य तद्विपाकस्य च दुःखसमुदयसत्यसंगृहीतत्वात्। निरोधमार्गज्ञाने न भवत इति। अतोऽन्यानि तदालम्बनान्यष्टौ ज्ञानानि संभवन्ति। *Sakv.* p. 643.

[४] Cf. **नव ॥ ध्यानाद्यक्षाधिमोक्षेषु।** *Ak.* VII. 28 d, 29 a.

ध्यानविमोक्षसमाधिसमापत्ति[1]ज्ञानबलं ख(4)लु यत्संक्लेशव्यवदानव्यवस्थानविशुद्धिषु निवृत्तिपक्षे ध्यानानां विमोक्षाणां समाधीनां समापत्तीनां च संक्लेशव्यवदानव्यवस्थानविशुद्धिषु यद्बलमव्याहतम् । तत्र संक्लेशादिचतुष्टयं हानि(न)विशेषस्थितिनिर्वेधभागीयं सास्वादशुद्धकानास्रवादिभेदात् । तदेतद्ध्यानविमोक्षसमाधिसमापत्तिज्ञानबलं नवज्ञा(5)नात्मकं[2] बोद्धव्यम् ॥

[494] यत्सत्त्वाक्षमृदुत्वादौ परिच्छेदे प्रवर्तते ।
अक्षोत्तमावरज्ञानबलं तन्नवधीमयम् ॥

इन्द्रियपरापरज्ञानबलम्[3] यत्सर्वसत्त्वानां श्रेयःप्राप्तिशक्तित्रैविध्ये ज्ञानमव्याहतं तदिन्द्रियपरापरज्ञानबलं नवज्ञानात्मकं निरोधज्ञानं हित्वा ॥

[495] यत्सत्त्वाधिरुचित्रैधे हीनादौ सम्प्रवर्तते ।
नानाधिमुक्तिधीसंज्ञे (6)बलं तच्च नवात्मकम् ॥[4]

यत्खलु सर्वसत्त्वानां हीण(न)मध्यमोत्तमाधिमुक्तिष्वव्याहतं ज्ञानं तच्च नानाधिमुक्ति[5]ज्ञानबलं नवज्ञानात्मकमेव निरोधज्ञानं हित्वा ॥

[496] यन्नानाधात्वपेक्षाख्यं[6] सत्त्वार्थाय प्रवर्तते ।
नवज्ञानमयं तद्वत्तन्नानाधातुधीबलम् ॥

---

[1] ध्यानानि चत्वारि । विमोक्षा अष्टौ । सामाधयस्त्रयः शून्यतादयः । समापत्ती द्वे, असंज्ञिनिरोधसमापत्ती । नवानुपूर्वविहारसमापत्तयः । *Sakv.* p. 643. See *Vbh.* p. 342-3.

[2] तेषु **नव ज्ञानानि** निरोधज्ञानं हित्वा । कथं कृत्वा ? ध्यानादीनां सास्रवानास्रवसंप्रयुक्तविप्रयुक्तभेदात् तदालम्बनानि नव ज्ञानानि संभवन्ति । निरोधज्ञानं तु न भवति, तेषां संस्कृतत्वात् । *Sakv.* p. 643.

[3] Cf. तत्थ कतमं···**इन्द्रियपरोपरियत्तं**···ञाणं ? इध तथागतो सत्तानं आसयं जानाति, अनुसयं पजानाति, चरितं पजानाति, अधिमुत्तिं पजानाति, अप्परजक्खे महारजक्खे तिक्खिन्द्रिये मुदिन्द्रिये स्वाकारे द्वाकारे सुविञ्ञापये दुविञ्ञापये भब्बाभब्बे सत्ते पजानाति । ···*Vbh.* p. 340-342. see *Vbh. A.* pp. 458-462.

[4] इध तथागतो पजनाति—संति सत्ता हीनाधिमुत्तिका,···पणीताधिमुत्तिका···इदं तथागतस्स सत्तानं नानाधिमुत्तिकतं यथाभूतं ञाणं । *Vbh.* p. 340.

[5] प्रधानादिषु रुचयो नानाधिमुक्तयः । *Sakv.* p. 643.

[6] इध तथागतो खन्धनानत्तं पजानाति, धातुनानत्तं···आयतननानत्तं···अनेकधातुनानत्तं···लोकनानत्तं पजानाति । *Vbh.* p. 339.

—**धातुनानत्तं** ति अयं चक्खुधातु—पे—अयं मनोविञ्ञाणधातु नाम ।···**अनेकधातुनानाधातुलोकं** ति इदं न केवलं उपादिन्नकसङ्खारलोकस्सेव नानत्तं पजानाति, अनुपादिन्नक-

ते पुनः पूर्वाभ्यासवासनाधातवः[१] पूर्वजन्मसु गुणदोषविद्याशिल्प-(7)कर्माभ्यासेभ्यो या वासनास्ताः खल्विह धातवो विशेषेण बोद्धव्याः। गोत्रार्थेणा(ना)वस्थानां त एवाशया इत्यवगन्तव्याः, तद्वशाच्चरि(रती)त्युच्यते। उक्तं च भगवता—"धातुशः सत्त्वाः संस्यन्दन्ते" इति ॥[२]

[497] गतिधर्मार्यभेदं यद्वेत्ति प्रत्ययभेदतः ।
तद्धियो दश सर्वत्रगामिनीप्रतिपद्बलम् ॥

यत्खलु सत्त्वोपपत्तिनिर्वर्तकेषु(8) तत्क्षयकरेषु च धर्मेषु ज्ञानमव्याहतं तत्सर्वत्रगामिनीप्रतिपज्ज्ञानबलम् ।[3] भव्यविशेषौषधवद् द्रष्टव्यम्। मोक्षभव्यानां नानाधातूनां सत्त्वानामनेकधातूनां सर्वक्लेशप्रहाणायौषधविशेषवत्सामान्यप्रतिपक्षविशेषप्रतिपत्त्तं च सर्वत्र जानीते गतिहेतुं चानेन धातुरेकसन्ताने यो यद्गतचित्त(9)स्तद्वशेन तदवतरणभव्योऽभव्यश्च भवति तत्सर्वं यथावत्प्रतिजानातीति सर्वाकारज्ञताप्युक्ता[४] भवति। तदेतत् सफलमार्ग[५]प्रहाणाद्दशज्ञानात्मकं भवति। केचित्तु केवलमार्गग्रहणान्नवज्ञानात्मकम् ॥

सङ्खारलोकस्सापि नानत्तं तथागतो पजानाति एवाति दस्सेतुं गहितं। पच्चेकबुद्धा हि द्वे च अग्गसावका उपादिन्नकसङ्खारलोकस्सापि नानत्तं एकदेसतो व जानन्ति न निप्पदेसतो। अनुपादिन्नकलोकस्स पन नानत्तं न जानन्ति। *VbhA.* p. 456.

[१] Cf. तत्र हि धातुः। **पूर्वाभ्यासवासनासमुदागताशयो** धातुरित्याचार्य**संघभद्रः**। *Sakv.* p. 643. The *Vbh.* includes the knowledge of *āśaya* in the *indriya-parāparajñāna*. See *LVPAk.* vii. p. 70, n. 3.

[२] Cf. **धातुसो भिक्खवे सत्ता संसन्दन्ति समेन्ति।** हीनाधिमुत्तिका सत्ता हीनाधिमुत्तिकेहि सद्धिं···कल्याणाधिमुत्तिका सत्ता कल्याणाधिमुत्तिकेहि सद्धिं संसन्दन्ति समेन्ति। *S.* ii. p. 154.

[३] Cf. इध तथागतो अयं मग्गो अयं पटिपदा निरयगामिनी ति पजानाति,···तिरच्छानगामिनी ति···पित्तिविसयगामिनी ति···मनुस्सलोकगामिनी ति···देवलोकगामिनी ति···निब्बानगामिनीति पजानाति···इदं **सब्बत्थगामिनिं** पटिपदं यथाभूतं ञाणं। *Vbh.* p. 339.

Also cf. **प्रतिपत्सु** इति विस्तरः। भव्योऽत्र प्रतिपदो नरकादिगामिन्यः। नरकगामिनी प्रतिपत् यावद् देवगामिनी। निरोधगामिनी च। *Sakv.* p. 643.

[४] See *Aaa.* p. 20.

[५] मार्गो हि प्रतिपदुच्यते। तेन हि विसंयोगः प्राप्यते। निरोधस्तु कथम्? स चापि प्रतिपत्। प्रतिपद्यते तं इति कृत्वा। प्रतिपत्फलं वा प्रतिपदित्युच्यते। अत एवाह। **यदि सफला प्रतिपद् गृह्यत** इति। हेतुर्हि सर्वत्र गामिनीप्रतिपदिहेष्यते। तथा हि व्याचक्षते··· *Sakv.* p. 644.

[498] यत् स्वान्यातीतजन्मेद्विसंवृतिज्ञानसंज्ञकम् ।
प्राग्जात्यानुस्मृतिज्ञानबलं तत्सफलं मतम् ॥[१]

स्वपरसन्ता[VIII. A, 1. Fol. 141 b.](1)निकानामतीतजन्मपरम्पराणां विचित्रसुखदुःखेषु प्राणिष्वयममुष्यकर्मणो विपाकोऽयममुष्यस्वप्ननिमित्तध्यायिमनसिकारचिह्नार्थावधारणवदनेकविधसम्बन्धावबोधवशित्वमस्य सूचितं भवति। यथा खलु भव्यार्थसूचकानि(न्) स्वप्नाननेकशो दृष्ट्वा तांश्चार्थानभिनिष्पन्नात्(न्) प्रायशः सदृशानपेक्ष(क्ष्य) निश्चयो (2)भवति तद्वदिति। यथा च ध्यायिनां मनसिकारेषु धर्मचिह्नान्युत्पद्यन्ते तैश्च सुव्यक्तो धर्मपरिच्छेदो भवति। तद्वत्सर्वधर्मेषु मुद्रा भगवतो विदिता। किं पुनस्तत्कर्म विपाकसम्बन्धमुद्रास्विति ? तदेतद्बलं संवृतिज्ञानात्मकमेव ॥

[499] सत्त्वानां च्युतिसम्भूत्योर्ज्ञानमन्याध्ववृत्ति यत् ।
तच्च्युत्युत्पत्तिबुद्ध्याख्यं बलं पूर्ववदुच्यते ॥[२]

(3)दिव्यचक्षुराश्रयाच्च ज्ञानात्कर्मफलवैचित्र्यचरितावतरणज्ञानपरप्रत्ययो भवति। प्रत्युत्पन्नविषयमप्येवम्। तद्दिव्यचक्षुराश्रयज्ञानं सह प्रणिधिज्ञानेनापरान्ते प्रभाव्यते। तदेतत्संवृतिज्ञानात्मकमेव ॥

[500] आस्रवक्षयधीसंज्ञं षड्ज्ञानान्यथवा दश।[३]

अत इदानीं भगवतो विनेयकार्यं किमवशिष्टम् ? आस्रवक्षयः। तस्मिन्य(4)ज्ज्ञानं यस्य यदा यैरवतरणदेशनाविधिभिरकृच्छ्रेण संपद्यते तद्भगवान् सर्वाकारमनेन ज्ञानेन वेत्ति नान्यः कश्चित्। अतोऽस्यैव तद्बलं नान्यस्य। तत्पुनरेतत् षड्ज्ञानस्वभावं दशात्मकं वा। यद्यास्रवक्षये ज्ञानम,[४] षड्-

---

[१] तत्थ कतमं तथागतस्स पुब्बेनिवासानुस्सतिं ञाणं ? इध तथागतो पुब्बेनिवासं अनुस्सरति, एकं पि जातिं…पे…जातिसतसहस्सं पि, अनेके पि संवट्टकप्पे अनेके पि विवट्टकप्पे अनेके पि संवट्टविवट्टकप्पे… *Vbh.* p. 343.

[२] Cf. तत्थ कतमं तथागतस्स सत्तानं चुतूपपातं यथाभूतं ञाणं ? इध तथागतो दिब्बेन चक्खुना विसुद्धेन अतिक्कन्तमानुसकेन सत्ते पस्सति चवमाने उप्पज्जमाने हीने पणीते…यथाकम्मूपगे पजानाति… *Vbh.* p. 344.

[३] Cf. तत्थ कतमं तथागतस्स आसवानं खये यथाभूतं ञाणं ? इध तथागतो आसवानं खया अनासवं चेतोविमुत्तिं पञ्ञाविमुत्तिं दिट्ठेव धम्मे अभिञ्ञा सच्छिकत्वा उपसम्पज्ज विहरति… *Ibid.*

[४] **'यदि निरोधज्ञानमेवास्रवक्षयज्ञानम्'** इति। आस्रवानां क्षये निरोधे ज्ञानम्। आस्रवनिरोधालम्बनमित्यर्थः। एवं सति षड् ज्ञानानि भवन्ति। निरोधज्ञानजातिरेव धर्मज्ञानादिभेदिनीकृत्वा। *Sakv.* p. 644.

भवन्ति। परचित्तदुःखसमुदयमार्गज्ञानानि हित्वा। अथ सोपाये क्षये[1] ज्ञानं दर्शणं(नं) भवति, [[2]दशज्ञानानि भवन्ति[2]]।

उक्तो दशबलस्व(5)भावः।[3]

आकारणि(नि)यमो वक्तव्यः। सोऽयमुच्यते—

षोडशाकारमन्त्रा(त्रा)द्यमन्यैश्चाप्युत्तरं भुवा ॥

[501] सप्तमं षोडशाकारमविभक्ताकृतिद्वयम् ।
अष्टाकारं द्वितीयं तु नवज्ञानमयं तु यत् ॥

[502] तथागतबलं प्रोक्तं तज्ज्ञेयं द्वादशाकृति ।

स्थानास्थानज्ञानबलं षोडशभिराकारैः प्रवर्तते। अन्यैश्च तन्निर्मुक्तैरास्रवक्षयज्ञानबलमपि (6)यदि सोपायं क्षयं विवक्षति तदपि षोडशाकारम्। अथ क्षयमात्रं तत्, षड्ज्ञानमयैराकारैः सर्वत्रगामिनीं प्रतिपज्ञा(ज्ज्ञा)नबलं सप्तमं तदपि तथैव षोडशाकारम्। द्वयं तु पूर्वनिवासानुस्मृतिच्युत्युपपत्तिज्ञानबलमविभक्ताकारबलम्। द्वितीयं तु कर्मविपाकज्ञानबलमष्टाकारम्। यत्तु समाधिसमापत्तिज्ञान(7)बलं तस्य नवज्ञानस्वभावं तैरेव द्वादशभिराकारैः प्रवर्तते। अन्यद्यन्नोक्तं तदभ्यूह्यम्।

किं पुनः किं गोचरम् ?

सर्वगोचरमत्राद्यमन्त्यं शान्त्यवलम्बि धा(वा) ॥

सर्वविषयं स्थानास्थानबलम्। आस्रवक्षयज्ञानबलं निर्वाणविषयं वा चतुःसत्यविषयं वा ॥

---

[1] 'अथ क्षीणास्रव सन्तान' इति। आस्रवक्षये सति यज्ज्ञानम्। तदास्रवक्षयज्ञानमित्यर्थः। क्षीणास्रवसन्ताने सर्वाणि ज्ञानानि समुदाचरन्तीति 'दश ज्ञानानि भवन्ति।' *Ibid.*

[2] Added from *Akb.*

[3] The *Vbh. A.* gives the following details :—" अयं तावेत्थ आचरियानं समानत्थकथा। परवादी पनाह—दसबलञ्ञाणं नाम पाटियेक्कं नत्थि, सब्बञ्ञुतञ्ञाणस्सेव अयं पटिभेदो ति। तं न तथा दट्ठब्बं। अञ्ञं एव हि दसबलञ्ञाणं। अञ्ञं सब्बञ्ञुतञ्ञाणं। दसबलञ्ञाणं हि सकसककिच्चं एव जानाति।...सब्बञ्ञुतञ्ञाणं पन एतेहि जानितब्बञ्च ततो उत्तरितरञ्च पजानाति।...सब्बञ्ञुतञ्ञाणं पन सवितक्कसविचारमेव कामावचरमेव लोकियमेवाति...। *VbhA.* p. 464.

[503] द्विधा [हेतुभवालम्बं] सप्तमं सत्यगोचरम् ।

कर्मविपा(8)कज्ञानबलं भवविषयम् । सर्वत्रगामिनी प्रतिप[त्]ज्ञानबलं चतुःसत्यालम्बनम् ।

अतीताद्यद्धि धात्वर्थमष्टमं समुदाहृतम् ॥

पूर्वेणि(नि)वासानुस्मृतिज्ञानबलं 'अतीताद्यद्धि' धातुगोचरम् ॥

[504] नवमं खलु रूपार्थं संस्कृतालम्ब्यते परम् ।

च्युत्युपपत्तिज्ञानबलं रूपायतनविषयम् । अन्यद्यदवशिष्टं तत्संस्कृतधर्मगोचरं (9)द्रष्टव्यम् ।

अत्र पुनः

द्व्यपेक्षो बलशब्दोऽयं बलं त्वप्रतिघाततः ॥[1]

पराभिभवापेक्षश्च सर्वाप्रतिघातित्वेन च । यत्खलु [अ]प्रतिहतसामर्थ्यं तद्बलमित्युच्यते । मानसं बलं दशविधं भगवतो व्याख्यातम् ॥[2]

कायिकमप्यभिधीयते—

[505] [सन्धौ]सन्धौ च बुद्धस्य काये णा(ना)रायणं बलम् ।[3]

---

[1] Cf. **सर्वभूमिषु केनास्य बलमव्याहतं यतः ।** *Ak.* vii. 30 cd.

[2] Yaśomitra gives following details :—

'तदेव दशविधज्ञानमन्यस्य बलं नोच्यत' इति । अन्यस्याप्येतदस्ति **न तु बलं** व्याहतत्वात् । यत्तु अव्याहतं तद्बलमावेणिकम् इत्यभिप्रायः । 'प्रव्रजनप्रेक्षपुरुषप्रत्याख्यानम्' इति विस्तरः । ···तदुदाहरणं यथाऽन्यस्य व्याहन्यते ज्ञानमिति । **आर्य शारिपुत्रेण** किल कस्यचित् प्रव्रज्याप्रेक्षस्य पुरुषस्य **मोक्षभागीयं कुशलमूलं** व्यवलोकयता न दृष्टमिति प्रत्याख्यातो न प्रव्राजित इत्यर्थः । भगवता तु दृष्टं प्रव्राजितश्च । तं चाधिकृत्य भिक्षुभिः पृष्टेन **भगवतोक्तम्**—"अनेनैवेदं कर्म कृतम् । यदर्हत्त्वं प्राप्ता । न हि कर्माणि पृथिवीधातौ विपच्यन्ते । नाब्धातौ न तेजोधातौ न वायुधातौ । अपि तूपात्तेष्वेव स्कन्धधात्वायतनेषु" इति विस्तरः । इदं चोक्तम्—

"मोक्षबीजमहं ह्यस्य सुसूक्ष्ममुपलक्षये ।
धातुपाषाणविवरे निलीनमिव काञ्चनं ।" इति । *Sakv.* p. 644.

See *Rādhatthera-vatthu, Dhammapada A.* vi. 1.

[3] Cf. **सन्धौ सन्धौ नारायणबलमित्यपरे ।** *Akb.* vii. 31 ab.

स्प्रष्टव्यमधिकं तत्तु [VIII. B, 2. Fol. 142 a.](1)
दश हस्त्यादिसप्तकात् ॥[१]

नारायणं नाम बलमुच्यते। तच्च भगवतो मर्मणि मर्मणि विद्यते। नागग्रन्थिशङ्कलाशङ्कुसन्धयश्च यथाक्रमं बुद्धप्रत्येकबुद्धचक्रवर्तिणः(नः)।

किं प्रमानं(णं) पुनस्तन्नारायणं बलम् ? यत्खलु दशानामितरहस्तीनां बलं [त]देकस्य गन्धहस्तिनः। एवं दशोत्तरवृत्त्या महानग्नि(ग्न)[२] प्रस्कन्दिवराङ्गचानूरणा(ना)रा(2)यणानां वाच्यम्।[३] ऐरावन(ण)सहस्रस्येत्यन्ये। स हि देवोद्यानयात्रासमये त्रयस्त्रिंशच्छिरसमात्मानमभिनिर्मायात्यद्भुतविचित्रोद्यानायायमानानि तावन्त्येव देवकुलान्यनेकसहस्रपरिवाराणि भूर्जपत्रवदादाय गच्छत्येष बलसमुदयस्तस्य। एवं तु [वर्णयन्ति] मानसबलवदनन्तं कायिकमपि बलं बुद्धानां भगवतामिति।[४] त(3)त्पुनः कायिकं बलं स्पृष्टव्यायतनसंगृहीतम्। गुरुत्वेन बलसंग्रहो लघुत्वेन दौर्बल्यस्येति वर्णयन्ति।

[506] स्वपरार्थान्तसम्प्राप्तेर्वें(वैं)शारद्यचतुष्टयम् ।
आद्यन्तबलरूपे द्वे द्वे कर्म प्रतिपद्धियोः ॥[५]

---

[१] Cf. नारायणं बलं काये सन्धिष्वन्ये दशाधिकम् ।
हस्त्यादिसप्तकबलं स्पृष्टव्यायतनं च तत् ॥ *Ak.* VII. 31.

[२] महानग्न in *Akb.* and *Sakv.* p. 645.

[३] प्रकृतग्रन्धहस्तिमहानग्नप्रस्कन्दिनां दशोत्तरवृद्धयार्धनारायणं बलं तद् द्विगुणं नारायणमित्यपरे। यथा तु वहुतरं तथा युज्यते। *Akb.* VII. 31 cd.—तथा युज्यत इत्याचार्यः। *Sakv.* p. 645.

Cf. तत्थ दुविधं तथागतस्स बलं कायबलञ्च ञाणबलञ्च। तत्थ कायबलं ति हत्थिकुलानुसारेन वेदितब्बं। वुत्तं हेतं पोराणेहि :—

काळावकञ्च गङ्गेय्यं पण्डरं तम्बपिंगलं।
गन्धमङ्गलहेमञ्च उपोसथछद्दन्त इमे दसा ति ॥

इमानि हि दस हत्थिकुलानि। तत्थ काळावकं ति पकतिहत्थिकुलं दट्ठब्बं। यं दसन्नं पुरिसानं कायबलं तं एकस्स काळावकहत्थिनो। यं दसन्नं काळावकानं बलं, तं एकस्स गङ्गेय्यस्स···यं दसन्नं छद्दन्तानं तं एकस्स तथागतस्स, नारायणसंघातबलं ति पि इदमेव वुच्चति। *Vbh A.* p. 397.

[४] Cf. मानसवत् कायिकमप्यस्यानन्तं बलमिति भदन्तः। *Akb.* VII. 31 cd. See *LVPAk.* VII. p. 73, n. 2.

[५] Cf. वैशारद्यं चतुर्धा तु यथाद्यदशमे फले ।
द्वितीये सप्तमे चैव। *Ak.* VIII. 32 abc.

सूत्र उक्तम्—"सम्यकसम्बुद्धस्य वत मे सत इमे धर्मास्त्वयाऽनभिसम्बुद्धाः" इति विस्तरः[१]। [अत्र हि प्रथम]द्वितीयाभ्यां स्वार्थसम्पद्भगवतोद्भाविता। (4)पूर्वेण ज्ञानसम्पत्। द्वितीयेण(न) प्रहाणसम्पत्। द्वाभ्यामन्याभ्यां परार्थसम्पदा[२] दर्शिता व्यवदानसंक्लेशोद्भावनात्।

कतरत्पुनर्वैशारद्यं कति ज्ञानात्मकम्? तदुच्यते। स्थानास्थानबलरूपमाद्यम्। आस्रवक्षयज्ञानरूपं द्वितीयम्। कर्मस्वकज्ञानबलं तृतीयम्। सर्वत्रगामिनीप्रतिप[त्]ज्ञानबलं चतुर्थं वैशारद्यम्। तद्यावज्ज्ञानस्वभावान्ये(5)तानि बलानि[3] तावत्स्वभावानि यथाक्रमं चत्वारि वैशारद्यानि बोद्धव्यानि।

सूत्र उक्तम्—"त्रीणीमानि स्मृत्युपस्थानानि यान्यार्यः सेवते" इति विस्तरः[४]। तेषां पुण(न)रिदं लक्षणम्—

---

[१] Cf. चत्तारिमानि भिक्खवे तथागतस्य वेसारज्जानि···कतमानि चत्तारि? सम्मासम्बुद्धस्स ते पटिजानतो इमे धम्मा अनभिसम्बुद्धा ति—तत्र वत मं समणो वा ब्राह्मणो वा···सहधम्मेन पटिचोदेस्सती ति—निमित्तमेतं भिक्खवे न समनुपस्सामि। ···खीणासवस्स ते पटिजानतो इमे आसवा अपरिक्खीणा ति···ये खो पन ते अन्तरायिका धम्मा वुत्ता ते पटिसेवतो नालं अन्तराया ति···यस्स खो पन ते अत्थाय धम्मो देसितो सो न निय्याति तक्करस्स सम्मा दुक्खक्खयाया ति···। *Aṅg.* II. pp. 8-9. See *Sakv.* pp. 645-6; *LVPAk.* VII. p. 74, n. 7.

[२] V. supra, p. 3.

[३] Cf. कथं ज्ञानमेव वैशारद्यम्? निर्भयता हि वैशारद्यम्। एभिश्च निर्भयो भवति। ज्ञानकृतं वैशारद्यं युज्यते। न ज्ञानमेव। *Akb.* VII. 32 abc.

—एभिश्च ज्ञानैर्निर्भयो भवतीति ज्ञानानि वैशारद्यानीति **वैभाषिकाः। आचार्य आह।** 'ज्ञानकृतं तु वैशारद्यम्। न ज्ञानमेवे'ति। अथवा **आचार्य**वचनमेवैतत्सर्वम्।···*Sakv.* p. 646.

[४] Cf. त्रीणिमानि भिक्षवः स्मृत्युपस्थानानि। यान्यार्यः सेवते। यान्यार्यः सेवमानोऽर्हति गणमनुशासयितुम्। कतमानि त्रीणि? इह भिक्षवः शास्ता श्रावकाणां धर्मं देशयति अनुकम्पकः कारुणिकोऽर्थकामो हितैषी करुणायमानः। इदं वो हिताय इदं वो सुखाय इदं वो हितसुखाय। तस्य मे श्रावकाः शुश्रूषन्ते। स्रोतं अवदधति। आज्ञाचित्तं उपस्थापयन्ति। प्रतिपद्यन्ते धर्मस्यानुधर्मं प्रति। न व्यतिक्रम्य वर्तन्ते शास्तुः शासने। तेन तथागतस्य न नन्दी भवति न सौमनस्यं न चेतसो उप्लावितत्वम्। उपेक्षकस्तत्र तथागतो विहरति स्मृतः संप्रजानन्। इदं प्रथमं स्मृत्युपस्थानम्।···पुनरपरं शास्ता धर्मं देशयति पूर्ववत्। तस्य ते श्रावका न शुश्रूषन्ते।···व्यतिक्रम्य वर्तन्ते शास्तुः शासने। तेन तथागतस्य नाघातो भवति नाक्षान्तिः नाप्रत्ययो न चेतसो अनभिराद्धिः। उपेक्षकस्तत्र तथागतो विहरति स्मृतः सम्प्रजानन्। इदं द्वितीयं स्मृत्युपस्थानम्।···पुनरपरं भिक्षवः यावच्छासने तत्र तथागतस्य न नन्दी···नाघातो···उपेक्षकस्तत्र तथागतो विहरति···इदं तृतीयं स्मृत्युपस्थानम्। *Sakv.* pp. 646—7. See *M. suttas* 56, 103.

[507] श्रोतृसम्पत्त्रयापेक्षा त्रिविधा स्मृत्युपस्थितिः।[१]
संस्माराहितसामर्थ्यसंप्रजन्यस्वलक्षणा ॥

शुश्रूषकाशुश्रूषकादिभेदाद्विनेयाणां(नां)(6)त्रैविध्येन व्यवस्थानम्। शुश्रूषकादिवर्गत्रयाभिसन्धेः। स्वभावः पुनः स्मृतिविशिष्टसंप्रजन्यत्रयस्वभावानि त्रीणि स्मृत्युपस्थानानि। स्मृतिविशिष्टसंप्रजन्यतो हि भगवतः शुश्रूषमाना(णा)शुश्रूषमान(ण)तदुभययुक्तेषु विनेयसमूहेषु नानन्दो भवत्याघातो वा ॥

महाकरुणा पुनः

[508] संवृतिज्ञानरूपत्वाद्दीर्घकालानु(7)सारतः।
सर्वत्र समवृत्त्यादेर्बुद्धस्यैव महाकृपा ॥[२]

यदा श्रावकस्यापि करुणा विद्यते प्रत्येकबुद्धस्यापि कस्माद् बुद्धस्यैव महाकृपेत्युच्यते ?[३] यस्मादियं संवृतिज्ञानस्वभावा श्रावकादीनामद्वेषस्वभावा बुद्धस्य च दीर्घकालानुगता सूक्ष्मानुगता सर्वसत्त्वसमग्रहप्रवृत्ता सर्वत्रानुगता च द्वात्रिंशन्महा(8)पुरुष[लक्षण]विद्योतितशरीराध्यासिनी दशबलपरिगृहीता च। तस्माद् बुद्धस्यैव भगवतो महाकृपेत्युच्यते। उक्ता असाधारणगुणाः[४]॥[५]

---

[१] Cf. स्मृतिप्रज्ञात्मकं त्रयम्। *Ak.* vii. 32 d.

[२] Cf. महाकृपा संवृतिधीः संभाराकारगोचरैः।
समत्वादधिमात्राच्च नानाकरणमष्टधा ॥ *Ak.* vii. 33.

[३] करुणामहारुणयोः किं नानाकरणम् ?···स्वभावतोऽद्वेषामोहस्वभावत्वात्। आकारत एकत्रिदुःखताकारत्वात्। आलम्बनत एकत्रिधात्वालम्बनत्वात्। भूमितश्चतुर्थध्यानभूमिकत्वात्। सन्तानतः श्रवकादिबुद्धसन्तानजत्वात्। लाभतः कामधातुभवाग्रवैराग्यलभ्यत्वात्। अपरित्राणपरित्राणतः। अतुल्यतुल्यकरुणायनाच्च। *Akb.* vii. 33 d. See *Sakv.* pp. 648—9; *LVPAk.* vii. p. 77.

[४] कस्मादेते आवेणिका बुद्धधर्मा उच्यन्ते ? सवासनप्रहाणात्। अथवा यस्य श्रावकाः तस्य···*Akb.* vii. 32 d.—सवासनानं आनन्त्यादीनां प्रहाणात्। का पुनरियं वासना नाम श्रावकाणाम् ? यो हि यत्क्लेशचरितः पूर्वं तस्य तत्कृतः कायवागचेष्टाविकारहेतुसामर्थ्यविशेषश्चित्ते वासनेत्युच्यते। अव्याकृतश्चित्तविशेषो वासनेति भदन्तानन्तवर्मा। अथवेति विस्तरेणाचार्यः। *Sakv.* p. 647.

[५] The Kośakāra discusses one more point:—

किं पुनः सर्वे बुद्धा सर्वप्रकारसामान्या भवन्ति ? न।

सम्भारधर्मकायाभ्यां जगतश्चार्थचर्यया।
समता सर्वबुद्धानां नायुर्जातिप्रमाणतः ॥ *Ak.* vii. 34.

Adv. might have discussed this topic in Third *Adhyāya*, which is lost. V. supra, p. 115, n. 1.

श्रावकसाधारणा उच्यन्ते—

[509] अरणा प्रणिधिज्ञानं चतस्रः प्रतिसंविदः ।
अर्हत्सान्तानिका ह्येते पञ्च तु प्रान्तकोटिकाः ॥[१]

[510] इतरैरपि सामान्या अप्रमादादयो गुणाः ।
ए(4)षां यथोपदिष्टाणां(नां) शृणु वक्ष्यामि लक्षणम् ॥

तत्र तावत् ।

[511] अरणा संवृतिज्ञानं नृजाऽन्त्यध्याननिश्रयात् ।[२]
आर्यसन्तानिका जाता सवस्तुकमलोच्छिणी ॥

इह कश्चिदर्हन्नकोप्यधर्मा सर्वक्लेशप्रहाणात्परमामृतसुखमनुभवत्येवं चित्तमुत्पादयति—कथं नाम परेऽपि [इ]मे सन्तानालम्बनाद् क्लेशान् नोत्पा[VIII. A, 2. Fol. 142. b.](1)दयेयुः कथञ्च तमनिष्टफलं नानुभवेयुः। चतुर्थं ध्यानं विवृद्धिकाष्ठागतं समापद्य तथा करोति यथाऽस्य चारविहारगतस्य सन्ताने न कश्चित्क्लेशमुत्पादयति ॥

[512] प्रणिधिज्ञानमप्येवं सर्वधर्मावलम्बि तु ।[३]
अकोप्यधर्मनो(णो) ख्याते तथैव प्रतिसंविदः ॥

प्रणिधिज्ञानमपि संवृतिज्ञानस्वभावं प्रान्तकोटिकचतुर्थध्यानलाभात्,[४] (2)अर्हद्यद्यत्प्रणिधत्ते तत्तज्जानीते प्रणिधिज्ञानस्य सर्वधर्मालम्बनत्वात् ॥[४]

---

[१] Cf. शिष्यसाधारणा अन्ये धर्माः केचित् पृथग्जनैः ।
अरणाप्रणिधिज्ञानप्रतिसंविद्गुणादयः ॥ *Ak*. VII. 35.

[२] Cf. संवृतिज्ञानमरणा ध्यानेऽन्त्येऽकोप्यधर्मणः ।
नृजाऽनुत्पन्नकामाप्तसवस्तुक्लेशगोचराः ॥ *Ak*. VII. 36.

The difference between the *araṇāsamādhi* of *Buddha* and *śrāvaka* is given in *Aaa* :—श्रावकस्यारणादृष्टेर्नृक्लेशपरिहारिता ।
तत् क्लेशस्रोत उच्छित्त्यै ग्रामादिषु जिनारणा ॥ *Aaa*. p. 524.
See *LVPAk*. VII. p. 87.

[३] Cf. तथैव प्रणिधिज्ञानं सर्वालम्बं तु तत्तथा । *Ak*. VII. 37 ab.
Also cf. अनाभोगमनासङ्गमव्याघातं सदा स्थितम् ।
सर्वप्रश्नापन्नुद्बौद्धं प्रणिधिज्ञानमिष्यते ॥ *Aag* p. 524.

[४] सर्वधर्मालम्बनं तु प्रणिधिज्ञानमित्येव विशेषः । आरूप्यास्तु न साक्षात् प्रणिधिज्ञानेन ज्ञायन्ते । किं तर्हि ? निष्पन्नचरितविशेषात् । कर्षकनिदर्शनं चात्रेति **वैभाषिकाः** । प्रणिधिपूर्वकं ज्ञानं प्रणिधिज्ञानम्···*Akb*. VII. 37 ab. See *Sakv* p. 651.

प्रतिसंविदः खल्वपि

[513] विवक्षितार्थसम्बन्धिनामसंमोहभेदिनी ।
आद्याऽन्या तदभिव्यङ्ग्या ज्ञेया ज्ञानविचारिणी ॥

[514] तृतीया शब्दसंस्कारा ज्ञानसंमोहघातिनी ।
तुरीया तु प्रबन्धोक्तिध्यानाद्युत्पादनोन्मुखी ॥[1]

तत्र द्वादशाङ्गप्रवचनसंगृहीतेषु[2] वक्ष्य(3)माना(णा)र्थसम्बन्धिषु विवक्षितेषु नामकायादिषु यदविवर्त्यं ज्ञानं सा धर्मप्रतिसंवित् । तदवद्योत्येषु पौरुषेयापौरुषेयसम्बन्धेषु परार्थसंवृत्यर्थराशिषु यदविवर्त्यं ज्ञानं साऽर्थप्रतिसंवित् । नामकायादिवाचक एव वाक्छब्देष्वरूपद्रव्यलिङ्गसंख्यासाधनक्रियाकालपुरुषोपग्रहसम्बन्धिनि यदविवर्त्यं ज्ञानं (4)सा निरुक्तिप्रतिसंवित् ।[3] धर्मार्थनिरुक्तिषु ध्यानविमोक्षसमाधिसमापत्तिवशित्वसंप्रख्याने यदविवर्त्यं ज्ञानं सा [3]प्रतिभान[प्रति]संवित् [4]।[5]

---

[1] Cf. धर्मार्थयोर्निरुक्तौ च प्रतिभाने च संविदः ॥
तिस्रो नामार्थवाग्ज्ञानमविवर्त्यं यथाक्रमम् ।
चतुर्थी युक्तमुक्ताभिलापमार्गवशित्वयोः ॥ *Ak*. vii. 37 cd, 38.

[2] सूत्रं गेयं व्याकरणं गाथोदानावदानकम् ।
इतिवृत्तकं निदानं वैपुल्यञ्च सजातकम् ॥
उपदेशाद्भुतौ धर्मौ द्वादशाङ्गमिदं वचः । *Aaa*. p. 35.

Cf. कथं अंगवसेन नव अंगानी ति ? सब्बमेव हि'दं 'सुत्तं गेय्यं वेय्याकरणं गाथा उदानं इतिवुत्तकं जातकं अब्भुतधम्मं वेदल्लं'ति **नवङ्गप्पभेदं** होति । *Dhs A*. i. 66.

[3] उत्तरोत्तरा प्रतिभा प्रतिभानमित्यपरे । *Akb*. vii. 406.

[4] **चतस्सो पटिसम्भिदा** नाम अत्थादिसु पभेदेगतानि चत्तारि ञाणानि । वुत्तं हेतं—"अत्थे ञाणं अत्थपटिसम्भिदा । धम्मे ञाणं धम्मपटिसम्भिदा । अत्थधम्मनिरुत्ताभिलापे ञाणं निरुत्तिपटिसम्भिदा । ञाणेसु ञाणं पटिभानपटिसम्भिदा" ति [*Vbh*. p. 293.]

तत्थ **अत्थो** ति सङ्खेपतो **हेतुफलस्सेतं** अधिवचनं ।···पभेदतो पन यं किञ्चि पच्चयसम्भूतं, निब्बानं, भासितत्थो, विपाको, किरिया ति इमे पञ्च धम्मा अत्थो ति वेदितब्बा ।···**धम्मो** ति सङ्खेपतो **पच्चयस्सेतं** अधिवचनं ।···यो कोचि फलनिब्बत्तको हेतु, अरियमग्गो, भासितं, कुसलं, अकुसलं ति इमे पञ्च धम्मा धम्मो ति वेदितब्बा ।···अयमेव हि अत्थो **अभिधम्मे**···दस्सितो । तत्थ धम्मनिरुत्ताभिलापे ञाणं ति तस्मिं अत्थे च धम्मे च या सभावनिरुत्ति···तस्सा धम्मनिरुत्तिसञ्ञिताय **मागधिकाय मूलभासाय** पभेदगतं ञाणं निरुत्तिपटिसम्भिदा ।···ञाणेसु ञाणं ति सब्बत्थ ञाणमारम्मणं कत्वा पच्चवेक्खन्तस्स ञाणारम्मणं ञाणं···पटिभानपटिसम्भिदा ति अत्थो । *Vm*. xiv. 21—25. See *LVPAk*. vii. p. 89, n. 3.

[5] The Kośakāra gives some more details:—आसां च किल प्रतिसंविदां गणितं

त एते षड्गुणाः प्रान्तकोटिकमित्युच्यन्ते ॥[१]

का कति भूमिकाः पुनरासां प्रतिसंविदां का वा कति ज्ञानमयी ?[२] तदवद्योत्यते—

[515] अर्थाख्या खलु सर्वत्र षड्ज्ञानान्यथवा नव ।

अर्थप्रतिसं(5)वित् सर्वासु भूमिषु कामधातौ यावद्भवाग्रे ण(न)वज्ञानस्वभावा णि(नि)रोधज्ञानं वर्जयित्वा षड्ज्ञाना[नि], निर्वाणस्ये(स्यै)व परमार्थत्वात्, परचित्तदुःखसमुदयमार्गज्ञानानि वर्जयित्वा ।

प्रतिभानाह्वयाप्येवं दशज्ञानमयी त्वसौ ॥[3]

प्रतिभानप्रतिसंविदपि सर्वासु भूमिषु दशज्ञानमयी ।

[तत्र]

[516] [कामे ध्यानेषु धर्माख्या](6) तदन्या त्वाद्यकामयोः ।[४]

धर्मप्रतिसंवित् कामधातौ चतुर्षु ध्यानेषु निरुक्तिप्रतिसंवित् कामधातौ प्रथमे च ध्याने ।

संवृतिज्ञानमय्यौ तु द्वे एते प्रतिसंविदौ ॥

उभे अप्येते संवृतिज्ञानस्वभावे धर्मनिरुक्तिप्रतिसंविदाविति ॥

अभिधर्मदीपे विभाषाप्रभायां वृत्तौ सप्तमस्याध्यायस्य तृतीयः(8) पादः समाप्तः ॥

* * *

बुद्धवचनं शब्दविद्या हेतुविद्या च पूर्वप्रयोगौ यथाक्रमम् । नाप्येतेष्वकृतकौशलस्ता उत्पादयितुं शक्नोतीति बुद्धवचनमेव तु सर्वासां प्रयोगं वर्णयन्ति । यस्य चैका तस्यावश्यं चतस्रः प्रतिसंविदो भवन्ति । *Akb*. 40 b.—यथाक्रममिति धर्मप्रतिसंविदो गणितं पूर्वप्रयोगः । अर्थप्रतिसंविदो बुद्धवचनम् । निरुक्तिप्रतिसंविदः शब्दविद्या । प्रतिभानप्रतिसंविदो हेतुविद्येति । 'बुद्धवचनमेव' इति **वैभाषिकाः** । *Sakv*. p. 653.

[१] Cf. ये चैते उपदिष्टा अरणादयो गुणाः

षडेते प्रान्तकोटिकाः ।

प्रान्तकोटिकध्यानबलेनैषां लाभः ।

तत् षड्विधं ध्यानमन्त्यं सर्वभूम्यनुलोमितम् ।
वृद्धिकाष्ठागतं तच्च बुद्धान्यस्य प्रयोगजाः ॥ *Ak*. VII. 40 d and 41.

See *LVPAk*. VII. p. 97.

[२] See *Paṭisambhidākathā*, *Kv*. v. 5.

[३] Cf. वाङ्मार्गालम्बना चासौ नव ज्ञानानि सर्वभूः ।
दश षड् वार्थसंवित् सा सर्वत्रान्ये तु सांवृतम् ॥ *Ak*. VII. 39.

[४] Cf. कामध्यानेषु धर्मे वित् वाचि प्रथमकामयोः ।
विकलाभिर्न तल्लाभी षडेते प्रान्तकोटिकाः ॥ *Ak*. VII. 40.

सप्तमाध्याये

चतुर्थपादः ।

पृथग्जनसाधारणाः इदानीमभिज्ञादयो गुणा वक्तव्याः । त इम उच्यन्ते—

[517] रि(ऋ)द्धौ श्रोत्रेऽन्यचित्ते प्राग्भावे च्युत्युदये क्षये ।
ज्ञानसाक्षात्क्रियाऽभिज्ञा षड्वा धी[:] मुक्तिवर्त्मनि ॥[१]

ज्ञानसाक्षात्क्रिया खलु विमुक्तिमार्गसंगृहीताऽभिज्ञेत्युच्यते । केषां पुनर्गुणानां ज्ञानसाक्षात्क्रिया ? तदप(8)दिश्यते । रि(ऋ)द्धिपाददिव्यश्रोत्रचेतःपर्यायपूर्वेनिवासानुस्मृतिच्युत्युपपादास्रवक्षयज्ञानानां या ज्ञानसाक्षात्क्रिया साऽभिज्ञा । अभिजानातीत्यभिज्ञायते वा तयेति अभिज्ञा ।

कस्मात्पुनर्विमुक्तिमार्गा ये(ए)वाभिज्ञा श्रामन्य(ण्य)फलवत्[२] [[न] आनन्तर्य]मार्गस्वभावाः ? परचित्तज्ञानस्यानन्तर्यमार्गप्रतिषेधादर्हतश्चास्रव(9)क्षयानन्तर्यमार्गत्यागे कस्यचिन्निरभिज्ञत्वप्रसंगात् ॥

आसां पुनः

---

[१] Cf. ऋद्धिश्रोत्रमनःपूर्वजन्मच्युत्युदयक्षये ।
ज्ञानं साक्षात्क्रियाभिज्ञा षड्विधा मुक्तिमार्गधीः ॥ *Ak.* VII. 42.

षडभिज्ञाः । ऋद्धिविषयज्ञानसाक्षात्क्रिया, दिव्यश्रोत्रचेतःपर्यायपूर्वेनिवासच्युत्युपपाद–आस्रवक्षयज्ञानसाक्षात्क्रियाऽभिज्ञाः । *Sakv*. p. 654. Yaśomitra gives full details.

Cf. सो एवं समाहिते चित्ते परिसुद्धे परियोदाते अनङ्गणे विगतूपक्किलेसे मुदुभूते कम्मनिये ठिते आनेञ्जप्पत्ते इद्धिविधाय चित्तं अभिनीहरति···सो अनेकविहितं इद्धिविधं पच्चनुभोति··· ।···सो दिब्बाय सोतधातुया विसुद्धाय अतिक्कन्तमानुसिकाय उभो सद्दे सुणाति, दिब्बे च मानुसे च, ये दूरे सन्तिके च ।···चेतोपरियञाणाय चित्तं अभिनीहरति··· सो परसत्तानं परपुग्गलानं चेतसा चेतो परिच्च पजानाति··· ।···पुब्बेनिवासानुस्सतिञाणाय चित्तं अभिनीहरति···सो अनेकविहितं पुब्बेनिवासं अनुस्सरति··· ।···चुतूपपातञाणाय चित्तं अभिनीहरति ···। आसवानं खयञाणाय चित्तं अभिनीहरति ।··· *Dīgha*, II. 87—97. See *M. sutta* 6; *Vm*. Chapters XII and XIII.

[२] **श्रामण्यफलवदिति ।** यथा संस्कृतं श्रामण्यफलं विमुक्तिमार्गस्वभावम् । तद्वत् । *Sakv*. p. 655.

[518] चतस्रः संवृतिज्ञानं पञ्च ज्ञानानि चित्तधीः ।
सर्वास्रवक्षयाभिज्ञा षड्ज्ञानान्यथवा दश ॥[१]

चेतःपर्यायास्रवक्षयाभिज्ञे हित्वा। चेतःपर्यायाभिज्ञा पञ्चज्ञानानि धर्मान्वयमार्ग[संवृतिपर]चित्तज्ञानानि। आस्रवक्षयज्ञानसाक्षात्क्रियाऽभिज्ञा षड्ज्ञाना[VIII. B, 3. Fol. 143 a.](1)नि दश वा परचित्तदुःखसमुदयमार्गज्ञानानि हित्वा 'अथवा दशे'ति ॥

[519] षष्ठी सर्वत्र पञ्चान्या मौलीषु ध्यानभूमिषु ।[२]

आस्रवक्षयज्ञानसाक्षात्क्रिया सर्वासु भूमिषु। शेषा मौलीषु चतसृषु ध्यानभूष्विति ।

यत्नवैराग्यतो लभ्याः स्वभूम्यधरगोचराः ॥[३]

सर्वाः [अभिज्ञाः] यत्नतो लभ्यन्ते वैराग्य(2)तश्च। तत्रानुचिता यत्नतः। उचिता वैराग्यतः। जन्मान्तराभ्यस्ताः खल्वभिज्ञा वैराग्यतो लभ्यन्ते। वैशेषिक्यो यत्नतः। 'स्वभूम्यधरगोचरा'श्चैताः। रि(ऋ)द्ध्या स्वभूमिं गच्छत्यप(ध)रां च भूमिम्। निर्मितनिर्माणमप्येवम्। दिव्यश्रोत्राभिज्ञयापि स्वभूमिकमधो[भूमिकं] च शब्दं शृणोति। एवं परचित्तज्ञानं पूर्वेनिवासानुस्मृतिज्ञानं च। (3)च्युत्युपपादाभिज्ञया च स्वाधोभूमिविषयं रूपं जानाति ॥

कतमा पुनरासां कति स्मृत्युपस्थानानि ?

[520] स्मृत्युपस्थितयस्तिस्र श्चेतःपर्यायधीर्मता ।
ऋद्धिश्रोत्राद्यभिज्ञास्तु प्रथमा स्मृत्युपस्थितिः ॥[४]

परचित्ताभिज्ञा त्रीणि स्मृत्युपस्थानानि कायस्मृत्युपस्थानं हित्वा। चित्तचैत्तालम्बना खल्वेषा। ऋद्धिश्रोत्रचक्षुरभिज्ञाः काय(4)स्मृत्युपस्थानं रूपालम्बनत्वात्। ऋद्धिः खलु चतुर्बाह्यायतनालम्बना। दिव्यश्रोत्रचक्षुषी यथाक्रमं शब्दरूपायतनालम्बने ।

---

[१] Cf. चतस्रः संवृतिज्ञानं चेतसि ज्ञानपञ्चकम् ।
क्षयाभिज्ञा बले यद्वत् *Ak*. VII. 43. abc.

[२] Cf. पञ्च ध्यानचतुष्टये ॥ *Ak*. VII. 43 d.

The Kośakāra discusses in detail :—पञ्चाभिज्ञाः चतुर्थध्यानभूमिकाः। कस्मादारूप्यभूमिका न सन्ति ?···*Akb*. VII. 43 d. See *LVPAk*. VII. pp. 102-3.

[३] Cf. स्वाधोभूविषयाः लभ्या उचितास्तु विरागतः। *Ak*. VII. 44 ab.

[४] Cf. तृतीया त्रीण्युपस्थानान्याद्यं श्रोत्रर्द्धिचक्षुषि ॥ *Ak*. VII. 44 cd.

कुशलादिभेदेन तु

[521] दिव्यमव्याकृतं श्रोत्रं नेत्रं चान्या शुभा मताः ।[१]

दिव्यश्रोत्रचक्षुषी किलाव्याकृते । तच्च न । अभिज्ञानां विमुक्तिमार्गस्वभा[व्याच्चक्षुःश्रोत्रविज्ञानयोश्चा]विकल्पत्वाद्विमुक्तिज्ञानानुत्प(5)त्तिः । चतुर्षु ध्यानेषु तु अस्ति प्रज्ञाविशेषः स्वभूमिकभूतफलो यत्संमुखीभावात्स्वभूमिकफलमेव चक्षुःश्रोत्रं संमुखीभावं गच्छति । यत्तच्चक्षुःश्रोत्रविज्ञानयोराश्रयी भवति तस्मान्न तद्विज्ञाने संप्रयुक्ता प्रज्ञाऽभिज्ञेति ।

कथं पुनरेतयोरभिज्ञाशब्दः ? तदुच्यते—

अभिज्ञाफलताऽभिज्ञा [मनोविज्ञानप्रज्ञया] ॥

अभिज्ञाफलमा(6)(म)त्राभिज्ञाशब्देनोक्तम् । मनोविज्ञानसंप्रयुक्तया तु प्रज्ञयाऽभिजानातीति । सैवाभिज्ञा निरूपकत्वात् ।[२]

कति पुनरासां विद्या ?

[522] तिस्रो विद्या[३] मतास्त्र्यध्वस(सं)मोहादिव्युदस्तये ।
एका स्वभावतोऽशैक्षी द्वे त्वशैक्षाश्रयोदयात् ॥[४]

पूर्वणि(नि)वासच्युत्युपपादास्रवक्षयज्ञानतत्साक्षा[त्]त्क्रियास्तिस्रः खल्वशैक्ष्यो [विद्या उच्यन्ते । कस्मादेता एव ? एत] (6)एव तिस्रो विद्याः यस्मादाभिरविद्यात्रयं विनिवर्तते । पूर्वेनिवासाभिज्ञा[ज्ञया] पूर्वान्तसंमोहः निवर्तते । च्युत्युपपादाभिज्ञया त्वपरान्तसंमोहो निवर्तते । आस्रवक्षयाभिज्ञया मध्याध्वसंमोहः ।[५]

---

[१] Cf. अव्याकृते श्रोत्रचक्षुरभिज्ञे इतरे शुभाः । *Ak.* VII. 45 ab.

[२] See *abhiññā*, *PTSD*.

[३] तिस्सो विज्जा । पुब्बेनिवासानुस्सतिञाणं विज्जा, सत्तानं चुतूपपातञाणं विज्जा, आसवानं खये ञाणं विज्जा । *Dīgha*, XXXIII. 1. 10. See *Vm*. VII. 30.

[४] Cf. तिस्रो विद्या अविद्यायाः पूर्वान्तादौ निवर्तनात् । *Ak*. VII. 45 cd.

पूर्वेनिवासच्युत्युपपादास्रवक्षयज्ञानसाक्षात्क्रियाः तिस्रः अशैक्ष्यो विद्या उच्यन्ते । एतानि हि पूर्वापरन्तमध्यसंमोहं व्यावर्तयन्ति यथाक्रमम् । *Akb*. VII. 45 cd.

[५] This view is identical with the view of Āchārya Saṁghabhadra as quoted and supported of Yaśomitra :—

'पूर्वान्तादौ निवर्तनात्' यावद्यथाक्रममिति । भगवद्विशेषादयस्तावदाहुः––'पूर्वान्तसंम्मोहं' पूर्वे निवासानुस्मृत्या 'निवर्तयति' । चुत्युपपादाभिज्ञया 'मध्यसंमोहम्' ।

यद्यपि च तिस्रोऽप्यशैक्षास्तथापि 'एका स्वभावतोऽशैक्षी द्वे त्वशैक्षाश्रयोदयात्'। अन्त्या वाऽशैक्षी स्वभावतः सन्तानतश्च। आद्ये (8)द्वे त्वशैक्षसन्तानादशैक्षावित्युच्यन्ते ॥[१]

कति पुनरासां प्रातिहार्याणि ?[२]

[523] रि(ऋ)द्धिचित्तत्रयाभिज्ञा प्रतिहार्यत्रयं स्मृतम् ।
हरतो द्वे कुशास्तृभ्यो मारेभ्यो हरते परम् ॥[३]

ऋद्ध्यादेशनाप्रातिहार्ये खलु कुशास्तृभ्यः कपिलोलूकाक्षपादादिभ्यो विनेयजनचित्तमपहृत्य बुद्धे भगवति परमार्थशास्तरि संनियोजयतः। अनुशा(4)सनाप्रतिहार्यं मारेभ्योऽपहृत्य सर्वज्ञे मार्गदेशिके प्रवरे प्रतिष्ठापयति ॥

का पुनरियमृद्धिः ?[४]

[524] समाधिरृ(धी ऋ)द्धिरित्युक्ता फलमैश्वर्यमष्टधा ।[५]
द्विधैतद्गतिनिर्माणे त्रिविधा गतिरिष्यते ॥

आस्रवक्षयाभिज्ञया 'अपरान्तसंमोहम्'। नापरमस्माद्भवं प्रजानामीति तेषां व्याख्यानकाराणामभिप्रायः। अतीतः प्रत्युत्पन्नोऽनागतोऽध्वेत्यध्वानुक्रमः। तस्मादेवमर्थगतिरिति।

आचार्यसंघभद्रस्तु व्याचष्टे—पूर्वान्तादौ निवर्तनात्।' पूर्वेनिवासाभिज्ञा हि पूर्वान्तसंमोहं व्यावर्तयति। **अपरान्तसंमोहं च्युत्युपपादाभिज्ञा**। मध्यसंमोहं आस्रवक्षयाभिज्ञा। इत्यतस्तिस्रणामेव विद्यात्वम्। पूर्वयाऽत्मपरविपद्दर्शनात् संवेगोत्पत्तेः। परया परेषामेव। तथा संविग्नस्य भूतार्थावगमात् तृतीयेति। किमत्र प्रतिपत्तव्यम्? **आचार्यसंघभद्रव्याख्यानमेव युक्तरूपं पश्यामः**। आचार्यस्यापि तथैवाभिप्रायो लक्ष्यते। तथा हि पूर्वेनिवासच्युत्युपपादास्रवक्षयज्ञानसाक्षात्क्रियास्तिस्र इत्युक्त्वा आह—'एते हि पूर्वापरान्तमध्यसंमोहं व्यावर्तयन्ति यथाक्रमम्' इति। *Sdkv.* pp. 657-8.

[१] Cf. **अशैक्षान्त्या तदाख्ये द्वे तत्सन्तानसमुद्भवात् ।**
इष्टे शैक्ष्यस्य नोक्ते तु विद्ये साविद्यसन्ततेः ॥ Cf. *Ak.* VII. 46.

[२] विनेयमनसामादितो अत्यर्थं हरणात् प्रातिहार्याणि प्रतिशब्दयोरादिकर्मभृशार्थत्वात्। प्रतिहतमध्यस्थानं मनांस्येभिः प्रतिहरन्तीति प्रातिहार्याणि वा। *Akb.* VII. 47. See *Vm.* XII. 84. **तीणि पाटिहारियानि। इद्धिपाटिहारियं, आदेसनापाटिहारियं, अनुसासनिपाटिहारियं।** *Digha* XXXIII. 1-10. See *Kevaḍḍhasutta*, *Digha*, VI.

[३] Cf. **आद्या तृतीया षष्ठी च प्रतिहार्याणि शासनम् ।**
अग्र्यमव्यभिचारित्वाद्धितेष्टफलयोजनात् ॥ *Ak.* VII. 47.

[४] V. supra, p. 359, n. 2.

[५] Cf. केयमृद्धिः? **वैभाषिकनयेन**
ऋद्धिः समाधिर्गमनं निर्माणं च गतिस्त्रिधा । *Ak.* VII. 48 ab.

ऋद्धिः खलु समाधिरूपा[1] तत्फलत्वात्तु प्रातिहार्यमृद्धिरत्युक्तं सूत्रे । अङ्गपरिगृहीते समाधौ सति सर्वमेतत्प्रातिहार्य[VIII. 3. Fol. 143 b.]मृद्ध्यति । तस्मात्समाधिरेव रि(ऋ)द्धिः ।[1] तस्याः फलमष्टगुणमैश्वर्यमनि(णि)मादि ।[2]

---

[1] **ऋद्धिपादाः समाधयः ।** *Ak.* vi. 69d. While dealing with the *samādhi* and *riddhipādas*, the Kosakāra initiates a controversy : **समाधिः कस्मात् ऋद्धिपाद उक्तः ?** तत्प्रतिष्ठितत्वात् सर्वंगुणसंपत्तेः । **ये त्वाहुः 'समाधिरेवर्द्धिः पादास्तु च्छन्दादयः"** इति । तेषां द्रव्यतस्त्रयो एव बोधिपक्ष्याः प्राप्नुवन्ति । च्छन्दचित्तयोराधिक्यात् । सूत्रं च विरुध्यते—"ऋद्धिं वो भिक्षवे देशयिष्यामि ऋद्धिपादांश्च यावद् ऋद्धिः कतमा ? इह भिक्षुरनेकविधमृद्धिविषयं प्रत्यनुभवति । एको भूत्वा बहुधा भवती"ति विस्तरः *Akb.* vii. 69 d. Yasomitra gives the following comment— **ऋद्धिपादाः समाधय इति कुत एतत् ? सूत्रात् ।** उक्तं हि छन्दं चापि भिक्षवो भिक्षुरधिपतिं कृत्वा लभते समाधिम् । सोऽस्य भवति छन्दसमाधिः । चित्तं वीर्यं मीमांसां चापि भिक्षवो भिक्षुरधिपतिं कृत्वा लभते समाधिं । सोऽस्य भवति मीमांसासामाधिरिति ।···

ये त्वाहुः समाधिरेवर्द्धिः पादास्तु च्छन्दादयः । तेषामेवंवादिनां **वैभाषिकाणां···।** "एको भूत्वा बहुधा भवति···यावद् ब्रह्मलोकं कायेन वशे वर्तयत" इति । **इयमुच्यते ऋद्धिः । ऋद्धिपादाः** कतमे ? **छन्दसमाधिः । वीर्यसमाधिः । चित्तसमाधिः । मीमांसासमाधिः । इम उच्यन्ते ऋद्धिपादाः" इति ।** एवं लक्षणः **समाधिः । तस्मान्न समाधिरेवर्द्धिः** इति ।

अत्राचार्यसंघभद्र आह । न भवत्येष तेषां दोषः । समाधिं हि ते ऋद्धिपादमिच्छन्ति । ऋद्धिरपीति । छन्दादयस्तूच्यन्ते समाधेश्चतुत्वज्ञापनार्थम् । कश्चिद्धि समाधिः कुशलमूलप्रयोगावस्थायां प्रधानीभवति । कस्चित् कुशलमूलनिष्पन्नावस्थाम् । पूर्वोत्र ऋद्धिपादः । उत्तरर्धिरिति । सूत्रविरोधोऽपि चैषां न भवति । ऋद्धिफलं ऋद्धिशब्देनोक्तम् । प्रज्ञाफलस्य तच्छब्दाभिधानत्वादित्यादि । *Sakv.* p. 602.

See *Vm.* xii. 50-55, *Paṭisambhidā*, vol. ii. pp. 205-6.

[2] तत्रा**णिमा** भवत्यणुः । **लघिमा** लघुर्भवति । **महिमा** महान्भवति । **प्राप्तिर**ङ्गुल्यग्रेणापि स्पृशति चन्द्रमसम् । **प्राकाम्यम्** इच्छानभिघातः भूमावुन्मज्जति निमज्जति यथोदके । **वशित्वं** भूतभौतिकेषु वशी भवत्यवश्यश्चान्येषाम् । **ईशितृत्वं** तेषां प्रभवाप्ययव्यूहानामीष्टे । **यत्र कामावसायित्वं सत्यसंकल्पता** यथा संकल्पस्तथा भूतप्रकृतीनामवस्थानम् । **···एतान्यष्टावैश्वर्याणि ।** *Yogabhāshya*, iii. 45.

Also see, **अणिमा लघिमा**दिकं वा लोकियसम्मतं··· *Vm.* v. 61.—**अणिमालघि**मादिकं ति आदिसद्देन **महिमा पत्ति पाकम्मं ईसिता यत्थकामावसायिता** ति इमे छपि सङ्गहीता···। *Vm T.* p. 210. D. Kosambi quotes the following verse :

गण्ठियम्पि वुत्तं—

"अणिमा महिमा लघिमा पत्ति पाकम्ममेव च ।
ईसितञ्च वसित्तञ्च यत्थकामावसायितंति ॥ *Vm. Dīpikā*, vii. 61.

यच्च सूत्रेऽपदिष्टमेकानेकयथेच्छितरूपावस्थानादिस्तत्पुनरेतदृद्धिफलं[१] द्विविधं गतिश्च निर्माणं च । गतिरपि त्रिविधा । तत्र

[525] मनोमयी गति[ः] शास्तुरिच्छामात्रप्रवृत्तितः ।
अधिमोक्तकृताऽन्येषां ततो देहाभिवाहिनी ॥[२]

मनोजवाः[३] खलु ऋद्धिर्बुद्धस्यैव । म(2)नस इव जवस्तस्याः । यावता कालेन चक्षुर्विज्ञानं नीलं प्रतिपद्यते यावता कालेन भगवाञ्छरीरेण सर्वलोकान्तराणि व्याप्नोत्यनन्तर्द्धिशरीरा हि बुद्धा भगवन्तो[ऽ]नाभोगेन यथेच्छिताभिप्रायसिद्धेः भगवतो बुद्धस्य । श्रावकादीनां पुनः शरीरवाहिनी गतिर्भवति (3)यथा देवानां पक्षिणां वा । आधिमोक्षिकी च दूरमप्यासन्नमधिमुच्यास्तगमनं संपद्यते । बाहुप्रसारणमात्रेण सुमेरुमूर्द्धनि प्रादुर्भवति ।[४] व्याख्यातं समाधिफलम् ॥

गमनं निर्माणमिदानीं वक्तव्यम् । त[द्] द्विविधं कामावचरं रूपावचरं च । तत्र तावत्—

[526] रूपगन्धरसस्पर्शाः कामे निर्माणमिष्यते ।
रूपस्पर्शौ मतौ रूपे स्वे(4)शरीरेऽथ वा बहिः ॥[५]

कामावचरं खलु बाह्यमायतनचतुष्टयं निर्मीयते । नान्यदीश्वरकर्तृत्ववादाभ्युपगमप्रसंगात् । रूपावचरं त्वायतनद्वयं तत्र गन्धरसाभावात् । तत्पुनरेतत् स्वशरीरे परशरीरे च द्रष्टव्यम् । एतच्चतुर्विधं निर्माणं कामधातावेवं रूपधातौ द्रष्टव्यम् । इत्यष्ट[विधं निर्माणम्] ।[६]

[किं खलु नि(5)र्माणम]भिज्ञया निर्मीयते ? किं तर्हि ?

---

[१] "कतमादस इद्धियो ? ···अधिट्ठाना इद्धि, विकुब्बना इद्धि, मनोमया इद्धि, ञाणविप्फारा इद्धि, समाधिविप्फारा इद्धि, अरिया इद्धि कम्मविपाकजा इद्धि, पुञ्ञवतो इद्धि, विज्जामया इद्धि, तत्थ तत्थ सम्मापयोगपच्चया इज्झनट्ठेन इद्धी" ति—*Paṭisaṁbhidā*, vol. II. p. 205.

[२] Cf. शास्तुर्मनोजवाऽन्येषां वाहिन्यप्याधिमोक्षिकी । *Ak*. VII. 48cd.

[३] V. supra, p. 37.

[४] See *LVPAk*. VII. p. 113, n. 2.

[५] Cf. कामाप्तं निर्मितं बाह्यं चतुरायतनं द्विधा । रूपाप्तं द्वे तु *Ak*. VII. 49.

[६] See *Yogasūtra*, IV. 4-5.

[527] अभिज्ञाफलचित्तेन तत्तानि तु चतुर्दश ।[1]
आद्यध्यानफलं द्वे ते(तै)रूर्ध्वभूम्येकवृद्धितः ॥

प्रथमध्यानफले खलु निर्माणचित्ते कामावचरं प्रथमध्यानभूमिकं च, द्वितीयध्यानफलानि त्रीणि, तृतीयध्यानफलानि चत्वारि, चतुर्थध्यानफलानि पञ्च ॥

कथं पुनर्निर्माणचित्तानि लभ्यन्ते ?

[528] (6)तल्लाभो ध्यानव[त्] ज्ञेयः

यथा खलु ध्यानानि वैराग्यत उपपत्तितः प्रयोगतश्च लभ्यन्ते तथा निर्माणचित्तानि ।

कथं पुनस्तदुत्पद्यते ?

शुद्धकाच्च स्वतश्च तत् ।[2]

शुद्धकाद् ध्यानादनन्तरं णि(नि)र्मान(ण)चित्तमुत्पाद्यते निर्माणचित्तादेव वा नान्यतः । ततः खल्वपि निर्माणचित्तादनन्तरं शुद्धकध्यानं निर्माणचित्तं चोत्प(7)द्यते नान्यत् । सर्वस्य च निर्मितस्य

स्वभूमेनैव निर्माणमप(ध)रेणापि भाषणम् ॥[3]

न खल्वन्यभूमिकं निर्माणमन्यभूमिकेन निर्माणचित्तेन निर्मीयते । भाषणं तु स्वभौमेनाप(ध)रभौमेन च । कामधातुप्रथमध्यानभूमिको हि निर्मितः स्वभूमिकेनैव चित्तेन भाष्य(ष)ते । ऊर्ध्वभूमिकास्तु प्रथमध्यानभूमिकेन, तत्रैव (8)विज्ञप्तिसमुत्थापकचित्तसद्भावात् ॥

किं पुनर्निर्मितनिर्मात्रोः क्रमेन(ण) वाग्भाषणं भवत्यथ युगपत् ? तदुच्यते—

[529] निर्मात्रैव सहैतेषां भाषणं सुगताद्दते ।[4]

---

[१] Cf. निर्माणचित्तैस्तानि चतुर्दश । *Ak.* VII 49 d.

[२] Cf. यथाक्रमं ध्यानफलं द्वे यावत्पञ्च नोर्ध्वजम् ।
तल्लाभो ध्यानवच्छुद्धात् तास्वतश्च ततोऽपि ते ॥ *Ak.* VII. 50.

[३] Cf. स्वभूमिकेन निर्माणं भाषणं त्वधरेण च । *Ak.* VII 51 ab.

[४] Cf. निर्मात्रैव सहाशास्तुः । *Ak.* VII. 51 c.

उक्तं हि

"एकस्य भाषमाणस्य सर्वे भाषन्ति निर्मिताः।
एकस्य तूष्णीं भूतस्य सर्वे तूष्णीं भवन्ति ते ॥"[१]

भगवतस्तु इच्छातः पूर्वं पश्चाद्युगपद्वा निर्मिता भाषन्ते। तेषां(4) पुनः

एकस्य ब्रुवतः सर्वे निर्मिता ब्रुवते समम् ॥

[530] अधिष्ठाय तु निर्माणं भाषन्तेऽन्येन चेतसा।[२]

'अधिष्ठाय तु निर्माणं' संस्थाप्येत्यर्थः। अन्येन चेतसा विज्ञप्तिसमुत्पादकाख्येन वाचं प्रवर्तयतीत्यतोऽपि नास्ति निर्माणान्तर्धाणो(नो) दोषः। तत्पुनरेतदधिष्ठानं न केवलं जीवत एव। किं तर्हि ?

अधिष्ठानं मृतस्यापि [VIII B. 4. Fol. 144 a]
(1)स्थिरस्यैव तु वस्तुनः ॥[३]

आर्यमहाकाश्यपाधिष्ठानेन तदस्थिशंकलावस्थानश्रवणात् स्थिरस्यास्थिलक्षणस्य न मांसरुधिरादीनामस्ति ॥

किं पुनरेकचित्तेनैकं निर्मितं निर्मिणोत्यथ बहून् ?

[531] अजय्येकमनेकेन जयिणस्तद्विपर्ययः।[४]

आद्याभिनिर्हारैर्बहुभिर्निर्माणचित्तैरेकं सोपादानं च निर्मितं निर्मिणोति।

---

[१] Quoted in *Akb*. VII. 57 c.

Cf. एकस्मिं भासमानस्मिं सब्बे भासन्ति निम्मिता ।
एकस्मिं तुण्हीमासीने सब्बे तुण्ही भवन्ति ते ॥ *Dīgha*, XVIII. 21. See *LVPAk*. VII p. 118. n. 3.

[२] Cf. अधिष्ठायान्यवर्तनात् । *Ak*. VII. 51 d.

[३] Cf. मृतस्याप्यस्त्यधिष्ठानं नास्थिरस्यापरे तु न । *Ak*. VII. 52 ab.

—आर्यमहाकाश्यपाधिष्ठानेन तदस्थिशंकलावस्थानात् । तत्तु 'नास्थिरस्य' । आर्यकाश्यपेन तु मांसादीनामधिष्ठानात् ।···अपरे पुनराहुर्नास्ति मृतस्याधिष्ठानम् । अस्थिशंकलावस्थानं तु देवतानुभावादिति । *Akb*. VII. 52 ab.

Cf. मैत्रेयः···काश्यपस्य भिक्षोरविकोपितमस्थिसंघातं दक्षिणेन पाणिना गृहीत्वा··· *Divyāvadāna*, 61. See *LVPAk*. VII. p. 120, n. 1.

[४] Cf. आदावेकमनेकेन जितायां तु विपर्ययात । *Ak*. VI 52 cd.

जितायां त्व(2)भिज्ञायां निर्मातुरिच्छया बहूनप्येकचित्तेन निरूपादानमपि च निर्मिनो(णो)ति ।

तत्पुनरेतन्निर्माणचित्तं द्विविधं भावनामयमुपपत्तिप्रातिलम्भिकञ्च । तत्र

अव्याकृतमभिज्ञोत्थं उपपत्त्य त्वयं त्रिधा ॥[१]

यत्खलु भावनाफलं निर्माणचित्तं तदव्याकृतं भवति । उपपत्तिप्रातिलम्भिकं तु कुशलादि[ना] त्रिप्रकारम् । [तदुपपत्तिफलं] (3)दशातिशययुक्तम्[२] ।

[532] अर्हतां दशधा त्वेतदैश्वर्यमुपपद्यते ।
सर्वास्रवक्षयज्ञानविमुक्तिद्वययोगतः ॥

यदेतदणिमादिशैक्षान्तं[३] दशविधमैश्वर्यसुखं तदतिशययुक्तमर्हतामेवोपपद्यते ॥

यदि तर्हि त्रयाणामर्हतामेतदैश्वर्यं समानमस्ति कस्तर्हि विशेषः शास्तृशिष्ययोः ?[४] तत्रेदमुपदिश्यते—

[533] ऐश्वर्ये[पि स](4)मानेस्मिन्यथोक्ते शास्तृशिष्ययोः ।
अन्तरं सुमहच्छास्तुर्यत्तत्पूर्वमुदाहृतम् ॥

दशबलाद्यावेणिकबुद्धगुणचिन्तायां चतुष्प्रत्ययता नद्युत्तरणे गन्धहस्त्यश्वशशकदृष्टान्तैश्च विशेषान्तरं बोद्धव्यमिति ॥

अभिधर्मप्रदीपे[५]विभाषाप्रभायां वृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्च ज्ञानविभागो नाम (5)सप्तमोऽध्यायः ॥

---

[१] Cf. अव्याकृतं भावनाजं त्रिविधं तूपपत्तिजम् । *Ak.* VII. 53 ab.

[२] The eight *aiśwaryas*, (V. supra, p. 399, n. 2) the *āsravakshaya-jñāna* and *vimukti-jñāna*.

[३] V. supra, p. 339, n. 2.

[४] The Kośakāra does not discuss this point, but instead devotes three *kārikās* (*Akb.* VII. 53cd to 56) dealing with the following :—(१) पञ्चविधा ऋद्धिः । (२) दिव्यश्रोतं दिव्यचक्षुश्च । (३) किमुद्धिरेवोपपत्तिलाभिका भवत्यथान्यदपि ? (४) चेतोज्ञानम् ।

[५] V. supra, p. 347, n. 1.

अष्टमोऽध्यायः ।

प्रथमः पादः ।

व्याख्याता हि विस्तरशो विदर्शना। शमथ इदानीं वक्तव्यः। स खल्वेष शमथश्चतुर्थध्या[ना]रूप्यसंगृहीतः। तत्र तु

[534] साङ्गा चित्तस्थितिर्ध्यानं तच्चतुर्धाऽङ्गभेदतः ।[१]

शमथः खलु साङ्गा कुशला चित्तैकाग्रता ध्यानमित्युच्यते ।[२] यस्य खलु धर्मस्याङ्गपरिगृहीततो(स्यो ?)द्रेका[त्] चित्तचैत्तान्यालम्ब(6)नान्तरं न प्रतिपद्यन्ते स धर्मश्चैतसिकः समाधि[3]रित्याख्यायते। तदङ्गभेदेन चतुर्विधमिति वक्ष्यामः। तस्यां पुनश्चित्तस्थितौ

ध्यानोक्तिराङ्गसी तत्र भाक्ती तत्सहभूष्वपि ॥[४]

---

[१] Cf. **द्विधा ध्यानानि चत्वारि प्रोक्तास्तदुपपत्तयः ।
समापत्तिः शुभैकाग्र्यं** *Ak.* VIII. 1 abc.

[२] The Kośakāra discusses this point in detail :—केयमेकाग्रता नाम ? एकालम्बनता। एवं तर्हि चित्तान्येवैकालम्बनानि समाधिर्न चैतसिकं धर्मान्तरमिति प्राप्नोति। न चित्तान्येव समाधिः। येन तु तान्येकाग्रा वर्तन्ते स धर्मः समाधिः। सैव चित्तैकाग्रता। ननु च क्षणिकत्वात्सर्वं चित्तमेकाग्रं द्वितीयस्य तस्मादविक्षेपादिति चेत् : संप्रयुक्ते समाधिवैयर्थ्यम् । यत एव च समाधिस्तत एव चित्तानामेकालम्बनत्वं किन्नेष्यते ? महाभूमिकत्वान्न समाधेः सर्वचित्तानामेकाग्रताप्रसंगः । न। दुर्बलत्वात्समाधेः। चित्तान्येवैकाग्राणि समाधिः। तथा ह्यधिचित्तं शिक्षा चित्तपरिशुद्धिप्रधानं च **सूत्रे** चत्वारि ध्यानान्युक्तानीत्यपरे। *Akb.* VIII. 1.—**वैभाषिक** आह 'न चित्तान्येव समाधिः, येन तु तान्येकाग्राणि वर्तन्ते···स धर्मः समाधिः।' यथा **वैशेषिकनये** शुक्लगुणयोगाच्छुक्लः पटः। स एव गुणोऽस्य शुक्लमित्युच्यते तद्वत् ।···*Sakv.* p. 663. See *LVPAk.* VIII. pp. 129. ff.

[३] Cf. या खो आवुसो विसाख **चित्तस्सेकग्गता अयं समाधि,** चत्तारो सम्मप्पधाना समाधिपरिक्खारा, या तेसं धम्मानं आसेवना···अयं तत्थ समाधिभावना ति। *M.sutta* 44. कुसलचित्तेकग्गता समाधि ।···एकारम्मणे चित्तचेतसिकानं समं सम्मा च आधानं। *Vm.* III. 3. See *Yoga-bhāshya* III. 11-12; I. 41 and *LVPAk.* VIII. p. 128, n. 3.

[४] Cf. **पञ्चस्कन्धास्तु सानुगम् ।** *Ak.* VIII. 1 d.

समाधिस्वभावं खलु परमार्थेण(न) ध्यानम्[१]। सपरिवारं तु गृह्यमानं(णं) पञ्चस्कन्धस्वभावम्। भक्तिकल्पनया [तत्सहभूष्वपि] धर्मेषु ताच्छब्द्यम् ॥

[535] सं(7)क्षेपादियमाख्याता ध्यानजातिश्चतुर्विधा ।

प्रथमं ध्यानं द्वितीयं तृतीयं चतुर्थमिति ।[२]

द्रव्यभेदानहं तस्याः प्रवक्ष्यामि यथागमम् ॥

द्रव्यभेदस्तु ध्यानजातेश्चतुर्विधायाः समापत्तिजातेश्च तावत्या एव समासेन वक्ष्यामि ॥

तत्र तावत् ।

[536] सहारूप्यचतुष्टेन समापत्तिर्मताष्टधा ।
[चतुः पञ्चेषु स्कन्धेषु][3][त](8)दुक्तेर्वर्गवृत्तितः ॥[४]

पञ्चस्कन्धेषु वर्गीभूतेषु ध्यानसमापत्तिः प्रज्ञाप्यते। चतु[ः]पञ्चेष्वारूप्यसमापत्तिरिति ॥

[537] भेदेन तु समापत्तिद्रव्यानि(णि) दश सप्त च ।
सामन्तकैः सहाष्टाभिर्ध्यानान्तरिकयाऽपि च ॥

अष्टाणां(नां) खलु समापत्तिभूमीनामष्टाणा(ना)मेव सामन्तकद्रव्याणां तत्प्रवेशोपायभूतानि ध्याना(9)न्तरिका च प्रथमध्यानसंगृहीता। एतानि खलु सप्तदश यथास्थौल्यं भिद्यमानानि सप्तदश भवन्तीत्यत आह—

[538] तद्भेदाः खल्विमेऽन्येपि वक्ष्यन्ते शास्त्रचोदिताः ।

---

[१] ध्यानमिति कोऽर्थः ? ध्यायन्त्यनेनेति । प्रजानन्तीत्यर्थः । चिन्तानार्थो हि एष धातुः । चिन्तनं च प्रज्ञेति सिद्धान्तः । एवं तर्हि सर्वसमाधिध्यानप्रसङ्गः ? न, प्रकर्षयुक्ते तन्नामविधानाद्भास्करवत् । कश्च प्रकर्षयुक्तः । योऽङ्गसमायुक्तः समाधिः ।···*Akb.* VIII. 1. See *Sakv.* pp. 664-5. आरम्मणूपनिज्झानतो पच्चनीकझापनतो वा झानं । *Vm.* IV. 119. On *jhāna* and *samādhi*, see *PTSD*.

[२] झानं ति चत्तारि झानानि । पठमं झानं दुतियं···ततियं···चतुत्थं झानं । *Vbh.* p. 342.

[3] The Ms. is erazed here.

[४] Cf. विचारप्रीतिसुखवत् पूर्वपूर्वांगवर्जितम् ।
तथाऽऽरूप्याश्चतुःस्कन्धाः अधोभूमिविवेकजाः ॥ *Ak.* VIII. 2.

अन्येऽपि खलु समापत्तिभेदास्तदन्तर्गता एव सूत्राभिधर्मोदिता वक्ष्यन्ते।

बुद्धबुद्धेस्तु ते सर्वे तत्त्वेनायान्ति गोचरम् ॥

भगवानेब हि [VIII. A, 4. Fol. 144 b.](1)सर्वप्रथमध्यानसमापत्त्यादिभेदेषु, अनन्तस्वभावप्रभावक्रियाफलेष्वरोक्षबुद्धिवृद्धि(त्ति)रिति ॥

[१]त एते ध्यानारूप्यास्त्रिप्रकाराः कथम्? तदारभ्यते—

[539] त्रिधा ध्यानानि मौलानि सास्वादादिप्रभेदतः ।
तथैव त्रय आरूप्या भवाग्रं तु द्विधा मतम् ॥[२]

तत्र मौलानि तावद् ध्यानानि त्रैविध्यान्यास्वादनासंप्रयुक्तशुद्धकानास्र(2)वभेदात्। एवं त्रयो मौला आरूप्याः। भवाग्रं तु नास्त्यनास्रवम्[3]। कामधातोर्भवाग्रस्य च भवमूलत्वात् ॥

[540] सामन्तानि द्विधा सप्त प्रथमं तु त्रिधा मतम् ।
ध्यानान्तरं त्रिधा तद्वदक्लिष्टं त्वधराश्रयम् ॥

प्रथमध्यानसामन्तं[४] हित्वाऽन्यानि सप्त सामन्तानि द्विपकाराण्य(एय)न्यत्रानास्रवात्। प्रथमध्यानसामन्तकं तु त्रिप्रकारम्। केचित्तु आस्वाद(3)नासंप्रयुक्तं नेच्छन्ति। तद्वद् ध्यानान्तरिका त्रिधेति वर्तते। यत्तत्राक्लिष्टं तदधराश्रयं द्रव्यमिति ॥

किं पुनरेषामास्वादनादिसंप्रयुक्तानां त्रयाणां लक्षणम्? उच्यते—

[541] आस्वादवत्सतृष्णं यच्छुद्धकं लौकिकं मतम् ।
अदो(धो ?)ध्वस्तं तदास्वाद्यमतिलोकमनास्रवम् ॥[५]

---

[१] The Kośakāra here deals with the *Arūpa-dhyāna*. (*Ak.* VIII. 2-4.) V. infra, *Adv. karikās* 551—553.

[२] Cf. इति मौलं समापत्तिद्रव्यमष्टविधं त्रिधा ।
सप्तास्वादनवच्छुद्धानास्रवाण्यष्टमं द्विधा ॥ *Ak.* VIII. 5.

[3] [भवाग्रं] अनास्रवं नास्तीति संज्ञामांद्यात् । *Sakv.* p. 671.

[४] समान्तकं समीपस्थम् । *Sakv.* p. 57.

[५] Cf. आस्वादनासंप्रयुक्तं सतृष्णं लौकिकं शुभम् ।
शुद्धकं तत्तदास्वाद्यं लोकोत्तरमनास्रवम् ॥ *Ak.* VIII. 6.

यत्खलु सतृष्णं तदास्वादनासंप्रयुक्तमित्युच्यते।[१] तृष्णाया आ[स्वादप(4)]र्यायत्वात्। यत्तु न संप्रयुक्तं तदपि तृष्णासहगतत्वादास्वादवदित्युच्यते तृष्णयैकफलत्वात्। यत्तु सास्रवं कुशलं समापत्तिद्रव्यं तच्छुद्धकमाख्यायते। क्लेशमलासंपर्कादलोभादिशुक्लधर्मयोगाच्च।

तदेतच्छुद्धकं तस्यास्वादनासंप्रयुक्तस्यास्वाद्यम्। तेन हि तत्समनन्तरातीतमास्वाद्यते। येनास्वादयति तमापन्नो यदा(5)स्वादयति तस्माद्व्युत्थितः।[२] अन्योन्यसंसर्गादि(द्धि) तृष्णासमाध्योर्नामनिर्वृति(तिः)। तृष्णावशात्समाधेरास्वाद नाम, समाधिवशात्तृष्णायाः ध्याना(न) नाम, [अ]न्यथा विप्रतिषिद्धं स्यात्। न हि कश्चित्तृष्णां समापद्यते, न च समाधिनाऽऽस्वादयतीति। लोकोत्तरं तु समापत्तिद्रव्यमनास्रवमित्युच्यते॥

आसां पुनः समापत्तीनां ध्या(6)नान्येवाङ्गवर्ति नारूप्याः। कति पुनः कस्य ध्यानस्याङ्गानि ?[3] तदिदं प्रस्तूयते—

[542] अङ्गान्याद्ये शुभे पञ्च वितर्कश्चित्तसूक्ष्मता।[४]
प्रीतिः सुखं समाधानं क्लिष्टं सुखविवर्जितम्॥

प्रथमे तावच्छुभे ध्याने पञ्चाङ्गानि वितर्कविचारप्रीतिसौख्यसमाधयः।[५] क्लिष्टे[६] चत्वारि सुखं हित्वा॥

[543] साध्यात्मसप्रसादास्तु सुखप्रीतिसमाधयः।
द्वि(7)तीयेऽङ्गानि चत्वारि क्लिष्टे श्रद्धा सुखादृते॥[७]

---

[१] Cf. इध भिक्खवे एकच्चो पुग्गलो विविच्चेव कामेहि…पठमज्झानमुपसम्पज्ज विहरति। सो तदस्सादेति तं मिनकामेति तेन च विंत्ति आपज्जति। *Aṅg.* II. p. 126.

[२] 'यदास्वादयति तस्माद्व्युत्थित' इति शुद्धकात्। 'येनास्वादयति तं समापन्न' इति। आस्वादनासंप्रयुक्तम्। *Sakv.* p. 671.

[३] For details, see *Vm.* IV. 79-202

[४] Cf. पञ्चाद्ये तर्कचारौ च प्रीतिसौख्यसमाधयः। *Ak.* VIII. 7 ab.

[५] 'यथा चतुरङ्गसेना' नाङ्गेभ्योऽर्थान्तरभूता। 'एवं पञ्चाङ्गध्यानं' नार्थान्तरभूतमिति स्वमतं दर्शयति। *Sakv.* p. 671.

[६] The *aṅgas* of *klishṭa-dhyāna* are given in a separate *kārikā* in *Ak.*—

क्लिष्टेष्वसत्प्रीतिसुखं प्रसादः संप्रधीः स्मृतिः।
उपेक्षास्मृतिशुद्धिश्च केचित् प्रस्रब्ध्युपेक्षणे॥ *Ak.* VIII. 10.

—केचित् पुनः प्रथमद्वितीययोः क्लिष्टयोः प्रस्रब्धिर्नास्ति। तृतीयचतुर्थयोरुपेक्षा नास्ति कुशलमहाभूमिकत्वादनयोरिति। *Akb.* VIII. 10 d.

[७] Cf. प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतुष्टयम्। *Ak.* VIII. 7 cd.

द्वितीये कुशले ध्याने चत्वार्यङ्गानि। आध्यात्मसंप्रसादः प्रीतिः सुखं चित्तैकाग्रता च क्लिष्टे द्वे श्रद्धा सुखं हित्वा॥

[544] तृतीये पञ्चमे प्रज्ञा स्मृत्युपेक्षा सुखं स्थितिः।[१]
क्लिष्टे त्वङ्गद्वयं ज्ञेयं समाधिर्वेदनासुखम्॥

तृतीये शुभे ध्याने उपेक्षा स्मृतिः संप्रज्ञानं सुखं समाधिश्च। क्लिष्टे (8)तु द्वे 'समाधिर्वेदनासुखम्'॥

[545] अन्ये(न्त्ये) चत्वार्युपेक्षे द्वे समाधिः स्मृतिरेव च।
क्लिष्टे ध्याने चतुर्थे तु द्वे अङ्गे वेदना स्थितिः॥[२]

चतुर्थे खलु ध्याने शुभे चत्वार्यङ्गानि। अदुःखासुखावेदना उपेक्षा च स्मृतिपरिशुद्धिः समाधिश्च। क्लिष्टे तु द्वे वेदना स्थितिश्च॥

कति पुनरेषां द्रव्यतो भवन्ति कति नामतः?

[546] द्रव्यात्मना द(8)शैकं च नाम्ना त्वष्टौ दशैव च।[3]
अङ्गान्येतानि कथ्यन्ते चतुष्कोटिरतः स्मृतः॥

द्रव्यतः खल्वेकादश भवन्ति। प्रथमे ध्यानाङ्गानि पञ्च। द्वितीयेऽध्यात्मसंप्रसादो वर्धते। तृतीये समाधिवर्ज्यानि वर्धन्ते। चतुर्थे त्वदुःखासुखावेदनेति।

ननु च यत् तृतीये ध्याने सुखमुक्तं[४] [तथा] प्रथमद्वितीययोः[५]...[Folio

---

[१] Cf. तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः। *Ak.* VIII. 8 ab.

[२] Cf. चत्वार्यन्तेऽसुखादुःखोपेक्षास्मृतिसमाधयः। *Ak.* VIII. 8 cd.

[3] Cf. द्रव्यतो दश चैकं च। *Ak.* VIII. 9 a.

[४] V. supra, p. 52, n. 3.

[५] The topic under discussion is :—कस्मात् तृतीये ध्याने सुखं द्रव्यान्तरमुच्यते? यस्मात्तत् वेदना सुखम्। ध्यानयोस्तु प्रस्रब्धिसुखमाद्ययोः।

प्रथमद्वितीययोस्तु ध्यानयोः प्रस्रब्धिसुखमित्युक्तम्। इह प्रस्रब्धिसुखं तत्र वेदनासुखमिति कुत एतत्। द्वयोर्ध्यानसमापत्त्योः सुखेन्द्रियायोगात्। नहि तत्तयोः कायिकं युज्यते। समापन्नस्य विज्ञानकायायोगात्। नापि चैतसिकं प्रीतिवचनात्। प्रीतिर्हि सौमनस्यम्। न च सुखसौमनस्ययोर्यौगपद्यमस्ति। न चापि तयोः पर्यायेण ध्याने वृत्तिर्युक्ता पञ्चाङ्गवचनादिति। अपरे पुनराहुः—नास्त्येव चैतसिकं सुखेन्द्रियं त्रिष्वपि हि ध्यानेषु कायिकमेव

No. 145 lost[१].]········

[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ अष्टमस्याध्यायस्य प्रथमः पादः समाप्तः[२] ॥]

सुखमङ्गं व्यवस्थापितमिति । यर्त्तांह **सूत्र** उक्तम्··· । *Akb.* VIII. 9 b. The Kośakāra discusses this point in detail and says at the end—**तस्माद्विचार्यमेतत्** ।

Yośomitra says :—'**सुखेन्द्रियायोगादि**'ति । नास्त्येव चैतसिकं सुखेन्द्रियं त्रिष्वपि हि ध्यानेषु । किं तर्हि ? कायिकमेव सुखमङ्गं व्यवस्थापितम् समाहितावस्थान्तरालसमुदाचारात् । **दार्ष्टान्तिकानां किलैषः पक्षः** । तेषां हि न द्विभूमिकमेव सुखेन्द्रियम् । कामप्रथमध्यानभूमिकमिति । किं तर्हि ? चतुर्भूमिकमपि सुखेन्द्रियं भवति । कामावचरं यावत् तृतीयध्यानभूमिकमिति । अत एव च **विभाषायां भदन्तेन सौत्रान्तिकेनोक्तम्**—'**आभिधर्मिकाणां** अरघट्टेनेव चक्षुर्विज्ञानादिकमधस्तादूर्ध्वं आरक्ष्यत इति ।···'**तस्माद्विचार्यमेतत्**' इति । **योगाचारभूमिदर्शनेन** विचार्यमेतदित्यत्र कौतूहलं **पातयत्याचार्यः** ।···*Sakv.* pp. 672—676. See *LVPAk.* VIII. pp. 150—160. V. supra, p. 72, n. 1, p. 139, n. 4.

[१] Folio No. 145 is lost. In this lost folio, the *Adv.* might have discussed this controversial topic, viz., *prasrabdhi* and *sukha* and also the nature of *prasāda* and *prīti*. See *Akb.* VIII. 9—10.

[२] A large portion of the first *pāda* of the Eighth *Adhyāya* is lost in the lost folio.

अष्टमाध्याये

द्वितीयपादः ।[१]

[547] [VIII. B, 5. Fol. 146 a.] शमथस्य च ।

ध्यानसामन्तकारूप्येष्वङ्गानामव्यवस्थितिः ॥

ध्यानसामन्तकेषु खलु विदर्श[नोद्रक्ता] शमथो न्यूनः । आरूप्येषु सर्वत्र शमथोऽधिकवृत्तिर्विपश्यना न्यूनतरा । विपश्य पश्यतो संज्ञायामिति वचनादङ्गिन्यपि पश्चादुद्देशो भवति । ततः सिद्धं विपश्यनाः ॥

यदा खलु चत्वार्यपि ध्यानानि विपाकं प्रति नेञ्जन्ते कस्माच्च(2)तुर्थमेवानेज्यमुच्यते ?[२] तत्रापदिश्यते—

[548] वितर्कचारविध्वंसात्प्रश्वासाश्वाससंक्षयात् ।
[उपे]क्षावेदिताभावादन्त्यमानेज्यमुच्यते ॥[३]

त्रीणि खल्वपि ध्यानानि सेञ्जितान्युक्तानि भगवता वितर्काद्यपक्षालयोगात् । वितर्कविचाराश्वासप्रश्वासौ सुखदुःखसौमनस्यदौर्मण(न)स्यानीत्यष्टापक्षालाः ।[४] तैश्चतुर्थं ध्यानमकम्प्य(3)मित्युक्तमभिधर्मे । वितर्कविचारप्रीतिसुखैरकम्पनीयत्वादानेज्यं चतुर्थमुक्तं[५] सूत्रे[६] । आभिप्रायिकः सूत्रनिर्देशो लाक्षणिकस्त्वभिधर्मे । तथाहि "सुखदुःखयोः प्रहाणात्सौमनस्यदौर्मण(न)स्ययोश्चास्तङ्गमाच्चतुर्थं ध्यानमुपसम्पद्य विहरति"[७] इत्युक्तम् । अभिधर्मे वितर्कविचारप्रीतिसुखान्येवेञ्जितम् ॥

---

[१] The beginning portion of this *pāda* is lost in the lost folio. V. supra, p. 409, n. 6.

[२] V. supra, p. 45, n. 4, p. 137, notes.

[३] Cf. अष्टापक्षालमुक्तत्वादानिञ्जं तु चतुर्थकम् ।
वितर्कचारौ श्वासौ च सुखादिव चतुष्टयम् ॥ *Ak*. VIII. 11.

[४] V. supra, p. 115, n. 4.

[५] V. supra, p. 138, n. 5. See *M. suttas* 66, 106.

[६] यथा पूर्वकाणि त्रीणि ध्यानानि वितर्कादिभिः कम्प्यन्ते···नैवं एभिश्चतुर्थः कम्प्यते । 'यथा निवाते दीपो न कम्प्यते वायुना' तद्वदित्युक्तं सूत्र इत्यपर आहुः । *Sakv*. p. 677.

[७] Cf. सुखस्स च पहाना दुक्खस्स च पहाना पुब्बे'व सोमनस्सदोमनस्सानं अत्थङ्गमा अदुक्खमसुखं उपेक्खासतिपारिसुद्धि चतुत्थज्झानं उपसम्पज्ज विहरति । *M. sutta* 51.

इदमिदानीं वक्तव्यम्। इह (4)ध्यानसमापत्तिषु प्रथमद्वितीययोर्ध्यानयोः सौमनस्यमुक्तं प्रीतिवचनात्। प्रीतिर्हि सौमनस्यम्।[१] तृतीये सुखं चतुर्थे उपेक्षा। तत्किमुपपत्तिध्यानेष्वप्येष एव वेदनानियमः? नेत्युच्यते। किं तर्हि?

[549] आद्ये प्रीतिसुखोपेक्षा द्वितीये तु सुखादृते।
सुखोपेक्षे तृतीयेऽन्त्ये उपेक्षैव विदिष्यते॥[२]

[3]प्रथमध्यानोपपत्तौ खलु तिस्रो (5)वेदनाः। सुखं त्रिविज्ञानकायिकं, सौमनस्यं मनोभौममुपेक्षा चतुर्विज्ञानकायिकी। द्वितीयध्यानोपपत्तौ द्वे वेदने सौमनस्योपेक्षे मनोभूमिके। नात्र सुखमस्ति पञ्चविज्ञानकायाभावात्। तृतीयध्यानोपपत्तौ द्वे वेदने मनोभूमिके। चतुर्थध्यानोपपत्तावुपेक्षैव वेदना विद्यत इति॥[३]

ननु च द्वितीयादिषु ध्याने(6)षु रूपशब्दस्प्रष्टव्यानामुपलब्धयः सन्ति विज्ञप्तिसमुत्थापकं च चित्तम्। तत्कथं तत्र त्रिविज्ञानकायिका वेदना नास्तीत्युच्यते, वितर्कविचारौ चेति? नैष दोषः। स्वभूमिकप्रतिषेधात्। कुतस्तेन तर्हि रूपादयो विज्ञायन्ते कायविज्ञप्तिश्चोत्थाप्यते? तदपदिश्यते—

[550] दृक्छ्रोत्रकायविज्ञानं विज्ञप्तिजनकं तथा।
यद्भूमा(7)वविचारायामाद्यादव्याकृतं तु तत्॥[४]

द्वितीयध्यानोपपन्नाः खलु रूपशब्दस्प्रष्टव्यान्युपलिप्सवो जिगमिषवो वा प्रथमध्यानभूमिकानि चक्षुर्विज्ञानादीनि त्रीणि विज्ञानानि विज्ञप्तिसमुत्थापकं च संमुखीकृत्य निर्माणचित्तवदुपलभन्ते स्पन्दन्ते चेति। तत्पुनः प्रथमध्यानभूमिकं चित्तमव्याकृतमेव सं(8)मुखीकुर्वन्ति न कुशलं न्यूनेनाबहुमानत्वान्न क्लिष्टं वीतरागत्वात्। तद्यथा कश्चिदीश्वरो दरिद्रमित्रगृहं गतः। तेनासौ सुहृदा सर्वस्वप्रदानेनोपनिमन्त्रितो मित्रचित्तानुवर्तनया हीनोत्कृष्टं वस्तु हित्वा यत्किञ्चिद् गृह्णीते तद्वदिति। व्याख्यातस्वरूपाणि ध्यानानि॥

---

[१] V. supra, p. 52, n. 3.

[२] Cf. सौमनस्यसुखोपेक्षा उपेक्षासुमनस्कते।
सुखोपेक्षे उपेक्षा प्रविदो ध्यानोपपत्तिषु॥ *Ak*. VIII. 12.

[३-३] From प्रथमध्यानोपपत्तौ to विद्यत इति is identical with *Akb*. VIII. 12.

[४] Cf. कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत्।
द्वितीयादौ तदाद्याप्तमक्लिष्टाव्याकृतं च तत्॥ *Ak*. VIII. 13.

For an allied controversy, see वचीभेदकथा, *Kv*. II. 5.

आरूप्याः वक्तव्याः।[१] तदारभ्यते—

[551] खनिमित्तोद्ग्र(9)हाकृष्टः प्रोक्तानन्तमनस्कृतिः।
विसर्वरूप आरूप्य आकाशानन्त्यसंज्ञकः ॥[२]

अनन्ताकाशनिमित्तोद्ग्रहः तत्संज्ञाप्रवृत्तिनिमित्तं पश्चात्तु चतुःस्कन्धालम्बनास्तदन्यतमालम्बना अन्यधर्मालम्बना वा मनस्काराः संमुखीभावं गच्छन्ति। उक्तं हि भगवता—"सर्व्वशो रूपसंज्ञानां समतिक्रमात्प्रतिघसंज्ञानामस्तगमान्नानात्वसंज्ञा[VIII A, 5. Fol. 146 b.]नाममनसिकारादनन्तमाकाशमानन्त्ययायतनमुपसम्पद्य विहरति" इति।

कः पुनरासां तिसृणां रूपादिसंज्ञानां विशेषः ?[४] [प्रपञ्च]रूपसंज्ञाभिरत्र विशेषो बोद्धव्यः। तदस्मादागमाद्विविधाद्या रूप्या(पा)रूप(प्य)स्कन्धाः संगृहीताः। तत्र समापत्तिलक्षणा चित्तानुपरिवर्तिणा(ना) शीलेन वियुता शेषेनोपपत्ति लक्षणात्। त एत आ(2)रूप्याः प्रथमारूप्यसामन्तकं हित्वा विभूतरूपसंज्ञा भवन्ति। प्रथमसामन्तकं तु चतुर्थध्यानविदू[षितवृत्तित्वाद्गाढ]बन्धनमिति। अतस्तदेकं न विभूतरूपसंज्ञाख्यं लभते।[५]

कथं पुनर्निर्धार्यते नारूप्येषु रूपमस्तीति ?[६] आगमाद्युक्तितश्च।

---

[१] See *Vm*. x. 1—66.

[२] Cf. **तथाऽऽरूप्याश्चतुंस्कन्धा अधोभूमिविवेकजाः ॥**
विभूतरूपसंज्ञाख्याः सह सामन्तकैस्त्रिभिः। *Ak*. VIII. 2 cd, 3 ab.

[३] Cf. सब्बसो रूपसञ्ञानं समतिक्कमा पटिघसंज्ञानं अत्थंगमा नानत्तसञ्ञानं अमनसिकारा अनन्तो आकासो ति आकासानञ्चायतनमुपसम्पज्ज विहरति। *Vbh*. p. 245.

[४] तत्थ कतमा **रूपसञ्ञायो ?** या रूपावचरसमापत्तिसमापन्नस्स वा उप्पन्नस्स वा दिट्ठधम्मसुखविहारिस्स वा सञ्ञा…। कतमा **पटिघसञ्ञायो ?** रूपसञ्ञा सद्दसञ्ञा गन्धसञ्ञा रससञ्ञा फोट्ठब्बसञ्ञा। इमा वुच्चन्ति पटिघसञ्ञायो। कतमा **नानत्तसञ्ञा ?** या असमापन्नस्स मनोधातुसमङ्गिस्स वा मनोविञ्ञाणधातु समङ्गिस्स वा सञ्ञा… *Vbh*. pp. 261—2.

[५] आकाशानन्त्यायतनसामन्तकं चतुर्थध्यानालम्बनत्वाद्विभूतरूपसंज्ञाख्यां न लभते। न हि तत्र रूपसंज्ञा विभूता न विगतेत्यर्थः। *Akb*. VIII. 3 ab.

[६] This topic is discussed in detail in *Akb* :—यदुक्तं 'चतुःस्कन्धाः' इति साध्यं तावदेतदारूप्येषु रूपं नास्तीति। यदि हि स्यात् कथमारूप्या उच्येरन्।…*Akb*. VIII. 3 ab. 'साध्यं तावदेतदि'ति **निकायान्तरीयाः**। 'यदि हि स्यात्' इति **वैभाषिकाः** *Sakv*. p. 666.

See **आरुप्पे रूपकथा**। *Kv*. VIII. 8—इदानि **आरुप्पे रूपकथा** नाम होति। तत्थ येसं 'विञ्ञाणपच्चया नामरूपं' ति वचनतो अरूपभवे पि ओळारिकरूपा निस्सटं **सुखुमरूपं** अत्थी ति लद्धि, सेय्यथापि **अन्धकानं**। *KvA*. VIII. 8,

आगमस्तावत्—“सर्वशो रूपसंज्ञानां समतिक्रमात्” इत्याविष्कृतमिदम् ।[१] अन्यदाप्त(4)वचनम्—“अरूपिणः सन्ति सत्त्वाः” इति ।[२] ईषद्रूपत्वादरूपिणोनूदरा कन्यावदिति चेत् ।[३] न । सर्वश इत्यपदेशात्, निःसरणोक्तेश्च । उक्तं हि “रूपाणां निःसरणमारूप्याः” [४]इति । यथा हि “यत् किञ्चिदभिसंस्कृतमभिसंविदितं निरोधस्तस्य निःसरणम् ।”[४] निरोधे खलु सर्वसंस्कृतवियोगोऽभ्युपगम्यते । न हि मूर्तिविग्रहलक्षणो मोक्षः तत्प्रवृत्तिनिरो(4)धित्वात् ।

युक्तिरपि ।[५] रूपाश्रयादीन्यवधूय स्वोद्वेगमुखेन तदाश्रयाद्दस्यूपद्रुततद्वियुक्तदेशाश्रयवत् । उक्तस्तर्ह्यारूप्येभ्यो रूपिरू(षू)पपद्यमानानां रूपमुत्पद्यते हेतुप्रत्ययाधिपतिप्रत्ययबलात्, नामरूपस्यान्योन्यहेतुत्वाच्च । तत्र सभागविपाकहेत्वोरेव तयोरप्यस्तित्वात् कारणत्वं रूपप्रत्ययेण(न) च विज्ञानोत्पत्तिद(5)र्शनात्, चित्तविशेषोत्पादात् महाभूतेन्द्रियप्रसादादिरूपोत्पत्तिदर्शणा(ना)च्चान्योन्यहेतुत्वसिद्धिः ॥[५]

---

[१] V. supra, p. 412.

[२] Cf. ये च रूपूपगा सत्ता ये च अरूपट्ठायिनो । *Itivuttaka*, p. 87. See *Milinda*, p. 310.

[३] Cf. ईषद्रूपत्वादापिङ्गलवत् । कीदृशं तावदीषद्रूपं तत्रेष्यते ? यदि कायवाक् । संवरमात्रं कथं तदभावे तत्संवरौ भविष्यतः ? न चासति भूते भौतिकं युज्यते ।···परिमाणाल्पत्वाच्चेत । उदकजन्तुकेष्वप्यदृश्यरूपेषु प्रसंगः । अच्छत्वाच्येत् । अन्तराभवरूपावचरेष्वपि प्रसंगः ।···*Akb*. VIII. 3 ab. See *Sakv*. p. 667.

[४–४] Cf. तिस्सो निस्सरणीया धातुयो । कामानमेतं निस्सरणं यदिदं नेक्खम्मं, रूपानमेतं निस्सरणं यदिदं आरूप्यं, यं खो पन किञ्चि भूतं संखतं पटिच्चसमुप्पन्नं निरोधो तस्स निस्सरणं । *Dīgha* XXXIV. 1-4. See *Aṅg*. III. p. 245.

[५-५] Cf.···काऽत्र युक्तिः ? आयुरूष्मणोः संस्पृष्टवचनान्नडकलापीद्वयवन्नामरूपयोरन्योन्यनिश्रितवचनात्, “विज्ञानप्रत्ययं नामरूपम्” इति वचनात्, अन्यत्र रूपाद्यावत्संस्कारेभ्यो विज्ञानस्यागतिप्रतिषेधाच्चारूप्येषु रूपास्तित्वसिद्धिरिति चेत् । न । संप्रधार्यं तावदेतत् । यदिदमायुरूष्मणोः संसृष्टत्वमुक्तम् । किमिदं कामावचरमायुःसन्धायोक्तमाहोस्वित्सर्वमिति । यच्च नामरूपयोरन्योन्याश्रितत्वमुक्तं किमिदं कामरूपावचरं नाम संधायोक्तमाहोस्वित्सर्वमिति । यच्च विज्ञानप्रत्ययं नामरूपमुक्तं किमत्र सर्वं विज्ञानं नामरूपस्य प्रत्ययम्, आहोस्वित् सर्वं नामरूपं विज्ञानप्रत्ययमिति । यच्चान्यत्ररूपादिभ्यो विज्ञानस्यागतिगतिप्रतिषेधः, किमत्र सर्वैरेव तैर्विना तत्प्रतिषेध आहोस्वित् एकेनापीति ।···तस्मात्

नारूप्ये रूपसद्भावः
कथमिदानीमनल्पकल्पोच्छिन्नाद्रूपात् पुनरपि रूपोत्पत्तिस्ततः प्रच्युतानाम् ?
रूपोत्पत्तिस्तु चित्ततः ॥ *Akb*. VIII. 3cd.

See *Sakv*. pp. 667—671 and *LVPAk*. VIII. pp. 137—143.

उक्तः प्रयोगप्रथमारूप्यः । द्वितीयोऽप्युच्यते—

[552] तद्वच्चित्तविभुत्वेक्षी विज्ञानानन्त्यलक्षणः ।[1]

आकाषा(शा)नन्त्यसंज्ञाद्वेषी तदालम्बनानन्त्यविज्ञानाधिमोक्षाभिमुखबुद्धिरनन्तं विज्ञानानन्त्यायतनमुपसम्पद्य विहरति। अत्रापि (6)पश्चाच्चतु[ः]स्कन्धालम्बनास्तदन्यतमस्कन्धालम्बना शाश्वतधर्मालम्बनाश्च मनस्काराः संमुखीभवन्ति । तद्विक्षिप्तसंज्ञकः

[विज्ञानानन्त्यद्वेषी च][2] अकिञ्चन्याह्वयः पुनः ॥[3]

स खलु योगी विज्ञानानन्त्यसंज्ञाद्वेषी तत्राकिञ्चनसंज्ञित्वादाकिञ्चन्यायतनमुपसम्पद्य विहरति ।[4] अथवा नास्ति किञ्चिदुपेक्षाप्रयोगनिष्पत्तिराकिञ्चन्यायतन(7)मित्युच्यते। अनन्ताकारौदारिकदर्शनो हि तद्विवेके संज्ञाविमोक्षः प्रवर्तते। अत एवाकिञ्चन्यायतन(नं)परमोपेक्षेत्युच्यते। यस्मात्तत्रानन्ताकारानभिसंचेतना चेतसोऽनाभोगता संतिष्ठते ॥

[553] तद्वित्तूच्छेदशङ्की च न संज्ञासंज्ञसंज्ञकः ।[5]

स खलु संक्षिप्तामपि विभुत्वसंज्ञां संज्ञाशल्य इति कृत्वा तामल्पामपि विस्पष्ट(8)परिच्छिन्नरूपां संज्ञामुत्सृज्योच्छेदशङ्की च विस्पष्टरूपां सतीं नैवसंज्ञं नासंज्ञमुपसम्पद्यते ।[6] अतो नैवसंज्ञानासंज्ञायतनं समापद्यते। न संज्ञावेदितनिरोधं नापि विस्पष्टां पूर्वसमापत्तिसंज्ञाम् । सर्वेषु चारूप्येषु

आदौ तथा प्रयुक्तत्वा[त्] तत्संज्ञा व्यव(प)दिश्यते ॥

न तु तन्मात्रसंज्ञा एवारूप्या इत्याविष्कृतमेतत्पू(9)र्वमेवेति । व्याख्यातानि मौलान्यष्टौ समापत्तिद्रव्याणि ॥

---

[1] Cf. सब्बसो आकासानञ्चायतनं समतिक्कम्म अनन्तं विञ्ञाणं ति विञ्ञाणञ्चायतनं उपसम्पज्ज विहरति । *Vbh.* p. 245.

[2] Added from *Adv.*

[3] Cf. आकाशानन्त्यविज्ञानानन्त्याकिञ्चन्यसंज्ञकाः । तथाप्रयोगात् *Ak.* VIII. 4 abc.

[4] Cf. सब्बसो विञ्ञाणञ्चायतनं समतिक्कम्म नत्थि किञ्ची ति आकिञ्चञ्ञायतनं उपसम्पज्ज विहरति । *Vbh.* p. 245.

[5] Cf. मान्द्यात्तु न संज्ञा नाप्यसंज्ञकः । *Ak.* VIII. 4 d.

[6] सब्बसो आकिञ्चञ्ञायतनं समतिक्कम्म नेवसञ्ञानासञ्ञायतनं उपसम्पज्ज विहरति । *Vbh.* VIII. 22 ab.

सामन्तकानां[१] पुनरादिध्यानसामन्तकस्यानागम्याख्यस्य किं रूपम् ? तदपदिश्यते—

[554] सवितर्कविचारं यत्सापेक्षं सानुवर्तकम् ।
चित्तमार्येतराकारं तदानागम्यमुच्यते ॥[२]

यत्खलु प्रथममौलध्यानप्रवेशोपायचित्तं सवितर्कं सविचारमुपेक्षा-वेदनासंप्रयुक्तं सानुपरिव[र्तकं][२]......[Folio No. 147 lost][३]......

......[अभिधर्मदीपे विभाषाप्रभायां वृत्तौ अष्टमस्याध्यायस्य द्वितीयपादः ॥]......

---

[१] कति पुनः सामान्तकानि ?

अष्टौ सामन्तकान्येषां शुद्धादुःखासुखानि हि ।

एकैकस्यैकेकं येन तत्प्रवेशः । किं तान्यपि त्रिविधानि तथैव च तेषु वेदना । नेत्युच्यते । शुद्धकानि च तान्युपेक्षेन्द्रियसंप्रयुक्तानि च यत्नवाह्यत्वादधोभूम्युद्वेगानवगमात् वैराग्यपथत्वाच्च नास्वदनासंप्रयुक्तानि । *Akb.* VIII. 22 ab. See *Sakv.* p. 681.

[२-२] Cf. **आर्यं चाद्यं त्रिधा केचिदतर्कं ध्यानमन्तरम् ॥** *Ab.* VIII 22 cd.

आद्यं सामन्तकमनागम्यं तच्छुद्धकं चानास्रवं च । यद्यपि सामन्तकचित्तेन प्रतिसन्धि-
बन्धः क्लिष्टो भवति । समाहितस्य तु क्लिष्टत्वं प्रतिषिध्यते । **केचित्पुनरिच्छन्ति ।**
अस्वादनासंप्रयुक्तमप्यनागम्यं सामन्तकं चोच्यते ध्यानान्तरं च । किमिदमेकार्थमाहोस्वि-
न्नानार्थम् ? सामान्तकं हि वैराग्यमार्गः ।···तत्पुनर्ध्यानान्तरम्

त्रिधाऽदुःखासुखं तच्च महाब्रह्मफलं च तत् । *Ak.* VIII. 23 ab.

—'यद्यपि सामन्तकचित्तेन सन्धिबन्ध'इति । अष्टास्वपि ध्यानारूप्येषु यस्य यत्
सामन्तके । तस्य तेन सामन्तकचित्तेन क्लिष्टेनासमाहितेन सन्धिबन्ध इत्येष **सिद्धान्तः**
इति । अत इदमुच्यते । यद्यपि सामन्तकचित्तेनेति विस्तरः । 'आस्वादनासंप्रयुक्तमप्य-
नागम्यम्, इति । अनागम्यस्य पटुत्वात् । यथा हि तदनास्रवमपि संभवति तथा आस्वा-
दनासंप्रयुक्तमपीत्यभिप्रायः । **मौलप्रतिस्पर्धित्वादास्वादनासमुत्पत्तिसद्भावादित्याचार्यसंघभद्रः।**
Sakv. p. 682. For details, see *LVPAk.* VIII. pp. 178—183.

[३] Folio No. 147 is lost. In this lost folio the *Adv.* might have discussed the following topics :—(१) सामन्तकानां ध्यानान्तरिकानां च कः स्वभावः ? (२) शुद्धकादीनां ध्यानारूप्याणां कथं लाभः ? See *Akv.* VIII. 14—16 and 22—23.

अष्टमाध्याये

तृतीयपादः ।[१]....

[VIII. B, 6. Fol. 148 a.]···[व्यु]त्क्रान्तकसमापत्तिं[२] समापद्यन्ते तदपदिश्यते—

[555] चत्वारो ध्यायिनः प्रोक्ताश्चतुर्ध्यान[वि]दर्शणा(ना)त् ।
सम्पद्विपत्तिसंज्ञाद्या हानपद्यादिवेदिनः ॥[३]

चत्वारो हि ध्यायिनो भगवतोक्ताः । "तेषामेकः समापत्तौ विपत्तिसंज्ञी, द्वितीयो विपत्तौ सम्पत्तिसंज्ञी, तृतीयः सम्पत्तौ सम्पत्तिसंज्ञी, चतुर्थो विपत्तौ विपत्तिसंज्ञी" इति[४]। (2)एते हानस्थितिविशेषोत्कर्षध्यानभेददर्शण(न)योगाः(त्) चत्वारो भवन्ति ॥

कः पुनरयं ध्याता कानि वा ध्यानध्येयध्यानफलानि ?[५] तदाविष्क्रियते—

[556] ध्याता प्रोक्तस्तथा ध्येयं ध्यानं ध्यानफलं तथा ।

सर्वमेतच्चतुष्टयं पूर्वमेव विस्तरेणाभिहितम् ।[६] भवतस्तु

असिद्धेरुक्तदोषत्वान्नास्त्यात्मादिचतुष्टयम् ॥

न हि तवैतच्चतु(3)ष्टयं सिद्धम् औपनिषदसांख्यवैशेषिकादिपरिकल्पितप्रमातृप्रमाणप्रमेयप्रमाणफलानि पूर्वमेवोक्तदोषाणि ॥[७]

---

[१] The beginning portions of this *pāda* are lost. V. supra, p. 415, n. 3.

[२] V. infra, *Ad. karikā* 566.

[३] This topic is not discussed in *Akb.* V. supra, p. 247.

[४] Cf. झायी ति चत्तारो झायी—अत्थेकच्चो झायी सम्पत्तिं येव समानं विपत्तीति पच्चेति, अत्थेकच्चो झायी विपत्तिं येव समानं सम्पत्तीति पच्चेति, अत्थेकच्चो झायी सम्पत्तिं येव समानं सम्पत्तीति पच्चेति, अत्थेकच्चो झायी विपत्तिं येव समानं विपत्तीति पच्चेति । *Vbh.* p. 342.

[५] This topic is not discussed in *Akb.*

[६] This discussion is lost in the lost portions. V. supra, p. 22. n. 1.

[७] *Ibid.*

किं पुनः कर्मानुष्ठानान्मोक्षो भवति, आहोस्विज्ज्ञानानुष्ठानादिति ?[१] तत्र ब्रूमः—

[557] कर्मानुष्ठानतो मोक्षो ज्ञानानुष्ठानतस्तथा ।
व्यापारे सति सद्भावाद्याथात्म्यावगमेऽपि च ॥

त्रीणि खलु कर्माणि । दानशी(4)लभावनाख्यान्यनुष्ठाय दश च ज्ञानानि धर्मस्वसामान्यलक्षणसंमोहप्रतिपक्षभूतान्यनुष्ठाय परं ब्रह्म प्राप्नोति नान्यथेति । तदेतदाविष्क्रियते—

[558] कर्म त्वत्र द्विधा ज्ञेयं पुण्यापुण्यक्रियाक्रिये ।

तत्र खलु

पुण्यक्रिया त्रिधा प्रोक्ता विरतिस्तद्द्विधोदिता ॥

कर्मादिचिन्तायाम् ॥

[559] ज्ञानं तु नैष्ठिकं ज्ञेयं यथापूर्वमुदाहृतम् ।
(5)अतोऽन्यद्व्रजते यस्तु खलीनं चर्वयत्यसौ ॥

यस्तु मन्यते पश्वाद्यालंब(भ)नादिभिः कर्मभिः भोक्तृभोग्यान्तरपरिज्ञानादिभिश्च मोक्षो भवति स वक्तव्यः 'खलीनं चर्वयते(ति) ।' यस्मात्

[560] परपीडाप्रवृत्तत्वाद्वधलोभानृतादयः ।
अपायहेतवो ज्ञेयाः श्रेयोद्वारविबन्धिनः ॥

हिंसानृतलोभादयो हि दोषाः कुगतिग(6)मनहेतवो न स्वर्गापवर्गगमनोपायाः । शास्त्रचोदिता हिंसा नाधर्म इति चेत्[२] । न । शास्त्रलक्षनो(णा)परिज्ञानात् । कथम् ? यस्मात्

[561] युक्तार्थचोदनाद् दुःखत्राणाद्दोषानुशासनात् ।
शास्त्रमित्युच्यतेऽतोऽन्यज्ज्ञेयं वातिकभाषितम् ॥

यत्खलु प्रमाणत्रय[३]विरुद्धार्थं वाक्यम्, यच्च पापकेभ्यः कर्मभ्यः कुगतिगमनहेतु(7)भ्यो निवारणेन त्रायते, यच्च रागद्वेषमोहाननुशास्ति तद्वाक्यं

---

[१] This topic (*kārikās* 557-562) is not discussed in *Akb.*

[२] V. supra, p. 169.

[३] *Pratyaksha-anumāna-āgama.*

शास्त्रमित्युच्यते। नान्यदिति। तस्मादन्यदनाप्तवचनम्। न। वेदमन्त्राणां विषोपशमनसामर्थ्यदर्शणा(ना)त्। प्रत्यक्षं हि प्रमाणं बलीयस्तत्पूर्वके च द्वे प्रमाणे त्रयीधर्माभिहिते प्रमाणमिति। तत्रेदं प्रत्युच्यते—

[562] पारसीकादिमन्त्राणां विषोत्सद(8)बलं क्वचित् ।
दृश्यते न तु सर्वस्मिन्नरिष्टाद्यनिवर्तणा(ना)त् ॥

दृष्टं हि सामर्थ्यं पारस्वी(सी)कशबरकापालिकादिमन्त्राणामपि न तु तैर्मन्त्रैः पापनाशोऽभ्युपगम्यते भवद्भिः, न च सर्वस्य विषयं(मं) प्रशमयन्ति; तद्गतारिष्टादीनां(दिना) मरणदर्शणा(ना)त्। यदि च शास्त्रचोदिता हिंसा मन्त्रसामर्थ्याद्धर्माङ्गं सम्पद्यते कस्मान्न (9)मन्त्रसामर्थ्यादेव पशुं घातयति? किं शस्त्रपातनगलाम्रेडकाद्युपक्रमानुष्ठानेन? मन्त्रसामर्थ्यादेव च पिष्टकृतपुरोडाशानां स्वर्गगमनहेतोरपूर्वस्याभिव्यक्तिर्भवत्वलं पश्वादिवधेनेति। दृष्टं च मन्त्राणां विषोपशमने सामर्थ्यं न तु विनाहारपानादिभिः क्षुत्तृष्णोपशमनादिषु। एवं मन्त्रा[VIII. A. 6. Fol. 148 b.](1)णां विषोपशमने सामर्थ्यं भवतु। मा भूत्पापविनाशन इति ॥

यदप्युच्यते भवद्भिः। वैतानकर्मानुष्ठातारो ब्राह्मणा एव मोक्षवर्त्मन्यधिक्रियन्ते नेतरे वर्णा इति तदपि डिम्भाभिहितमेव सतां प्रतिभाति।[१] यस्मात्

[563] रागाद्यैर्दूष्यते चित्तं श्रद्धाद्यैश्च विशुध्यते ।
विप्रस्यापि यतस्तस्माद् गुणवानेव मुच्यते ॥

तद्यथौषधं विशुद्ध(2)कोष्ठस्यैवारोग्यं जनयति नोल्बनवातादिदोषस्य। तस्माद्भव्यजातीयः श्रद्धादिगुणपरिभावितात्मा कुम्भकारोऽपि मोक्षवर्त्मन्यधिक्रियते। न चतुर्वेदो रागद्वेषमोहादिदोषोश(र)रीकृतचित्तभूमिरिति। अलमतिप्रसङ्गेन प्रकृतमेव प्रस्तूयताम्। तदिदमारभ्यते—

[564] शुद्धं चतुर्विधं हाण(न)भागीयादि यथाक्रमम् ।
न्यूनतुल्य(3)बलोत्कृष्टनिर्मलानुगुणं हि तत् ॥[२]

चतुर्विधं खलु शुद्धकं हानभागीयं स्थितिभागीयं विशेषभागीयं निर्वेधभागीयम्। एवमारूप्यमन्यत्र भवाग्रात्। तद्धि त्रिविधं विशेषभागीयं हित्वा ॥

किं पुण(न)रेषां लक्षणम्?

---

[१] This topic is not discussed in *Akb.*

[२] Cf. चतुर्धा शुद्धकं हानभागीयादि यथाक्रमम्। *Ak.* VIII. 17 ab.

[565] क्लेशस्वोपरिमस्थाननीरजस्कानुवर्ति वा ।[१]

यथाक्रमं खलु क्लेशोत्पत्त्यनुगुणं हानभागीयं, स्वभूम्यनुगुणं स्थिति(4)भागीयमूर्ध्वभूम्यनुगुणं विशेषभागीयमनास्रवानुगुणं निर्वेधभागीयम् । तस्मादनास्रवमुत्पद्यते ।

अथैषां चतुर्णां कति कस्मादनन्तरमुत्पद्यन्ते ?

द्वे त्रीणि त्रीणि च द्वे वा हाणि(न)पद्त्याद्यनन्तरम् ॥[२]

हानभागीयस्य खल्वनन्तरं द्वे उत्पद्येते हाण(न)स्थितिभागीये । स्थितिभागीयस्य त्रीण्यन्यत्र निर्वेधभागीयात् । विशेष(5)भागीयस्यापि त्रीण्य[न्य]त्र हाण(न)भागीयात् । निर्वेधभागीयानन्तरं तदेवैकमिति ॥

[566] व्युत्क्रान्तकसमापत्तिरर्हतोऽकोप्यधर्मणः ।[३]

स खल्वेषार्हतोऽकोप्यधर्मण एव निष्क्लेशत्वात्समाधिवशित्वाच्च । दृष्टिप्राप्तस्य यद्यपि तीक्ष्णेन्द्रियत्वात्समाधौ वशित्वं न तु निष्क्लेशा सन्ततिः । समयविमुक्तो यद्यपि निष्क्लेशो न त्वस्य समा(6)धौ वशित्वमिति ।

कथं पुनरियमुत्पाद्यते ?

तत्प्रयोगो द्विधा भूमिर्गत्वागत्य(म्य) जिगीषया ॥[४]

[567] धर्मभूम्युत्क्रमेणाष्टौ शुद्धकाख्यादनास्रवम् ।
शुद्धकाच्च तृतीयं स्वं निष्ठा शुद्धाच्च निर्मलम् ॥[४]

'गत्वे'त्यनुलोममष्टौ भूमीः समापद्य । 'आगम्ये'ति प्रतिलोमं समापद्य । 'द्विधे'ति सास्रवानास्रवा । 'जिगीषये'ति जयं चिकीर्षन्ध(7)र्मभूम्युत्क्रमेण जेतुकामः । शुद्धकादनास्रवं 'शुद्धकाच्च तृतीयं स्वं ।' 'निष्ठा' तु शुद्धादनास्रवम् । स खल्वेवं विजित्यानास्रवाश्च सप्त पश्चात्सास्रवा प्रथमाद्ध्यानात्सास्रवं तृतीयं समापद्यते । तस्मादाकाशानन्त्यायतनं तस्मादाकिञ्चन्यायतनमेवं पुनः प्रतिलोमं निर्जित्यानास्रवा अप्येकविलङ्घिता अनुलोमं (8)प्रतिलोमं च समापद्यते । एष प्रयोगो व्युत्क्रान्तकसमापत्तेः ।

---

[१] Cf. क्लेशोत्पत्तिस्वभूम्यूर्ध्वानास्रवानुगुणं हि तत् ॥ *Ak.* VIII. 17 cd.

[२] Cf. द्वे त्रीणि त्रीणि चैकं च हानभागाद्यनन्तरम् । *Ak.* VIII. 18 ab.

[३] Cf. व्युत्कान्तकसमापत्तिः । *Ak.* VIII. 19 a.

[४] Cf. गत्वागम्य द्विधा भूमिरष्टौ श्लिष्टैकलङ्घिताः ॥ *Ak.* VIII. 18 ab.

यदा तु प्रथमाः सास्रवाः तृतीयमनास्रवं ध्यानं समापद्यते तस्मात्सास्रवमाकाशानन्त्यायतनं तस्मादनास्रवाकिञ्चन्यायतनमेवं पुनः प्रतिलोमम्। तदा विसभागतृतीयद्रव्यगमना(9)दभिर्निष्पन्ना भवति।[१] अतिविप्रकृष्टत्वान्न चतुर्थं समापद्यते। तां च त्रिषु द्वीपेषु समापद्यते॥

[568] स्वोर्ध्वा एवोपजन्यन्ते ध्यानारूप्यभवः शुभाः।
भवाग्रस्थस्त्वगत्यादौ निर्मलामवलम्बते॥[२]

भवाग्रं भवाग्रे च संमुखीक्रियते। अधश्च यावत्कामधातोरेवं शेषाणि स्वस्यां च भूमावधश्चेति। ऊर्ध्वो[VIII. A, 7. Fol. 149 b.][3] [पपन्नो नाधरां समापत्तिं संमु]खीकरोति वैयर्थ्यात्। न हि तत्रानास्रवो मार्गोऽस्ति संसारमूलत्वात्। न च विनाऽनास्रवेन(ण) मार्गेण तत्रत्याः क्लेशा हन्तुं शक्यन्ते। चैतन्यरूपं पुरुषमालम्ब्य तद्वैराग्यमिति चेत्। न। युष्मत्पुरुषस्य क्रियावत्वे सत्त्व(त्वा)नैकत्वैकत्वोपपत्तेः संसर्गिधर्मित्वोपपत्तेः बुद्धिवदिति विज्ञानज्ञानोपलब्धे च(2)………………………………… ति॥

कस्य पुनर्ध्यानस्य प्राप्त्या कतरद्भाव्यते ?[४] तदनुक्रम्यते—

[569] बालाद्यध्यानसंप्राप्तौ लौकिकस्यैव भावना।

यदा खलु पृथग्जनः प्रथमं ध्यानं लभते तदास्यानागतं लौकिकमेव भाव्यते।

ऊष्मादिवर्ज्ये चालब्धे ध्यानान्तरसमुद्भवे॥

Cf. पथवीकसिणे पन पठमं झानं समापज्जित्वा तत्थेव ततियं समापज्जति, ततो तदेव उग्घाटेत्वा आकासानञ्चायतनं, ततो आकिञ्चञ्ञायतनं ति एवं कसिणं अनुक्कमित्वा झानस्सेव एकन्तरिकभावेन उक्कमनं **झानुक्कन्तिकं** नाम।…कसिणस्सेव एकन्तरिकभावेन उक्कमनं **कसिणुक्कन्तिकं** नाम।…झानस्स चेव कसिणस्स च उक्कमनं **झानकसिणुक्कन्तिकं** नाम। *Vm*. xii. 5. Also see झानानुलोमं, झानपटिलोमं, झानानुलोमपटिलोमं। *Ibid*. xii. 4. See *Vm T*. pp. 374—5; *DhsA*. iii. 388 and *LVPAk*. viii. pp. 173—4.

[१] Cf. विसभागतृतीयगा। *Ak*. viii. 19 b.

[२] Cf. स्वाधोभूम्याश्रया एव ध्यानारूप्या वृथाऽवरम्।
आर्याकिञ्चन्यसांमुख्याद्भवाग्रे त्वास्रवक्षयः। *Ak*. viii. 19 cd, 20 ab.

[3] This folio is broken on the right. A part of about fifteen letters is lost in each line.

[४] This topic is discussed very briefly in *Akb*. viii. 14-16.

चरमभविकस्योष्मादिवर्जितेऽ(3)…………गिकस्वा(?)नुचितम् । तत्र ध्यानान्तरे प्रथमं सास्रवमेव भाव्यते । उचिते तु वैराग्यलब्धत्वान्न भाव्यते । ऊष्मगतादिषु तु न भाव्यते । तान्येव ध्यानान्तरसंगृहीतानि भाव्यन्ते प्रथमं नानागम्यम् ॥

[570] वीतरागस्य चालब्धे पूर्वसामन्तके तथा ।

वीतरागस्यानागम्येऽप्यलब्धेऽनुचिते प्रथमं भाव्य(4)[ते]…………… [अ]नागम्यसंगृहीतानि भाव्यन्ते न प्रथमार्यमार्गसादृश्यात् ।

विरक्तस्य तु पूर्वस्य निर्मलस्यैव भावना ॥

वीतरागस्य त्वार्यस्य प्रथमस्यानास्रवस्यैव भावनान्यामे वा[ऽ]भिसमयान्तिकक्षणवर्ज्येषु अनास्रवमेव भाव्यते । शैक्षस्य च द्वाभ्यां क्षणाभ्यामक्षविवर्धने भवाग्रे च सप्तदशसु(5)…………। एवं नवप्रकारतया [ऽ]कोप्यप्रतिवेधे तत्पृष्ठे च यत्किञ्चिद्भावनामयं संमुखीकरोत्यलब्धं तत्रानास्रवमेव प्रथमं भाव्यते नोभयभावनोच्यते ॥

[571] न्याममार्गान्वयज्ञाने शैक्षस्याक्षविवर्धने ।
आनन्तर्याह्वये मार्गे दृङ्मार्गे द्वादशक्षणाः ॥

[572] भवाग्रस्य च वैराग्ये क्षयज्ञानविवर्जिते ।
आकोप्या(6)……………………॥

[573] [आ]र्यस्य कामवैराग्ये चरमे मुक्तिवर्त्मनि ।
ज्ञानत्रये त्व(त्र)याख्ये च न्यामे[ऽ]नागम्यवर्जिते ॥

[574] शैक्षस्य रागिणः पूर्वत्रिभूमीन्द्रियवर्धने ।
प्रयोगमुक्तिमार्गेषु कामाद्यध्यानजस्य च ॥

[575] द्विविधार्हत्वसंप्राप्तौ मुक्तिवर्त्मनि पश्चिमे ।
विरक्तानां च शैक्षाणामन्यग्रान्यत्रिभूजये ॥

[576] भावना द्विविधस्यापि

(7)…………………सु सास्रवानास्रवस्यापि प्रथमस्य ध्यानस्य भावना भवतीति ।

नोभयस्य तु भावनाम् ।

अनागम्याश्रये न्याम तद्भागीयोद्भवादिषु ॥

यद्यनागम्यं निःश्रितो नियाममवक्रामति, तस्यानागम्यमेव भाव्यते न तु प्रथमं ध्यानं किञ्चिदपि भाव्यते । यदा खल्वप्यनागम्यां निर्वेधभागीयान्युत्पादयति(8)……………[भाव]नया भाव्यते न तु प्रथमं ध्यानं दर्शनमार्गसादृश्यादित्याविष्कृतमेतदिति ॥

[577] द्वितीयादिष्वनेनैव विधिनाभ्युह्य युक्तितः ।
अभिधर्मनयज्ञाने ज्ञेयाऽनागतभावना ॥

द्वितीयादिषु खल्वधिध्यानेष्वनयैव प्रथमध्यानानागताभावनानीत्या तत्र युक्तिमनुसरता यथातन्त्रम(9)………।

ध्याणं(नं) कस्य किमालम्बनमित्यत इदमनुक्रम्यते ।

[578] सास्वादः स्वभवालम्बः शुभं ध्यानं समन्तदृक् ।
आरूप्याः कुशला मौला नाधोलोकावलम्बिनः ॥[१]

आस्वादनासंप्रयुक्तः स्वभूमिकं [भवमालम्बते] सास्रवं वस्त्वित्यर्थः । नाधरां भूमिमालम्बते वीतरागत्वान्नोत्तरां तृष्णा[VIII. B. 7. Fol 149 a](1)परिच्छिन्नत्वात् । नानास्रवं कुशलत्वप्रसङ्गात् । कुशलं तु ध्यानं शुद्धकमनास्रवं वा सर्वालम्बनं यत्किञ्चिदस्ति संस्कृतमसंस्कृतं वा । मौलानां तु कुशलारूप्याणामधोभूमिकं च सास्रवं वस्तु नालम्बनम् । स्वभूम्योर्ध्वभूम्यालम्बनत्वात् । अनास्रवं [त्वालम्बनम् । सर्वा]न्वयज्ञानपक्षो न धर्मज्ञानपक्षो नाधोभूमिनिरोधः । सामन्तकानन्त[(2)र्यमार्गाणां त्वधराभूमिरालम्बनम् ॥]

[एषाञ्च पु]नस्त्रिविधानां ध्यानारूप्याणाम्

[579] ध्यानारूप्यैः प्रहीयन्ते निर्मलैर्माण(न)स(सो) मलाः ।
अधोभूमेस्तु लभ्यन्ते सामन्तैरपि शुद्धकैः ॥[२]

अनास्रवेनै(णै)व ध्यानारूप्येण क्लेशाः प्रहीयन्ते न कुशलेन । कुत एव क्लिष्टेन ? वीतरागवन्नाधः प्रहीयन्ते तस्यैव तद्प्रतिपक्षत्वात्, न स्वभूमौ

---

[१] Cf. सतृष्णाः स्वभवालम्बाः ध्यानं सद्विषयं शुभम् ॥
न मौलाः कुशलारूप्याः सास्रवाधरगोचराः । *Ak.* VIII. 20 cd, 21 ab.

[२] This folio is broken on the right. A part of about fifteen letters is lost in each line. The restorations given in the square brackets are done with the help of *Akb.*

विशिष्टरत(तर)त्वा[(3)न्नोद्र्ध्वमिति । ध्यानारूप्यसामन्तके]न[१] शुद्धकेनापि क्लेशाः प्रहीयन्तेऽधोभूमिप्रतिपक्षत्वात् ॥[२]

पुनश्च । सर्वं समाधिं संकलय्य त्रयः समाधय उक्ताः सूत्रे—

[580] सवितर्कविचाराद्यास्त्रयः प्रोक्ताः समाधयः ।
ध्यानान्तरे स चारोधः सद्वयोऽन्यत्र निर्द्वयः ॥[३]

"सवितर्कः सविचारः समाधिः अवितर्को विचारमात्रोऽवित(4)[र्कोऽविचारः" इति[४] । तत्र ध्यानान्तरं तावदवित]र्को विचारमात्रः[५] । सततोधः सवितर्कः सविचारः समाधिः । परतस्त्ववितर्को[ऽ]विचारश्च ॥

पुनः

[581] सास्रवानास्रवश्चान्य एकादशभुवस्त्रयः ।
आर्याकारमतिद्योताः शून्यताद्यः समाधयः ॥[६]

शून्यताभिधेयः समाधिरप्रणिहित अनिमित्तश्च तृतीयः ॥[७]

---

[१] Cf. अनास्रवेण हीयन्ते क्लेशाः सामन्तकेन च । *Ak.* VIII. 21 cd.

[२] See *Sakv.* p. 681.

[३] Cf. सवितर्कविचारोऽधः समाधिः परतोऽद्वयः । *Ak.* VIII. 23 cd.

[४] Cf. तयो समाघी—सवितक्कसविचारो समाधि, अवितक्कविचारमत्तो समाधि, अवितक्क-अविचारो समाधि । *Vbh.* p. 343. See *Yoga-bhāshya*, I. 42—44.

[५] 'ध्यानविशेषत्वात्' इति । तदेव मौलं प्रथमं ध्यानं वितर्कापगमाद्विशिष्टं [स] ध्यानान्तरमित्युच्यते इत्यर्थः । 'विशेषाभावात्' इति । यथा प्रथमे ध्याने विशेषो भवति । क्वचिद्वितर्कविचारौ । क्वचिद्विचार एवेति । न तथा द्वितीयादिष्विति । अतो ध्यानेषु न व्यवस्थाप्यते ध्यानान्तरम् ।···*Sakv.* p. 682.

[६] Cf. अनिमित्तः समाकारैः शून्यता नात्मशून्यतः । *Ak.* VIII. 1. 10.

[७] Cf. सुञ्ञतो समाधि, अनिमित्तो समाधि, अप्पणिहितो समाधि । *Dīgha*, XXXIII. 1. 10.

Alco Cf. परिज्ञायै प्रहाणाय पुनः साक्षात् क्रियां प्रति ।
शून्यतादिसमाधीनां त्रिधार्थः परिकीर्तितः ॥

इति वचनाद्येनाकारेण प्रतिभासते स घटाद्याकारः कल्पितस्वभावस्तस्य परिज्ञानार्थं शून्यतासमाधिरुक्तः ।···सर्वधर्माभिनिवेशविविक्तमायोपमज्ञानस्य साक्षात्क्रियार्थमनिमित्तः समाधिः। योगिसंवृत्या तथ्यरूपस्य परिनिष्पन्नस्याधिगन्तव्यस्वभावत्वात् पुद्गलधर्माभिनिवेशस्य परतन्त्रस्य प्रहाणार्थमप्रणिहितः समाधिः । *Aaa.* pp. 536-7.

See *Sakv.* p. 682; *LVPAk.* VIII. p. 184, notes.

कतमैः पुनरेत आ(5)[र्याकाराः[१]……………………]वत् षोडशभिराकारैरित्यतस्त्रयोऽप्यनित्यतादिषोडशाकारमतिद्योताः (?)। प्रत्येकं तु

[582] दशाप्रनि(णि)हिताकाराः शून्यताया द्वयं मतम् ।
अनिमित्तोऽमृताकारैश्चतुर्भिः संप्रवर्तते ॥[२]

अप्र(निणि)हितः खलु समाधिरणि(नि)त्यदुःखाकाराभ्यां संप्रयुक्तश्चतुर्भिः समुदयाकारैश्चतुर्भिश्च मार्गा[(6)कारैः]……………………………तानात्माकाराभ्यां संप्रयुक्तः। अनिमित्तः समाधिर्निरोधाकारैश्चतुर्भिर्निरोधाकारादिभिः संप्रयुक्तः ॥

[583] विमुक्तेर्द्विप्रकारायाः प्राप्तये निर्मलाः पुनः ।
विमोद्मसु(मु ?)खशब्देन त एवाविष्कृतास्त्रयः ॥[३]

रागविरागाच्चेतोविमुक्तिरविद्याविरागा[त्] प्रज्ञाविमुक्तिः।[४] तस्य विमुक्तिद्वयस्य(7)…………[आ]विष्कृतानि। तत्र शून्यतायाः संप्रयुक्तः समाधिः शून्यतासमाधिः। न प्रणिधत्ते भवमित्या(त्य)प्रणिहितः। दशनिमित्ता[५]पगमादनिमित्तं तदालम्बनसमाधिरणि(नि)मित्तः॥ पुनः

[584] त्रयोऽपरसमाध्याख्या शून्यताशून्यतादयः ॥[६]

तेषां त्रयाणां समाधीनामुत्सर्गोपायप्रदर्श[(8)नार्थं शून्यताशून्यतादयः त्रयः] समाधयोऽभिधर्मेऽभिहिताः।

---

[१] See *Vm*. xxi. 55—60.

[२] Cf. प्रवर्ततेऽप्रणिहितः सत्याकारैरतःपरैः। *Ak*. viii. 24 cd.

[३] Cf. शुद्धामला निर्मलास्तु ते विमोक्षसुखत्रयम्। *Ak*. viii. 25 ab.
Also Cf. तयो'मे भिक्खवे विमोक्खा—सुञ्ञतो विमोक्खो, अनिमित्तो विमोक्खो, अप्पणिहितो विमोक्खो। *Paṭisambhidā*, ii. p. 35.—अनिच्चतो मनसिकरोन्तो अधिमोक्खबहुलो अनिमित्तविमोक्खं पटिलभति। दुक्खतो मनसिकरोन्तो पस्सद्धिबहुलो अप्पणिहितविमोक्खं पटिलभति। अनत्ततो मनसिकरोन्तो वेदबहुलो सुञ्ञतोविमोक्खं पटिलभति। *Ibid.* p. 58. For details, see *DhsA*. iii. 483—492; *Vm*. 70—73, *Sakv*. p. 682; *LVPAk*. viii. p. 187.

[४] V. supra, p. 204, n. 1.

[५] पञ्चविषयस्त्रीपुरुषत्रिसंस्कृतलक्षणानि दश। *Akb*. viii. 24.

[६] Cf. शून्यताशून्यताद्याख्यास्त्रयोऽपरसमाधयः। *Ak*. viii. 25 cd.
See *Sakv*. p. 683.

द्वयमालम्बतेऽशैक्षं शून्यतोऽनित्यतस्तथा ॥[१]

[585] त्र्यमप्रतिसंख्याख्यमन्त्यो गृह्णाति शान्ततः ।[२]

शून्यताद्यालम्बनत्वात्तन्नाम अशैक्षं समाधिं द्वावपरसमाधी आलम्बेते। शून्यताशून्यता अशैक्षं शून्यतासमाधिमालम्बते शून्याकारेण। अप्रणि[(7)हिताप्रणिहितोऽप्यशैक्षमप्रणिहितम्] अनित्याकारेण। [न] दुःखतो न हेत्वादितोऽनास्रवस्य अतल्लक्षणत्वात्। न मार्गाकारैर्दूषणीयत्वात्[३]। अनिमित्तानिमित्तत्वात् समाधिरशैक्षस्यानिमित्तस्याप्रतिसंख्यानिरोधमालम्बते। शान्ताकारेणानास्रवस्य प्रतिसंख्यानिरोधाभावात्। न निरोधप्रणीतनिःसरणाकारैर[III. B, 2. Fol. 150 a.[४]]णि(नि)त्यतानिरोधसाधारणत्वादव्याकृतत्वादविसंयोगाच्च।

ते पुनरेते समाधयः

एकादशभुवः सर्वे सास्रवा नृष्वकोपिनः[५] ॥

तत्र सास्रवा आर्यमार्गद्वेषित्वान्मनुष्येषूत्पाद्यन्ते। अकोप्यस्यार्हतः एकादशभुवश्च सप्तसामन्तकानि हित्वाऽन्यास्वेकादशसु भूमिषु कामधात्वनागम्यध्यानान्तरध्यानारूप्येषु।

(2)पुनः

[586] समाधिभावनाध्यानं सुखाय प्रथमं शुभम्।
दर्शणा(ना)याद्यभिज्ञोक्ता प्रज्ञाभेदाय यात्तिकाः ॥[६]

"चतस्रः खलु समाधिभावनाः। अस्ति समाधिभावना आसेविता भाविता बहुलीकृता दृष्टधर्मविहाराय संवर्तते" इति विस्तरः।[७] कुशलं खलु

---

[१] Cf. आलम्बेते अशैक्षं द्वौ शून्यतश्चाप्यनित्यतः। *Ak.* VIII. 26 ab.

[२] Cf. अनिमित्तानिमित्तस्तु शान्ततोऽसंख्यया क्षयम् ॥ *Ak.* VIII. 26 cd.

[३] 'न मार्गाकारैर्दूषणीयत्वात्' इति। सोऽशैक्षः समाधिर्दूषयितव्यो न च मार्गाकारा दूषणरूपा इति। अतो न मार्गाकारैस्तं समाधिमालम्बते।···*Sakv.* p. 683.

[४] This folio is misplaced in the sheet No. III. B.

[५] Cf. सास्रवा नृष्वकोप्यस्य सप्तसामन्तवर्जिताः। *Ak.* VIII. 27 ab.

[६] Cf. समाधिभावना ध्यानं शुभमाद्यं सुखाय हि ॥
दर्शनायाऽक्ष्यभिज्ञेष्टा धीभेदाय प्रयोगजाः। *Ak.* VIII. 27. cd, 28. ab.

[७] 'अस्ति समाधिभावना आसेविता भाविता बहुलीकृता दृष्टधर्मसुखविहाराय संवर्तते। अस्ति···दिव्यचक्षुरभिज्ञा ज्ञानदर्शनाय संवर्तते। अस्ति···प्रज्ञाप्रभेदाय संवर्तते। अस्ति··· आस्रवक्षयज्ञानाय संवर्तते' इति सूत्रम्। *Sakv.* p. 684.

प्रथमं ध्यानं शुद्धकमनास्रवं वा दृष्टधर्मसुखविहाराय समा(3)धिभावना। तदधिकत्वा[त्] अन्यान्यपि ज्ञेयाणि(नि)। नावश्यं सम्परायसुखविहारायः(य), परिहीणोर्ध्वोपपन्नः परिणि(नि)र्वितदभावात्। दिव्यचक्षुरभिज्ञादर्शणा(ना)य समाधिभावना।[1] प्रयोगजाः खलु सर्वे गुणास्त्रैधातुकाणा(ना)स्रवाः प्रज्ञाप्रभेदाय समाधिभावनात्(नाः) ॥

[587] योऽन्त्यो वज्रोपमे ध्याने सर्वक्लेशक्षयाय सा।[2]

य(4)श्चतुर्थे ध्याने वज्रोपमः समाधिः स आस्रवक्षयाय समाधिभावना।

सूत्रं चैतत्समाख्यातं बुद्धेनात्मोपनायिकम् ॥[3]

अतश्चतुर्थमेव ध्यानमुक्तमिति ॥

अभिधर्मप्रदीपे[4] विभाषाप्रभायां वृत्तौ अष्टमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

Cf. चतस्सो···समाधिभावना। अत्थि···समाधिभावना भाविता बहुलीकता दिट्ठधम्मसुखविहाराय संवत्तति···ञाणदस्सनपटिलाभाय···सतिसम्पजञ्ञाय···आसवानं खयाय संवत्तति। *Aṅg.* II. p. 44.

[1] आह। दिव्यचक्षुरभिज्ञा ज्ञानदर्शनाय संवर्तत इत्युक्तम्। न च दिव्यचक्षुरभिज्ञासमाधिभावना। अत्रोच्यते। अयं फले हेतूपचारः। यस्य हेतोः समाधिभावनाय दिव्यचक्षुरभिज्ञाफलं तत्र फले हेतूपचारः। ज्ञानदर्शनाय समाधिभावनेति। येषां पुनरयं पक्षः 'षड्विधा मुक्तिमार्गधीः' इति ध्यानसंगृहीता एव मानसा विमुक्तिमार्गाः षडभिज्ञाः, तेषामचोद्यमेवैतत्। तेषां विमुक्तिमार्गाणां समाहितत्वात्। **पूर्वक एव तु पक्षो अभिधर्मकोशचिन्तकानामित्यवगन्तव्यम्**।··· *Sakv.* p. 685.

[2] Cf. **वज्रोपमेऽन्त्ये यो ध्याने सास्रवक्षयभावना** ॥ *Ak.* VIII. 28 cd.

[3] **'आत्मोपनायिका किलैषा भगवतो धर्मोपदेशना'** इति। आत्मना उपनायिका आत्मनो देशिकेत्यर्थः। बोधिसत्त्वो हि कर्मान्तप्रत्यवेक्षणाय निष्क्रान्तो जम्बुमूले **प्रथमं ध्यानमुत्पादितवान्**। बोधिमूले च देवपुत्रमारं भंक्त्वा प्रथमे यामे **दिव्यं चक्षुरुत्पादितवान्**। तेन दिव्येन चक्षुषा सत्त्वांश्च्युत्युपपत्तिसंकटस्थानभिवीक्ष्य तत् परित्राणाय मध्यमे यामे **ध्यानविमोक्षसमापत्तीः** सम्मुखीकृतवान्। तेऽस्य प्रायोगिकाः गुणाः प्रज्ञाप्रभेदाय जायन्ते। ततस्तृतीये यामे **चतुर्थं ध्यानं** निश्रित्य नियाममवक्रम्य यावद् **वज्रोपमेन** समाधिना सर्वसंयोजनप्रहाणं कृतवानिति। यस्माच्चैवं आत्मोपनायिका धर्मदेशना। *Sakv.* p. 685. See *M. sutta* 4.

[4] V. supra, p. 347, n. 1.

अष्टमाध्याये

चतुर्थपादः ।

निर्दिष्टाः समाधयः । अतः परं समाधिसन्निश्रिता (5)गुना(णा) निर्दिश्यन्ते ।

अप्रमाना(णा)नि चत्वारि मैत्री करुणा मुदितोपेक्षा च ।[1] अप्रमाणा(नाः), सत्त्वाधिष्ठानप्रवृत्तेरप्रमान(ण)पुण्यनिर्वर्तकत्वादप्रमेयेषु फलहेतुत्वाच्च ।

अथाप्रमाणानां कः स्वभावः ?

[588] चतुर्णामप्रमाणानां मैत्र्यद्वेषस्तथा कृपा ।
मुदिता प्रीतिरेकेषामुपेक्षाऽलोभ इष्यते ॥[2]

अद्वे(6)षस्वभावा मैत्री । तथा करुणा अद्वेषस्वभावा । कस्तर्ह्येतयोरप्रमान(ण)योर्विशेषः ? उभयोरद्वेषात्मकत्वेऽपि मैत्री सत्त्वापरित्यागवर्तिनो द्वेषस्य प्रतिपक्षो हर्षाकारप्रवृत्ता च । करुणा ताडनपीडनाभिप्रायवर्तिणो(नो) द्वेषस्य प्रतिपक्षो दैन्याकारप्रवृत्ता च । इत्यस्ति विशेषः । "सोमनस्यस्वभावा(7) मुदिता"[3] इति पौराणाः । उपेक्षाप्यलोभात्मकैव । एषोऽप्रमाणानां स्वभावः ।

कस्माच्चत्वार्येव न न्यूनान्यधिकानि वा ?[4]

---

[1] चतस्सो अप्पमञ्ञायो । इधावुसो भिक्खु मेत्तासहगतेन चेतसा एकं दिसं··· सब्बधि सब्बत्तताय सब्बावन्तं लोकं मेत्तासहगतेन चेतसा विपुलेन महग्गतेन अप्पमानेन अवेरेन अव्यापज्झेन फरित्वा विहरति । करुणासहगतेन चेतसा·· मुदितासहगतेन चेतसा···उपेक्खासहगतेन चेतसा···विहरति । *Dīgha.* xxxiii. 1. 11. See *Vbh.* p. 272-282; *Dhs A.* iii. 399-416; *Vm.* ix. 1-124; *Yogasūtra*, i. 33, iii. 23.

[2] Cf. अप्रमाणानि चत्वारि व्यापादादिविपक्षतः ।
मैत्र्यद्वेषोऽपि करुणा मुदिता सुमनस्कता ॥ *Ak.* viii. 29.

[3] V. supra, p. 52, n. 3.

[4] Cf. कस्मा च चतस्सो वा ति ?···
विसुद्धिमग्गादिवसा चतस्सो, हितादिआकारवसा पनासं ।
कमो, पवत्तन्ति च अप्पमाणे ता गोचरे येन तदप्पमञ्ञा ॥ *Vm.* ix. 107.

[589]. व्यापादस्य विहिंसाया अरतेस्तृड्द्विषस्तथा ।
प्रतिपक्षोऽयमाख्यातो दमनार्थं स्वचेतसः ॥

सूत्र उक्तम्—[1]"मैत्री आसेविता भाविता बहुलीकृता व्यापादप्रहाणाय संवर्तते । करुणा विहिंसाप्रहा(8)णाय । अरतिप्रहाणाय मुदिता । कामरागव्यापादप्रहाणायोपेक्षा[2] ॥"

वृत्तिः पुनर्द्रष्टव्या—

[590] सुखाधाने सुखा मैत्री दुःखनाशोन्मुखी कृपा ।
मुदिता मोदनानिम्ना सत्त्वा एभ्येव पश्चिमा ॥[3]

[591] द्रष्टव्या वृत्तिरेतेषां

आकारस्तु पुनः कथं प्रतिपत्तव्य इति ? तदपदिश्यते—

आकारैः सुखितादि(9)भिः ।[4]

सुखिता वत सन्तु सत्त्वा[5] इति मनसि कुर्वन् मैत्रीं समापद्यते । दुःखिता वत सत्त्वा इति करुणाम् । मोदन्तां वत सत्त्वा इति मुदिताम् । सत्त्वा इत्येव मनसि कुर्वन्नुपेक्षां समापद्यते माध्यस्थ्यात् ।

एभ्यस्त्वन्यतमेनापि ब्रह्मसायुज्यमश्नुते ॥[6]

---

[1] Cf. निस्सरणं हेतं, आवुसो, व्यापादस्स, यदिदं मेत्ता चेतोविमुत्ति, निःसरणं··· विहेसाय, यदिदं करुणा चेतोविमुत्ति, निःसरणं···अरतिया, यदिदं मुदिता चेतोविमुत्ति, निःसरणं···रागस्स यदिदं उपेक्खा चेतोविमुत्ति । *Dīgha*, xxxiii. 2. 2.

[2] The Kośakāra discusses one more point:—अशुभोपेक्षयोः कामरागप्रतिपक्षत्वे को विशेषः ? वर्णरागस्याशुभा मैथुनरागस्योपेक्षेति वैभाषिकाः । एवं तु युज्यते मैथुनरागस्याशुभा मातृपितृज्ञातिरागस्योपेक्षेति । *Akb*. viii. 29 b.

[3] See *Vm*. ix. 92.

[4] Cf. **उपेक्षाऽलोभ आकारः सुखिता दुःखिता बत ।**
मोदन्तामिति सत्त्वाश्च *Ak*. viii. 30 abc.

Also cf. कतमेहि पञ्चहाकारेहि अनोधिसो फरणा मेत्ता चेतोविमुत्ति ? सब्बे सत्ता अवेरा अब्यापज्झा अनीघा सुखी अत्तानं परिहरन्तु··*Paṭisambhidā*, ii. p. 130.

[5] Cf. सुखिनो वा खेमिनो होन्तु सब्बे सत्ता भवन्तु सुखितत्ता । *Suttanipāta*, 145.

[6] See *Tevijja-sutta*, *Dīgha*, viii. 81.

एभ्योऽप्रमाणेभ्य एकेणा(ना)पि भावितेन ब्रह्मत्वं[१] प्रतिलभ्यत इति ॥

[III. A, 2. Fol. 150b.[२]](1)**किमालम्बना अप्रमाणाः, कति भूमिका वेत्यपदिश्यते—**

[592] नृषु कामावलम्बीनि ध्यानयोर्मुदिताभ्य(द्व)योः ।
षड्भौमानि तदा(द)न्यानि केचिदिच्छन्ति सप्तसु ॥[३].

[४]मैत्रीकरुणामुदितास्त्रयः कामावचरसत्त्वालम्बनाः । उपेक्षा अनियता इति । येषां तावद्भा[वना]मयान्येतानि मुदिता च सौमनस्येन्द्रियं तेषां प्रथमद्वितीययो(2)र्ध्यानयोर्मुदिता । नोर्ध्वं सौमनस्येन्द्रियाभावात् । अन्यानि त्रीण्यप्रमाना(णा)नि षट्सु भूमिष्वणा(ना)गम्ये ध्यानान्तरे चतुर्षु ध्यानेषु । केचित् पुनः चिन्तामयान्यप्येतानि प्रमोद्यं च प्रीतेर्धर्मान्तरं [इति] तेषां सप्तभूमिका । प्रामोद्यस्य वेदनाद्वयसंप्रयोगित्वात् ।[४] उक्तान्यप्रमाना(णा)नि ॥[५]

अथ कति विमोक्षाः ।

[593] विमोक्षाः कथिता अष्टौ[६] (8)तेषांद्वावशुभात्मकौ ।

---

[१] तत्थ सिया—कस्मा पनेता···ब्रह्मविहारा ति वुच्चन्ति ?···विभंगे कस्मा अप्पमञ्ञा ति वुत्ता ति ? वुच्चते-- सेट्ठट्ठेन ताव निद्दोसभावेन चेत्थ ब्रह्मविहारता वेदितब्बा । सत्तेसु हि सम्मापटिपत्तिभावेन सेट्ठा एते विहारा ।···एतेहि संपयुत्ता योगिनो ब्रह्मसमा व हुत्वा विहरन्ती ति··· *DhsA.* III. 411-412.

[२] V. supra, p.—n.

[३] Cf. **कामसत्त्वास्तु गोचराः ।**

ध्यानयोर्मुदिताऽन्यानि षट्सु केचित्तु पञ्चसु ।
न तैः प्रहाणं नृष्वेव जन्यन्ते त्र्यन्वितो ध्रुवम् ॥ *Ak.* VIII. 30 d, 31.

[४–४] Cf. प्रथमद्वितीयध्यानयोर्मुदिता । सौमनस्यत्वात् । अन्यानि त्रीण्यप्रमाणानि षट्सु भूमिषु, अनागम्ये ध्यानान्तरे ध्यानेषु च । सप्रयोगमौलग्रहणात् । केचित् पुनः अनागम्यं हित्वा पञ्चस्वेतानीच्छन्ति । दशस्वित्यपरे । कामधातुं सामन्तकानि च प्रक्षिप्य समाहितासमाहितमौलप्रयोगग्रहणात् । *Akb.* VIII. 31 ab.

[५] The Kośakāra discusses one more topic :—किमप्रमाणैरपि क्लेशप्रहाणं भवति ? *Akb.* VIII. 31 c.

[६] अट्ठ विमोक्खा । रूपी रूपानि पस्सति । अयं पठमो विमोक्खो । अज्झत्तं अरूपसञ्ञी एको बहिद्धा रूपानि पस्सति । अयं दुतीयो विमोक्खो । सुभन्त्वेव अधिमुत्तो

तावाद्यध्यानयोरन्त्ये तृतीयोऽलोभलक्षणः ॥[1]

रूपी रूपाणि पश्यतीति प्रथमो विमोक्षः। आध्यात्ममरूपसंज्ञी बहिर्धा रूपाणि पश्यतीति द्वितीयो विमोक्षः। शुभं विमोक्षं कायेण साक्षात्कृत्वोपसम्पद्य विहरतीति तृतीयः। तेषां द्वावशुभस्वभावौ प्रथमौ तदाकारत्वाद् भूमितश्च तौ स(4)सामन्तकयोः प्रथमद्वितीययोर्ध्यानयोर्ध्यानान्तरे च। ससामन्तके चतुर्थे ध्याने शुभो विमोक्षः[2]। च चालोभस्वभाव एव न त्वशुभात्मकः, तच्छुभाकारप्रवृत्तत्वात्। सपरिवारास्त्वेते पञ्चस्कन्धस्वभावाः ॥

[594] चत्वारः कुशलारूपा विमोक्षाख्या समाहिताः ।
निरोधाख्यसमापत्तिर्विमोक्षः कथितोऽष्टमः ॥[3]

(5)चत्वारोऽन्ये विमोक्षाः समाहिताः कुशला एवारूप्याः द्रष्टव्याः। संज्ञावेदितनिरोधस्त्वष्ट[मो] विमोक्षः । वैमुख्यार्थो हि विमोक्षार्थः,[4] निरोधसमापत्तिः; सर्वसालम्बनप्रवृत्तिवैमुख्यात् ॥

[595] तस्यास्तु संमुखीभावः सूक्ष्मसूक्ष्माद[न]न्तरम् ।[5]

त्रिविधं हि भावाग्रिकं चित्तं संज्ञासूक्ष्मसूक्ष्माख्यभेदात्। एतद्यथा-

---

होति। अयं ततियो विमोक्खो। सब्बसो रूपसञ्ञानं समतिक्कमा···आकासानञ्चायतनं उपसम्पज्ज विहरति। अयं चतुत्थो विमोक्खो।···विञ्ञाणञ्चायतनं उपसम्पज्ज विहरति। अयं पञ्चमो विमोक्खो।···आकिञ्चञ्ञायतनं उपसम्पज्ज विहरति। अयं छट्ठो विमोक्खो।···नेवसञ्ञानासञ्ञायतनं उपसम्पज्ज विहरति। अयं सत्तमो विमोक्खो। सब्बसो नेवसञ्ञानासञ्ञायतनं समतिक्कम्म सञ्ञावेदयितनिरोधं उपसम्पज्ज विहरति। अयं अट्ठमो विमोक्खो। *Dīgha*, xxxiii. 3. 1. See *Sakv*. p. 688.

[1] Cf. अष्टौ विमोक्षाः प्रथमावशुभा ध्यानयोर्द्वयोः ।
तृतीयोऽन्त्ये स चालोभः शुभारूप्याः समाहिताः । *Ak*. viii. 32.

[2] See *DhsA*. iii. 397.

[3] Cf. निरोधस्तु समापत्तिः । *Ak*. viii. 33 a.

[4] 'संज्ञावेदितवैमुख्यात्···सर्वसंस्कृताद्वा' वैमुख्याद्विमोक्षः 'समापत्त्यावरणविमोक्षणाद्विमोक्ष'इति।···वैमुख्याद्विमोक्ष इति। *Sakv*. p. 689.

Cf. केन पनट्ठेन विमोक्खो वेदितब्बो ति ? अधिमुच्चनट्ठेन।···पच्चनीकधम्मेहि सुट्ठु विमोचनट्ठो, आरम्मणे च अभिरतिवसेन सुट्ठु अधिमोचनट्ठो। *DhsA*. iii. 395.

[5] Cf. सूक्ष्मसूक्ष्मादनन्तरम् ॥ *Ak*. viii. 33 d. See *Vm*. xxiii. 31.

क्रममौदारिकम्। (6)अतः सूक्ष्मसूक्ष्माख्यं भवाग्रानन्तरं तां समापत्तिं समापद्यन्ते। तथा समापन्नानां तु

व्युत्थानचित्तमप्यस्याः स्वं शुद्धं निर्मलं त्वधः ॥[१]

सास्रवानास्रवत्वात्। तद्व्युत्थानचित्तस्य सास्रवेन(ण) चेद्व्युत्तिष्ठते भावाग्रिकेण। अनास्रवेण चेदाकिञ्चन्यायतनभूमिकेन ॥

अथैते विमोक्षाः किं विषयाः ?

[596] कामावचरदृश्यार्था वि(7)मोक्षाः प्रथमास्त्रयः।

कामावचरं रूपावचरमेषामालम्बनं यथायोगमशुभतः शुभतश्च।

अन्ये त्वन्वयधीपक्षस्वोर्ध्वदुःखाद्यवेक्षिणः ॥[२]

आरूप्यविमोक्षाणां स्वभूम्यूर्ध्वभूमिकं दुःखमालम्बनं तद्धेतुनिरोधौ च। सर्वचान्वयज्ञानम(प)क्ष्यो मार्ग ऊर्ध्वाधरभूमिसंगृहीतः, अप्रतिसंख्यानिरोधश्च। उ(8)क्ता विमोक्षाः ॥

[597] सूत्रेऽभिभवसंज्ञाख्यं प्रोक्तमायतनाष्टकम्।
विमोक्षाधिकवृत्त्येतच्चित्तैश्वर्यप्रदर्शकम् ॥[३]

सूत्रे[४] भगवता अष्टौ अभिभ्वायतनान्याख्यातानि[५] "अध्यात्मं रूपसंज्ञी

---

[१] Cf. स्वशुद्धकाधरार्येण व्युत्थानं चेतसा ततः। *Ak*. VIII. 33 cd.

[२] Cf. कामाप्तदृश्यविषयाः प्रथमाः ये त्वरूपिणः।
तेऽन्वयज्ञानपक्षोर्ध्वस्वभूदुःखादिगोचराः ॥ *Ak*. VIII. 34.

[३] Cf. अभिभ्वायतनान्यष्टौ द्वयमाद्यविमोक्षवत्।
द्वे द्वितीयवदन्यानि पुनः शुभविमोक्षवत् ॥ *Ak*. VIII. 35.

[४] For the different versions in *sūtra* and *Abhidharma*, see *DhsA*. III. 392.

[५] अज्झत्तं रूपसञ्ञी एको बहिद्धा रूपानि पस्सति परित्तानि सुवण्णदुब्बण्णानि, तानि अभिभुय्य 'जानामि पस्सामी'ति एवं सञ्ञी होति। इदं पठमं अभिभायतनं।··· अप्पमाणानि···। अज्झत्तं अरूपसञ्ञी···परित्तानि···।···अप्पमाणानि···।···नीलानि···। ···पीतानि···।···लोहितकानि···।···ओदातानि···। *Dīgha*, XXXIII. 3. 1.

बहिर्धा रूपाणि पश्यति सुवर्णदुर्वर्णानि खलु रूपाणि अभिभूय जानाति, अभिभूय पश्यति, एवं संज्ञी च भवतीदं (९)प्रथममभिभ्वायतनम्। अध्यात्मं रूपसंज्ञी बहिर्धा रूपाणि पश्यत्यप्रमाणानि सुवर्णदुर्वर्णानीति विस्तरो यावदिदं द्वितीयमभिभ्वायतनम्। एवमध्यात्ममरूपसंज्ञी बही रूपाणि पश्यति परीत्तान्यप्रमाणानि चेति चत्वारि। अध्यात्ममरूपसंज्ञ्येव च बहिर्धा रूपाणि पश्यति नीलपीतलौहितावदात…"…[Remaining folios lost]…

[…अभिधर्मदीपे विभाषाप्रभायां वृत्तौ अष्टमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥]

[…अष्टमोऽध्यायः समाप्तः ॥]

[अभिधर्मदीपे विभाषाप्रभावृत्तिः समाप्ता ॥]

* * *

INDICES

१. अभिधर्मदीपकारिकाणामकारादिक्रमेण सूची ॥

I. Index of the *Kārikās* (a and c) of the *Abhidharma-dīpa*.

(Numbers refer to *kārikās*)

अकर्तृकान्निरीहांश्च, 388
अकार्यप्रवणो लोकः, 259
अकोप्यधर्मनो(णो) ख्याते, 512
अक्लिष्टाव्याकृतं चित्तम्, 121
अक्षैकादशकोपेताः, 104
अक्षोत्तमावरज्ञान, 494
अङ्गान्याद्ये शुभे पञ्च, 542
अङ्गान्येतानि कथ्यन्ते, 546
अजय्यैकमनेकेन, 531
अजातवर्तमाना च, 133
अजातैर्माण(न)सैरेतैः, 297
अतीताद्यद्धि धात्वर्थम्, 583
अतोऽन्यद्व्रजते यस्तु, 559
अतोऽन्यमिह यो ब्रूयात् 235
अतोऽभिसमयान्त्याख्यम्, 490
अदोध्वस्तं तदास्वाद्यम्, 541
अधिमोक्षकृताऽन्येषाम्, 525
अधिष्ठानं मृतस्यापि, 530
अधिष्ठाय तु निर्माणम्, 530
अधोऽपि मध्यमं कर्म, 177
अधोभूमेस्तु लभ्यन्ते, 579
अध्वाद्याः स्कन्धपर्यायाः, 52
अनधिष्ठातृकत्वं च, 389
अनन्त्यास्तत्र दृङमार्गाः, 424
अनागताभ्यतीतस्य, 319
अनागताश्चतस्रस्तु, 403
अनागतास्तु भाव्यन्ते, 399
अनागतास्तु भाव्यन्ते, 405
अनागम्यं तथैवाद्यम्, 60
अनागम्यं तु निश्रित्य, 59
अनागम्याश्रये न्याम, 576
अनास्रवेन(ण) मार्गेण, 58
अनित्यास्ते तु विज्ञेयाः, 143
अनिमित्तोऽमृताकारैः, 582
अनुशेते द्विधात्वाप्तः, 344
अन्तग्राहार्धमन्यस्तु, 273
अन्तरं सुमहच्छास्तुः, 533
अन्तराभविकप्रेत, 102
अन्तानन्तर्यमार्गस्थाः, 187
अन्त्यधातुपरिज्ञानम्, 95
अन्त्यपूर्वनिनिवासादौ, 418
अन्त्यमाकीर्यते पूर्वम्, 430
अन्त्यां मार्गान्वियज्ञाने, 407
अन्ये(न्त्ये) चत्वार्युपेक्षे द्वे, 545
अन्त्ये ध्याने प्रयोगादि, 410
अन्नमत्यग्निणि(नि)र्दग्धम्, 159
अन्यत्र धर्मधात्वर्था(र्था)त्, 71
अन्यत्तु पूर्ववज्ज्ञेयम्, 340
अन्यत्र रूपशब्दाभ्याम् 17
अन्यत्वाद्यवदाख्येयम्, 343
अन्यथाऽन्यथिकश्चान्यः, 302
अन्यसर्वत्रगैर्बद्धः, 325
अन्यापेक्ष्येऽथ संबन्ध, 306
अन्या प्रतिपदाख्याऽन्या, 295
अन्ये त्वन्वयधीपक्ष, 596
अन्ये नामादयः शब्दात्, 143

अन्यैः षट् सप्त वाऽष्टौ वा, 90
अन्योन्यसंग्रहो ज्ञेयः 10
अपकर्षे जिनोत्पत्तिः, 237
अपायहेतवो ज्ञेयाः, 560
अप्राप्तग्राहिणः सिद्धाः, 46
अप्राप्यार्थं मनश्चक्षुः, 45
अभिज्ञाफलताऽभिज्ञा, 521
अभिज्ञाफलचित्तेन, 527
अभिधर्मनयज्ञाने, 577
अभिध्याख्यस्तथा द्वेषः, 370
अभिध्यादित्रयं तद्वत्, 202
अभिध्यादीन्यपि त्रीणि, 188
अभ्युद्गच्छति कामाप्तम्, 121
अमूर्ता ध्वनिना सार्धं, 35
अमूर्ताः नौपचयिकाः, 38
अमेयं बोधिसत्त्वाय, 249
अयुक्तविहितं कर्म, 222
अयोगा(गो) नांशुविध्वंसात्, 169
अरणा प्रणिधिज्ञानम्, 509
अरणा संवृतिज्ञानम्, 511
अर्थज्ञयाऽन्यथावादः, 196
अर्थप्रत्यायकः प्राज्ञैः, 144
अर्थाख्या खलु सर्वत्र, 515
अर्हतां दशधा त्वेतद्, 532
अर्हत्सान्तानिका ह्येते, 509
अवस्था जायते काचित्, 323
अविज्ञप्तिरतोऽन्यस्याः, 167
अविद्याख्यस्तु मूलत्वाद्, 361
अविद्याधीश्च तृष्णा च, 291
अव्यक्तान्यधनादानम् 195
अव्याकृतद्वयस्यापि, 291
अव्याकृतमभिज्ञोत्थम्, 531
अव्याकृतस्य ते तु द्वे, 208
अव्याकृतस्वभावत्वात्, 253
अव्याकृतास्तिवादीति, 299
अशुभास्तु दशान्यत्र, 203
अशैक्षाख्योऽपि बोद्धव्यः, 436
अष्टाकारं द्वितीयं तु, 501
अष्टानां नीरजस्कानाम्, 461
अष्टाभिर्दशभिः सेकैः, 108
अष्टाभिर्निःशुभः, 109
असंभिन्नार्थविषयम्, 385
असंवरो दमप्राप्तिः, 17
[असाधारण] वैशिष्ट्यात्, 54
असिद्धेरुक्तदोषत्वात्, 556
अस्वीकाराद्विपक्षत्वात्, 286
अहं ममेति या दृष्टिः, 269
अहेतावपथे चैव, 271
आकारपतितं ज्ञानम्, 394
आकाराः खलु चत्वारः, 406
आकाराः खलु सर्वेऽपि, 400
आकाराः सकला ज्ञेयाः, 403
आकाराः सकलास्तत्र, 402
आकाराः सकलास्तत्र, 404
आकारांस्तुल्यजातीयात्(न्), 397
आख्याता धातवः सूत्रे, 470
आगमादुपपत्तेश्च, 141
आगमाद्युक्तितश्चैव, 138
आग्नेयात्सप्तकादेकः, 152
आत्तसामान्यसंज्ञाकाः, 260
आत्मीयाधस्त्रयैकोर्ध्व, 329
आदिलाभे सह प्राक् च, 131
आदौ तथा प्रयुक्तत्वात्, 553
आद्यं दृष्टिद्वयं कामे, 289
आद्यध्यानफलं द्वे तैः, 527
आद्यन्तबलरूपे द्वे, 506
आद्यन्तलाभो नवभिः, 92
आद्यन्त्ये द्वे दृशौ काङ्क्षा, 366
आद्यवत्तु परावृत्ते, 343
आद्या दत्तविपाकेन, 220
आद्याऽन्या तदभिव्यङ्ग्या, 513
आद्ये ध्यानेऽखिला मौले, 458

आद्ये प्रीतिसुखोपेक्षा, 549
आध्यात्मिकेति सारूप्यात्, 153
आनन्तर्यपथाः कामे, 186
आनन्तर्यपथे कामे, 206
आनन्तर्यपथे चोर्ध्वम्, 491
आनन्तर्यपथे मुक्तौ, 410
आनन्तर्यपथे मुक्तौ, 417
आनन्तर्यविमुक्त्याख्यौ, 439
आनन्तर्याह्वये मार्गे, 571
आनुपूर्विकयद्भूयो, 436
आप्तोक्तिस्वक्रियालिङ्गाः, 128
आभास्वराच्च वैराग्यम्, 69
आयद्वारं ह्यायतनम्, 5
आयुष्परिग्रहादेवम्, 152
आर्यसन्तानिका जाता, 511
आयस्य कामवैराग्यम्, 67
आर्यस्य कामवैराग्ये, 573
आर्यस्य खलु वैराग्य, 416
आर्याः शिष्यगुणाः संघः, 163
आर्याकारमतिद्योताः, 581
आरूप्यकृत्स्नयोस्त्वन्त्याम्, 415
आरूप्यधातुजातस्य, 355
आरूप्याः कुशला मौलाः, 578
आरूप्याः सर्वगा सार्धम्, 337
आरूप्याणां विमोक्षाणाम्, 414
आरूप्याख्यविमोक्षादौ, 419
आरूप्या भावनाहेयाः, 346
आरूप्याप्तं दशानां तु, 331
आरूप्याप्तास्त्रिधात्वाप्त, 329
आरूप्याप्ताश्च चत्वारः, 338
आरूप्यार्याऽसंज्ञिनां च, 203
आरूप्यावचराः सार्धम्, 333
आरूप्याव्याकृतज्ञातम्, 34
आरूप्याव्याकृते हित्वा, 33
आलोचनोपलब्धित्वात्, 44
आविष्टलिङ्गमुख्यस्य, 311
आशयादिमृदुत्वादेः, 248
आसंज्ञिकं विपाकः, 134
आस्रवक्षयधीसंज्ञम्, 500
आस्वादवत्सतृष्णं यत्, 541
आह्रीक्यमनपत्राप्यम्, 382
आह्रीक्यमनपत्राप्यम, 383
इच्छत्यध्वत्रयं यस्मात्, 301
इतरैरपि सामान्याः, 510
इतोऽन्यधातुजानां तु, 379
इत्येवमादयः शब्दाः, 119
ईर्ष्यया दौर्मण(न)स्येण(न), 380
उच्छिन्नशुभबीजस्य, 23
उद्भवार्थं सुखार्थं च, 430
उपक्लेशास्तु विज्ञेयाः, 371
उपेक्षया तु सर्वेषाम्, 379
उपेक्षायुर्मणो(नो)युक्तो, 99
[उपे]क्षावेदिताभावात्, 548
उपेक्षावेद्यमन्यत्र, 176
ऊर्ध्वजस्तु सुखेनार्यः, 97
ऊर्ध्वभूमिकमानेञ्ज्यम्, 175
ऊष्मभ्योऽधिकसामर्थ्यात्, 395
ऊष्मादिवर्ज्ये चालब्धे, 569
रि(ऋ)द्धिचित्तक्षयाभिज्ञा, 523
रि(ऋ)द्धिपादास्तु चत्वारः, 445
ऋद्धिश्रोत्राख्यभिज्ञास्तु, 520
रि(ऋ)द्धौ श्रोत्रेऽन्यचित्ते, 517
रि(ऋ)द्ध्यादौ तु गुणाः सर्वम्, 417
एकं त्रीणि द्वयं चैव, 211
एकं वा पञ्च वा षड् वा, 354
एककारित्रनाशाभ्याम्, 140
एकसम्पत्तु संवृत्या, 160
एकस्य चक्षुषः कार्यं, 45
एकस्य ब्रुवतः सर्वे, 529
एकांशाख्यं विभज्याख्यम्, 294
एकादशभिरन्त्याभ्याम्, 100
एकादशभिराप्तिस्तु, 92

एकादशभुवः सर्वे, 585
एकार्थरुचिहेतुर्यः, 134
एका स्वभावतोऽशैक्षी, 522
एकेनाक्षिप्यते [जन्म], 213
एतद्विपर्ययात् मान्द्यात्, 28
एतन्निर्वेधभागीयम्, 421
एतान्यो याति शरणम्, 163
एतेऽनुशेरते यस्मात्, 287
एभ्यस्त्वन्यतमेनापि, 591
एभ्योऽनुनयनिष्यन्दाः, 374
एभ्यो यः प्रथमो वादी, 300
एवं त्रिष्वपि सत्येषु, 424
एवं रूपेऽपि विज्ञेयः, 111
एष चोर्ध्वगतिश्चैव, 429
एषां यथोपदिष्टाणां(नां), 510
ऐश्वर्यार्थो विपश्चिद्भिः, 76
ऐश्वर्येऽपि समानेऽस्मिन्, 533
औदासीन्यान्न निर्वाणम्, 456
कथितं बलशब्देन, 445
करुणाभावनोद्रेकात्, 240
कर्त्तृता भोक्तृता चोक्ता, 215
कर्मणां वोध्यते शक्तिः, 157
कर्म त्वत्र द्विधा ज्ञेयम्, 558
कर्माण्येतानि लोकस्य, 155
कर्मातीतमसद्यस्य, 318
कर्मानुष्ठानतो मोक्षो, 557
कल्पानां महतामेतद्, 236
काङ्क्षा च दौर्मण(न)स्येन, 378
काङ्क्षा पञ्च दृशो, 278
काङ्क्षामिथ्यादृगाभ्यां च, 282
काङ्क्षामिथ्येक्षणं तस्याः, 357
कामदेवा मृताः स्वल्पैः, 105
कामधातुपरिज्ञानम्, 94
कामरागो भवाख्यश्च, 263
कामवैराग्यमाप्नोति, 66
कामाद्याप्ताः यथायोगम्, 350
कामापन्नास्त्रयो रूपाः, 349
कामाप्तं कुशलं नाम, 172
कामाप्तं पञ्चविषयो, 331
कामाप्तं प्रथमं पुण्यम्, 175
कामाप्तं षष्ठजं त्रेधा, 229
कामाप्तमूर्ध्वधर्मार्थे, 332
कामाप्तसंवरत्यागः, 168
कामाप्ताव्याकृते हित्वा, 32
कामाप्ताव्याकृते हित्वा, 34
कामावचरदृश्यार्थाः, 596
कामिनः खलु दुःखेन, 97
[कामे ध्यानेषु धर्माख्या], 516
कामेभ्यो वीतरागस्य, 24
कामेष्वकुशलाः शेषाः, 290
कामेष्वेकाधिकः काये, 110
कायदुष्ठूलताद्याश्च, 376
कायस्य बाधनं दुःखम्, 86
कायादिकर्म तत्तत्वम्, 244
कायाद्यकुशलं कर्म, 188
कायिकं वाङ्मयं चैव, 155
कायेन्द्रियाद्विशिष्टत्वम्, 75
कारिताः षडविज्ञप्तिः, 190
कारित्रेणाध्वनामेषः, 303
कालान्तरफलोत्पाद, 83
कुरून् सनरकान् हित्वा, 204
कुशलं नास्ति विज्ञानं, 23
कुशलं वाऽथवा पापम्, 214
कुशलस्याविचारस्य, 184
[कुशलाः प्रयोगपृष्ठाश्च], 192
कृत्स्नाद्रूपमयाद्धातोः, 61
को विघ्नोऽङ्गवैकल्यम्, 320
कौकृत्यं विचिकित्सोत्थम्, 375
क्रमवृत्तेर्ण(र्न) शब्देन, 146
क्रमादेकद्विचत्वारि, 213
क्रमेण जायते पश्चात्, 392
क्रियया[ऽ]संवरप्राप्तिः, 167

क्रियारम्भप्रधानत्वात्, 453
क्लिष्टं विकल्पकं चापि, 25
क्लिष्टं संभिन्नलापित्वम्, 198
क्लिष्टमेव हि विज्ञानम्, 14
क्लिष्टाक्लिष्टदृशौ तद्वत्, 43
क्लिष्टाणां कुशलानां च, 132
क्लिष्टे त्वङ्गद्वयं प्रज्ञा, 544
क्लिष्टे ध्याने चतुर्थे तु 545
क्लिष्टे षडशुभे तु द्वे, 114
क्लेश उत्पद्यते कश्चित्, 359
क्लेशस्वोपरिसस्थान, 565
क्लेशात्यन्तक्षयोऽन्त्येन, 384
क्लेशोत्पत्तौ सुखादीनाम्, 78
क्षणोन्त्यो भावनामार्गात्, 425
क्षयज्ञानं मता बोधिः, 441
क्षयमप्रतिसंख्याख्यम्, 585
क्षान्तिज्ञानानि भाव्यन्ते, 489
क्षिप्राभिज्ञाल्पबुद्धेस्तु, 440
क्षेत्राशयविशेषाच्च, 182
खधातुः पृथगाकाशात् 14
खनिमित्तोद्ग्रहाकृष्टः, 551
गतिधर्मार्यभेदं यत्, 497
गतिप्रज्ञप्त्युपादानम्, 138
गन्धधातुं रसाख्यं च, 65
गुणदुःखोपकाराख्यैः, 248
गुणो विशेषणं धर्मो, 119
गोत्रद्वारसमूहादीन्, 391
गोत्रलाभे तु विज्ञेया, 400
घ्राणं जिह्वा च कायश्च, 57
चक्षुः पश्यति रूपाणि, 44
चक्षुः सधर्मधात्वंशं, 42
चक्षुरादिद्विभावेऽपि, 53
चक्षुर्धातुं हि रूपाप्तम्, 61
चक्षुर्विज्ञानधातुं तु, 64
चक्षुस्तदुपलब्धिश्च, 39
चतसृभ्यस्त्वन्यतमा, 398
चतस्रः संवृतिज्ञानम्, 518
चतस्रो दृक्पथा दृष्टौ, 186
चतस्रोऽनागतास्तद्वत्, 407
चतस्रोऽप्येकमन्त्यैकम्, 362
[चतुःपञ्चेषु स्कन्धेषु], 536
चतुरः परिजानाति, 67
चतुर्णामपि चाक्षेपः, 179
चतुर्णामप्रमाणानाम्, 588
चतुर्णामप्यधिष्ठानम्, 194
चतुर्थी पञ्चमी षष्ठी, 475
चतुर्धाऽऽरूप्यगाम्यन्यः, 426
चतुर्भिः कायसुखवान्, 99
चतुर्भिस्त्वमलेनार्यम्, 206
चतुर्ष्वैकैकवृद्ध्योर्ध्वम्, 486
चत्वारः कुशलारूपाः, 594
चत्वारः परिवृत्ते स्वे, 333
चत्वारि स्थित्यनास्तित्वे, 139
चत्वारि स्मृत्युपस्थाना, 483
चत्वारो ध्यायिनः प्रोक्ताः, 555
चत्वार्येकभुवो द्वे वा, 210
चलत्वादूर्ध्ववृत्तित्वात्, 292
चितानां परमाणूनाम्, 317
चित्तं चैतसिकैः सार्धम्, 111
चित्तं प्रधानमेतेषाम्, 120
चित्तमार्येतराकारम्, 554
चित्तवेगादिविच्छेदैः, 172
चित्ताख्याः सप्त सालम्बाः, 35
चेतना न क्रियामार्गः, 200
चेतश्चतुष्टयायोगात्, 137
चेतसोः सह विंशत्या, 123
छन्दं वीर्याङ्गभूतत्वात्, 81
छन्दः स्पर्शोऽधिमोक्षश्च, 112
छन्दव्यायाममीमांसा, 445
जगदावरभागीयम्, 365
जाता यत्राप्रहीणाश्च, 296
जातिः स्थितिर्जरा, 139

जातिद्रव्ये निराकृत्य, 477
जात्यादयो न पारार्थ्यात्, 85
जनीहाकर्तृसाध्यत्वात्, 309
जन्मनस्त्रिभिराक्षेपः, 178
जहात्यनुशयांस्त्रींश्च, 68
ज्ञातपूर्वेषु भावेषु, 28
ज्ञानं तु नैष्ठिकं ज्ञेयम्, 559
ज्ञानत्रये त्र्याख्ये च, 573
ज्ञानवध्यास्तु ये तस्मिन्, 268
ज्ञानसाक्षात्क्रियाऽभिज्ञा, 517
ज्ञेयः प्रवृत्तिबाहुल्यात्, 358
ज्ञेयो दृष्टिपरामर्शः, 270
ज्ञेयोऽवतरणेष्वेव, 11
तं सत्पथज्ञं प्रणिपत्य, 1
त एकादशभिर्युक्ता, 103
त एवैकोनविंशत्या, 105
तच्च दृष्टफलं विद्यात्, 183
तच्च्युत्युत्पत्तिबुद्धाख्यम्, 499
ततस्तत्रैवावधृतिः, 423
ततस्तथैव मूर्धानो, 395
ततोऽन्यन्निर्मलं ज्ञेयम्, 207
ततोऽपि यद्द्वीयोऽर्थम्, 16
तत्कथं श्रूयतां सद्भूचः, 320
तत्कुर्वन्वर्तमानोऽध्वा, 303
तत्पाञ्चविध्यतः पञ्च, 431
तत्प्रयोगो द्विधा भूमीः, 566
तत्फलार्थं क्षयज्ञानम्, 433
तत्फलावस्थितस्याद्या, 218
तत्सतत्त्वं तु केषाञ्चिद्, 12
तत्स्मर्यतेऽपि चान्येन, 30
तथागतबलं प्रोक्तम्, 502
तथा चतुरधिष्ठानम्, 232
तथाऽपरसमाध्यादौ, 418
तथा पारमिताश्चापि, 233
तथा शक्तिस्तथा वेला, 323
तथाष्टादशभिश्चित्तैः, 122
तथा संसर्गिसंसर्गात्, 118
तथाऽऽरूप्याप्तमार्यन्तु 171
तथैव च विपाकश्च, 149
तथैव चित्तचैत्तानाम् 117
तथैव त्रय आरूप्याः, 539
तथौघयोगा दृग्वर्ज्जम्, 361
तथ्योहाविधुरत्वाच्च, 368
तदनित्यत्वदुःखत्वे, 387
तदन्यान्यवबोध्यानि, 457
तदन्ये निर्मले त्वक्षे, 88
तदवाप्तेरशैक्षोऽसौ, 434
तदाख्या येऽन्यसूत्रोक्ताः 9
तदा जहाति षट् त्रिषत्, 66
तदा देवमनुष्याणाम्, 225
तदा संयोजनं त्वार्यः, 63
तदालम्बिनि विज्ञाने, 351
तदाश्रये फले चापि, 161
तदुक्त्या च तदुक्तत्वात्, 390
तदुच्छेदध्रुवग्राहौ, 269
तदूर्ध्वमपि चार्यस्य, 408
तद्गुणालम्बना श्रद्धा, 465
तद्गोचरे तु विज्ञाने, 367
तद्दृश्यविषयोऽन्योऽन्यो, 283
तद्दृष्टिहेयजातीनाम्, 277
तद्धियो दश सर्वत्र, 497
तद्भूम्यपुनरुत्पत्तेः, 183
तद्भेदो दशधा प्रोक्तः, 477
तद्भेदाः खल्विमेऽन्येपि, 538
तद्वच्चित्तविभुत्वेक्षी, 552
तद्वदेव च कौकृत्यम्, 124
तद्वदेव द्वितीयेऽपि, 334
तद्वदेव द्वितीयेऽपि, 338
तद्वदेव मताऽभिध्या, 202
तद्वदेवोपघातोऽपि, 314
तद्विकाराद्विकारित्वम्, 2
तद्वित्तूच्छेदशङ्की च, 553

तद्विपक्षशमाङ्गं च, 255
तद्विशेषः पुनर्ज्ज्ञेयः, 427
तद्व्यवस्था निबोद्धव्या, 479
तर्काभिमानिनस्त्वन्ये, 300
तल्लाभो ध्यानवत् ज्ञेयः, 528
तस्मादनुशयान्धातोः, 62
तस्मादन्यत् त्रिभिः 21
तस्मान्न बोधिमार्गोऽन्यः, 235
तस्यास्तु संमुखीभावः: 595
तस्यैवं पश्यतः साक्षात्, 385
तादात्म्यं प्रतिघातत्वात्, 145
तानि ज्ञानानि वक्ष्यामि, 476
तावाद्यध्यानयोरन्त्ये, 593
तास्वेकरस्याध्वसु ज्ञेयौ, 461
तिस्रः खल्वसमुत्पन्नाः, 415
तिस्रो मार्गविधिर्मार्गः, 473
तिस्रो विद्या मतास्त्र्यध्व, 522
तिस्रस्तु नवमे विद्यात्, 411
तीक्ष्णेन्द्रियस्य मौलेषु, 440
तुरीया तु प्रबन्धोक्तिः, 514
तुल्येऽपि साधनोपाये, 239
तृतीयवत्परावृत्ते, 340
तृतीया द्वयमुक्तस्य, 221
तृतीया द्वयसद्भावा, 219
तृतीया शब्दसंस्कारा, 514
तृतीये खल्वपि स्वे च, 342
तृतीये पञ्चमे प्रज्ञा, 544
तृतीयोभययुक्तस्य, 217
तेजसा सप्तकान्त्यैका, 151
तेजोनाशात्कृशौजस्त्वम्, 205
ते त्वभ्यासप्रहेयस्य, 212
तेनाद्भुतक्षणेनैते, 56
तेषां सहभुवो धर्मा 281
ते हेमरूप्यताम्रायश्चक्राः, 238
तैस्तैर्विशेष्यते शब्दैः 116
त्रयानां(णां) वर्गवृत्तित्वे, 74
त्रयानां(णां) त्रीण्यपि, 50
त्रयोऽन्त्यास्त्रिविधाः, 40
त्रयोऽपरसमाध्याख्याः, 584
त्रयो रूपभवादन्त्याद्, 349
त्रिकालेभ्यस्तु मौलेभ्यः, 165
त्रितय्यशुभसंज्ञाद्याः, 474
त्रिद्वीपनरकोत्पन्नाः 101
त्रिधाऽत्युन्नमनादिभ्यः, 275
त्रिधातुसंगृहीतास्तु, 351
त्रिधा ध्यानानि मौलानि, 539
त्रिधेह द्वयमार्यस्य 26
त्रिध्यानकामवैराग्ये, 487
त्रिपुण्यकृतिवस्त्वाद्याः, 232
त्रिवेदनानुशायित्वात्, 369
त्रिसत्याधिगमे लाभः, 462
त्रीणि चत्वारि चैकं च, 212
त्रीण्येवाशुभमूलानि, 290
त्र्यधिकैर्दशभिर्युक्ता, 102
त्वक्स्त्रीत्वव्यञ्जनैः कामे, 96
दश चैकश्च तत्पक्ष्याः, 441
दशधर्मा महाभौमाः, 112
दशभिः सचतुष्कैस्तु, 106
दश सावयवा मूर्ता, 36
दशाप्रनि(णि)हिताकाराः, 582
दशाष्टौ नव चत्वारि, 91
दशेह दुःखदृग्घेयाः, 265
दर्शणा(ना)ख्यतु विज्ञेयः, 435
दर्शनायाक्ष्यभिज्ञोक्ता, 586
दानं हि दीयते येन, 243
दातृवस्त्वादिवैशिष्ट्यात्, 246
दाहकास्तोलकाश्चैते, 37
दिव्यमव्याकृतं श्रोत्रम्, 521
दिव्याक्षिश्रुत्यभिज्ञायाम्, 412
दुःखं दर्शनहेयादेः, 353
दुःखभ्रान्त्यपथादानात्, 271
दुःखहेतुदृगभ्यास, 345

दुःखहेतुधियोर्द्वे द्वे, 484
दुःखहेत्ववलम्बिन्या, 472
दुःखात्समुदयाच्चैव, 277
दुःखाभिसमये तच्च, 272
दुःखेन्द्रिये तु कामाप्तः, 347
दुःखोपसंहृतेर्दुःखम्, 205
दृक्छ्रोत्रकायविज्ञानम्, 550
दृङ्मार्गे प्रथमे ज्ञाने, 486
दृङ्मोहमात्रयुक्तं यत्, 123
दृश्यते न तु सर्वस्मिन्, 562
दृष्टं द्वित्रिचतुः पञ्च, 29
दृष्टं श्रुतं मतं ज्ञातम्, 197
दृष्टिशीलव्रतामर्शौ, 264
दृष्टिहेयावलम्बित्वात्, 266
दृष्ट्या श्रुत्यादिभिश्चाक्षैः, 197
दृष्ट्वा सर्वेष्वनात्मेति, 388
दोषहाणमनुत्पादम्, 445
दौर्मण(न)स्यं द्विहातव्यम्, 89
दौःशील्याशुभमूलाद्यैः, 255
द्रष्टव्यान्यतरा ताभ्यः, 398
द्रष्टव्या वृत्तिरेतेषाम्, 591
द्रव्यतो दश चैकश्च, 279
द्रव्यतो द्वयमेवैतत्, 466
द्रव्यात्मना दशैकं च, 546
द्रव्यामर्षणसामान्याद्, 364
द्वयं दृष्टिपरामर्शादिकः, 273
द्वयं मौलमदः कर्म, 189
द्वयमालम्बतेऽशैक्षं, 585
द्वयमेवात्र निष्पन्नम्, 298
द्वयोः प्रत्येकबुद्धानाम्, 237
द्वात्रिंशल्लक्षणोपेतम्, 227
द्वादशाध्यात्मिका ज्ञेयाः, 39
द्वाभ्यां कामानतिक्रान्तिः, 366
द्वाभ्यां तदुपरिव्यग्रम्, 22
द्वाभ्यां माया तथा शाठ्यम्, 381
द्वाभ्यामव्यप्रमेकेन, 22
द्वाविंशतिप्रकारस्य, 72
द्वाविंशत्या सहावश्यम्, 122
द्वितीयं जन्म जातस्य, 310
द्वितीया तत्फलस्थस्य, 217
द्वितीया तु विहीणे(ने)न, 221
द्वितीयादिष्वनेनैव, 577
द्वितीया ध्रुवपाकस्य, 219
द्वितीयेऽङ्गानि चत्वारि, 543
द्वितीयेऽप्यपसंकल्पाद्, 458
द्विधाप्यकुशलं नास्ति, 24
द्विधा वा क्लिष्टमक्लिष्टम्, 356
द्विधा [हेतुभवालम्बम्], 503
द्विधैतद्गतिनिर्माणे, 524
द्विपक्षग्रन्थनाद् ग्रन्थाः, 370
[द्विध्यान]जास्तु सर्वाल्पैः, ·106
द्विलिङ्गा पश्चिमैः, 109
द्विविधार्हत्वसंप्राप्तौ, 575
द्विविज्ञेयाः गुणाः पञ्च, 71
द्विषतामपि यं दृष्ट्वा, 227
द्वे त्रीणि त्रीणि च द्वे च, 565
द्वे द्वे पञ्च यथासंख्यम्, 211
द्वेषस्य दौर्मण(न)स्येन, 377
द्वेषेण वधपारुष्य, 192
द्वे संवृत्यन्यचित्ताभ्याम्, 478
द्वौ रूपारूपजौ रागौ, 369
द्व्यपेक्षो बलशब्दोयम्, 504 cd.
द्व्यव्याकृतानुभूतं यत्, 31
द्व्येकदृग्घेयकार्योक्तेः, 367
धर्मज्ञानरुचिर्दुःखे, 423
धर्मदानस्वभावो वाक्, 253
धर्मदात्रेऽपि बालाय, 249
धर्मधातोर्विचित्रत्वात्, 60
धर्मभूम्युत्क्रमेणाष्टौ, 567
धर्मव्यापारतो लोके, 469
धर्मसंग्रहविज्ञान, 327
धर्मसंज्ञे त्रयस्कन्धाः, 4

धर्मस्कन्धप्रमाणम् 12
धर्मस्कन्धसहस्राणाम् 11
धर्माः षोडष(श) विज्ञेयाः, 326
धर्माख्याः संमुखीभूताः, 401
धर्माणां सति सामग्र्ये, 317
धर्मान्वयविशेष्ये द्वे, 478
धर्मवित्यप्रसादोसौ, 463
धातुद्वये तु सर्वेऽपि, 289
धातुसत्यार्थचित्तेषु, 480
धात्वन्तरावलम्बित्वात्, 2 0
धात्वायतनसत्येषु, 327
धात्रीवस्त्रमलन्यायैः, 287
धीनामगोचरत्वाच्च, 305
धीराकारः सदाकार्यम्, 482cd
ध्याता प्रोक्तस्तथा ध्येयं, 556
ध्यानसामन्ताकारूप्यें, 547(cd)
ध्यानादिज्ञानसंज्ञम्, 493
ध्यानानि व्यवकीर्यातः, 426
ध्यानादीनां स्वभावादौ, 493
ध्यानान्तरं त्रिधा तद्वत्, 540
ध्यानान्तरे स चारोधः, 580
ध्यानान्तरे वितर्कश्च, 125
ध्यानारूप्यैः प्रहीयन्ते, 579
ध्यानोक्तिराञ्जसी तत्र, 534
न कर्म स्वकतोत्सर्गात् 3
न चित्तं राजकल्पत्वाद्, 451
न जातु दृष्टपूर्वास्ताः, 431
न तत्रेष्टफलाभावात्, 179
न तु संयोजनं किञ्चित्, 65
न प्रस्रब्धिर्विदौत्कट्यात्, १5
नभः खलु नभो धातोः, 15
न मानोऽतिप्रशान्तत्वात्, 285
न रागः शक्त्यहेतुत्वात्, 284
न रूपमस्ति दृग्घेयं, 40
नवज्ञानमयं तद्वत्, 496
